आयु· ८१

आ· ६८

आयुर्वेदशास्त्र

नं० ३३३०

आ० २०१

आयुर्वेद शास्त्र ८

मू० १६।-

आयु. ग्र. ८

शृं·शा·सू·प·३
3330

॥श्री॥

शार्ङ्गधरपद्धतिः प्रारभ्यते

सन्नियोगकारी सत्सद्यमुक्ताव
र॥ रत्नाकरं चापि सुभाषिता
ार्ङ्गधरस्य वीक्ष्य॥१॥ संगृह्य
द्यमुक्तानि वेश्यतायोग्यत
ि धमेतं किल काशिनाथः सम
ाः प्रधानः॥२॥ इंदुग्निनागेंदु
ते भौमे दशम्यां विजये मुहूर्ते॥
ार्ङ्गधराख्यपद्धतिस्तनोतु मोदं
णाम्॥३॥ वाराणसीप्रसादस्य
ततः॥ काशीसंस्कृतमुद्राया
लाक्षरैः॥४॥ श्रीकाशीजीमे ज्ञा
ाटक १४ श्रीविश्वनाथजीके पा
१४८ दुबेजीके मकानमेंका
१४८ पी जिनको लेना होय
१४९ बाबू वाराणसीप्रसादया
१५० सिंहजीके दुकानपर
१५१ १९३१

प्रकरण
दाडिमः
नालिकेरः
ालः २
ूर्जः २
श्वत्थः २
ग्रोधः २
धूकः २१
ल्मलिः २१
बः २१६
बूलः २१६
रः २१६
कः २१७
ोटः २१७
..... २१७
: २१७
..... २१७
..... २१८
..... २१८
..... २१८
..... २१८
..... २१८
रका २१९
..... २१९
..... २१९
..... २१९
..... २१९
..... २२०
..... २२०
..... २२०
न्योक्तयः २२०
ः २२१

अं	प्रकरण	पृष्ठ
१२२	हंसान्योक्तयः	१७९
१२३	मधुकरान्योक्तयः	१८१
१२४	कोकिलान्योक्तयः	१८५
१२५	चातकान्योक्तयः	१८७
१२६	मयूरान्योक्तयः	१८९
१२७	शुकान्योक्तयः	१९०
१२८	काकान्योक्तयः	१९२
१२९	बकान्योक्तयः	१९३
१३०	खद्योतान्योक्तयः	१९४
१३१	अथसिंहान्योक्तयः	१९४
१३२	गजान्योक्तयः	१९७
१३३	मृगान्योक्तयः	२००
१३४	करभान्योक्तयः	२०३
१३५	रासभान्योक्तयः	२०४
१३६	वृषभान्योक्तयः	२०४
१३७	सामान्यवृक्षान्योक्तयः	२०५
१३८	अथवृक्षविशेषास्तत्रादौ कल्पद्रुमः	२०७
१३९	पारिजातः	२०८
१४०	चंदनं	२०८
१४१	अगुरुः	२१०
१४२	चंपकः	२१०
१४३	अशोकः	२१०
१४४	मालती	२११
१४५	मल्लिका	२११
१४६	केतकी	२११
१४७	पाटला	२१२
१४८	सहकारः	२१२
१४९	पनसः	२१४
१५०	कदली	२१४
१५१	द्राक्षा	२१४
१५२	दाडिमः	२१४
१५३	नालिकेरः	२१५
१५४	तालः	२१५
१५५	भूर्जः	२१५
१५६	अश्वत्थः	२१५
१५७	न्यग्रोधः	२१५
१५८	मधूकः	२१५
१५९	शाल्मलिः	२१६
१६०	निंबः	२१६
१६१	बब्बूलः	२१६
१६२	खदिरः	२१६
१६३	किंशुकः	२१७
१६४	शाखोटः	२१७
१६५	पीलुः	२१७
१६६	करीरः	२१७
१६७	बिल्वः	२१७
१६८	शालः	२१८
१६९	पलाशः	२१८
१७०	इक्षुः	२१८
१७१	कर्पासः	२१८
१७२	शणः	२१८
१७३	कंटकारिका	२१९
१७४	धत्तूरः	२१९
१७५	तृणानि	२१९
१७६	तांबूलं	२१९
१७७	तुंबी	२१९
१७८	बकुलः	२२०
१७९	पद्मं	२२०
१८०	कस्तूरिका	२२०
१८१	अथपर्वतान्योक्तयः	२२०
१८२	गिरिनिर्झरः	२२१

अं	प्रकरण	पृष्ठ
१८३	अगस्त्यः	२२२
१८४	समुद्रः	२२२
१८५	रत्नानि	२२५
१८६	शंखः	२२६
१८७	नद्यः	२२७
१८८	तडागः	२२८
१८९	कमलं	२२९
१९०	कुंदं	२३१
१९०	कुमुद्वती	२३१
१९१	कूपान्योक्तयः	२३२
१९२	मरुस्थलानि	२३२
१९३	दावानलः	२३३
१९४	तुला	२३३
१९५	मुरली	२३३
१९६	कुंभः	२३३
१९७	संकीर्णान्योक्तयः	२३४
	इतिअन्योक्तयः	
१९८	अथमिश्रप्रकरणं	२४२
१९९	अथरंभाशुकसंवादः	२५७
२००	राधाकृष्णसंवादः	२६०
२०१	अश्वधाटीकाव्यं	२६१
२०२	राजसभावर्णनं	२७३
२०३	सामान्यराजप्रशंसा	२७३
२०४	विशिष्टराजवर्णनं	२७६
२०५	रणवर्णनं	२८६
२०६	अरिपलायनं	२८६
२०७	प्रतापवर्णनं	२९०
२०८	कीर्त्तिवर्णनं	२९१
२०९	कीर्त्तिप्रतापौ	२९३
२१०	मृगया	२९४
२११	राजसेवकः	२९४
२१२	राजयात्रावर्णनं	२९५
२१३	राजनीतिः	२९६
२१४	सामान्यनीतिः	३०६
२१५	मिश्रकनीतिः	३१३
२१६	गजप्रशंसा	३१५
२१७	भद्रलक्षणानि	३१७
२१८	मंद्रलक्षणानि	३१७
२१९	मृगलक्षणानि	३१७
२२०	गजप्रक्रिया	३१८
२२१	अश्वतुरगप्रशंसा	३१८
२२२	तुरगानांसामान्यप्रशंसा	३१९
२२३	पृथगवयवानांलक्षणानि	३२०
२२४	स्वांगभागलक्षणानि	३२१
२२५	हयानांशुभलक्षणानि	३२१
२२६	शुभावर्त्ताः	३२२
२२७	अशुभलक्षणानि	३२२
२२८	दुरावर्त्ताः	३२३
२२९	अश्वानांशुभाशुभचेष्टितं	३२३
२३०	अश्वानांजन्मदेशाः	३२३
२३१	मध्यमाः	३२३
२३२	हीनाः	३२३
२३३	अश्ववाहनविधिः	३२४
२३४	वाजिनांवयोज्ञानायुर्ज्ञाने	३२५
२३५	औषधानिवाजिनांकृते	३२६
२३६	अश्वपरीक्षा	३२६
२३७	खड्गलक्षणं	३२६
२३८	खड्गदोषाः	३३०
२३९	खड्गप्रशंसा	३३०
२४०	अथधनुर्वेदः	३३१
२४१	धनुर्दानविधिः	३३२
२४२	आचार्यलक्षणं	३३२
२४३	चापप्रमाणं	३३३

ण पृष्ठ
नि ···· ३३४
ने ··· ३३५
ानि ··· ३३५
··· ३३५
ोकौ ··· ३३६
कर्षणलक्ष
अथबृह ··· ३३६
··· ३३६
वाराणसी नं ··· ३३७
··· ३३७
लिकांनिर् ··· ३३७
नांनथाकृ ··· ३३८
तेभ्योःखि ··· ३३८
मत्क्रमेण।विधिः ·· ३३९
ग्रहीत्वास्त्रः ··· ३३९
समाश्विनो ··· ३३९
सिद्धाबृहच ··· ३३९
श्विरमीक्षकत्वलन
नियोगेनप्रर ··· ३४०
मंकितोपरि ··· ३४०
नवापीवेपूर्व ··· ३४०
समहाराजशि ·· ३४१
शीसंस्तनमुद्र ··· ३४१
उन्होनेइसकार्यके ··· ३४२
कचौरीलीमेभ ··· ३४३
मिलेग ··· ३४४
··· ३४४
··· ३४४
··· ३४५
ं ··· ३४६

अं·	प्रकरण	पृष्ठ
२७३	वागोपकारलक्षणानि	३४६
२७४	सालगसूडः	३४७
२७५	षोडशाध्रुवाणांलक्षणानि	३४८
२७६	मंठलक्षणानि	३४९
२७७	निःसारुकलक्षणानि	३५०
२७८	द्रुतषट्नाललक्षणानि	३५१
२७९	रासकलक्षणानि	३५१
२८०	एकतालीलक्षणानि	३५१
२८१	स्वरादिकथनं	३५२
२८२	अश्वगुणाः	३५३
२८३	वर्णप्रस्तारः	३५४
२८४	अथोपवनविनोदाः	३५५
२८५	गृहाश्रमतरुशुभाशुभ लक्षणानि	३५६
२८६	भूमिनिरूपणं	३५७
२८७	पादपविवक्षा	३५८
२८८	बीजोप्तिविधिः	३५८
२८९	रोपणविधानं	३५९
२९०	निषेचनविधिः	३६०
२९१	उपवनक्रिया	३६१
२९२	कूपार्थभूमिपरीक्षा	३६१
२९३	पोषणविधिः	३६४
२९४	कुणपजलं	३६६
२९५	तरुचिकित्सा	३६६
२९६	विचित्रकरणं	३६८
२९७	अन्नादिनिष्पत्तिज्ञानं	३७०
२९८	शकुनज्ञानं	३७१
२९९	शकुनविरक्तिः	३७१
३००	क्षेत्रिकशकुनं	३७१
३०१	भूपतित्वप्रश्नचेष्टा	३७३
३०२	कंन्यार्थवरप्रश्नः	३७४

अं	प्रकरण	पृष्ठ
१८३	अगस्त्यः	२२२
१८४	समुद्रः	२२२
१८५	रत्नानि	२२५
१८६	शंखः	२२६
१८७	नद्यः	२२७
१८८	तडागः	२२८
१८९	कमलं	२२९
१९०	कुंदं	२३१
१९०	कुमुद्वती	२३१
१९१	कूपान्योक्तयः	२३२
१९२	मरुस्थलानि	२३२
१९३	दावानलः	२३३
१९४	तुला	२३३
१९५	मुरली	२३३
१९६	कुंभः	२३३
१९७	संकीर्णान्योक्तयः	२३४
	इतिअन्योक्तयः	
१९८	अथमिश्रप्रकरणं	२४२
१९९	अथरंभाशुकसंवादः	२५७
२००	राधाकृष्णसंवादः	२६०
२०१	अश्वधाटीकाव्यं	२६१
२०२	राजसभावर्णनं	२७३
२०३	सामान्यराजप्रशंसा	२७३
२०४	विशिष्टराजवर्णनं	२७६
२०५	रणवर्णनं	२८६
२०६	अरिपलायनं	२८६
२०७	प्रतापवर्णनं	२९०
२०८	कीर्त्तिवर्णनं	२९१
२०९	कीर्त्तिप्रतापौ	२९३
२१०	मृगया	२९४
२११	राजसेवकः	२९४
२१२	राजयात्रावर्णनं	२९५

अं	प्रकरण
२१३	राजनीतिः
२१४	सामान्यनीति
२१५	मिश्रकनीतिः
२१६	गजप्रशंसा
२१७	भद्रलक्षणा
२१८	मंद्रलक्षण
२१९	मृगलक्षण
२२०	गजप्रक्रिय
२२१	अश्वतुरगप्र
२२२	तुरगानास
२२३	पृथगवयव
२२४	स्वांगभाग
२२५	हयानांशु
२२६	शुभाव
२२७	अशुभ
२२८	दुराव
२२९	अश्वानं
२३०	अश्वा
२३१	मध्यम
२३२	हीना
२३३	अश्व
२३४	वाजि
२३५	औ
२३६	अ
२३७	ख
२३८	ख
२३९	र
२४०	अ
२४१	ध
२४२	७
२४३	चा

अ· प्रकरण पृष्ठ
२४४ गुणलक्षणानि ···· ३३४
२४५ शरलक्षणानि ···· ३३५
२४६ फललक्षणानि ···· ३३५
२४७ फलपायनं ···· ३३५
२४८ नाराचनालीकौ ···· ३३६
२४९ स्थानमुष्ट्याकर्षणलक्षणानि ···· ३३६
२५० गुणमुष्टयः ···· ३३६
२५१ धनुर्मुष्टिसंधानं ···· ३३७
२५२ व्ययाः ···· ३३७
२५३ लक्ष्यं ···· ३३७
२५४ अनध्यायाः ···· ३३८
२५५ श्रमक्रिया ···· ३३८
२५६ लक्ष्यास्खलनविधिः ···· ३३९
२५७ शीघ्रसंधानं ···· ३३९
२५८ दृढभेदिता ···· ३३९
२५९ हीनगतयः ···· ३३९
२६० बाणानांलक्ष्यस्खलनगतयः ···· ३४०
२६१ मुद्गगतयः ···· ३४०
२६२ दृढचतुष्कं ···· ३४०
२६३ चित्रविधिः ···· ३४०
२६४ शब्दवेधित्वं ···· ३४१
२६५ अस्त्रविधिः ···· ३४१
२६६ शस्त्रनिवारणं ···· ३४२
२६७ संग्रामविधिः ···· ३४३
२६८ अक्षौहिणीसंख्या ···· ३४४
२६९ महाक्षौहिणीसंख्या ···· ३४४
२७० व्यूहविधिः ···· ३४४
२७१ युद्धविधिः ···· ३४५
२७२ अथगांधर्वशास्त्रं ···· ३४६

अं· प्रकरण पृष्ठ
२७३ वागोपकारलक्षणानि · ३४६
२७४ सालगसूडः ···· ३४७
२७५ षोडशध्रुवाणांलक्षणानि ३४८
२७६ षंठलक्षणानि ···· ३४९
२७७ निःसारुकलक्षणानि ···· ३५०
२७८ द्रुतषट्नाललक्षणानि ३५१
२७९ रासकलक्षणानि ···· ३५१
२८० एकतालीलक्षणानि ···· ३५१
२८१ स्वरादिकथनं ···· ३५२
२८२ अश्वगुणाः ···· ३५३
२८३ वर्णप्रस्तारः ···· ३५४
२८४ अथोपवनविनोदाः ···· ३५५
२८५ गृहाश्रमतरुशुभाशुभलक्षणानि ···· ३५६
२८६ भूमिनिरूपणं ···· ३५७
२८७ पादपविवक्षा ···· ३५८
२८८ बीजोप्तिविधिः ···· ३५८
२८९ रोपणविधानं ···· ३५९
२९० निषेचनविधिः ···· ३६०
२९१ उपवनक्रिया ···· ३६१
२९२ कूपार्थभूमिपरीक्षा ···· ३६१
२९३ पोषणविधिः ···· ३६४
२९४ कुणपजलं ···· ३६६
२९५ तरुचिकित्सा ···· ३६६
२९६ विचित्रकरणं ···· ३६८
२९७ अन्नादिनिष्पत्तिज्ञानं ३७०
२९८ शकुनज्ञानं ···· ३७१
२९९ शकुनविरुत्तिः ···· ३७१
३०० क्षेत्रिकशकुनं ···· ३७१
३०१ भूपतित्वप्रश्नचेष्टा ···· ३७३
३०२ कंन्यार्थवरप्रश्नः ···· ३७४

अं प्रकरण पृष्ठ
३०३ वरार्थकन्याप्रश्नः ३७४
३०४ वर्षाप्रश्नः ३७५
३०५ राज्ञोःशुनकशुगेनजयप्रश्नः ३७५
३०६ राज्ञोःशुनकशुगेनसंग्रामप्रश्नः ३७६
३०७ संग्रामप्रश्नः ३७६
३०८ एकेनशुनाएकस्यैववराज्ञोजयप्रश्नः ३७६
३०९ रोगिप्रश्नः ३७७
३१० आगंतुकशकुनं ३७७
३११ शुनकस्यशुभाशुभचेष्टितं ३७८
३१२ शिवारुतं ३८०
३१३ फेरुशब्दाः ३८०
३१४ कौशिकः ३८१
३१५ काकशुभचेष्टितं ३८१
३१६ अशुभचेष्टितानि ३८२
३१७ कपोतकी ३८३
३१८ तित्तिरखरसर्पाः ३८४
३१९ करायिका ३८५
३२० पल्ली ३८५
३२१ वृश्चिकः ३८६
३२२ अंगस्फुरणं ३८६
३२३ संकीर्णशकुनानि ३८६
३२४ प्रस्थितानांजांधिकशकुनं ३८७
३२५ शकुनविचारः ३८९
३२६ यात्रिकशकुनेषुपूर्वभाषणशुभचेष्टितानि ३८९
३२७ अशुभचेष्टितानि ३९१
३२८ शिवा ३९२
३२९ फेरवाः ३९३

अं प्रकरण पृष्ठ
३३० काकः ३९३
३३१ कपोतकी ३९५
३३२ पोतकीशकुनविचारः ३९५
३३३ कपोतकीदर्शनं ३९६
३३४ हंसचारः ३९७
३३५ तित्तिरः ३९८
३३६ करायिका ३९८
३३७ वृश्चिकः ३९९
३३८ हरिणः ३९९
३३९ नकुलः ४००
३४० मिश्रशकुनानि ४००
३४१ दिशास्वभावकथनं ४०१
३४२ अथस्वरोदयः ४०२
३४३ पंचतत्वानि ४०३
३४४ पशूनांलक्षणानितच्चिकित्साचतेषुपूर्वछागः ४०४
३४५ गवांलक्षणानि ४०४
३४६ गवादीनांचिकित्सा ४०५
३४७ स्थावरजंगमविषापहरणं ४०६
३४८ उपविषाणि ४०७
३४९ जंगमानि ४०८
३५० दूतपरीक्षा ४०९
३५१ सर्पदष्टस्यतल्लक्षणाच्चिकित्सा ४०९
३५२ दर्वीकरचिकित्सा ४०९
३५३ राजिलचिकित्सा ४१०
३५४ व्यंतरचिकित्सा ४११
३५५ सर्पसामान्यचिकित्सा ४११
३५६ घोनसविद्या ४११
३५७ सर्पोच्चाटनं ४१२
३५८ सर्परक्षा ४१२

अं	प्रकरण	पृष्ठ
३५९	वृश्चिकचिकित्सा	४१३
३६०	भूतविद्या	४१४
३६१	बालग्रहोपशमनं	४१५
३६२	कौतुकानि	४१६
३६३	सिंहरक्षा	४१८
३६४	विद्युन्निवारणं	४१८
३६५	अथकेशकल्पः	४१९
३६६	त्रिफलाकल्पः	४१९
३६७	भृंगराजकल्पः	४१९
३६८	विडंगादिकल्पः	४२०
३६९	भल्लातकल्पः	४२०
३७०	गंधककल्पः	४२०
३७१	अश्वगंधाकल्पः	४२०
३७२	पुनर्नवाकल्पः	४२०
३७३	पानीयकल्पः	४२०
३७४	धातुमारणं	४२०
३७५	केशरंजनानि	४२१
३७६	अथशृंगारनिर्देशः	४२२
३७७	मनसिजप्रशंसा	४२२
३७८	कामातुरः	४२३
३७९	विरहिजनोक्तिः	४२४
३८०	अनभिज्ञः	४३२
३८१	उपालंभः	४३३
३८२	पांथोक्तिप्रत्युक्तयः	४३४
३८३	स्त्रीप्रशंसा	४३५
३८४	स्त्रीपुरुषजातिभेदः	४३६
३८५	पुरुषजातिभेदः	४३७
३८६	स्त्रीपुरुषसंयोगविवृत्तिः	४३८
३८७	स्त्रीसेवाप्रकारः	४३९
३८८	संकेताख्यानभावहावविवृत्तिः	४३९

अं	प्रकरण	पृष्ठ
३८९	भावाः	४४०
३९०	हावाः	४४०
३९१	स्त्रीपुरुषवशीकरणं	४४३
३९२	कामगायत्री	४४३
३९३	द्रावणं	४४५
३९४	वाजीकरणं	४४५
३९५	बीजस्तंभः	४४५
३९६	लिंगवृद्धिः	४४६
३९७	कुसुमजननं	४४६
३९८	गर्भपातरक्षा	४४७
३९९	सुखप्रसूतिः	४४७
४००	बालरक्षा	४४७
४०१	मुखवासजलवासौ	४४७
४०२	बालावर्णनं	४४८
४०३	वयोवर्णनं	४५१
४०४	अथतरुणीपृथगवयववर्णनंतत्रप्रथमंकेशपाशः	४५४
४०५	सीमंतरचनं	४५५
४०६	अभ्यंगारंभः	४५६
४०७	ललाटः	४५७
४०८	भ्रुवौ	४५७
४०९	नेत्रे	४५७
४१०	कटाक्षः	४५९
४११	नासा	४६०
४१२	नासाभूषणं	४६०
४१३	कर्णपाशौ	४६०
४१४	कपोलौ	४६०
४१५	अधरः	४६१
४१६	दंतकपोलौ	४६१
४१७	स्मितं	४६२

अं·	प्रकरण	पृष्ठ
४१८	मुखं	४६२
४१९	कंठः	४६४
४२०	वाणी	४६४
४२१	बाहू	४६४
४२२	करौ	४६४
४२३	अङ्गुल्यः	४६५
४२४	स्तनौ	४६५
४२५	कंचुकी	४६६
४२६	हारः	४६६
४२७	मध्यदेशः	४६६
४२८	वलित्रयं	४६६
४२९	रोमावली	४६६
४३०	नाभिः	४६७
४३१	नितंबः	४६७
४३२	जघनं	४६७
४३३	जंघे	४६८
४३४	चरणयुगलं	४६८
४३५	नखश्रेणिः	४६८
४३६	गमनं	४६९
४३७	कांतिः	४६९
४३८	समग्रस्त्रीस्वरूपवर्णनं	४६९
४३९	प्रियप्रस्थानावस्थाकथनं	४७०
४४०	नायिकांप्रतिनायकवचनादिकथनं	४७१
४४१	नायकंप्रतिनायिकोक्तिः	४७२
४४२	नायकंप्रतिसखीवाक्यं	४७२
४४३	विरहिण्यवस्थावर्णनं	४७२
४४४	सखीकर्तृकमानापनोदः	४८०
४४५	प्रियनर्मोक्तयः	४८०
४४६	नायककर्तृकमानापनोदः	४८१
४४७	नायिकांप्रतिसखीवचनं	४८१
४४८	वियोगिनीप्रलापः	४८२
४४९	नायकंप्रतिदूतीप्रेषणं	४८४
४५०	वियोग्यवस्थावर्णनप्रलापाख्याने	४८४
४५१	वियोगिनीप्रलापाः	४८५
४५२	नायकस्याग्रेदूत्युक्तिः	४८७
४५३	नायिकांप्रतिनायकावस्थावर्णनसंदेशाख्याने	४९०
४५४	नायिकांप्रतिनायकसंदेशः	४९०
४५५	दूत्युपहासप्रश्ने	४९१
४५६	दूतींप्रतिनायिकाप्रश्नः	४९२
४५७	संयोगशृंगारेनायिकावलोकननायकदर्शने	४९२
४५८	नायकदर्शनं	४९३
४५९	नायिकातिथ्यनायिकाप्रश्नौ	४९३
४६०	नायकस्यनायिकाप्रश्नः	४९४
४६१	मानिनीमानाख्यानं	४९४
४६२	कलहांतरिताप्रलापसख्यनुनयौ	४९६
४६३	सख्यनुनयः	४९८
४६४	नायिकानायकयोरुक्तिप्रत्युक्ती	४९९
४६५	नायकशिक्षानायिकानुनयौ	५०१
४६६	नायकानुनयः	५०१
४६७	परस्परप्रसादः	५०२
४६८	सूर्यास्तमनवर्णनचक्रवाकावस्थाख्याने	५०३
४६९	चक्रवाकावस्थाख्यानं	५०४
४७०	तमोवर्णनं	५०५
४७१	अभिसारिकासंचारकथनं	५०६
४७२	चंद्रोदयवर्णनं	५०८

अं·	प्रकरण	पृष्ठ
४७२	पानगोष्ठीवर्णनं	५११
४७३	प्रियचाटुद्यूतक्रीडासुरतप्रशंसा	५१२
४७४	द्यूतक्रीडा	५१२
४७५	सुरतप्रशंसा	५१३
४७६	नववधूसंगमेसखीवाक्यंनववधूसुरतारंभक्रीडा	५१४
४७७	नववधूसुरतारंभक्रीडा	५१४
४७८	सुरतकेलिकथनं	५१६
४७९	विपरीतरतक्रीडा	५१८
४८०	सुरतविवृत्तिः	५२०
४८१	मध्यरात्रिक्रीडानायिकानुनयो	५२२
४८२	प्रणयकलहेनायिकानुनयः	५२२
४८३	वायुः	५२३
४८४	हर्म्यं	५२४
४८५	धूर्तः	५२४
४८६	शिशुः	५२५
४८७	देशांतरोपगतः	५२५
४८८	जलधरः	५२५
४८९	घनदुर्दिनं	५२५
४९०	घनगर्जितं	५२५
४९१	प्रभातवर्णनं	५२६
४९२	प्रभातवायुसूर्योदयवर्णनं	५२८
४९३	सूर्योदयवर्णनं	५२९
४९४	संभोगाविष्करणं	५३०
४९५	मध्यान्हः	५३१
४९६	सतीवर्णनकुलवधूवृत्ते	५३२
४९७	कुलवधूवृत्तं	५३३
४९८	असतीचरित्रं	५३४
४९९	वेश्यागर्हणं	५३९
५००	नवोढा	५४०
५०१	प्रौढा	५४०
५०२	सामान्यवनिता	५४१
५०३	प्रोषितभर्तृका	५४२
५०४	खंडिता	५४२
५०५	विप्रलब्धा	५४३
५०६	उत्का	५४४
५०७	वासकसज्जा	५४४
५०८	स्वाधीनपतिका	५४४
५०९	अभिसारिका	५४४
५१०	स्त्रीस्वभावनिंदा	५४५
५११	गर्भवासदुःखं	५४७
५१२	षडृतुवर्णनेवसंतसमयस्वभावकथनं	५४७
५१३	मदनपूजा	५४९
५१४	कुसुमवायवः	५४९
५१५	वसंतवायवः	५४९
५१६	पुष्पाचयः	५५१
५१७	वसंतपथिकाः	५५१
५१८	ग्रीष्मस्वभावाख्यानं	५५२
५१९	मध्यान्हः	५५३
५२०	जलकेलिः	५५४
५२१	ग्रीष्मवायवः	५५५
५२२	ग्रीष्मपथिकाः	५५५
५२३	प्रपापालिका	५५६
५२४	वर्षासमयस्वभावाख्यानं	५५७
५२५	दोलाकेलिः	५५९
५२६	वर्षावायवः	५६०
५२७	वर्षापथिकः	५६०
५२८	पथिककामिनी	५६१

अं· प्रकरण पृष्ठ
५२९ शारत्समयस्वभावाख्यानं ५६३
५३० भ्रमरक्रीडा ५६३
५३१ शारद्वायवः ५६३
५३२ शारत्पथिकः ५६४
५३३ हेमंतस्वभावाख्यानं ५६४
५३४ कंदुकक्रीडा ५६५
५३५ हेमंतवायवः ५६६
५३६ हेमंतपथिकाः ५६६
५३७ शिशिरस्वभावाख्यानं ५६७
५३८ हृज्झीलनक्रीडा ५६७
५३९ शिशिरवायवः ५६८
५४० शिशिरपथिकाः ५६८
५४१ संमिश्राख्यानं ५६८
५४२ वीररसनिर्देशः ५७०
५४३ करुणारसनिर्देशः ५७३
५४४ अद्भुतरसनिर्देशः ५७६
५४५ हास्यरसनिर्देशः ५७७
५४६ भयानकरसनिर्देशः ५८१
५४७ बीभत्सरसनिर्देशः ५८३
५४८ रौद्ररसनिर्देशः ५८४
५४९ शांतरसनिर्देशः ५८५
५५० शमः ५९०
५५१ अनित्यतानिरूपणं ५९२
५५२ विषयोपहासः ५९४
५५३ पश्चात्तापः ५९५
५५४ कालचरितं ५९७
५५५ विचारः ५९८
५५६ उपदेशः ५९९
५५७ कालसंख्या ६०५
५५८ विष्णुः ६०६
५५९ मुरली ६०८
५६० रघुनाथः ६०८

अं· प्रकरण पृष्ठ
५६१ अथशारीरं ६०९
५६२ अथयोगः ६१३
५६३ लययोगः ६१४
५६४ राजयोगः ६१५
५६५ हठयोगः ६१५
५६६ प्राणायामः ६१६
५६७ प्रत्याहारः ६१६
५६८ अथपंचधारणा ६१७
५६९ ध्यानं ६१७
५७० अथजाग्रत्स्वप्नसुषुप्तितुरीयावस्थाःप्रोच्यते ६१७
५७१ अथमार्कंडेयादिसाधितोद्वितीयोहठयोगः ६१८
५७२ आसनं ६१९
५७३ प्राणायामः ६१९
५७४ प्रत्याहारः ६२१
५७५ धारणा ६२१
५७६ ध्यानं ६२१
५७७ समाधिः ६२२
५७८ तुर्यातीतं ६२३
५७९ मनस्थिरीकरणभावः ६२३
५८० योगिमहिमादोषोपस ६२४
र्गचिकित्सासप्तधारणा ६
ष्टमहासिद्धिप्राप्तयः ६
५८१ दोषोपसर्गचिकित्सा ६२४
५८२ सप्तधारणा ६२५
५८३ अष्टमहासिद्धिंप्राप्तिः ६२६
५८४ योगिचर्या ६२६
५८५ अरिष्टज्ञानं ६२७
५८६ विदेहमुक्तिकथनं ६२९
५८७ कालवंचना ६२९
५८८ ग्रंथप्रशंसा ६३०

॥अथबृहच्छारङ्गधरपद्धतिः लिख्यते

द० ३३३०
आ० २०१
मू० १६।–
श्री ५ को सरकार
वाल्मीकि संस्कृत

तत्रादौकविवंशवर्णनम्

॥श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥यस्मिन्बुद्बुदसंकराद्वबहुब्रह्मांडखंडाः क्वचिद्भ्रांति क्वापिचशीकराइवविरिंचाद्याःस्फुरंतिभ्रमात्॥चिद्रूपाल्लहरीवविश्वजननीशक्तिः क्वचिद्योततेस्वानंदामृतनिर्भरंशिवमहापाथोनिधिंतंनुमः॥१॥पुराशाकंभरीदेशेश्रीमान्हम्मीरभूपतिः॥बाहुवाणान्वयेजातःख्यातःशौर्येइवार्जुनः॥२॥ तस्याभवत्सभ्यजनेषुमुख्यः परोपकारव्यसनैकनिष्ठः॥पुरंदरस्येवगुरुर्गरीयान्द्विजाग्रणीराघवदेवनामा॥३॥गोपालदामोदरदेवदाससंज्ञाबभूवुस्तनयास्तदीयाः॥नेत्रावताराइवचन्द्रमौलेरपाकृतध्वांतगुणास्त्रयोपि॥४॥तेषांमध्येयस्तुदामोदरोभूदुत्पाद्यत्रीनात्मजान्वीतरागः॥भागीरथ्यांशुद्धदेहंविधायज्ञानादात्मन्येवनिष्ठांजगाम॥५॥ज्येष्ठःशार्ङ्गधरस्तेषांलघुर्लक्ष्मीधरस्ततः॥कृष्णोनुजस्ततस्तेषांत्रयस्त्रेताग्नितेजसः॥६॥जयतिशार्ङ्गधरस्त्रिपुरापदद्वयकुशेशयकोशमधुव्रतः॥सरससूक्तसुधौघकलानिधिःकविकरीन्द्रकदंबमृगाधिपः॥७॥यद्यपिगुणौघनिलयःखलशैलध्वंसनेजिष्णुः॥तदपिविमलहृदयांतरसज्जनलोकस्यदासोसौ॥८॥तेसज्जनाःसुकविशाखिकवित्वपुष्पाण्यासाद्यगुंफितवतःसुगुणैर्ममैनत्॥संधारयंतुकुसुमोज्ज्वलदामरूपंकंठेसुभाषितमपास्तसमस्तदोषं॥९॥नशार्ङ्गधरपद्धतिःखलजनस्ययोग्याभवेत्सुभाषितरसो

र्मयःसूक्तलोकपेयापतः॥सुधामदितिनंदनादिविपिबंतितद्दृष्टांतरास्तथैवतमसःशिरोझटितिखंडितंश्रूयते॥१०॥आनंदायसतांभूयात्सुभाषितमिदंमम॥पृथक्पद्धतिसंमिश्रपरिच्छेदैर्मनोरमं॥११॥आद्यैर्मद्विहितैःपद्यैःकियद्भिरपरैरपि॥युतापद्धतिरेषातुसज्जनानन्ददायिनी॥१२॥इतिदामोदरसूनुशार्ङ्गधरविरचितायांपद्धत्यांकविवंशवर्णनंप्रथमःपरिच्छेदः॥१॥

अथनमस्कृतिःतत्रादौगणेशः

॥चलत्कर्णानिलोद्धूतसिंदूरारुणितांबरः॥जयत्यकालेविसृजन्संध्यामिवगजाननः॥१॥कस्यापि॥अविरलविगलन्मदजलकपोलपालीनिलीनमधुपकुलः॥उद्भिन्ननवश्मश्रुश्रेणिरिवद्विपमुखोजयति॥२॥रुद्रभट्टस्य॥उच्चैर्ब्रह्मांडखंडद्वितयसहचरंकुम्भयुग्मंदधानःप्रेंखन्नागारिपक्षप्रतिभटविकटश्रोत्रतालाभिरामः॥देवःशंभोरपत्यंभुजगपतितनुस्पर्द्धिवर्द्धिष्णुहस्तस्त्रैलोक्याश्चर्यमूर्त्तिःसजयतिजगतामीश्वरःकुंजरास्यः॥३॥भेरीभांकारस्य॥उच्चैरुत्तालगण्डस्थलबहुलगलद्दानपानप्रमत्तस्फीतालिव्रातगीतिश्रुतिविधृतिकलोन्मीलिताक्षिपक्ष्मा॥भक्तप्रत्यूहपृथ्वीरुहनिवहसमुन्मूलनोच्चैरुदञ्चच्छुण्डादण्डाग्रउग्रार्भकद्विभवदनोनःसपायादपायात्॥कस्यापि॥यःसिंधोःफेनराशिर्भुविकुमुदवनंव्योम्निनक्षत्रलक्ष्मीरब्धौमुक्तासमूहस्तरुषुसुमनसोमानसेहंससंघः॥श्रीकंठेभूतिलेशःशिखरिषुमणयोदिक्षुनीहारयानः पाण्डुःशुंडाग्रजन्माजयतिगणपतेःशीकराणांविलासः॥४॥कस्यापि॥गजाननायमहसेप्रत्यूहतिमिरच्छिदे॥अपारकरुणापूरतरंगितदृशेनमः॥५॥अगजाननपद्मार्कंगजाननमहर्निशं॥अनेकदंतंभक्तानामेकदंतमुपास्महे॥६॥आलंबेजगदालंबेहेरंबचरणांबुजे॥शुष्यंतियद्रजःस्पर्शात्सद्यःप्रत्यूहवार्धयः॥७॥नमाखुपत्रंराजेन्द्रभजमात्रा

नदायकं॥तमाखुपत्रंराजेन्द्रभजमाज्ञानदायकं॥८॥आनंदमात्रमकरंदमनंतगंधंयोगीन्द्रसुस्थिरमिलिंदमपास्तबंधं॥वेदान्तसूर्यकिरणैकविकासशीलंहेरंबपादशारदंबुजमानतोस्मि॥९॥शिवयोःसुधाहरिद्रादीप्तिमतोःसारभृज्जगत्पित्रोः॥त्रिभुवनविघ्नध्वंसीकरिकल्पःकश्चिदरुणिमाजयति॥१०॥युगपत्स्वगंडचुंबनलोलौपितरौनिरीक्ष्यहेरंबः॥तन्मुखमेलनकुतुकीस्वाननमपनीयपरिहसन्पायात्॥११॥सानंदंनंदिहस्ताहतमुरजरवाहूतकौमारबर्हित्रासान्नासाग्ररंध्रंविशतिफणिपतौभोगसंकोचभाजि॥गंडोड्डीनालिमालामुखरितककुभस्तांडवेशूलपाणेर्वैनायक्यश्चिरंवोवदनविधुतयःपांतुचीत्कारवत्यः॥१२॥ इतिगणेशः॥

॥अथसरस्वती॥

करबदरसदृशमखिलंभुवनतलंयत्प्रसादतःकवयः॥पश्यंतिसूक्ष्ममतयःसाजयतिसरस्वतीदेवी॥१॥सुबंधोः॥धातुश्चतुर्मुखीकंठशृंगाटकविहारिणी॥नित्यंप्रगल्भवाचालामुपतस्थेसरस्वती॥२॥मुरारेः॥सूक्ष्मायशुचयेतस्मैनमोवाक्तत्त्वतंतवे॥विचित्रोयस्यविन्यासोविदधातिजगत्पटं॥३॥गोविंदस्य॥ज्योतिस्तमोहरमलोचनगोचरंतज्जिह्वादुरासदरसंमधुनःप्रवाहं॥दूरेत्वचःपुलकबंधिपरंकपद्येसारस्वतंकिमपिकामदुघंरहस्यं॥४॥शारदाशारदांभोजवदनावदनांबुजे॥सर्वदासर्वदास्माकंसन्निधिंसन्निधिंक्रियात्॥५॥ ॥इतिसरस्वती॥ ॥

॥अथशिवः॥

नमस्तुंगशिरश्चंद्रबिंबचामरचारवे॥त्रैलोक्यनगरारंभमूलस्तंभायशंभवे॥१॥बाणभट्टस्य॥मौनात्स्तमितैवचाटुभणितिःस्वस्तैकहस्ताहृतंदूरेप्यंजलिबंधनंप्रणमनंस्तब्धार्द्धमूर्द्धःकृतः॥इत्थंसंघटितैकविग्रहतयाव्यग्रोगिरिग्रामणीर्जायांजातरुषंजयत्यनु

र्मयः सुकृतलोकपेयायतः॥ सुधामद्दितिनंदनादिविपिबंति द्व
ष्टांतरास्तथैव तमसः शिरोझटितिखंडितं श्रूयते॥१०॥ आनंदा
यसतां भूयात् सुभाषितमिदं मम॥ पृथक्पद्धतिसंमिश्रपरिच्छे
दैर्मनोरमं॥११॥ आद्यैर्मह्निर्हि तैः पद्यैः कियद्भिरपरैरपि॥ युता प
द्धतिरेषा तु सज्जनानन्ददायिनी॥१२॥ इति दामोदरसूनुशार्ङ्गध
रविरचितायां पद्धत्यां कविवंशावर्णनं प्रथमः परिच्छेदः॥१॥

अथ नमस्कृतिः तत्रादौ गणेशः

॥चलत्कर्णानिलोद्धूतसिंदूरारुणितांबरः॥ जयत्यकाले विसृज
न्संध्यामिव गजाननः॥१॥ कस्यापि॥ अविरलविगलन्मदजल
कपोलपालीनिलीनमधुपकुलः॥ उद्भिन्ननवश्मश्रुश्रेणिरिव द्वि
पमुखो जयति॥२॥ रुद्रभट्टस्य॥ उच्चैर्ब्रह्मांडखंडद्वितयसदृचरं
कुम्भयुग्मं दधानः प्रेंखन्नागारिपक्षप्रतिभटविकटश्रोत्रताला॰
भिरामः॥ देवः शंभोरपत्यं भुजगपतितनुस्पर्द्धिवर्द्धिष्णुहस्तस्त्रै
लोक्याश्चर्यमूर्त्तिः स जयति जगतामीश्वरः कुंजरास्यः॥३॥ भेरी
भांकारस्य॥ उच्चैरुत्तालगण्डस्थलबहुलगलद्दानपानप्रमत्त
स्फीतालिव्रातगीतिश्रुतिविधृतिकलोन्मीलितार्द्धाक्षिपक्ष्मा॥ भ
क्तप्रत्यूहपृथ्वीरुहनिवहसमुन्मूलनोच्चैरुदञ्चच्छुण्डादण्डा
ग्रउग्रार्भकइभवदनो नः स पायादपायात्॥ कस्यापि॥ यः सिंधोफे
नराशिर्भुवि कुमुदवनं व्योम्नि नक्षत्रलक्ष्मीरब्धौ मुक्तासमूहस्तरु
षु सुमनसो मानसे हंससंघः॥ श्रीकंठे भूतिलेशः शिखरिषु मण॰
यो दिक्षु नीहारपानः पाण्डुः शुंडाग्रजन्मा जयति गणपतेः शीक
राणां विलासः॥४॥ कस्यापि॥ गजाननाय महसे प्रत्यूहतिमिर
च्छिदे॥ अपारकरुणापूरतरंगितदृशे नमः॥५॥ अगजाननप
द्मार्कं गजाननमहर्निशं॥ अनेकदंतं भक्तानामेकदंतमुपास्महे
॥६॥ आलंबे जगदालंबे हेरंबचरणांबुजे॥ शुष्यंति यद्रजःस्प
र्शात्सद्यः प्रत्यूहवार्धयः॥७॥ न मा खुपत्रं राजेन्द्रभजमाना॰

नदायकं॥नमाखुपत्रंराजेन्द्रभजमाज्ञानदायकं॥८॥आनंद
मात्रमकरंदमनंतगंधंयोगीन्द्रसुस्थिरमिलिंदमपास्तबंधं॥
वेदान्तसूर्यकिरणैकविकासशीलंहेरंबपादशरदंबुजमानतो
स्मि॥९॥शिवयोःसुधाहरिद्रादीप्तिमतोःसारभृज्जगत्पित्रोः॥
त्रिभुवनविघ्नध्वंसीकरिकल्पःकश्चिदरुणिमाजयति॥१०॥युग
पत्स्वगंडचुंबनलोलौपितरौनिरीक्ष्यहेरंबः॥ तन्मुखमेलनकुतु
कीस्वाननमपनीयपरिहसन्पायात्॥११॥सानंदंनंदिहस्ताहः
तमुरजरवाहूतकौमारबर्हित्रासान्नासाग्ररंध्रंविशतिफणिपतौ
भोगसंकोचभाजि॥गंडोड्डीनालिमालामुखरितककुभस्तांडवेशू
लपाणेर्वैनायक्यश्चिरंवोवदनविधुतयःपांतुचीत्कारवत्यः॥१२
॥ इतिगणेशः॥

॥अथसरस्वती॥

करबदरसदृशमखिलंभुवनतलंयत्प्रसादतःकवयः॥ पश्यंतिसू
क्ष्ममतयःसाजयतिसरस्वतीदेवी॥१॥सुबंधोः॥ धातुश्चतुर्मुखी
कंठशृंगाटकविहारिणीं॥नित्यंप्रगल्भवाचालामुपतिष्ठेसरस्वतीं
॥२॥मुरारेः॥सूक्ष्मायशुचयेतस्मैनमोवाक्तत्त्वतंतवे॥विचित्रो
यस्यविन्यासोविदधातिजगत्पटं॥३॥गोविंदस्य॥ज्योतिस्तमोहर
मलोचनगोचरंतज्जिह्वादुरासदरसंमधुनःप्रवाहं॥ दूरेत्वचःपुलक
बंधिपरंप्रपद्येसारस्वतंकिमपिकामदुघंरहस्यं॥४॥शारदाशा
रदांभोजवदनावदनांबुजे॥सर्वदासर्वदास्माकंसन्निधिंसन्नि
धिंक्रियात्॥५॥ ॥इतिसरस्वती॥ ॥

॥अथशिवः॥

नमस्तुंगशिरश्चंद्रबिंबचामरचारवे॥त्रैलोक्यनगरारंभमूलस्तं
भायशंभवे॥१॥बाणभट्टस्य॥मौनादस्तमितैवचाटुभणितिःस्त्र
स्तैकहस्ताहृतंदूरेप्यंजलिबंधनंप्रणमनंस्तब्धाद्धेमूर्ध्नःकृतः॥इत्थं
संघटितैकविग्रहहृतेपाव्यग्रोगिरिग्रामणीर्जायांजातरूपंजयत्यनु

नयनं देवस्त्रिलोकीगुरुः॥२॥ कस्यापि॥ वामांगीकृतवामांगि
कुंडलीकृतकुंडलि॥ आविरस्तु पुरो वस्तु भूतिभूत्यंबरांबरं॥३॥
सार्वभौमस्य॥ पन्नफालकवीभस्मभूतिदामेचकप्रिय॥ पवर्गप्रि
य विष्णो मामपवर्गप्रदो भव॥४॥ कस्यापि॥ पिनाकफणिबालेंदुभ
स्ममंदाकिनीयुता॥ तथापि भवते मूर्त्तिरपवर्गानुसारिणी॥५॥
॥देवेश्वरस्य॥ उदरद्वयभरणभयादर्धांगाहितदारः॥ यदि नैवं त
स्यैकस्मतः कथमद्यापि कुमारः॥६॥ सार्वभौमस्य॥ संध्यानतौ
नरपुरंध्रितनोः सरोषमुत्सारिते गिरिजया निजपाणिपद्मे॥ उत्स
र्पिकंकणफणीन्द्रफणार्पणेन पूर्णांजलिर्जयति बालमृगांकमौलेः॥
॥७॥ कस्यापि॥ उच्चैरुत्तालखेलद्भुजवनपवनोद्धूतशैलोच्चपात
स्फारोदंचत्पयोधिप्रकटितमुकुटस्वर्धुनीसंगमानि॥ जीयासुस्तां
डवानिस्फुटविकटजटाकोटिसंघट्टभूरिभ्रश्यन्नक्षत्रचक्रव्यव
सितसुमनोवृष्टिपातानि शंभोः॥८॥ भेरीभांकारस्य॥ मंदारमा
लाकुलितालकायै कपालमालांकितशेखराय॥ दिव्यांबरायै च दि
गंबराय नमः शिवायै च नमः शिवाय॥९॥ कस्यापि॥ पाणिग्रहे
पुलकितं वपुरैशं भूतिभूषितं जयति॥ अंकुरित इव मनोभूर्यस्मिन्
भस्माःवशेषोपि॥१०॥ पार्वती फणिबालेंदुभस्ममंदाकिनीयुता॥
पवर्गरचिता मूर्त्तिरपवर्गप्रदायिनी॥११॥ जातो जडप्रसंगाद्धि स्मा
रपतिभ्रमो यमात्मानं॥ शंभमधुनार्द्रसेन च सुरसंसेव्यं भजस्व
चंडीशं॥१२॥ कस्त्वं शूली मृगय भिषजं नीलकंठः प्रियेहं केकामे
कां कुरु पशुपतिर्नैव दृष्टे विषाणे॥ स्थाणुर्मुग्धे न वदति तरुर्जीवि
तेशः शिवाया गच्छारण्यं प्रतिवचनजडः पातु वश्चंद्रचूडः॥१३
॥ केयं मूर्द्धन्यंधकारे तिमिरमिह कुतः सुभ्रु कांतेंदुयुक्ते कांताप्यत्रा
स्ति काचिन्ननु भवतु मया पृष्टमेतावदेव॥ नाहं हृद्दंकरोमीत्यप
नयशिरसस्तूर्णमेनामिदानीमित्थं प्रोक्तो भवान्याप्रतिवचनजि
तः पातु वश्चंद्रचूडः॥१४॥ गवीशपत्रो नगजार्त्तिहारी कुमारतातः

शशिखंडमौलिः॥ लंकेशसंपूजितपादपद्मः पायादनादिःपरमेश्वरोनः॥१५॥ द्विजराजशेखरोयद्वृषमारूढःसदासदारस्त्वं॥चक्रेहरतद्विधिना पुनरूपनयनंललाटघटितंते॥१६॥इतिशिवः।

अथगौरी

हरकंठग्रहानंदमीलिताक्षींनमाम्युमां॥ कालकूटविषस्पर्शाज्ञातमूर्छागतामिव॥१॥ प्रत्यासन्नविवाहमंगलविधौदेवार्चनव्यग्रया दृष्ट्वाग्रेपरिणेतुरेवलिखितांगंगाधरस्याकृतिं॥ उन्मादस्मितरोषलज्जितधियागौर्याकथंचिच्चिरा दृष्टस्त्रीवचनात्स्वप्नेऽपिनिहितःपुष्पांजलिःपातुवः॥२॥ वक्षःपीठेनिरीक्ष्यस्फटिकमणिशिलामंडलेस्वच्छभासिस्वच्छायांसाभ्यसूयात्वमियमितिमुहुःसत्य माश्वासिताऽपि॥ वामेमेदक्षिणस्याःश्रवसिकुवलयंनाहमित्यालपंती दत्ताऽऽश्लेषासहासंमदनविजयिनापार्वतीवःपुनातु॥३॥ स्वेदस्तेकथमीदृशःप्रियतमेत्वन्नेत्रवन्हेर्विभोकस्माद्वेपितमेतदिंदुवदनेभोगींद्रभीतेस्तव॥ रोमांचःकथमेषदेवभगवन्गंगांभसांसीकरैरित्थंभर्तरिभावगोपनपरागौरीचिरंपातुवः॥४॥ भिक्षुःक्वास्तिबलेर्मखेपशुपतिःकिंनास्त्यसौगोकुले मुग्धेपन्नगभूषणःसखिसदाशेतेचतस्योपरि॥ आर्येमुंचविषादमाशुकमलेनाहंप्रकृत्याचला चेत्थंवैगिरिजासमुद्रसुतयोःसंभाषणंपातुवः॥५॥ उदासांस्त्वदृतेनान्यान्प्रपश्याम्यपिपार्वती॥श्रीरामभक्तिमाणिक्यमदेयमपिदेहिमे॥६॥ विद्राणेरुद्रवृंदेसवितरितरलेवज्रिणिध्वस्तवज्रे जाताशंकेशशांकेविरमतिमरुतित्यक्तवैरेकुबेरे॥ वैकुंठेकुंठितास्त्रेमहिषमतिरुषंपौरुषोपघ्ननिघ्नं निर्विघ्नंनिघ्नतीवःशमयतुदुरितंभूरिभावाभवानी॥७॥ पार्वतीमोषधीमेका मपर्णांमृगयामहे॥शूलीहालाहलंपीत्वा ययामृत्युंजयोभवत्॥८॥ ॥इतिगौरी॥ ॥

अथलक्ष्मीः

पायात्पयोधिदुहितुः कपोलामलचंद्रमाः॥ यत्रसंक्रांतबिंबेन

हरिणाहरिणाचितं॥१॥ ॥इतिलक्ष्मीः॥ ॥

अथकृष्णः

नीतंनवनवनीतंकियदितिनीतंयशोदयापृष्टं॥इयदितिगुरुजन
संसदिधृतराधापयोधरःपातु॥१॥ मेघैर्मेदुरमंबरंवनभुवःश्यामा
स्तमालद्रुमैर्नक्तंभीरुरयंत्वमेवतदिमंराधेगृहंप्रापय॥ इत्थंनंद
निदेशतश्चलितयोःप्रत्यध्वकुंजद्रुमंराधामाधवयोर्जयंतियमु
नाकूलेरहःकेलयः॥२॥ जयदेवस्य॥आनंदमादधतमायतलो
चनानामानीलमावलितकंधरमात्तवंशं॥ आपादमामुकुटमा
कलितामृतौघमाकारमाकलयतामममंतरंनः॥३॥ पुंजीभूतं
प्रेमगोपांगनानांमूर्तीभूतंभागधेयंयदूनां॥ एकीभूतंगुप्तवित्तंश्रु
तीनांश्यामीभूतंब्रह्ममेसन्निधत्तां॥४॥ एतौराघवचैतन्यश्रीच
रणानां॥परमिममुपदेशमाद्रियध्वंनिगमवनेषुनितांतखेदखि
न्नाः॥विचिनुतभुवनेषुवल्लवीनामुपनिषदर्थमुलूखलेनिबद्धं॥
॥५॥नवनीलमेघरुचिरःपरःपुमानवनीमवाप्यधृतगोपविग्रहः
॥महनीयकीर्त्तिरमरैरपिस्वयंनवनीतभिक्षुरधनास्सचिंत्यते॥६॥
॥एतौबिल्वमंगलश्रीचरणानां॥ क्वयासिखलुचौरिकेप्रमुषितंस्फु
टंदृश्यतेद्वितीयमिहमामकंवहसिकंदुकंकंचुके॥ त्यजेतिनवगो
पिकाकुचयुगंविमृशन्बलाल्लसत्पुलकपंजरोजयतिगोकुलेके
शवः॥७॥दीपकस्य॥ दृक्पातःकमलासनेस्तुभवतांज्ञानंमना
ङ्मारुतेश्रीकंठोपमितःस्मरानितिनतांस्तार्क्ष्येणविज्ञापितः॥
प्रेयस्याःकृतदास्यनंकचकृतंकंठःकुचेसुल्लसल्लक्ष्म्यावासित
मानसोविजयतेस्वप्नप्रबुद्धोहरिः॥८॥ कस्यापि॥ अतिविपुलं
कुचयुगलंरहसिकरैरामृशन्मुहुर्लक्ष्म्याः॥ तदपहृतंनिजहृ
दयंजयतिहरिर्मृगयमाणइव॥९॥ अरसीठकुरस्य॥मकरीवि
रचनभंग्याराधाकुचकलशपीडनव्यसनी॥ ऋजुमपिरेखांलुं
पन्वल्लववेषोहरिर्जयति॥१०॥रूबंधोः॥शिरश्छायांकृष्णः
क्षणमकृतराधाचरणयोर्भुजावल्लिच्छायामियमपितदीयप्र॰

तिकृतौ॥ इतिक्रीडाकोपेनिभृतमुभयोरप्यनुनयप्रसादेजीयास्तामपिगुरुसमक्षंस्थितवतोः॥११॥ हरिहरस्य॥खिन्नोसिमुंचशैलंविभृमोवयमितिवदत्सुशिथिलभुजः॥भरभुग्नविततबाहुषुगोपेषुहसन्हरिर्जयति॥१२॥ कस्यापि॥वेदानुद्धरतेजगन्निवहतेभूगोलमुद्बिभ्रतेदैत्यंदारयतेबलिंछलयतेक्षत्रक्षयंकुर्वते॥पौलस्त्यंजयतेहलंकलयतेकारुण्यमातन्वतेम्लेछान्मूर्छयतेदशाकृतिकृतेकृष्णायतुभ्यंनमः॥१३॥जयदेवस्य॥जीयास्कः कुशलाकृतेर्भगवतः पुच्छच्छटाच्छोटनादुद्यंतःशनचंद्रितांबरतलेतेबिंदवःसैंधवाः॥येर्व्याप्तस्यपतद्भिरौर्वशिखिनस्तेजोजटालंवपुःपानाध्मानवशादरोचकरुजांचक्रेचिरायास्पदं॥१४॥ कस्यापि॥वियत्पुच्छोच्छालोच्छलितजलगर्भेनिधिरपामपांनाथःपाथःपृषतलवभून्योवियदभूत्॥अभूद्ग्रास्नानौर्वोदिनपतिरभूदौर्वदहनज्वलत्कायेयस्मिन्सजयतिहरिर्मीनवपुषा॥१५॥ नपंकैरालेपंकलयतिधरित्रीव्यथभयान्नमुस्तामादत्तेप्युरगनगरभ्रंशभयतः॥नधत्तेब्रह्मांडस्फुटनभयतोघुर्घुररवंवराहोमाहात्म्यादितिजयतिसंकोचिततनुः॥॥१६॥ हनूमतः॥दैत्यानामधिपेनखांकुरकुटीकोणप्रविष्टात्मनिस्फारीभूतकरालकेसरसटासंघट्टघोराकृतेः॥सक्रोधंचसविस्मयंचसगुरुव्रीडंचसांतस्मितंक्रीडाकेसरिणोहरेर्विजयतेतत्कालमालोकितं॥१७॥चंद्रकवेः॥वपुर्दलनसंभ्रमात्स्वनखरंप्रविष्टेरिपोक्कयातइतिविस्मयात्सह्नितलोचनःसर्वतः॥धूयेतिकरधूनिभिर्निपतितपुरोदानवंनिरीक्ष्यभुविरेण्डवज्जयतिजातहासोहरिः॥कस्यापि॥लक्ष्मीपाणिद्वयविरचितमूलमूर्धश्रुतीनांव्यक्तंवंदेचरणकमलद्वंद्वमाद्यस्यपुंसः॥यत्रैकस्यव्यधितवलिनापाद्यतोयैर्वितीर्णैर्गाढंस्वेवप्रणंतितरलःक्षालनंपद्मयोनिः॥१८॥सूक्तिसहस्रात्॥कनकलशास्वच्छेराधापयोधरमंडलेनवजलधरश्यामामात्मद्युतिंप्रतिबिंबितां॥असितशिचयप्रांतभ्रांत्यामुहुर्मुहुरुत्क्षिपन्जयतिजनि

नव्रीडाहासप्रियाहसितोहरिः॥२०॥कस्यापि॥देवःपायात्पयसिविमलेयामुनेमज्जतीनांयाचंतीनामनुनयपदैर्वैचितान्यंशुकानि॥लज्जालोलैरलसवलितैरुन्मिषत्पंचबाणैर्गोपस्त्रीणांनयनकुसुमैरंचितःकेशवोनः॥२१॥संपन्नरमणीशीलसंपन्नरमणीविना॥इत्यूढवान्नरमणीरमणीरुक्मिणींहरिः॥२२॥भवान्हिभगवानेवगतोभेदःपरस्परं॥महत्यागदयायुक्तःसत्यभामासमन्वितः॥॥२३॥ अवेमव्यापाराकलनमनुरीस्पर्शमचिरा दनुन्मीलत्तंतुप्रकरघटनायासमसकृत्॥विधीदत्तांचालीविपदपनयैकप्रणयिनःपटानांनिर्माणंपतगपतिकेतोरवतुनः॥२४॥भ्रमयतिभवपित्तंचेन्भजभजनरसूतशेखरंकृष्णं॥सद्भोरसेनसहसितमनुतृटिकंसर्वथात्यजस्नेहं॥२५॥ अंधंतमश्चेद्यदिबाधतेत्वांसरोजनेत्रंजगदेकसूत्रं॥कथाचरित्रंपरमंपवित्रंकुरुष्वमित्रंवसुदेवपुत्रं॥२६॥द्वाविहदृष्टौसृष्टौदुस्तरसंसृतितरंगिणीतरणे॥उडुपकुलपतिःकृष्णःश्रीरामस्तरणिकुलपतिश्चान्यः॥२७॥निवहसिमुंचशैलंबिभृमोवयमितिवदत्सुशिथिलभुजः॥भरभुग्नविनतबाहुषुगोपेषुहसन्हरिर्जयति॥२८॥ दर्पणार्पितमालोक्यमायास्त्रीरूपमात्मनः आत्मन्येवानुरक्तोवःशिवंदिशतुकेशवः॥२९॥ हृदयंकौस्तुभोद्भासिहरेःपुष्णातुवःश्रियं॥राधाप्रवेशरोधायदत्तमुद्रमिवश्रिया॥३०॥रामोनामबभूवहुंतदबलासीतेतिहुंतौपितुर्वाचापंचवटीवनेनिवसतस्तामाहरद्रावणः॥कृष्णेनेतिपुरातनींनिजकथामाकर्ण्यमात्रेरितांसौमित्रेक्वधनुर्धनुर्धनुरितिप्रोक्तागिरःपांतुवः॥३१॥ पीठेपीठनिषण्णबालकगलेतिष्ठन्सगोपालकोयंत्रांतःस्थितदुग्धभांडमवभिद्याच्छाद्यघंटारवं॥वक्रोपांतकृतांजलिःकृतशिरःकंपंपिबन्यःपयःपापारागतगोपिकानयनयोर्गंडूषफूत्कारकृन्॥३२॥कस्त्वंकृष्णमवेहिमांकिमिहतेम न्मंदिराशंकयायुक्तंतन्नवनीतभाजनपुटेन्यस्तःकिमर्थंकरः॥कर्तुंतत्रपिपीलिकापनयनंसुप्ताःकिमुद्बोधिता बालावत्सगतिंविवेक्तुमितिसंजल्पन्हरिःपातुवः॥३३॥९

राधापुनातुजगदच्युतदत्तचित्तामंथानमाकलयतीदधिरिक्तपात्रे॥तस्याःस्तनस्तबकचूचुकलोलदृष्टिर्देवोपिदोहनधियावृषभंदुदोह॥३४॥ अंगुल्याकःकपाटंप्रहरतिकुटिलेमाधवःकिंवसंतोनोचक्रीकिंकुलालोनहिधरणिधरःकिंद्विजिव्हःफणीन्द्रः॥नाहंघोराहिमर्दीकिमुतखगपतिर्नोहरिःकिंकपीन्द्रइत्येवंसत्यभामाप्रतिवचनजितःपातुवश्चक्रपाणिः॥३५॥ ॥इतिकृष्णः॥

अथरामचन्द्र

श्रांतोसिचेत्त्वंसृतिनीव्रतापतःसीतान्वितंमारुतपोतसेवितं॥पलाशिसंघातविवृद्धविक्रमंरामंधृताकारमुपेहिसत्वरं॥१॥ यातायातैःस्रुबहुभिःश्रांतोसियदिहेसखे॥एकंगुरुघनच्छायंसीतारामपदंभज॥२॥राकारोच्चारमात्रेणमुखान्निर्यातिपातकं।पुनःप्रवेशसंदेहान्मकारस्तत्कपाटवत्॥३॥अस्त्रामासतृणंप्रियादुहितृणामासस्मरारेर्धनुर्दारामासमुनेःशिलापिनृवरामासस्वयंपादुका॥कुल्यामासमहार्णवोःपिकपयोयोधांबभूवुस्तदापोलस्त्योमशकोबभूवभगवंस्त्वंमानुषामासिथाः॥४॥ नालीकभंगकृद्रतीवनदीनबंधुर्नक्षत्रपोनवसुधाविभवैकहेतुः॥राजाकिमिंदुरपिनार्यभिमानहारीराजापरंजयतिराघवसार्वभौमः॥५॥ कांतंश्रीरघुतिलकंसर्वजगत्पालकंविहायजनः॥अनुसरतिनरकांतंनानाकष्टाश्रयंशिवश्रिवाय॥६॥उत्फुल्लामलकोमलोत्पलदलश्यामायरामायनःकामायप्रथमाननिर्मलगुणग्रामायरामात्मने॥योगारूढमुनींद्रमानससरोहंसायसंसारविध्वंसायस्फुरदोजसेरघुकुलोत्तंसायपुंसेनमः॥७॥शक्यंयन्नविशेषतोनिगदितुंप्रेमेवयच्चिंतितंमृद्वंगीवदनेंदुमंडलमिवस्वांतेविधत्तेमुदं॥यन्मुग्धाननयनांतचेष्टितमिवाध्यक्षेपिनोलक्षितंतत्तेजोविनयादमंदहृदयानन्दायवंदामहे॥ ॥इतिरामचन्द्रः॥

अथब्रह्मा

तंवंदेपद्मसद्मानमुपवीतच्छटाच्छलात्॥गंगास्रोतस्त्रयेणैव यंसदैवनिषेवते॥१॥राजशेखरस्य॥ ॥इतिब्रह्मा॥ ॥

अथरविः

शुकतुंडच्छविसवितुश्चंडरुचःपुंडरीकवनबंधोः॥मण्डलमुदितंवंदेकुण्डलमाखण्डलाशायाः॥१॥इतिरविः॥ इतिश्रीशार्ङ्गधरविरचितायांपद्धत्यांनमस्कृतिपरिच्छेदोद्वितीयः॥२॥

अथआशिषः

तत्रपूर्वंगणेशः॥ दंताग्रनिर्भिन्नहिमाचलोर्वीरंध्रोत्थिताहींद्रमणिप्रभौघे॥ नागाननस्तंभधियाकपोलौघर्षन्नपितृप्यांहसितःपुनातु॥१॥श्रीगोविन्दराजदेवानां॥एकदंतद्युतिसितःशंभोःसूनुःश्रियेस्तुवः॥ विद्याकंदइवोद्भिन्ननवांकुरमनोहरः॥२॥ श्रीधरदेवानां॥ गंडस्थलीगलदमंदमदप्रवाहमाद्यद्द्विरेफमधुरस्वरदत्तकर्णः॥ हर्षादिवालसनिमीलितनेत्रयुग्मोविघ्नच्छिदेभवतुभूतपतिर्गणेशः॥३॥ आसीनेगरप्रकारप्रशस्तौ॥ विघ्नेशोवःसपायाद्विहृतिषुजलधीन्पुष्कराग्रेणपीत्वातस्मिन्नुद्धत्यविश्वंवमतितदखिलंदृश्यतेव्योम्निदेवैः॥ क्वाप्यंभः क्वापिविष्णुःक्वचनकमलभूः क्वाप्यनंतः क्वचिच्छ्रीः क्वाप्यौर्वः क्वापिशैलाः क्वचनमणिगणाः क्वापिनक्रादिसत्वाः॥४॥हनूमतः॥ ॥
॥ :॥इतिगणेशः॥

अथशिवः

उपहरणंविभवानांसंहरणंसकलदुरितजालस्य॥ उद्धरणंसंसाराच्चरणंवःश्रेयसेस्तुविश्वपतेः॥५॥विद्यारण्यश्रीचरणानां॥ आसीनेपूष्णितूष्णींव्य सनिनिशशिनिव्योम्निकृष्णेसतृष्णेदैत्येंद्रेजातनिद्रेद्रवतिमघवतिक्लांतकांतौनितांते॥ अब्रह्मण्यंब्रुवाणेकमलपुटकुटीश्रोत्रियेशार्ङ्गपायेपायाद्वःकालकूटंझटितिकवलयन्लीलयानीलकंठः॥६॥ लक्ष्मणखंडप्रशस्ते॥ वक्त्रंशीतकरोधरोघनरसःकामप्रदोविग्रहःश्वासोगंधवहः

सरोरुहमुत्सृत्यपाणिःस्मिताभ्युचितः॥ वक्षःपीनपयोधराभिकरणं पृथ्वीनितंबस्थलीत्यष्टौधूर्जटिमूर्त्तयःस्मरभयात्तदुर्गाश्रिताः पांतुवः॥७॥ भारती कवेः॥ च्युतामिंदोर्लेखांरतिकलहभग्नं चवलयंसमंचक्रीकृत्यप्रहसितमुखीशैलतनया॥ अवोचद्यं पश्येत्यवतुसशिवःसाचगिरिजासचक्रीडाचंद्रोदशनकिरणैःपूरिततनुः॥८॥ क्रीडाचंद्रस्य॥ कल्पांतेक्रोधनस्यत्रिपुरविजयिनःक्रीडयासंचरिष्णोःकृत्वापिप्राणिजातैर्निजमुखकुहरातिथ्यमप्राप्ततृप्तेः॥ दिग्भित्तीः प्रेक्ष्यशून्याः प्रलयजलनिधिग्रासितात्मीयमूर्त्तिग्रासव्यासक्तमोघश्रमजनितरुषःपातुवोगर्जितानि॥९॥ भैरीभांकारस्य॥ कल्पांतेशमितत्रिविक्रममहाकंकालबद्धस्फुरच्छेषस्यूततनुसिंहपाणिनखरप्रोतादिकोलामिषः॥ विश्वैकार्णवताविशेषमुदितौतौमत्स्यकूर्मावुभौकर्षन्धीवरतांगतस्यतुसतांमोहंमहाभैरवः॥१०॥ छित्तमस्य॥ इतिशिवः॥ ॥

अथलोचनं

पक्ष्मालीपिंगलिम्नःकणइवतडितांयस्यकृत्स्नःसमूहोयस्मिन्ब्रह्मांडमीषद्विघटितमुकुलेकालयज्वाजुहाव॥ अर्चिर्निःशेषचूडाशशिगलितसुधाघोरझंकारिकोणंतार्तीयंयत्पुरारेस्तद्वतुमदनप्लोषणंलोचनंवः॥११॥ भवभूतेः॥ इतिलोचनम्॥ ॥

अथगणाः

संध्यातांडवडंबरव्यसनिनोदेवस्यचंडीपतेर्भ्रष्टापांडुविशीर्णमुंडच्चयनव्यग्रागणाःपांतुवः॥ यैरौत्सुक्यवशीकृतैर्ग्रहगणाद्ग्राहौगृहीतेजवात्सूर्याचंद्रमसोमिथःस्मितवतोजातंकरास्फालनं॥१२॥ कस्यापि॥ इतिगणाः॥

अथजटाजूटः

सधूर्जटिजटाजूटोजायतांविजयायवः॥ यत्रैकपलितभ्रांतिंकरोत्यद्यापिजान्हवी॥१३॥ सूरवर्मणः॥ इतिजटाजूटः॥ ॥

अथपार्वती

प्रत्यासन्नविवाहमंगलविधौदेवार्चनव्यग्रयादृष्ट्वाग्रेपरिणेतुरेवलिखितांगंगाधरस्याकृतिं॥उन्मादस्मितरोषलज्जितधियागौर्याकथंचिच्चिराद्दूस्त्रीवचनात्प्रियेविनिहितःपुष्पांजलिःपातुवः॥१४॥वक्षःपीठेनिरीक्ष्यस्फटिकमणिशिलामंडलस्वच्छभासिस्वांछायांसाभ्यसूयात्वमियमितिमुहुःसत्यमाम्बा॰सितासि॥ ॥वामेमेदक्षिणेस्याःश्रवसिकुवलयंनाहमित्यालपंतीदत्ताश्लेषासहासंमदनविजयिनापार्वतीवःपुनातु॥१५कस्यापि॥स्वेदस्तेकथमीदृशःप्रियतमेत्वन्नेत्रवन्हेर्विभोकस्माद्वेपितमेतदिंदुवदनेभोगींद्रभीतेर्भव॥रोमांचःकथमेषदेविभगवन्गंगांभसांसीकरैरित्थंभर्तरिभावगोपनपरागौरीचिरंपातुवः॥१६॥कस्यापि॥ ॥इतिपार्वती॥

अथषण्मुखः

अर्चिष्मंतिविदार्यवक्त्रकुहराण्याशङ्कितोवासकेरंगुल्याविषभर्तुरागणयतःसंस्पृश्यदंतांकुरान्॥एकंत्रीणिचसप्तपंचषडितिप्रध्वस्तसंख्याक्रमाह्वाचःक्रौंचरिपोःशिशुत्वविकलाःश्रेयांसिपुष्णांतुवः॥१७॥ कस्यापि॥ ॥इतिषण्मुखः॥ ॥

अथगंगा

मुक्ताभान्कपालशुक्तिषुजटावल्लीषुमल्लीनिभावन्हौलाजनिभादृशोर्मणिनिभाभोगोत्करेभोगिनां॥नृत्यावर्त्यनिवर्तनेरितपयःसंमूर्छितोच्छालिताःखेलंतोहरमूर्ध्निपांतुभवतोगंगापयोविंदवः॥१८॥ कृष्णमिश्रस्य॥एषाधर्मपताकिनीतटतरुच्छायावसन्नाकिनीशुश्रूष्यत्पातकिनीभगीरथतपःसाफल्यसंदायिनी॥प्रेमारूढपिनाकिनीगिरिसुतासाकेसरालोकिनीपापाडंबरडाकिनीत्रिभुवनानंदायमंदाकिनी॥१९॥कस्यापि॥ ॥इतिगंगा॥

अथतोडवं

देवादिक्पतयःप्रयातपरतःखंमुंचतांभोमुचःपातालंव्रजमेदिनिप्रविशतक्षोणीतलंभूधराः॥ब्रह्मन्नुन्नयदूरमात्मभुवनंनाथस्य

नोनृत्यतःशंभोसंकटमेतदित्यवतुवःप्रोत्सारिणानंदिनः॥२०॥
महानाटकात्॥संध्यात्तांडवडंबरव्यसनिनोभर्गस्यचंडभ्रमिव्या
नृत्यद्भुजदंडमंडलभुवोगंगानिलाःपांतुवः॥येषामुद्धततांडवे
नझटितिव्यूहेषुभूमीभृतामुड्डीनेषुबिडौजसापुनरसौदंभोलि
राशंकितः॥२१॥सोमनाथप्रशस्तेः॥ ॥इतितांडवं॥ ॥

अथहरिहरौ

स्फटिकमरकतश्रीहारिणोःप्रीतियोगात्तदवतुवपुरेकंकामकं
सद्विषोर्वः॥भवतिगिरिसुतायाःसार्धमंभोधिपुत्र्यासदृशमह
सिकंठेयत्रसीमाविवादः॥२२॥कस्यापि॥यौतौशंखकपालभू
षितकरौमालास्थिमालाधरौदेवौद्वारवतीश्मशाननिलयौना
गारिगोवाहनौ॥द्वित्र्यक्षौबलिदक्षयज्ञमथनौश्रीशैलजावल्ल
भौपापंमेहरतांसदाहरिहरौश्रीवत्सगंगाधरौ॥२३॥इतिहरिहरौ

अथचंडी

विद्राणेरुद्रवृंदेसवितरितरलेवज्रिणिध्वस्तवज्रेजाताशंकेश
शांकेविरमतिमरुतित्यक्तवैरेकुबेरे॥वैकुंठेकुंठितास्त्रेमहिष
मतिरुषंपौरुषोपघ्ननिघ्नंनिर्विघ्नंनिघ्नतीवःशमयतुदुरितंभूरिभावाभवा
नी॥२४॥बाणभट्टस्य॥ ॥इतिचंडी॥

अथकृष्णाः

पांतुवोजलदश्यामाःशार्ङ्गज्याघातकर्कशाः॥त्रैलोक्यमंडपस्तंभा
श्चत्वारोहरिबाहवः॥२५॥कस्यापि॥भ्राम्यन्मंदरकंदरोदरद
रीव्यावर्त्तिभिर्वारिधेःकल्लोलैरमलाकुलंकलयतोलक्ष्म्यामुखां
भोरुहं॥औत्सुक्यात्तरलाःस्मराद्विकसिताभीत्यासमाकुंचिताः
क्रोधेनज्वलितामुदामुकुलिताःशौरेर्दृशःपांतुवः॥२६॥कस्या
पि॥अर्धोन्मीलितलोचनस्यपिबतःपर्याप्तमेकंस्तनंसद्यःप्रस्तु
तदुग्धदिग्धमपरंहस्तेनसंमार्जतः॥मात्राचांगुलिलालितस्य
चिबुकेस्मेरायमानेमुखेविष्णोःक्षीरकणांबुधामधवलादंतद्यु
तिःपातुवः॥२७॥बिल्वमंगलश्रीचरणानां॥अस्मिन्कुंजेविना

पिप्रचलतिपवनाहूर्ततेकोपिनूनंपश्यामःकिंनगत्वेत्यनुसरतिगणेभीतभीतेर्भकाणां।।तस्मिन्राधासखोवःसुखयतुविलसल्लीलयाकैटभारिर्व्यातन्वानोमृगारिप्रबलघुरघुरारावरौद्रध्वनिनादात्।।२८।।कस्यापि।।दर्पणार्पितमालोक्यमायास्त्रीरूपमात्मनः।।आत्मन्येवानुरक्तोवःशिवंदिशतुकेशवः।।२९।।कस्यापि।।गच्छाम्यच्युतदर्शनेनभवतःकिंतृप्तिरुत्पद्यतेकिंत्वेवंविजनस्थयोर्हतजनःसंभावयत्यन्यथा।।इत्यामंत्रणभंगिसूचितवृथावस्थानखेदालसामाश्लिष्यन्पुलकोत्कराचितवपुर्गोपीहरिःपातुवः।।३०।।कस्यापि।।हृदयंकौस्तुभोभासिहारःपुष्णातुवःशिवं।।राधाप्रवेशरोधायादत्तमुद्रमिवप्रिया।।३१।।मुकुंदस्य।।रामोनामबभूवहुंतदबलासीतेतिहुंतापितुर्वाचापंचवटीवनेनिवसतस्तामहरद्रावणः।।कृष्णेनेतिपुरातनीनिजकथामाकर्ण्यमात्रेरितांसौमित्रेक्वधनुर्धनुर्धनुरितिप्रोक्तागिरःपांतुवः।।३२।।वसुंधरस्य।।सकलभुवनबंधोर्वैरमिंदोसरोजैरनुचितमितिःमत्वायःस्वपादारविंदं।।घटयतुमिवमाथियोजयस्याननेंदौवटदलपुटशायीमंगलंनःकृषीष्ट।।३३।।कस्यापि।।कोयंद्वारिहरिःप्रयास्युपवनंशाखामृगस्यात्रकिंकृष्णोहंदयितेबिभेमिसुतरांकृष्णःकुतोवानरः।।राधेहंमधुसूदनोव्रजलतांतामेवपुष्पान्वितामित्थंनिर्वचनीकृतेदयितयाह्रीणोहरिःपातुवः।।३४।।कस्यापि।।

अथदशावताराः

दिश्याद्वःकुशलाकृतिःसभगवान्नैःश्रेयसींसंपदंयस्यस्फूर्जदतुच्छपुच्छशिखरप्रेंखोलनक्रीडनैः।।विष्वग्वार्धिसमुच्छलज्जलभरैर्मंदाकिनीसंगतैगंगासागरसंगमप्रणयिनीजाताविहायस्थली।।३५।।निष्प्रत्यूहमनल्पकल्पचलितस्त्रैलोक्यरक्षागुरुःक्रीडाकूर्मकलेवरःसभगवान्दिश्यादमंदांमुदं।।कल्पांतोदधिमध्यमज्जनवशात्व्यासर्पिणःसंलुठत्पृष्ठेयस्यबभूवसैकतकणच्छायंधरित्रीतलं।।३६।।दृप्यद्दैत्यकुटुंबिनीजनमनःसं

तोषसंकोचनःकुर्याद्दिष्टमनश्वरंसभगवान्क्रोडावतारोहरिः॥
यद्दंष्ट्रांकुरकोटिकोटरकुटीकोणांतरस्थेयसौपृथ्वीभात्यवदा
तकेतकदलालीनेवभृंगांगना॥३७॥ हनूमतएते॥धटट्टिति
चर्मणिच्छमितिचोच्छलच्छोणितेधगिद्धगितिमेदसिस्फुट
रवोस्थिपुष्टाकृतिं॥पुनातुभवतेहरेरमरवैरिवक्षस्थलक्वण
त्करजपंजरक्रकचकाषजन्मानिलः॥३८॥ वाक्यराजस्य॥ब्र
ह्मांडच्छत्रदंडःशतधृतिभवनांभोरुहेनालदंडःक्षोणीनौकूपदंडः
क्षरदमरसरित्पट्टिकाकेतुदंडः॥ज्योतिश्चक्राक्षदंडस्त्रिभुवन
विजयस्तंभदंडोंघ्रिदंडःश्रेयस्त्रैविक्रमस्तेवितरतुविबुधद्वेषिणां
कालदंडः॥३९॥ ॥किंदोर्भ्यांकिमुकार्मुकोपनिषदाभार्गप्र
सादेनकिंकिंवेदाधिगमेनभास्वतिभृगोर्वंशेचकिंजन्मना॥किंवा
नेनममाद्भुतेनतपसापीडांकृतांतोपिचेद्विप्राणांकुरुतेंतरित्यनु
शयोरामस्यपुष्णातुवः॥४०॥ हनुमतः॥ कूर्मोमूलवदालवाल
वदपांराशिर्लतावद्दिशोमेघाःपल्लववत्प्रसूनफलवन्नक्षत्रसूर्ये
दवः॥स्वामिन्व्योमतरुःक्रमेममकियान्क्वत्वेतिगांमारुतेःसी
तान्वेषणमादिशंदिशतुवोरामःसलज्जश्रियः॥४१॥ कस्यापि॥
कृष्णात्वंनवयौवनोसिचपलाःप्रायेणगोपांगनाःकंसोभूपतिर
ब्जनालभिदुरग्रीवावयंगोदुहः॥ तद्याचेंजलिनाभवंतमधुनावृं
दावनंमह्निनामायासीरितिनंदगोपवचसानम्रोहरिःपातुवः॥४२
॥विल्वमंगलश्रीचरणानां॥ध्यानव्याजमुपेत्यचिंतयसिकामु
न्मील्यचक्षुःक्षणंपश्यानंगशरातुरंजनमिमंत्रातापिनोरक्षसि
॥मिथ्याकारुणिकोसिनिर्दयतरस्त्वत्तोकुतोन्यःपुमान्शश्वन्मा
रवधूभिरित्यभिहितोबुद्धोजिनःपातुवः॥४३॥श्रीहरिगणस्य॥
उद्धृतकरकरवालःशाकितिमिरध्वंसनेमहानिपुणः॥ कल्किर्ह
रिवःपायाद्पायतंकलिनिशांतोत्थः॥४४॥ शार्ङ्गधरस्य॥ पाठीनः
कमठःकटिर्नरहरिःखर्वाकृतिर्भार्गवोरामःकंसनिषूदनोदश
बलःकल्कीचनारायणः॥युष्माकंसविभूतयेस्तुभगवान्से—

तुंभवांभोनिधावुत्ताराययुगेयुगेयुगपतिस्त्रैलोक्यनाथोहरिः॥४५
॥हनूमतः॥ ॥इतिदशावतारः॥

अथलक्ष्मीः

पायात्पयोधिदुहितुःकपोलामलचन्द्रमाः॥यत्रसंक्रांतबिंबेनह
रिणाहरिणायितं॥४६॥कस्यापि॥उत्तिष्ठंत्यारतांतेभरमुरग
पतौपाणिनैकेनकृत्वाधृत्वाचान्येनवासोविगलितकबरीभार
मंसेवहंत्या॥भूयस्तत्कालकांतिद्विगुणितसुरतप्रीतिनाशौरि॰
णावःशय्यामालिंग्यनीतंवपुरलसलसद्बाहुलक्ष्म्याःपुनातु।
॥४७॥निशानारायणस्य॥ ॥इतिलक्ष्मीः॥

अथसूर्यः

सिंदूरस्पृहयास्पृशंतिकरिणांकुंभस्थसाधोरणाभिल्लीपल्लवशं
कयाविचिन्वतेसांद्रद्रुमद्रोणिषु॥कांताकुंकुमकांक्षयाकरतले॰
मृद्नंतिलग्नंचयत्तत्तेजःप्रथमोद्भवंभ्रमकरंसौरंचिरंपातुवः॥
॥४८॥त्रिविक्रमस्य॥जंभारा तीवकुंभोद्भवमिवदधतःसांद्रसिं
दूररेणुंरक्तैःसिक्ताइवौघैरुदयगिरितटीधातुधाराद्रवस्य॥आ
यांत्यातुल्यकालंकमलवनरुचेवारुणावोविभूत्यैभूयासुर्भासयं
तोभुवनमभिनवाभानवोभानवीयाः४९भक्तिप्रह्वायदातुंकमलपु
टकुटीकोटरक्रोडलीनांलक्ष्मीमाकृष्टकामाइवकमलवनोद्घाट
नंकुर्वतेये॥कालाकारांधकाराननयतिनजगत्साध्वसध्वंसकल्याः
कल्याणंवःक्रियासुःकिसलयरुचयस्तेकराभास्करस्य॥५०॥ए
तौमयूरस्य॥कनकनिकषभासासीतयालिंगितांगोनवकुवलय
दामश्यामवर्णाभिरामाः॥अभिनवइवविद्युन्मंडितोमेघखण्डः
शमयतुममतापंसर्वतोरामचंद्रः॥५१॥आख्यातेहसितंपिता॰
महइतित्रस्तंकपालीतिचव्यावृत्तंगुरुरित्यथंदहनइत्याविष्कृता
भीरुता॥पौलोमीपतिरित्यसूयितमथव्रीडाविनम्रश्रियापायाद्वः
पुरुषोत्तमोऽयमितियोन्यस्तःसपुष्पांजलिः॥५२॥कस्तूरीति
लकंतिभालफलकेदेव्यामुखांभोरुहेरोलंबंतितमालबालमुकुलो

त्तंसंतिमौलिंप्रति॥ याःकर्णे विकचोत्पलंति कुचयोरंसे चकाला
गरुस्यासेति प्रथयंतु तास्तव शिवं श्रीकंठकंठस्रिषः॥५३॥ भूत्या
लेपनभूषितः प्रविलसन्नेत्राग्निदीपांकुरः कंठेपन्नगपुष्पदाम
सुभगो गंगाजलैः पूरितः॥ ईषत्ताम्रजटाग्रपल्लवयुतोन्यस्तो
जगन्मंडपे शंभुर्मंगलकुंभतामुपगतो भूयात्सतां श्रेयसे५४॥ पि
त्रोः पादाब्जसेवागत गिरितनयापुत्रपत्रातिभीतक्षुभ्यद्भुपाभु
जंगश्वसनगुरुमरुद्दीप्त नेत्राग्नितापात्॥ स्विद्यन्मौलींदुखंड
स्रुतवहुलसुधासेकसंजातजीवा पूर्वाधीतं पठंती त्यवतु विधि
शिरोमालिका शूलिनो वः॥५५॥ मल्लीमाल्यधिया सुधाकरक
लांकंठश्रियं कज्जलभ्रांत्या भालविलोचनानलशिखां सिंदूरपूरा
शया॥ कैलासे प्रतिबिंबितास्त्ववपुषो गृह्णन्हसंत्या मुहुः पार्वत्या
मतिकर्मकर्मणि चिरं मुग्धो हरः पातु नः॥५६॥ दास्येहं परिरंभणा
निकितवद्यूते जिता नित्वया धैर्यं धेहि यतःकृतः शतमहोरात्राणि त
त्रावधिः॥ इत्युक्तः शिवया निशादिवसकृज्ज्योतिर्मयाक्षिद्वयद्रा
गुन्मेषनिमेषकोटिघटनाव्यग्रो हरः पातु नः॥५७॥ येनध्वस्तम
नोभवेन वलिजित्कायः पुरा स्त्रीकृतो यश्चोद्वृत्तभुजंगहारवल
यो यो वर्हिपत्रप्रियः॥ यस्याहुः शशिमच्छिरो हर इति स्तुत्यं च ना
मामराः पायात्स स्वयमंधकक्षयकरस्त्वां सर्वदो माधवः॥५८॥ वृं
दारण्ये चरंती विभुरपि सततं भूर्भुवःस्वः सृजंती नंदोद्भूताप्यना
दिः शिशुरपि निगमैर्लक्षिता वीक्षितापि॥ विद्युल्लेखावैनद्धोन्म
मदमलमहांभोदसच्छायकाया मायापायादपायाद्विदितमहि
माकापि पैतांबरी वः॥५९॥ अभिनवनवनीतस्निग्धमापीतदुग्धं द
धिकणपरिदिग्धं मुग्धमंगं मुरारेः॥ दिशतु भुवनकृच्छ्रच्छेदितापि
च्छगुच्छच्छविनवशिखिपिच्छालांछितं वांछितं वः॥६०॥ नामोद
स्ताखिलामोदमनिशमयुजांपः प्रकामोप वाहः श्यामोदर्पाद्धधा
मोदसमिलितपयोधारयामोदते यः॥ वामोदन्यासरामोदरतरल
दृशां दत्तकामोदयो यः सामोदः श्रीललामोदलपतु दुरितं सोत्र

द्रामोदरोवः॥६१॥सत्यासक्तमनाःप्रवृद्धनरकच्छेदीहिद्विजेंद्राश्रयोयुक्तानेकमुखोद्भवास्पदमलंश्रीर्यत्रसंराजते॥योगंगांचविभर्त्तियश्चसशिवोयःकामदेहाश्रयःसंगःसाम्यमयंप्रयानुभवतात्कृष्णोनरुद्रेणवा॥६२॥यन्नगधारिकराग्रोगंगोयाद्रक्षितोगदोग्रभुजः॥शशिखंडशेखरउमापरिग्रहोमुहुरनादिरवतुत्वां॥६३॥अवलाठ्यविग्रहश्रीःस्मरस्येनतिरक्षमालयोपेतः॥पंचकमोदितमुखःपायात्परमेश्वरोमुहुरनादिः॥६४॥स्वामीमुग्धतरोवनंघनमिदंबालाहमेकाकिनीक्षोणीमावृणुतेतमालमलिनच्छायातमःसंततिः॥तन्मेसुंदरकृष्णमुंचसहसावर्त्मेतिगोप्यागिरःश्रुत्वातांपरिरभ्यमन्मथकलासक्तोहरिःपातुवः॥६५॥मुग्धेमुंचविषादमत्रबलभित्कंपोगुरुस्त्यज्यतांसद्भावंभजपुंडरीकनयनेमान्यानिमान्यानय॥इत्थंशिक्षयतःस्वयंवरविधौधन्वंतरेर्वाक्छलादन्यत्रप्रतिषेधमात्मनिविधिंशृण्वन्हरिःपातुवः॥६६॥अकृशंकुचयोःकृशंवलग्नेविततंचक्षुषिविस्तृतंनितंबे॥अरुणाधरमाविरस्तुचित्तेकरुणाशालिकपालिभागधेयं॥६७॥सद्रत्नस्फारहाराभयवरदकरास्रस्तधम्मिल्लभारामूलाधाराधिकारानिगमनिधिधराकाव्यकोटिप्रचारा॥संसारानल्पकारासदनमयहराचिह्ननैकावतारातारा शृंगारधारामनसिवसतुतेसर्वदासर्वसारा॥६८॥एकस्मिन्नयनेभृशंतपतियःकालेसदाहक्रमोयेनातन्यतयत्प्रकाशममयेनैवापदंदुर्लभं॥साव्योमावयवस्ययत्रविदितालोकेगतिःशाश्वतीश्रीसूर्यःस्मरसेवितोपिहिमहादेवःसनस्त्रायतां॥६९॥साटोपव्योमहट्टोषितरजनिवणिक्नायकोन्मुक्ततारामुक्ताहारापहारात्तरलखगरवप्रोत्थिताकीर्त्तिशांत्यै॥कर्षन्नंभोजकुंभोदरकुहरवहिर्निस्सरत्षट्पदालीकालव्यालीकरेणाकलयतुदिनकृत्कल्मषोन्मूलनंवः॥७०॥शैवालश्रेणिशोभांदधतिहरजटावल्लयोहंतयस्यास्तल्लासोल्लासचलल्लसशफरतुलांयत्रधत्तेकलावान्॥उन्मीलद्भोगिभोगावलिसु

भगसितांभोजसंभावितांभागेगानेगारिसंगामहतितवविधौ
मंगलान्यातनोतु॥७१॥ दृष्टाःसंकष्टदाहाःश्रवणपथगताःपुण्य
पुंजावगाहाःस्पृष्टाःसंसारपाथोनिधिपतितधरोद्धारधुर्यावरा
हाः॥पीतास्तापोपशांतिप्रजननपटवस्तेसुधावारिवाहाःक॰
ल्याणंकल्पयंतांकलिकलुषहराविष्णुपद्याःप्रवाहाः॥७२॥
तावत्कर्णाध्वयाताजनधनकलुषाधूननेगंधवाहादृष्टाःकिंहव्य
वाहाःसकृद्दहदहनेस्वर्गतोपुण्यवाहाः॥ स्पष्टाःसंसारहा
हारवकटुकमहांभोधिमग्नेवराहाःपीताःपीयूषधाराधिकतर
मधुराःपांतुगोदाद्वाहाः॥७३॥ शार्ङ्गीब्रह्मकमंडलोरधिगतैर्यैः
प्रापितीर्थांघ्रितांयैर्मृत्स्कंजयतामनाविगरलग्रस्तोजटाजूटगैः
॥येभ्योशिक्षतमाधुरीमृदुजटाजूटेमठेचंद्रमास्तानीमानिपयां
सिगोतमितवश्रेयांसियच्छंतुनः॥७४॥ यासांसत्यपिसद्गुणानु
स्मरणेदोषानुवृत्तिःपदायाःप्राणान्परमर्पयंतिनपुनःसंपूर्णदृष्टिं
प्रिये॥ अत्यंताभिमतेपिवस्तुनिविधिर्यासांनिषेधात्मकस्ता
स्त्रैलोक्यविलक्षणप्रकृतयोवामाःप्रसिध्यंतुताः॥७५॥ द्रुतंय
स्यालोकाद्दूरहिजनशोकापनयनंयदंकेसानंदनयनमरविंदं
विहरति॥नयस्यापैतिश्रीःकचनिचयराहोरपिपुनःसमेरवेदंरा
मावद्नहिमधामाशमयतु॥७६॥ यत्कीर्त्याधवलीकृतंत्रिभुवनं
मूर्त्याजगन्मोहितंभक्त्येशःपरितोषितःसुचरितैरानंदिताःसज्ज
नाः॥पूर्णाशावहवःकृतावितरणेयेनत्वयायाचकास्तस्मैसर्वे
गुणाश्रयायभवतेदीर्घायुराशास्महे॥७७॥ दानेकल्पतरुर्नये
सुरगुरुःकाव्येकविस्तेजसिग्रीष्मरविर्धनेधनपतिःसत्ये
तृयायांशिविः॥गांभीर्येसरितांपतिर्निरुपमेशौर्येस्कभल्लापतिः॰
श्रीमान्धर्मरतिर्महीपतिरयंजीयात्सहस्रंसमाः॥७८॥ वि
द्वन्मानसहंसवैरिकमलासंकोचचंद्रद्युतेदुर्गामारणनीललो
हितसमित्स्वीकारवैश्वानरः॥ सत्यप्रीतिविधानदक्षविजयप्रा॰
ग्भावभीमप्रभोसाम्राज्यंवरवीरवत्सरशतंवैरंचमुच्चैःक्रियाः॥७९।

दिगंबरनितंबिन्याःकिमंबरविभूषणं॥ इत्थंवरहरःपायात्परीरंभहरःपरौ॥८०॥ मौलौकिन्नुमहेशमानिनिजलंकिंवक्त्रमंभोरुहंकिंनीलालकवेणि कामधुकरीकिंभ्रूलतावीचिका॥ किंनेत्रेशफरीकिमुस्तनयुगंप्रेंखद्रथांगद्वयंसाशंकामितिवंचयन्गिरिसुतांगंगाधरःपातुनः॥८१॥ भीतिर्नैवभुजंगपुंगवविषात्प्रीतिर्नचंद्रामृतान्नाशौचंनृकपालकंठलुलनाच्छौचंनगंगाजलात्॥ नोद्वेगस्थितिभस्मनोनचसुखंगौरीस्तनालिंगनादात्मारामतयाहिताहितसमःस्वस्थोहरःपातुनः॥८२॥ देव्याःप्राक्परिरंभणेकिलकरौद्वौद्वौपुनस्तत्करौरोद्धुंतन्मुखमुन्मुखंरचयितुंद्वौचाधरास्वादने॥ द्वौनेत्रांतचलाल कोपनयनेमोक्तुंचनीवींदृढांद्वौवित्थंसफलीकृताखिलकरःपायात्सवःशंकरः॥८३॥ मातस्तातजटासुकिंसुरसरित्किंशेखरेचंद्रमाःकिंभालेहुतभुक्लुठत्युरसिकिंनागाधिपःकिंकरौ॥ कृत्तिःकिंजघनद्वयांतरगतंयद्दीर्घमालंबतेश्रुत्वापुत्रवचोंबिकास्मितमुखीलज्जाननापातुवः॥८४॥ पंचास्यपंचदशनेत्रपिधानदक्षाद्दाक्षायणीमृदुकराःकृतिनःपुनंतु॥ द्वौवल्लकीकथमकेतिचवादयंतावष्टादशोपिघटयन्सुतमोनमुद्रां॥८५॥ उद्वाहारोपितार्द्रोक्षतनिजपदयोःसंगतामिंदुमौलावानम्रेयासुधांशोर्व्यधितकिलकलांतूर्णमेवान्नपूर्णा॥ सक्तानामक्षतानाममृतदृगनलोपाधितःपक्वभावान्नानार्थैरन्नपूर्णाप्रणतजनततेःपूर्णतामातनोतु॥८६॥ यादृग्जानासिजांबूनदगिरिशिखरेकांतिरिंदोःकलानामित्यौत्सुक्येनपत्यौस्मितमधुरमुखांभोरुहंभूषमाणे।लीलादोलायमानश्रुतिकमलमिलद्भृंगसंगीतसाक्षीपायाद्दंभोधिजायाःकुसुमशरकलानाट्यनांदीनकारः॥ ॥८७॥ कःखेभातिहतोनिशाचरपतिःकेनांबुधावाद्रवत्कःकीदृक्करुणिविलासगमनंकोनामराज्ञाप्रियः॥ किंपत्रंनृपतेःकिमस्फललितंकेरामनामावधीत् मत्स्यश्रोत्तरमध्यमाक्षरपदं तत्स्यात्तवाशीर्वचः॥८८॥ नक्रोधःक्रियतांप्रियेसतुभवन्मौलि

स्थगंगोदरेमुग्धेमानसपूजितंस्यजकृतंयुष्मान्नियोगद्वयं॥वक्रेश्लेषममुंनिराकुरुकदाभीष्टोसिवक्रोमयावामांग्येतिहृतोत्तरःस्मरहरःस्मेराननःपातुवः॥ ॥यंशैवाःसमुपासतेशिवइतिब्रह्मेतिवेदांतिनोबौद्धाबुद्धइतिप्रमाणपटवःकर्त्तेतिनैयायिकाः॥अर्हन्नित्यथजैनशासनरताःकर्मेतिमीमांसकाःसोयंवोविदधातुवांछितफलंत्रैलोक्यनाथोहरिः॥ ॥लोलेब्रूहिकपालिकामिनिपिताकस्तेपतिःपाथसांकःप्रस्येतिजलात्पत्यजननप्रत्येतियःमत्सरात्॥इत्थंपर्वतसिंधुराजसुतयोराकर्ण्यवाक्चातुरीसंस्मेरस्यहरेर्हरस्यचमुदोनिघ्नंतुविघ्नंतुवः॥ ॥मोहेरंबकिमंबरोदिषिकथंकर्णौलुठत्यग्निभूःकिंतेस्कंदविचेष्टितंममपुरासंख्याकृताचक्षुषां॥नैतत्तेप्युचितंगजास्यचरितंनासांमिमीतेंबमेमेमामेतिस्कनोविलोक्यहसतीपायादुपायादुमा॥ ॥श्रावंश्रावंत्वदीयंगुणगणमविरलंसर्वदायाचकेभ्यस्त्वत्साम्यामीप्सितेभ्यःसकलविषयजंभूपवर्गंविहाय॥त्वत्तोहंप्राप्तुमिच्छुर्विबुधतिलकतांत्वत्समीपेतिदूराद्यायातस्त्वंभ्रातायुर्भवकुरुष्वतथायेननान्यंभजेहं॥ ॥भास्वत्सारथिबंधुवाहनसखीगेहेतनौतत्सुतौनाभ्यब्जतजजाततवास्तुवदनेसूर्येंद्रवाहोवहिः॥अंकेसूनुतनूजतत्सुतसुतःशय्यागृहेकंदरीविद्वान्संसदिवाचिकृष्णचरितंध्यानेहरेर्मानसे॥ ॥इत्याशिषः॥इतिश्रीशार्ङ्गधरविरचितायांपद्धत्यांआशीःपरिच्छेदस्तृतीयः॥ ३ ॥

अथसुभाषितप्रशंसा

संसदितदेवभूषणमुपकारकमवसरेधनंसुलभं॥सूक्तंदधतिसुवर्णंकल्याणमनर्घ्यमिहधन्याः॥१॥कस्यापि॥कथमिहमनुष्यजन्मासंप्रविशतिसदसिविबुधगमितायां॥येननसुभाषितामृतमास्वादितमाननंतमातृप्तेः॥२॥चाणकस्य॥सुभाषितमयैर्द्रव्यैःसंग्रहंनकरोतियः॥सोपिप्रस्तावयज्ञेषुकांप्रदास्यतिदक्षिणां॥३॥चाणकस्य॥प्रसन्नाःकांतिहारिण्योनानाश्लेषविचक्षणाः।

भवंतिकस्यचित्पुण्यैर्मुखेवाचोगृहेस्त्रियः॥४॥त्रिविक्रमस्य॥ येसूक्तींदुकलाकलंकजनकायेगाढगर्वज्वरायेवाकेवलतर्ककर्कशधियःसाक्षाच्चयेश्रोत्रियाः॥येवाद्वेषमषीमलीमसधियस्तान्प्राज्ञगोष्ठीरसप्रौढप्राहुडवग्रहान्परिहरन्वाचांप्रसारंकुरु॥५॥कस्यापि॥कर्णामृतंसूक्तिरसंविमुच्यदोषेषुयत्नःसुमहान्खलस्य॥अवेक्षतेकेलिवनंप्रविष्टःक्रमेलकःकंटकजालमेव॥६॥विल्हणस्य॥ सुभाषितेनगीतेनयुवतीनांचलीलया॥मनोनभिद्यतेयस्यसयोगीह्यथवापशुः॥७॥सुभाषितमयद्रव्यसंग्रहंनकरोतियः॥प्रस्तावयज्ञेसंप्राप्तेकांप्रदास्यतिदक्षिणां॥८॥संसारकटुवृक्षस्यद्वेफलेह्यमृतोपमे॥सुभाषितरसास्वादःसंगतिःसुजनेजने॥९॥सुभाषितरसास्वादजातरोमांचकंचुकाः॥विनापिकामिनीसंगंकवयःसुखमासते॥१०॥प्रस्तावेहेतुयुक्तानियःपठत्यविशंकितः॥सकविस्तानिकाव्यानिकाव्येतस्यपरिश्रमः॥११॥पृथिव्यांत्रीणिरत्नानिजलमन्नंसुभाषितं॥मूढैःपाषाणखंडेषुरत्नसंज्ञाविधीयते। ॥१२॥यस्यवक्त्रकुहरेसुभाषितंनास्तिनाप्यवसरेप्रजल्पति॥आगतःसदसिधीमतामसौलेप्यनिर्मितइवावभासते॥१३॥धर्मोयशोनयोदाक्ष्यंमनोहारिसुभाषितं॥इत्यादिगुणरत्नानांसंग्रहीनावसीदति॥१४॥बोद्धारोमत्सरग्रस्ताःप्रभवःस्मयदूषिताः॥अबोधोपहताश्चान्येजीर्णमंगेसुभाषितं॥१५॥नायंप्रयातिविकृतिंविरसोनयःस्यान्नक्षीयतेबहुजनैर्नितरांनिपीतः॥जाड्यंनिहंतिरुचिमेतिकरोतितृप्तिंनूनंसुभाषितरसोन्यरसातिशायी॥१६॥रतरीतिवीतवसनाप्रियेवशुद्धापिवाङ्मुदेसरसा॥अरसासालंकृतिरपिनरोचतेशालभंजीव॥१७॥यंत्राकृष्टसुवर्णसूत्रमिवयस्येस्कमेरोस्तटादुन्मीलत्कुरुविंदकंददलवत्स्वच्छःपदार्थस्तुयः ॥तत्राप्युल्लसदंशुकांतरलसत्कांताकुचांतोपमंव्यंग्यंयत्रतदेवकाव्यमितरद्देवतोपप्लवः॥१८॥प्रातःपंकजकुड्मलंद्युतिपदंतत्केसरोल्लासवानर्थोप्यंतरसौरभप्रतिनिभंव्यंग्यंचमत्कारियत्

ह्रीनैर्यद्रसिकैश्चिरंसहृदयैर्भृंगैरिवास्वाद्यतेतत्काव्यंनपुनःप्रम
त्तकुकवेर्यत्किंचिदुज्जल्पितं॥१९॥अविदितगुणापिसत्कविभणि
तिःकर्णेषुवमतिमधुधारां।अनधिगतपरिमलापिहिहरतिदृशंमा
लतीमाला॥२०॥यद्सेवनीयमसताममृतप्रायंस्फवर्णविन्यासं
॥स्फुरसार्थमयंकाव्यंत्रिविष्टपंवासमेविबुधाः॥२१॥सत्कविरस
नासूर्यंनिस्तुषतरशब्दशालिपाकेन।।तृप्तोदयिताधरमपिना
द्रियतेकास्फुधादासी॥२२॥निंद्यंतेयदिनाममंदमतिभिर्वैकाःक
वीनांगिरःस्तूयंतेनचनीरसैर्मृगदृशांवक्राःकटाक्षच्छटाः॥त
द्वैदग्ध्यविलासतामपिमनःकिंनेहृतेवक्रतोधत्तेकिंनहरःकिरी
टशिखरेवक्रांकलामैंदवीं॥२३॥काव्यस्याम्रफलस्यापिकोम
लस्येतरस्यच।बंधच्छायाविशेषेणरसोप्यन्यादृशोभवेत्॥२४
॥किंहारैःकिमुकंकणैःकिमसमैःकर्णावतंसैरलंकेयूरैर्मणिकुंड
लैरलमलंसाडंबरैरंबरैः॥पुंसामेकमखंडितंपुनरिदंमन्यामहे
मंडनंयन्निष्पीडितपार्वणामृतकरस्यंदोपमाःसूक्तयः॥२५॥इंदु
प्रभारसविदंविहगंविहायकीराननेस्फुरसिभारतिकारतिस्ते॥
आद्यंयदिश्रयसिजल्पतुतत्सभायांकाव्यस्यसत्कविकृतस्यवि
शेषमेषः॥२६॥अध्वनिपदग्रहपरंमदयतिहृदयंनवाश्रवणं॥
काव्यमभिज्ञसभायांमंजीरंकेलिवेलायां॥२७॥यथायूनस्तद्व
त्परमरमणीयापिरमणीकुमाराणामंतःकरणहरणंनैवकुरुते॥
मदुक्तिश्चेदंतर्मदयतिसुधीभूयसुधियांकिमस्यानामस्यादरसपु
रुषानादरभरैः॥२८॥सरसपरिषत्कर्णश्राव्यंकवित्वरसायनं
विरसमनसांनेतुंनेहामहेश्रवणांकितं॥मृगमदरसंबिंबोष्ठीनांक
ठोरकुचोचितंजघननिकटेक्लिन्नेलिंपेज्जरन्महिषस्यकः॥२९॥नां
ध्रीपयोधरइवातितरांप्रकाशोनोगुर्जरीस्तनइवातितरांनिगूढः
॥अर्थोगिरामपिहितःपिहितश्चकश्चित्सौभाग्यमेतिमरहट्टव
धूकुचाभः॥३०॥आंतरमपिबहिरिवव्यंजयितुंरसमशेषतःस
ततं॥असतीसुकविसूक्तिःकाचघटीतित्रयंवेद॥३१॥गणेश्वरक

वेर्वचोविरचनैकवाचस्पतेः प्रसन्नागिरिनंदिनीचरणपल्लवं ध्यायतः॥ तथाजयतिभारतीभगवतीयथासासुधीसुधीभवतिसुश्रवामधरमाधुरीम्लायति॥३१॥ यशोधननिधेर्यदानरहरेर्वचोवर्ण्यतेतदागतमदामदालसमरालबालारवाः॥नविभ्रमचरीकरीभवतिचापरीमाधुरीसुधाकरसुधाझरीमधुकथावृथाजायते॥३२॥ अयंमेवाग्गुंफोविशदपदवैदग्ध्यमधुरःस्फुरद्बंधोबंध्योजडहृदिकृतार्थःकविहृदि॥ कटाक्षोवामाक्ष्यादरदलितनेत्रांतगलितःकिशोरेनिःसारःसतुकिमपियूनःस्थगयति॥३३॥ किंकवेस्तेनकाव्येनकिंकांडेनधनुष्मतः॥ परस्यहृदयेलग्नंयन्नघूर्णयतेशिरः॥३४॥ इतिशार्ङ्गधरविरचितायांपद्धत्यांसुभाषितप्रशंसापरिच्छेदश्चतुर्थः॥४॥

अथकाव्यप्रशंसा

निरवद्या

निपद्यानियद्विनाट्यस्यकाक्षतिः॥ भिक्षुकक्षाविनिक्षिप्तःकिमिक्षुर्नीरसोभवेत्॥२॥ भवभूतेः॥ कान्नृच्छामःसुराःस्वर्गेनिवसामोवयंभुवि॥ किंवाकाव्यरसःस्वादुकिंवास्वादीयसीसुधा॥३॥ कस्यापि॥ ख्यातिंगमयतिसुजनःसुकविर्विदधातिकेवलंकाव्यं॥ पुष्णातिकमलमंभोलक्ष्म्यातुरविर्विनियोजयति॥४॥ कस्यापि॥ यातायांति चयातारोलोकाःशोकाधिकाभुवि॥ काव्यसंबंधिनीकीर्तिःस्थायिनीनिरपायिनी॥५॥ कस्यापि॥ विपुलहृदयाभियोग्येखिद्यतिकाव्येजडोनमौर्ख्येस्वे॥ निंदतिकंचुककारंप्रायःशुष्कस्तनीनारी॥६॥ अनंतदेवानां॥ किंतेनकिलकाव्येनमृद्यमानस्ययस्यताः॥ उद्धेरिवनायांतिरसामृतपरंपराः॥७॥ जयमाधवस्य॥ नवोक्तिर्जातिरग्राम्याश्लेषोक्लिष्टःस्फुटोरसः॥ विकटाक्षरसंबंधःकृत्स्नमेकत्रदुर्लभं॥८॥ बाणभट्टस्य॥ दुर्जनहुताशदग्धंकाव्यसुवर्णंविशुद्धिमुपयाति॥ दर्शयितव्यंतस्मान्मत्सरिमनसःप्रयत्नेन॥९॥ यैर्नाकृष्टसुवर्णसूत्रमिवतत्पद्यंसुमेरो

स्तटादुन्मीलत्कुरुविंदकंदलइवस्वच्छःपदार्थस्तपः॥ तन्त्राऽ
प्युल्लसदंशकांतविलसत्कांताकुचांतोपमंव्यंगंयत्तदहोकवित्व
मपरंवाग्देवतोपप्लवः॥१०॥ कयोरप्येतौ॥ सद्भिर्भाव्येहितेकाव्ये
वृथादुर्जनगर्जनं॥ चंडीशांगीकृतेचन्द्रेरुंतुदः किंविधुंतुदः॥११
वित्तपच्चतुर्वेदस्य॥ समलंकरोतिकाव्यंसुकविःकुकविश्चतदुभयं
काव्यं॥ अनलंकरोतिचित्तेसद्यःस्वश्रवणमात्रेण॥१२॥ कविःपिता
पोषयतिपालकोरसिकःपतिः॥ कवितायुवतेर्नूनंसोदरास्तुविवे
किनः॥१३॥ नएवपदविन्यासास्ताएवाऽर्थविभूतयः॥ तथाऽपि न
व्यंभवतिकाव्यंग्रथनकोशलात्॥१४॥ सरसाऽपिकवेर्वाणीहरि
नामांकितायदि॥ साऽदरंगृह्यतेतज्ज्ञैःशक्तिर्मुक्ताऽन्विता यथा
॥१५॥ कृतमंदपदन्यासाविकचश्रीश्चारुशब्दभंगवती॥ कस्य
नकंपयतेकंजरेवजीर्णस्यसत्कवेर्वाणी॥१६॥ सरसासाऽलंका
रास्तपदन्यासासुवर्णमयमूर्तिः॥ आर्यातथैवभार्यानलभ्यते
पुण्यहीनेन॥१७॥ अतिरमणीयेकाव्येपिशुनोऽन्वेषयतिदूषणान्ये
व॥ अतिरमणीयेवपुषिव्रणमिवहिमक्षिकानिकरः॥१८॥ कर्णा
ऽमृतसूक्तिरसंविमुच्यदोषेषुयत्नःसुमहान्खलस्य॥ अवेक्ष
तेकेलिवनंप्रविष्टःक्रमेलकःकंटकजालमेव॥१९॥ इतिशार्ङ्ग
धरविरचितायांपद्धत्यांकाव्यप्रशंसापरिच्छेदःपंचमः॥ ५॥ ॥

अथविद्या

विद्यानामनरस्यरूपमधिकंप्रच्छन्नगुप्तंधनंविद्याभोगकरीय
शःसुखकरीविद्यागुरूणांगुरुः॥ विद्याबंधुजनोविदेशगमनेवि
द्यापरंदैवतंविद्याराजसुपूज्यतेनहिधनंविद्याविहीनःपशुः॥१
॥ सद्विद्यायदिकाचिंतावराकोदरपूरणे॥ शुकोऽप्यशनमाप्नो
तिहरेरामइतिब्रुवन्॥२॥ मातेवरक्षतिपितेवहितेनियुंक्तेकांते
वचाऽपिरमयत्यपनीयखेदं॥ लक्ष्मींतनोतिवितनोतिचदिक्षुकी
र्तिंकिंकिंनसाधयतिकल्पलतेवविद्या॥३॥ नचोरहार्यंनचराज
हार्यंनभ्रातृभाज्यंनचभारकारि॥ व्ययेकृतेवर्धतएवनित्यं

विद्याधनंसर्वधनप्रधानं॥४॥विद्य याविनयाऽवाप्तिःसाचेदविनयावहा॥किंकुर्मःकंप्रतिब्रूमोगरदायांस्वमातरि॥५॥सर्वद्रव्येषुविद्यैवद्रव्यमाहुरनुत्तमं॥अहार्यत्वादनर्घ्यत्वादक्षयत्वाच्चसर्वदा॥६॥किंकुलेनविशालेनविद्याहीनस्यदेहिनः॥अकुलीनोऽपिविद्यावान्दैवैरपिसपूज्यते॥७॥वीणेवश्रोत्रहीनस्यलोलाऽक्षीवविचक्षुषः॥व्यसोःकुसुममालेवविद्यास्तब्धस्यनिष्फला॥८॥गतेपिवयसिग्राह्याविद्यासर्वात्मनाबुधैः॥यद्यपिस्यान्नफलदासुलभासान्यजन्मनि॥९॥शुनःपुच्छमिवव्यर्थंजीवितंविद्ययाविना॥नगुह्यगोपनेशक्तंनचदंशनिवारणे॥१०॥इतिविद्या

अथसामान्यकविप्रशंसा

कतिपयनिमेषवर्त्तिनिजन्मजरामरणविह्वलेजगति॥कल्पांतकोटिवंधुःस्फुरतिकवीनांयशःप्रसरः॥१॥शंखधरस्य॥सुभाषितरसास्वादबद्धरोमांचकंचुकाः॥विनापिकामिनीसंगंकवयःसुखमासते॥२॥कस्यापि॥संतिश्वानइवासंख्याजातिभाजोगृहेगृहे॥उत्पादकानबहवःकवयःशरभाइव॥३॥बाणभट्टस्य॥कवयःपरितुष्यंतिनेतरेकविसूक्तिभिः॥नह्यकूपारवत्कूपावर्धंतेविधुकांतिभिः॥४॥श्रीधनदेवानां॥किंकवेस्तस्यकाव्येनकिंकांडेनधनुष्मतः॥परस्यहृदयेलग्नंनघूर्णयतियच्छिरः॥५॥त्रिविक्रमस्य॥सुखमात्रेणकाव्यस्यकरोत्यत्हृद्योजनः॥छायामच्छामपिश्यामांराहुस्तारापतेरिव॥६॥बाणभट्टस्य॥लंकापतेःसंकुचितंयशोयद्यत्कीर्त्तिपात्रंरघुराजपुत्रः॥ससर्वएवादिकवेःप्रभावोनकोपनीयाःकवयःक्षितीन्द्रैः॥७॥बिल्हणस्य॥उत्फुल्लगल्लैरालापाःक्रीयंतेदुर्मुखैःसुखं॥जानातिहिपुनःसम्यक्कविरेवकवेःश्रमं॥८॥त्रिविक्रमस्य॥शिलाविद्यामारुतामोरिकाद्याःकाव्यंकर्तुंसंतिविज्ञाःस्त्रियोपि॥विद्यांवेत्तुंवादिनोनिर्विजेतुंविश्वंवक्तुंयःप्रवीणःसवंद्यः॥९॥श्रीधनदेवानां॥अपिमुदमुपयांतोवाग्विलासैःस्वकीयैःपरभणितिषुतृप्तिंयांतिसंतःकियंतः॥

निजघनमकरंदस्यंदपूर्णालवालःकनककलशसेकंनेहतेकिंरसालः॥१०॥जयदेवस्य॥ तेधन्यास्तेमहात्मानोयेषांलोकेस्थितंयशः॥ यैर्निबद्धानिकाव्यानियेचकाव्येषुकीर्तिताः॥११॥कस्यापि॥ जयंतितेसुकृतिनोरससिद्धाःकवीश्वराः॥ नास्तियेषांयशःकायेजरामरणजंभयं॥१२॥भर्तृहरेः॥ महीपतेःसंतिनयस्यपार्श्वेकवीश्वरास्तस्यकुतोयशांसि॥ भूपाःकियंतोनबभूवुरुर्व्यांनामापिजानातिनकोपितेषां॥१३॥विल्हणस्य॥ अर्थान्केचिदुपासतेकृपणवत्केचित्त्वलंकुर्वतेवेश्यावत्खलुधातुवादिनइवोद्बध्नंतिकेचिद्रसान्॥ अर्थालंकृतिसद्रसद्रवमुचांवाचांप्रशस्तिस्पृशांकर्त्तारःकवयोभवंतिकतिचित्पुण्यैरगण्यैरिह॥१४॥श्रीराघवचैतन्यश्रीचरणानां॥ कविवाक्यामृततीर्थस्नानैःश्रुताभृशंयशोदेहाः॥ येषांतएवभूपाजीवंतिमृतावृथैवान्ये॥१५॥ अमृतोत्प्रेक्षणेचारुरशेषजनसज्जनः॥ कविर्गरुडवन्मान्यपिंडवज्रादिरक्षकृत्॥१६॥एतौशार्ङ्गधरस्य॥ काव्यमय्योगिरोयावच्चरंतिविशदाभुवि॥ तावत्सारस्वतंस्थानंकविरासाद्यतिष्ठति॥१७॥कस्यापि॥

इतिशार्ङ्गधरविरचितायांपद्धत्यांसामान्यकविप्रशंसापरिच्छेदःषष्ठः

अथविशिष्टकविप्रशंसा॥

कवींदुंनौमिवाल्मीकिंयस्यरामायणींकथां॥ चंद्रिकामिवचिन्वंतिचकोराइवसाधवः॥१॥शार्ङ्गधरस्य॥ श्रवणांजलिपुटपेयंविरचितवान्भारताख्यममृतंयः॥ तमहमरागमतृष्णंकृष्णद्वैपायनंवंदे॥२॥कस्यापि॥ त्रयोग्नयस्त्रयोवेदास्त्रयोदेवास्त्रयोगुणाः॥ त्रयोदंडिप्रबंधाश्चत्रिषुलोकेषुविश्रुताः॥३॥राजशेखरस्य॥ कवयःकालिदासाद्याःकवयोवयमप्यमी॥ पर्वतेपरमाणौचपदार्थत्वंप्रतिष्ठितं॥४॥ कृष्णभट्टस्य॥ कविरमरःकविरचलःकविरभिनंदश्चकालिदासश्च॥ अन्येकवयःकपयश्चापलमात्रंपरंदधति॥५॥कस्यापि॥ श्लेषेकेचनशब्दगुंफविषयेकेचिद्रसेचापरेलंकारेकतिचित्सदर्थविषयेचान्येकथावर्णके॥

आःसर्वत्रगभीरधीरकविताविद्याटवीचातुरीसंचारीकविकुंभि
कुंभभिदुरोबाणस्तुपंचाननः॥६॥ श्रीचंद्रदेवानां॥ भवभूतिम
नाहृत्यनिर्वाणमतिनामया॥ मुरारेःपदचिंतायामिदमाधीयते
मुनेः॥७॥ कस्यापि॥ शब्दार्थयोःसमोगुंफःपांचालीरीतिरुच्य
ते॥ शीलाभट्टारिकावाची बाणोक्तिषुचसायदि॥८॥ कयोरपि॥
नीलोत्पलदलश्यामां विज्जकांमामजानता॥ वृथैवदंडिनाप्रोक्तंसर्व
शुक्लासरस्वती॥९॥ विज्जकायाः॥ इंदुप्रभारसविदंविहगंविहा
यकीराननेस्फुरसिभारतिकारतिस्ते॥ आद्यंयदिश्रयसिजल्पतु
कौमुदीनांगोविंदराजवचसांचविशेषमेषः॥१०॥ देवेश्वरस्य॥
पश्येयंवाग्देवीसुकविमुखवासव्यसनिनीकुहूकंठेकंठीविल
सतितथाचेद्दनवधि॥ नदाभूमीभागेनिरुपमतमः किंचिदिवस
समाधत्तेसाम्यंधनदभणितीनांमधुरिमा॥११॥ श्रीधनदद्देवानां
॥ नमुग्धदयिताधरेनविषभाजिरत्नाकरेनराहुमुखकोटरेनकि
लतार्स्यपक्षांतरे॥ सुदर्शनकवीश्वरेरसिकचक्रचूडामणौगुणौक
सिसुधांबुधा स्यजतसांद्रचंद्रभ्रमं॥१२॥ श्रीहरिहरदेवानां॥ स
रस्वतीव कर्णाटीविजयांकाजयत्यसौ॥ यावैदर्भगिरांवासःका
लिदासादनंतरं॥१३॥ कस्यापि॥ माघेनविघ्नितोत्साहानोत्सहं
तेपदक्रमं॥ स्मरंतोभारवेरेवकवयः कपयोयथा॥१४॥ धनपा
लस्य॥ हृदिलग्नेनबाणेनयन्मंदोपिपदक्रमः॥ भवेत्कविकुरं
गाणांचापलंतत्रकारणं॥१५॥ तावत्कविविहंगानांध्वनिर्लो
केषुशस्यते॥ यावन्नोविशतेश्रोत्रेमयूरमधुरध्वनिः॥१६॥ त्रिलो
चनस्यैतौ॥ भासौनामिरसौमिलौवररुचिःश्रीसाहसांकःकविर्मे
ठोभारविकालिदासतरलाःस्कंधःसुबंधुश्चयः॥ दंडीबाणदि
वाकरौगणपतिःकांतश्चरत्नाकरःसिद्धायस्यसरस्वतीभगव
तीकेतस्यसर्वेप्यमी॥१७॥ अहोप्रभावोवाग्देव्यायन्मातंगदि
वाकरः॥ श्रीहर्षस्याभवत्सभ्यःसमोबाणमयूरयोः॥१८॥ सर
स्वतीपवित्राणांजातिस्तत्रनदेहिनां॥ व्यासस्पर्धीकुलालोभूद्य

द्रोणोभारतेकविः॥१९॥राजशेखरस्यैते॥काव्यप्रपंचचंचूरचय
तिकाव्यंनसारविद्भवति॥तरवःफलानिसुवतेविंदतिसारंमतंगस
मुदायः॥२०॥अनंतपदविन्यासरचनासरसाकवेः॥बुधोपदिसमी
पस्थोनकुजन्मापुरोयदि॥२१॥कविरहिताःकविलापाजायंतेकंठ
शोषणायैव॥संमुखगतःकविश्चेत्भवतिकुलपिताऽपिकविकुल
पितेव॥२२॥नूनंनिसर्गतःकविरूढमलप्रशमनेहिसरसानां॥प्रति
कूलतापिनभवेदनर्थकृत्कतकवत्कदाचिदपि॥२३॥विदग्धकवयःकव
यःकेवलकवयस्तुकेवलंकपयः॥कुलजायासाजायाकेवलजाया
तुकेवलंमाया॥६॥कविःकरोतिपद्यानिलालयत्युत्तमोजनः॥त
रुःप्रसूतेपुष्पाणिमरुद्वहतिसौरभं॥२५॥मदुक्तिश्चेदंतर्मदयति
सुधीभूयसुधियःकिमस्यानामस्यादलसपुरुषाऽनादरभरैः॥यथा
यूनस्तद्वत्परमरमणीयाऽपिरमणीकुमाराणामंतःकरणहरणंने
वकुरुते॥२६॥लौकिकानांहिसाधूनामर्थंवागनुवर्तते॥ऋषीणांपु
नराद्यानांवाचमर्थोऽनुधावति॥२७॥माघश्चोरोमयूरोमुररिपुरप
रोभारविःसारविद्यःश्रीहर्षःकालिदासःकविरथभवभूत्याह्वयोभो
जराजः॥श्रीदंडीडिंडिमाख्यःश्रुतिमुकुटगुरुर्भल्लटोभट्टबाणः
ख्याताश्चाऽन्येसुबंध्वादयइहकृतिभिर्विश्वमाल्हादयंति॥२८॥
काव्यंकरोतिसकविःसहृदयएवव्यनक्तितत्तत्त्वं॥रत्नंखनिःप्र
सूतेरचयतिशिल्पीतुतत्कषमां॥२९॥मंदंनिक्षिपतेपदानिपरि
तःशब्दंसमुद्वीक्षतेनानाऽर्थाऽहरणंचकांक्षतिमुदाऽलंकारमा
कर्षति॥आदत्तेसकलंसुवर्णनिचयंधत्तेरसांऽतर्गतंदोषाऽन्वेष
णतत्परोविजयतेचोरोपमःसत्कविः॥३०॥तेभूमीपतयोजयं
तिनतयोयेषांद्विषद्भूभृतांतेवंद्यायतयोविशंतिमतयोयेषांपरेब्र
ह्मणि॥तेश्लाघ्याःकवयोवयोमदभरव्याजृंभमाणांगनादृक्पाता
इवतोषयंतिहृदयंयेषांगिरांसंचयः॥३१॥अर्थ्यंकेचिदुपासतेकृप
णवत्केचित्त्वलंकुर्वतेवेश्यावत्खलुधातुवादिनइवोद्बध्नंतिकेचि
द्रसान्॥अर्थालंकृतिसद्रसद्रवमुचांवाचांप्रशस्तिस्पृशांवक्तारः

कवयोभवंतिकतिचित्सुकृत्यैरगण्यैरिह॥३२॥भूतावेशनिवेशिताशयद्वश्लोकंकरोस्मासुयःश्लाघंतेकविरद्भुतोयमितितंमिथ्याजनाविस्मिताः॥सूत्राण्येवपुरःपदानिरचयन्पश्चात्समालोचयन्दूरंयःकवितांनिनीषतिकविःकामीवसस्तूयतां॥३३॥सत्यंसंतिगृहेगृहेपिकवयोयेषांवचश्चातुरीस्वेहर्म्येकुलकन्यकेवलभतेस्वल्पैर्गुणैर्गौरवं॥दुष्प्रापःसतुकोपिकोविदपतिर्यद्वाक्रसग्राहिणीपण्यस्त्रीवकलाकलापकुशलाचेतांसिहर्तुंक्षमा॥३४॥उमामिमांसमुद्दिश्यशीतदीधितिशेखर॥एषापिभारतीभानुसुतंसीकृत्यनर्तति॥३५॥पदव्यक्तिव्यक्तीकृतसहृदयानंदसरणौकवीनांकाव्येनस्फुरतिबुधमात्रस्यधिषणा॥नवक्रीडावेशव्यसनपिशुनोयःकुलवधूकटाक्षाणांपंथाःसखलुगणिकानामविषयः॥३६॥धन्यास्तेकवयोयदीयरसनारूक्षाध्वसंचारिणीधावंतीवसरस्वतीद्रुतपदन्यासेननिःक्रामति॥अस्माकंरसपिछलेपथिगिरांदेवीनवीनोदयत्पीनोत्तुंगपयोधरेनयुवतिर्मांथर्यमालंबते॥३७॥साहित्येसुकुमारवस्तुनिदृढन्यासग्रहग्रंथिलेतर्केवामयिसंविधातरिसमंलीलायतेभारती॥शय्यावास्तुमृदूत्तरच्छदपटादर्भांकुरैरास्तृताभूमिर्वाहृदयंगमोयदिपतिस्तुल्यारतिर्योषितां॥३८॥कतिचिदुद्धतनिर्भरमत्सराःकतिचिदात्मवचस्तुतिशालिनः॥अहहकेपिनिरक्षरकुक्षयस्तदिहसंप्रतिकंप्रतिमेश्रमः॥३९॥येषांकोमलकाव्यकौशलकलालीलावतीभारतीतेषांकर्कशवक्रतर्करचनोद्गारेपिकिंहीयते॥यैःकांताकुचमंडलेकररुहाःसानंदमारोपितास्तैःकिंमत्तकरींद्रकुंभशिखरेनारोपणीयाःशराः॥४०॥मातंगीमिवमाधुरींध्वनिविदोनैवस्पृशंत्युत्तमांव्युत्पत्तिंकुलकन्यकामिवरसोन्मत्तानपश्यंत्यमी॥कस्तूरीघनसारसौरभसुहृद्व्युत्पत्तिमाधुर्ययोर्योगःकर्णरसायनंसुकृतिनःकस्यापिसंजायते॥॥४१॥मौलौमंदारदामभ्रमदलिपटलीकावलींश्रोणिबिंबेकूजत्कांचीकलापंचरणकमलयोर्मंजुमंजीरसिंजान्॥उत्संगेकीरगीतिं

स्तनभुविमसृणंवल्लकीपंचमंवायत्काव्येदत्तकर्णाशिवशिवमनुतेभारतीभारमेव॥४२॥कस्यांचिह्वाचिकैश्चिन्ननुयदिविहितंदूषणंदुर्दुरूढैश्चिन्नंकिंनस्तदास्यात्प्रथितगुणवतांकाव्यकोटीश्वराणां॥वाह्याश्चेद्धंधवाह्याधिकविहितजवाःपंचषाश्वांधस्वंजाःकाहानिःशेरशाहक्षितिपकुलमणेरश्वकोटीश्वरस्य॥४३॥विद्वद्वृंदतरंगिताग्रसरणिःकर्त्ताशिरोबिंदुकंकर्मेतिप्रतिबोधितान्वयविदोयेयेपितेभ्योनमः॥येतुग्रंथसहस्रशाणकषणत्रुट्यत्कलंकैर्गिरामुल्लेखैःकवयंतिबिल्हणकविस्तेष्वेवसंनह्यति॥४४॥पातुंश्रोत्ररसायनंरचयितुंवाचःसतां संमतांव्युत्पत्तिंपरमामवाप्तुमवधिंलब्धुंरसस्रोतसः॥भोक्तुंस्वादुफलंचजीविततरोर्यद्यस्तितेकौतुकंतद्भ्रातःशृणुराजशेखरकवेःसूक्तीःसुधास्यंदिनीः॥४५॥नैवव्याकरणज्ञमेतिकवितानभ्रातरंतार्किकंदूरात्संकुचितेवगच्छतिपुनश्चांडालवच्छांदसं॥मीमांसानिपुणंनपुंसकमितिज्ञात्वानिरस्तादराकाव्यालंकरणज्ञमेत्यकविताकांतावृणीतेस्वयं॥४६॥इतिश्रीशार्ङ्गधरविरचितायांपद्धत्यांविशिष्टकविप्रशंसापरिच्छेदःसप्तमः॥७॥

अथकुकविनिंदा

अप्रगल्भाःपदन्यासेजननीरागहेतवः॥संत्येकेबहुलालापाःकवयोबालकाइव॥१॥त्रिविक्रमस्य॥गणयंतिनापशब्दंनवृत्तभंगंक्षयंनचार्थस्य॥रसिकत्वेनाकुलितावेश्यापतयःकुकवयश्च॥२॥कस्यापि॥द्राघीयसादार्ढ्यगुणेनयुक्ताःकैःकैरपूर्वैःपरकाव्यखंडैः॥आडंबरंयेवचसांवहंतितेकेचिदार्याःकवयोजयंति॥३॥बिल्हणस्य॥धिक्कारेकलिकालया हिविलसंकेयंविपर्यस्तताहाकष्टंक्षितिशालिनांव्यवहृतिर्म्लेछोचितादृश्यते॥एकैववाङ्मयदेवताभगवतीविक्रेतुमानीयतेनिःशंकैरपरैःपरीक्षणविधौसर्वांगमुद्घाटने॥४॥बिल्हणस्य॥कविभिर्नृपसेवासुचितालंकारहारिणी॥वापीवेश्येवलोभेनपरोपकरणीकृता॥५॥क्षेमेंद्रस्य॥अन्यव

र्णपरावृत्याबंधचिन्हनिगूहनैः॥अनाख्यातःसतांमध्येकविश्चौ
रोविभाव्यते॥६॥व्यासादीन्कविपुंगवाननुचितैर्वाक्यैःसलीलंह
सन्प्रोच्चैर्जल्पनिमील्यनेत्रयुगलश्लोकान्सगर्वंपठन्॥काव्यंधि
क्कुरुयत्परैर्विरचितंस्वहूस्वसार्धंवुधैर्यद्व्याख्यर्थयसेश्रुतेनरहितःपां
डित्यमाप्तुंवलात्॥७॥वालाकटाक्षसूत्रितमसतीनेत्रत्रिभागकृ
तभाष्यं॥कविमाणवकादूतीव्याख्यातमधीयतेभावं॥८॥हठाद्
कृष्टानांकतिपयपदानांरचयिताजनःस्पर्धालुश्चेदहहकविताव
श्यवचसा॥भवेद्द्रष्टव्योवाकिमिहवहुनापापिनिकलौघटानांनि
र्मातुस्त्रिभुवनविधातुश्चकलहः॥९॥स्वाधीनोरसनांचलःपरिचि
ताःशब्दाःकियंतःक्वचित्क्षोणींद्रोननियामकःपरिषदःशांताःस्व
तंत्रंजगत्॥तद्यूयंकवयोवयोवय¯मितिप्रस्तावनाहुंकृतिस्वच्छं
दंप्रतिसद्मगर्जतवयंमौनव्रतालंबिनः॥१०॥काव्यंकरोषिकिमुते
सुहृदोनसंतियेत्वामुदीर्णपवनंननिवारयंति॥गव्यंघृतंपिवनि
वातगृहंप्रविश्यवाताधिकाहिपुरुषाःकवयोभवंति॥११॥कविरनुहर
तिछायामर्थंकुकविःपदंचोरः॥सकलप्रबंधहर्त्रेसाहसकर्त्रेनमस्तु
भ्यं॥१२॥इतिशार्ङ्गधरविरचितायांपद्धत्यांकुकविनिंदापरिच्छेदोऽष्टमः॥

अथपण्डितप्रशंसा

अधिगतपरमार्थान्पंडितान्मावमंस्थास्तृणमिवलघुलक्ष्मीर्नै
वतान्संरुणद्धि॥मदमिलितमिलिंदश्यामगंडस्थलानांनभवतिवि
संतंतुर्वारणंवारणानां॥१॥इहतुरगशतैःप्रयांतुमूर्खाधनरहिता
विबुधाःप्रयांतुपद्भ्यां॥गिरिशिखरगतापिकाकपंक्तिःपुलिनगतैर्नस
मत्वमेतिहंसैः॥२॥अंजलिस्थानिपुष्पाणिवासयंतिकरद्वयं॥अ
होसुमनसांप्रीतिर्वामदक्षिणयोःसमा॥३॥कस्यापि॥उद्गीरितोर्थः
पशुनापिगृह्यतेहयाश्चनागाश्चवहंतिनोदिताः॥अनुक्तमप्यू
हतिपंडितोजनःपरेंगितज्ञानफलाहिबुद्धयः॥४॥कस्यापि॥पं
डितेपिगुणाःसर्वेमूर्खेदोषाश्चकेवलाः॥तस्मान्मूर्खसहस्रेण
प्राज्ञएकोनलभ्यते॥५॥गीतशास्त्रविनोदेनकालोगच्छतिधीम

तां॥ व्यसनेनतुमूर्खाणांनिद्रयाकलहेनवा॥६॥ कयोरप्येतौ॥ हं
तुर्यातिनगोचरंकिमपिशंपुष्णातिसर्वात्मनाह्यर्थिभ्यःप्रतिपाद्य
मानमनिशंप्राप्नोतिवृद्धिंपरां॥ कल्पांतेष्वपिनप्रयातिनिधनंवि
द्याख्यमंतर्धनंयेषांतान्प्रतिमानमुज्झतनृपःकस्तैःसहस्पर्द्ध
ते॥७॥ त्वंराजावयमप्युपासितगुरुःप्रज्ञाभिमानोन्नताःख्या
तस्त्वंविभवैर्यशांसिकवयोदिक्षुप्रतन्वंतिनः॥ इत्थंमानदनातिदूर
मुभयोरप्यावयोरंतरंयद्यस्मासुपराङ्मुखोसिवयमप्येकांततो
निःस्पृहाः॥८॥ एतौभर्तृहरेः॥ रोहणंसूक्तिरत्नानांवंदेवृंदंविप
श्चितां॥ यन्मध्यपतितोनीचःकाचोप्युच्चैर्महीयते॥९॥ शास्त्रो
पस्कृतशब्दसुंदरगिरःशिष्यप्रदेयाऽऽगमाविख्याताःकवयोवसं
तिविषयेयस्यप्रभोर्निर्धनाः॥ तज्जाड्यंवसुधाधिपस्यकवयोह्य
र्थंविनापीश्वराःकुत्स्याःस्युःकुपरीक्षकानमणयोयैरर्घतःपातिताः
॥१०॥ विद्वानेवविजानातिविद्वज्जनपरिश्रमं॥ नहिवंध्याविजाना
तिगुर्वींप्रसववेदनाम्॥११॥ विद्वत्वंचनृपत्वंचनैवतुल्यंकदाचन
॥स्वदेशेपूज्यतेराजाविद्वान्सर्वत्रपूज्यते॥१२॥ अलंकरोतियःश्लो
कंशुकएववनमध्यमः॥ अलंकरोतियःश्लोकंशुकएववनमध्यमः॥१३
॥सदोषमपिनिर्दोषंभवत्यग्रेविपश्चितः॥ रामस्येवार्जुनवपुःकवे
श्चसरसंवचः॥१४॥ अन्याजगह्वितमयीमनसःप्रवृत्तिरन्येव
काऽपिरचनावचनाऽऽवलीनाम्॥ लोकोत्तराचकृतिराकृतिरंगहृ
द्याविद्यावतांसकलमेवगिरांदवीयः॥१५॥ गुणादोषौबुधोगृह्ण
न्निंदुक्ष्वेडाविवेश्वरः॥ शिरसाश्लाघतेपूर्वंपरंकंठेनियच्छति॥
॥१६॥ स्थिराशैलीगुणवतांखलबुद्ध्यानबाधते॥ रत्नदीपस्यहि
शिखावात्ययाऽपिननाश्यते॥१७॥ यदिसंतिगुणाःपुंसांविकसंत्येव
केवलं॥ नहिकस्तूरिकाऽऽमोदःशपथेनविभाव्यते॥१८॥ मंदोऽप्य
मंदतामेतिसंसर्गेणविपश्चितः॥ पंकच्छिदःफलस्येवनिकर्षेणा
ऽऽविलंपयः॥१९॥ अर्थाहरणकौशल्यंकिंस्तुमःशास्त्रवादि
नो॥ अव्ययेभ्योऽपियेचाऽर्थान्निष्कर्षंतिसहस्रशः॥२०॥

कलावतःसैवकलाययाऽधःक्रियतेभवः॥बह्वीभिश्चकला
भिःक्रियाभिरंकःस्फुटीकृतः॥२१॥ इतिश्रीशार्ङ्गधरविरचिता
यांपद्धत्यांपंडितप्रशंसापरिच्छेदोनवमः॥९॥ छ ॥ छ ॥

अथकुपंडितनिंदा

व्यासादीन्कविपुंगवाननुचितैर्वाक्यैःसलीलंहसन्नुच्चैर्जल्पनिमी
ल्यलोचनयुगंश्लोकान्सगर्वंपठन्॥काव्यंधिक्कुरुयस्तरैर्विरचि
तंस्पर्द्धस्वसार्द्धंबुधैर्यत्त्वभ्यर्थयसेक्षतेनरहितःपांडित्यमाप्तुंबला
त्॥१॥कस्यापि॥येसंसत्सुविवादिनःपरयशःशल्येनशूलाकु
लाःकुर्वंतिस्वगुणस्तवेनगुणिनांयत्नाद्गुणाच्छादनं॥तेषांरोषकषा
यितोदरदृशांकोपोष्णनिश्वासिनांदीप्तारत्नशिखेवकृष्णफणि
नांविद्याजनोद्वेगिनी॥२॥ग्रीवास्तंभभृतःपरोन्नतिकथामात्रेशि
रःशूलिनःसोद्वेगभ्रमणप्रलापविपुलक्षोभाभिभूतस्थितेः॥अं
तर्द्वेषविषप्रवेशविषमक्रोधोष्णनिश्वासिनःकष्टान्नूनमपंडित
स्यविकृतिर्भीमज्वरारंभभूः॥३॥क्षेमेंद्रस्यैतौ॥अज्ञःसुखमारा
ध्यःसुखतरमाराध्यतेविशेषज्ञः॥ज्ञानलवदुर्विदग्धंब्रह्मापिनरं
नरंजयति॥४॥भर्त्तृहरेः॥इतिशा०पद्धत्यांकुपंडितनिंदापरिच्छेदः

अथमहतांप्रशंसा

विपदिधैर्यमथाभ्युदयेक्षमासदसिवाक्पटुतायुधिविक्रमः॥
यशसिचाभिरुचिर्व्यसनंश्रुतौप्रकृतिसिद्धमिदंहिमहात्मनां॥१
भर्त्तृहरेः॥इयमुन्नतसत्वशालिनांमहतांकापिकठोरचित्तता
॥उपकृत्यभवंतिदूरतःपरतःप्रत्युपकारशंकया॥२॥नाल्पीयसि
निबध्नंतिपदमुन्नतचेतसः॥येषांभुवनलाभेपिनिःसीमानोमनो
रथाः॥३॥अहोकिमपिचित्राणिचरित्राणिमहात्मनां॥लक्ष्मींतृ
णायमन्यंतेतद्भारेणनमंत्यपि॥४॥देवेश्वरस्य॥किंचापरेणबहु
नाबहुजल्पितेनसंसर्गएवमहतांमहतेफलाय॥अंभोनिधेस्तटरु
हास्तरवोपियेनवेलाजलोच्छलितरत्नकृतालवालाः॥५॥आप
त्स्वेवहिमहतांशक्तिरभिव्यज्यतेनसंपत्सु॥अगुरोस्तथानगंधः

प्रागस्तियथाग्निपतितस्य॥६॥कयोरप्येतौ॥वज्रादपिकठोराणिमृ
दूनिकुसुमादपि॥लोकोत्तराणांचेतांसिकोहिविज्ञातुमर्हति॥७॥
भवभूतेः॥जितरोषरयामहाधियःसपदिक्रोधजितोलघुर्जनः॥
विजितेनजितस्यदुर्मतेर्मतिमद्भिःसहकाविरोधिता॥८॥माघस्य
गवादीनांपयोन्येद्युःसद्योवाजायतेदधि॥क्षीरोदधेस्तुनाद्यापिम
हतांविकृतिःकुतः॥९॥देवेश्वरस्य॥संपदोमहतामेवमहतामेव
चापदः॥वर्धतेक्षीयतेचंद्रोनतुतारागणःक्वचित्॥१०॥अपकुर्व
न्नपिपापःप्राप्नोतिमहतःफलं॥और्वंदहंतमेवाग्निंसंतर्पयतिसाग
रः॥११॥महतांप्रार्थनेनैवविपत्तिरपिशोभते॥दंतभंगोपिनागानां
श्लाघ्योगिरिविदारणे॥१२॥तरुमूलादिषुनिहितंजलमाविर्भवति
पल्लवाग्रेषु॥निभृतंयदुपक्रियतेतदपिमहांतोवहंत्युच्चैः॥१३॥अ
चिंत्याःपंथानःकिमपिमहतामंधकरिपोर्यदक्ष्णोभूत्तेजस्तदकृत
कथामप्यमदनं॥मुनेर्नेत्राद्येर्यदजनिपुनर्ज्योतिरहहप्रतेनैतेने
दंमदनमयमेवत्रिभुवनं॥१४॥केषामप्येते॥महात्मानोनुगृण्हं
तिभजमानान्रिपूनपि॥सपत्नीःप्रापयंत्यब्धिंसिंधवोनगनिम्न
गाः॥१५॥माघकवेः॥सौजन्याऽमृतसिंधवःपरहितप्रारब्धवीर
व्रतावाचालाःपरवर्णनेनिजगुणाऽऽलापेचमौनव्रताः॥आपत्स्व
प्यविलुप्तधीर्यनिचयाःसंपत्स्वनुत्सेकिनोमाभूवन्खलवक्त्रनि
र्गतविषज्वालाततासज्जनाः॥१६॥मुखेननोद्गिरत्यूर्ध्वंहृदया
न्नाऽऽनयत्यधः॥जरयत्यंतरेसाधुर्दोषंविषमिवेश्वरः॥१७॥वि
कृतिंनैवगच्छंतिसंगदोषेणसाधवः॥आवेष्टितंमहासर्पैश्चंद
नंनविषायते॥१८॥सज्जनोऽपिविपत्पयोधिगहनेनिःशंकधैर्याऽऽ
श्रिताःकुर्वंत्येवपरोपकारमनिशंसंतोयथाशक्तिवै॥राहोरुग्रकरा
लवक्त्रकुहरग्रासाभिभूतोऽप्यलंचंद्रःकिंनजनंकरोतिसुखिनंग्रा
साऽवशेषैःकरैः॥१९॥धवलयतिसमग्रंचंद्रमाजीवलोकंकि॰
मितिनिजकलंकंनाऽऽत्मसंस्थंप्रमार्ष्टि॥भवतिविदितमे॰
तत्प्रायशःसज्जनानांपरहितनिरतानामादरोनाऽऽत्मकार्ये॥

॥२०॥अहोमहत्त्वंमहतामपूर्वंविपत्तिकालेऽपिपरोपकारः॥यथा
ऽस्यमध्येपतितोऽपिराहोःकलानिधिःपुण्यचयंददाति॥२१॥ मा
न्याएवहिमान्यानांमानंकुर्वंतिनेतरे॥शंभुर्बिभर्त्तिमूर्ध्नेंदुंस्वर्भानु
स्तंजिघृक्षति॥ २२॥ येदीनेषुदयालवःस्पृशतियानल्पोऽपिनश्री
मदोव्यग्रायेचपरोपकारकरणेहृष्यंतियेयाचिताः॥ स्वस्थाःसं
तिचयौवनोन्मदमहाव्याधिप्रकोपेऽपियेतैःस्तंभैरिवसुस्थिरैः
किल भरक्लांताधराधार्यते॥ २३॥संपदियस्यनहर्षोविपदिवि
षादोरणेचधीरत्वं॥ तंभुवनत्रयतिलकंजनयतिजननीसु
तंविरलं॥२४॥सुजनंव्यजनंमन्येचारुवंशसमुद्भवं॥ आत्मा
नंचपरिभ्राम्यपरतापनिवारणं॥२५॥इहानेकेसंतःसततमु
पकारिण्युपकृतिंकृतज्ञाःकुर्वंतोजगतिनिवसंतोऽपिसुधियः
॥कियंतस्तेसंतःसुकृतपरिपाकप्रणयिनोविनास्वार्थंयेषांभ
वतिपरकृत्यव्यसनिता॥२६॥अर्थःसुखंकीर्त्तिरपीहमाभूद
नर्थएवास्तुतथाऽपिधीराः॥निजप्रतिज्ञामनुरुध्यमानामहो
द्यमाःकर्मसमारभंते॥२७॥क्षुद्राःसंतिसहस्रशःस्वभरणव्या
पारमात्रोद्यताःस्वार्थोयस्यपरार्थएवसपुमानेकःसतामग्रणीः
॥दुष्पूरोदरपूरणायपिबतिस्रोतःपतिंवाडवोजीमूतस्तुनिदा
घसंभृतजगत्संतापविच्छित्तये॥२८॥ नहिभवतिवियोगःस्ने
हविच्छेदहेतुर्जगतिगुणनिधीनांसज्जनानांकदाचित्॥घनति
मिरनिबद्धोदूरसंस्थोऽपिचंद्रःकिमुकुमुदवनानांप्रेमभंगंकरो
ति॥२९॥उदधिरवधिरुर्व्यास्तंहनूमांस्ततार निरवधिगगनंचे
त्कोडकोशेविलीनं॥इतिपरिमितिमंतोभांतिसर्वेऽपिभावाःसतु
निरवधिरेकःसज्जनानांविवेकः॥३०॥चंद्रःक्षयीप्रकृतिवक्रतनु
र्जडात्मादोषाऽऽकरःस्फुरतिमित्रविपत्तिकाले॥मूर्ध्नातथाऽ
पिविधृतःपरमेश्वरेणनैवाश्रितेषुमहतांगुणदोषशंका॥३१॥
उदयेसवितारक्तोरक्तश्चाऽस्तमनेतथा॥संपत्तौचविपत्तौचमह
तामेकरूपता॥३२॥दृश्यंतेभुविभूरिनिंबतरवःकुत्राऽपितेचंदनाः

पाषाणैःपरिपूरितावसुमतीवज्रोमणिर्दुर्लभः॥श्रूयंतेकरटारवाःप्रतिदिनंचैत्रेकुहूकूजितंतन्मध्येखलुसंकुलंजगदिदंहित्राःक्षितौसज्जनाः॥३३॥आरभंतेऽल्पमेवाज्ञाःकामंव्यग्राभवंतिच॥महाऽऽरंभाःकृतधियःस्तिष्ठंतिचनिराकुलाः॥३४॥पिबंतिनद्यःस्वयमेवनांऽभःस्वयंनखादंतिफलानिवृक्षाः॥नाऽदंतिसस्यंखलुवारिवाहाःपरोपकारायसतांविभूतयः॥३५॥गुणायंतेदोषाःसुजनवदनेदुर्जनमुखेगुणादोषायंतेतदिदमपिनोविस्मयपदं॥महामेघःक्षारंपिबतिकुरुतेवारिमधुरं फणीक्षीरंपीत्वावमतिगरलंदुःसहतरं॥३६॥किंजन्मनाचमहतापितृपौरुषेणशक्त्याह्रियातिनिजयापुरुषःप्रतिष्ठां॥कुंभानकूपमपिशोषयितुंसमर्थाःकुंभोद्भवेनमुनिनांऽबुधिरेवपीतः॥३७॥ऐश्वर्यस्यविभूषणंसुजनताशौर्यस्यवाक्संयमोज्ञानस्योपशमःकुलस्यविनयोवित्तस्यपात्रेव्ययः॥अक्रोधस्तपसःक्षमाबलवतांधर्मस्यनिर्व्याजतासर्वेषामपिसर्वकारणमिदंशीलंपरंभूषणं॥३८॥दाक्षिण्यंस्वजनेदयापरजनेशाठ्यंसदादुर्जनेनीतिःसाधुजनेनयोनृपजनेविद्वज्जनेष्वार्जवं॥शौर्यंशत्रुजनेक्षमागुरुजनेनारीजनेधूर्ततायेचैवंपुरुषाःकलासुकुशलास्तेष्वेवलोकस्थितिः॥३९॥केनांजितानिनयनानिमृगांगनानांकोवाकरोतिरुचिरांऽगरुहान्मयूरान्॥कश्चोत्पलेषुदलसन्निचयंकरोतिकोवाकरोतिविनयंकुलजेषुपुंसु॥४०॥आरभ्यतेनखलुविघ्नभयेननीचैःप्रारभ्यविघ्नविहताविरमंतिमध्याः॥विघ्नैःपुनःपुनरपिप्रतिहन्यमानाःप्रारभ्यचोत्तमजनानपरित्यजंति॥४१॥प्रियान्याय्यावृत्तिर्मलिनमसुभंगेप्यसुकरंत्वसंतोनाभ्यर्थ्याःसुहृदपिनयाच्यःकृशधनः॥विपद्युच्चैःस्थेयंपदमनुविधेयंचमहतांसतांकेनोद्दिष्टंविषममसिधाराव्रतमिदं॥४२॥प्रदानंप्रच्छन्नंगृहमुपगतेसंभ्रमविधिःप्रियंकृत्वामौनंसदसिकथनंनाप्युपकृतेः॥अनुत्सेकोलक्ष्म्यांनिरभिभवसाराःपरकथाःसतांकेनोद्दिष्टंविषममसिधा

॥२०॥अहोमहत्वंमहतामपूर्वंविपत्तिकालेऽपिपरोपकारः॥यथा
ऽस्यमध्येपतितोऽपिराहोःकलानिधिःपुण्यचयंददाति॥२१॥ मा
न्याएवहिमान्यानांमानंकुर्वंतिनेतरे॥शंभुर्बिभर्त्तिमूर्ध्नेंदुंस्वर्भानु
स्तंजिघृक्षति॥ २२॥ येदीनेषुदयालवः स्पृशतियानल्पोऽपिनश्री
मदोव्यग्रायेचपरोपकारकरणेहृष्यंतियेयाचिताः॥ स्वस्थाःसं
तिचयौवनोन्मदमहाव्याधिप्रकोपेऽपियेतैःस्तंभैरिवसुस्थिरैः
किल भरक्लांताधराधार्यते॥ २३॥संपदियस्यनहर्षोविपदिवि
षादोरणेचधीरत्वं॥ तंभुवनत्रयतिलकंजनयतिजननीसु
तंविरलं॥२४॥सुजनंव्यजनंमन्येचारुवंशसमुद्भवं॥ आत्मा
नंचपरिभ्राम्यपरतापनिवारणं॥२५॥ इहानेकेसंतःसततमु
पकारिण्युपकृतिंकृतज्ञाःकुर्वंतोजगतिनिवसंतोऽपिसुधियः
॥कियंतस्तेसंतःसुकृतपरिपाकप्रणयिनोविनास्वार्थंयेषांभ
वतिपरकृत्यव्यसनिता॥२६॥ अर्थःस्करवंकीर्त्तिरपीहमाभूद
नर्थएवास्तुतथाऽपिधीराः॥निजप्रतिज्ञामनुरुध्यमानामहो
द्यमाःकर्मसमारभंते॥२७॥क्षुद्राःसंतिसहस्रशःस्वभरणव्या
पारमात्रोद्यताःस्वार्थोयस्यपरार्थएवसपुमानेकःसतामग्रणीः
॥दुष्पूरोदरपूरणायपिबतिस्रोतःपतिंवाडवोजीमूतस्तुनिदा
घसंभृतजगत्संतापविच्छित्तये॥२८॥ नहिभवतिवियोगःस्ने
हविच्छेदहेतुर्जगतिगुणनिधीनांसज्जनानांकदाचित्॥घनति
मिरनिबद्धोदूरसंस्थोऽपिचंद्रःकिमुकुमुदवनानांप्रेमभंगंकरो
ति॥२९॥ उदधिरवधिरुर्व्यास्तंहनूमास्ततार निरवधिगगनंचे
त्कोडकोशेविलीनं॥इतिपरिमितिमंतोभांतिसर्वेऽपिभावाःसतु
निरवधिरेकःसज्जनानांविवेकः॥३०॥चंद्रःक्षयीप्रकृतिवक्रतनु
र्जडात्मादोषाऽऽकरःस्फुरतिमित्रविपत्तिकाले॥मूर्ध्नातथाऽ
पिविधृतःपरमेश्वरेणनैवाश्रितेषुमहतांगुणदोषशंका॥३१॥
उदयेसवितारक्तोरक्तश्चाऽस्तमनेतथा॥संपत्तौचविपत्तौचमह
तामेकरूपता॥३२॥दृश्यंतेभुविभूरिनिंबतरवःकुत्राऽपितेचंदनाः

पाषाणैःपरिपूरितावसुमतीवज्रोमणिर्दुर्लभः॥श्रूयंतेकरटाऽऽ
रवाःप्रतिदिनंचैत्रेकुहूकूजितंतन्मध्येखलुसंकुलंजगदिदंहि
त्राःक्षितौसज्जनाः॥३३॥आरभंतेऽल्पमेवाज्ञाःकामंव्यग्राभवं
तिच॥महाऽऽरंभाःकृतधियःस्तिष्ठंतिचनिराकुलाः॥३४॥पिबंति
नद्यःस्वयमेवनांऽभःस्वयंनखादंतिफलानिवृक्षाः॥नाऽदंतिसस्यं
खलुवारिवाहाःपरोपकारायसतांविभूतयः॥३५॥गुणायंतेदो
षाःसुजनवदनेदुर्जनमुखेगुणादोषायंतेतदिदमपिनोविस्मयप
दं॥महामेघःक्षारंपिबतिकुरुतेवारिमधुरं फणीक्षीरंपीत्वावमति
गरलंदुःसहतरं॥३६॥किंजन्मनाचमहतापितृपौरुषेणशक्त्या
हियातिनिजयापुरुषःप्रतिष्ठां॥कुंभानकूपमपिशोषयितुंसम
र्थाःकुंभोद्भवेनमुनिनांऽबुधिरेवपीतः॥३७॥ऐश्वर्यस्यविभूषणं
सुजनताशौर्यस्यवाक्संयमोज्ञानस्योपशमःकुलस्यविनयोवि
त्तस्यपात्रेव्ययः॥अक्रोधस्तपसःक्षमाबलवतांधर्मस्यनिर्व्या
जतासर्वेषामपिसर्वकारणमिदंशीलंपरंभूषणं॥३८॥दाक्षिण्यं
स्वजनेदयापरजनेशाठ्यंसदादुर्जनेनीतिःसाधुजनेनयोनृपजने
विद्वज्जनेष्वार्जवं॥शौर्यंशत्रुजनेक्षमागुरुजनेनारीजनेधूर्तता
येचैवंपुरुषाःकलासुकुशलास्तेष्वेवलोकस्थितिः॥३९॥केनांजि
तानिनयनानिमृगांगनानांकोवाकरोतिरुचिरांऽगरुहान्मयू
रान्॥कश्चोत्पलेषुदलसन्निचयंकरोतिकोवाकरोतिविनयंकु
लजेषुपुंसः॥४०॥आरभ्यतेनखलुविघ्नभयेननीचैःप्रारभ्यवि
घ्नविहताविरमंतिमध्याः॥विघ्नैःपुनःपुनरपिप्रतिहन्यमानाःप्रारऽऽ
भ्यचोत्तमजनानपरित्यजंति॥४१॥प्रियान्याय्यावृत्तिर्मलिन
मसुभंगेप्यसुकरंत्वसंतोनाभ्यर्थ्याःसुहृदपिनयाच्यःकृशध
नः॥विपद्युच्चैःस्थेयंपदमनुविधेयंचमहतांसतांकेनोद्दिष्टंवि
षममसिधाराव्रतमिदं॥४२॥प्रदानंप्रच्छन्नंगृहमुपगतेसंभ्र
मविधिःप्रियंकृत्वामौनंसदसिकथनंनाप्युपकृतेः॥अनुत्सेको
लक्ष्म्यांनिरभिभवसाराःपरकथाःसतांकेनोद्दिष्टंविषममसिधा

रात्रतमिदं॥४३॥घृष्टंघृष्टंपुनरपिपुनश्चंदनंचारुगंधंछिन्नं
छिन्नंपुनरपिपुनःस्वादुचैवेक्षुकांडं॥दग्धंदग्धंपुनरपिपुनःकां
चनंकांतवर्णनप्राणांतेप्रकृतिविकृतिर्जायतेचोत्तमानां॥४४॥
दुर्जनवचनांगारैर्दग्धोऽपिनविप्रियंवदत्यार्यः॥अगुरुरपिविद
ह्यमानःस्वभावगंधंपरित्यजतिकिंनु॥४५॥सत्संगाद्भवतिहि
साधुताखलानांसाधूनांनहिखलसंगमात्खलत्वं॥आमोदंकुसु
मभवंमृदेवधत्तेमृद्गंधंनहिकुसुमानिधारयंति॥४६॥अप्रिय
वचनदरिद्रैःप्रियवचनाढ्यैःस्वदारपरितुष्टैः॥परपरिवादनिवृत्तैः
क्वचित्क्वचिन्मंडितावसुधा॥४७॥असाधुःसाधुर्वाभवतिखलु
जात्यैवपुरुषोनसंगाद्दौर्जन्यंनहिसुजनताकस्यचिदपि॥प्ररू
ढसंसर्गेमणिभुजगयोर्जन्मजनितेमणिर्नोऽहेर्दोषान्स्पृशति
नहिसर्पोमणिगुणान्॥४८॥वनेऽपिसिंहामृगमांसभक्षिणो
बुभुक्षितानैवतृणंचरंति॥एवंकुलीनाव्यसनाभिभूताननीचक
र्माणिसमाचरंति॥४९॥कांताकटाक्षविशिखानलुनंतियस्य
चित्तंननिर्दहतिकोपकृशानुतापः॥कर्षंतिभूरिविषयांश्चनलो
भपाशालोकत्रयंजयतिकृत्स्नमिदंसधीरः॥५०॥पतितोऽपि
राहुवदनेतरणिर्बोधयतिपद्मखंडानि॥भवतिविपद्यपिमहता
मंगीकृतवस्तुनिर्वाहः॥५१॥दातानदापयतिदापयितानदत्ते
योदानदापनपरोमधुरंनवक्ति॥दानंचदापनमथोमधुराचवा
णीत्रीण्यप्यमूनिखलुसत्पुरुषेवसंति॥५२॥मलयाचलगंधेनत्विंधनंचं
दनायते॥तथासज्जनसंगेनदुर्जनःसज्जनायते॥५३॥वक्त्रेवल्गाप्रकर्षः
समरभुवितवप्राणरक्षाऽपिदैवात्स्वेच्छाचारोनचाऽस्तेनहिभवतित
थाभारवाहोनितांतं॥इत्युक्तोऽश्वःखरेणप्रहसितवदनोमूकएवाऽवत
स्थेतस्माज्ज्ञात्वामहांतोऽधमजनविषयेमौनमेवाश्रयंति॥५४॥माभूत्स
ज्जनयोगोयदियोगोमापुनःस्नेहः॥स्नेहोयदिविरहोमायदिविरहोजी
विताऽशाका॥५५॥प्रेमैवमास्तुयदिचेत्सखिकेनसार्द्धंतेनापिचेद्गुणव
तानसमंकदाचित्॥ ॥तेनाऽपिचेद्भवतुमाऽस्तुकदापिभंगो

भंगोऽपिचेद्भवतुवश्यमवश्यमायुः॥५६॥कुंभःपरिमितमंभः
पिबत्यसौकुंभसंभवोंऽभोधिं॥अतिरिच्यतेसुजन्माकश्चिज्ज
नकान्निजेनचरितेन॥५७॥तुंगासनास्तुंगतराःसमर्थामनोर
थान्पूरयितुंननीचाः॥धाराधराएवधराधराणांनिदाघदा
हंशमितुंननद्यः॥५८॥सद्भिस्तुलीलयाप्रोक्तंशिलालिखि
तमक्षरं॥असद्भिःशपथेनापिजलेलिखितमक्षरं॥५९॥प्रथम
वयसिदत्तंतोयमल्पंपिबंतःशिरसिनिहितभारानारिकेलानरा
णां॥उदकममृतकल्पंदद्युराजीवितांतंनहिकृतमुपकारंसा
धवोविस्मरंति॥६०॥हरेःपदाहतिःश्लाघ्यानश्लाघ्यंखरारोह
णं॥स्पर्धाऽपिविदुषायुक्तानयुक्तामूर्खमित्रता॥६१॥विपदिधै
र्यमथाऽभ्युदयेक्षमासदसिवाक्पटुतायुधिविक्रमः॥यशसिचा
ऽभिरुचिर्व्यसनंश्रुतौप्रकृतिसिद्धमिदंहिमहात्मनां॥६२॥य
त्रविद्वज्जनोनास्तिश्लाघ्यस्तत्राऽल्पधीरपि॥निरस्तपादपेदे
शएरंडोऽपिद्रुमायते॥६३॥साधोःप्रकोपितस्याऽपिमनोना
यातिविक्रियां॥नहितापयितुंशक्यंसागरांभस्तृणोल्कया॥६४
नारिकेलसमाऽकारादृश्यंतेऽपिहिसज्जनाः॥अन्येबदरिका
ऽकाराबहिरेवमनोहराः॥६५॥स्नेहच्छेदेऽपिसाधूनांगुणा
नाऽयांतिविक्रियां॥भंगेनाऽपिमृणालानामनुबध्नंतितंतवः॥६६
घर्मार्तंनतथासुशीतलजलैःस्नानंनमुक्ताऽवलिर्नश्रीखंडवि
लेपनंसुखयतिप्रत्यंगमप्यर्पितं॥प्रीत्यैसज्जनभाषितंप्रभवति
प्रायोयथाचेतसिसद्युक्त्याचपुरस्कृतंसुकृतिनामाकृष्टिमंत्रो
पमं॥६७॥परोपदेशेपांडित्यंसर्वेषांसुकरंनृणां॥धर्मेस्वीयम
नुष्ठानंकस्यचित्तुमहात्मनः॥६८॥वांछासज्जनसंगमेपर
गुणेप्रीतिर्गुरौनम्रताविद्यायांव्यसनंस्वयोषितिरतिर्लोकाप
वादाद्भयं॥भक्तिःशूलिनिशक्तिरात्मदमनेसंसर्गमुक्तिःखले
ष्वेतेयेषुवसंतिनिर्मलगुणास्तेभ्योनरेभ्योनमः॥६९॥करेश्ला
घ्यस्त्यागःशिरसिगुरुपादप्रणयितामुखेसत्यावाणीविजयि

भुजयोर्वीर्यमतुलं।। हृदिस्वस्यावृत्तिःश्रुतमधिगतैकव्रतफलंविनाप्यैश्वर्येणप्रकृतिमहतांमंडनमिदं।।७०।। संपत्सुमहतांचित्तंभवत्युत्पलकोमलं।। आपत्सुचमहाशैलशिलासंघातकर्कशं।।७१।। यःप्रीणयेत्सुचरितैःपितरंसपुत्रोयद्भर्तुरेवहितमिच्छतितत्कलत्रं।। तन्मित्रमापदिसुखेचसमक्रियंयदेतत्त्रयंजगतिपुण्यकृतोलभंते।।७२।। नम्रत्वेनोन्नमंतःपरगुणकथनैःस्वान्गुणान्ख्यापयंतःस्वार्थान्संपादयंतोविततबहुतराऽरंभयत्नाःपरार्थे।। क्षांत्यैवाक्षेपरूक्षाऽक्षरमुखरमुखान्दुर्मुखान्दूषयंतःसंतश्चाऽश्चर्यचर्याजगतिबहुमताःकस्यनाऽभ्यर्चनीयाः।।७३।। मनसिवचसिकायेपुण्यपीयूषपूर्णास्त्रिभुवनमुपकारश्रेणिभिःप्रीणयंतः।। परगुणपरमाणून्पर्वतीकृत्यनित्यंनिजहृदिविकसंतःसंतिसंतःकियंतः।।७४।। किंतेनहेमगिरिणारजताद्रिणावायत्रश्रिताश्चतरवस्तरवस्तएव।। मन्यामहेमलयमेवयदाश्रयेणकंकोलनिंबकुटजाअपिचंदनास्युः।।७५।। पातितोऽपिकराघातैरुत्पतत्येवकंदुकः।। प्रायेणसाधुवृत्तानामस्थायिन्योविपत्तयः।।७६।। छिन्नोऽपिरोहतितरुश्चंद्रःक्षीणोऽपिवर्द्धतेलोके।। इतिविमृशंतःसंतःसंतप्यंतेनलोकेऽस्मिन्।।७७।। उदयतियदिभानुःपश्चिमेदिग्विभागेप्रचलतियदिमेरुःशीततांयातिवन्हिः।। विकसतियदिपद्मंपर्वताऽग्रेशिलायांनभवतिपुनरुक्तंभाषितंसज्जनानां।।७८।। किमत्रचित्रंयत्संतःपराऽनुग्रहतत्पराः।। नहिस्वदेहशैत्यायजायंतेचंदनद्रुमाः।।७९।। प्राज्ञोहिजल्पतांपुंसांश्रुत्वावाचःशुभाऽशुभाः।। गुणवद्वाक्यमादत्तेहंसःक्षीरमिवांऽभसः।।८०।। रिपुःपौलस्त्याख्यश्चरणचरितव्योजलनिधिर्विजेतव्यालंकारणभुविसहायाश्चकपयः।। तथाऽप्येकोरामःसकलमवधीद्राक्षसकुलंक्रियासिद्धिःसत्त्वेभवतिमहतांनोपकरणे।।८१ रथस्यैकंचक्रंभुजगयमिताःसप्ततुरगानिरालंबोमार्गश्चरणरहितःसारथिरपि।। रविर्यात्येवांऽतंप्रतिदिनमपारस्यनभसःक्रि

यासिद्धिःसत्वेभवतिमहतांनोपकरणे॥८२॥ धनुःपौष्पंमौर्वीमधुकरमयीचंचलदृशांदृशांकोणोवाणःसुहृद्विजितात्माहिमकरः॥ तथाप्येकोनंगस्त्रिभुवनमपिव्याकुलयतिक्रियासिद्धिःसत्वेभवतिमहतांनोपकरणे॥८३॥ अपेक्षंतेनचस्नेहंनपात्रंनदशांतरं॥ सदालोकहितासक्तारत्नदीपाइवोत्तमाः॥८४॥ किंमधुनाकिंविधुनाकिंसुधयाकिंचवसुधयाऽखिलया॥ यदिहृदयहारिचरितःपुरुषःपुनरेतिनयनयोरयनं॥८५॥ काकैःसहप्रवृद्धस्यकोकिलस्यकलागिरः॥ खलसंगेऽपिनैष्ठुर्यंकल्याणप्रकृतेःकुतः॥८६॥ अंबरमनूरुलंघ्यंवसुंधरासाऽपिवामनेकपदा॥ अब्धिरपिपोतलंघ्यःसतांमनःकेनतुल्यंस्यात्॥८७॥ आपद्गतःखलुमहाशयचक्रवर्ती विस्तारयत्यकृतपूर्वमुदारभावम्॥ कालागरुर्दहनमध्यगतःसमंताल्लोकोत्तरंपरिमलंप्रकटीकरोति॥८८॥ विश्वाऽभिरामगुणगौरवगुंफितानांरोषोऽपिनिर्मलधियांरमणीयएव॥ लोकप्रियैःपरिमलैःपरिपूरितस्यकाश्मीरजस्यकटुताऽपिनितांतरम्या॥८९॥ शून्येऽपिचगुणवत्तामातन्वानःस्वकीयगुणजालैः॥ विवराणिमुद्रयन्द्रागूर्णायुरिवसज्जनोजयति॥९०॥ प्रदानंप्रच्छन्नंगृहमुपगतेसंभ्रमविधिर्निरुत्सेकोलक्ष्म्यामनभिभवगंधाःपरकथाः॥ प्रियंकृत्वामौनंसदसिकथनंचाऽप्युपकृतेः श्रुतेऽत्यंतासक्तिःपुरुषमभिजातंकथयति॥९१॥ प्रियप्रायावृत्तिर्विनयमधुरोवाचिनियमःप्रकृत्याकल्याणीमतिरनवगीतःपरिचयः॥ पुरोवापश्चाद्वातदिदमविपर्यासितरसंरहस्यंसाधूनामनुपधिविशुद्धंविजयते॥९२॥ येषापंशमयंत्रिसंगतिभृतांयेदानशृंगारिणोयेषांचित्तमतीवनिर्मलतरंयेषांनभग्नंव्रतं॥ येसर्वान्सुखयंतिहिप्रतिदिनंतेसाधवोदुर्लभागंगावद्गजगंडवद्गगनवद्गांगेयवद्गेयवत्॥९३॥ यथाचित्तंतथावाचोयथावाचस्तथाक्रियाः॥ चित्तेवाचिक्रियायांचसाधूनामेकरूपता॥९४॥ विवेकःसहसंयत्याविनयोविद्ययासह॥ प्रभुत्वंप्रश्रयोपेतंचिह्नमेतन्महात्मनां॥९५॥

इतिश्रीशार्ङ्गधरविरचितायांपद्धत्यांमहतांप्रशंसापरिच्छेदः॥ ॥

अथधीरप्रशंसा

सहपरिजनेनविलसतिधीरोगहनानिनरतिसुनरेकः॥विषमेकेन निपीतंत्रिपुर जि तासुरैरमृतं॥१॥ कस्यापि॥निंदंतुनीति निपुणायदिवास्तुवंतुलक्ष्मीःसमाविशतुगच्छतुवायथेष्टं॥अद्यै ववामरणमस्तुयुगांतरेवान्यायात्पदंप्रविचलंतिपदंनधीराः॥ ॥२॥भर्तृहरेः॥श्लाघ्यामहतामुन्नतिरद्भुतमध्यवसितंचधीरा णां॥ कनकगिरिरनभिलंघ्योरविरनिशमनुज्झितारंभः॥३॥ क स्यापि॥कदर्थितस्यापिहिधैर्यवृत्तेर्नशक्यतेधैर्यगुणाःप्रमार्ष्टुं। अधोमुखस्यापिकृतस्यवन्हेर्नाधःशिखायातिकदाचिदेव॥४॥ कस्यापि॥येदीनेषुदयालवःस्पृशतियान्स्वल्पोपिनश्रीमदो व्यग्रायेचपरोपकारकरणेहृष्यंतियेयाचिताः॥स्वस्थाःसंतिच यौवनोन्मदमहाव्याधिप्रकोपेपियेतैःस्तंभैरिवसुस्थिरैःकलि भरक्रांताधराधार्यते॥५॥कस्यापि॥अर्थःसुखंकीर्त्तिरपीहमा भूदनर्थएवास्तुतथापिधीराः॥निजप्रतिज्ञामनुरुध्यमानामहो द्यमाःकर्मसमारभंते॥६॥कस्यापि॥अंगणवेदीवसुधाकुल्या जलधिःस्थलीचपातालं॥वल्मीकश्चसुमेरुःकृतप्रतिज्ञस्य धीरस्य॥७॥बाणभट्टस्य॥इ॰शा॰वि॰प॰धीरप्रशंसापरिच्छेदः

अथसज्जनप्रशंसा

उपकर्त्तुंप्रियंवक्तुंकर्त्तुंस्नेहमकृत्रिमं॥सुजनानांस्वभावोयंकेनें दुःशिशिरीकृतः॥१॥ इक्षोरग्रात्क्रमशःपर्वणिपर्वणियथारसवि शेषः॥तद्वत्सज्जनमैत्रीविपरीतानांचविपरीता॥२॥निर्गुणेष्व पिसत्वेषुदयांकुर्वंतिसाधवः॥नहिसंहरतेज्योत्स्नांचंद्रश्चांडा लवेश्मसु॥३॥उपकारिषुयःसाधुःसाधुत्वेतस्यकोगुणः॥अप कारिषुयःसाधुःससाधुःसद्भिरुच्यते॥४॥ हृदयानिसतामेव कठिनानीतिमेमतिः॥खलवाग्विशिखैस्तीक्ष्णैर्भिद्यंतेनमनाग्यतः ॥५॥अपेक्षंतेनचस्नेहंनपात्रंनदशांतरं॥सदापरोपकारायस्त्व

दीपाइवोत्तमाः॥६॥ केषामप्येते॥ उपचरितव्याःसंतोयद्यपिकथ
यंतिनैकमुपदेशं॥ यास्तेषांस्वैरकथास्ताएवभवंतिशास्त्राणि॥७
॥भर्तृहरेः॥ सुजनोनयातिवैरंपरहितनिरतोविनाशकालेपि॥छे
देपिचंदनतरुःसुरभयतिमुखंकुठारस्य॥८॥ रविगुप्तस्य॥ अति
कुपिताअपिसुजनायोगेनमृदूभवंतिनतुनीचाः॥ हेम्नःकठिण
स्यापिद्रविणोपायोस्तिनतृणानां॥९॥ कस्यापि॥ अनुकुरुतःखल
सुजनावग्रिमपाश्चात्यभागयोःसूच्याः॥ विदधातिरंध्रमेकोगु
णमस्यापरोपिविदधाति॥१०॥ गोपभट्टस्य॥ संतोपिसंतःक्वकि
रंतुतेजःक्वनुज्वलंतुक्वतनुंप्रथंतां॥ विधायबुद्ध्यानतुवेधसेव
ब्रह्मांडकोशेघटदीपकल्पाः॥११॥ गोत्रस्थितिंनमुंचंतिसदास
न्नतिमाश्रिताः॥ उदन्वंतश्चसंतश्चमहासत्वतयानया॥१२॥ ब्रू
तेन्यस्यासतोप्यार्योगुणांदोषांस्तुदुर्जनः॥ तुल्येप्यसत्वेकिंलोको
गच्छत्यूर्ध्वमधोपरः॥१३॥ आस्तामन्यत्सुजनाःपरोपकारैक
करणदुर्ललिताः॥ संतापितपिशुनेषुस्वगुणेष्वपिहंतखिद्यंते
॥१४॥ यदमीदशंतिदशनारसनातत्स्वादुसुखमनुभवति॥ प्रकृ
तिरियंविमलानांक्लिश्यंतियदन्यकार्येषु॥१५॥ देवेश्वरस्य॥ धा
रदिनवर्षतिगर्जतिवर्षतिवर्षासुनिस्वनोमेघः॥ नीचोवदतिन
कुरुतेनवदतिसुजनःकरोत्येव॥१६॥ अद्यापिनोज्झतिहरःकि
लकालकूटंकूर्मोबिभर्तिधरणींखलुपृष्ठभागे॥ अंभोनिधिर्वह
तिदुर्वहवाडवाग्निमंगीकृतंसुकृतिनःपरिपालयंति॥१७॥
आदिमध्यनिधनेषुसौहृदंसज्जनेभवतिनेतरेजने॥ छेदताप
नविघर्षताडनैर्नान्यभावमुपयातिकांचनं॥१८॥ येजातेव्य
सनेनिराकुलधियःसंपत्सुनाभ्युन्नताःप्राप्तेनैवपराङ्मुखाःप्र
णयिनिप्राणोपयोगैरपि॥ ह्रीमंतःस्वगुणप्रकाशनविधावन्य
स्तुतौपंडितास्तेभूमंडलमंडनैकतिलकाःसंतःकियंतोजनाः
॥१९॥ मुखान्नोद्गिरयत्यूर्ध्वंहृदयेननयत्यधः॥ जरयत्यंतरे
साधुर्दोषंविषमिवेश्वरः॥२०॥ तदपकृतंविधिनार्थिषुयत्संतःख

ल्पसंपद्दोविहिताः॥ तुच्छेपयसिघनानांसीदत्यतीवजीवलोको
यं॥२१॥ केषामप्येते ॥ नूनंदुग्धाब्धिमंथोत्थाविमौसज्जनदुर्जनौ
॥ किंत्विंदोःसोदरःपूर्वःकालकूटस्यचोत्तरः॥२२॥ राजशेखरस्य॥
अपिसुदमुपयांतोवाग्विलासैःस्वकीयैःपरभणितिषुतोषंयांतिसं
तःकियंतः॥ निजघनमकरंदस्यंदपूर्णालवालःकलशसलिलसेकं
नेहतेकिंरसालः।२३। कस्मादिंदुरसौधिनोतिजगतींपीयूषगर्भैःक
रैःकस्माद्वाजलधारयैषधरणींधाराधरःसिंचति॥ भ्रामंभ्राममयं
चनंदयतिवाकस्मात्त्रिलोकींरविःसाधूनांहिपरोपकारकरणेनो
पाध्यपेक्षंमनः।२४। केनादिष्टौकमलकुमुदोन्मीलनेपुष्पवंतौवि
श्वंतोयैःस्नपयितुमसौकेनवावारिवाहः॥ विश्वानंदोपचयचतुरो
दुर्जनानांदुरापःश्लाघ्योलोकेजयतिमहतामुज्वलोयंनिसर्गः॥
॥२५॥ अमृतंकिरतिहिमांशुर्विषमेवफणासमुद्गिरति॥ गुणमेववक्ति
साधुर्दोषमसाधुःप्रकाशयति।२६। धर्मेतत्परतामुखेमधुरतादाने
समुत्साहितामित्रेऽवंचकतागुरौविनयिताचित्तेतिगंभीरता॥ आ
चारेशुचितागुणेरसिकताशास्त्रेतिविज्ञानितारूपेसुंदरताहरौभ
जनितासत्स्वेवसंदृश्यते॥२७॥ यदिंदोरन्वेतिव्यसनमुदयंवा
निधिरपामुपाधिस्तत्रायंजयतिजनिकर्तुःप्रकृतिता॥ अयंकःसं
बंधोयदनुहरतेतस्यकुमुदंविशुद्धाःशुद्धानांवमनमभिसंधिप्रण
यिनः॥२८॥ गुणिनामपिनिजरूपप्रतिपत्तिःपरतएवसंभवति॥
स्वामहिमदर्शनमक्ष्णोर्मुकुरतलेजायतेयस्मात्॥२९॥ विगु
णोपिकाव्यबंधःसाधूनामाननंगतःस्वदते॥ फूत्कारोपिसुवंशे
रनूद्यमानःश्रुतिंहरति॥३०॥ काव्यस्याक्षरमैत्रीभाजानचकर्क
शानचग्राम्या॥ शब्दाअपिपुरुषाअपिसाधवएवार्थबोधाय॥
॥३१॥ उत्कर्षवान्निजगुणोयथापातिकर्णमन्यस्य॥ धनुरिवसुवं
शजन्मातथातथासज्जनोनमति॥३२॥ अपूर्वःकोपिकोपाग्निःस
ज्जनस्येतरस्यच॥ एकस्यशाम्यतिस्नेहाद्वर्धतेन्यस्यवारितः॥
॥३३॥ सज्जनएवहिविद्याशोभायैभवतिदुर्जनेमोघा॥ किंदूरदर्शि

ननयाकैश्चिदुपादीयतेगृध्रः॥३३॥स्वस्थानादपिविरमतिम॰
ज्जतिजलधौनीचमपिभजते॥निजपक्षंरक्षणमनाःसुजनोमै
नाकशैलइव ॥३४॥प्रकाममभ्यस्यतुनामविद्यासौजन्यमभ्या
सवशादलभ्यं॥कर्णौसपत्न्यःप्रविशालयेयुर्विशालयेदक्षियुगं
नकापि॥३५॥ अद्वैतंसुखदुःखयोरनुगतंसर्वास्ववस्थासुयद्वि
श्रामोहृदयस्ययत्रजरसायस्मिन्नहार्योरसः॥कालेनावरणा॰
त्ययात्परिणतंयत्स्नेहसारेस्थितंभद्रंतस्यसुमानुषस्यकथमप्ये
कंहितत्प्रार्थ्यते॥३६॥दुर्जनसहवासादपिशीलोत्कर्षंनसज्जन
स्त्यजति॥प्रतिपर्वतपनवासीनिःसृतमात्रःशशीशीतः॥३७॥
विगृहीतःपदाक्रांतोभूयोभूयश्चखंडितः॥माधुर्यमेवावहतिसु
श्लोकइवसज्जनः॥३८॥ प्रकृतिप्रत्ययोपेतः सद्वृत्तःसाधुसं
मतः॥अर्थार्पणसमर्थश्चसुश्लोकइवसज्जनः॥३९॥सुअणोण॰
कुप्पइच्चिअअहकुप्पइविप्पिअंणचिंतेइ॥अहचिंतेइणजपइअ
हजपइलज्जिओहोइ॥४०॥ विप्रियमप्याकर्ण्यब्रूतेप्रियमेवस
र्वदासुजनः॥क्षारंपिबतिपयोधेर्वर्षत्यंभोधरोमधुरमंभः॥४१॥
खलसख्यंप्राङ्मधुरंवयोंतरालेनिदाघदिनमंते॥एकादिमध्य
परिणतिरमणीयासाधुजनमैत्री॥४२॥गर्वनोद्वहतेननिंदतिप
रान्नोभाषतेनिष्ठुरंप्रोक्तंकेनचिदप्रियंचसहतेक्रोधंचनालंबते
॥श्रुत्वाकाव्यमलक्षणं परकृतंसंतिष्ठतेमूकवद्दोषान्
छादयतेस्वयंनकुरुतेह्येतत्सतांलक्षणं ॥४३॥ इतिश्रीशार्ङ्ग
धरविरचितायांपद्धत्यांसज्जनप्रशंसापरिच्छेदः॥ ७ ॥

अथसत्प्रभुप्रशंसा

विद्यावंतोविनीताःप्रसभमभिसभंवाक्प्रपंचेषुजीवाःकैवानेवा
रभंतेत्रिजगतिविततांकीर्तिवल्लीमतल्लीं॥तेषामाधारभावंवनपर
भृतोबिभ्रतोयेलसंतेतेतुत्रैलोक्यतुंगाविमलफलजुषःस्वःपतिं
स्खल्पयंति॥१॥विशांपतेविस्तरतोनवक्तुंजानामिजानन्नपिते
गुणौघान्॥यस्यैवयोस्मिप्रथमानकीर्तेःसएवतद्वानितिनिर्विहृढि॰

यःपृष्ठंसुधिर्दर्शयत्परिभटश्रेणीषुयोवक्रतामस्मिन्नेवविभर्त्ति
यश्चकिरतिक्रूरध्वनिर्निष्ठुरः॥दोषंतस्यतथाविधस्यभजतश्चाप
स्यगृह्णन्गुणंविख्यातःपरमेषएवनृपतिःसीमागुणग्राहिणां॥३
॥दृष्टःसाक्षादसुरविजयीनाकिनांचक्रवर्त्तीमात्स्योन्यायःकथ
यतियथावारुणीदंडनीतेः॥पातालेंद्राद्हिभयमथास्त्येवनिःसा
नुयत्कंतन्नःपुण्यैर —जनिभवतावीरराजन्वतीभूः॥४॥स्वसु
खनिरभिलाषःखिद्यसेलोकहेतोःप्रतिदिनमथवातेवृत्तिरेवंविधै
व॥अनुभवतिहिमूर्ध्नापादपस्तीव्रमुष्णांशमयतिपरितापंछायया
संश्रितानां॥५॥नियमयसिकुमार्गप्रस्थितानात्तदंडःप्रशमयसि
विवादंकल्पसेरक्षणाय॥अतनुषुविभवेषुज्ञातयःसंतुनामत्वयि
तुपरिसमाप्तंवंधुकृत्यंप्रजानां॥६॥ ॥इतिसत्प्रभुप्रशंसा॥ ७॥

अथमनस्वीप्रशंसा

कामंप्रियानपिप्राणान्विमुंचंतिमनस्विनः॥इच्छंतिनत्वमित्रेभ्यो
महतीमपिसत्क्रियां॥१॥अदृष्टसुखभंगस्ययुक्तमेधस्ययाचितुं
॥अहोबतमहत्कष्टंचक्षुष्मानपियाचते॥२॥कस्यापि॥पुण्ये
ग्रामेवनेवामहतिसितपटच्छन्नपालींकपालीमादायन्यायगर्भ
द्विजवरहुतभुग्धूमधूम्रोपकंठं॥द्वारंद्वारंप्रवृत्तोवरमुदरदरी
पूरणायक्षुधार्त्तोमानीप्राणीसदेशेनपुनरनुदिनंतुल्यकुल्येषु
दीनः॥३॥वरमहिमुखेक्रोधाध्मातेकरोविनिवेशितोविषमपि
वरंपीत्वासुप्तंकृतांतनिवेशने॥गिरिवरतटीमुक्तश्चात्मावरं
शतधाकृतोनतुखलजनावाप्तैरर्थैःकृतंहितमात्मनः॥४॥एतौभर्तृह
रेः॥ब्रह्मांडंकियदस्तितत्रवसुधापिंडंकिमाचक्ष्महेतत्राप्येक
तरंतुखंडमभिवास्तस्मिन्नृपाःकेचन॥तेभ्योदैन्यशतोपनीत
विभवादृष्टानुकंपास्ततस्तेधिग्मूढाःस्पृहयंतिहंतकिमपिस्वार्थे
नतेभ्योपिये॥५॥श्रीदेवगणदेवानां॥पातालान्नविमोचितोब
तवलिर्नीतोनमृत्युक्षयंनोन्मृष्टंशशिलांछनस्यमलिनानोन्मू
लिताव्याधयः॥शेषस्यापिभरंविधृत्यनकृतोभारावतारःक्षणं

चेतःसन्तुरुषाभिमानमनिशंमिथ्यावहन्खिद्यसे॥६॥एकःस
एवजीवतिहृदयविहीनःसहृदयोराहुः॥यःसकललघिमभाज
नमुदरंनबिभर्त्तिदुःपूरं॥७॥ वरंहालाहलंपीतंसद्यःप्राणहरंवि
षं॥ नतुदृष्टंधनान्धानां भ्रूभंगकुटिलंमुखं॥८॥प्रत्युपकुर्वन्ब
हुमपिनभवतिपूर्वोपकारिणातुल्यः॥एकोनुकरोतिकृतंनिःका
रणमेवकुरुतेन्यः॥९॥कामंवनेषुहरिणास्तृणेनजीवंत्ययत्न
सुलभेन॥धनिषुनदैन्यंविदधतितेकिलपशवोवयंसुधियः॥१०
ब्रूतनूतनकूष्मांडफलानांकेभवंत्यमी॥अंगुलीदर्शनाद्येनवि
लीयंतेमनस्विनः॥११॥ केषामध्येतौ॥ब्रह्मांडमंडलीमात्रंकिंलो
भायमनस्विनः॥शफरीस्फुरितेनाब्धेःक्षुब्धताजातुजायते॥
॥१२॥कुसुमस्तबकस्येवद्वयीवृत्तिर्मनस्विनः॥ मूर्ध्निवासर्वलोक
स्यव्यशीर्यतवनेथवा॥१३॥ भर्तृहरेः॥पादाहतंसमुत्थायमू
र्धानमधिरोहति॥ स्वस्थादेवापमानेपिदेहिनस्तद्वरंरजः॥१४॥
माजीवेद्यःपरावज्ञादुःखदग्धोपिजीवति॥ तस्याजननमेवा
स्तुजननीक्लेशकारिणः॥१५॥ समूलघातमघ्नंतःपरान्नोद्यंति
मानिनः॥प्रध्वंसितांधतमसस्तत्रोदाहरणंरविः॥१६॥सपुमा
नर्थवज्जन्मायस्यनाम्निपुरःस्थिते॥नान्यामंगुलिमभ्येतिस
भायामुद्यतांगुलिः॥१७॥माघकवेः॥प्रतिदिनमयत्नसुलभे
भिक्षुकजननिसाधुजनकल्पलते॥ नृपनमननरकतारिणि
भगवतिभिक्षेनमस्तुभ्यं॥१८॥पुरोवापश्चाद्वावयमुपविशामः
क्षितिभुजांततःकिंनश्छिन्नेवचनरचनाक्रीतजगतां॥अगारे
कांतारेकुचकलश हारेमृगदृशांमणेस्तुल्यंमूल्यंसहजसर
लस्यद्युतिमतः॥ १९॥ निंदंतुनीतिनिपुणायदिवास्तुवंतुल
क्ष्मीःसमाविशतुगच्छतुवायथेष्टं॥अद्यैववामरणमस्तुयुगां
तरेवान्यायात्पथःप्रविचलंतिपदंनधीराः॥२०॥ ॥इतिशार्ङ्ग
धरविरचितायांपद्धत्यांमनस्विनःप्रशंसापरिच्छेदः॥ ६ ॥

अथोदारप्रशंसा

आकारमात्रविज्ञानसंपादितमनोरथाः॥ तेधन्यायेनशृण्वंतिदी
नाःकामार्थिनांगिरः॥१॥ देहिदेहीतिजल्पंतित्यागिनोप्यर्थिनो॰
पिच॥ आलोकयंतिराभस्याद्स्तिनास्तीतिनक्वचित्॥२॥ बुध्यं
तेपक्षिपशवःपठंतिशुकसारिकाः॥ दातुंवित्तंसमर्थोयोसशूरः
सचपंडितः॥३॥ एकेनतिष्ठताधस्तादन्येनोपरितिष्ठता॥ दातृ
याचकयोर्भेदःकराभ्यामेवसूचितः॥४॥ सैवपरंनविनश्यतित
नुरपियाश्रीर्निवेशितासत्सु॥ अवशिष्यतेहिमांशोःसैवकला
यास्थिताशंभौ॥५॥ अयंनिजःपरोवेत्तिगणनालघुचेतसां॥ उ
दारचरितानांतुवसुधैवकुटुंबकं॥६॥ बोधयंतिनयाचंतेभिक्षाचा
रागृहेगृहे॥ दीयतांदीयतांनित्यमदातुःफलमीदृशं॥७॥ केषाम
प्येते ॥ अर्थिनांकृपणादृष्टिस्त्वन्मुखेपतितासकृत्॥ तदवस्थापु
नर्देवनान्यस्यमुखमीक्षते॥८॥ दंडिनः॥ यद्ददातिविशिष्टेभ्योय
च्चाश्नातिदिनेदिने॥ तत्तेवित्तमहंमन्ये शेषमन्यस्यर
क्षसि॥९॥ भगवतोव्यासस्य॥ किंतयाक्रियतेलक्ष्म्यायावधूरिव
केवला॥ यानवेश्येवसामान्यापथिकैरपिभुज्यते॥१०॥ विक्रमादि
त्यस्य॥ लक्ष्मीपयोधरोत्संगकुंकुमारुणितोहरेः॥ धन्योबलिः
सयेनास्यभिक्षापात्रीकृतःकरः॥११॥ कर्णस्त्वचंशिबिर्मांसंजीवं
जीमूतवाहनः॥ ददौदधीचिरस्थीनिनास्त्यदेयंमहात्मनां॥१२
द्विःशरंनाभिसंधत्तेद्विःस्थापयतिनाश्रितान्॥ द्विर्ददातिनचार्थि॰
भ्योरामोद्विर्नैवभाषते॥१३॥ दातानीचोपिसेव्यःस्याद्दाता॰
नमहानपि॥ जलार्थीवारिधिंत्यक्त्वापश्यकूपंनिषेवते॥१४॥
केषामपीमे॥ आदर्शायशशांकमंडलमिदंहार्यायहेमाचलं॰
दीपायद्युमणिर्महीमिवकथंनोभिक्षवेदत्तवान्॥ दित्सापल्ल
वितप्रमोदसलिलव्याकीर्णमंत्रांबुजोजानीमोभृगुनंदनस्तद
खिलंनप्रायशोदृष्टवान्॥१५॥ इ॰शा॰प॰उदारप्रशंसापरिच्छेदः

अथदातृप्रशंसा

त्वयिसतिशिवदातर्यस्मदभ्यर्थितानामितरमनुसरंतोदर्श

यंतोऽर्थिसुहृदां॥ चरमचरणपातैर्दुर्ग्रहंदोग्धकामाः करभम
नुसरामः कामधेनौस्थितायां॥१॥ ॥इतिदातृप्रशंसा॥ ७॥

अथतेजस्वीप्रशंसा

बालस्यापिरवेःपादाःपतंत्युपरिभूभृतां॥ तेजसासहजातानांव
यःकुत्रोपयुज्यते॥१॥ सिंहःशिशुरपिनिपततिमदमलिनकपोल
भित्तिषुगजेषु॥ प्रकृतिरियंसत्ववतांनखलुवयस्तेजसोहेतुः॥२
यद्यपिविधिवैगुण्यात्सिंहःपततिदुस्तरेकूपे॥ तदपिहिसततंवां
छतिकरिकुंभविदारणेमनसा॥३॥ तेजांसियस्यप्रशमंप्रयांतुऽ
वारांप्रवाहेणसवन्हिरन्यः॥ अयंपुनर्वाडवनामधेयःसमुद्रमा
पीयबिभर्त्तितेजः॥४॥ एकःसएवतेजस्वीसैंहिकेयःस्मरद्विषां॥
शिरोमात्रावशेषेणजीयंतेयेनशत्रवः॥५॥ केषामप्येते॥ मौनीपा
दप्रहारेपिनक्षमीनीचएवसः॥ आकृष्टशस्त्रोमित्रेपिनतेजस्वी
खलोहिसः॥६॥ क्षेमेंद्रस्य॥ तुल्येपराधेस्वर्भानुर्भानुमंतंचिरेणय
त्॥ हिमांशुमाशुग्रसतेतन्महिम्नः स्फुटंफलं॥७॥ माघकवेः॥ ते
जस्विनिक्षमासारेनातिकर्कशमाचरेत्॥ अतिनिर्मथनादग्निश्चं
दनादपिजायते॥८॥ तेजोहीनेमहीपालेस्वेपरेचविकुर्वते॥ निःशं
कोहिजनोधत्तेपदंभस्मन्यशुष्मणि॥९॥ यदचेतनोऽपिपादैःस्पृ
ष्टःप्रज्वलतिसवितुरविकांतः॥ तत्तेजस्वीपुरुषःपरकृतविकृतिं
कथंसहते॥१०॥ हस्तीस्थूलतनुःसचांऽकुशवशःकिंहस्तिमा
त्रोंऽकुशोवज्रेणाऽभिहताःपतंतिगिरयःकिंशैलमात्रःपविः॥
दीपेप्रज्वलितेविनश्यतितमःकिंदीपमात्रंतमस्तेजोयस्यविराऽ
जतेसबलवान्स्थूलेषुकःप्रत्ययः॥११॥ नतेजस्तेजस्वीप्रसृ
तमपरेषांप्रसहतेसतस्यस्वोभावःप्रकृतिनियतत्वादकृतकः
॥मयूखैरश्रांतंतपतियदिदेवोदिनकरःकिमाग्नेयग्रावानिकृ
तइवतेजांसिवमति॥१२॥ एकचक्रोरथोयंताविकलोविषमाऽ
हयाः॥ आक्रमत्येवतेजस्वीतथाप्यर्कोनभस्थलं॥१३॥ धीरध्व
निभिरलंतेनीरदमपिमासिकोगर्भः॥ उन्मदवारणबुध्यामध्ये

जठरंसमुत्पतति।।१४।।इतिशा॰प॰तेजस्वीप्रशंसापरिच्छेदः।।

अथवीरप्रशंसा

कोवीरस्यमनस्विनःस्वविषयःकोवाविदेशस्तथायंदेशंश्रयतेत
मेवकुरुतेबाहुप्रतापाऽर्जितं।।यद्दंष्ट्रानखलांगुलप्रहरणःसिं
होवनंगाहतेतस्मिन्नेवहतद्विपेंद्ररुधिरैस्तृष्णांछिनत्त्यात्मनः
।।१।।विनाप्यर्थैर्वीरःस्पृशतिबहुमानोन्नतिपदंसमायुक्तोप्यर्थैः
परिभवपदंयातिकृपणः।।स्वभावादुद्भूतांगुणसमुदयाऽवाप्ति
विषयांद्युतिंसैंहीकिंश्वाधृतकनकमालोऽपिलभते।।२।।एकेना
ऽपिहिशूरेणपदाऽऽक्रांतंमहीतलं।।क्रियतेभास्करस्येवस्फार
स्फुरिततेजसा।।३।।पल्लवतःकल्पतरोरेषविशेषःकरस्यतेवी
र।।भूषयतिकर्णमेकःपरस्तुकर्णंतिरस्कुरुते।।४।।इ॰वीरप्रशं॰

अथगुणप्रशंसा

गुणाःकुर्वंतिदूतत्वंदूरेपिवसतांसतां।।केतकीगंधमाघ्रायस्वयंग
च्छंतिषट्पदाः।।१।।गुणवज्जनसंसर्गात्यांतिसर्वेपिगौरवं
।।पुष्पमालाप्रसंगेनसूत्रंशिरसिधार्यते।।२।।गुणाःसर्वत्रपू
ज्यंतेपितृवंशोनिरर्थकः।।वसुदेवंपरित्यज्यवासुदेवंनमेज्ज
नः।।३।।नहिजन्मनिज्येष्ठत्वंज्येष्ठत्वंगुणउच्यते।।गुणाद्गुरु
त्वमायातिदधिदुग्धंघृतंयथा।।४।।गुणिनिगुणज्ञोरमतेनागु
णशीलस्यगुणिनिपरितोषः।।अलिरेतिवनात्पद्मंनदर्दुरस्त्वेक
वासेपि।।५।।नीरसान्यपिरोचंतेकार्पासस्यफलानिनः।।येषांगुण
मयंजन्मपरेषांगुह्यगुप्तये।।६।।गुणागुणज्ञेषुगुणीभवंतितेनि
र्गुणंप्राप्यभवंतिदोषाः।।सुस्वादुतोयाःप्रवहंतिनद्यःसमुद्रमा
साद्यभवंत्यपेयाः।।७।।गुणिनंजनमालोक्यनिजबंधनशंकया
।।राज्यलक्ष्मीःकुरंगीवदूरंदूरंपलायते।।८।।गुणैःसर्वज्ञकं
ल्पोपिसीदत्येकोनिराश्रयः।।अनर्घ्यमपिमाणिक्यंहेमाश्रय
मपेक्षते।।९।।गुणेषुक्रियतांयत्नःआटोपैःकिंप्रयोजनं।।विं
क्रीयंतेनघंटाभिर्गावःक्षीरविवर्जिताः।।१०।।गुणैर्गौरवमाया

तिनमहत्यपिसंपदा॥पूर्णेंदुर्नतथावंद्योनिष्कलंकोयथाकृशः
॥११॥ नसौख्यसौभाग्यकरागुणानृणांस्वयंगृहीताःसुदृशां
स्तनाइव॥परैर्गृहीताद्वितयंवितन्वतेनतेनगृह्णंतिनिजंगुणंबु
धाः॥१२॥ कौशेयंकृमिजंसुवर्णमुपलादिंदीवरंगोमयात् पंका
त्तामरसंशशांकउदधेर्गोपित्तगोरोचनं॥काष्ठादग्निरहेःफणा
दपिमणिर्गोपित्ततोरोचनाप्राकाश्यंस्वगुणोदयेनगुणिनोयास्यं
तिकिंजन्मना॥१३॥ केषामप्येते॥एकमेवगुणंप्राप्यनम्रता॰
मगमद्धनुः॥तवाशेषगुणाराज्ञस्तब्धतेतिसुविस्मयः॥१४॥स्व
यंगुणपरित्यागादूर्णनाभःपतत्यधः॥तमेवसंहरन्भूयःपद
मुच्चैर्विगाहते॥१५॥गुणैरुत्तुंगतांयातिनोच्चैरासनसंस्थितः॥
प्रासादशिखरस्थोपिकाकःकिंगरुडायते॥१६॥ भर्तृहरेः॥ गु॰
णवंतःक्लिश्यंतेप्रायेणभवंतिनिर्गुणःसुखिनः॥बंधनमायांतिशु
कायथेष्टसंचारिणःकाकाः॥१७॥गुणोदूषणतांयातिगुणानांदू
षणंक्वचित्॥तथापिनम्रतांदोषःस्तनयोस्तब्धतागुणाः॥१८॥
अहोवैचित्र्यमेत स्यसंसारस्यकिमुच्यते॥गुणोपिक्लेशहेतुः
स्याद्विश्रांतःकंठकंदले॥१९॥ अनवसरेगुणवानपिहृदयाद
वतार्यतेहारः॥ पश्यशलाकावसरेतृणेपिभूपैःप्रसार्यतेस्व
करः॥२०॥केषामप्येते॥जात्युत्कृष्टस्यहिमणेर्नोचितंशाणघ
र्षणं॥आदर्शेचित्रकारैःकिंलिख्यतेप्रतिबिंबितं॥२१॥यदि
संतिगुणाःपुंसांविकसंत्येवतेस्वयं॥नहिकस्तूरिकामोदःशप
थेननिवार्यते॥२२॥गुणयुक्तोप्यधोयातिरिक्तःकूपेयथाघटः॥
निर्गुणोपिभृतःपश्यजनैःशिरसिधार्यते॥२३॥गुणिनोऽपिहि॰
सीदंतिगुणग्राहीनचेदिह॥सगुणःपूर्णकुंभोपिकूपएवनिमज्ज
ति॥२४॥गुणाकर्षणयोग्योधनुषइवैकोपिलक्षलाभाय॥लूता
जंतुभिरिवकिंगुणैर्विमर्दीसहैर्बहुभिः॥२५॥कलावतःसैवकला
यथाधःक्रियतेभवः॥किंतातिरिहवन्हीभिर्योभिरंकःप्रदर्श्यते
॥३॥ अत्यद्यापिचतुःसमुद्रपरिखापर्यंतमुर्वीतलंतस्मिन्नेवकसं

तिसूक्तिरसिकाःकेचित्क्वचिद्भूभुजः॥एकःकोपिनिरादरोयदि
भवेदन्योभवेत्सादरोवाग्देवीवदनांबुजेवसतिचेत्कोनामदीनोज
नः॥२७॥विद्याचेदस्तिकाचिंतावराकोदरपूरणे॥शुकोप्यश
नमाप्नोतिरामरामेतिसंब्रुवन्॥२८॥विद्येहृद्यनरासिकिंनु
कृपणंसंभावनैर्लज्जसेसंत्यन्येतवतोषणेहितधियोधन्याव
दान्याभुवि॥कांतानांकुचकुंभकौशलरुचांनोह्लानिरेतावता
षंढानांहृदयेपिपत्त्रणयतेर्नानंगरागोदयः॥२९॥ ॥इतिश्री
शार्ङ्गधरविरचितायांपद्धत्यांगुणप्रशंसापरिच्छेदः॥ ७ ॥ ७ ॥

अथसंतोषप्रशंसा

अकृत्वापरसंतापमकृत्वाखलनम्रतां॥अनुत्सृज्यसतांवर्त्मय
त्स्वल्पमपितद्बहु॥१॥व्यासस्य॥वयमिहपरितुष्टावल्कलै
स्त्वंचलक्ष्म्यासमइहपरितोषोनिर्विशेषोविशेषः॥सहिभवति
दरिद्रोयस्यतृष्णाविशालामनसिचपरितुष्टेकोऽर्थवान्कोदरि
द्रः॥२॥भर्तृहरेः॥दरिद्रस्यपरामूर्त्तिस्तृष्णानद्रविणाल्पता॥ज
रद्गवधनःशंभुस्तथाऽपिपरमेश्वरः॥३॥विष्णुशर्मणः॥संतोषामृ
ततृप्तानांयत्सुखंशांतचेतसां॥कुतस्तद्धनलुब्धानामितश्चे
तश्चधावतां॥४॥आगमिष्यंतियेभावायेभावामयिभावितां॥
अहंतैरनुगंतव्योनतेषामन्यतोगतिः॥५॥योमेगर्भगतस्याऽपि
वृत्तिंकल्पितवान्विभुः॥शेषवृत्तिविधानायसकिंसुप्तोऽथवा
मृतः॥६॥अप्रार्थितानिदुःखानियथैवाऽऽयांतिदेहिनां॥सुखा
न्यपितथाऽऽयांतिदैन्यमत्रातिरिच्यते॥७॥पंचमेहनिषष्ठेवा
शाकंपचतिस्वेगृहे॥अनृणीचाऽप्रवासीचसवारिचरमोदते॥
॥८॥आत्माऽऽधीनशरीराणांस्वपतांनिद्रयास्वया॥कदन्नमपि
मर्त्यानाममृतत्वायकल्पते॥९॥सर्वत्रसंपदस्तस्यसंतुष्टंयस्य
मानसं॥उपानद्गूढपादस्यननुचर्मावृतैवभूः॥१०॥व्यासस्य॥
आरोग्यंविद्वत्तासज्जनमैत्रीमहाकुलेजन्म॥स्वाधीनताचपुं
सांमहदैश्वर्यंविनाप्यर्थैः॥११॥सर्पाःपिबंतिपवनंनचदुर्बला

स्तेशुष्कैस्तृणैर्वनगजाबलिनोभवंति॥कंदैःफलैर्मुनिवराःक्षपयंतिकालंसंतोषएवपुरुषस्यपरंनिधानं॥१२॥ अर्थीकरोतिदैन्यंलब्धाऽर्थोगर्वपरितोषं॥नष्टधनश्चसशोकःसुखमास्तेनिःस्पृहःपुरुषः॥१३॥ तन्मूलंगुरुतायास्तत्सौख्यंतद्यशस्तदोर्जित्वं॥ तत्सौभाग्यंपुंसांयदेतदप्रार्थनंनाम॥१४॥ चीराणिकिंपथिनसंतिदिशंतिभिक्षांनैवांघ्रिपाःफलभृतःसरितोप्यशुष्यन्॥रुद्धागुहाःकिमतितोऽवतिनोपपन्नांकस्माद्भजंतिकवयोधनदुर्मदांधान्॥१५॥ केषामप्येते॥वृ॰शा॰प॰संतोषप्र॰

अथमित्रं

यस्यमित्रेणसंभाषायस्यमित्रेणसंस्थितिः।मित्रेणसहयोभुंक्तेनतोनास्तीहपुण्यवान्॥१॥परोक्षेकार्यहंतारंप्रत्यक्षेप्रियवादिनं॥वर्जयेत्तादृशंमित्रंविषकुंभंपयोमुखं॥२॥शुचित्वंत्यागिताशौर्यंसामान्यसुखदुःखयोः॥दाक्षिण्यंचानुरक्तिश्चसत्यताचसुहृद्गुणाः॥३॥रहस्यभेदोयाच्ञाचनैष्ठुर्यंचलचित्तता॥क्रोधेनिःसत्यताद्यूतमेतन्मित्रस्यदूषणं॥४॥ अन्यथैवहिसौहार्दंभवेत्स्वच्छांतरात्मनः॥प्रवर्ततेऽन्यथावाणीशाठ्योपहतचेतसः॥५॥तत्रमित्रनवस्तव्यंयत्रनाऽस्तिचतुष्टयं॥ऋणदाताचवैद्यश्चश्रोत्रियःसजलानदी॥६॥स्वाभाविकंतुयन्मित्रंभाग्येनैवाऽभिजायते॥तदकृत्रिमसौहार्दमापत्स्वपिनमुंचति॥७॥नमातरिनदारेषुनसोदर्येनचाऽऽत्मनि॥विश्वासस्तादृशःपुंसांयावन्मित्रेस्वभावजे॥८॥शोकाऽऽरातिभयत्राणंप्रीतिविश्रंभभाजनं॥ केनरत्नमिदंसृष्टंमित्रमित्यक्षरद्वयं॥९॥मित्रंप्रीतिरसायनंनयनयोरानंदनंचेतसःपात्रंयत्सुखदुःखयोःसहभवेन्मित्रेणतद्दुर्लभं॥येचाऽन्येसुहृदःसमृद्धिसमयेद्रव्याभिलाषाऽऽकुलास्तेसर्वत्रमिलंतितत्वनिकषग्रावातुतेषांविपत्॥१०॥क्षीरेणाऽऽत्मगतोदकायहिगुणादत्ताःपुरातेऽखिलाःक्षीरेतापमवेक्ष्यतेनपयसास्वात्माकृशानौहुतः॥गं

तुंपावकमुन्मनस्तदभ वद्दृष्ट्वातुमित्राऽपदंयुक्तेतेनजलेन
शाम्यतिसतांमैत्रीपुनस्त्वीदृशी॥११॥उदयन्नेवसवितापद्मे
ष्वर्पयतिश्रियं॥विभावयन्समृद्धीनांफलंसुहृदनुग्रहं॥१२॥
नहिबुद्धिगुणेनैवसुहृदामर्थदर्शनं॥कार्यसिद्धिपथःसूक्ष्मःस्ने
हेनाऽप्युपलभ्यते॥१३॥ ॥इतिमित्रम्॥ * ॥ * ॥ *॥

अथसंसर्गप्रशंसा

महानुभावसंसर्गःकस्यनोन्नतिकारकः॥रथ्यांबुजाह्नवीसंगा
त्त्रिदशैरपिवंद्यते॥१॥एकेकेचिद्यतिकरगताःपात्रसंज्ञांलभंते
गायंत्यन्येसरसमधुरंवीणयासंप्रयुक्ताः॥एकेतेषांसहगतिव
शादुस्तरंतारयंतिकेचित्तेषांज्वलितहृदयारक्तमेवंपिबंति॥२॥
एतौविष्णुशर्मणः॥शाखोटकैश्चंदनसंगतोपिवक्षोजयोःक्रीडि
तमायताक्षाः॥पयोपिमद्यंश्वपचेहिमन्यतेसंसर्गजादोषगुणा
भवंति॥३॥पुरुषोत्तमसोमात्मजस्य॥द्रवत्वात्सर्वलोहानांमम
त्वान्मृगपक्षिणां॥भयाल्लोभाच्च मूर्खाणांदर्शनात्संगतंसतां॥
॥४॥विकृतिंनैवगच्छंतिसंगदोषेणसाधवः॥आवेष्टितेमहास
र्पैश्चंदनंनविषायते॥५॥नस्थातव्यंनगंतव्यंक्षणमप्यधमैः
सह॥पयोपिशौंडिनीहस्तेमदिरांमन्यतेजनः॥६॥वीणावंशाश्र
यातुंबीतुंबस्तुच्चैःकुचौस्त्रियः॥पिबत्यनार्यसंयोगाद्रक्तंनक्तं
चरोयथा॥७॥किंचिदाश्रयसंयोगाद्धत्तेशोभामसाधपि॥कांता
विलोचनेन्यस्तंमलीमसमिवांजनं॥८॥आश्रयवशेनसततं
गुरुतालघुताचजायतेपुंसां॥विंध्येविंध्यसमानाःकरिणोबत
दर्पणेलघवः॥९॥संसर्गोद्भवतिहिसाधुताखलानांसाधूनांनच
खलसंगमात्खलत्वं॥आमोदंकुसुमभवंमृदेवधत्तेमृद्गंधंनच
कुसुमानिधारयंति॥१०॥नसाधुःक्वापिव्रजतिखलदोषंनगु
णताखलानांसंसर्गैरपिकृतनिवासोपिनिपुणः॥यथापक्षिव्या
लैरपिहिततनुश्चंदनतरुर्नवैरूल्यंयातिक्षपयतिचतापंसुमन
सां॥११॥असाधुःसाधुर्वाभवतिखलुजात्यैवपुरुषोनसंगाद्दौ

र्जन्यंनहिसुजनताकस्यचिदपि॥समानेसंसर्गेमणिभुजगयो
र्जन्मजनितेमणिर्नाहेर्दोषान्स्पृशतिनतुसर्पोमणिगुणान्॥१२
केषामप्येते॥संतप्तायसिसंस्थितस्यपयसोनामापिनज्ञायते
मुक्ताकारतयातदेवनलिनीपत्रस्थितंराजते॥स्वात्यांसागरम
ध्यशुक्तिपतितंतज्जायतेमौक्तिकंप्रायेणाधममध्यमोत्तमगुणाः
संसर्गतोजायते॥१३॥अश्वःशस्त्रंशास्त्रंवीणावाणीनरश्चना
रीच॥पुरुषविशेषंप्राप्यभवंतियोग्याअयोग्याश्च॥१४॥आसी
त्पूर्वंविमलजलधेर्मंडनंभूपतीनांनारीणांचप्रबलमुकुटेकांच
नेनप्रसंगं॥तंत्रीबल्लीकथमिहमहोकाचखंडेनसार्द्धंभिल्ली
कंठेमरकतमणेकामवस्थांगतोसि॥१५॥एतेविष्णुशर्मणः॥
जाड्यंधियोहरतिसिंचतिवाचिसत्यंमानोन्नतिंदिशतिपापमपा
करोति॥चेतःप्रसादयतिदिक्षुतनोतिकीर्त्तिंसत्संगतिःकथय
किंनकरोतिपुंसां॥१६॥असज्जनःसज्जनसंगिसंगात्करोतिदुः
साध्यमपीहसाध्यं॥पुष्पाश्रयाच्छंभुशिरोऽधिरूढापिपीलिकाचुं
बतिचंद्रबिंबं॥१७॥वंशभवोगुणवानपिसंगविशेषेणपूज्यतेपु
रुषः॥नहितूंबीफलविकलोवीणादंडःप्रयातिमहिमानं॥१८॥
गंगेवाऽघविनाशिनीजनमनःसंतोषसच्चंद्रिकातीक्ष्णांशोरपि
सत्प्रभेवजगदज्ञानांऽधकाराऽपहा॥छायेवाऽखिलतापनाश
नकरीस्वर्धेनुवत्कामदापुण्यैरेवहिलभ्यतेसुकृतिभिःसत्सं
गतिर्दुर्लभा॥१९॥काचःकांचनसंसर्गाद्धत्तेमारकतीद्युतीः
॥तथासत्सन्निधानेनमूर्खोयातिप्रवीणतां॥२०॥कीटोऽपिसु
मनःसंगादारोहतिसतांशिरः॥अश्माऽपियातिदेवत्वंमहद्भिः
सुप्रतिष्ठितः॥२१॥कल्पद्रुमःकल्पितमेवसूतेसाकामधुक्का
मितमेवदोग्धि॥चिंतामणिश्चिंतितमेवदत्तेसतांहिसंगःसक
लंप्रसूते॥२२॥यथोदयगिरोद्रव्यंसन्निकर्षेणदीप्यते॥तथा
सत्सन्निधानेनहीनवर्णोऽपिदीप्यते॥८॥गवाशनानांसशृणो
तिवाक्यमहंहिराजन्पठितंमुनीनां॥नतस्यदोषोनचमद्गुणोवा

संसर्गजादोषगुणाभवंति॥२४॥महाजनस्यसंसर्गःकस्यनोन्न
तिकारकः॥पद्मपत्रस्थितंवारिधत्तेमुक्ताफलश्रियं॥२५॥किंवाप
रेणवहुनापरिजल्पितेनसंसर्गएवमहतांमहतेफलाय॥अंभो
निधेस्तटरुहास्तरवोपियेनवेलाजलोच्छलितरलहतालवालं
॥२६॥कीर्त्तिर्नृत्यतिनर्तकीवभुवनेविद्योततेसाधुताज्योत्स्नेवप्र
तिभासभासुसरसागंगेवसंमीलति॥चित्तंरंजयतिप्रियेवसततं
संपत्प्रसादोचितासंगत्यान्नभवेत्सतांकिलभवेत्किंकिंनस्तोकोत्त
रं॥२७॥बुद्धिंवर्धयतिश्रियंवितनुतेवैदग्ध्यमामुंचतिश्रेयःपल्ल
वयत्यघानिदलयत्युन्मीलयत्युन्नतिं॥विज्ञानंपरिशोधयत्यु
पचिनोत्युच्चैःकलाकौशलंकिंकिंनारभतेहरेरिवकथाजर्यैसतां
संगतं॥२८॥गुणैःसर्वज्ञकल्पोपिसीदत्येकोनिराश्रयः॥अनर्घ्यं
मपिमाणिक्यंहेमाश्रयमपेक्षते॥२९॥इतिशा॰प॰संसर्गप्रशंसाप॰

अथअसत्संगतिः

अंतर्मलिनसंसर्गात्श्रुतवानपिदुष्यति॥यच्चक्रसंन्निकर्षेणक
र्णोभूत्कुटिलाशयः॥१॥संगतिंस्वविपरीतगुणैस्त्वंमाकृथाःख
लुसर्वविसमयेस्मिन्॥पश्यपूर्वमपिकृष्णरूपनामार्जुनोपिसम
वायनिश्चितम्॥२॥ ॥इतिअसत्संगतिः॥ छ ॥ छ॥ छ ॥

अथासच्छास्त्रं

साधव्याकरणंहिनायविशदंकाव्यंपिकीगीतवत्मीमांसाश्रुति
तत्परातदनुगंसांख्यंसयातंजरे॥त्वंतुन्यायविशुद्धवैदिकविधि॰
व्याकोपबौद्धागमव्याघातायनिगूढतर्कग्रहणकामोदमाधास्यसि॥१॥

अथलक्ष्मीस्वभावः

लक्ष्मिक्षमस्ववचनीयमिदंदुरुक्तमंधीभवंतिपुरुषास्त्वदुपासने
न॥नोचेत्कथंकमलपत्रविशालनेत्रोनारायणःस्वपितिपन्नगभो
गतल्पे॥१॥हेलक्ष्मिक्षणिकेस्वभावचपलेमूढेचपापेऽधमे॰
नत्वंचोत्तमपात्रमिच्छसिखलेप्रायेणदुश्चारिणि॥येदेवार्चनस
त्यशौचनिरतायेचाऽपिधर्मेरतास्तेभ्योलज्जसिनिर्दयेगतमति॰

नीचोजनोवल्लभः॥२॥शूरंत्यजामिवैधव्यादुदारंलज्जयापुनः॥
सापत्न्यात्पंडितमपितस्मात्कृपणमाश्रये॥३॥येवदंतिचपलेत्यप
वादंनैवदूषणमिदंकमलायाः॥दूषणंजलनिधेर्हिभवेत्तद्यत्पुराण
पुरुषायददौतां॥४॥गुणिनंजनमालोक्यनिजबंधनशंकया॥रा
जन्लक्ष्मीःकुरंगीवदूरंदूरंपलायते॥५॥पद्मेमूढजनेददासिद्र
विणंविद्वत्सुकिंमत्सरोनाऽहंमत्सरिणी नचाऽपिचपलानैवाऽस्ति
मूर्खेरतिः॥मूर्खेभ्योद्रविणंददामिनितरांतत्कारणंश्रूयतांविद्वान्
सर्वजनेषुपूजिततनुर्मूर्खस्यनाऽन्यागतिः॥६॥रत्नाकरस्तवपिता
कमलेनिवासोभ्रातासुधामयतनुःपतिरादिदेवः॥केनाऽपरेणक
मलेबतशिक्षितानिसारंगभृंगकुटिलानिविचेष्टितानि॥७॥उत्सा
हसंपन्नमदीर्घसूत्रंक्रियाविधिज्ञंव्यसनेष्वसक्तं॥शूरंकृतज्ञंदृढ
सौहृदंचलक्ष्मीःस्वयंयातिनिवासहेतोः॥८॥अव्यवसायिनम
लसंदैवपरंसाहसाच्चपरिहीनं॥प्रमदापतिमिववृद्धंनेच्छतिल
क्ष्मीरुपस्थातुं॥९॥आलस्यंस्त्रीसेवासरोगताजन्मभूमिवात्स
ल्यं॥संतोषोभीरुत्वंषड्व्याघातामहत्त्वस्य॥१०॥मातर्लक्ष्मिभज
स्वकंचिदपरंमत्कांक्षिणीमास्मभूर्भोगेभ्यःस्पृहयालवोनहिवयं
कानिस्पृहाणामसि॥सद्यःस्यूतपलाशपत्रपुटकेपात्रेपवित्रीकृते
भिक्षासक्तुभिरेवसंप्रतिवयंवृत्तिंसमीहामहे॥११॥लक्ष्मीर्यादो
निधेर्यादोनाऽदोवादोचितंवचः॥विभेतियाधीवरेभ्योजडेष्वेवनि
मज्जति॥१२॥हालाहलोनैवविषंविषंरमाजनाःपरंव्यत्ययमत्रम
न्वते॥निपीयजागर्तिसुखेनतंशिवःस्पृशन्निमांमुह्यतिनिद्रयाह
रिः॥१३॥हंतुर्बंधुजनान्धनार्थमनघान्गंतुःपरस्त्रीशतंरंतुर्जंतु
विहिंसकैःसहजनैःसंतुष्यतोवंचनैः॥वक्तुस्त्रीष्णमयुक्तमेववच
नंपक्तुर्मितंचौदनंनित्यंनृत्यसिमंदिरेषुकमलेकस्यंतवैतन्मतं॥
॥१४॥पीतोगऽस्त्येनतातश्चरणतलहतोवल्लभोऽन्येनरोषादाबाल्या
द्विप्रवर्यैःस्ववदनविवरेधारितावैरिणीमे॥गेहंमेछेदयंतिप्रतिदिवस
मुमाकांतपूजानिमित्तंतस्मात्खिन्नासदाहंद्विजकुलसदनंनाथनित्यं

त्यजामि॥१५॥यत्राऽभ्यागतदानमानचरणप्रक्षालनंभोजनंसत्सेवाऽपितृदेवताऽर्चनविधिःसत्यंगवांपालनं॥धान्यानामपिसंग्रहोनकलहश्चित्ताऽनुरूपाप्रियाहृष्टाप्राहहरिंवसामिकमलातस्मिन्गृहेनिश्चला॥१६॥येषामन्यकलत्रदर्शनकलाव्युत्पत्तिशून्येदृशौमूढंहृच्चपरार्थचिंतनविधौमिथ्यानभिज्ञंमुखं॥अप्रज्ञातपशून्बुभुक्षितशिशूनप्रोदकैस्ताम्यतस्तेषांलक्ष्मिगृहान्दृशाऽपिभयभीतेवेहनोवीक्षसे॥१७॥कुटिलालक्ष्मीर्यत्रप्रभवतिनसरस्वतीवसतितत्र॥प्रायःश्वश्रुस्नुषयोर्नदृश्यतेसौहृदंलोके॥१८॥यास्वसद्मनिपद्मेऽपिसंध्यावधिविजृंभते॥इंदिरामंदिरेऽन्येषांकथंस्थास्यतिनिश्चला॥१९॥तिर्यक्त्वंभजतुप्रतारयतुवाधर्मक्रियाकोविदंहंतुस्वांजननींपिबत्वपिसुरांशुभ्रांवधूमुज्झतु॥वेदान्निंदतुवाहिनःस्तुजतांकिंवानयाचिंतयालक्ष्मीर्यस्यगृहेसएवभजतिप्रायोजगद्वंद्यतां॥२०॥आलस्यंस्थिरतामुपैतिभजतेचापल्यमुद्योगितांमूकत्वंमितभाषितांवितनुतेमौग्ध्यंभवेदार्जवं॥पात्रापात्रविचारणाविरहितायच्छत्युदारात्मतांमातर्लक्ष्मितवप्रसादवशतोदोषाअमीस्युर्गुणाः॥२१॥श्वश्रुविनावृत्तिरिहस्वतंत्राप्रायःस्नुषाणामपवादहेतुः॥यद्वाणिलोकेरमयाविहीनांसतीमपित्वामसतींवदंति॥२२॥श्रीपरिचयाज्जडाअपिभवंत्यभिज्ञाविदग्धचरितानां॥उपदिशतिकामिनीनांयौवनमदएवललितानि॥२३॥इतिलक्ष्मीप्रशंसा॥॥

अथधनप्रशंसा

जातिर्यातुरसातलंगुणगणास्तस्याप्यधोगच्छतांशीलंशैलतटात्पतत्वभिजनःसंदह्यतांवह्निना॥शौर्येवैरिणिवज्रमाशुनिपतत्वर्थोऽस्तुनःकेवलंयेनैकेनविनागुणास्तृणलवप्रायासमस्ताइमे॥१॥यस्यास्तिवित्तंसनरःकुलीनःसपंडितःसश्रुतवान्गुणज्ञः॥सएववक्तासचदर्शनीयःसर्वेगुणाःकांचनमाश्रयंति॥२॥एतौभर्तृहरेः॥वयोवृद्धास्तपोवृद्धायेचवृद्धाबहुश्रुताः॥सर्वेते

धनवृद्धानांद्वारितिष्ठंतिकिंकराः॥३॥बाणभट्टस्य॥हेतुःप्रमाण
युक्तंवाक्यंनश्रूयतेदरिद्रस्य॥अप्यतिपरुषमसत्यंपूज्यंवाक्यं
समृद्धस्य॥४॥क्षेमेंद्रस्य॥अर्थार्थीजीवलोकोयंश्मशानमपि-
सेवते॥जनेतारमपित्यक्त्वानिस्वंगच्छंतिदूरतः॥५॥नसावि
द्यानतच्छीलंनदानंनचसाकला॥अर्थार्थिभिर्नतच्छौर्यंधनिनां
यत्नकीर्त्यते॥६॥यथामिषंजलेमत्स्यैर्भक्ष्यतेश्वापदैर्भुवि॥आ
काशेपक्षिभिश्चैवतथासर्वत्रवित्तवान्॥७॥नवित्तंदर्शयेत्प्राज्ञः
कस्यचित्स्वल्पमप्यहो॥मुनेरपियतस्तस्यदर्शनाच्चलतेमनः॥
८॥एतेविष्णुशर्मणः॥लक्ष्म्यापरिपूर्णोहंनभयंमेस्तीतिमोहनि
द्रैषा॥परिपूर्णस्यैवेंदोर्भवतिभयंसिंहिकासूनोः॥९॥भक्तद्वेषो
जडेप्रीतिःसुरुचिर्गुणलंघने॥मुखेकटुकतानूनंधनिनांज्वरि
णामिव॥१०॥आलिंगिताःपरैर्यांतिप्रस्खलंतिसमेपथि॥अ-
व्यक्तानिचभाषंतेधनिनोमद्यपाइव॥११॥पतंतिखड्गधारासु
विशंतिमकरालयं॥किंनकुर्वंतिस्कभगेकष्टमर्थार्थिनोनराः॥
॥१२॥गुणयुक्तोप्यधोयातिरिक्तःकूपेघटोयथा॥निर्गुणोपिभृतः
पश्यजनैःशिरसिधार्यते॥१३॥धननिंदा ॥वरंहालाहलंपीतं
सद्यःप्राणहरंविषं॥नदृष्टव्यंधनाढ्यस्यभ्रूभंगकुटिलंमुखं॥१४
वाक्चक्षुःश्रोत्रलयं लक्ष्मीःकुरुतेनरस्यकोदोषः॥गरलसहो-
दरजातानमारयतियच्चतच्चित्रं॥१५॥लक्ष्मीवंतोनजानंतिप्रा
येणपरवेदनां॥शेषेधराभरक्रांतेशेतेनारायणःसुखं॥१६॥य
स्यार्थास्तस्यमित्राणियस्यार्थास्तस्यबांधवाः॥यस्यार्थःसपुमां
ल्लोकेयस्यार्थःसचपंडितः॥१७॥धिगस्त्वेतांविद्यांधिगपिकवितां
धिक्सुजनतांवयोरूपंधिक्धिक्धिगपिचयशोनिर्धनवतः॥अ
सौजीयादेकःसकलगुणहीनोऽपिधनवान्बहिर्यस्यद्वारेतृणल
वनिभाःसंतिगुणिनः॥१८॥धनमर्जय काकुत्स्थधनमूलमि-
दंजगत्॥अंतरंनैवपश्यामिनिर्धनस्यमृतस्यच॥१९॥ब्रह्मघ्नोऽपिन
रःपूज्योयस्याऽ स्तिविपुलंधनं॥शशिनातुल्यवंशोऽपिनिर्धनः

परिहीयते॥२०॥विभवोहियथालोकेनशरीराणिदेहिनां॥चां
डालोऽपिनरःपूज्योयस्याऽस्तिविपुलंधनं॥२१॥ नविद्ययानैव
कुलेनगौरवंजनाऽनुरागोधनिकेषुसर्वदा॥कपालिनामौलिधृ
ताऽपिजान्हवीप्रयातिरत्नाऽऽकरमेवसत्वरं॥२२॥त्यजंतिमित्रा
णिधनैर्विहीनंपुत्राश्चदाराश्चसुहृज्जनाश्च॥ तमर्थवंतंपुनरा
श्रयंतिह्यर्थोहिलोकेपुरुषस्यबंधुः॥२३॥ प्रायेणधनिनामेवध
नलोभोनिरंतरं॥ यच्चकोटिद्वयोपेतंलक्षंप्रार्थयतेधनुः॥२४॥कु
तआगत्यघटतेविघस्यक्वनुयातिच॥नलक्ष्यतेगतिःसम्यक्
घनस्यचधनस्यच॥२५॥वित्तार्थेयतसेभृशंपद्निशंशंसार्थे
मप्यात्मनोऽत्यर्थंतन्मममित्रतत्रभवतोनाऽऽस्यंतिकंस्यात्सुखं॥
गुर्वाराधनतत्परेणमनसाकुर्वात्मशंसाधनंकिंतस्मिन्नुपल
भ्यतेनहिधनंनोवाऽऽत्मनःशंसनं॥२६॥कुतःश्रियेत्वंयतसे
निकामंश्रीरामदासोभवमानवत्वं॥श्रीरामदासस्यपराङ्मु
खस्यसदानपायिन्युपतिष्ठतेश्रीः॥२७॥गंगांचधारयतिमूर्ध्नि
सदाकपालीसातस्यचुंबतिमुखंनकदाचिदेव॥रत्नाकरंप्रति
चुचुंबसहस्रवक्त्रैर्गंगादयोयुवतयःसधनानुकूलाः॥२८॥ता
नींद्रियाण्यविकलानिमनस्तदेवसाबुद्धिरप्रतिहतावचनंतदेव
॥अर्थोष्मणाविरहितःपुरुषःसएवह्यन्यःक्षणेनभवतीतिविचि
त्रमेतत्॥२९॥ अहोकनकमाहात्म्यंवक्तुंकेनाऽपिशक्यते॥
नामसाम्यादहोचित्रंधत्तूरोऽपिमदप्रदः॥३०॥वेधाद्वेधाभ्रमंच
कारकांतासुकनकेषुच॥तासुतेष्वप्यनासक्तःसाक्षाद्भर्गोनराकृ
तिः॥३१॥दायादाःस्पृहयंतितस्करगणामुष्णंतिभूमीभुजोदू
रेणच्छलमाकलय्यहुतभुग्भस्मीकरोति क्षणात्॥अंभःप्लाव
यतेक्षितौविनिहितंयक्षाहरंतिहठाद्दुर्वृत्तास्तनयानयंतिनिध
नंधिग्धिग्धनंतद्बहु॥३२॥वाणीदरिद्रस्यशुभाहिताऽपिह्यर्थे
नशब्देनचसंप्रयुक्ता॥नशोभतेवित्तवतःसमीपेभेरीनिनादो
पहतेववीणा॥३३॥पतंतिखड्गधारासुविशंतिमकरालयं॥

किंनकुर्वंतिसुभगेकष्टमर्थाऽर्थिनोजनाः॥३४॥बधिरयतिकर्ण
विवरंवाचंमूकयतिनयनमंधयति॥विकृतयतिगात्रयष्टिंसंपद्रो
गोऽयमद्भुतोराजन्॥३५॥दैववशादुत्पन्नेसतिविभवेयस्यनाऽ
स्तिभोगेच्छा॥नचपरलोकसमीहासभवतिधनपालकोमूर्खः
॥३६॥दुंदुभिस्तुसुतरामचेतनस्तन्मुखादपिधनंधनंधनं॥इ
त्थमेवनिनदःप्रवर्ततेकिंपुनर्यदिजनःसचेतनः॥३७॥अर्जु
नीयतियद्र्जनेजनोवर्जनीयजनतर्जनादिभिः॥मंक्षुनश्यति
चिरायसंचितंवंचिताजगतिकेनसंपदा॥३८॥आपद्गतंहसऽ
सिकिंद्रविणांधमूढलक्ष्मीस्थिरानभवतीतिकिमत्रचित्रं॥एता
न्प्रपश्यसिघटान्जलयंत्रचक्रेरिक्ताभवंतिभरिताभरिताश्चरिऽ
क्ताः॥३९॥लभेद्यदश्रुतंधनंतद्धनंधनंयद्यपिलभेतनिश्रुतंधनंनि
धनमेवतज्जायते॥तथाधनपराङ्मुखंतदपिभावहीनात्मकंयदक्ष
रपदद्वयांतरगतंधनंतद्धनं॥४०॥अनुभवतदत्तवित्तंमान्यान्मा
नयतसज्जनान्भजत॥अतिपरुषपवनविलुलितदीपशिखाचं
चलालक्ष्मीः॥४१॥एहिगच्छपतोत्तिष्ठवदमौनंसमाचर॥ए
वमाशाग्रहग्रस्तैःक्रीडंतिधनिनोर्थिभिः॥४२॥धनमर्जयका
कुत्स्थधनमूलमिदंजगत्॥अंतरंनैवपश्यामिनिर्धनस्यमृत
स्यच॥४३॥कोनामनानुवृत्तिंसमहानपिधनवतःकुरुते॥चि
त्तेशामवनभित्तेःसमीपमुपसेवतेशंभुः॥४४॥निरक्षरेवीक्ष्य
महाधनत्वंविद्यानवद्याविदुषानहेया॥रत्नावतंसांकुलटांस
मीक्ष्यकिमार्यनार्यःकुलटाभवंति॥४५॥रत्नाकरस्तवपिताक
मलेनिवासोभ्रातासुधामयवपुःपतिरादिदेवः॥केनापरेणक
मलेवतशिक्षितानिसारंगशृंगकुटिलानितवेक्षणानि॥४६॥ह
रिभामिनिसिंधुसंभवेकमलेकिंकथयामितेगुणान्॥अनुरज्य
सिहाजडेजनेगुणगौरेपुरुषेविरज्यसि॥४७॥कस्मैचित्कपटा
यकैटभरिपूरःपीठदीर्घालयांदेवित्वामभिवाद्यकुप्यसिनचेत्त
त्किंचिदाचक्ष्महे॥यत्तेमंदिरमंबुजन्मकिमिदंविद्यागृहंयच्च

तेनीचान्नीचतरोपसर्पणमपामेतत्किमाचार्यकं॥४८॥सुखय
तितरांनरस्सतिपरिचर्यलेशंगणांगनेवश्रीः।कुलकामिनीवनो
द्वसतिवाग्देवीजन्मजन्मापि॥४९॥अपिदोर्भ्यांपरिबद्धाबद्धा
पिगुणैरनेकधानिपुणैः॥निर्गच्छतिक्षणाद्विजलधिजलोस
त्तिपिच्छलालक्ष्मीः॥५०॥तीक्ष्णादुद्विजतेमृदोःपरिभवत्रा
सान्नसंतिष्ठतेमूर्खंद्वेष्टिनगच्छतिप्रणयितामत्यंतविद्वत्स्व
पि॥शूरेभ्योप्यधिकंबिभेत्युपहसत्येकांतभीरूनपिश्रीर्लब्धप्र
सरेववेशावनितादुःखोपचर्याभृशं॥५१॥लक्ष्मिक्षमस्ववच
नीयमिदंदुरुक्तमंधीभवंतिपुरुषास्तवसेवनेन॥नोचेत्क
थंकमलपत्रविशालनेत्रोनारायणःस्वपितिसाग र गर्भ
तल्पे॥५२॥लक्ष्मीर्यक्षेनिधेर्याद्वोनादोवाद्वोच्चितंवचः।बिभ्यतीधी
वरेभ्योयातलेष्वेवनिमज्जति॥५३॥समुद्रस्यापत्यंप्रथितम
हिमामुद्रितभुवःस्वसाप्रालेयांशोस्त्रिनयनशिरोधामवस
ते॥मुरारेर्योषित्त्वासरसिरुहकिंजल्कनिलयातथापिश्रीः
स्त्रीत्वात्प्रकृतिचपलालिंगतिखलान्॥५४॥इतिश्रीशार्ङ्ग
धरविरचितायांपद्धत्यांधनप्रशंसापरिच्छेदः॥ छ ॥ छ ॥

अथदुर्जननिंदा

खलःसर्षपमात्राणिपरच्छिद्राणिपश्यति॥आत्मनोबिल्वमात्रा
णिपश्यन्नपिनपश्यति॥१॥नविनापरवादेनरमतेदुर्जनोनरः॥
काकःसर्वरसान्भुंक्तेविनामेध्यंनतृप्यति॥२॥एतौव्यासस्य॥
परितोषयितानकश्चनस्वगतोयस्यगुणोस्तिदेहिनः॥परदोष
कथाभिजल्पकःस्वजनंतोषयितुंकिलेच्छति॥३॥सहजांधदृ
शःस्वदुर्नयेपरदोषेक्षणदिव्यचक्षुषः॥स्वगुणोच्चगिरोमुनि
व्रताःपरवर्णग्रहणेष्वसाधवः॥४॥एतौमाघकवेः॥विषधरतो
प्यतिविषमःखलइतिनमृषावदंतिविद्वांसः॥यदहिर्नकुलद्वे
षीस्वकुलद्वेषीपुनःपिशुनः॥५॥अतिमलिनेकर्तव्येभवति
खलानामतीवनिपुणाधीः॥तिमिरेहिकौशिकानांरूपंप्रति

पद्यवेदृष्टिः॥६॥एतौस्कबंधोः॥लब्धोच्छ्रायोनीचःप्रथममेव
स्वामिनंपराभवति॥भूमिरजोरथ्यादात्तुत्थापक्ष्मेवसंवृणुते॥
७॥रविगुप्तस्य॥उपकृतमनेनस्कृतरामिस्यसतामस्तिनकश्चि
दपेक्षा॥हेतुःस्वहस्तमाश्रितमुद्भूतोग्निर्दहत्येव॥८॥विषमा
मलिनात्मानोहिजिव्हाजिह्मगाइव॥जगत्प्राणहरानित्यंकस्य
नोद्वेजकाःखलाः॥९॥हरिगणस्य॥दुर्जनःपरिहर्तव्योविद्य
यालंकृतोयदि॥मणिनाभूषितःसर्पःकिमसौनभयंकरः॥१०
॥चाणाक्यस्य॥परिशुद्धामपिवृत्तिंसमाश्रितोदुर्जनःपरान्व्य
थते॥पवनाशिनोपिभुजगाःपरोपतापंनमुंचंति॥११॥नीचः
समाश्रितोवश्यमनवाप्यपराश्रयं॥छिद्रंयत्रमवाप्नोतिदृष्टां
तोत्रकटीभवः॥१२॥खलानांकंटकानांचद्विविधैवप्रतिक्रि
या॥उपानन्मुखभंगोवादूरतोवाविसर्जनं॥१३॥सुमुखोपिसु
वृत्तोपिसन्मार्गपतितोपसन्॥सतांवैपादलग्नोपिव्यथयत्येवकं
टकः॥१४॥अपूर्वःकोपिकोपाग्निःसज्जनस्यखलस्यच॥एक
स्यशाम्यतिस्नेहात्वर्धतेन्यस्यवारितः॥१५॥निमित्तमुद्दि॰
श्यहियःप्रकुप्यतिध्रुवंसतस्यापगमेप्रसीदति॥अकारणद्वेषि
मनोस्तियस्यवैकथंजनस्तंपरितोषयिष्यति॥१६॥पादाहतो
पिदृढदंडसमाहतोपियंदंष्ट्रयास्पृशतितंकिलहंतिसर्पः॥
हर्षाद्विषपिशुनोत्रमनुष्यधर्माकर्णेपरंस्पृशतिहंत्यपर॰
स्यमूलं॥१७॥नोभ्रदुर्जनजिव्हाचप्रतिकूलविसर्पिणी॥प
रप्रतारणायैवदारुणाकेननिर्मिता॥१८॥यस्मिन्वंशेसमु
त्पन्नस्तमेवनिजचेष्टितैः॥दूषयत्यचिरेणैवघुणकीटइवाध
मः॥१९॥प्रेरयतिपरमनार्यःशक्तिविहीनोपिजगदभिद्रोहे
॥तेजयतिशस्त्रधारांस्वयमसमर्थोशिलांच्छेत्तुं॥२०॥स्वभा
वकठिनस्यास्यकृत्रिमांबिभ्रतोनतिं॥गुणोपिपरहिंसायैचा
पस्यचखलस्यच॥२१॥अयःपिंडइवोतप्तेखलानांहृदयेक्ष
णात्॥पतिताएवनेष्यंतेगुणास्तोयकणाइव॥२२॥वर्जनी

योमतिमतादुर्जनःसख्यवैरयोः॥श्वाभवस्यपकारायलिहन्नपिदशान्नपि॥२३॥वक्रतांबिभ्रतोपस्यगुह्यमेवप्रकाशते॥कथंनचसमानस्यात्पुच्छेनपिशुनःशुनः॥२४॥शिरसिनिहितोपिनित्यंयत्नादपिसेवितोबहुस्नेहैः॥तरुणीकचइवनीचःकौटिल्यंनैवविजहाति॥२५॥पात्रमपात्रीकुरुतेदहतिगुणंस्नेहमाशुनाशयति॥अमलेमलंप्रयच्छतिदीपज्वालेवखलमैत्री॥२६॥स्नेहेनभूतदानेनकृतःस्वस्थोपिदुर्जनः॥दर्पणश्चांतिकेतिष्ठन्करोत्येकमपिद्विधा॥२७॥यथायथैवस्नेहेनभूयिष्ठमुपचर्यते॥धत्तेतथातथातापंमहावैश्वानरःखलः॥२८॥स्तोकेनोन्नतिमायातिस्तोकेनायात्यधोगतिं॥अहोनुसदृशीवृत्तिस्तुलाकोटेःखलस्यच॥२९॥नैवात्मनोविनाशंगणयतिपिशुनःपरव्यसनसंसक्तः॥प्राप्यसहस्रविनाशंसमरेनृत्यतिकबंधइव॥३०॥दह्यमानाःसुतीक्ष्णेननीचाःपरयशोग्निना॥अशक्तास्तत्पदंगंतुंततोनिंदांप्रकुर्वते॥३१॥खलःसत्क्रियमाणोपिददातिकलहंसतां॥दुग्धधौतोपिकिंयातिवायसःकलहंसतां॥३२॥केषामप्येते॥नविषममृतंकर्तुंशक्यंप्रयत्नशतैरपि॥त्यजतिकटुत्तांनस्वांनिंबःस्थितोपिपयोह्रदे॥३३॥गुणपरिचितामार्यांवाणींनजल्पतिदुर्जनः॥चिरमपिबलाध्मातेलोहेकुतःकनकाकृतिः॥३४॥भर्त्तृहरेः॥अहमेवगुरुःसुदारुणानामितिहालाहलमास्मताततदृप्यः॥ननुसंतिभवादृशानिभूयोभुवनेऽस्मिन्वचनानिदुर्जनानां॥॥३५॥अपूर्वरसनाव्यालाःखलाननबिलेशयाः॥कर्णमूलेऽस्पृशंत्यन्यंहरंत्यन्यस्यजीवितं॥३६॥नदुर्जनःसज्जनतामुपैतिबहुप्रकारैरपिसेव्यमानः॥भूयोऽपिसिक्तःपयसाघृतेननिंबवृक्षोमधुरत्वमेति॥३७॥पातोदुस्तरवारिराशितरणेदीपोऽधकारागमेनिर्वातेव्यजनंमदांधकरिणांदर्पोपशांतौसृणिः॥इत्थंतद्भुविनाऽस्तियस्यविधिनानोपायचिंताकृतामन्येदुर्जनचित्त

वृत्तिहरणेधाताऽपिभग्नोद्यमः॥३८॥कर्पूरधूलीरचिताऽलवालः
कस्तूरिकाकुंकुमलिप्तदेहः॥सुवर्णकुंभैःपरिषिच्यमानोनिजंगु
णंमुंचतिकिंपलांडुः॥३९॥सर्पःक्रूरःखलःक्रूरःसर्पात्क्रूरतरःख
लः॥मंत्रेणशाम्यतेसर्पोनखलःशाम्यतेकदा॥४०॥सर्वास्तुंब्यः
समकटुरसास्तुंबिवल्लीप्रसूतास्ताःसंबंधाअपिकतिपयादुस्तरं
तारयंति॥शब्दायंतेसरसमपराःशुष्ककाष्ठेनिषण्णास्तन्मध्येऽ
न्याज्वलितहृदयाःशोणितंसंवहंति॥४१॥धातस्ताततवैवदूषण
मिदंयन्नामकस्तूरिकाकांतारांतरचारिणांतृणभुजांयन्नाभिमूलेकृ
ता॥यद्येवंपिशुनस्यहंतरसनामूलेऽकरिष्यस्तदाआऽयासेनविना
ऽभविष्यदतुलाकीर्त्तिश्चनिर्दोषता॥४२॥कस्तूरिकांतृणभुजामट
वीचराणांनिक्षिप्यनाभिषुचकारचतान्वधार्हान्॥मूढोविधिःस
कलदुर्जनलोलजिह्वामूलेस्मनिक्षिपतिचेत्सकलोपकारः॥४३॥
तेवैसत्पुरुषाःपरार्थघटकाःस्वार्थंपरित्यज्ययेसामान्यास्तुपरोप
कारनिरताःस्वार्थाऽविरोधेनये॥तेऽमीमानुषराक्षसाःपरहितंस्वार्था
यनिघ्नंतियेयेतुघ्नंतिनिरर्थकंपरहितंतेकेनजानीमहे॥४४॥यत्रा
त्मीयोजनोनाऽस्तिभेदस्तत्रनविद्यते॥कुठारैर्दंडनिर्मुक्तैर्भिद्यंतेत
रवःकथं॥४५॥दुर्जनंप्रथमंवंदेसज्जनंतदनंतरं॥मुखप्रक्षालना
त्पूर्वंगुदप्रक्षालनंयथा॥४६॥दह्यमानाःसुतीक्ष्णेननीचाःपरय
शोऽग्निना॥अशक्तास्तत्पदंगंतुंततोनिंदांप्रकुर्वते॥४७॥दुर्जनदू
षितमनसांपुंसांसुजनेऽप्यविश्वासः॥बालःपायसदग्धोदध्यपि
फूत्कृत्यभक्षयति॥४८॥दुर्जनंसुजनंकर्तुंनोपकारशतैरपि॥अपा
नंमृत्सहस्रेणधौतंचास्यकथंभवेत्॥४९॥भग्नकुंभशकलेनवैम
लंबालकस्यजननीव्यपोहति॥तद्वदोष्ठवदनेनदुर्जनोमातृतः
शतगुणाऽधिकोभवेत्॥५०॥अप्यात्मनोविनाशंगणयतिनखलः
परव्यसनहृष्टः॥प्रायोमस्तकनाशेसमरमुखेनृत्यतिकबंधः॥५१
जलनिधौजननंधवलंवपुर्मुररिपोरपिपाणितलेस्थितिः॥इतिस
मस्तगुणान्वितशंखभोकुटिलताहृदयेननिवारिता॥५२॥दुर्ज

नस्यविशिष्टत्वंपरोपद्रवकारिणां॥व्याघ्रस्यचोपवासेनपारणंपशु
मारणं॥५३॥किंशुकेशुकमातिष्ठचिरकालफलेच्छया॥बाह्यरंगप्र
संगेनकेकेनाऽनेनवंचिताः॥५४॥रविरपिनदहतितादृक्यादृक्दहति
वालुकानिकरः॥अन्यस्माल्लब्धपदोनीचःप्रायेणदुःसहोभवति॥५
॥५५॥त्यक्त्वापिनिजप्राणान्परहितविघ्नंखलःकरोत्येव॥कवलेप
तितासद्योवमयतिमक्षिकाऽन्नभोक्तारं॥५६॥संत्यज्यशूर्पवद्दोषा
न्गुणान्गृण्हातिपंडितः॥दोषग्राहीगुणत्यागीपल्लोलीवहिदुर्जनः
॥५७॥नलिकागतमपिकुटिलंनभवतिसरलंशुनःपुच्छं॥तद्वत्ख
लजनहृदयंबोधितमपिनैवयातिमाधुर्यं॥५८॥भिक्षोकंथाश्ल
थातेनहिशफरिवधेजालमश्नासिमत्स्यांस्तेवैमद्योपदंशाःपिबसि
मधुसमंवेश्यययायासिवेश्यां॥दत्वाऽंघ्रिंमूर्ध्न्यरीणांतवकिमुरिप
वोभित्तिभेत्ताऽस्मियेषांचोरोऽस्मिद्यूतहेतोस्त्वयिसकलमिदंनास्ति
नष्टेविचारः॥५९॥विद्याविवादायधनंमदायशक्तिःपरेषांपरपीड
नाय॥खलस्यसाधोर्विपरीतमेतज्ज्ञानायदानायचरक्षणाय॥६०॥
सद्वंशजातंगुणकोटियुक्तंधनुःकथंपार्थिववामहस्ते॥शरःपरप्रा
णविहारदक्षःसपक्षपातोऽप्यधमोगरीयान्॥६१॥अकस्मादेवकु
प्यंतिप्रसीदंत्यनिमित्ततः॥शीलमेतदसाधूनामभ्रंपारिप्लवंयथा॥
॥६२॥संवर्धितोपिभुजगःपयसानवश्यस्तस्यालकानपिनिहंतिबले
नसिंहः॥दुष्टःपरैरुपकृतस्तदनिष्टकारीविश्वासलेशइहनैवबुधै
र्विधेयः॥६३॥अशक्ताःशक्तिमात्मीयांश्लाघयंतेचदुर्जनाः॥तेभ
वंत्युपहासायमहतामेवसन्निधौ॥६४॥एतेस्निग्धतमाइतिमामा
कृढेषुपातविश्वासं॥सिद्धार्थानामेषांस्नेहोप्यश्रूणिपातयति॥६५॥
गुणिनांगुणेषुसत्स्वपिपिशुनजनोदोषमात्रमादत्ते॥पुष्पेफलेविरा
गीक्रमेलकःकंटकौघमिव॥६६॥सज्जनानामपिहृदयंपिशुनप
रिष्वंगलिप्तमिहभवति॥पवनःपरागवाहीरथ्यासुवहन्रजस्वलो
भवति॥६७॥विद्ययाविमलयाऽप्यलंकृतोदुर्जनःसदसिमाऽस्तुक
श्चन॥साक्षराहिविपरीततांगताःकेवलंजगतितेऽपिराक्षसाः॥६८॥

अहोदुर्जनसंसर्गान्मानहानिःपदेपदे॥पावकोलोहसंगेनमुद्गरैरभि
हन्यते॥६९॥परिपूर्णेपिनटाकेकाकःकुंभोदकंपिवति॥अनुकूलेऽ
पिकलत्रेनीचःपरदारलंपटोभवति॥७०॥सर्वलोकपरितोषका
रिणिस्वर्धुनीविमलवारिणिस्थिते॥पूतिगंधवतिपल्वलोदकेसूक
रःसुखमतीवमन्यते॥७१॥उपकारिणिविश्रब्धेशुद्धमतौयःस
माचरतिपापं॥तंजनमसत्यसंधंभगवतिवसुधेकथंवहसि॥७२॥
दुर्जनेनसमंसख्यंप्रीतिंचापिनकारयेत्॥उष्णोदहतिचांऽगारः
शीतःकृष्णायतेकरं॥७३॥दुर्जनःप्रियवादीचनैतद्विश्वासकार
णं॥मधुतिष्ठतिजिव्हाऽग्रेहृदिहालाहलंविषं॥७४॥प्राकृपादयोःप
ततिखादतिपृष्ठमांसंकर्णेकलंकिमपिरौतिशनैर्विचित्रं॥छिद्रंनिरू
प्यसहसाप्रविशत्यशंकःसर्वंखलस्यचरितंमशकःकरोति॥७५॥
मृद्घटवत्सुखभेद्योदुःसंधानश्चदुर्जनोभवति॥सुजनस्तुकनक
घटवद्दुर्भेद्यश्चाशुसंधेयः॥७६॥नमस्यन्यद्वचस्यन्यत्कार्येचाऽ
न्यद्दुरात्मनां॥मनस्येकंवचस्येकंकर्मण्येकंमहात्मनां॥७७॥दू
रादुच्छ्रितपाणिरार्द्रनयनःप्रोत्साहिताऽर्धासनोगाढाऽऽलिंगनत
त्परःप्रियकथाप्रश्नेषुदत्ताऽऽदरः॥अंतर्भूतविषोबहिर्मधुमयश्चा
ऽतीवमायापटुःकोनामाऽयमपूर्वनाटकविधिर्यःशिक्षितोदुर्जनैः॥
॥७८॥अकरुणत्वमकारणविग्रहःपरधनेपरयोषितिचस्पृहा॥सु
जनबंधुजनेष्वसहिष्णुताप्रकृतिसिद्धमिदंहिदुरात्मनां॥७९॥जा
ड्यंह्रीमतिगण्यतेव्रतरुचौदंभःशुचौकैतवंशूरेनिर्घृणतामुनौवि
मतितादैन्यंप्रियालापिनि॥तेजस्विन्यवलिप्ततामुखरतावक्तर्यश
क्तिःस्थिरेतत्कोनामगुणोभवेत्सगुणिनांयोदुर्जनैर्नांऽकितः॥८०॥
उद्भासिताखिलखलस्यविशृंखलस्यप्राग्जातविस्मृतनिजाऽध
मकर्मवृत्तेः॥दैवादवाप्तविभवस्यगुणद्विषोऽस्यनीचस्यगोचरग
तैःसुखमाप्यतेकैः॥८१॥मृगमीनसज्जनानांतृणजलसंतोषवि
हितवृत्तीनां॥लुब्धकधीवरपिशुनानिष्कारणवैरिणोजगति॥८२॥
परवादेदशवदनःपररंध्रनिरीक्षणेसहस्राक्षः॥सद्वृत्तवित्तहर

णेबाहुसहस्रार्जुनोनीचः॥८३॥विधिखल्मालयोरंत्यवर्णाभ्यांयोविनिर्मितः॥परस्यहरतिप्राणान्नैतच्चित्रंकुलोचितं॥८४॥जीवनग्रहणेनम्रागृहीत्वापुनरुन्नताः॥किंकनिष्ठाःकिमुज्येष्ठाघटीयंत्रस्यदुर्जनाः॥८५॥दुर्जनःकृतशिक्षोऽपिसज्जनोनैवजायते॥अपिगंगाजलस्नानाद्धःकेशःकुशायते॥८६॥बिभ्राणागरलंकंठेभुजंगपरिवेष्टिता॥शांभवीवतनुःकस्यनवंद्यादौर्जनीसभा॥८७॥अक्षमालापवृत्तिज्ञाकुशासनपरिग्रहा॥ब्राह्मीवदौर्जनीसंसद्वंदनीयासमेखला॥८८॥दुर्वृत्तसंगतिरनर्थपरंपरायाहेतुःसतांभवतिकिंवचनीयमेतत्॥लंकेश्वरोहरतिदाशरथेःकलत्रंप्राप्नोतिबंधमथदक्षिणसिंधुराजः॥८९॥खलःकरोतिदुर्वृत्तंनूनंफलतिसाधुषु॥दशाननोऽहरत्सीतांबंधनंचमहोदधेः॥९०॥करोतिस्वमुखेनैवबहुधान्यस्यखंडनं॥नमःपतनशीलायमुसलायखलायच॥९१॥नदेवायनधर्मायनसिंधुभ्योनचार्थिने॥दुर्जनस्याऽर्जितंवित्तंभुज्यतेराजतस्करैः॥९२॥मुखंपद्मदलाकारंवाचाचंदनशीतला॥हृदयंक्रोधसंयुक्तत्रिविधंधूर्त्तलक्षणं॥॥९३॥कृतमपिमहोपकारंपयइवपीत्वानिरातंकः॥प्रत्युतहंतुंयततेकाकोदरसोदरःखलोजयति॥९४॥वहतिविषधरान्पटीरजन्माशिरसिमषीपटलंदधातिदीपः॥विधुरपिभजतेतरांकलंकंपिशुनजनंखलुबिभ्रतिक्षितींद्राः॥९५॥रेखलतवखलुचरितंविदुषामग्रेविविच्यवक्ष्यामि॥अथवाऽलंपापात्मन्कृतयाकथयाऽपितेहतया॥९६॥आनंदमृगदावाऽग्निःशीलशाखिमदद्विपः॥ज्ञानदीपमहावायुरयंखलसमागमः॥९७॥निष्णातोऽपिचवेदांतेसाधुत्वंनैतिदुर्जनः॥चिरमग्नोजलनिधौमैनाकइवमार्दवम्॥९८॥खलःसज्जनकार्पासभक्षणैकहुताशनः॥परदुःखाऽग्निधमनमारुतःकेनवर्ण्यतां॥९९॥यशःसौरभ्यलशुनःशांतिशैत्यहुताशनः॥कारुण्यकुसुमाऽकाशःखलःसज्जनदुःखदः॥१००॥खलास्तुकुशलाःसाधुहितप्रत्यूहकर्मणि॥नि

पुणाःफणिनःप्राणानपहर्त्तुंनिरागसां॥१०१॥वदनेविनिवेशिता
भुजंगीपिशुनानांरसनामिषेणधात्रा॥अनयाकथमन्यथाऽवली
ढानहिजीवतिजनामनागमंत्राः॥१०२॥उन्नतंपदमवाप्ययोल
घुर्हेलयैवसपतेदितिब्रुवन्॥शैलशेखरगतःपृषद्गणश्चारुमा
रुतधुतःपतत्यधः॥१०३॥नन्वाश्रयस्थितिरियंतवकालकूटके
नोत्तरोत्तरविशिष्टपदोपदिष्टा॥प्रागर्णवस्यहृदयेवृषलक्ष्मणो
ऽथकंठेऽधुनावससिवाचिपुनःखलानां॥१०४॥अंतर्मलिनदेहे
नबहिराल्हादकारिणा॥महाकालफलेनेवकेखलेननवंचिताः॥
॥१०५॥अंतर्वाणिंमन्यमानःखलोऽयंपौरोभाग्यंसूक्तिमुक्तासुध
त्ते॥सर्वाऽनंदिन्यंगकेकामिनीनामीर्मंमार्गस्येषवैबंभरालिः॥
॥१०६॥अपिवेत्तिषडक्षराणिचेदुपदेष्टुंशितिकंठमिच्छति॥वस
नाऽशनमात्रमस्तिचेन्ननदाद्व्यतिरिच्यतेखलः॥१०७॥अर्थग्रह
णेनतथादुनोतिकटुकूजितैर्यथापिशुनः॥रुधिराऽदानादधिकं
दुनोतिकर्णेक्वणन्मशकः॥१०८॥विध्वस्तपरगुणानांभवतिख
लानामतीवमलिनत्वं॥अंतरितशशिरुचामपिसलिलमुचांम
लिनिमाऽभ्यधिकः॥१०९॥परगुह्यगुप्तिनिपुणंगुणमयमखिलैः
समीहितंनितरां॥ललिताऽबरमिवसज्जनमाखलइवदूषयंति
खलाः॥११०॥त्यजतिचगुणान्सुदूरंतनुमपिदोषंनिरीक्ष्यगृ
ण्हाति॥मुक्त्वाऽलंकृतकेशान्यूकामिववानरःपिशुनः॥१११॥
कस्त्वंभद्रखलेश्वरोऽहमिहकिंघोरेवनेस्थीयते शार्दूलादिभिरे
वहिंस्रपशुभिःखाद्योऽहमित्याशया॥कस्मात्कष्टमिदंत्वयाव्य
वसितंमद्देहमांसाशिनःप्रत्युत्पन्ननृमांसभक्षणधियस्तेघ्नंतु
सर्वान्नरान्॥११२॥अहोप्रकृतिसादृश्यंश्लेष्मणोदुर्जनस्यच॥
मधुरैःकोपमायातिकटुकेनैवशाम्यति॥११३॥ईषल्लब्धप्रवेशो
ऽपिस्नेहविच्छेदकारकः॥कृतक्षोभोनरीनर्तिखलोमंथनदंडव
त्॥११४॥विरूपवतीपुरस्तैस्न्यंपृष्ठतःकुर्वतीगुणं॥कर्णान्त
विध्यतिलोकस्यसूचीवत्सूचकस्यवाक्॥११५॥दोषाऽलो

ननिपुणाःपरुषगिरोदुर्जनाश्चकाकाश्च॥दर्शनमपिभयजन
नंयेषामनिमित्तपिशुनानां॥११६॥पिशुनत्वमेवविद्यापरदूष
णमेवभूषणंयेषां॥परदुःखमेवसौख्यंशिवशिवतेकेनवेधसा
सृष्टाः॥११७॥नसारिणीयाधीरेणरसनानीरसेजने॥कोनामकु
रुतेफेरौनायकःसायकक्षतिं॥११८॥हस्तइवभूतिमलिनोलंघ
यतियथायथाखलःस्वजनं॥दर्पणमिवतंकुरुतेतथातथानिर्मे
लच्छायं॥११९॥दिगंतेखेलंतीसरसहृदयानंदजननीमयानीता
दुष्टप्रचुरनगरींकापिकविता॥अकस्मादुन्मीलत्खलवदनव
ल्मीकरसनाभुजंगीदष्टांगीशिवशिवसमाप्तिंगतवती॥१२०॥
नागच्छन्नुपहूयतेनवचनोत्थानासनैःपूज्यतेनोपृच्छन्त्यनुभा
ष्यतेनचदृशासादरंवीक्ष्यते॥ईर्ष्यावेशकषायितेहृदिघृणा
लेशोपिनस्पृश्यतेकिंत्वेकःप्रवदन्समंजसमपिप्राज्ञःशठैर्हस्य
ते॥१२१॥अन्यस्यलगतिकर्णेजीवितमन्यस्यहरतिबाणइव॥
हृदयंदुनोतिपिशुनःकंटकइवपादलग्नोपि॥१२२॥तस्मिन्नग
तार्द्रभावेवीतरसेशुंठिशकलइवपुरुषे॥अपिभूतिभाजिमलिने
नागरशब्दोविडंबाय॥१२३॥तेदृष्टिमात्रपतिताअपिकस्यना
त्रक्षोभायपक्ष्मलदृशामलकाःखलाश्च॥नीचाःसदैवसविला
समलीकलग्नायेकालतांकुटिलतामपिनत्यजंति॥१२४॥हि
त्वामदंसममसज्जनसज्जनौतौवंदेनितांतकुटिलप्रगुणस्व
भावौ॥एकंभियानिरभिसंहितवैरिभावंप्रीत्यापरंपरमनिर्वृति
पात्रभूतं॥१२५॥क्षुद्रोद्भवस्यकटुतांप्रकटयतोयच्छतश्चम
दमुच्चैः॥मधुनोधमपुरुषस्यचगरिमालघिमाचभेदाय॥१२६
दोषपोषमभियातिपरंयोबाधमेतिबहुसज्जनयोगात्॥संमतौ
विमतिमात्रसहायोदुर्जनोभ्रमइवातिचकास्ति॥१२७॥स्वरसे
नवधृतांकरमादानेकंटकोत्करैस्तुदतां॥पिशुनानांपनसानां
कोषाभोगोप्यविश्वास्यः॥१२८॥दैवादप्युत्तमानामपहरति
यदादुर्जनोवाकथंचिन्मानंनाप्नोतितेषामनुजनितगुणानेव

कुत्राधिकत्वं॥स्वर्भानुर्भानवीयान्हरतियदिपुनःशीतरश्मेर्मरीचीन्ब्रह्मांडस्येहखंडेतदपिनरपतेकिंग्रहेशत्वमेति॥१२९॥वंशोघुणाद्वनविशतिदोषोरसभावितेसतांमनसि॥रसमपितुनप्रतीच्छतिबहुदोषःसंन्निपातीव॥१३०॥धर्मारंभेप्यसतांपरहिंसैवप्रयोजिकाभवति॥काकानामभिषेकेःकारणतांदृष्टिरनुभवति॥१३१॥स्वयमपिभूरिच्छिद्रश्चापलमपिसर्वतोमुखंतन्वन्॥तितउस्त्कषस्यपिशुनोदोषस्यविवेचनेधिकतः॥१३२॥अभूदंभोराशेःसहवसतिरासीत्कमलयागुणानामाधारोनयनफलमिंदुःप्रथयति॥कथंसिंहीसूनुस्तमपितुदतिप्रौढदशनैर्गुणानामास्वादंपिशुनरसनाकिंरसयति॥१३३॥यालोभात्सविधेखलस्यसरसावाणीबुधैर्नीयतेनोजानातिसतामचेतनतयासैवस्वयंलीयति॥भर्तुःस्नेहचयास्प्रविश्यदहनेभस्मीभवत्यंगनागाढालिंगनतत्परेणमनसाप्रेतोनवेत्तिप्रियां॥१३४॥परपरितापनकुतुकीगणयतिनात्मीयमपितापं॥परहतिहेतोःपिशुनःसंदंशइवस्वपीडनंसहते॥१३५॥सगुणापिहेतविगुणाभवतिखलस्याकृतिर्विचित्रवर्णापि॥आखुमुखादिवशाटीपदपरिपाटीकवेःक्वापि॥॥१३६॥मातर्नातःपरमनुचितंयत्खलानांपुरस्तादस्ताघांकंजठरपिठरीपूरणेनर्त्तितासि॥तत्संतव्यंसहजसदयेयत्खलेवाणिकुर्याःप्रायश्चित्तंगुणगणनयागोपवेशस्यविष्णोः॥१३७॥सर्वथाव्यवहर्त्तव्यंकुतोह्यवचनीयता॥यथास्त्रीणांतथावाचांसाधुत्वेदुर्जनोजनः॥१३८॥जिह्वालोकःकथयतिपुराहंतहित्वागुणौघानंभःसारंगुणगणनिधेस्तस्यरत्नाकरस्य॥विम्बेच्छिद्रानुसरणसमारूढसर्वेंद्रियाणांदोषेदृष्टिःपिशुनमनसानानुरागोगुणेषु॥३९॥मलयभुविविरूढस्यंदनेनाभिरूढोनभजतिकिलवेणुःसौरभंचंदनस्य॥तदिहनहिविचित्रंसर्वदोषाकराणांनहिभवतिखलानांसाधुतागंधलेशः॥१४०॥इतिशार्ङ्ग·धरविरचितायांपद्धत्यांदुर्जननिंदापरिच्छेदः

अथकृपणनिंदा

यदर्ज्यतेपरिक्लेशैरर्जितंयन्नभुज्यते॥विभज्यतेयदंतेन्यैःकस्यचिन्मास्तुतद्धनं॥१॥यत्करोत्यरतिंक्लेशंतृष्णामोहंप्रजागरं॥नतद्धनंकदर्याणांहृदयव्याधिरेवसः॥२॥एतौक्षेमेंद्रस्य॥मृत्युःशरीरगोप्तारंधनरक्षंवसुंधरा॥दुश्चारिणीवहसतिस्वपतिंपुत्रवत्सलं॥३॥बाणभट्टस्य॥नंदनरेंद्रद्रविणैर्दुष्कृतमिवकिमपिविहितमतिघोरं॥वसुधातलोष्मपाकोविरमतिनाद्यापियत्नेभ्यः॥४॥वल्लभदेवस्य॥दृढतरनिबद्धमुष्टेःकोशनिषण्णस्यसहजमलिनस्य॥कृपणस्यकृपाणस्यचकेवलमाकारतोभेदः॥५॥गोपभट्टस्य॥कृपणस्यसमृद्धीनांभोक्तारःसंतिकतिचिदपिनिपुणाः॥जलसंपदोंबुराशेर्यातिवशंश्वभ्रस्वदैर्वाग्रैः॥६॥प्रकाशवर्षस्य॥ग्रासानपिनलभंतेभोगान्भोक्तुंस्वकर्मभिःकृपणाः॥मुखपाकःकिलभवतिद्राक्षापाकेबलिभुजांहि॥॥७॥रविगुप्तस्य॥त्यागभोगविहीनेनधनेनधनिनोयदि॥भवामःकिंतुतेनैवधनेनधनिनोवयं॥८॥कस्यापि॥कृपणेनसमोदातानभूतोनभविष्यति॥अस्पृशन्नेववित्तानियःपरेभ्यःप्रयच्छति॥९॥व्यासस्य॥योनददातिनभुंक्तेसतिविभवेनैवतस्यतद्द्रव्यं॥तृणमयकृत्रिमपुरुषोरक्षतिसस्यंपरस्यार्थे॥१०॥कृपणेनशवेनैवमृतेनापिनदीयते॥मांसंवर्द्धयतातेनकाकस्योपकृतिःकृता॥११॥उदारचरितत्यागीयाचितःकृपणोधिकः॥एकोधनंततःप्राणाऽनऽन्यःप्राणांस्ततोधनं॥१२॥दानंभोगोनाशस्तिस्रोगतयोभवंतिवित्तस्य॥योनददातिनभुंक्तेतस्यतृतीयागतिर्भवति॥१३॥नोपभोक्तुमपिक्लीबोजानात्युपचितांश्रियं॥ग्राम्योविरागयत्येवरमयन्नपिकामिनीं॥१४॥ ९९

कृपणोधनलोभेनस्वांभार्यांनाभिगच्छति॥अस्यांयोजायतेपुत्रःसमेवित्तंहरेदिति॥१५॥ ॥ ॥ ॥ यद्धो

ऽधःक्षितौवित्तंनिचखानमितंपचः॥तदधोनिलयंगंतुंचक्रेपंथा
नमग्रतः॥१६॥निजसौख्यंनिरुंधानोयोधनार्जनमिच्छति॥
परार्थेभारवाहीवक्लेशस्यैवहिभाजनं॥१७॥दानोपभोगहीनेन
धनेनधनिनोयदि॥भवामःकिंनतेनैवधनेनधनिनोवयं॥१८॥
असंभोगेनसामान्यंकृपणस्यधनंपरैः॥अस्येदमितिसंबंधोहा
नौदुःखेनगम्यते॥१९॥यद्ददातियदश्नातितदेवधनिनोधनं॥
अन्येमृतस्यक्रीडंतिदारैरपिधनैरपि॥२०॥फलंस्वेच्छालभ्यं
प्रतिवनमखेदंक्षितिरुहांपयःस्थानेस्थानेशिशिरमधुरंपुण्यसरि
तां॥मृदुस्पर्शाशय्यासुललितलतापल्लवमयीसहंतेसंतापंतद
पिधनिनांद्वारिकृपणाः॥२१॥यदिभवतिधनेनधनीक्षितितल
निहितेनभोगरहितेन॥तस्माद्वयमपिधनिनस्तिष्ठतिनःकांचनो
मेरुः॥२२॥देहीतिवक्तुकामस्ययदुःखमुपजायते॥दाताचेत्तद्वि
जानीयाद्दद्यात्स्वपिशितान्यपि॥२३॥जहातिसहसाऽऽसनंझ
टितिपृच्छतिस्वागतंनमस्यतिमुहुर्मुहुःश्रुतिमनोहरंभाषते।
ददातिकुसुमंफलंशिथिलयत्यभीष्टंक्रियामहोनपरिचीयते
कृपणवंचनाचातुरी॥२४॥अर्थिनिकवयतिकवयतिपठतिचप
ठतिस्तवोद्यतंस्तौति॥पश्चाद्यामीत्युक्तेकृपणःप्रणतोऽंजलिंकुरु
ते॥२५॥सतिद्राक्षाफलेक्षीरेमृदामास्वादनेमुदः॥ अहोमातुरियं
रीतिःकृपणेगर्भवर्त्तिनि॥२६॥प्रायेणधनिनामेवधनलोभोनिरं
तरं॥पश्यकोटिद्वयोपेतंलक्षायप्रणतंधनुः॥२७॥ याचमानज
नमानसवृत्तेःपूरणायवतजन्मनयस्य॥ तेनभूमिरतिभारवती
यंनद्रुमैर्नगिरिभिर्नसमुद्रैः॥२८॥अदातुर्मानसंक्कापिनस्पृशं
तिकवेर्गिरः॥दोषायैवातिवृद्धस्यविलासास्तरुणीकृताः॥२९॥गा
ढतरबद्धमुष्टेःसहजमलिनस्यकोषनिषण्णस्य॥कृपणस्यकृ
पाणस्यचकेवलमाकारतोभेदः॥३०॥ कृपणःप्रिययासंगंनक
रोतिकदाचन॥भवितायदिमेपुत्रःकरिष्यतिधनव्ययं॥३१॥ इ
तिशार्ङ्गधरविरचितायांपद्धत्यांकृपणनिंदापरिच्छेदः॥ ७ ॥

अथयाचकनिंदा

देहीतिवक्तुकामस्ययद्दुःखमुपजायते॥दाताचेत्तद्विजानीयाद्
द्यात्स्वपिशितान्यपि॥१॥कस्यापि॥वेपथुर्मलिनंवक्त्रंदीनावा
क्गद्गदस्वरः॥मरणेयानिचिन्हानितानिचिन्हानियाचके॥२॥
भ्रातर्भ्रांतरशेषयाचकजनैवैरा यसेसर्वथायस्माद्विक्रमशालि
वाहनमहीभृन्मुंजभोजादयः॥ अस्येतंचिरजीविनोनविहितास्ते
विश्वजीवातवोमार्कंडध्रुवलोमशप्रभृतयःसृष्टाःप्रभूतास्तुषः॥
३॥ उड्डीनागुणपत्रिणःस्कखफलान्याराद्विकीर्णान्यधःपर्यस्ताः
परितोयशस्तवकिताःसंपल्लतापल्लवाः॥प्रागेवापसृतःप्रमोदह
रिणश्छायाकथांतंगतादैन्यारण्यमतंगजेनमहता भग्नेभिमान
द्रुमे॥४॥विद्यावतःकुलीनस्यधनंयाचितुमिच्छतः॥कंठेपारा
वतस्येववाक्करोतिगतागतं॥५॥दक्षिणाशाप्रवृत्तस्यप्रसारित
करस्यच॥तेजस्तेजस्विनोर्कस्यहीयतेन्यस्यकाकथा॥६॥
गुरुतामुपयातियन्मृतःपुरुषस्तद्विदितंमयाधुना॥ननुला
घवहेतुरर्थितानमृतेतिष्ठतिसामनागपि॥७॥साधुरेवार्थिभि
र्याच्यःक्षीणवित्तोपिसर्वदा॥शुष्कोपिहिनदीमार्गःखन्यतेस
लिलार्थिभिः॥८॥तृणादपिलघुस्तूलस्तूलादपिचयाचकः॥वा
युनाकिंननीतोसौमामयंयाचयिष्यति॥९॥तावत्सर्वगुणाल
यःपटुमतिःसाधुःसतांवल्लभःशूरःसच्चरितःकलंकरहितोमा
नीकृतज्ञःकविः॥दक्षोधर्मरतःसुशीलगुणवांस्तावत्प्रतिष्ठा
न्वितोयावन्निष्ठुरवज्रपातसदृशंदेहीतिनोभाषते॥१०॥काकः
आव्हयतेकाकान्याचकोनतुयाचकान्॥काकयाचकयोर्मध्ये
वरंकाकोनयाचकः॥११॥याचनायांप्रवृत्तस्यकाकानामनदुर्द
शा॥चेतश्चेत्क्रियतेतस्यांयातनैवोपतिष्ठते ॥१२॥तावन्महतां
महतीयावत्किमपिहिनयाच्यतेलोकं॥बलिमनुयाचनसम
ये श्रीपतिरपिवामनोजातः॥१३॥संतापितानांमधुरैर्वचोभिर्मि
थ्योपचारैश्चवशीकृतानां॥आशावतांश्रद्दधतांचलोकेकिमर्थि

नांवंचयितव्यमस्ति॥१४॥सेवेवमानमखिलंज्योत्स्नेवतमोज
रेवलावण्यं॥हरिहरकथेवदुरितंगुणशतमप्यर्थिताहरति॥
१५॥भ्रातर्धातरशेषयाचकजनैर्वैरायसेसर्वथायस्माद्विक्रम
शालिवाहनमहीमृन्मुंजभोजादयः॥अस्तंतंचिरजीविनोनवि
हितास्तेविश्वजीवातवोमार्कंडध्रुवलोमशप्रभृतयःसृष्टाःप्रभू
ताऽऽयुषः॥१६॥देहीतिवचनंश्रुत्वाहृदिस्थाःपंचदेवताः॥मु
खान्निर्गत्यगच्छंतिश्रीह्रीधीधृतिकीर्त्तयः॥१७॥नवीनदीन
भावस्ययाचकस्याऽतिमानिनः॥वचोजीवितयोरासीत्पुरोनिः
सरणेरणः॥१८॥वदनाच्चबहिर्यातिप्राणायाच्ञाक्षरैःसह॥
ददामीत्यक्षरैर्दातुःपुनःकर्णौविशतिहि॥१९॥द्वारेद्वारेपरेषामवि
रलमटतिद्वारपालैःकरालैर्दृष्टोयोऽप्याहतःसन्नरणतिगणय
तिस्वाऽपमानंतुनैव॥क्षंतुंशक्नोतिनाऽन्यंस्वसदृशमितराऽऽगा
रमप्याश्रयंतंभ्राम्यत्यात्मोदरार्थेकथमहहशुनानोसमोयाच
कःस्यात्॥२०॥जनस्थानेभ्रांतंविषयमृगतृष्णाऽऽकुलतयाऽ
वचोवैदेहीतिप्रतिपदमुदश्रुप्रलपितं॥कृतालंकाभर्त्तुर्वदनप
रिपाटीषुरचनामयाऽऽप्तंरामत्वंकुशलवसुतानत्वधिगता॥
॥२१॥तीक्ष्णधारेणखड्गेनवरंजिह्वाद्विधाकृता॥नतुमानंप
रित्यज्यदेहिदेहीतिभाषितं॥२२॥याचकवीरोधन्यःकरदान
ग्राहकःस्वदातृभ्यः॥कुरुतेपराङ्मुखंवाह्यतिनम्रंवाहरत्यसौ
पुण्यं॥२३॥पुरतःप्रेरयत्याशालज्जापृष्ठाऽवलंबिनी॥ततोलज्जा
ऽऽशयोर्मध्येदोलायत्यर्थिनांमनः॥२४॥शूराःकेऽपिपुरःस्थितारि
पुनरश्रेणिंसहंतेमुखंधीराःकेचनपंचबाणसदृशंकांतादृगंता
ऽऽहतिं॥केचित्क्रूरखांश्चपंचवदनान्दंतीचपेटान्भटानेवाऽ
र्थिप्रकरंप्रसारितकरंकश्चिद्विसोढुंक्षमः॥२५॥याचनाहिपुरुषस्य
महत्वंनाशयत्यखिलमेवतथाहि॥सद्यएवभगवानपिविष्णुर्वा
मनोभवतियाचितुमिच्छन्॥२६॥करान्प्रसार्यरविणादक्षिणा
शावलंबिना॥नकेवलमनेनात्मादिवसोपिलघूकृतः॥२७॥

वक्त्रादुहूसमेहठाद्यिवसत्वंवापिवक्त्रेमनागीशानांतदनुक्रुधाभजतुमांलक्ष्मीरिमान्नुदुत॥पश्चात्तेषुपठत्स्वमांप्रतिपशोगाथावल्लीस्तृष्णा यावक्त्रेमथ्यथवक्त्रयस्यनुभवंत्वेतेपिता यातनां॥॥२८॥इतिश्रीशार्ङ्गधरविरचितायांपद्धत्यांयाचकनिंदापरिच्छेदः

अथदरिद्रनिंदा

उत्थायहृदिलीयंतेदरिद्राणांमनोरथाः॥बालवैधव्यदग्धानांकुलस्त्रीणांकुचाविव॥१॥ कस्यापि॥हेदारिद्र्यनमस्तुभ्यंसिद्धोहंत्वत्प्रसाद तः॥पश्याम्यहंजगत्सर्वंनमांपश्यतिकश्चन॥२॥इहलोकेपिधनिनांपरोपिस्वजनायते॥स्वजनोपिदरिद्राणांतत्क्षणाद्दुर्जनायते॥३॥कस्यापि॥रोगीचिरप्रवासीपरान्नभोजीपरावसथशायी॥यज्जीवतितन्मरणंयन्मरणंसोस्यविश्रामः॥४॥परीक्ष्यसत्कुलंविद्यांशीलंशौर्यंसुरूपतां॥विधिर्ददातिनिपुणःकन्यामिवदरिद्रतां॥५॥दारिद्र्यानलसंतापःशांतःसंतोषवारिणा॥याचकाशाविघातांतर्दाहःकेनोपशाम्यति॥६॥केषांचिदिमे॥अर्थानसंतिनचमुंचतिमांदुराशादानान्नसंकुचतिदुर्ललितंमनोमे॥याच्ञाचलाघवकरीस्ववधेचपापंप्राणाःस्वयंव्रजतुकिंप्रविलंबितेन॥७॥माघकवेः॥मारोदीश्चिरमेहिवस्त्ररहितान्दृष्ट्वाद्यबालानिमानायातस्तववत्सदास्यतिपिताग्रैवेयकंवाससी॥श्रुत्वैवंगृहिणीवचांसिनिकटेकुड्यस्यनिःकिंचनोनिश्वस्याश्रुजलप्लुतमुखःपांथःपुनःप्रस्थितः॥८॥कंथाखंडमिदंप्रयच्छयदिवास्वांकेगृहाणार्भकंरिक्तंभूतलमत्रनाथभवतःपृष्ठेपलालोच्चयः॥दंपत्योरितिजल्पतोर्निशियदाचोरप्रविष्टस्तदालब्धंकर्पटमन्यतस्तदुपरिक्षिप्त्वारुदन्निर्गतः॥९॥वृद्धोनःपतिरेषमंचकगतःस्थूणावशेषंगृहंकालोभ्यर्णजलागमःकुशलिनीवत्सस्यवार्तापिनो॥यत्नात्संचिततैलबिंदुघटिकाभग्नेतिपर्याकुलांदृष्ट्वागर्भभराकुलांनिजवधूंश्वश्रूश्चिरंरोदति॥१०॥अंबातुष्यतिनमयानस्नुषयासापिनांबयानमया॥अहमपितनयानतयावदराजन्कस्यदोषोयं

॥११॥ दरिद्रदोषः॥ केषामप्येते॥ चांडालस्य दरिद्रस्य द्वावेतौ सदृ-
शौ सदा॥ चांडालस्य न गृह्णंति दरिद्रो न प्रयच्छति॥१२॥ श्रीवाल्
मीकेः॥ नो सेवा विहिता गुरोरपि मनाक्नो वा कृतं पूजनं देवानां वि
धिवत्तथा शिव शिव स्निग्धादयः सेविताः॥ किंतु त्वच्चरणौ सरस्वति
रसा राजन्मनः सेवितौ तस्मान्मां विजहाति सा भगवती शंके सपत्नी
तव॥१३॥ दारिद्र्य शोचामि भवंतमेवमस्मच्छरीरे सुहृदित्युषि
त्वा॥ विपन्नदेहे मयि मंदभाग्ये ममेति चिंता क्वगमिष्यसि त्वं॥१४॥ द
ग्धं खांडवमर्जुनेन बलिना दिव्यैर्द्रुमैः सेवितं दग्धा वायुसुतेन राव
णपुरी लंका पुनः स्वर्णभूः॥ दग्धः पंचशरः पिनाकपतिना तेनाप्यु-
युक्तं कृतं दारिद्र्यं जनतापकारकमिदं केनापि दग्धं न हि॥१५॥ द्वा
विमावंभसि क्षेप्यौ गाढं बध्वा गले शिलां॥ धनिनं चाप्रदातारं दरि
द्रं चातपस्विनं॥१६॥ उत्तिष्ठ क्षणमेकमुद्वह सखे दारिद्र्यभारं गुरुं
श्रांतस्तावदहं चिरं मरणजं सेवे त्वदीयं सुखं॥ इत्युक्त्वा धनव-
र्जितेन सहसा गत्वा श्मशाने शवं दारिद्र्यान्मरणं वरं वरमिति ज्ञा
त्वैव तूष्णीं स्थितम्॥१७॥ पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिज
नं देव॥ विलसत्करेणुगहनं संप्रति सममावयोः सदनं॥१८॥ यो
गंगामतरत्तथैव यमुनां यो नर्मदां शर्मदां का वार्ता सरिदंबुलंघन
विधौ यश्चार्णवांस्तीर्णवान्॥ सोऽस्माकं चिरमास्थितोऽपि सहसा
दारिद्र्यनामा सखा त्वद्दानांबुसरित्प्रवाहलहरीमग्नो न संभाव्य
ते॥१९॥ दारिद्र्यान्मरणाद्वा मरणं संरोचते न दारिद्र्यं॥ अल्पक्लेशं
मरणं दारिद्र्यमनंतकं दुःखं॥२०॥ अत्यंतविमुखे दैवे व्यर्थे यत्ने
च पौरुषे॥ मनस्विनो दरिद्रस्य वनादन्यत्कुतः सुखं॥२१॥ दारि
द्र्याद्ध्रियमेति ह्रीपरिगतः सत्वात्परिभ्रश्यते निःसत्वः परिभूयते
परिभवान्निर्वेदमापद्यते॥ निर्विण्णः शुचमेति शोकनिहतो बुद्ध्या
परित्यज्यते निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदं॥२२
अयेलाजानुच्चैः पथि वचनमाकर्ण्य गृहिणी शिशोः कर्णौ यत्ना-
त्सुपिहितवती दीनवदना॥ मयि क्षीणोपाये यदकृत दृशावश्रुश

वलेतदंतःशल्यंमेत्वमिवपुनरुद्धर्तुमुचितः॥२३॥दूयेकांताकरंवी
क्ष्यमणिकंकणवर्जितं॥अतःपरंपरंदूयेमणिकंकणवर्जितं॥२४
एकोहिदोषोगुणसन्निपातेनिमज्जतींदोरितियोवभाषे॥नतेनदृ
ष्टंकविनासमस्तंदारिद्र्यमेकंगुणकोटिहारि॥२५॥रात्रौजानुर्दिवा
भानुःकृशानुःसंध्ययोर्द्वयोः॥पश्यशीतंमयानीतंजानुभानुकृशा
नुभिः॥२६॥क्षुत्क्षामाःशिशवःशवाइवभृशंमंदाऽशयाबांधवालि
प्ताजर्जरकर्करीजतुलवैर्नोमांतथाबाधते॥गेहिन्यात्रुटितांशुकं
घटयितुंकृत्वासकाकुस्मितंकुप्यंतिप्रतिवेशिलोकगृहिणीसूचीं
यथायाचिता॥२७॥दारिद्र्यभोस्त्वंपरमंविवेकिगुणाऽधिकेपुंसिसदा
नुरक्तं॥विद्याविहीनेगुणवर्जितेचमुहूर्तमात्रंनरतिंकरोषि॥२८॥
भद्रेवाणिममाऽऽननेकुरुदयांवर्णाऽनुपूर्व्यांचिरंचेतःस्वास्थ्यमुपै
हियाहिकरुणेधृतेस्थिरत्वंव्रज॥लज्जेतिष्ठपराङ्मुखीक्षणमहो
तृष्णेपुरःस्थीयतांपापोयावदहंब्रवीमिधनिनांदेहीतिदीनंवचः
॥२९॥अयंपटोमेपितुरंगभूषणंपितामहाद्यैरुपभुक्तयौवनः॥
अलंकरिष्यत्यथपुत्रपौत्रकान्मयाऽधुनापुष्पवदेवधार्यते॥३०॥
जनस्थानेभ्रांतंकनकमृगतृष्णार्दितधियावचोवैदेहीतिप्रतिपद
मुदश्रुप्रलपितं॥कृतालंकाभर्तुर्वदनपरिपाटीषुघटनामयाप्तं
रामत्वंकुशलवसुतानत्वधिगता॥३१॥उत्तमर्णधनदानशंकया
पावकोप्यशिखपाहृदिस्थया॥देवदग्धवसनासरस्वतीनास्यतो
वहिरेतिलज्जया॥३२॥दौर्गत्येनसमीरिताहृदयतःकंठंसमा
लंबतेकंठात्कष्टतरंकथंकथमपिप्राप्नोतिजिव्हांचलं॥लज्जाकी
लककीलितेवनिविडंतस्मान्ननिर्यात्यहोवाचाप्राणपरिक्षये
पिमहतांदेहीतिनास्तीतिच॥३३॥संगंनैवहिकश्चिदस्यकुरु
तेसंभाष्यतेनादरात्संप्राप्तोगृहमुत्सवेषुधनिनांसावज्ञमालो
क्यते॥दूरादेवमहाजनस्यविहरत्यल्पच्छदोलज्जयामन्येनि
र्धनताप्रकाममपरंषष्ठंमहापातकं॥३४॥जेजेगुणिणोजेतेअ
च्चाइणोतेतेअविअडुविस्माणोदालिघरेविःअसवणताणतुलं

स्मातुत्वंसाणुराऽऽसि।।३५।।जाइज्जवणुद्देसेखुज्जोविहुणींस होउडिअपतोः।।मामाणसम्मिलोएवाईरसिऽऽदरिद्दोआइ॰।। ।।३५।।किंकरोमिक्वगच्छामिकमुपैमिदुरात्मना।।दुर्भरेणोदरेणाहंप्राणैरपिविडंबितः।।३६।।ख्यातोविश्वोद्धरणविधिनानाथं विश्वंभरस्त्वंमन्येमादृग्जठरपिठरीपूरणेकुंठशक्तिः।।शक्तिस्ते रेविबुधसदसिप्रेष्यमांमास्तुलज्जायद्धिश्वेभ्योप्यहमिहबहिर्भावमंगीकरिष्ये।।३७।।इतिशा॰विरचितायांप॰दरिद्रनिंदापरिच्छेदः

अथमूर्खनिंदा

यस्यनास्तिस्वयंप्रज्ञाशास्त्रंतस्यकरोतिकिं।।लोचनाभ्यांविहीनस्यदर्पणःकिंकरिष्यति।।१।।चाणकस्य।।वितरतिगुरुःप्राज्ञेविद्यांतथैवयथाजडे।।नतुखलुतयोर्ज्ञानंशक्तिंकरोत्यपहंतिवा।।२।।भवतिचपुनर्भूयानेकःफलंप्रतितद्यथा।।प्रभवतिस्कचांग्राहेमणिर्नमृदांचयः।।३।।कालिदासस्य।।लभेतसिकतासुतैलमपियत्नतःपीडयन्पिबेच्चमृगतृष्णिकासुसलिलंपिपासार्दितः।।कदाचिदपिपर्यटन्शशविषाणमासादयेन्नतुप्रतिनिविष्टमूर्खजनचित्तमाराधयेत्।।४।।प्रसह्यमणिमुद्धरेन्मकरवक्त्रदंष्ट्रांकुरात्समुद्रमपिसंतरेत्प्रचलदूर्मिमालाकुलं।।भुजंगमपिकोपितंशिरसिपुष्पवद्धारयेन्नतुप्रतिनिविष्टमूर्खजनचित्तमाराधयेत्।।५।।भर्त्तृहरेः।।मूर्खोहिजल्पतांपुंसांश्रुत्वावाचःशुभाशुभाः।।अशुभंवाक्यमादत्तेपुरीषमिवशूकरः।।६।।व्यासस्य।।उपदेशोहिमूर्खाणांप्रकोपायनशांतये।।पयःपानंभुजंगानांकेवलंविषवर्धनं।।७।।चाणकस्य।।अज्ञःसुखमाराध्यःसुखतरमाराध्यतेविशेषज्ञः।।ज्ञानलवदुर्विदग्धंब्रह्मापितंनरंनरंजयति।।८।।व्यालंबालमृणालतंतुभिरसौरोद्धुंसमुज्जृंभतेछेत्तुंवज्रमणीन्शिरीषकुसुमप्रांतेनसन्नह्यते।।माधुर्यंमधुबिंदुनारचयितुंक्षाराबुधेरीहतेनेतुंवांछतियःखलान्पथिसतांसूक्तैःसुधास्यंदिभिः।।९।।यदाकिंचिज्ज्ञोऽहंद्विपइवमदांधःसमभवंतदासर्वज्ञोऽस्मीत्यभ

वदवलिप्तंमममनः॥ यदाकिंचित्किंचिद्बुधजनसकाशादवगतं तदामूर्खोऽस्मीतिज्वरइवमदोमेऽप्यपगतः॥१०॥ कृमिकुलचितं लालाक्लिन्नंविगंधिजुगुप्सितंनिरुपमरसंप्रीत्याखादन्नराऽस्थि निरामिषं॥ सुरपतिमपिश्वापार्श्वस्थंविलोक्यनशंकतेनहि गणयतिक्षुद्रोजंतुःपरिग्रहफल्गुतां॥११॥ शिरःशार्वंस्वर्गात् पशुपतिशिरस्तःक्षितिधरंमहीध्रादुत्तुंगादवनिमवनेश्चाऽपि जलधिं॥ अधोऽधोगंगेयंपदमुपगतास्तोकमधुनाविवेकभ्रष्टा नांभवतिविनिपातःशतमुखः॥१२॥ शक्योवारयितुंजलेनहु तभुक्छत्रेणसूर्याऽतपोनागेंद्रोनिशितांकुशेनसमदोदंडेन गोगर्दभौ॥ व्याधिर्भेषजसंग्रहैश्चविविधैर्मंत्रप्रयोगैर्विषंसर्व स्यौषधमस्तिशास्त्रविहितंमूर्खस्यनास्त्यौषधं॥१३॥ साहित्य संगीतकलाविहीनःसाक्षात्पशुःपुच्छविषाणहीनः॥ तृणंनखा दन्नपिजीवमानस्तद्भागधेयंपरमंपशूनाम्॥१४॥ येषांनविद्या नतपोनदानंज्ञानंनशीलंनगुणोनधर्मः॥ तेमृत्युलोकेभुविभार भूतामनुष्यरूपेणमृगाश्चरंति॥१५॥ वरंपर्वतदुर्गेषुभ्रांतंवन चरैःसह॥ नमूर्खजनसंपर्कःसुरेंद्रभवनेष्वपि॥१६॥ मूर्खोऽ पिमूर्खंदृष्ट्वाचचंदनादतिशीतलः॥ यदिपश्यतिविद्वांसंमन्यते पितृघातकं॥१७॥ गुणिगणगणनाऽऽरंभेनपततिकठिनीसुसंभ्र माद्यस्य॥ तेनांऽबायदिसुतिनीवदवंध्याकीदृशीभवति॥१८॥ अंतःसारविहीनस्यसहायःकिंकरिष्यति॥ मलयेऽपिस्थितोवेणु र्वेणुरेवनचंदनः॥१९॥ मुक्ताफलैःकिंमृगपक्षिणांचमिष्टान्नपा नंकिमुगर्दभाणां॥ अंधस्यदीपोबधिरस्यगीतंमूर्खस्यकिंध र्मकथाप्रसंगः॥२०॥ व्यासादीन्कविपुंगवाननुचितैर्वाक्यैःस लीलंसहन्नुच्चैर्जल्पनिमील्यलोचनयुगंश्लोकान्सगर्वंपठन्॥ काव्यंधिक्कुरुतेपरैर्विरचितंस्पर्द्धस्वसार्धंबुधैर्यद्वाभ्यर्थ्यपसेश्च तेनरहितःपांडित्यमाप्तुंबलात्॥२१॥ येसंसत्सुविवादिनःपरय शःशल्येनशूलाऽकुलाःकुर्वंतिस्वगुणस्तवेनगुणिनांयत्नाद्गुणा

च्छादनं॥तेषांरोषकषायितोदरदृशांकोपोष्णनिश्वासिनांदीप्ता
रत्नशिखेवकृष्णफणिनांविद्याजनोद्वेगिनी॥२२॥ग्रीवास्तंभभृ
तःपरोन्नतिकथामात्रेशिरःशूलिनःसोद्वेगभ्रमणप्रलापविपुल
क्षोभाभिभूतस्थितेः॥अंतर्द्वेषविषप्रवेशविषमक्रोधोष्णनिश्वा॰
सिनःकष्टानूनमपंडितस्यविकृतिर्भीमज्वरारंभभूः॥२३॥मूर्ख॰
त्वंसुलभंभजस्वकुमतेमूर्खस्यचाऽष्टौगुणानिश्चिंतोबहुभोजको
ऽतिमुखरोरात्रिंदिवंस्वप्नभाक्॥कार्याकार्यविचारणांधबधिरोमा
नापमानेसमःप्रायेणामयवर्जितोदृढवपुर्मूर्खःसुखंजीवति॥२४॥
मूर्खचिन्हानिषडितिगर्वोदुर्वचनंमुखे॥विरोधीविषवादीचकृ॰
त्याऽकृत्यंनमन्यते॥२५॥अरण्यरुदितंकृतंशवशरीरमुद्वर्तितं॰
स्थलेऽब्जमवरोपितंसुचिरमूखरेवर्षितं॥श्वपुच्छमवनामितंब
धिरकर्णजापःकृतोधृतोंऽधमुखदर्पणोयदबुधोजनःसेवितः॥२६
निर्गुणइतिमृतइतिचद्वावेकार्थाभिधायिनौविद्धि॥पश्यधनुर्गुण
शून्यंनिर्जीवंयदिहशंसंति॥२७॥पेटीचीवरपट्टवस्त्रपटलम्बे
तातपत्रच्छगशाटीहारकघोटकस्फुटघटाटोपायतुभ्यंनमः॥
येनानक्षरकुक्षयोपिजगतःकुर्वंतिसर्वज्ञतांभ्रांतिंयेनविनातुहा
स्यपदवींसंतोपिकष्टंगताः॥२८॥सुगृहीतमलिनपक्षालघवः
परमेदिनस्तीक्ष्णाः॥पुरुषाअपिविशिखाअपिगुणच्युताःकस्यन
भयाय॥२९॥कर्कशतर्कविचारव्यग्रःकिंवेत्तिकाव्यहृदयानि॥ग्रा
म्यइववृषविलग्नश्चंचलनयनावचोरहस्यानि॥३०॥इतिश्री
शार्ङ्गधरविरचितायांपद्धत्यांमूर्खनिंदापरिच्छेदः॥ ❀ ॥ ❀ ॥

अथतृष्णानिंदा

बलिभिर्मुखमाक्रांतंपलितैरंकितंशिरः॥गात्राणिशिथिलायंतेतृ
ष्णैकातरुणायते॥१॥तृष्णेदेविनमस्तुभ्यंधैर्यविप्लवकारिणि
॥विष्णुस्त्रैलोक्यपूज्योपियस्त्वयावामनीकृतः॥२॥कस्यापि॥
भ्रांतंयाचनतत्परेणमनसादेहीतिवाक्प्रेरिताभुक्तंमानविवर्जि
तंपरगृहेसाशंक माकाकवत्॥ साक्षेपंभ्रुकुटीकटाक्षकुटि

लंदृष्टंखलानांमुखंतृष्णेदेवियदन्यदिच्छसिपुनस्तत्रापिमज्जावयं॥३॥भर्त्तृहरेः॥भ्रांतंदेशमनेकदुर्गविषमंप्राप्तंनकिंचित्फलंत्यक्त्वाजातिकुलाभिमानमुचितंसेवाकृतानिःफला॥भुक्तंमानविवर्जितंपरगृहेसाशंकयाकाकवत्तृष्णेजृंभसिपापकर्मनिरतेनाद्यापिसंतुष्यसि॥४॥नास्त्यन्यात्तृष्णयातुल्याक्वचिदेवनितंबिनी॥याप्राणानपिमुष्णंतिभवत्येवाधिकंप्रिया॥५॥च्युतादंताःसिताःकेशाःदृग्निरोधःपदेपदे॥पातसज्जमिमंदेहंतृष्णासाध्वीनमुंचति॥६॥तृष्णेत्वमपितृष्णांधात्रिषुस्थानेषुवर्त्तसे॥व्याधितेष्वनपत्येषुजरापरिणतेषुच॥७॥धनेषुजीवितव्येषुस्त्रीषुपुत्राशनेष्वपि॥अतृप्तामानवाःसर्वेयातायास्यंतियांतिच॥॥८॥तृष्णेदेविमनस्तुभ्यंयात्वंसर्वस्यसर्वदा॥उत्पादयस्ययतेनगोःपदेसागरभ्रमं॥९॥अपिमेरूपमंप्राज्ञमपिशूरमपिस्थितं॥तृणीकरोतितृष्णैषानिमिषेणनरोत्तमं॥१०॥केषामप्येते॥आशायायेदासास्तेदासाःसर्वलोकस्य॥आशायेषांदासीतेषांदासायतेविश्वं॥११॥उत्खातंनिधिशंकयाक्षितितलंध्मातागिरेर्धातवोनिस्तीर्णःसरितांपतिर्नृपतयोयत्नेनसंतोषिताः॥मंत्राऽऽराधनतत्परेणमनसानीताःश्मशानेनिशाःप्राप्तःकाणवराटकोऽपिनमयातृष्णेऽधुनामुंचमां॥१२॥निवृत्ताभोगेच्छाबहुपुरुषमानोविगलितःसमानाःस्वर्याताःसपदिसुहृदोजीवितसमाः॥शनैर्यष्ट्युत्थानंघनतिमिररुद्धेचनयनेअहोदुष्टःकायस्तदपिमरणाऽपायचकितः॥१३॥आशानामनदीमनोरथजलातृष्णातरंगाऽऽकुलारागग्राहवतीवितर्कविहगाधैर्यद्रुमध्वंसिनी॥मोहाऽऽवर्तसुदुस्तराऽतिगहनाप्रोत्तुंगचिंतातटीतस्याःपारगताविशुद्धमनसानंदंतियोगीश्वराः॥१४॥खलोल्लापाःसोढाःकथमपितदाराधनपरैर्निगृह्यांतर्बाष्पंहसितमपिशून्येनमनसा॥कृतश्चित्तस्तंभःप्रतिहतधियामंजलिरपित्वमाशेमोघाऽऽशेकिमुपरमितोनर्तयसिमां॥१५॥अमीषांप्राणानां

तुलितबिसिनीपत्रपयसांकृतेकिंनाऽस्माभिर्विगलितविवेकैर्व्य
वसितं॥यदाढ्यानामग्रेद्रविणमदनिस्संज्ञमनसांकृतंम्लानव्री
डैर्निजगुणकथापातकमपि॥१६॥ अंगंगलितंपलितंमुंडंदश
नविहीनंजातंतुंडं॥ वृद्धोयातिगृहीत्वादंडंतदपिनमुंचत्याशा
पिंडं॥१७॥तेनाऽधीतंश्रुतंतेनतेनसर्वमनुष्ठितं॥येनाशाःपृष्ठतः
कृत्वानैराश्यमवलंबितम्॥१८॥ निःस्वोऽप्येकशतंशतीदशश
तंसोऽपीहलक्षंशतंलक्षेशःक्षितिराजतांक्षितिपतिश्चक्रेशतां
वांछति॥ चक्रेशःसुरराजतांसुरपतिर्ब्रह्माऽऽस्पदंवांछति ब्रह्मा
विष्णुपदंहरिःशिवपदंतृष्णाऽवधिंकोगतः॥१९॥आशाबलवती
राजन्विपरीताहिशृंखला॥ययाबद्धाःप्रधावंतिमुक्तास्तिष्ठंतिपंगुव
त्॥२०॥गिरिर्महान्गिरेरब्धिर्महानब्धेर्नभोमहत्॥ नभसोऽपि
महद्ब्रह्मततोऽप्याशागरीयसी॥२१॥ मानेनेच्छतिवारयत्यप
शमेक्ष्मामालिखंत्यांह्रियांस्वातंत्र्येपरिहृत्यतिष्ठतिकरौव्याधू
यधैर्येगते॥ तृष्णेत्वामनुबध्नताफलमियत्प्राप्तंजनेनाऽमुनायः
स्पृष्टोनपदासएवचरणौस्प्रष्टुंनसंमन्यते॥२२॥ दंतैरुच्चलितं
धियातरलितंपाण्यंघ्रिणाकंपितंदृग्भ्यांकुड्मलितंबलेनगलि
तंरूपश्रियाप्रोषितं॥ प्राप्तायांयमभूपतेरिहमहाधाट्यांधराया
मियंतृष्णाकेवलमेकिकैवसुभटीधीरापुरोनृत्यति॥२३॥ आशै
वराक्षसीपुंसामाशैवविषमंजरी॥ आशैवजीर्णमदिराधिगाऽ
शासर्वदोषभूः॥२४॥ तेधन्याःपुण्यभाजस्तेतैस्तीर्णःक्लेशसागरः
॥जगत्संमोहजननीयैराशाऽऽशीविषीजिता॥२५॥ शांतेमार्तु
र्विवेकात्पितुरपिकृपणंमंक्षुकृत्वापृथग्भ्रामाशायोषास्वतंत्रा
व्रजतिपरगृहान्सर्वदावीतलज्जा॥ संधत्तेमत्कृशत्वंममयम
नियमौभ्रातरौभर्त्सयंतीपुष्टांचैवात्मबंधूंस्तदपिपुनरहोहंतवं
ध्यांश्रयामः॥२६॥ आशाऽवलंबोपचितानकस्यतृष्णालताऽन
र्थफलंप्रसूते॥ दिनेदिनेलब्धरुचिर्विवस्वान्मीनंचमेषंचवृषं
चभुंक्ते॥२७॥ क्षुत्तृडाशाःकुटुंबिन्योमयिजीवतिनान्यगाः॥

तासामाशामहासाध्वीकदाचिन्मांनमुंचति॥२८॥ तृष्णाहिचेत्स
रित्यक्ताकोदरिद्रःकईश्वरः॥ तस्याश्चेत्प्रसरोदत्तोदास्यंचशिरसि
स्थितं॥२९॥ यौवनंजरयाग्रस्तमारोग्यंव्याधिभिर्हतं॥ जीवितंमृ
त्युरभ्येतितृष्णैकानिरुपद्रवा॥३०॥ त्वामुदरसाधुमन्येशाकैरपि
यदसिलब्धपरितोषं॥ हतहृदयंह्यधिकाधिकवांछाशतदुर्भरं
नपुनः॥३१॥ आशानिष्ठाप्रतिष्ठाःकिलमममहिलास्तास्कैसो
रव्यंकदाचिद्यांप्रांत्यासाप्रदद्यादिहकिमपितथामध्यमासापरत्र
॥आद्यासानोभयत्राऽप्यहहतदपिकिंसक्ततांयामितस्यांयाप्रौ
ढ्यादप्रगल्भेप्रतिदिवसमुभेतेकदर्थीकरोति॥३२॥ इतिश्रीशा
र्ङ्गधरविरचितायांपद्धत्यांतृष्णानिंदापरिच्छेदः॥ छ ॥ छ ॥

अथलोभनिंदा

लोभंसदाविचिंत्योलुब्धेभ्यःसर्वतोभयंदृष्टं॥ कार्याकार्यविचारो
लोभविमूढस्यनास्त्येव॥१॥ अतिसाहसमतिदुःकरमत्याश्चर्यं
चदानमर्थानां॥योपिददातिशरीरंनददातिसवित्तलेशमपि॥
॥२॥ केचित्स्वभावलुब्धास्तीव्रतरांयातनामपिसहंते॥नतुसं
त्यजंतिवित्तंमात्सर्यमिवाधमाःसततं॥३॥ मेघाइवातिलुब्धा
भवंतिधनलवणवारिबहुतृष्णाः॥ तृणलववन्निजदेहंत्यज
तिलेशंनवित्तस्य॥४॥सत्यप्रशमतपोभिःसत्यधनैःशास्त्रवेदि
भिर्विजितः॥ लोभोवतप्रविष्टःकुटिलंहृदयंकिरातीनां॥५॥
एतेक्षेमेंद्रस्य॥ नात्यर्थमर्थार्थितयालुब्धउद्वेजयेज्जनं॥अ
ब्धिर्दत्वाश्वरत्नस्त्रीर्मथ्यमानोसृजद्विषं॥६॥ प्रायेणधनिना
मेवधनलोभोनिरंतरं॥पश्यकोटिद्वयोपेतंलक्षायप्रणतंधनुः
॥७॥ एतौकयोरपि॥ यद्दुर्गामटवीमटंतिविकटंक्रामंतिदेशांत
रंगाहंतेगहनंसमुद्रमदनक्लेशंकृषिंकुर्वते॥सेवंतेकृपणंपतिं
गजघटासंघट्टदुःसंचरंसर्पंतिप्रधनंधनांधितधियस्तल्लोभ
विस्फूर्जितं॥८॥ इतिश्री शार्ङ्गधरविरचितायांपद्धत्यांलोभ
निंदापरिच्छेदः॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

अथदानप्रशंसावर्णनं

अनुकूलेविधौदेयंयतःपूरयिताहरिः॥प्रतिकूलेविधौदेयंयतः॰
सर्वंहरिष्यति॥१॥दातव्यंभोक्तव्यंसतिविभवेसंग्रहोनकर्त्त॰
व्यः॥पश्यामिमधुकरीणांसंचितमर्थंहरंत्यन्ये॥२॥चिराद्यत्कौ
तुकाविष्टंकल्पवृक्षमुदीक्षितुं॥तन्मेसफलमद्यासीन्नेत्रंत्वय्य
वलोकिते॥३॥सर्वदासर्वदोसीतिमिथ्यासंस्तूयसेजनैः॥नार॰
योलेभिरेपृष्ठंनवक्षःपरयोषितः॥४॥त्वयावीरगुणाकृष्टाकृत
दृष्ट्याविलोकिताः॥लक्ष्यंलब्ध्वैवगच्छंतिमार्गणाइवमार्गणाः
॥५॥कल्पद्रुमोनजानातिनददातिबृहस्पतिः॥अयंतुजगतीजा
निर्जानातिचददातिच॥६॥रविःकरसहस्रेणदशाशापरिपूरकः
॥त्वमेकेनकरेणैवसहस्राशाप्रपूरकः॥७॥उदेतिपूर्वंकुसुमं
ततःफलंघनोदयःप्राक्तदनंतरंपयः॥निमित्तनैमित्तिकयोरयं
विधिस्तवप्रसादस्यपुरस्तुसंपदः॥८॥देवत्वत्करनीरदेदिशि
दिशिप्रारब्धपुण्योन्नतौचंचत्कांचनरत्नराजितडितिस्वर्णामृ॰
तंवर्षति॥स्फीताकीर्त्तितरंगिणीसमभवत्तृष्णागुणग्रामभूःपू॰
र्णंचार्थिसरःशशामविदुषांदारिद्र्यदावानलः॥९॥हस्तन्यस्तकुशो
दकेत्वयिनभूःसर्वंसहावेपतेदेवागारतयासकांचनगिरिश्चि
त्तेनधत्तेभयं॥अज्ञातद्विपभिक्षभिक्षुककुलावस्थानदुस्थाशया
वेपंतेमददंतिनःपरममीभूमीयतेतावकाः॥१०॥अनेनसर्वार्थि
कृतार्थताकृताहतार्थिनौकामगवीसुरद्रुमौ॥मिथःपयःसेच
नपल्लवाशनेप्रदापदानव्यसनंसमापतुः॥११॥देवत्वामसमा
नदानविहितैरर्थैःकदर्थीकृतेत्रैलोक्येफलभारभंगुरधियाक॰
ल्पद्रुमोनिंदति॥कंठच्छेदनवेदनाविरमणात्संजातसौख्यस्थि
तिःप्राचीनव्रणितांगरोहणतयाश्रीरोहणःस्तौतिच॥१२॥क॰
वीनांसंतापोभ्रमणमभितोदुर्गतिरितित्रयाणांपंचत्वंरचयसिन
तच्चित्रमधिकं॥चतुर्णांवेदानांस्मरसिनवतावीरभवताद्विषत्से
नालीनामयुतमपिलक्षंत्वमकृथाः॥१३॥अर्थिभ्रंशावहूमवत्क

लभरव्याजेनकुब्जायितःसत्यस्मिन्नतिदानभाजिकथमप्यास्तांसकल्पद्रुमः॥आस्तेनिर्व्ययरत्नसंपदुदयोदग्रःकथंयाचकश्रेणीवर्जनदुर्यशोनिविडितव्रीडस्तुरत्नाचलः॥१४॥बलिःपातालनिलयोधःकृतश्चित्रमत्रकिं॥अधःकृतोदिविस्थोपिचित्रंकल्पद्रुमस्त्वया॥१५॥मुक्ताःकेलिविसूत्रहारगलिताःसम्मार्जनीभिःहृताःप्रातःप्रांगणसीम्निमंथरचलद्बालांघ्रिलाक्षारुणाः॥दूराद्दाडिमबीजशंकितधियःकर्षंतिकेलीशुकायद्विद्वद्भवनेषुदेवभवतस्त्यागलीलायितं॥१६॥भिक्षुद्वारिसदानवारिमधुपश्रेणीमिमांदूभ्रमान्धत्तेयंतृवधूर्वधूकरतलंशोणांबुजाशंकया॥सैवान्वेतिपलायितेतिचकिताहस्ताग्रमाधुन्वतीमुग्धावीरमहीपतेस्तदखिलंत्वद्दानलीलायितं॥१७॥वीरश्रीक्षितिपालतेसुललितंदानोद्यमेयद्वचःक्वास्तेसर्वेहिरण्यमित्यकृद्भक्तत्कालमाकर्ण्यतत्॥तापःप्रायहिरण्यरेतसिजनिंजाड्यंहिरण्याचलेखेदंभोपिहिरण्यगर्भवपुषिस्वापायसंत्रासतः॥१८॥कर्णाटंदेहिकर्णाधिकविधिविहितत्यागलाटंललाटप्रोत्तुंगद्राविडंवाप्रचलभुजचलप्रौढिमागाढराढं॥प्रास्फुर्जद्गुर्जरंवादलिततरिपुवधूगर्भचैदर्भकंवागतोराजीवदृष्टेकुशशातमथवाशाहृतल्लालदींद्रः॥१९॥यद्व्यातीर्यतधनंसुरवृक्षैःपंचभिःसहवनीपकवृंदे।तावदेवचकरोत्स्थभुजोंतःप्राहिणोद्धिधृतपंचसुशाखः॥२०॥मन्येस्पर्शमणिंतवैनमतुलंपाणिंद्विजाभ्यर्चनेदुर्वर्णान्यपिभिक्षुभालफलकान्यासन्सुवर्णानियत्॥तच्चित्रंपरमत्रमित्रभवतादत्ताःस्वहस्तादिमादुर्वर्णानसुवर्णतामुपगताःक्षुद्रास्तुमुद्राःकथं॥२१॥संतप्तश्रमहारिशीतलतलेपुण्याश्रमालंकृताबुधदैवदवानलेनकलितेविद्वत्तरूणांचये॥सद्योवर्षसुवर्णवारिदविभोस्वर्णांबुधारास्ततोविश्वव्यापियशाःशिरोवनिभृतामाकम्पनंदानिशं॥२२॥इंदुस्त्वद्यशसाजितोवनिपतेभासांनिधिस्तेजसाकंदर्पोवपुषासुधाजलनिधिर्वाचोविलासेनच॥तथ्यंतेजयशीलमेतदधुनात्वद्दानमहैन्ययोर्मध्येतुंनविजेष्यतीतिविषयेदोलायतेमेमनः॥२३॥इतिदानवर्णनं

अथकलिमहिमा

नदेवेदेवत्वंकपटपटवस्तापसजनाजनोमिथ्यावादीविरलतनुवृष्टिर्जलधरः॥प्रसंगोनीचानामवनिपतयोदुष्टमनसोजनाभ्रष्टानष्टाअहहकलिकालःप्रभवति॥१॥निर्वीर्यापृथिवीनिरोषधिरसानीचामहत्त्वंगताभूपालानिजकर्मधर्म रहिताविप्राःकुमार्गेरताः॥भार्याभर्तृविरोधिनीपररतापुत्राःपितुर्द्वेषिणोहाकष्टंखलुवर्ततेकलियुगेधन्यानराःसज्जनाः॥२॥सीदंतिसंतोविलसंत्यसंतःपुत्राम्रियंतेजनकश्चिरायुः॥परेषुमैत्रीस्वजनेषुवैरंपश्यंतुलोकाःकलिकौतुकानि॥३॥दूरादर्थिनमाकलय्यभजतेसद्योविरूपाक्षतांसंगेकिंचविरोचनत्वमथसंस्थानेनृसिंहाऽऽकृतिं॥पांडित्योक्तिषुवक्रतुंडरचनांदानेत्वपर्णात्मतामेकःपंचमुरात्मकप्रभुरहोभाग्यैःकलौलभ्यते॥४॥कुशलाःशब्दवार्तायांवृत्तिहीनासुरागिणः॥कलौवेदांतिनोभांतिफाल्गुनेबालकाइव॥५॥धर्मःप्रव्रजितस्तपःप्रचलितंसत्यंचदूरेगतंपृथ्वीमंदफलानृपाश्चकुटिलालौल्यंगताब्राह्मणाः॥लोकाःस्त्रीषुरताःस्त्रियश्चचपलाःपुत्राःपितुर्द्वेषिणःसाधुःसीदतिदुर्जनःप्रभवतिप्राप्तेकलौदुर्युगे॥६॥संतःक्वाऽपिनसंतिसंतियदिवादुःखेनजीवंतितेविद्वांसोऽपिनसंतिसंतियदिवामात्सर्ययुक्ताश्चते॥राजानोऽपिनसंतिसंतियदिवातृष्णाधनग्राहिणोदातारोऽपिनसंतिसंतियदिवासेवाऽनुकूलाःकलौ॥७॥हर्म्यस्थानमधर्मकर्मवितते दुर्मानभर्माःसनंशास्त्रस्तोमललाटभूलिपिलयःशांतिःसवानामपि॥सर्वाम्नायवचःसमापनदिनंसंध्यासदर्चाविधेरर्थोऽशाजनिभूरभूदिहमहाऽनर्थावहोऽयंकलिः॥८॥सीदंतिचाग्निहोत्राणिगुरुपूजाप्रणश्यति॥कुमार्यश्चप्रसूयंतेप्राप्तेकलियुगेसदा॥९॥परान्नेनमुखंदग्धंहस्तौदग्धौप्रतिग्रहात्॥परस्त्रीभिर्मनोदग्धंकुतःशापःकलौयुगे॥१०॥राक्षसाःकलिमाश्रित्यजायंतेब्रह्मयोनिषु॥ब्राह्मणानेवबाधंतेतथाऽपिश्रोत्रियान्कृशान्॥११॥प्रातर्हतकृताःपूर्वोऽपिरजकस्पृष्टान्जडो

रासभै रूढान्धारयतेपटाननुदिनंधृत्वावहिर्गच्छति॥गत्वाम्लेच्छमुखाऽप्राचीन्स्पृशतिचस्पृष्ट्वाऽपिनस्नात्यहोनस्नातोऽप्यथभुंक्तएवचपलोभुक्त्वाऽपिनक्रीडति॥१२॥शास्त्रैर्जीवतिशास्त्रमुज्झतिपरंशूद्राऽऽहृतैरंबुभिःस्नात्वाऽचामतिदेवताःस्नपयतिस्वैरंपचत्योदनं॥उच्छिष्टान्नबिभेतियातियवनैरुच्चावचैःसंगतिंमातंगान्निकटंगतानगणयन्मार्गान्मुहुर्गाहते॥१३॥नीचैर्दुर्यवनैःशुनीभिरपिवानिःशंकमालोकितंभुंक्तेपंक्तिविदूषकैःसहनैरज्ञातवेदाऽक्षरैः॥मद्याऽऽस्वादनमत्तचित्तजनतामोहायधीहानितःकर्माण्यारभतेश्रुतिस्मृतिवचोदूराण्यसाराण्यहो॥१४॥ कन्यांकामप्युदूह्यप्रविजहदुदययौवनामत्तएनो द्रव्याऽऽशापाशकृष्टोभ्रमतिचिरतरंहंतदेशांतरेषु॥अन्योन्याऽऽश्लेषवांछाविगलितवयसोरातमालिन्यमत्योर्दंपत्योर्व्याकृतैवंहतविधिरुभयोर्लोकयोःशोकयोगं॥१५॥ नाधीतेऽजनोयदिकश्चिदधीतेशतेसहस्रेवा॥दुस्तर्केषुभ्राम्यतिदूरीकुरुतेश्रुतिस्मृतिसुतर्कान्॥१६॥एतादृशेकलियुगेऽपिशतेषुकश्चिज्जाताऽऽदरोजगतियःश्रुतिमार्गएव॥यत्किंचिदाचरतिपात्रमसौस्तुतीनांश्लाघ्यंमिताऽपमपिकिंनमरौसरश्चेत्॥१७॥विहृत्तावसुधातलेविगलितापांडित्यधर्मोगतःश्रोतॄणांहृदयेष्ववुद्धिरधिकाज्ञानंगतंचारणे॥गाथागीतविनोदवाक्यरचनायुक्त्याजगद्रंजितंज्योतिर्वैद्यकशास्त्रसारमखिलंसुद्रेषुजातंकलौ॥१८॥ मद्युगमध्योत्पन्नाःकृतयुगधर्मानुसारिणःकिमिति॥इतिरोषादिवकलिनापीड्यंतेसाधवोजगति॥१९॥ यवनैरवनिःक्रांताहिंदवोविंध्यमाविशन्॥ बलिनावेदमार्गोयंकलिनाकवलीकृतः॥२०॥ सौहार्दंशशशृंगवत्क्वजनतावंध्यासुतस्पर्धिनीकिंब्रूमोगुणिनांगुणग्रहिलताव्योमप्रसूनोपमा॥दृष्टिःशीलसुधाहलाहलमयीराज्ञांसुधामंडलेलोकेसंप्रतियत्कलेसजयतित्वदृष्टिलीला

रसः॥२१॥ गतागीतानाशंक्वचिदपिपुराणंव्यपगतंविलीनाःस्मृत्यर्थानिगमनिचयोदूरमगमत्॥ इदानींरैदासप्रभृतिवचनैर्मोक्षपदवीतदेवंजानीमोकलियुगतवैवैषमहिमा॥२२॥ इति०

अथकलिविडंबनं

नभेतव्यंनबोद्धव्यंनश्राव्यंवादिनोवचः॥ झटितिप्रतिवक्तव्यंसभासुविजिगीषुभिः॥१॥ उच्चैरुद्घुष्यजेतव्यंमध्यस्थश्चेदपंडितः॥ पंडितोयदितत्रैवपक्षपातोऽधिरोप्यतां॥२॥ स्तोतारःकेभविष्यंतिमूर्खस्यजगतीतले॥ नस्तौतिचेत्स्वयंचस्वंकदातस्याऽस्तुनिर्वृत्तिः॥३॥ वाच्यतांसमयोऽतीतःस्पष्टमग्रेभविष्यति॥ इतिपाठयतांग्रंथेकाठिन्यंकुत्रवर्तते॥४॥ अगतित्वमतिश्रद्धा ज्ञाऽनाभ्यासेनतृप्तता॥ त्रयःशिष्यगुणाह्येतेमूर्खाचार्यस्यभाग्यजाः॥५॥ यदिनक्वाऽपिविद्यायांसर्वथाक्रमतेमतिः॥ मांत्रिकास्तुभविष्यामोयोगिनोयतयोऽपिवा॥६॥ अविलंबेनसंसिद्धौमांत्रिकैराप्यतेयशः॥ विलंबेकर्मबाहुल्यंविख्याप्याऽवाप्यतेधनं॥७॥ चारान्विचार्यदैवज्ञैर्वक्तव्यंभूभृतांफलं॥ गृहाचारपरिज्ञानंतेषामावश्यकंयतः॥८॥ पुत्रइत्येवपितरिकन्यकेत्येवमातरि॥ गर्भप्रश्नेषुकथयन्दैवज्ञोविजयीभवेत्॥९॥ आयुःप्रश्नेदीर्घमायुर्वाच्यंमौहूर्तिकैर्द्विजैः॥ जीवंतोबहुमन्यंतेमृताःप्रक्ष्यंतिकेपुनः॥१०॥ निःर्धनानांधनाऽवाप्तिर्धनिनामधिकंधनं॥ ब्रुवाणाःसर्वथाश्लाघ्यालोकेज्यौतिषिकानराः॥११॥ अपिसागरपर्यंताविचेतव्यावसुंधरा॥ देशोऽप्यरत्निमात्रोऽपिनाऽस्तिदैवज्ञवर्जितः॥१२॥ स्वस्थैरसाध्यरोगैश्चजंतुभिर्नाऽस्तिकिंचन॥ कातरादीर्घरोगाश्चभिषऽजांभाग्यहेतवः॥१३॥ नाऽतिधैर्यंप्रदातव्यंनाऽतिभीतिश्चरोगिणां॥ नैश्चिंत्यादादिमेदानंनैराश्यादेवनाऽतिमे॥१४॥ भैषज्यंतुयथाकामंपथ्यंतुकठिनंवदेत्॥ आरोग्यंवैद्यमाहात्म्यादन्याऽथात्वमपथ्यतः॥१५॥ निदानंरोगनामानिसाध्यासाध्यंचिकित्सितं॥ सर्वमप्युपदेक्ष्यंतिरोगिणःसदनेस्त्रियः॥१६॥ प्रवर्त्तं

नार्थमारंभेमध्येत्वौषधहेतवे॥बहुमानार्थमंतेचजिहीर्षंति चिकित्सकाः॥१७॥रोगस्योपक्रमेसांत्वंमध्येकिंचिद्धनव्ययः॥शनैर्नादरःशांतौस्नातोवैद्यंनपश्यति॥१८॥दैवज्ञत्वंमांत्रिकताभैषज्यंचाटुकौशलं॥एकैकमर्थलाभायद्वित्रियोगास्तु दुर्लभाः॥१९॥नकारणमपेक्षंतेकवयस्तोतुमुद्यताः॥किंचिदस्तुवतांतेषांजिह्वाफुरफुरायते॥२०॥एकैवकवितापुंसांग्रामायाऽश्वायहस्तिने॥अंततोऽन्नायवस्त्रायतांबूलायचकल्पते॥२१॥मातुलस्यबलंमाताजामातुर्दुहितावलं॥श्वशुरस्यबलंभार्यास्वयमेवाऽतिथेर्बलं॥२२॥भार्येद्वेपुत्रशालिन्यौभगिन्यःपतिवर्जिताः॥अश्रांतकलहोनामयोगोऽयंगृहमेधिनां॥२३॥द्वेभार्येबहवःपुत्रादारिद्र्यंरोगसंभवः॥जीर्णौचमातापितरावेकैकंमरणाऽधिकं॥२४॥अंतकोऽपिहिजंतूनामंतकालमुपेक्षते॥नकालनियमःकश्चिदुत्तमर्णस्यविद्यते॥२५॥नपश्यामोमुखेदंष्ट्रांनपाशंवाकरांचले॥उत्तमर्णमवेक्ष्यैवतथाऽप्युद्विजतेजनः॥२६॥शत्रौसांत्वंप्रतीकारःसर्वरोगेषुभेषजं॥मृत्यौमृत्युंजयध्यानंदारिद्र्येनतुकिंचन॥२७॥शक्तिंकरोतिसंचारेशीतोष्णोमर्षयत्यपि॥दीपयत्युदरेवह्निंदारिद्र्यंपरमौषधं॥२८॥प्रामाण्यबुद्धिःस्तोत्रेषुदेवताबुद्धिरात्मनि॥कीटबुद्धिर्मनुष्येषुनूतनायाःश्रियःफलं॥२९॥क्षणमात्रग्रहाऽऽवेशोयाममात्रंसुरामदः॥लक्ष्मीमदस्तुमूर्खाणामादेहमनुवर्तते॥३०॥अध्यापयंतिशास्त्राणितृणीकुर्वंतिपंडितान्॥विस्मारयंतिजातिंस्वांवराटाःपंचषाःकरे॥३१॥कौपीनंभस्मनालेपोदर्भारुद्राक्षमालिका॥मौनमेकांतिकाचेतिमूर्खसंजीवनानिषट्॥३२॥आनंदबाष्परोमांचौयस्यस्वेच्छावशंवदौ॥किंतस्यसाधकैरन्यैःकिंकराःसर्वपार्थिवाः॥३३॥सदाजपपटोहस्तेमध्येमध्येऽक्षिमीलनं॥सर्वंब्रह्मेतिवादश्चसद्यःप्रत्ययहेतवः॥३४॥आमध्याह्नंनदीवासःसमाजंदेवताऽर्चनं

सततंशुचिवेषश्चएतत्सभ्यस्यजीवनं॥३५॥तावद्दीर्घंनित्यकर्मयावत्स्याद्दुष्टमेलनं॥तावत्संक्षिप्यतेसर्वंयावद्दुष्टानविद्यते॥३६॥यत्रभार्यागिरोवेदायत्रधर्मोऽर्थसाधनं॥यत्तस्यप्रतिभामानेतस्मैश्रीकलयेनमः॥३७॥ ॥इतिकलिविडंबनम्॥

अथदैवाख्यानं

ब्रह्मायेनकुलालवन्नियमिताब्रह्मांडभांडोदरेविष्णुर्येनदशावतारगहनेक्षिप्तोमहासंकटे॥रुद्रोयेनकपालपाणिपुटकेभिक्षाटनंकारितः सूर्योभ्राम्यतिनित्यमेवगगनेतस्मैनमःकर्मणे॥१॥क्वचित्पाणौपात्रंघटितमपिकार्यंविघटयस्यशक्यंकेनापिक्वचिद्घटमानंघटयति॥तदेवंसर्वेषामुपरिपरितोजाग्रतिविधावुपालंभःकोयंजनतनुधनोपार्जनविधौ॥२॥रामचंद्रभट्टानां॥नमस्यामोदेवान्ननुहतविधेस्तेपिवशगाविधिर्वंद्यःसोपिप्रतिनियतकर्मैकफलदः॥फलंकर्मायत्तंयदिकिममरैःकिंचविधिनानमस्तत्कर्मभ्योविधिरपिनयेभ्यःप्रभवति॥३॥खल्वाटोदिवसेश्वरस्यकिरणैःसंतापितोमस्तकेवांछन्देशमनातपंविधिवशाद्बिल्वस्यमूलंगतः॥तत्राप्यस्यमहाफलेनपतताभग्नंसशब्दंशिरःप्रायोगच्छतियत्रभाग्यरहितस्तत्रापियांत्यापदः॥४॥मज्जत्वंभसियातुमेरुशिखरंशत्रूञ्जयत्वाहवेवाणिज्यंकृषिसेवनादिसकलाविद्यांकलाःशिक्षतु॥आकाशंविपुलंप्रयातुखगवत्कृत्वाप्रयत्नंपरंनाभाव्यंभवतीहकर्मवशतोभाव्यस्यनाशःकुतः॥५॥भर्तृहरेः॥स्ववशःकरोतिकर्मप्रमादनस्तुपरवशोभवति॥स्ववशोरोहतिवृक्षेनिपतत्यवशस्ततःपुरुषः॥६॥किंत्वंनवेत्सिजगतिप्रख्यातंलाभकारणेमूलं॥विधिलिखिताक्षरमालंफलतिकपालंनभूपालः॥७॥द्वीपादन्यस्मादपिमध्यादपिजलनिधेर्दिशोप्यंतात्॥आनीयझडितिघटयतिविधिरभिमतमभिमुखीभूतः॥८॥भाग्यवंतंप्रसूयेथामाशूरंमाचपंडितं॥शूराश्चकृतविद्याश्चवनेसीदंतिपांडवाः॥९॥गजभुजं

गविहंगमवंधनंशशिदिवाकरयोर्ग्रहपीडनं।। मतिमतांचनिरीक्ष्यदरिद्रतांविधिरहोवलवानितिमेमतिः।।१०।। नकेवलंमनुष्येषुदैवंदेवेष्वपिप्रभुः।।सतिमित्रेधनाध्यक्षेचर्मप्रावरणोहरः।।११।। अंभोधिःस्थलतांस्थलंजलधितांधूलीलवःशैलतांमेरुर्मृत्कणतांतृणंकुलिशतांवज्रंतृणक्लीवतां।। वन्हिःशीतलतांहिमंदहनतामायातियस्येच्छयालीलादुर्ललिताद्भुतव्यसनिनेदैवायतस्मैनमः।।१२।। अरक्षितंतिष्ठतिदैवरक्षितंसुरक्षितंदैवहतंविनश्यति।।जीवत्यनाथोऽपिवनेप्यरक्षितःकृतप्रयत्नोपिगृहेविनश्यति।।१३।। सच्छिद्रोमध्यकुटिलःकर्णःस्वर्णस्यभाजनं।।दिग्धैवंनिर्मलंनेत्रंपात्रंकज्जलभस्मनः।।१४।। दाताबलिःप्रार्थयिताचविष्णुर्दानंचभूर्वाजिमखस्यकालः।। नमोस्तुतस्मैभवितव्यतायैयस्याःफलंबंधनमेवजातं।।१५।। केषामप्येते।।भगवंतौजगन्नेत्रेसूर्याचन्द्रमसावपि।।पश्यगच्छतएवास्तंनियतिःकेनलंघ्यते।।१६।। दंडिनः।। प्रतिकूलतामुपगतेहिविधौविफलत्वमेतिबहुसाधनता।। अवलंबनायदिनभर्तुरभून्नपतिष्यतःकरसहस्रमपि।।१७।।माघकवेः।। प्रियसखिविपद्दंडप्रांतप्रपातपरंपरापरिचयचलेचिंताचक्रेनिधायविधिःखलः।। मृदमिवबलात्पिंडीकृत्यप्रगल्भकुलालवद्भ्रमयतिमनोजानीमःकिमत्रकरिष्यति।।१८।। विज्जकायाः।। किंकरोतिनरःप्राज्ञःशूरोवाप्यथपंडितः।।दैवोयस्यछलान्वेषीकरोतिविफलाःक्रियाः।।१९।।चाणक्यस्य।। यन्मनोरथशतैरगोचरंनस्पृशंतिकवयोगिरापियत्।।स्वप्नवृत्तिरपियत्रदुर्लभालीलयैवविदधातितद्विधिः।।देवगणस्य।।२०।।प्राप्तव्यमर्थंलभतेमनुष्योदेवोऽपितंलंघयितुंनशक्तः।।तस्मान्नशोचामिनविस्मयोमेयदस्मदीयंनहितत्परेषां।।२१।। माधावमाधावविनैवदैवंनोधावनंसाधनमस्तिलक्ष्म्याः।।चेन्नावनंसाधनमस्तिलक्ष्म्याःश्वाधावमानोनलभेतलक्ष्मीं।।२२।।दैवविमुखतांयातेनकोऽप्यस्ति

सहायवान्॥पितामातातथाभार्याभ्रातावाऽथसहोदरः॥२२॥भूयिष्ठंद्रविणात्मजंजनयितुंलिप्सावताचेतसानार्यःपंचमयाक्रमेणकुलजाःकालेसमुद्वाहिताः॥सद्विद्याकविताविदेशवसतिःसेवातथाऽभ्यर्थनादैवेनप्रतिबंधकेनयुगपद्वंध्याःसमस्ताःकृताः॥२३॥ईशःकरस्थीकृतकांचनाद्रिःकुबेरमित्रोरजताऽचलस्थः॥तथाऽपिभिक्षाऽटनमस्यजातंविधौशिरस्थेकुटिलेकुतःश्रीः॥२४॥ यद्धात्रानिजभालपट्टलिखितंस्तोकंमहद्वाधनंतत्प्राप्नोतिमरुस्थलेऽपिनितरांमेरौततोनाऽधिकं॥तद्धीरोभववित्तवत्सुकृपणांवृत्तिंवृथामाकृथाःकूपेपश्यपयोनिधावपिघटोगृह्णातितुल्यंजलं॥२५॥नेतायस्यबृहस्पतिःप्रहरणंवज्रंसुराःसैनिकाःस्वर्गोदुर्गमनुग्रहःकिलहरेरैरावतोवारणः॥इत्याश्चर्यबलाऽन्वितोऽपिबलिभिर्भग्नःपरैःसंगरेतद्युक्तंवरमेवदैवशरणंधिग्धिग्वृथापौरुषं॥२६॥भग्नाऽशस्यकरंडपीडिततनोर्म्लानेंद्रियस्यक्षुधाकृत्वाऽऽखुर्विवरंस्वयंनिपतितोनक्तंमुखेभोगिनः॥तृप्तस्तत्पिशितेनसत्वरमसौतेनैवयातःपथालोकाःपश्यतद्दैवमेवहिनृणांवृद्धौक्षयेकारणं॥२७॥सृजतितावदशेषगुणाऽकरंपुरुषरत्नमलंकरणंभुवः॥तदपितत्क्षणभंगिकरोतिचेदहहकष्टमपंडितताविधेः॥२८॥स्वयंमहेशःश्वशुरोनगेशःसखाधनेशस्तनयोगणेशः॥तथाऽपिभिक्षाऽटनमेवशंभोर्बलीयसीकेवलमीश्वरेच्छा॥२९॥यद्यपिदैवाल्लब्धाकस्तूरीभूमिरत्रभूरितरं॥नेयाकिमसौतदपिहिशौचार्थंजानतापुंसा॥३०॥दैवमुल्लंघ्ययत्कार्यंक्रियतेफलवन्नतत्॥सरोंभश्चातकेनाऽत्तंगलरंध्रेणगच्छति॥३१मातायस्यधराधरेंद्रदुहितातातोमहेशस्तथाभ्राताविघ्नकुलांतकःपितृसखोदेवोधनानांपतिः॥ख्यातःक्रौंचविदारणेसुरपतेःसेनाग्रगःषण्मुखस्तत्तुदैवबलेनकुत्रघटतेनाऽद्यापिपाणिग्रहः॥॥३२॥अनुकूलेसतिधातरिभवत्यनिष्टादपीष्टमविलंबं॥पीत्वाविषमपिशंभुर्मृत्युंजयतामवापतत्कालं॥३३॥अनुचितमेवाऽ

चरितंपशुपतिनायद्विधेःशिरश्छिन्नं॥ छिन्नोनचाऽस्यहस्तोये
ना यंदुर्लिपिंलिखति॥३४॥कांश्चित्तुच्छयतिप्रपूरयतिवाकां
श्चिन्नयत्युन्नतिंकांश्चि त्पातविधौकरोतिचपुनःकांश्चिन्न
यत्याकुलान्॥अन्योन्यंप्रतिपक्षसंहतिमिमांलोकस्थितिंबो
धयन्नेषक्रीडतिकूपयंत्रघटिकान्यायप्रसक्तोविधिः॥३५॥सद
सिविदुरभीष्मद्रोणशारद्वतानांपतिभिरमरकल्पैःपंचभिःपालि
ताऽपि॥अहहपरिभवस्यद्रौपदीपात्रमासीद्बलवतिसतिदैवेबं
धुभिःकिंविधेयं॥३६॥पिबंतिमधुपद्मेषु भृंगाःकेसरधूसराः॥हं
साःशैवालमश्नंतिधिग्दैवमसमंजसं॥३७॥करोतुनामनीतिज्ञो
व्यवसायमुदारधीः॥फलंपुनस्तदेवास्ययद्विधेर्मनसिस्थितं॥
३८॥तुल्यंभूभृतिजन्मतुल्यमुभयोर्मूल्यंचतुल्यंवपुस्तुल्यंदार्ढ्य
मुदग्रटंकदलनंतुल्यंचपाषाणयोः॥एकस्याखिलवंदनायविधि
नादेवत्वमारोपितंतद्वारेविहितापरस्यतुपदाघातास्पदंदेहली
॥३९॥निपततिकिलदुर्बलेषुदैवंतदवितथंननुयेनकारणेन॥ब
लवतिनतथायथाऽबलानांप्रभवतिकृष्टशरासनोमनोभूः॥४०
यद्भग्नंधनुरीश्वरस्यसमरेयज्जामदग्न्योजितस्त्यक्तायेनगुरो
र्गिरावसुमतीसेतुःपयोधौकृतः॥एकैकंदशकंधरक्षयकृतोराम
स्यकिंवर्ण्यतेदैवंवर्णययेनसोपिसहसानीतःकथाशेषतां॥४१
॥इतिश्रीशार्ङ्गधरविरचितायांपद्धत्यांदैवाख्यानपरिच्छेदः॥७॥

॥अथोद्यमाख्यानम्॥

नदैवमतिसंचिंत्यत्यजेदुद्योगमात्मनः॥अनुद्यमेनकस्तैलंतिले
भ्यःप्राप्तुमर्हति॥१॥उद्योगिनंपुरुषसिंहमुपैतिलक्ष्मीदैवंप्रमाण
मितिकापुरुषावदंति॥दैवंनिहत्यकुरुपौरुषमात्मशक्त्यायत्ने
कृतेयदिनसिद्ध्यतिकोत्रदोषः॥२॥कृष्णमिश्रस्य॥विहायपौरु
षंयोहिदैवमेवावलंबते॥प्रासादशृंगवत्तस्यमूर्ध्नितिष्ठतिवायसाः
॥३॥उद्योगेनहिसिद्ध्यंतिकार्याणिनमनोरथैः॥नहिसुप्तस्यसिं
हस्यप्रविशंतिमुखेमृगाः॥४॥पूर्वजन्मजनितंपुराविदःकर्म

दैवमितिसंप्रचक्षते॥ उद्यमेनतदुपार्जितंचिरादैवमुद्यमवशंनतत्कथं॥५॥ दैवंपुरुषकारेणसाध्यसिद्धिनिबंधनं॥ योतिक्रमितुमिच्छेतसल्लोकेनावसीदति॥६॥ योजनानांशतैर्गच्छेत्सहस्त्रंतुपिपीलिका॥ अगच्छद्वैनतेयोपिपदमेकंनगच्छति॥७॥ कामपिश्रियमासाद्ययस्तहृष्टोनचेष्टते॥ तस्यायतिपुनश्रेयोवीजभोजिकुटुंबिवत्॥८॥ संपदासुस्थितंमन्योभवतिस्वल्पयापियः॥ कृतकृत्योविधिर्मन्येवनर्धयतितस्यतां॥९॥ असंपादयतःकिंचिदर्थंजातिक्रियागुणैः॥ यदृच्छाशब्दवत्पुंसःसंज्ञायैजन्मकेवलं॥१०॥ उद्योगःखलुकर्त्तव्यःफलंमार्जारवद्भवेत्॥ जन्मप्रभृतिगौर्नास्तिपयःपिबतिनित्यशः॥११॥ उद्यमःसाहसंधैर्यंबुद्धिःशक्तिःपराक्रमः॥ षडेतेयत्रवर्तंतेतत्रदेवःसहायकृत्॥१२॥ उद्योगिनःकराऽऽलंबंकरोतिकमलाऽऽलया॥ अनुद्योगिकराऽऽलंबंकरोतिकमलाऽग्रजा॥१३॥ काकतालीयवत्प्राप्तंदृष्ट्वाऽपिनिधिमग्रतः॥ नस्वयंदैवमादत्तेपुरुषार्थमपेक्षते॥१४॥ आलस्यंहिमनुष्याणांशरीरस्थोमहान्रिपुः॥ नास्त्युद्यमसमोबंधुःकृत्वायंनाऽवसीदति॥१५॥ वृ॰शा॰पथ्यांमुद्यमाख्यानंपरिछेदः

अथपरगृहवासः

उडुगणपरिवारोनायकोऽप्योषधीनाममृतमयशरीरःकांतियुक्तोऽपिचंद्रः॥ भवतिविगतरश्मिर्मंडलंप्राप्यभानोःपरसदननिविष्टःकोलघुत्वंनयाति॥१॥ कष्टंखलुमूर्खत्वंकष्टंखलुयौवनेषुदारिद्र्यं॥ कष्टादपिकष्टतरंपरगृहवासःपरान्नंच॥२॥ इतिपरगृहवासः

अथऋणं

नविषंविषमित्याहुर्ब्रह्मस्वंविषमुच्यते॥ विषमेकाकिनंहंतिब्रह्मस्वंपुत्रपौत्रिकम्॥१॥ पापंकर्तुमृणंकर्तुंमन्यंतेमानवाःसुखं॥ परिणामोऽतिगहनोमहतामपिनाशकृत्॥२॥ लोकद्वयप्रतिभयैकनिदानमेतत्धिक्प्राणिनामृणमहोपरिणामघोरं॥ एकःसएवहिपुमानपरमस्मिँल्लोकेक्रुद्धस्ययेनधनिकस्यमु

खंनदृष्टं॥३॥ इतिकर्णं॥ छ ॥ छ ॥ छ ॥ छ ॥

अथकर्म

धनानिभूमौपशवश्चगोष्ठेभार्यागृहद्वारिजनःश्मशाने॥देहश्चितायांपरलोकमार्गेकर्माऽनुगोगच्छतिजीवएकः॥१॥ यथाधेनुसहस्रेषुवत्सोविंदतिमातरं॥तथापूर्वकृतंकर्मकर्तारमनुगच्छति॥२॥ यस्माच्चयेनचयथाचयदाचयच्चयावच्चयत्रचशुभाऽशुभमात्मकर्म॥तस्माच्चतेनचतथाचतदाचतच्चतावच्चतत्रचविधातृवशादुपैति॥३॥रोगशोकपरीतापबंधनव्यसनानिच॥आत्माऽपराधवृक्षाणांफलान्येतानिदेहिनां॥४॥ नैवाऽऽकृतिःफलतिनैवकुलंनशीलंविद्याऽपिनैवनचयत्नकृताऽपिसेवा॥भाग्यानिपूर्वतपसाकिलसंचितानिकालेफलंतिपुरुषस्ययथैववृक्षाः॥५॥ वनेजनेशत्रुजलाऽग्निमध्येमहार्णवेपर्वतमस्तकेवा॥सुप्तंप्रमत्तंविषमस्थितंवारक्षंतिपुण्यानिपुराकृतानि॥६॥ यासाधूंश्चखलान्करोतिविदुषोमूर्खान्हितान्द्वेषिणःप्रत्यक्षंकुरुतेपरोक्षममृतंहालाहलंतत्क्षणात्॥तामाराधयसत्क्रियांभगवतींभोक्तुंफलंवांछितंहेसाधोव्यसनैर्गुणेषुविपुलेष्वास्थांवृथामाकृथाः॥७॥ गुणवदगुणवद्वाकुर्वताकार्यमादौपरिणतिरवधार्यायत्नतःपंडितेन॥ अतिरभसकृतानांकर्मणामाविपत्तेर्भवतिहृदयदाहीशल्यतुल्योविपाकः॥ ८॥ स्थाल्यांवैदूर्यमय्यांपचतितिलकणांश्चंदनैरिंधनाद्यैःसौवर्णैर्लांगलाद्यैर्निखनतिवसुधाकर्ममूलस्यहेतोः॥छित्त्वाकर्पूरखंडान्वृत्तिमिहकुरुतेकोद्रवाणांसमंतात्प्राप्येमांकर्मभूमिंनचरतिमनुजोयस्तपोमंदभाग्यः॥९॥ अचोद्यमानानियथापुष्पाणिचफलानिच॥स्वंकालंनाऽतिवर्तंतेतथाकर्मपुराकृतं॥१०॥आकाशमुत्पततुगच्छतुवादिगंतमंभोनिधिंविशतुतिष्ठतुवायथेच्छं॥जन्मांतराऽर्जितशुभाऽशुभकृन्नराणांछायेवनत्यजतिकर्मफलाऽनुबंधः॥११॥सुखस्यदुःखस्यनकोऽपिदा

तापरोददातीतिकुबुद्धिरेषा॥ अहंकरोमीतिवृथाऽभिमानःस्वकर्मसूत्रग्रथितोहिलोकः॥१२॥ विपत्तौकिंविषादेनसंपत्तौहर्षणेनकिं॥ भवितव्यंभवत्येवकर्मणामीदृशीगतिः॥१३॥ ॥इतिकर्म॥

अथउदरपूरणदूषणं

दीनादीनमुखैस्तथैवशिशुकैराकृष्टजीर्णांबराक्रोशद्भिःक्षुधितैर्निरन्नविधुरादृश्येतचेद्गेहिनी॥ याच्ञा भंगभयेनगद्गदगलत्त्रुट्यद्विलीनाक्षरंकोदेहीतिवदेत्स्वदग्धजठरस्यार्थेमनस्वीजनः॥१॥ अभिमतमहामानग्रंथिप्रभेदपटीयसीगुरुतरगुणग्रामांभोजस्फुटोज्ज्वलचंद्रिका॥ विपुलविलसल्लज्जावल्लीवितानकुठारिकाजठरपिठरीदुष्पूरेयंकरोतिविडंबनं॥२॥ गंगातरंगकणशीकरशीतलानिविद्याधराध्युषितचारुशिलातलानि॥ स्थानानिकिंहिमवतःप्रलयंगतानियत्सावमानपरपिंडरतोमनुष्यः॥३॥ किंकंदाःकंदरेभ्यःप्रलयमुपगतानिर्झरावागिरिभ्यःप्रध्वस्तावातरुभ्यःसरसफलभृतोवल्कलिन्यश्चशाखाः॥ वीक्ष्यंतेयन्मुखानिप्रसभमपगतप्रश्रयाणांखलानांदुःखोपात्ताल्पवित्तस्मयपवनवशान्नर्तितभ्रूलतानि॥४॥ पुण्यैर्मूलफलैःप्रियप्रणयिनींवृत्तिंकुरुष्वाधुनाभूशय्यांनवपल्लवैःकुरुतृणैरुत्तिष्ठयामोवने॥ क्षुद्राणामविवेकमूढमनसांयत्रेश्वराणांसदावित्तव्याध्यविवेकसंकुलगिरांनामाऽपिनश्रूयते॥५॥ येवर्द्धंतेधनपतिपुरःप्रार्थनादुःखभाजोयेचाल्पत्वंदधतिविषयाक्षेपपर्यस्तबुद्धेः॥ तेषामंतःस्फुरितहसितंवासराणांस्मरेयंध्यानच्छेदेशिखरिकुहरग्रावशय्यानिषण्णः॥६॥ भिक्षाऽऽहारमदैन्यमप्रतिहतंभीतिच्छिदंसर्वदादुर्मात्सर्यमदाऽभिमानमथनंदुःखौघविध्वंसनं॥ सर्वत्राऽन्वहमप्रयत्नसुलभंसाधुप्रियंपावनंशंभोःसत्रमवार्यमक्षयनिधिंशंसंतियोगीश्वराः॥७॥ लांगूलचालनमधश्चरणाऽवपातंभूमौनिपत्यवदनोदरदर्शनंच॥ श्वापिंडदस्यकुरुतेगजपुंगवस्तुधीरंविलोकयतिचाटुशतैश्चभुंक्ते॥८॥ यज्जीव

तिक्षणमपिप्रथितंमनुष्यैर्विज्ञानविक्रमयशोभिरभज्यमानं।।तन्नामजीवितमिहप्रवदंतितज्ज्ञाः काकोऽपिजीवतिचिरायबलिंचभुंक्ते।।९।। योनाऽऽत्मजेनचगुरौनचभृत्यवर्गेदीनेदयांनकुरुतेनचबंधुवर्गे।।किंतस्यजीवितफलंहिमनुष्यलोकेकाकोऽपिजीवतिचिरायबलिंचभुंक्ते।।१०।। अहितहितविचारशून्यबुद्धेः श्रुतिसमयैर्बहुभिस्तिरस्कृतस्य।।उदरभरणमात्रकेवलेच्छोः पुरुषपशोश्चपशोश्चकोविशेषः।।११।। अस्यदग्धोदरस्याऽर्थेकिंनकुर्वंतिपंडिताः।। वानरीमिववाग्देवीं नर्तयंतिगृहेगृहे।।१२।।

अथमौनगुणाः

आत्मनोमुखदोषेणबध्यंतेशुकसारिकाः।।बकास्तत्रनबध्यंतेमौनंसर्वाऽर्थसाधनं।।१।।स्वाऽऽयत्तमेकांतगुणंविधात्राविनिर्मितंछादनमज्ञतायाः।।विशेषतःसर्वविदांसमाजेविभूषणंमौनमपंडितानाम्।।२।। भद्रंभद्रंकृतंमौनंकोकिलैर्जलदागमे।।वक्तारोदर्दुरायत्रतत्रमौनंसमाचरेत्।।३।। ।।इतिमौनगुणाः।। ७ ।।

अथवैयाकरणानांस्तुतिर्निंदाच

वैयाकरणकिरातादपशब्दमृगाःक्वयांतिसंत्रस्ताः।।ज्योतिर्नटविटगायकभिषगाननगह्वराणियदिनस्युः।।१।।कुप्वोःᳵकᳶपौचशेषोघ्यसखिसमसजुषोरुर्विरामोऽवसानंशश्छोटीत्यादिशब्दैःसहसियदिशठाःशाब्दिकाःपंडिताःस्युः।। तेषांकोवाऽपराधःकथयतसततंयेपठंतीहयोङ्तत्ताथय्याथय्यथय्याधिगधिगधिगधिक्थय्यथय्येतिशब्दान्।।२।।टिड्ढाणञ्द्वयसज्झुट्ङःसिड्सोस्तिप्तस्झिसिप्थस्थमिब्वस्मस्ताह्शिचष्टुनाष्टुरतइञ्ञ्शश्छोत्यचोंस्यादिटि।।लोपोव्योर्वलिवृद्धिरेचियचिभंदाधाघ्वदाप्छेचटेरित्यब्दानखिलान्नयंतिकतिचिच्छब्दान्पठंतःकटून्।।३।। सूत्रैःपाणिनिनिर्मितैर्बहुतरैर्निष्पाद्यशब्दाऽऽवलिंवैकुंठस्तवमक्षमारचयितुंमिथ्याश्रमाःशाब्दिकाः।।पक्वाऽन्नंविविधंश्रमेणविविधाऽपूपाऽप्यसूपाऽन्वितंमेदाऽग्नीननुरुंधतेमितबलानाघ्रातु

मप्यक्षमान्॥४॥ कृतदुरितनिराकरणंव्याकरणंचतुरधीरधीयानः॥ बुधगणगणनाऽवसरेकनिष्ठिकायांपरंजयति॥५॥ पातंजलेविष्णुपदाऽऽपगायाःपातंजलेवाऽपिनयेऽवगाह्य॥ आचक्षतेशब्दविद्माप्रसूते याचक्षतेरागमधोक्षजेच॥६॥ नृणामनभ्यस्तफणाभृदीशगिरांदुरापाबुधराजगोष्ठी॥ अबुद्धचापश्रुतिपद्धतीनांसुदृक्षमेवोत्सृनयोत्सृसार्या॥७॥ नांऽगीकृतव्याकरणोपधाना मपाटवेवाविसुगाढमास्ते॥ कस्मिंश्चिदुक्तेतुपदेकथंचित्स्वैरंवपुःस्विद्यतिवेपतेच॥८॥ सूत्रंपाणिनिबद्धंकलयन्पुरुषःसमुद्धहतिसुदृढां॥ वर्णादीनांधर्मान्बुध्वाविधिवत्प्रयुंक्तेऽसौ॥९॥ शब्दशास्त्रमनधीत्ययःपुमान्वक्तुमिच्छतिवचःसभांतरे॥ बंद्धुमिच्छतिवनेमदोत्कटंहस्तिनंकमलनालतंतुना॥१०॥ इतिवैयाकरणानांस्तु०

अथनैयायिकप्रशंसा

मोहंरुणद्धिविमलीकुरुतेचबुद्धिंसूतेचसंस्कृतपदव्यवहारशक्तिं॥ शास्त्रांऽतराऽभ्यसनयोग्यनयायुनक्तितर्कश्रमोननतनुतेकिमिहोपकारं॥१॥ प्रायःकाव्यैर्गमितवयसःपाणिनीयांऽबुराशेःसारज्ञस्याऽप्यपरिकलितन्यायशास्त्रस्यपुंसः॥ वादाऽऽरंभेवहितुमनसोवाक्यमेकंसभायांप्रव्हाजिव्हाभवतिकियतींपश्यकष्टामवस्थां॥२॥ अपरीक्षितलक्षणप्रमाणैरपरामृष्टपदार्थसार्थतत्वैः॥ अवशीकृतजैत्रयुक्तिजालैरलमेतैरनधीततर्कविद्यैः॥३॥ अद्भुतस्तर्कपाथोधिरगाधोपस्यवर्द्धकः॥ अक्षपादोऽमतःस्पष्टस्त्वकलंकःकलानिधिः॥४॥ ज्ञानांऽब्धिरक्षिचरणःकणभक्षकश्चश्रीपक्षिलोऽप्युदयनःसचवर्धमानः॥ गंगेश्वरःशशधरोवहवश्चनव्याग्रंथैर्निरुंधतइमेहृदयांऽधकारं॥५॥ इतिनैयायिकप्रशंसा॥

अथनैयायिकनिंदा

कर्मब्रह्मविचारणांविजहतोभोगापवर्गप्रदांघोषंकंचनकंठशोषफलकंकुर्वंत्यमीतार्किकाः॥ प्रत्यक्षंनपुनातिनाऽपहरतेपापानिपीलुच्छटाव्याप्तिर्नाऽवतिनैवपात्यनुमितिर्नोपक्षतारक्षति॥

॥१॥हेतुःकोऽपिविशिष्टधीरनुमितौनज्ञानयुग्मंमरुत्वाचोनेतिव
मोघवादमुखरानैयायिकाश्चेद्बुधाः॥मेषस्यांऽडमिषस्यलंबलिभु
जोदंताःकियंतस्तथेत्येवंसंततचिंतनैःश्रमजुषोनस्युःकथंपंडि
ताः॥२॥नजिघ्रत्याम्नायंस्पृशतिनतदंगान्यपिसकृत्पुराणंनाऽ
दत्तेनगणयतिकिंचस्मृतिगणं॥पठन्फक्कांतर्केपरपरिभवार्थो
क्तिभिरसौनयत्यायुःसर्वंनिहतपरलोकार्थयतनः॥३॥प्रयत्नैर
स्तोकैःपरिचितकुतर्कप्रकरणाःपरंवाचोवश्यान्कतिपयपदौघा
न्विदधतः॥सभायांवाचाटाःश्रुतिकटुरटंतोघटपटान्नलज्जं
तेमंदाःस्वयमपितुजिह्मेतिविबुधः॥४॥ ॥इतिनैयायिकनिंदा॥

अथवैद्यप्रशंसा

गुरोरधीताऽखिलवैद्यविद्यःपीयूषपाणिःकुशलःक्रियासु॥गतस्पृ
होधैर्यधरःकृपालुःशुद्धोऽधिकारीभिषगीदृशःस्यात्॥१॥रागादि
रोगान्सतताऽनुषक्तानशेषकायप्रसृतानशेषान्॥औत्सुक्यमो
हाऽरतिदान्जघानयोऽपूर्ववैद्यायनमोऽस्तुतस्मै॥२॥मस्तेदुःस
हवेदनाकवलितेमग्नेस्वरेंतर्गलंतप्तायांज्वरपावकेनचतनौतांते
हृषीकव्रजे॥दूनेबंधुजनेकृतप्रलपनेधैर्यंविधातुंपुनःकःशक्तः
कलितामयप्रशमनोवैद्यात्परोविद्यते॥३॥माबोधिवैद्यकमथाऽ
पिमहाऽऽमयेषुप्राप्तेषुयोभिषगितिप्रथितस्तमेव॥आकारयस्वऽ
खिलएवविशेषदर्शीलोकोऽपितेनभिषगेषनदूषणीयः॥४॥नि
र्वृत्ताध्वरकृत्यऋत्विजमहोतीर्णापगोनाविकंयुद्धांतेसुभटंचसि
द्धविजयोवोढारमाप्तस्थलः॥वृद्धेवारवधूजनंचकितवोनिर्घृष्ट
नद्योवनोध्वस्ताऽऽतंकश्चयश्चिकित्सकमपिद्वेष्टिप्रदेयाऽर्थिनं॥
॥५॥श्रांतावेदांतिनःकिंपठथशठतपाऽद्यापिचाऽद्वैतविद्यांपृथ्वी
तत्त्वेलुठंतोविमृशथसततंकर्कशास्तार्किकाःकिं॥वेदैर्नानागमैः
किंग्लपयथहृदयंश्रोत्रियाःश्रोत्रशूलैर्वैद्यंसर्वानवद्यंविचिनुतश
रणंप्राणसंप्रीणनाय॥६॥ ॥इतिवैद्यप्रशंसा॥ ७ ॥ ७ ॥

अथकुवैद्योपहासः

वैद्यराजनमस्तुभ्यंयमराजसहोदर॥यमस्तुहरतिप्राणान्वैद्यःप्राणान्धनानिच॥१॥मिथ्यौषधैर्हतमृषाकषायैरसह्यलेह्यैरयथार्थतैलैः॥वैद्याइमेवंचितरुग्णवर्गाःपिचंडुभांडंपरिपूरयंति॥॥२॥नधातोर्विज्ञानंनचपरिचयोवैद्यकनयेनरोगाणांतत्वाऽवगतिरपिनोवस्तुगुणधीः॥तथाऽप्येतेवैद्याइतितरलयंतोजडजनान्नसूनंमृत्योर्भृत्याइववसुहरंतेगदजुषां॥३॥कषायैरुपवासैश्चकृतामुल्लाघतांनृणां॥निजौषधकृतांवैद्योनिवेद्यहरतेधनं॥४॥अज्ञातशास्त्रसद्भावान्शास्त्रमात्रपरायणान्॥त्यजेद्दूराद्भिषक्पाशान्पाशान्वैवस्वतानिव॥५॥ ॥इतिकुवैद्योपहासः॥७॥

अथगणकप्रशंसा

नदैवंनपित्र्यंचकर्माऽवसिद्ध्येन्नयत्राऽस्तिदेशेननुज्योतिषज्ञः॥नतारानचारानवानांग्रहाणांनतिथ्यादयोवायतस्तत्रबुद्धाः॥१॥भानोःशीतकरस्यवाऽपिभुजगग्रासेपुरानिश्चितेतीर्थानामटनंजनस्यघटतेतापत्रयोच्चाटनं॥दृष्टेप्रागवधारितेसतिधृतेस्तुष्टेश्चलाभोभवेद्दृष्टेतुव्यसनेऽत्रतत्परिहृतिःकर्तुंजपाद्यैःक्षमा॥२॥वृद्धिंह्रासौकुमुदसुहृदःपुष्पवंतोपरागःशुक्रादीनामुदयविलयावित्यमीसर्वदृष्टाः॥आविष्कुर्वंत्यखिलवचनेष्वत्रकुंभीपुलाकन्यायाज्ज्योतिर्नयगतिविदांनिश्चलंमानभावं॥३॥असुखमथसुखंवाकर्मणांपक्तिवेलास्वहहनियतमेतेभुंजतेदेहभाजः॥तदिहपुरतएवप्राहमौहूर्तिकश्चेत्कथयफलममीषामंततःकिंततःस्यात्॥४॥विदैवज्ञंग्रामंविबुधविधुरांभूपतिसभांमुखंश्रुत्याहीनंमनुजपतिशून्यंचविषयं॥अनाचारान्दारानपहरिकथंकाव्यमपिचप्रवक्तृत्वाऽपेतंगुरुमपिसुबुद्धिःपरिहरेत्॥५॥एकाऽसनस्थाजलवायुभक्षामुमुक्षवस्त्यक्तपरिग्रहाश्च॥पृच्छंतितेऽप्यंबरचारिचारंदैवज्ञमन्येकिमुताऽर्थचित्ताः॥६॥ ॥इतिगणकप्रशंसा॥८॥

कुगणकनिंदा

गणिकागणकौसमानधर्मौनिजपंचांगनिदर्शकावुभौ॥जनमा

नसमोहकारिणौतौविधिनावित्तहरौविनिर्मितौ॥१॥ज्योतिःशास्त्रमहोदधौबहुतरोत्सर्गोऽपवादात्मभिःकल्लोलैर्निबिडेकणान्कतिपयान्लब्ध्वाकृतार्थाइव॥दीर्घायुःसुतसंपदादिकथनैर्दैवज्ञपाशाइमेगेहंगेहमनुप्रविश्यधनिनांमोहंमुहुःकुर्वते॥२॥विलिखतिसदसद्वाजन्मपत्रंजनानांफलतियदितदानींदर्शयत्यात्मदाक्ष्यं॥नफलतियदिलग्नद्रष्टुरेवाऽऽग्रहमोहंहरतिधनमिहैवंहंतदैवज्ञपाशः॥३॥प्रमोदेखेदेवाऽप्युपनमतिपुंसांविधिवशान्मयैवंप्रागेवाऽभिहितमितिमिथ्याकथयति॥जनानिष्टाऽनिष्टाऽऽकलनपरिहारैकनिरतानसौमेषादीनांपरिगणनयैवभ्रमयति॥४॥इं॰कुं॰लिं

अथस्थानमाहात्म्यं

नक्रःस्वस्थानमासाद्यगजेंद्रमपिकर्षति॥सएवप्रच्युतःस्थानाऽच्छुनाऽपिपरिभूयते॥१॥स्थानंप्रधानंनबलंप्रधानंस्थानेस्थितःकापुरुषोऽपिशूरः॥जानामिनागेंद्रतवप्रभावंकंठेविनागर्जसिशंकरस्य॥२॥किंचिदाश्रयसौंदर्याद्धत्तेशोभामसाध्वपि॥कांताविलोचनेन्यस्तंमलीमसमिवांऽजनं॥३॥गुणैःसर्वज्ञकल्पोऽपिसीदत्येकोनिराश्रयः॥अनर्घ्यमपिमाणिक्यंहेमाऽऽश्रयमपेक्षते॥४॥कुस्थानस्यप्रवेशेनगुणवानपिपीड्यते॥वैश्वानरोऽपिलोहस्थःकारुकैरभिहन्यते॥५॥आश्रयवशेनसततंगुरुतालघुताचजायतेपुंसां॥विंध्येविंध्यसमानाःकरिणोबतदर्पणेलघवः॥६॥अश्वःशस्त्रंशास्त्रंवीणावाणीनरश्चनारीच॥पुरुषविशेषंप्राप्ताभवंतियोग्याअयोग्याश्च॥७॥आसीत्पूर्वंविमलजलधौमंडनंभूपतीनांनारीणांचप्रबलमुकुटेकांचनेनप्रसंगात्॥तंत्रीबद्धःकथमिदमहोकाचखंडेनसार्धंभिल्लीकंठेमरकतमणेकामवस्थांगतोऽसि॥८॥पात्रविशेषेन्यस्तंगुणान्तरंव्रजतिशिल्पमाधातुः॥जलमिवसमुद्रशुक्तौमुक्ताफलतांपयोदस्य॥९॥ छ॥

अथजिव्हा

हेजिव्हेरससारज्ञेसर्वदामधुरप्रिये॥भगवन्नामपीयूषंपिबत्वम

निशंसखे॥१॥ अंगेषुमुख्याहिजमध्यसंस्था वाणाऽनुसंधानप
राऽसिनित्यं॥ अंधस्थिरप्रेमरसारसज्ञेनरस्तुतिंतत्यजकर्णवत्वं
॥२॥ रसनेरच्चितोऽयमंजलिस्ते परनिंदापरुषैरलंवचोभिः॥ नरका
ऽपहरंनमःशिवायेत्यमुमादिप्रणवंभजस्वमंत्रं॥४॥ द्वात्रिंशद्द
शनद्वेषिमध्येभ्रमसिनित्यशः॥ तद्दिदंशिक्षिताकेनजिह्वेसंचा
रकौशलं॥४॥ ॥इतिजिह्वा॥ छ॥ छ॥ छ॥ छ॥ छ॥

अथमनः

रेरेमनोममनोभवशासनस्यपादांबुजद्वयमनारतमानमत्वं॥
किंमांनिपातयसिसंसृतिकूपमध्येतैनैवकिंतवगमिष्यतिपुत्रशो
कः॥१॥ रेचित्तचिंतयचिरंचरणौमुरारेःपारंगमिष्यतिभवान्भव
सागरस्य॥ पुत्रःकलत्रमितरेसुहृदःसहायाःसर्वविलोकयसखे
मृगतृष्णिकेव॥२॥ नपुंसकमितिज्ञात्वाप्रियायैप्रेषितंमनः॥ त
त्तुतत्रैव रमतेहताःपाणिनिनावयं॥३॥ कृष्णत्वदीयपदपंकज
पंजरांतेअद्यैवमेविशतुमानसराजहंसः॥ प्राणप्रयाणसमयेकफ
वातपित्तैःकंठाऽवरोधनविधौस्मरणंकुतस्ते॥४॥ मनसैवकृतंपा
पंनशरीरकृतंकृतं॥ येनैवाऽलिंगिताकांतातेनैवाऽलिंगिताऽ
सुता॥५॥ मनोऽसिसांतंभजतद्धनंतंसयाऽर्दितंचंद्रमसंजही
हि॥ सहिस्वयंसांतइतिप्रशस्तंधत्तेसदाऽनंतपदाऽवलंबं॥६॥
इतएततस्त्वंक्रमणोरजोभिःक्रीडन्मनोमत्तमतंगजोऽयं॥ यःस
र्वदापिप्पलभोगतुष्टस्तच्छांतयेत्वंहरिमाश्रयस्व॥७॥ भिक्षाऽ
शनंतदपिनीरसमेकवारंशय्याचभूःपरिजनोनिजदेहमात्रं॥
वस्त्रंसुजीर्णशतखंडमयीचकंथाहाहातथाऽपिविषयान्नज
हातिचेतः॥८॥ परिभ्रमसिकिंवृथाक्वचनचित्तविश्राम्यतांस्व
यंभवतियद्यथाभवतितत्तथानान्यथा॥ अतीतमपिनस्मरन्न
पिचभाविसंकल्पयन्नतर्कितगमाऽगमाननुभवस्वभोगानिह
॥९॥ अग्रेगीतंसरसकवयःपार्श्वयोर्दाक्षिणात्याःपश्चाल्लीला
वलयरणितंचामरग्राहिणीनां॥ यद्यस्त्येवंकुरुभवरसाऽस्वाद

नेलंपटत्वंनोचेच्चेतःप्रविशसहसानिर्विकल्पेसमाधौ॥१०॥एतस्माद्विरमेंद्रियार्थगहनादायासकादाश्रयश्रेयोमार्गमशेषदुःखशमनव्यापारदक्षंक्षणात्॥स्वात्मीभावमुपेहिसंत्यजनिजांकल्लोललोलांगतिंमाभूयोभजभंगुरांनवरतिंचेतःप्रसीदाऽधुना॥११ पतितःपशुरपिकूपेनिःसर्त्तुंचरणचालनंकुरुते॥धिक्त्वाचित्तभवाब्धेरिच्छामपिनोबिभर्षिनिःसर्त्तुं॥१२॥ ॥इतिमनः॥ ७ ॥

अथभोगाद्यस्थिरत्वं

भोगेरोगभयंकुलेच्युतिभयंवित्तेनृपालाद्भयंमानेदैन्यभयंबलेरिपुभयंरूपेतरुण्याभयं॥शास्त्रेवादभयंगुणेखलभयंकायेकृतांताद्भयंसर्वंवस्तुभयाऽन्वितंभुविनृणांवैराग्यमेवाऽभयं॥१॥आक्रांतंमरणेनजन्मजरयायात्युल्बणंयौवनंसंतोषोधनलिप्सयाशमसुखंप्रौढांगनाविभ्रमैः॥लोकैर्मत्सरिभिर्गुणावनभुवोव्यालैर्नृपादुर्जनैरस्थैर्येणविपत्तयोऽप्युपहताग्रस्तंनकिंकेनवा॥२॥आधिव्याधिशतैर्जनस्यविविधैरारोग्यमुन्मूल्यतेलक्ष्मीर्यत्रपतंतितत्रविवृतद्वाराइवआपदः॥जातंजातमवश्यमाशुविवशंमृत्युःकरोत्यात्मसात्तत्किंकेननिरंकुशेनविधिनायन्निर्मितंसुस्थिरं॥३॥भोगास्तुंगतरंगभंगचपलाःप्राणाःक्षणध्वंसिनःस्तोकान्येवदिनानियौवनसुखंस्फूर्त्तिःक्रियासुस्थिता॥तत्संसारमसारमेवनिखिलंबुध्वाबुधाबोधकालोकाऽनुग्रहपेशलेनमनसायत्नःसमाधीयताम्॥४॥भोगामेघवितानमध्यविलसत्सौदामिनीचंचलाआयुर्वायुविघट्टिताभ्रपटलीलीनांबुवद्भंगुरं॥लोलायौवनलालसास्तनुभृतामित्याकलय्यद्रुतंयोगेधैर्यसमाधिसिद्धिसुलभेबुद्धिंविदध्वंबुधाः॥५॥आयुःकल्लोललोलंकतिपयदिवसस्थायिनीयौवनश्रीरर्थाःसंकल्पकल्पाघनसमयतडिद्विभ्रमाभोगपूराः॥कंठाऽऽश्लेषोपगूढंतदपिनचचिरंयत्प्रियाभिःप्रणीतंब्रह्मण्यासक्तचित्ताभवतभवभयांऽभोधिपारंतरीतुं॥६॥कृच्छ्रेणाऽमेध्यमध्येनिपतिततनुभिःस्थीयतेगर्भवासे

कांताविश्लेषदुःखव्यतिकरसमयेयौवनेचोपभोगः॥ वामास्त्रीणामवज्ञाविहसितवसतिर्वृद्धभावोऽप्यसाधुः संसारेरेमनुष्यावदतयदिसुखंस्वल्पमप्यस्तिकिंचित्॥७॥ भोगाभंगुरवृत्तयोबहुविधास्तैरेवचाऽयंभवस्तत्कस्येहकृतेपरिभ्रमतहेलोकाःकृतंचेष्टितैः॥ आशापाशशतोपशांतिविशदंचेतःसमाधीयतांकामोत्पत्तिवशास्वधामनियदिश्रद्धेयमस्मद्वचः॥८॥ इ॰भो॰रत्नं॥

अथगृहस्थाश्रमः

सानंदंसदनंसुताश्चसुधियःकांतानदुर्भाषणीसन्मित्रंसधनंस्वयोषितिरतिश्चाऽऽज्ञापराःसेवकाः॥ आतिथ्यंशिवपूजनंप्रतिदिनंमिष्टान्नपानंगृहेसाधोःसंगमुपासतेहिसततंधन्योगृहस्थाश्रमः॥१॥ मानुष्येवरवंशजन्मविभवोदीर्घायुरारोग्यतासन्मित्रंसुसुतःसतीप्रियतमाभक्तिश्चनारायणे॥ विद्वत्वंसुजनत्वमिंद्रियजयःसत्पात्रदानेरतिस्तेपुण्येनविनात्रयोदशगुणाःसंसारिणांदुर्लभाः॥२॥ क्रोशंतःशिशवःसवारिसदनंपंकाऽऽवृतंचांऽगणंशय्यादंशवतीचरूक्षमशनंधूमेनपूर्णंगृहं॥ भार्यानिष्ठुरभाषिणीप्रभुरपिक्रोधेनपूर्णःसदास्नानंशीतलवारिणाहिसततंधिग्धिग्गृहस्थाश्रमं॥३॥ न्यायाऽर्जितधनस्तत्वज्ञाननिष्ठोऽतिथिप्रियः॥ शास्त्रवित्सत्यवादीचगृहस्थोऽपिविमुच्यते॥४॥ सविप्रपादोदककर्दमानिसवेदशास्त्रध्वनिगर्जितानि॥ स्वाहास्वधाकारनिरंतराणिस्वानंदतुल्यानिगृहाणितानि॥५॥ नविप्रपादोदकपंकिलानिनवेदशास्त्रध्वनिगर्जितानि॥ स्वाहास्वधाकारविवर्जितानिश्मशानतुल्यानिगृहाणितानि॥६॥ यदिरामायदिचरमायदितनयोविनयगुणोपेतः॥ तनयेतनयोत्पत्तिःसुरवरनगरेकिमाधिक्यं॥७॥ वंशोविश्वाऽवतंसोजनुरनुपहतंस्वांतमौन्नत्यकांतंलीलाशीलानुकूलाक्षपितकलिमलाकाऽपिविद्यानवद्या॥ वाणीवेणीगुणानांसमधिकयशसांसाधिकासाधिकाश्रीःश्रीमद्गौरीमयूरीमुदिरपुरहरत्वत्कृपायाविपाकः॥८॥ तावद्विद्याऽनवद्यागुणगणमहिमारूपसंपत्तिशौर्यंस्वस्थानेसर्वशोभापरगुण

कथनेवाकूपटुस्तावदेव॥ यावत्ताकाकुलाभिःस्वगृहयुवतिभिःप्रेषिताऽपत्यवक्त्रात् हेबाबानाऽस्तितैलंनचलवणमपीत्यादिवाचांप्रचारः॥९॥ ॥इतिगृहस्थाश्रमः॥ ❀ ॥ ❀ ॥

अथजरा

कृतांतस्यदूतीजराकर्णमूलेसमागत्यवक्तीतिलोकाःशृणुध्वं॥ परस्त्रीपरद्रव्यवांछांत्यजध्वंभजध्वंरमानाथपादारविंदं॥१॥ कृष्णवर्त्मनिगुणान्गणयंती जीवनेऽपिजनयत्यनुरागं॥ आगताबतजरेवहिमानी सेव्यतांसुरतरंगवतीयं॥२॥ शशिनीवहिमार्तानां धर्मार्तानांयथारवौ॥ मनोनरमतेस्त्रीणांजराऽपीतेंद्रियेपतौ॥३॥ व्याघ्रीवतिष्ठतिजरापरितर्जयंती रोगाश्चशत्रवइवप्रहरंतिदेहं॥ आयुःपरिस्रवतिभिन्नघटादिवांऽभो लोकस्तथाऽप्यहितमाचरतीतिचित्रं॥४॥ गात्रंसंकुचितंगतिर्विगलिताभ्रष्टाचदंतावलिर्दृष्टिर्नश्यतिवर्द्धतेबधिरतावक्त्रंचलालायते॥ वाक्यंनाद्रियतेचबांधवजनैर्भार्यानशुश्रूषतेहाकष्टंपुरुषस्यजीर्णवयसःपुत्रोऽप्यमित्रायते॥५॥ वर्णंसितंवीक्ष्यशिरोरुहाणांस्थानंजरापरिभवस्ययदेवपुंसां॥ आरोपिताऽस्थिशकलंपरिहृत्ययांतिचांडालकूपमिवदूरतरंतरुण्यः॥६॥ मलिनैरलकैरेतैः शुक्लत्वंप्रकटीकृतं॥ तद्द्वेषादिवनिर्यातावदनाद्रदनावलिः॥७॥ यममिवकरधृतदंडं हरिमिवसगदंशशांकमिव वक्रं॥ शिवमिवचविरूपाक्षं जराकरोत्यकृतपुण्यमपि॥८॥ऽ श्रुतिःशिथिलतांगतास्मृतिरपिप्रनष्टाऽधुनागतिर्विपथमागता विगलिताद्विजानांततिः॥ गवामपिचसंहतिःसमुचितक्रियातश्च्युताकृतानुजरयातयाकलियुगस्यसाधर्म्यता॥९॥ वदनंदशनविहीनं वाचोनपरिस्फुटागताशक्तिः॥ अव्यक्तेंद्रियशक्तिःपुनरपिबाल्यंकृतंजरया॥१०॥ पटुरटतिपलितदूतो मस्तकमासाद्यसर्वलोकस्य॥ परिभवतिजरामरणं कुरुधर्मंविरमपापेभ्यः॥११॥ वृद्धत्वाऽनलदग्धस्य सारयौवनवस्तुनः॥ दृश्यते

देहगेहेषुभस्मैवपलितच्छलात्॥१२॥ वीक्ष्यतेपलितश्रेणिनैववृद्धस्यमूर्द्धनि॥मृषैवजातंजन्मेतिकिंतुभस्मविधिर्न्यधात्॥१३॥ इयत्यामपिसामग्र्यांसुकृतंनकृतंत्वया॥इतीवकुपितोदंतानंतकःपातयत्यलं॥१४॥पादौसंस्तंभयंतीमुखमपिनमयंत्यंगमाकुंचयंतीहस्तावुत्कंपयंतीप्रणयिजनवचोनश्रुतीःश्रावयंती॥रत्यास्त्रहेजयंतीवलिततनुमतीनूतनोढाजरावातुल्यापूर्वांतुपुंसस्त्रसतिबतपराभीतिहेतुर्नरस्य॥१५॥शतमन्युंदंडधरंकुबेरमपिशूलिनंतथागदिनं॥कुरुतेजरानसाकिंकुर्पान्नीरूपनामकंमनुजं॥१६॥स्थूलप्रावरणाःनिवृत्तकथकःकासाश्रुलालाः विलोभग्नोरःकटिपृष्ठजानुजघनोमुग्धोऽतिथीन्वारयन्॥शृण्वन्धृष्टवधूवचांसिधनुषासंत्रासयन्वायसानाशापाशनिबद्धजीवविभवोवृद्धोगृहेग्लायति॥१७॥ ॥इतिजरा॥ ॥ ७ ॥ ७ ॥ ॥

अथसंसारः

संसारतवनिस्सारपदवीनदवीयसी॥अंतरादुस्तरानस्युर्यदिरेमदिरेक्षणाः॥१॥दुःखांगारकतीव्रःसंसारोऽयंमहानसोगहनः॥इहविषयाःमृतलालसमानसमार्जारमानिपत॥२॥असारेखलुसंसारेसारंश्वशुरमंदिरं॥हरोहिमालयेशेतेहरिश्शेतेमहोदधौ॥३॥ आसारेखलुसंसारेसारमेतच्चतुष्टयं॥काश्यांवासःसतांसंगोगंगांभःशंभुसेवनं॥४॥क्वचिद्विद्वद्गोष्ठीक्वचिदपिसुरामत्तकलहःक्वचिद्वीणावादःक्वचिदपिचहाहेतिरुदितं॥क्वचिद्रम्यारामाक्वचिदपिजराजर्जरतनुर्नजानेसंसारःकिममृतमयःकिंविषमयः॥५॥कृच्छ्रेणाऽमेध्यमध्येनियमिततनुभिःस्थीयतेगर्भगर्तेकांताविश्लेषदुःखव्यतिकरविषमेयौवनेविप्रयोगः॥नारीणामप्यवज्ञाविलसतिनियतंवृद्धभावेऽप्यसाधुःसंसारेरेमनुष्यावदतयदिसुखंस्तोकमप्यस्तिकिंचित्॥६॥ ॥इतिसंसारः॥ ॥

भवजयोपायः

शुचिसांनिध्ययोगेनहृदिरामोपगूहनात्॥कर्मसाक्षिसमालोका

त्भवंहेमंतवर्ज्जयेत्॥१॥ प्राणाघातान्निवृत्तिःपरधनहरणेसंयमःसत्यवाक्यं कालेशक्त्याप्रदानंयुवतिजनकथामूकभावःपरेषां॥ तृष्णास्रोतोविभंगोगुरुषुचविनयःसर्वभूताऽनुकंपासामाऽन्यःसर्वशास्त्रेष्वनुपहतविधिःश्रेयसामेषपंथाः॥२॥ इतरभजनघनरसतःफलनिष्पत्तिर्नवाभवेदितिन॥ मुक्ताःपरंतुलोकेस्वातिघनरसंविनानजायेरन्॥३॥ ॥इतिभवजयोपायः॥ ॥ छ ॥

अथक्षमा

क्षमाशस्त्रंकरेयस्यदुर्जनःकिंकरिष्यति। अतृणेपतितोवह्निःस्वयमेवोपशाम्यति॥१॥ आजन्मसिद्धंकौटिल्यंखलस्यचहलस्यऽच॥ सोढुंतयोर्मुखाऽऽक्षेपमलमेकैवसाक्षमा॥२॥ नरस्याऽऽभरणंरूपंरूपस्याऽऽभरणंगुणः॥ गुणस्याऽऽभरणंज्ञानंज्ञानस्याऽऽभरणंक्षमा॥३॥ क्षमाबलमशक्तानांशक्तानांभूषणंक्षमा॥ क्षमावशीकृतिर्लोकेक्षमयाकिंनसिध्यति॥४॥ ॥इतिक्षमा॥ छ ॥छ॥

अथक्षुधा

आदौरूपविनाशिनीकृशकरीकामांऽकुरच्छेदिनीपुत्राऽमित्रकलत्रभेदनकरीगर्वांकुरच्छेदिनी॥ कामंमंदकरीतपःक्षयकरीधर्मस्यनिर्मूलनीसामांसंप्रतिसर्वरोगजननीप्राणापहंत्रीक्षुधा॥१॥ शय्यावस्त्रंचंदनंचारुहास्यं वीणावाणीदृश्यतेयाचनारी॥ नभ्राजंतेक्षुत्पिपासातुराणांसर्वाऽऽरंभास्तंडुलाप्रस्थमूलाः॥२॥ नाऽस्तिक्षुधासमंदुःखंनाऽस्तिरोगःक्षुधासमः॥ नाऽस्त्याहारसमंसौऽख्यंनाऽस्तिक्रोधसमोरिपुः॥३॥ ॥इतिक्षुधा॥ ॥छ ॥छ॥

अथस्वभावः

सर्वस्यहिपरीक्ष्यंतेस्वाभावानेतरेगुणाः॥ अतीत्यहिगुणान्सर्वान्स्वभावोमूर्ध्निवर्त्तते॥१॥ नधर्मशास्त्रंपठतीतिकारणं नचाऽपिवेदाऽध्ययनंदुरात्मनः॥ स्वभावएवाऽत्रतथाऽतिरिच्यतेयथाप्रकृत्यामधुरंगवांपयः॥२॥ निम्नोन्नतंवंस्यतिकोजलानांविचित्रभावंमृगपक्षिणांच॥ माधुर्यमिक्षौकटुतांमरीचेस्वभावतःसर्वमिदंहि

सिद्धं॥३॥वह्निस्तस्यजलायतेजलनिधिःकुल्यायतेतत्क्षणान्मेरुःस्वल्पशिलायतेमृगपतेःसंघःकुरंगायते॥व्यालोमाल्यगुणायतेविषरसःपीयूषवर्षायतेयस्यांऽगेऽखिललोकवल्लभतमंशीलंसमुन्मीलति॥४॥ ॥इतिस्वभावः॥ ॥ ❀ ॥ ❀ ॥

अथजीवितसाफल्यं

यस्यजीवंतिधर्मेणपुत्रमित्राणिबांधवाः॥सफलंजीवितंतस्यनाऽत्मार्थेकोहिजीवति॥१॥ वाणीरसवतीयस्यभार्यापुत्रवतीसती॥लक्ष्मीर्दानवतीयस्यसफलंतस्यजीवितं॥२॥इ॰जी॰सा॰

अथदीपवर्णनं

रक्षपात्रगतंस्नेहंप्रदीपश्रीविवर्द्धनं॥प्रयास्यंतिविनातेनभस्मत्वंयेभवद्गुणाः॥१॥रेरेदीपतिरस्कृताऽखिलतमःस्तोमाऽरिवर्गस्यतेरात्रौगूढनिजांगपातिशलभाऽघातेनकिंपौरुषं॥तत्कर्माऽचरयेनतावकयशोभूयात्प्रभातेपुनर्नस्नेहोनचसादशानहिपरंज्योतिःपरंस्थास्यति॥२॥दीपोऽर्जुनइवाऽभातिपतंगजनितापदः॥किंचरामइवाऽभातिसमुच्छिन्नदशाननः॥३॥इतिदीपवर्णनं॥ ॥

अथव्यापारिणः

आदौसत्ययुगेबलिस्तदनुचत्रेतायुगेराघवोरामःसत्यपराक्रमोऽथभगवान्धर्मस्तथाद्वापरे॥दाताकोऽपिनचाऽस्तिसंप्रतिकलौजीवंतिकेनाऽर्थिनइत्येवंकृतनिश्चयेनविधिनाव्यापारिणोनिर्मिताः॥१॥

अथपरोपकृतिः

नीरसान्यपिरोचंतेकार्पासस्यफलानिमे॥येषांगुणमयंजन्मपरेषांगुह्यगुप्तये॥१॥परोपकारशून्यस्यधिङ्मनुष्यस्यजीवितं॥यावंतःपशवस्तेषांचर्माप्युपकरिष्यति॥२॥धनानिजीवितंचैवपराऽर्थेप्राज्ञउत्सृजेत्॥तन्निमित्तोवरंत्यागोविनाशेनियतेसति॥३॥भवंतिनम्रास्तरवःफलोद्गमैर्नवांऽबुभिर्भूरिविलंबिनोघनाः॥अनुद्धताःसत्पुरुषाःसमृद्धिभिःस्वभावएवैषपरोपकारिणाम्॥४॥श्रोत्रंश्रुतेनैवनकुंडलेनदानेनपाणिर्नतुकंकणेन॥

विभातिकायःखलुसज्जनानांपरोपकारैर्नतुचंदनेन।५।पद्मा
करंदिनकरोविकचंकरोतिचंद्रोविकासयतिकैरवचक्रवालं॥ना
ऽभ्यर्थितोजलधरोऽपिजलंददातिसंतःस्वयंपरहितेषुकृताऽभि
योगाः॥६॥तृणंचाऽहंवरंमन्येनरादनुपकारिणः॥घासोभूत्वा
पशून्पातिभीरून्पातिरणाऽंगणे॥७॥परोपकृतिकैवल्येतोल
यित्वाजनार्दनः॥गुर्वीमुपकृतिंमत्वाह्यवतारान्दशाऽग्रहीत्।८

अथब्रह्मलिखितं

पत्रंनैवयदाकरीरविटपेदोषोवसंतस्यकिंनोलूकेनविलोक्यतेय
दिदिवासूर्यस्यकिंदूषणं॥धारानैवपतंतिचातकमुखेमेघस्यकिं
दूषणंयद्धात्रानिजभालपट्टलिखितंतन्मार्जितुंकःक्षमः॥१॥यःसुं
दरस्तद्वनिताकुरूपायासुंदरीसापतिरूपहीना॥यत्रोभयंतत्रदरि
द्रताचविधेर्विचित्राणिविचेष्टितानि॥२॥इतरकर्मफलानियदृच्छ
याविलिखितानिसहेचतुरानन।अरसिकेषुकवित्वनिवेदनंशिर
सिमालिखमालिखमालिख॥३॥सहिगगनविहारीकल्मषध्वं
सकारीदशशतकरधारीज्योतिषांमध्यचारी॥विधुरपिविधियो
गाद्ग्रस्यतेराहुणाऽसौलिखितमपिललाटेप्रोज्झितुंकःसमर्थः॥
४॥त्रिलोकेशःशार्ङ्गीशबरशरलक्ष्यत्वमगमद्विधातालोकानाम
लभतशिरःकृंतनविधिं॥प्रयातौतौराहोर्दिनकरशशांकौकवलतां
प्रभुर्नग्नःशंभुःशिरसिलिखितंलंघयतिकः॥५॥हरिणाऽपिहरेणा
ऽपिब्रह्मणात्रिदशैरपि॥ललाटलिखितारेखानशक्यापरिमार्जितुं॥७।

अथमद्यपानगर्हणं

चित्तेभ्रांतिर्जायतेमद्यपानाद्भ्रांतेचित्तेपापचर्यामुपेति।।पापं
कृत्वादुर्गतिंयांतिमूढास्तस्मान्मद्यंनैवपेयंनपेयं॥१॥मत्तोहिन
स्तिसर्वंमिथ्याप्रलपतिहिविकलयाबुद्ध्या॥मातरमपिकामयते
साऽवज्ञंमद्यपानमत्तःसन्॥२॥एकतश्चतुरोवेदाब्रह्मचर्यंतथै
कतः॥एकतःसर्वपापानिमद्यपानंतथैकतः॥३॥मद्यपस्यकुतः
सत्यंदयामांसाऽशिनःकुतः॥कामिनश्चकुतोविद्यानिर्धनस्यकुतः

क्रिया॥४॥ वैकल्यंधरणीपातमयथोचितजल्पनं॥सन्निपातस्यचिह्नानिमद्यंसर्वाणिदर्शयेत्॥६॥इतिमद्यपानगर्हणं॥

अथअघटितघटना

अंबुजमंबुनिजातंनहिदृष्टंजातमंबुजादंबु॥अधुनातद्विपरीतंचरणसरोजाद्विनिर्गतागंगा॥१॥जानालताहिशैलेजातुलतायांनजायतेशैलः॥अधुनातद्विपरीतंकनकलतायांगिरिद्वयंजातं॥२॥कमलेकमलोत्पत्तिःश्रूयतेनचदृश्यते॥बालेतवमुखांऽभोजेदृष्टमिंदीवरद्वयं॥३॥नकेनाऽपिश्रुतंदृष्टंवारिणावारिशुष्यति॥अहोगोदावरीवाराभवसिंधुर्विशुष्यति॥४॥मूकाऽऽख्यंकमपिबधिराःश्लोकमाकर्णयंतिश्रद्धालुस्त्वंविलिखतिकुणिःश्लाघयावीक्षतेंऽधः॥अभ्यारोहत्यहहसहसापंगुरप्यद्रिशृंगंसांद्राऽऽरुस्याःशिशुभरणतोमंदमायांतिवंध्याः॥५॥एषवंध्यासुतोयातिखपुष्पकृतशेखरः॥मृगतृष्णांऽभसिस्नातःशशशृंगधनुर्धरः॥६॥ इति०।

अथप्रवासः

अहोनुकष्टःसततंप्रवासस्ततोऽतिकष्टःपरगेहवासः॥कष्टाऽधिकानीचजनस्यसेवाततोऽतिकष्टाधनहीनताच॥१॥ तीर्थानामवलोकनंपरिचयःसर्वत्रवित्ताऽर्जनंनानाऽऽश्चर्यनिरीक्षणंचतुरताबुद्धेःप्रशस्तागिरः॥एतेसंतिगुणाःप्रवासविषयेदोषोऽस्तिचैकोमहान्यन्मुग्धामधुराऽधराऽधरसुधापानंविनास्थीयते॥२॥देशेदेशेकिमपिकुतुकादद्भुतंलोकमानाःसंपाद्यैवद्रविणमतुलंसद्मभूयोऽप्यवाऽऽप्य॥संयुज्यंतेसुचिरविरहोत्कंठिताभिःसतीभिःसौख्यंधन्याःकिमपिदधतेसर्वसंपत्समृद्धाः॥३॥आकिंचन्यादतिपरिचयाज्जाययोपेक्ष्यमाणोभूपालानामननुसरणाद्धिभ्यदेवाऽखिलेभ्यः॥गेहेतिष्ठन्कुमतिरलसःकूपकूर्मःसधर्माकिंजानीतेभुवनचरितंकिंसुखंचोपभुंक्ते॥४॥ व्यापारांतरमुत्सृज्यवीक्षमाणोवधूमुखं॥योगृहेष्वेवनिद्रातिदरिद्रातिसदुर्मतिः॥५॥इ०प्र०

अथव्याजनिंदा

यच्छ्वशुरोऽभूज्जनकःपत्युर्ज्जाम्याश्चतत्सुताजाया॥भ्राताभुजं
गराजोभक्तामुक्त्यैभजंतितच्चित्रं॥१॥त्रिदोषशमनार्थायत्वयि
मज्जंतिमानवाः॥त्वंकरोषिचतुर्दोषंकथंगंगेनलज्जसि॥२॥ला
वण्यद्रविणव्ययोनगणितःक्लेशोमहानर्जितःस्वच्छंदंचरतोज
नस्यहृदयेचिंताज्वरोनिर्मितः॥एषाऽपिस्वगुणाऽनुरूपरमणा
ऽभावाद्वराकीहताकोऽर्थश्चेतसिवेधसाविनिहितस्तन्वीमिमांत
न्वता॥३॥इंदोर्लक्ष्मत्रिपुरजयिनःकंठमूलंमुरारिर्दिङ्नागानां
मदजलमषीभांजिगंडस्थलानि॥अद्याऽप्युर्वीवलयतिलकश्या
मलिम्नाऽनुलिप्तान्याभासंतेवद्धवलितंकेयशोभिस्त्वदीयैः॥४
सर्वदासर्वदोऽसीतिमिथ्यासंस्तूयसेजनैः॥नाऽरयोलेभिरेपृ
ष्ठंनवक्षःपरयोषितः॥५॥ ॥इतिव्याजनिंदा॥ ॥ ७ ॥ ॥

अथसेवकनिंदा

आहारेवडवाऽनलश्चशयनेयःकुंभकर्णायतेसंदेशेबधिरःपला
यनविधौसिंहःसृगालोरणे॥अंधोवस्तुनिरीक्षणेऽथगमनेखंजः
पटुःक्रंदनेभाग्येनैवहिलभ्यतेपुनरसौसर्वोत्तमःसेवकः॥१॥
प्रणमत्युन्नतिहेतोर्जीवितहेतोर्विमुंचतिप्राणान्॥दुःखीयतिसु
खहेतोःकोमूढःसेवकादन्यः॥२॥जीवंतोऽपिमृताःपंचव्यासेन
परिकीर्त्तिताः॥दरिद्रोव्याधिनोमूर्खःप्रवासीनित्यसेवकः॥३॥
शिरसाधार्यमाणोऽपिसोमःसौम्येनशंभुना॥तथाऽपिकृशतांधत्ते
कष्टःखलुपराश्रयः॥४॥वरंवनंवरंभैक्ष्यंवरंभारोपजीवनं॥
पुंसांविवेकहीनानांसेवयानधनार्जनं॥५॥सेवयाधनमिच्छ
द्भिःसेवकैःपश्ययत्कृतं॥स्वाऽऽयत्तत्वंशरीरस्यमूढैस्तदपिहा
रितं॥६॥सर्वःकल्येवयसियततेलब्धुमर्थान्कुटुंबीपश्चात्त
पुत्रैरुपहितभरःकल्पतेविश्रमाय॥अस्माकंतुप्रतिदिनमियं
सादयंतीप्रतिष्ठांसेवाकाकुःपरिणतिरभूत्स्त्रीषुकष्टोऽधिका
रः॥७॥स्वाऽभिप्रायपरोक्षस्यपरचित्ताऽनुवर्त्तिनः॥स्वयंविक्री

तद्देहस्यसेवकस्यकुतःसुखं॥८॥चलेषुस्वामिचित्तेषुसुलभेपिशुनेजने॥यदिजीवंत्यहोचित्रंक्षणमप्युपजीविनः॥९॥सेवाश्ववृत्तिर्यैरुक्तानतैःसम्यगुदाहृतं॥स्वच्छंदचारीकुत्रश्वाविक्रीतासुःक्वसेवकः॥१०॥मौनान्मूकःप्रवचनपटुर्वातलोजल्पकोवाधृष्टःपार्श्वेवसतिचसदादूरतस्त्वप्रगल्भः॥क्षांत्याभीरुर्यदिनसहतेप्रायशोनाऽभिजातःसेवाधर्मःपरमगहनोयोगिनामप्यगम्यः॥११॥स्वयंजहातिसेवकःसुखंचमानमेवच॥यदर्थमर्थमीहतेतदेवतस्यहीयते॥१२॥भेतव्यंनृपतेस्ततःसचिवतोराज्ञस्ततोवल्लभादन्येभ्यश्चभवंतियस्यभवनेलब्धप्रसादाविटाः॥दैन्यादुन्मुखदर्शनोपलपनैःपिंडार्थमायस्यतःसेवांलाघवकारिणींकृतधियःस्थानेश्ववृत्तिंविदुः॥१३॥ ॥इतिसेवकनिन्दा॥ ❀ ॥ ❀ ॥ ॥

अथभिक्षुकगुणाः

उच्चैरध्ययनंपुरातनकथास्त्रीभिःसहाऽऽलापनंतासामर्भकलालनंपतिनुतिस्तस्याकमिथ्यास्तुतिः॥आदेशस्यकराऽवलंबनविधिःपांडित्यलेखक्रियाहोरागारुडमंत्रतंत्रकविधिर्भिक्षोर्गुणाद्वादश॥१॥प्रातःक्षालितलोचनाःकरतलेचंचत्पवित्रांकुरास्तत्तत्स्थानानिवेष्टितोर्ध्वतिलकाश्चैलांतबद्धाऽक्षताः॥कोजातश्चमृतोऽथवामृततिथिःकस्याऽऽलयेवर्त्ततेचेत्थंहर्षशतैर्युताःप्रतिदिनंधावंत्यहोभिक्षुकाः॥२॥अभ्योभुक्तिमतांप्रयोगसमयेमंत्रेषुपृष्टंगतःपाकाऽऽगारगतस्तुपाचकमनस्तोषायवाचस्पतिः॥उद्वायांनिरतोरतोऽर्भकगणेपिंडेषुदत्ताऽऽदरोनानाऽश्वाट्टगणैकचालितमनाभट्टोत्तमोराजते॥३॥ ॥इतिभिक्षुकगुणाः॥ ❀ ॥ ❀ ॥ ❀ ॥

अथवाग्वर्णनं

केयूरानविभूषयंतिपुरुषंहारानचंद्रोज्ज्वलानस्नानंनविलेपनंनकुसुमंनाऽलंकृतामूर्धजाः॥वाण्येकासमलंकरोतिपुरुषंयासंस्कृताधार्यतेक्षीयंतेखलुभूषणानिसततंवाग्भूषणंभूषणं॥१॥अविललितसुगुणवेणिःसाऽलंकाराऽपियासुवर्णापि॥रघुतिलकविहीनाचे

ह्वाणीरमणीवनैवकल्याणी॥२॥ कामान्दुग्धेविप्रकर्षत्यलक्ष्मींकीर्त्तिंसूतेदुष्कृतंयाहिनस्ति॥तांचाऽप्येतांमातरंमंगलानांधेनुंधीराःसूनृतांवाचमाहुः॥३॥नवकरकमलस्थांस्फाटिकीमक्षमालांनखकिरणविभिन्नांदाडिमीबीजबुध्या॥अनुलवमनुकर्षन्येनकीरोनिषिद्धःसभवतुममभूत्यैवाणितेमंदहासः॥४॥गानाब्धेस्तुपरंपारंनोपेयायसरस्वती॥अतोनिमज्जनभयात्तुंबींवहतिवक्षसि॥५॥याकर्षतिनिजयोगादंतर्गतजीवनानिसरसानां॥वाणीसैवगुणवतीघटीवयद्वावधूटीव॥६॥अस्त्यद्याऽपिचतुःसमुद्रपरिखापर्यंतमुर्वीतलंवर्त्ततेऽपिचतत्रतत्ररसिकागोष्ठीषुसक्तान्नृपाः॥एकस्तत्रनिरादरोभवतिचेदन्योभवेत्साऽऽदरोवाग्देवीवदनांबुजेवसतिचेत्कोनामदीनोजनः॥७॥तास्तुवाचःसभायोग्यायाश्चित्ताऽऽकर्षणक्षमाः॥स्वेषांपरेषांविदुषांद्विषामविदुषामपि॥८॥ ॥इतिवाग्वर्णनं॥ छ ॥ छ ॥ छ ॥

अथवाग्मिप्रशंसा

श्रोतॄन्मूकयतिब्रुवन्स्थिरतमंकुर्वन्नमीषांमनोनिर्बाध्यःपरबाध्यकृत्परदृशामेकाऽश्रयोनाऽन्यदृक्॥यस्त्यक्ताऽगविकंपनःप्रचलयन्नित्यंसतांमस्तकंक्षीरंश्रोतृषुमुख्यमात्मनिगुणंधत्तेसवक्तोत्तमः॥१॥ तद्वक्तासदसिब्रवीतुवचनंयच्छृण्वतांचेतसःप्रोल्लासंरसपूरणंश्रवणयोरक्ष्णोर्विकासश्रियं॥क्षुन्निद्राश्रमदुःखकालगतिहृत्कार्यांतरप्रस्मृतिंप्रोत्कंठामनिशंश्रुतोवितनुतेशेकंविरामादपि॥२॥क्षतिसिद्धांतशूरस्य तद्विरुद्धान्निरुंधतः॥वल्गितंवावदूकस्यस्तुतिनःकिंनशोभते॥३॥अल्पाऽक्षररमणीयंयःकथयतिनिश्चितंसखलुवाग्मी॥बहुवचनमल्पसारंयःकथयतिविप्रलापीसः॥४॥शङ्कुकोऽस्यरचिताऽपिलालिताजिह्वयादिनयोजिताभवेत्॥किंतयाकरणमस्तिघंटयाजिह्वयाध्वनिमतांहिपूज्यया॥५॥ ॥इतिवाग्मिप्रशंसा॥ ॥ छ ॥ छ ॥

अथअसत्यवादिनिंदा

यशोयस्माद्भस्मीभवतिवनवह्नेरिववनंनिदानंदुःखानांयदवनि
रुहाणामिवजलं॥ नयत्रस्याच्छायाऽऽतपइवतपःसंयमकथा
कथंचित्तन्मिथ्यावचनमभिधत्तेनमतिमान्॥१॥ जिह्वैकैवसता
मुभेफणवतांस्रष्टुश्चतस्रश्चतास्ताःसप्तैवविभावसोर्नियमिताः
षट्कार्त्तिकेयस्यच॥पौलस्त्यदशाभवन्फणिपतेर्जिह्वासहस्र
द्वयंजिह्वालक्षशतैककोटिनियमोनोदुर्जनानांमुखे॥२॥असत्य
मप्रत्ययमूलकारणंकुवासनासद्मसमृद्धिवारणं॥विपन्निदानंप
रवंचनोर्जितंकृताऽपराधंकृतिभिर्विवर्जितं॥३॥ नाऽसत्यवादिनः
सख्यंनपुण्यंनयशोभुवि॥दृश्यतेनाऽपिकल्याणंकालकूटमिवाश्रि
तः४॥

अथकृतघ्ननिंदा

व्योमनिशंवाकुरुतेचित्रंनिर्मातियत्नतःसलिले॥स्नपयतिपवनंस
लिलैर्यस्तुखलेचरतिसत्कारं॥१॥यथावृष्टिःसमुद्रेषुभुक्तस्योप
रिभोजनं॥एवंप्रीतिःखलैःसार्द्धमुत्पन्नाऽप्यवसीदति॥२॥शोकं
माकुरुकुक्कुरसत्वेष्वहमधमइतिसुधासाधो॥कष्टादपिकष्टत
रंदृष्ट्वाश्वानंकृतघ्ननामानं॥३॥ ॥इतिकृतघ्ननिंदा॥ छ ॥ ॥

अथकापुरुषः

नारीणांवचनेनकर्मकुरुतेदीनंवचोभाषतेनालस्यंविजहातिति
ग्मकिरणेप्रौढेसमुत्तिष्ठति॥किंचित्कापिनसाहसंवितनुतेदेहेचि
रंदूयतेनोवाविंदतिपौरुषंकुपुरुषःकोप्येषनिर्णीयतां॥१॥कापूरु
षःकुक्कुरश्चभोजनैकपरायणः॥लालितःपार्श्वमायातिवारितोन
चगच्छति॥२॥ ॥इतिकापुरुषः॥ ॥छ ॥ छ ॥ छ ॥

अथसामान्यतःपुत्रप्रशंसा

गृहेजानुचरःकेल्यांमुग्धस्मितमुखोऽबुजः॥पुत्रःपुण्यवतामेवपा
त्रीभवतिनेत्रयोः॥१॥स्वगर्भशुक्तिनिर्भिन्नंसुवृत्तंसुतमौक्तिकं
॥वंशश्रीतिलकीभूतंमंदभाग्यस्यदुर्लभं॥२॥वर्धतेनचिरंलोके
वंशलक्ष्मीरसंततिः॥स्वल्पाऽवशेषितस्नेहवर्त्तिमालेवदीपिका॥
॥३॥अंतःकरणतत्त्वस्यदंपत्योःस्नेहसंश्रयात्॥आनंदग्रंथिरेको

यमपत्यमितिकथ्यते॥४॥ आनंदस्रुतिरात्मनोनयनयोरंतःसुध
ऽभ्यंजनंप्रस्तारःप्रणयस्यमन्मथतरोःपुष्पंप्रसादोरतेः॥ आलानं
हृदयद्विपस्यविषयाऽरण्येषुसंचारिणोर्दंपत्योरिहलभ्यतेसुकृ
तःसंसारसारःसुतः॥५॥दिग्वाससंगतव्रीडंजटिलंधूलिधूस
॥पुण्याऽधिकाहिपश्यंतिगंगाधरमिवाऽऽत्मजं॥६॥उरोरुहाद्
द्रुमितैःपयोभिरापूर्यकेल्यानिजमास्यगर्भे॥फूत्कृत्यमातुर्वदने
संतंतनूभवंपश्यतिकोऽपिधन्यः॥७॥कृतचंक्रममंगणेषुकिंचित
णवत्किंकिणिरिंगदंघ्रिपद्मं॥यदिसन्महितंसुतंश्रितंस्यात्तदिदं
व्रह्महितंभवेत्तदानीं॥८॥ अहंकिमंबाकिमभीष्टतापदे तवेतिमधु
धुरितातपृच्छया॥प्रलोभ्यतुल्यंप्रवदंतमर्भकं मुदाहसन्जिघ्र
तिमूर्ध्निपुण्यभाक्॥९॥निंद्यतेपितृभिस्तैस्तैर्निरपत्यधनःपुमान्॥
अध्वनीनैरतिश्रांतैरवकेशीवपादपः॥१०॥इतिसामान्यतःपुत्रप्रशं॰

अथसत्पुत्रप्रशंसा

एकोऽपिगुणवान्पुत्रोनिर्गुणैःकिंशतेनतैः॥एकश्चंद्रोजगच्चक्षुर्न
क्षत्रैःकिंप्रयोजनं॥१॥एकेनहिसुवृक्षेणपुष्पितेनसुगंधिना॥वासि
तंतद्वनंसर्वंसुपुत्रेणकुलंयथा॥२॥पात्रंनतापयतिनैवमलंप्रसूते
स्नेहंनसंहरतिनैवगुणान्क्षिणोति॥द्रव्याऽवसानसमयेचलतांनध
त्तेसत्पुत्रएवकुलसद्मनिकोऽपिदीपः॥३॥प्रज्ञयावाविसारिण्या
योवलेनधनेनवा॥धुरंवहतिगोत्रस्यजननीतेनपुत्रिणी॥४॥स
जातोयेनजातेनयातिवंशःसमुन्नतिं॥परिवर्तिनिसंसारे मृतःको
वानजायते॥५॥विद्याविहीनाबहवोऽपिपुत्राःकल्पायुषःसंतुपि
तुःकिमेतैः॥क्षयिष्णुनावाऽपिकलावतावा तस्यप्रमोदःशशिनेव
सिंधोः॥६॥किंमृष्टंसुतवचनंपुनरपिमृष्टंतदेवसुतवचनं॥मृष्टा
न्मृष्टतरंकिंश्रुतिपरिपक्वंतदेवसुतवचनं॥७॥एकेनाऽपिसुपुत्रेण
विद्यायुक्तेनभासते॥कुलंपुरुषसिंहेन चंद्रेणेवहिशर्वरी॥८॥अजा
तमृतमूर्खाणांवरमाद्यौनचांऽतिमः॥सकृद्दुःखकरावाद्यावंतिम
स्तुपदेपदे॥९॥ वरंगर्भस्रावोवरमपिचनैवाऽभिगमनंवरंजातःप्रेतो

वरमपिचकन्याविजनिता॥वरंवंध्याभार्यावरमपिचगर्भेषुवस
तिर्नचाःविद्वान्रूपद्रविण गुणयुक्तोःपितनयः॥१०॥इति॰

अथकुपुत्रनिंदा

किंतेनजातुजातेनमातृयौवनहारिणा॥आरोहतिनयःस्वस्यवं
शस्याःग्रेध्वजोयथा॥१॥किंतयाक्रियतेधेन्वायानदोग्ध्रीनगर्भि
णी॥कोःर्थःपुत्रेणजातेनयोनविद्वान्नधार्मिकः॥२॥एकेनशुष्क
वृक्षेणदह्यमानेनवन्हिना॥दह्यतेतद्वनंसर्वंदुष्पुत्रेणकुलंतथा॥३
कोटरांतःस्थितोवन्हिस्तरुमेकंदहेत्खलु॥कुपुत्रस्तुकुलेजातः
स्वकुलंनाशयत्यहो॥४॥अजातमृतमूर्खेभ्योमृताःजातौसुतौ
वरौ॥यतस्तावल्पदुःखाययावज्जीवंजडोदहेत्॥५॥यस्यपुत्रो
नवैविद्वान्नशूरोनचधार्मिकः।अप्रकाशंकुलंतस्यनष्टचंद्रेवशर्व
री६॥अविनीतःसुतोजातःकथंनदहनात्मकः॥विनीतस्तुसु
तोजातःकथंनपुरुषोत्तः॥७॥पित्रोर्नैववचःशृणोतिदिवसस्यागे
व्रजस्यालयंयांतीभिर्युवतीभिरध्वनिमुहुःकौतूहलंविंदति॥बंधू
नामुपदेशवाचिवदतिक्रोधेकतानंवचःसाधून्निंदतिदुर्ज्जनंच
मनुतेमित्रंकुपुत्रोजनः॥८॥इतिकुपुत्रनिंदा॥ छ ॥ छ ॥

अथप्रकीर्णकाख्यानं

दानायलक्ष्मीःसुकृतायविद्याचिंतापरब्रह्मविनिश्चयाय॥परोप
कारायवचांसियस्यवंद्यस्त्रिलोकीतिलकःसएव॥१॥देवगण
स्य॥निःकलंककलयैकयापियःसंयुतःसखलुपूज्यतेजनैः॥भ
द्रपक्षजलजोपिधार्यतेशंकरेणशिरसानिशाकरः॥२॥शार्ङ्गधर
स्य॥एकेसत्पुरुषाःपरार्थघटकाःस्वार्थंपरित्यज्ययेसामान्यास्तु
परार्थमुद्यमभृतःस्वार्थाविरोधेनये॥तेमीमानुषराक्षसाःपरहि
तंभैःस्वार्थतोहन्यतेयेतुघ्नंतिनिरर्थकंपरहितंतेकेनजानीमहे
॥३॥भर्तृहरेः॥अन्यमुखेदुर्वादोयःप्रियवदनेसएवपरिहासः॥
इतरेंधनजोधूमःसएवचागरुभवोधूपः॥४॥गोवर्धनस्य॥अ
होबतमहत्कष्टंविपरीतमिदंजगत्॥येनायत्रयतेसाधुरसाधुः

स्तेनतुष्यति॥५॥ अदातापुरुषस्त्यागीधनंसंत्यज्यगच्छति॥ दातारंकृपणंमन्येमृतोप्यर्थंनमुंचति॥६॥ व्यासस्य॥ दातव्यंभोक्तव्यंसतिविभवेसंचयोनकरणीयः॥ पश्येहमधुकरीणांसंचितमर्थंहरन्त्यन्ये॥७॥ अशठमलोभमजिह्मंत्यागिनमनुरागिणंविशेषज्ञं॥ यदिनाश्रयतिनरंश्रीःश्रीरेवहिवंचितातत्र॥८॥ यास्वद्मनिपद्मेपिसंध्याविधिविजृंभिते॥ इंदिरामंदिरामन्येकथंतिष्ठतिसागृहे॥९॥ रक्षंतिकृपणाःपाणौद्रव्यंक्रव्यमिवात्मनः॥ तदेवसंतःसततमुत्सृजंतियथामलं॥१०॥ सहिष्णायदिकाचिंतावराकोदरपूरणे॥ शुकोप्यशनमाप्नोतिरामरामेतिचब्रुवन्॥११॥ ददतोयुध्यमानस्यपठतोःपुलकोनचेत्॥ आत्मनश्चपरेषांचधिक्त्यांगंपौरुषंश्रुतं॥१२॥ नतद्भुक्तंनतत्पीतंनतत्स्मृतंनतद्गतं॥ यन्मांसमाहिषक्षीरललनावाजिवर्जितं॥१३॥ दुर्जनदूषितमनसांपुंसांस्वजनेपिनास्तिविश्वासः॥ पाणिःपयसादग्धोबालोदध्यपिफूत्कृत्यभक्षयति॥१४॥ करोतिनिर्मलाधारातुच्छस्यापिमहर्घतां॥ अंबुनोबिंदुरल्पोपिशुक्तौमुक्ताफलंभवेत्॥१५॥ अंतःकटुरपिलघुरपिसहृत्तंयःपुमान्नसंत्यजति॥ सभवतिसद्योवंद्यःसर्षपइवसर्वलोकस्य॥१६॥ किमाढ्यत्वगुरुत्वाभ्यांचरमोपिगुणैर्गुरुः॥ केतकीकुसुमेपश्यलघुपत्रेतिगौरवं १७॥ पतितोपिराहुवदनेतरणिर्बोधयतिपद्मखंडानि॥ भवतिविपद्यपिमहतामंगीकृतवस्तुनिर्वाहः॥१८॥ निःसारस्यपदार्थस्यप्रायेणाडंबरोमहान्॥ नसुवर्णेध्वनिस्तादृक्यादृक्कांस्येप्रजायते॥१९॥ सएवधन्योविपदिस्तूपंनविमुंचति॥ त्यजत्यर्ककरैस्तप्तंहिमंदेहंनिशीततां॥२०॥ मासिमासिसमाज्योत्स्नापक्षयोरुभयोरपि॥ तत्रैकःशुक्लपक्षोभूद्यशःपुण्यैरवाप्यते॥२१॥ मत्स्यादयोपिजानंतिनीरक्षीरविवेचनं॥ प्रसिद्धिरेवहंसस्ययशःपुण्यैरवाप्यते॥२२॥ सौभाग्यविरलस्यस्यात्समकर्मगुणेष्वपि॥ षट्त्रिंशदायुधापृथ्वीखड्गायत्तेवकथ्यते॥२३॥ हस्तादपिनदातव्यंगृहादपिनदीयते॥ परोपक

रणार्थायवचनेकादरिद्रता॥२४॥पातितोपिकराघातैरुत्पतत्येव
कंदुकः॥प्रायेणहिसुवृत्तानामस्थायिन्योविपत्तयः॥२५॥पद
स्थितस्यपद्मस्यमित्रेवरुणभास्करौ॥पदच्युतस्यतस्यैवक्ले
शदाहकरावुभौ॥२६॥वनादिदहतोवह्नेः सखाभवतिमारुतः।
सएवदीपनाशायकृशेकस्यहिसौहृदं॥२७॥गतःसकालोयत्रा
सीद्वज्ञाकल्पशाखिनां॥उदुंबरफलेभ्योपिस्पृहयामोधुनाव
यं॥२८॥भोज्यंभोजनशक्तिश्चरतिशक्तिर्वरस्त्रियः॥विभवो
दानशक्तिश्चनाल्पस्यतपसःफलं॥२९॥व्यथयतिनितरामुपे
तःस्वच्छप्रकृतीनवद्यलेशोपि॥उद्विजतेननुचक्षुःसक्तेनरजः
कणेनापि॥३०॥शरदिसमग्रनिशाकरकरशतहततिमिरसं
चयारजनी॥जलदांतरिताकोमपिदिवसच्छायांनपूरयति॥
३१॥वरमुन्नतलांगूलात्सटाधूननभीषणात्॥सिंहात्सादप्र
हारोपिनसृगालाधिरोहणं॥३२॥केषामप्यते॥त्वंचेन्नीचजना
नुरागरभसादस्मासुमंदादरः कामोमानदमानहानिरियती
भूःकिंत्वदेकप्रभां॥गुंजापुंजपरंपरापरिचयाद्भिल्लीजनैरुज्झि
तंमुक्तादामनधामधारयतिकिंकंठेकुरंगीदृशः॥३३॥दृष्टंकिं
मपिलोकेस्मिन्ननिर्दोषंननिर्गुणं॥आवृणुध्वामतेदोषान्विवृ
णुध्वंगुणान्बुधाः॥३४॥लौकिकानांहिसाधूनामर्थंवागनुव
र्त्तते॥ऋषीणांपुनराद्यानांवाचमर्थोनुधावति॥३५॥ईशेपद
प्रणयभाजिमुहूर्त्तमात्रंप्राणप्रियेपिकुरुमानिनिमाप्रसादम्
॥जानातुमत्स्यमुरसोपदयोर्नतानामस्मादृशामिवमनोरथभं
गदुःखं॥३६॥दृढःप्रेमाभग्नःसदसिरिवसंधिंनभजतेभजेता
पिप्रायःस्खलतिखलुयत्नैरपिधृतः॥स्खलेन्नोचेत्साम्यंभज
तिनभजेद्वानभवतिच्युताशंकश्चेत्स्यात्स्मृतिमुपगतस्तुव्य
थयति॥३७॥स्थानेषुशिष्यनिवहैर्विनियुज्यमानाविद्यागु
रुंहिगुणवत्तरमातनोति॥आदायशुक्तिषुबलाहकविप्रकी
र्णैरत्नाकरोभवतिवारिभिरंबुराशिः॥३८॥सर्वथास्वहितं

माचरणीयंकिंकरिष्यतिजनोबहुजल्पः॥विद्यतेनखलुकश्चि
दुपायःसर्वलोकपरितोषकरोयः॥३९॥वार्त्ताचकौतुककरीविम
लाचविद्यालोकोत्तरःपरिमलश्चकुरंगनाभेः॥तैलस्यबिंदुरिव
वारिणिदुर्निवारमेतत्त्रयंप्रसरतिस्वयमेवभूमौ॥४०॥यत्रनफलि
तास्तरवोविकसितसरसीरुहाःसरस्योवा॥नचसज्जनाःसदेशो
गच्छतुनिधनंश्मशानसमः॥४१॥वासांसिव्रजचारिवारिजदृशां
हृत्वाहठादुच्चकैर्यन्नागभूरुहमारुरोहसपुनर्वस्त्राणिविस्तारय
न्॥व्रीडाभारमपाचकारसहसापांचालजायाःस्वयंकोजानाति
जनोजनार्दनमनोवृत्तिःकदाकीदृशी॥४२॥काचंमणिंकांचनमे
वमुग्धासूत्रेगणंतीहकिमत्रचित्रं॥विशेषवित्पाणिनिरेकसूत्रे
श्वानंयुवानंमघवानमाह॥४३॥सम्यगनिष्पन्नःसन्योर्थस्त
रूपास्फुटीक्रियते॥सव्यंग्यएवभवतिप्रथमोविनतात्तनूजइव॥
॥४४॥गुणमधिगतमपिधनवाननचिरान्नाशयतिरक्षतिदरिद्रः॥
मज्जयतिरज्जुमंभसिपूर्णकुंभःसखिनखलुतुच्छः॥४५॥अबु
धाअजंगमाअपिकयापिगत्यापरंपदमवाप्ताः॥मैत्रिणइतिकी
र्त्यंतेनयवलगुटिकाइवजनेन॥४६॥परीवादस्तथ्योभवतुवित
थोवापिभुवनेतथाप्युच्चैर्धाम्नेहरतिमहिमानंजनरवः॥तुलोजी
र्णस्यापिप्रकटनिहताशेषतमसोरवेस्तादृक्तेजोनहिभवतिक
न्यागतइव॥४७॥वहिःसर्वाकारप्रगुणरमणीयंव्यवहरन्पराभू
हस्यान्यपितनुतराणिस्थगयति॥जनंविद्वानेकःसकलमभिसं
धायकपटैस्तटस्थःस्वानर्थान्घटयतिचमौनंचभजते॥४८॥म
हतांयदिनिंदनेरतिर्गुणसंख्यैवतदाविधीयतां॥असतामपिचे
त्तवेरतिर्ननुतत्दूषणमेवगण्यतां४९अर्थीलाघवमुत्थितोनि
पतनंकामातुरोलांछनंनिःस्वोवंचनमुन्मदोविकलतांदोषाकुलं
संशयः॥लुब्धोःकीर्त्तिमसंगरःपरिभवंदुष्टोन्यदोषेरतिंदुर्वाग
प्रियतांदुरोदरवशःप्राप्नोतिकष्टंसुहृत्॥५०॥नीतिर्भूमिभुजांनति
र्गुणवतांह्रीरंगनानांधृतिर्दंपत्योःशिशवोगृहस्यकविताबुद्धेःप्रसा

दोगिरां॥लावण्यंवपुषःश्रुतंसुमनसःशांतिर्द्विजस्यक्षमाश
क्तस्यद्रविणंगृहाश्रमवतांस्वास्थ्यंसतांमंडनं॥५१॥कार्पण्ये
नयशःक्रुधागुणचयोदंभेनसत्यंक्षुधामर्यादाव्यसनैर्धनंचविप
दास्थैर्यंप्रमादैर्द्विजः॥पैशुन्येनकुलंमदेनविनयोदुश्चेष्टयापौरु
षंदारिद्र्येणजनादरोममतयाचात्मप्रकाशोहतः॥५२॥मूर्खोंशां
तस्तपस्वीक्षितिपतिरलसोमत्सरोधर्मशीलोदुःस्थोमानीदरि
द्रःप्रभुरतिकृपणःशास्त्रभृद्धर्महीनः॥आज्ञाहीनोनरेंद्रःश्रुचिर
पिसततंयःपरान्नोपभोजीवृद्धोरोगीदरिद्रःसचयुवतिपतिर्धिग्वि
डंबप्रकारान्॥५३॥स्त्रीणांयौवनमर्थिनामनुगमोराज्ञांप्रतापः
सतांस्वास्थ्यंस्वल्पजनस्यसंहतिरसद्वृत्तेश्चवागडंबरः॥सा॰
चारस्यसदर्चनंपरिणतेर्विद्याकुलस्यैकताप्रज्ञायाधनमुन्नतेर
तिनतिःशांतेर्विवेकोबलं॥५४॥विद्वान्संसदिपाक्षिकःपरवशो
मानीदरिद्रोगृहीद्रव्याढ्यःकृपणःसुखीपरवशोवृद्धोनतीर्थाश्रि॰
तः॥राजादुःसचिवान्वितःकुलभवोमूर्खःपुमान्स्त्रीजितोवेदांती
हतसत्क्रियःकिमपरंहास्यास्पदंभूतले॥५५॥लोकएषगतलोच
नत्रयःकस्यवानविरूपोनिवाच्यतां॥लोचनोत्सवमशेषजीवनं
यत्कलंकयतिचंद्रमंडलं॥५६॥गुरुरपिलघूपनीतोनिमज्जति
नियतमाश्रयेमहतः॥वानरकरोपनीतःशैलोमकरालयस्येव
॥५७॥स्वल्पाइतिरामवलैर्यैर्न्यस्तानाशयेपयोराशेः॥तेशैलाः
स्थितिमंतोहंतलघिम्नैवबहुमानः॥५८॥आपत्तावपिनैवमुंच
तिगुणोमार्गंयदीयःकृतेर्यच्छुद्धाधिकवंशजन्मजनितोलक्ष्मा॰
दिदानेरतः॥तुन्नंतद्धनमर्थितैकशरणंकौटिल्यभाग्भूतलेधिग्दे
वंहिविधेर्विधुर्यदितरारीतिःसमुन्मीलति॥५९॥उद्योगःक्षयमे
तिहतसहसाजाड्यंसमुज्जृंभतेमित्रस्यापिचदर्शनंभवतिनोकिं
वान्यदाचक्ष्महे॥यल्लोकस्पृहणीयतांगतमभूत्तजीवनंव्यर्थ॰
तांप्राप्तंयेनदुनोतितन्ममनोदुर्दैववत्दुर्दिनं॥६०॥दुःखंदेंतो
विसहेजणेइजोजस्सवल्लहोहोइ॥दइअणहदूमिआएणवि

हृदस्यणारोमंचो॥६१॥णगुणेणहीरइजणोहीरइजोजेणभाविउ॰तेण॥मोत्तूणपुलिंदामोत्ताहलाईगुंजाउँगेह्णंति॥६२॥सोअत्थोजोहत्थेतम्मितमणिरंतरंझ्रणो॥तंरूपंतत्वगुणात्तंविस्माणंजहिंधम्मो॥६३॥धत्तेवक्षसिकौस्तुभोपलमयंमत्वाश्रियःसोदरंतन्नाभीगृहमाकलय्यमकरावासंमनाङ्नोज्झति॥तन्नामग्रणयान्नलुंपतिहरिःश्रीवत्समंकेस्थितंकिंकेनक्रियतांसएवयदभूदेतादृशःस्त्रीवशः॥६४॥यत्रार्जवेनलघिमागरिमाणंवक्रतातनुते॥छेदःशास्त्रइवास्मिन्लोकेसरलःसखेकिमसि॥६५॥जानंतिहिगुणान्वक्तुंतद्विधाएवतादृशां॥वेत्तिविश्वंभराभारंगिरीणांगिरिमाश्रयं॥६६॥सौजन्यधन्यजनुषःपुरुषाःपरेषांदोषानपास्यगुणमेवगवेषयंति॥त्यक्त्वाभुजंगमविषानिपटीरगर्भात्सौरभ्यमेवपवनापरिशीलयंति॥६७॥रिरंसुकलहंसयोरनुनिशम्यरम्यध्वनिंक्वचित्क्वणितमीदृशंकृतमितिप्रियेपृच्छति॥नमहृदनमंडलंदशनयंत्रिकांतांगुलिभ्रमद्भ्रुकुटिकभ्रुवाद्भुतममज्जिलज्जार्णवे॥६८॥भवत्कृतेखंजनमंजुलाक्षिशिरोमदीयंयदियातियातु॥नीतानिनाशंजनकात्मजार्थंदशाननेनापिदशाननानि॥६९॥अत्यंतमंथनकदर्थनमुत्सहंतेमर्यादयानियमिताःकिमुसाधवोपि॥लक्ष्मीसुधाकरसुधाद्युपनीयशेषेरत्नाकरोपिगरलंकिमुनोज्जगार॥७०॥श्रुतोवंशीधीरध्वनिरनुमितंकुंजभवनंविलासोनुध्यातोमुररिपुरुपेतोक्षिविषयं॥गतामुक्तिंनीवीहृदयमिदमद्वैतमभवन्नजानेतत्कोयंवतमदनतंत्रस्यविभवः॥॥७१॥कतिनविधोःकुमुदिन्यःकुमुदिन्यास्तुविधुरिवविधुरेव॥अहमिवतेवहवोममतुभवानिवभवानेव॥७२॥तावकाःकतिनसंतिमादृशामादृशास्तुभवदेकजीवनः॥आंबुदाःकतिनसंतिचातकाश्चातकस्यपुनरेकएवसः॥७३॥ध्वांतमेतदभितःप्रसारियत्तद्यमायविधिनाविनिर्मितं॥दीपभास्करकरामृतौषधंनाधिपत्यतमसस्त्वकिंचन॥७४॥उत्थायोत्थायपापेपरिरमतिमनोमंद

बुद्धेयतस्तेनत्रासोनैव लज्जानचभवतिघृणाकुर्वतःकर्मनिंद्यं
॥तत्किंनैवशङ्कतातेज्वलदनलमहाज्वालजालातिरोद्रातमायः
कीलचक्रक्रकचकटुरवाराजधानीयमस्य॥७५॥शिक्षितापिस्म
खिभिर्ननुसीतारामचन्द्रचरणौननमाम॥किंभविष्यतिमुनीश
वधूवङ्गालरत्नमिहतद्रजसेति॥७६॥आपदामापतंतीनांहितो
प्यायातिहेतुतां॥मातुर्जंघैववत्सस्यस्तंभोभवतिबंधने॥७७॥
मोक्षाद्रूपक्षसकलद्विजकल्पवृक्षस्त्वास्मान्विहायगतवानसि
यच्छवाचं॥डिंडीरपिंडपरिपांडुरपायसानिकोदास्यतित्वयिग
तेघृतलड्डुकांम्ब॥७८॥ याकेलिच्युतकेशलेशविषमांशय्यांनभे
जेपुरायाजालांतरनिर्गतार्ककिरणद्योतादपिम्लायते॥सेयंनिः
ष्ठुरकाष्ठसंचितचितांदेदीप्यमानानलंसस्मेराभजतेयदिप्रियसु
खंस्नेहस्यकिंदुष्करं॥७९॥ व्यतिषजतिपदार्थानांतरःकोपिहे
तुर्नखलुबहिरूपाधीन्प्रीतयःसंश्रयंते॥विकसतिहिपतंगस्यो
दयेपुंडरीकंद्रवतिचहिमरश्मावुद्गतेचंद्रकांतः॥८०॥स्फूर्ज
ल्लोचनपद्मवामनयनालीला त्वराचुंबनैःकिंवामत्तगजेंद्रकुं
भविगलन्मुक्ताप्रदानैरथ॥कूजत्कीरमयूरमांसलरवंत्रिस्रोत
सीवर्त्मनैरायुःक्षीयतइत्थदग्रमहसःकस्यापिपुण्यात्मनः॥
॥८१॥इत्थंप्रीतिर्वल्लीहृदयभुविदैवात्समुदितातथायत्नाद्रक्ष्यामह
तिमृदुलाऽपायबहुला॥यथानैनांस्फीतांपिशुनजनदुर्वाक्यदहनो
दहत्यंतेःशोषंव्रजतिनपुनःसौहृदनिधे॥८२॥पंचभिःकामिताकुं
तीनवधूरथपंचभिः॥सतीवदतिलोकोयंयशःपुण्यैरवाप्यते॥८३
अशेषरसनागवीवहुविलासरत्नाकराधरातलधुरंधराःकतिनसं
तितेसज्जनाः॥सएवसुकृतीपरंपरिपतंतियस्योपरिप्रसारितमि
तस्मिनाःकुलहृशोदरीदृष्टयः॥८४॥केलीगृहेकोपिकलाप्रवी
णानीवीनवीनो दलयांचकार॥सकोपवित्रस्तचकोरदृष्टेर्न
कोनकोभाषणतत्परायाः॥८५॥गृहेहित्वाबालामभिनवविला
सव्यसनिनीमधीया नःशास्त्रंमठभुविशयानश्चिरतरं॥अधी

तेशास्त्रौघेकटकमटतस्त्रत्र्यतकटिनदेयंपांडित्यंकथमपिनृणांहं
सगमने॥८६॥सर्वस्यह्येकमतिक्रमतीसंपदापत्तिहेतूएकोगोत्रे
प्रभवतिपुमान्यःकुटुंबंबिभर्त्ति॥वृद्धोयूनासहपरिचयात्त्यज्यते
कामिनीभिःस्त्रीपुंवच्चप्रभवतियदातस्यगेहंविनष्टं॥८७॥अस
त्यतानिष्ठुरताकृतघ्नताभयंप्रमादोलसताविषादिता॥वृथाभिमा
नोह्यतिदीर्घसूत्रतातथांगरौस्याह्विनाशनंश्रियः॥८८॥गंतव्यं
राजपथिद्रष्टव्यामदनविक्लवारामा॥ ॥यद्यपिनभवतिसुरतंनयन
सुखंकोनिवारयिता॥८९॥मौनेमौनीगुणिनिगुणवान्पंडितेपंडितो
दीनेदीनःसुखिनिसुखवान्भोगिनिप्राप्तभोगः॥मूर्खेमूर्खोयुवतिषु
युवावाग्मिषुप्रौढवाग्मीधन्यःकोपित्रिभुवनजयीयोवधूतेवधूतः
॥९०॥प्रतीनामनंतंस्फुरद्वंहेतिकावामहामोहकूपेनयत्येवकावा॥
निरर्थाहिकावाअनिष्टाहिकावाप्रतिष्ठाहिकावागरिष्ठाहिकावा९१
मीमांसापठितानयैरूपनिषन्नैवश्रुतातत्त्वतःश्रीमच्छंकरभाष्यतो
भगवतीगीताप्यधीतानयैः॥सिद्धांतापगतंशिरोमणिमतंज्ञात्वा
पिकिंचित्ततोभट्टाचार्यपदंगताःकथमहोलज्जांलभंतेनते॥९२॥
मनसःपरमाणुतांवदंतःकथमद्यापिनतार्किकास्त्रपंते॥कनकाचल
जित्वरस्तनीनांतरुणीनांकिलयत्रसंनिवेशः॥९३॥परामृशंतिलिं
गानिव्यभिचारविचारकाः॥तार्किकायदिविद्वांसोविटैःकिमपराध्य
ते॥९४॥नैय्यायिकानांनलिनीवराणां जनुर्गतंरासभचिंतयैव॥
तथापिवेश्यास्तनसंनिवेशस्तोतुःकवेःकोपिविशेषएव॥९५॥गुरो
र्गिरःपंचदिनान्यधीत्यवेदांतशास्त्राणिदिनत्रयंच॥अमीसमाघ्रा
तवितर्कवादाःसमागताःकुक्कटपादमिश्राः॥९६॥नरम्यंनारम्यं
प्रकृतिगुणतोवस्तुकिमपिप्रियत्वंयत्रस्यादितरदपितद्ग्राहकव
शात्॥रथांगाह्वानानांभवतिविधुरंगारशकटीपटीरांभस्कुंभःसभ
वतिचकोरीनयनयोः॥९७॥कृतिनामकृतीकथंवातुलनायातुकृ
तैर्वचःप्रपंचैः॥बहुविधृतैःकचैःकलापैर्विधवाकिंसधवोपमानमे
ति॥९८॥हस्तंनमुंचतिनमुंचतिचाधरोष्ठंगाढंगलेलगतिपीडतिमध्य

दृश्यां॥स्नेहंविनासकलविभ्रमभावकर्त्रीवारांगनेवनृपरिवस्वृड्डिकायमुक्ता॥९९॥स्वर्गापगायास्तरलैस्तरंगैःपौरांगनानांकुटिलैःकटाक्षैः॥धर्मश्चकामश्चसमेत्यतीरेह्यन्योन्यमायोधनमारभेते॥१००॥श्रीखंडखंडमवघृष्यसुधांसुबिंबेनीतंपयोधरतटीपरिवर्तनाय॥मंदोदरीयमुररीकुरुतेदृशाचेदंगेभवंतिपुलकानिपुलोमजायाः॥१०१॥आपांडुताशिरसियत्रवलीकपोलेदंतावलीविगलितानचमेविषादः॥एणीदृशोयुवतयःपथिमांविलोक्यतातेतिभाषणपराःशतकुंतघातः॥१०२॥मुद्गदालीधृतव्यालीकवींद्रवितुषाकथं॥भक्तवल्लभसंयोगाज्जाताविगतकंचुकी॥१०३॥विपक्षितामपश्चिमेविवादकेलिलंपटेसपत्नजिस्यपत्रपेवरत्नखेटवीक्षिते॥बृहस्पतिःक्वजल्पतिप्रसर्पतिक्वसर्पराडसंमुखश्चषण्मुखःक्वदुर्मुखश्चतुर्मुखः॥१०४॥गोधूमचूर्णचयचारुसुधाकराभामाषप्रकारलवणार्द्रकहिंगुगर्भा॥हैय्यंगवीनहृदमज्जनकोमलांगीपूरीसुखेविशतिपुण्यवतांजनानां॥१०५॥स्पर्द्धंतांसुखमेवकुंजरतयादिक्कुंजरैःकुंजराःग्राम्यावावनवासिनोमदजलप्रक्लिन्नगंडस्थलाः॥आःकालस्यकुतूहलंशृणुसखेप्राचीनपालीमहास्निग्धस्वादुकपोलकांतिरहितःकालोपिसंस्पर्धते॥१०६॥अमरावतीपतित्वंशिवशिवलोकास्त्ववांछंति॥स्वीकुरुमनसिविचारंकिंसुसुखममरावतीपतेसुमते॥१०७॥शिवशिरसिशिरांसियानिरेजुःशिवशिवतानिलुठंतिगृध्रपादैः॥अपिखलुविषमःपुराकृतानांविलसतिजंतुषुकर्मणांविपाकः॥१०८॥क्वनुकुलमकलंकमायनाक्ष्याःक्वरजनीचरसंगमापवादः॥अपिखलुविषमःपुराकृतानांविलसतिजंतुषुकर्मणांविपाकः॥१०९॥कांतांदृष्ट्वाचरणयुगलक्षालनायप्रवृत्तामस्मिन्नाह्रेक्ष्मियमितिमनुंपापठीतिप्रयत्नात्॥देवस्यत्वेनिचवत्तपुनर्वीटिकायाःमदानेजामाता ते जडमतिरयंक्षौदसःकिंकरोमि॥११०॥मक्षेहेमघकीवमूषकवधूमूषीवमार्जिकामार्जारीवसुनीसुनीवगृहीणीवाच्यःकिमन्योजनः॥मूर्च्छापन्नाशिशूनस्मृन्विजहतोदृष्ट्वातुझिल्लीरवाक्कूलांतंतुविता

नसंवृतसुखीचुल्लीचिरंशेदिति॥११॥पीठाःकच्छपवत्तरंतिसलिलेसंमा
र्जनीमीनवत्दर्वीसर्पविवेष्टितानिकुरुतेसंत्रासयंतीशिशून्॥शूर्पाधीर
तमस्तकाचगृहिणीभितिश्चपातोन्मुखीरात्रौपूर्णतडागसंनिभमभूद्राज
न्मदीयंगृहं॥१२॥यंनीरालयवनेश्वरांत्रुपतनंतैलाप्लुतिःकेडनंसौरेतेज
सिसंस्थितिःकिलमुहुःकांताकरैःपेषणं॥तप्तस्नेहनिमज्जनंसुकथिका
संमज्जनंदुःसहंनोमन्येयुवतीकरैर्जनपुनःस्वच्छेदनंयादृशं॥१३॥क
स्मैयच्छतिसज्जनोबहुधनंसृष्टंजगत्केनवाशंभोर्भातिचकोगलेयुवति
भिर्वेण्यांचकाधार्यते॥गौरीशःकमताडयच्चरणतःकारक्षितारास्मसे
शरोहाद्वरोहतःकलयतामेकंद्वयोरुत्तरं॥१४॥बालातन्वीमृदुरियमि
तित्यज्यतामत्रशंकादृष्टाकाचित्भ्रमरभरतोमंजरीभज्यमाना॥तस्मा
देषारहसिभवतानिर्दयंपीडनीयानंदाक्रांताविसृजतिरसंनेक्षुयष्टिःस
मग्रं॥१५॥कर्णाटीसुरतोपचारचतुराधूर्त्तामहाराष्ट्रजागौडीप्रौढगुणाश्रु
विर्द्रविडजावित्तंहराकोंकणी॥आंध्रीपीनपयोधराचकुटिलालाटीसदा
लंपटामुग्धास्निग्धविलोचनाचविरहाक्रांतासदागुर्जरी॥१६॥नाराय
णंत्रिनयनंनलिनासनंवानार्थयथेच्छमनुगच्छतिजीवलोकः॥गात्रं
जगत्त्रितयमोहनमंगनानांकूलंकषस्तनभरंकुलदेवतंनः॥१७॥नागोः
भातिमदेनकंजलरुहैःपूर्णेंदुनाशर्वरीशीलेनप्रमदाजवेनतुरगोनित्यो
त्सवैर्मंदिरं॥वाणीव्याकरणेनहंसमिथुनैर्नद्यःसभापंडितैःसत्पुत्रेणकुलं
त्वयावसुमतीलोकत्रयंविष्णुना॥१८॥काविद्याकविताविनार्थिनिजनेदा
नंविनाश्रीश्चकाकःसूनुर्विनयंविनाकुलवधूःकास्वामिभक्तिंविना॥धर्मः
कःकृपयाविनाक्षितिपतिःकोनामनीतिंविनाभोगःकिंरमणींविनाज
निजुषःकिंजन्मकीर्त्तिंविना॥१९॥कोलाभोगुणिसंगमःकिमसुखंप्रा
ज्ञेतरैःसंकथाकाहानिःसमयच्युतिर्निपुणताकाधर्मतत्त्वेरतिः॥कःशू
रोविजितेंद्रियःप्रियतमाकाऽनुव्रताकिंधनंविद्याकिंसुखमप्रवासवस
तीराज्यंकिमाज्ञाफलं॥२०॥उर्व्याकोपिमहीधरोलघुतरोदोर्भ्यांधृतोली
लयायेनत्वंदिविभूतलेचसततंगोवर्द्धनोद्धारकः॥त्वांत्रैलोक्यधरंवहामि
कुचयोरग्रेनतद्गण्यतेकिंवाकेशवभाषणेनबहुनापुण्यैर्यशोलभ्यते॥२१॥

अथसमस्याख्यानं

सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्॥दलितश्चकितःश्छन्न

स्तवसेन्येविसर्पन्ति॥१॥ कस्यापि॥ पूर्वार्धमत्रसमस्या॥ कामंकामदुघं धुंक्ष्व मित्रायवरुणायच॥ वयंधीरेशदानेनसर्वान्कामानशीमहि॥२॥ कस्यापि॥ पूर्वार्धंतुरीयपादश्चसमस्या॥ असमानेसमानत्वंभविताकलहेमम॥ इतिमत्वाध्रुवंमानीमृगात्सिंहःपलायते॥३॥ कस्यापि॥ तुर्यपादःसमस्या॥ विद्यायांदुर्मदोयेषांकार्पण्यंविभवेसति॥ तेषांदेवाभिशप्तानांसलिलादग्निरुत्थितः॥४॥ कस्यापि॥ अत्रापिचतुर्थपादःसमस्या॥ दामोदरकराघातविह्वलीकृतचेतसा॥ दृष्टंचाणूरमल्लेनशतचंद्रंनभस्तलं॥५॥ बाणस्य॥ चलत्तरंगरंगायांगंगायांप्रतिबिंबितं॥ सचंद्रंशोभतेत्यर्थंशतचंद्रंनभस्तलं॥६॥ राघवभट्टानां॥ अंत्यपादःसमस्या॥ भीष्मग्रीष्मर्तुसंतप्तशून्यरथ्यांतरस्थयोः॥ अन्योन्यालापसुखिनोर्यूनोश्चंद्रायतेरविः॥७॥ यूनोश्चंद्रायतेरविरितिपदैकंसमस्या॥ सीतासमागमोत्कंठाकर्णोतोकृष्टधन्विनः॥ राघवस्यशरांगारैःसमुद्रादग्निरुत्थितः॥८॥ कस्यापि॥ समुद्रादग्निरुत्थितइतिपदैकंसमस्या॥ स्वस्तिक्षत्रियदेवाय — — — — जगद्देवायभूभुजे॥ यद्यशःपुंडरीकांतर्गगनंभ्रमरायते॥९॥ कस्यापि॥ गगनंभ्रमरायतइतिपदैकंसमस्या॥ यत्कंठेगरलंविराजतितरांशीर्षेचमंदाकिनीस्वत्संगेचशिवामुखंकटितटेशार्दूलचर्मांबरं॥ मायायस्यरुणद्धिविश्वमखिलंतस्मैनमःशंभवे॥ जंबूवज्जालुबिंदुवज्जलजवज्जंबालवज्जालवत्॥१०॥ कस्यापि॥ अंत्यपादेसमस्या॥ रथस्यैकेचक्रंभुजगयमितासप्ततुरगानिरालंबोमार्गश्चरणरहितःसारथिरपि॥ रविर्गच्छत्यंतंप्रतिदिनमपारस्यनभसः क्रियासिद्धिःसत्वेवसतिमहतांनोपकरणे॥११॥ कस्यापि॥ विजेतव्यालंकाचरणतरणीयोजलनिधिर्विपक्षःपौलस्त्योरणभुविसहायाश्चकपयः॥ तथाप्येकोरामःसकलमवधीद्राक्षसकुलंक्रियासिद्धिःसत्वेवसतिमहतांनोपकरणे॥१२॥ धनुःपौष्पंमौर्वीमधुकरमयीवामनयनादृशांकोणेबाणाः सुहृदपिजडात्मासितकरः॥

तथाप्येकोनंगस्त्रिभुवनमिदंव्याकुलयतिक्रियासिद्धिःसत्वेवसतिमहतांनोपकरणे॥१३॥घटेजन्मस्थानंमृगपरिजनोभूर्जवसनेवनेवासःकंदाशनमपिचदुःस्थंवपुरिदं॥तथाप्येकोगस्त्यःसकलमपिबद्वारिधिजलंक्रियासिद्धिःसत्वेवसतिमहतांनोपकरणे॥॥१४॥केषामपि॥समस्याचतुर्ष्वपिश्लोकेषुस्फुटैवतुरीयपादरूपैकैव॥अस्माकंजलजीविनांजलमिदंसद्वाजिराजिव्रजैःपातव्यंपररक्तरक्तमनसांतृप्तिःपतीनांक्षयः॥मत्वैवंमहराजदेवनृपतेत्वज्जैत्रयात्रोत्सवेमत्स्योरोदितिमक्षिकाचहसतिध्यायंनिवाम्भुवः॥१५॥आनंददेवानां॥समस्यापूर्ववदंत्यःपादः॥स्फुरितेजठरेविष्णोर्नवनीतभुजःशिशोः॥मक्षिकापादघातेनकंपितंभुवनत्रयं॥१६॥शार्ङ्गधरस्योत्तरार्धसमस्यात्र॥रामाभिषेकेमदविह्वलायाःकराच्च्युतोहेमघटस्तरुण्याः॥सोपानमासाद्यचकारशब्दंठंठंठठंठंठठंठठंठः॥१७॥कस्यापि॥समस्यास्फुटांत्यपादे॥उन्नमय्यसकचग्रहमास्यंचुंबतिप्रियतमेहठवृत्या॥ऊंहुंउंउंहुहुंहूंहुहुहूहूंकूजितंभवतिमानधनायाः॥१८॥विज्जकायाःसमस्यातृतीयपादः॥मलयसहायकरावनितागोलानाचम्यसकलभूमिरुहां॥विलसतिदवदहनावलिरिहजलवाहःपरंशरणं॥॥१९॥मुरारेः॥मलयसहायकरावचितागोलानाचम्येनिपदेकंसमस्या॥स्फुरतायनमस्तस्मैजगदानंदहेतवे॥आनुषंगिफलंयस्यभोजराजभवादृशाः॥२०॥सरस्वतीकुटुंबदुहितुः॥पूर्वार्धमत्रसमस्या॥अतसीपुष्पसंकाशंखंवीक्ष्यजलदागमे॥येवयोपिहिजीवंतिनतेषांविद्यतेभयं॥२१॥मेघस्य॥आद्यंतपादौसमस्यात्र॥ममकरग्रहणायपणीकृतंयदिनराघवतोप्यधिरोहति॥सखितदैवमभून्ममजीवितंशशकशृंगमयंकठिनंधनुः॥२२॥कस्याप्यंत्यःपादःसमस्या॥चेतोहरायुवतयःस्वमनोनुकूलाःसद्बांधवाःप्रणतिनम्रगिरश्चभृत्याः॥गर्जंतिदंतिनिवहास्तरलास्तुरंगाःसंमीलनेनयनयोर्नहिकिंचिदस्ति॥२३॥अपिखलुविषमःपुराकृतानां

भवति हि जंतुषु कर्मणां विपाकः[7]॥ हरशिरसि शिरांसि यानि रेजुः शिव शिव तानि लुठंति गृध्रपादाः ॥२४॥ वागर्थाविव संपृक्तौ शतकोटिप्रविस्तरं॥ तुरासाहं पुरोधाय नेमुः सर्वे सुराः शिवौ[10]॥२५॥ श्रुत्वा सा[11]गरबंधनं दशशिराः[12] सर्वैर्मुखैरेकदा तूर्णं[13] पृच्छति वार्तिकान्[14]स चकितो भीत्या परं संभ्रमात्॥ वह्नेः सत्यमपां निधिर्जलनिधिः कीलालधिस्तोयधिः पाथोधिर्जलधिः पयोधिरुदधिर्वारांनिधिर्वारिधिः ॥२६॥ अं[15]बा कुप्यति तात मूर्ध्नि[16] विधृता गंगेयमुत्सृ[17]ज्यतां विद्वन्षण्मुख का गतिर्मम चिरं मूर्ध्नि स्थिता यावद॥ को[18]पावेशवशा दशेषवदनैः प्रत्युत्तरं दत्तवानंभोधिर्जलधिः पयोधिरुदधिर्वारांनिधिर्वारिधिः ॥२७॥ सर्वस्य द्वे सुमतिकुमती संपदापत्तिहेतू एको गोत्रे प्रभवति पुमान्यः कुटुंबं बिभर्त्ति॥ वृद्धो यूना सह परिचयात्त्यज्यते कामिनीभिः स्त्रीपुंवच्च प्रभवति यदा तद्धि गेहं विनष्टं॥२८॥ आ[20]षाढी कार्त्तिकी माघी वचा शुंठी हरीतकी॥ गयायां पिंडदानेन पुण्याश्लेष्महरानृणी॥२९॥ कांचिद्दि[21]नार्धसमये रविरश्मितप्तां नीलांशुकाचलनिलीनमुखेंदुबिंबां॥ नो तादृशीं समनुवीक्ष्य कविर्जगाद राहुर्दिवा ग्रसति पर्वविना किलेंदुं॥३०॥ तत्तु पर्वतसन्निभेन कपिनालीबूकृतावसत्सिसिप्रवीक्ष्य निमज्जतीमथ तलस्पृष्टास्तरंतीः शिलाः॥ लोके नृत्यपरे विभीषणजने सत्याह सेतूद्यसेतुर्वीमज्जति सेतरंति दृषदश्चेतो दिवा नृत्यति॥३१॥ ख्यातस्त्वं फलवृष्टिपुष्टिसुमनस्वाधीनजांबूनदः शीर्णास्ते रिपुसंपदः प्रतिदिनं मित्रोदये मोदसे। पाथानां कुरुषे विलंबन महोदत्तानरस्तेजसा जंबूवज्जलबिंदुवज्जलजवज्जबालवज्जालवत्॥३२॥

---

(१) संमीलने नयनयोरितिचतुर्थपादःसमस्या (२) हरशिरसीत्युत्तरार्धसमस्या· (३) नेमुरितिचतुर्थपादःआद्यपादत्रयसमस्यापूरणं (४) अपांनिधिरित्यादिसमस्या· (५) अंभोधिरित्यादिचतुर्थपादःस० (६) सर्वस्यद्वे·एकोगोत्रे·वृद्धोयूना·स्त्रीपुंवच्च·इतिचत्वारिपाणिनेःसूत्राणिसमस्याचतुर्थपादेषु (७) पुण्याश्लेष्महरानृणीतिचतुर्थपादःस० (८) राहुर्दिवाग्रसतीतिचतुर्थपादःसमस्या॥

१ चेतोहरामनोहारिण्यः २ युवतयस्तरुण्यः ३ दंतिनिवहागजसमूहाः ४ तरलाश्चंचलाः ५ संमीलने निमीलने ६ विषमःक्लेशदः ७ विपाकःपरिणामः ८ इदंक्रियाविशेषणं ९ तुरासाहमिंद्रं १० शिवौपार्वतीशंकरौ ११ सेतुबंधं १२ रावणः १३ झटिति १४ वृत्तांतज्ञापकान् १५ माता १६ मस्तके १७ त्यज्यतां १८ क्रोधपरत्वेन १९ षड्भिर्मुखैरित्यर्थः २० आषाढीकार्त्तिकीमाघीएकादशीपुण्या· वचाशुंठीहरीतकीश्लेष्महरा· गयायांपिंडदानेनअनृणीपितृऋणान्मुक्तइतियोजना २१ मध्याह्ने २२ सूर्यकिरणसंतप्तां २३ नलिवस्त्रांचलपिहितमुखचंद्रां २४ स्वर्भानुः॥ छ॥

काशंभुकांताकिमुचन्द्रकांतंकांतामुखंकिंकुरुतेभुजंगः॥कःश्रीप
तिःकाविषमासमस्यागौरीमुखंचुंबतिवास्कदेवः॥३३॥कस्तूरीजा
यतेकस्मात्कोहंतिकिरणांकुलं॥किंकुर्यात्कातरोयुद्धेमृगात्सिंहःप
लायते॥३४॥हीनहस्त्याद्धार्येवलाघवंमहतामपि॥इतिमत्वा
द्विपद्वेषीमृगात्सिंहःपलायते॥३५॥तिष्ठार्जुनाद्यसंग्रामेत्त्वांहनिष्या
म्यहंशरैः॥तिष्ठामि कर्णकिंमूढमृगात्सिंहःपलायते॥३६॥ऋ
षेरस्याश्रमेपुण्येयशापसंत्रस्तमानसः॥मुहोघतापिप्रायोयंमृगात्सिं
हःपलायते॥३७॥अयंमृगःस मायातिमृगात्सिंहःपलायते॥ततो
वेगात्पलायस्वत्वरितस्त्वरितैःपदैः॥३८॥दैत्यानांमनसिद्याजा
ताकृष्णमिहरक्षितुंकस्मात्॥द्रष्टुंदेवमजस्त्रंदैत्यस्त्रीणामपिप्री
तिः॥३९॥श्रीनाथनःश्रुतमितिवहुधाभ्रमतामयान्नृलोकेषु॥शी
लंवाश्वधूनांदैत्यस्त्रीणामपिप्रीतिः॥४०॥कःकांतारमगात्पितुर्वचन
तःसंश्लिष्यकंठस्थलींकामीकिंकुरुतेचगृध्रहठतश्छिन्नंप्ररूढंचकिं
॥कोरक्षःकुलरात्रिरेवरभवत्त्वंद्रातपंद्वेष्टिकोरामश्चुंबतिरावणस्यव
दनंसीतावियोगातुरः॥४१॥विधेपिधेहिशीतांशुयावन्नायातिमां
प्रियः॥आगतेदयितेकुर्याःशतचंद्रंनभस्तलं॥४२॥सुमेरुशिख
रप्रांतस्फुरद्दिव्यवधूमुखैः॥परितःस्फुरितैःशंकेशतचंद्रंनभस्त
लं॥४३॥कर्पूरपूरच्छविवाद्विद्यासंवावदूकद्युत्तिशुक्तितास्रे॥
इंदोनृपद्वेषितयोविनानसूर्योदयेरोदितिचक्रवाकी॥४४॥वि
लोक्यवालामुखचन्द्रबिंबकंठेचमुक्तावलिहारताराः॥पुनर्नि
शायाभयभीतभीतासूर्योदयेरोदितिचक्रवाकी॥४५॥सर्वस्यजं
तोर्भवतिप्रमोदोविरोधिवर्गेपरिभूयमाने॥तिरोहितेत्वद्यशसानरें
द्रचंद्रोदयेनृत्यतिचक्रवाकी॥४६॥मधौमंदंमंदंमरुतिशिशिरेवा
तिरुचिरेकुलस्त्रीभिःकृष्णेविहरतितथावृष्णिनिकरे॥उषायोषात्तो
षाद्दनमनिरुद्धस्यमिषतोपुरःपत्युःकामातप्रवशशरमिममालिंग
तिसती॥४७॥स्वयंसंराध्येशंपुरभिदमनल्पेनतपसामहेंद्रंसंतोष्य
त्रिदशरिपुनाशाद्मुकरात्॥समायातेपार्थेद्रुपदतनयाक्लेशविक

लापुरःपस्तुःकामात्श्वसुरमिममालिंगतिसती॥४८॥त्वंनोगो
त्रपतिस्तवेंदुरधिपस्तस्यामृतंत्वत्करेतेनव्याधशराहतांप्रणयि
नीमेनांपुनर्जीवय॥इत्यूर्ध्वंगगनेनिशापतिमृगेकारुण्यमातन्वतः
शृंगाग्राद्पतत्प्लवगस्यरुदतोवाष्पांबुभूमंडले॥४९॥वह्लवल
समर्थोमेघनादाद्योमेसपदियुधिविशंतःकीटहस्तेनिपेतुः॥इति
वदतिदशास्येहस्ततालैर्वितत्यमशकगलकरंध्रेहस्तियूथंप्रविष्टं॥५०
मृगशिशुनयनायाअक्षिपक्ष्मप्रकोणेविलसतितरलायातारका
तारकेव॥प्रतिफलितदृहोष्टेभ्रांतिरास्तेजनानांतिलतुषपुटको
णेमक्षिकोष्टंप्रसूता॥५१॥रामत्वत्कीर्त्तिवृक्षात्वहुतरममला
दुत्थिताःकोरकायेतन्मध्येरुद्ररूपोप्यजनिखलुयशःकोरकस्त
स्यचाङ्ये॥आस्यश्रोत्राक्षिकूपास्तदुपरिचशिरस्तत्रचास्तिस्र
वंतीसूच्यग्रेकूपषट्कंतदुपरिनगरीतत्रगंगाप्रवाहः॥५२॥उद्दामा
कांशुदीप्यद्दिनमणिमणिभिर्भस्मितांतेसमंताद्वायुव्याधूयमान
ज्वलनकणगणाकीर्णधूलिप्रकीर्णे॥कांतारेस्मिन्नृपार्त्तेमथि
पथिकभवेकापिपाथोथतेनासूच्यग्रे॥५३॥नक्कापिरामाहितत
संश्रयोयाविनाननात्वंजनकात्मजायाः॥पुरःसुराणांकपुरःसरा
णामंगारपूर्णंकमलंप्रफुल्लं॥५४॥पुंजायमानारुणरत्नहारेकां
तोरसिस्त्रावदनंनभाति॥सिध्येदमुष्योपमितिर्यदिस्यादंगारपूर्णं
कमलंप्रफुल्लं॥५५॥रुतंपतंतंप्रसमीक्ष्यपावकेनबोधयामास
पतिंपतिव्रता॥तदाह्यसौतद्रुतशक्तिपीडितोहुताशनश्चंदनपंक
शीतलः॥५६॥नीलाज्वद्युतिनयनेनितांतरक्तमास्यश्रीपरिचि
तचंद्रिकाविलासा॥स्नातायाःसरसिविलोक्यवक्त्रचंद्रंमध्यान्हे
मुकुलितमंबुजंवनेषु॥५७॥पुरोरेवापारेगिरिरतिदुरारोहशि
खरःशरःसर्वैःसर्व्वोदवदहनदावव्यतिकरः॥धनुःपाणिःपश्चा
च्छवरहतकोधावतिभृशंनगंतुंनस्थातुंहरिणशिशुरेषःप्रभव
ति॥५८॥सौमित्रिर्वदतिबिभीषणायलंकांदेहित्वंभुवनपतेविनैवको
षं॥एतस्मैरघुपतिराहवाक्यमेतत्विक्रीतेकरिणिकिमंकुशेविवा

दः॥५९॥नारब्धंकुचपरिरंभणेपुवाम्यंवैमत्यंव्यरचिनचुंबनेक
दाचित्॥किंनीवीगतमबलेरुणत्सिपाणिंविक्रीतेकरिणिकिमं
कुशेविवादः॥६०॥गोविंदस्त्वमकरोत्सरोजनेत्रेप्रेमांधावरव
पुरर्पणेसखित्वं॥कार्पण्यंनकुरुदृगवलोकदानेविक्रीतेकरि
णिकिमंकुशेविवादः॥६१॥समीचीनाचीनांशुकपरिवृतांगीप्रवि
लसत्कुचापीनाहीनाजघनघनभागेब्जवदना॥नदीनादीनांतः
कलितमदनासेव्यमधुनानवीनामीनाक्षीव्यथयतिमुनीनामपिम
नः॥६२॥स्फुरन्नानारत्नारुणितवसनावृत्तमसृणस्तनापीनाम
त्तातरसजघनाहंसगमना॥स्मराधीनासीनाकविहृदिजिताशे
षललनानवीनामीनाक्षीव्यथयतिमुनीनामपिमनः॥६३॥उदा
सीनालीनामपिवचसिलीनातनुलसत्त्रपाधीनादीनालपनपदवी
नायकधृता॥कवीनामासीनाहृदिकुमुदिनीनाथवदनानवीना
मीनाक्षीव्यथयतिमुनीनामपिमनः॥६४॥निलीनावेश्मांतःकथ
मपिसखीनामभिहितैःकृताधीनाऽहीनाकृतिरपिमतीनामवि
षया॥कवीनामज्ञत्वंज्ञपयतिविपीनातनुतयानवीनामीनाक्षी
व्यथयतिमुनीनामपिमनः॥६५॥कुचाभ्यांभास्वंतीविजितलकु
चाभ्यांपुवमनोहरंतीबिब्बोकैःसरसिविहरंतीमधुरगीः॥तरुण्या
लावण्यंकिमपिविदधानार्भकविधोनवीनामीनाक्षीव्यथयतिमु
नीनामपिमनः॥६६॥मांसाक्षीकृत्यमुग्धोविजयमभिलषन्लेख
यामासशंभुर्भूषामन्मौलिमालाःसदृशनवशतीरक्षपातान्विजि
त्य॥गोप्यैप्यानेजदृष्टीर्जितिनवनखभूस्तन्विशेषातदित्थंशीर्षा
णांसैववंध्याममनवतिरभूल्लोचनानामशीतिः॥६७॥प्रत्येकंदि
क्पतीशानिलतप वसून्सन्नतस्त्वंयथाभूडश्रौषीस्त्वंयथाच
स्वरसहितलसन्मूर्छनागानतानान्॥कृष्णन्यस्तान्यमौलीक्ष
णावदवसरेसाचसान्वप्रसादाच्छीर्षाणांशेषवंध्यातवनचतिरभू
ल्लोचनानामशीतिः॥६८॥उन्मादांबुदवर्धितांधतमसिप्रभ्रष्टदृ
ङ्मंडलेकालेयामिकजाग्रदुग्रसुभटव्याकीर्णकोलाहले॥कर्ण

स्यासुहृदर्णवांबुवडवावन्हेर्यदंतःपुराद्यथानासितदंबुजाक्षिकृतकंमन्येभयंयोषितं॥६९॥उग्रग्राहमुदन्वतोजलमतिक्रामस्यनालंबनेव्योम्निभ्राम्यतिदुर्गमक्षितिभृतांमूर्धानमारोहति॥व्याप्तंयातिविषाकुलैरहिकुलैःपातालमेकाकिनीकीर्त्तिस्तेमदनाभिरामकृतकंमन्येभयंयोषितं॥७०॥रेपुत्रसत्संगमवाप्नुहित्वमसत्ससंगंत्वरयाविहाय॥धन्योपिनिंदांलभतेकुसंगात्सिंदूरबिंदुर्विधवाललाटे॥७१॥उदारालंकारासुललितपदाकृष्टतरसासमापन्नाशाश्यामननुगुणमावाक्यसुभगा॥स्फुरद्वर्णाभ्यर्णस्थितजनघनानंदवसतिःसमस्यावेश्येवप्रतिपुरुषमेषाविलसति॥॥७२॥इतिबृहत्शार्ङ्गधरविरचितायांपद्धत्यांसमस्याख्यानपरिच्छे॰

अथप्रहेलिकापद्धतिकूटाख्यानम्॥

अपदोदूरगामीचसाक्षरोनचपंडितः॥अमुखस्फुटवक्ताचयोजानातिसपंडितः॥१॥कस्यापि॥अत्र — लेखपत्रंप्रकटं॥वनेजातावनेत्यक्तावनेतिष्ठतिनित्यशः॥पण्यस्त्रीनतुसावेश्यायोजानातिसपंडितः॥२॥कस्यापि॥अत्रनौका॥गोपालोनैवगोपालःत्रिशूलीनैवशंकरः॥चक्रपाणिःसनोविष्णुर्योजानातिसपंडितः॥३कस्यापि॥अत्रमहोक्षः॥उच्छिष्टंशिवनिर्माल्यंवमनंशवकर्पटं॥काकविष्ठासमुत्पन्नाःपंचैतेतिपवित्रकाः॥४॥दुग्धंगंगामधुपट्टांबरंपिप्पलश्चेत्यर्थः॥विजितात्मभवद्वेषिगुरुपादहतोजनः॥हिमापहामित्रधरैर्व्याप्तंव्योमाभिनंदति॥५॥दंडिनः॥विनागरुडेनजितइन्द्रःतदात्मभवअर्जुनस्तद्वेषीकर्णःतद्गुरुःसूर्यःतत्पादहतस्तत्किरणसंतप्तःहिमापहोग्निस्तदमित्रंपानीयंतद्धरोमेघः॥ ॥इतिप्रहेलिकार्थः॥ काचिन्मृगाक्षीप्रियविप्रियोगेगंतुंनिशापारमपारयंती॥उन्नातुमादायकरेणवीणामेणांकमालोक्यशनैरहासीत्॥६॥कस्यापि॥गीतप्रियोयंननुमृगांकेमृगोमत्प्रसुन्कंगीत॰माकर्णयितुंमृगांकाच्चेदवतरेत्तदाचंद्रोनिःकलंकःस्यात्तेनचमन्मुखसाम्यंलभेतप्रियविप्रियोगेममसंतापकरश्च हिमांशुरतोस्यश

त्रुभूतस्यमदाननस्यसाम्यंमाभूयादित्याशयेनवीणामहासीदितिप्रहेलिकार्थः॥ तरुण्यालिंगितःकंठेनितंबस्थलमाश्रितः॥ गुरूणांसन्निधानेपिकःकूजतिमुहुर्मुहुः॥७॥कस्यापि॥कलशः॥अवलोक्यस्तनौबद्धागुंजाफलविभूषितौ॥निःश्वस्यरोदितुंलग्नाकुतोव्याधिकुटुंबिनी॥८॥धर्मदासस्य॥शबरस्त्रीपुत्रजायायाःकुचौगुंजाफलालंकृतौदृष्ट्वाकुतोनिःश्वस्यरुरोदयतोमत्पुत्रएनामनुरक्तस्तथाक्षीणतांगतोयथागजान्विनिहत्यगजमुक्ताफलहारैस्तनौविभूषयितुंनालं॥अतोनिःप्रयासलभ्यैर्गुंजाफलैर्विभूषयतिक्षीणेचसतिपुत्रेतदर्जितधननिर्वाहवृत्तिकस्यसर्वस्यापिकुटुंबस्यजीवितसंदेहः अतोव्याधकुटुंबिनीदुःखेनसनिःश्वासंरोदितुंलग्नेतिप्रहेलिकार्थःप्रकटीकृतः॥गीत्वाकिमपिव्याधःशृंगंजग्राहतरुणहरिणस्य॥तमथसमीक्ष्योद्यतकरमेणीमपिलज्जिताव्याधी॥९॥शार्ङ्गधरस्य॥अस्यार्थः॥व्याधःकिमप्यद्भुतंगीत्वागीतमूर्छनाविलीनचित्तस्यहरिणतरुणस्यशृंगंजग्राह॥किमर्थंयतोमद्गीतसुखितःत्वमतोममापेक्षितमिदंस्वकीयंशिरोदेहीति अथतंहरिणंशिरोदानायोद्यतकरंसमीक्ष्यतज्जायांहरिणीमपिपत्युर्भक्त्यानिजशिरोदानायोद्यतकरांसमीक्ष्यव्याधस्यसार्थचारिणीव्याधीलज्जिताकेनहेतुनायतोयंहरिणोदाताइयंचहरिणीपतिभक्तादातृजायामत्कांतस्तुयाचकः अहंचयाचकजायावरमेतेपशवोनवयंमनुष्याः॥इत्यभिप्रेत्यलज्जिता॥अयंप्रथमोर्थः॥अथवाव्याधजायायाःपूर्वपरिणीतःपुरुषोमृतःसचविद्यमानःसंगृहीतोद्वितीयःपुरुषःतंचविलोक्यचिंतितवतीयतोनिजकांतवियोगासहिष्णुःशिरोदानायोद्यतकरापतिभक्तावरमियंहरिणीअहंचपरिणीतप्रियमरणेपिजीवितासंगृहीतभर्तृकावासतीमनुषीइतिलज्जिता॥इतिद्वितीयोर्थः॥अथवाइतिचिंतितंतयायतोयेनकर्णेनगीतंश्रुतंतस्यकर्णस्यदातुःपुरोयाञ्चायैकरोनप्रसारितोव्याधेननीरसकठिनकुटिलस्य

शृंगस्यतुपुरःप्रसारितइतिव्याधेनानुचितकृतामूढेनकृतेप्य
नौचित्येस्वयंमृगयूथपतिर्गीतरसज्ञोकृतपात्रविचारःस्वभाव
कृपणंयाचकंजानन्निजशिरोदानायोद्यतकरोजातःव्याधीच
तंचहरिणंचतुरंज्ञात्वाव्याधंतंमूर्खमवगम्यएणींचैनादृशाच
तुरपतिपत्नीत्वेनसुभगांसंभाव्यस्वयंलज्जितेतितृतीयः॥ ॥
अपांडुपीनकठिनंवर्तुलंसुमनोहरं॥कैराकृष्यतेत्यर्थंकिंनद्वै
रपिसस्पृहं॥१०॥दुर्वारवीर्यसरुषित्वयिकाप्रसुप्ताश्यामासपत्न
हृदयेसुपयोधराच॥तुष्टेपुनःप्रणतशत्रुसरोजसूर्येसेवाऽद्यव
र्णरहितावदनामकास्यात्॥११॥सदारिमध्याऽपिनवैरियुक्तानि
तांतरक्ताऽपिसि[4]तैवनित्यं॥यथोक्तवादिन्यपिनैवदूतिकाकानाम
कांतेतिनिवेद्याऽशु॥१२॥सर्वस्वापहरोनदस्युकुलजःखड्गा
गभृन्नेश्वरोदोषाऽनिष्टकरोनधर्मनिरतःकीलारुपोनाऽसुरः॥
नृणांपृष्ठपलायनोनपिशुनःशीघ्रंगमोनोहयःशश्वद्रात्रिचरो
नराक्षसगणःकोऽयंसखिब्रूहिमे॥१३॥वृक्षाग्रवासीनचपक्षि
राजस्त्रिनेत्रधारीनचशूलपाणिः॥त्वग्वस्त्रधारीनचसिद्धयो
गीजलंचबिभ्रन्नघटोनमेघः॥१४॥एकचक्षुर्नकाकोऽयंबिलं
मिच्छन्नपन्नगः॥क्षीयतेवर्द्धतेचैवनसमुद्रोनचंद्रमाः॥१५॥
अस्थिनाऽस्तिशिरोनास्तिबाहुरस्तिनिरंगुलिः॥नाऽस्तिपादद्वयं
गाढमंगमालिंगतिस्वयं॥१६॥नरनारीसमुत्पन्नासास्त्रीदेहवि

---

(१०)उ०पक्वबिल्वफलं·कुचयुगलंच·नासिकाचूर्णनिक्षेपणार्थंदरिद्रैरपिबिल्वफलंक्षिप्यतेइतिप्रसिद्धिः(११)उ०शस्त्री·आद्यवर्णरहितास्त्री·हेदुर्वारवीर्यत्वयिसरुषिसतिसपत्नहृदयेकाप्रसुप्ता·शस्त्रीप्रणतशत्रुसरोजसूर्येत्वयितुष्टेसतिसपत्नहृदयेप्रसुप्तासेवाद्यवर्णरहिताका स्त्री·(१२)उ·सारिका· १३ उत्तरंमत्कुणः ढेकूणइतिलोके(१४)उ०नारिकेरफलं नारल इतिलोके(१५)उ०सूचिका· सुई·(१६)कंचुकः अंगरखा

१श्यामवर्णलोहमयत्वात्·अन्यत्रषोडवार्षिकी २सुष्ठुपयःजलंधरतीतिसुपयोधरा लोहनिर्मितेशस्त्रेपानीयंदीयतेइतिप्रसिद्धिः पक्षे सुस्तनी ३ रिकारोमध्येयस्याः ४ सकारेणइतायुक्ता ५ ककारःअंतेयस्याः, सारिकासालुंकीतिप्रसिद्धा ; सोंगटीतिवाप्रसिद्धा·

वर्जिता॥अमुखीकुरुतेशाब्दंजातमात्राविनश्यति॥१७॥ दंतैर्हीनःशिलाभक्षीनिर्जीवोबहुभाषकः॥गुणस्यूतिसमृद्धोऽपि परपादेनगच्छति॥१८॥नतस्याऽऽदिर्नतस्यांऽतोमध्येयस्तस्यतिष्ठति॥तवाऽप्यस्तिममाऽप्यस्तियदिजानासितद्वद॥१९॥ यएवादिःसएवांतोमध्येभवतिमध्यमः॥यएतन्नाभिजानीयात्तृणमात्रंनवेत्तिसः॥२०॥पर्वताग्रेरथोयातिभूमौतिष्ठतिसारथिः॥चलतेवासुवेगेनपदमेकंनगच्छति॥२१॥ अस्तिग्रीवाशिरोनास्तिद्वौभुजौकरवर्जितौ॥सीताहरणसामर्थ्योनरामोनचरावणः॥२२॥विराजराजपुत्रारितन्नामचतुरक्षरं॥पूर्वार्द्धंतवशत्रूणांपरार्द्धंतवसंगरे॥२३॥जाताम्बुक्कुलेजघानपितरंहत्वापिमुग्धापुनःस्त्रीचैषावनितापितैवसततंविश्वस्ययाजीवनं॥संगम्याप्यपितामहेनजनकंप्राप्ततयाकन्यकासासर्वैरपिवंदिताक्षितितलेसानामकानापिका॥२४॥ ॥इतिप्रहेलिका॥ ७॥ ७॥ ७॥ ७॥॥

अथापन्हुतिः

रुचिरस्वरवर्णपदारसभाववतीजगन्मनोहरसि॥तत्किंतरुणीनहिनहिवाणीवाणस्यमधुरशीलस्य॥१॥ सीत्कारंसंजनयतिव्रणयत्यधरंतनोतिरोमांचं॥नागरिकःकिमुमिलितोनहिनहिसखिहैमनःपवनः॥२॥ धर्मदासस्यैतौ॥‾ ॥कालेपयोधराणामपतिकयानैवशक्यतेस्थातुं॥उत्कंठितासितरलेनहिनहिसखिपिच्छलःपंथाः॥३॥कस्यापि॥प्रहरतिनपंचबाणःकेवलमबलेनिमेषोपि॥वर्षतिपरंनदेवःक्षणदा यौ विप्रयोगंते॥४॥कस्यापि मधुरस्वनाधृतोर्णामण्याभरणासुशोभनासुदती॥मत्स्कंधोचितदेहाभिसोदयिताऽस्तिकिंनमेवीणा॥५॥रोगीभिनत्तिनिद्रांतल्पंनजहातिनिष्ठुरंदशति॥चतुरेकिंप्राणेशोनहिनहिसखिमत्कुणव्रातः॥६

---

(१७)उ० छोटिका (चुटकीतिलोके) नरनार्यौअंगुष्ठमध्यमांगुली (१८) उत्तरं उपानत् (जोडा) (१९) उ० नयनं- (डोका)॥ १धृतोर्णादिदृशा-पक्षेधृतोर्णावस्त्रा-२शोभनादंतायस्याःसा पक्षे हस्तिदंतनिर्मितालंकारवती३अनुरक्तः पक्षे रक्तवर्णः

वदंतीजारवृत्तांतंपत्यौधूर्त्तासखीधिया॥पतिंबुद्ध्वासखिंततःसबुद्धाःस्मीस्यपूरयत्॥७॥ यापाणिग्रहलालितासुसरलातन्वीसुवंशोद्भवागौरीस्पर्शसुखाःवहागुणवतीनित्यंमनोहारिणी॥साकेनाःपिहृतातयाविरहितोगंतुंनशक्तोःस्म्यहं रेभिक्षोतंवकामिनीनहिनहिप्राणप्रियायष्टिका॥८॥ आदौगृहीतपाणिःपश्चादारूढजघनकटिभागा॥नखमुखलालनसुखदासाकिंरामाःस्तिनैवभोपोमा॥९॥ तन्वीचारुपयोधरास्कवदनाश्यामामनोहारिणीनीतानिष्करुणेनकेनचिदहोदेशांतरादागता॥उत्संगोचितयातयारहितयाकिंजीवनाःपेक्षयाभिक्षोनेदयिताःस्तिकिंनहिनहिप्राणप्रियातुंबिका॥१०॥ ॥इत्यपह्नुतिः॥ छ ॥ ॥

अथकूटश्लोकाः

केशवंपतितंदृष्ट्वाद्रोणोहर्षमुपागतः॥रुदंतिकौरवाःसर्वेहाकेशवकथंगतः॥१॥कस्यापि॥केजलेशवंमृतकंद्रोणःकृष्णकाकःकौरवाःसृगालाः॥एवमेतत्पद्यंसुगमं॥अंबरमंबुनिपत्रमरातिःपीतमहीनगणस्यददाह॥यस्यवधूस्तनयंगृहमब्जापातुसवोहरलोचनवन्हिः॥२॥ दूरान्वयोयं॥सकृष्णोवायुष्मान्पातुयस्यांबरंपीतंयस्यगृहमंबुनियस्यपत्रमहीनगणस्यारातिर्गरुडःयस्यवधूरब्जाकमलायस्यतनयंहरलोचनवन्हिःददाह॥एवंसुबोधमिदंपद्यं॥लक्ष्मीर्यादोनिधेर्यादोनादोवादोचितंवचः॥बिभ्यतीधीवरेभ्यो—याजडेष्वेवनिमज्जति॥३॥कस्यापि॥लक्ष्मीर्यादोनिधेःसमुद्रस्ययादोजलजंतुः अदोवचोवादोचितंननिर्विवादमित्यर्थः कुतइतिचेत्तत्रतत्साधर्म्यहेतुः यतोधीवरेभ्योजालिकेभ्योथचमतिमद्भ्योविचक्षणेभ्योविभ्यतीत्रस्यंतीजडेष्वेवलडयोरभेदाज्जलेष्वथचकर्दमेषुमूढेष्वेवनिमज्जतिअंतर्गच्छतिअथचस्थिरंतिष्ठति॥ ॥इतिसुबोधंपद्यं॥ ॥ छ ॥

---

१ पाणिग्रहोविवाहः पक्षे पाणौधारणेनलालिता· २ कुलंवेणुश्च· ३ कंइःखरूजडइतिलोके ४ समीपेस्थातुंयोग्यया· पक्षे अंकमारोढुंयोग्यया· ॥ ॥

पानीयंपातुमिच्छामित्वत्तःकमललोचने।।यदिदास्यसिनेच्छा
मिनदास्यसिपिवाम्यहं।।४।।कस्यापि।।यदिदासीअसिनेच्छा
मिनदासीअसितत्रापिवाम्यहमितिपदच्छेदेनसुबोध्यंपद्यं।।न
दीजलंकेशवनारिकेतुर्नगाह्वयोनामनगारिसूनुः।।एषोंगनावे
षधरःप्रमाथीजित्वावयंनेष्यतिचाद्यगावः।।५।।बालभारतस्य।।
— भो नदीज गंगातनयभीष्मएषदृश्यमानःअंगनावेषध
रःस्त्रीरूपधारीलंकेशवनारिकेतुः रावणवनभंजकहनुमध्व
जः नगाह्वयोर्जुननामायतः किंभूतःनगारिसूनुः इंद्रपुत्रः उभौ
कौरवाः अयंप्रमाथीहंताअद्यवोयुष्मान्जित्वागाश्चनेष्यतीत्य
र्थः।।चंचद्द्वादशनीलनीरजयुतंसप्तांबुजोद्भासितंनिस्वंषोडशशो
णपद्मरुचिरंधात्रानिशंसेवितं।।क्षीरांभोधिगृहंसहस्रदलसत्प
र्यंकविश्रांतियत्पायाद्वःकमलांगसंगिशयनंतन्नीलरोचिर्महः
।।६।।शार्ङ्गधरस्यास्यव्याख्या।।तन्नीलरोचिःश्यामप्रभंमहस्तेजः
कृष्णलक्षणंवोयुष्मान्पायात्तत्किंभूतंकमलांगसंगिशयनंलक्ष्मी
सनाथप्राप्यंपुनः किंसहस्रदलसत्पर्यंकविश्रांतिसहस्रफणादि
व्यशयनशेषस्थितंपुनःक्षीरांभोधिगृहंदुग्धसमुद्रनिवासंपुनः
धात्रानाभीसरोरुहस्थेनब्रह्मणाअनिशंसेवितमध्यासितंपुनः
षोडशशोणपद्मरुचिरंषोडशारुणकमलमनोहरंतथाहिविष्णो
श्चत्वारोहस्ताःद्वौचरणौतावंतएवब्रह्मणःद्वौहस्तौद्वौपादौल
क्ष्म्याइत्येवंषोडशशोणपद्मरुचिरंपुनःनिस्वमविनाश्रिपुनःसप्तां
बुजोद्भासितंचत्वारिमुखानिब्रह्मणःएकंनाभीसरोजमेकंविष्णो
र्मुखमेकंलक्ष्मीमुखमित्येवंसप्तांबुजोद्भासितंपुनःद्वादशनीलनी
रजयुतंअष्टौनयनानिब्रह्मणःद्वेविष्णोर्द्वेलक्ष्म्याइत्येवंशोभमान
द्वादशनीलोत्पलयुक्तंअत्रापन्हुतिरलंकारः।।एवंसुबोधमिदंपद्यं
।।विकसितनयनाभ्यांकैरवंपंकजंचश्लथयतिचरणांबुब्रह्मवर्यंप
योधेः।।उरसिलसतियस्यश्रेयसांसंप्रदायःसफणिनमधिशेतेपद्म
पापद्मनाभः।।७।।अभिरामपशुपतेः।।अस्यव्याख्यासपद्मनाभः

पद्मयासफणिनंशेषमभिधत्तेयस्य नयनाभ्यांचन्द्रसूर्यलक्षणाभ्यां कैरवंपंकजंचविकसतियस्यचरणांबुगंगाजलंपयोधेर्ब्रह्मचर्यंश्लथयतिदूरीकरोतियस्योरसिश्रेयसांसंप्रदायः कौस्तुभमणिर्लसति एवंविधःपद्मनाभःफणिनमधिशेते अत्राप्यपह्नुतिरलंकारः ॥ विषंसुंस्वमहाराजस्वजनैःपरिवारितः॥विनाकेनविनाभ्यांकुंछ्याजिनमकेटकं॥८॥ ऐहिरिपुपतिकांतातातसंबद्धकांताहरतनयनिहंतृप्राणदातृध्वजस्य॥सखिसुतसुतकांतातातसंपूज्यकोतापितृशिरसिपतंतीजान्हवीनःपुनातु॥९॥ अर्जुनस्येमेबाणानेमेबाणाःशिखंडिनः॥सीदंतिममगात्राणिमाघमासेगवाइव॥१०॥ वायुमित्रसुतबंधुवाहनाऽरातिभूषणशिरोवलंबिनी॥तज्जवैरिभगिनीपतेःसखापातुमांकमललोचनोहरिः॥११॥केतितेक्कवरीभारः[10]सुमनःसंगात्प्रियेऽतिनीलत्वात्॥भवतिचकलापवत्वान्निर्जरसेव्यःकथंनस्यात्॥१२॥अंतनुज्वरपीडिताऽसिबालेतवमैरव्यायमतोममोपवासः॥रसमर्पयवैद्यनाथनाऽहंभवदावेदितलंघनेसमर्था॥१३॥यामिविधावभ्युदितेपुनरेष्यामीतियदुदितंभवता॥ जानात्सुंदंतमेतंनेदंतैत्वेनमुग्धवधूः॥१४॥ ॥

१विगतःषकारोयस्मात् २केनविनाककाररहितं ३नाभ्यांविनानकारद्वयरहितं ४कुष्माजिनंअजकारषकारणकारनकाराणांनिष्कासनेकू. आ. जि. अं. इतिस्थितेऊभयत्रसंधौकृतेराज्यं ५शत्रुरहितं ६अहिःसर्पस्तद्रिपुर्गरुडस्तत्पतिर्विष्णुस्तत्कांतालक्ष्मीस्तत्तातःसमुद्रस्तस्यकुबद्धोयेनदाशरथीरामस्तत्कांताजानकीतस्याहरोहर्तारावणस्तत्तनयइंद्रजित्तन्निहंतालक्ष्मणस्तत्प्राणदाताहनूमान्सध्वजेयस्येत्थंभूतोऽर्जुनस्तस्यसखाकृष्णस्तत्सुतोमदनस्तत्सुतःअनिरुद्धस्तत्कांताउखातत्तातोबाणासुरस्तस्यसम्यक्पूज्यःशिवस्तत्कांतापार्वतीतत्पिताहिमालयस्तच्छिरसिपतंतीजाह्नवीभागीरथीत्यर्थः ७माघमांमाघमाकर्कटीप्रोक्तातदपत्यानिसेगवाइसुक्तेःकर्कट्याअपत्यानियथानन्मसमयेतस्याअंगानिविदार्यबहिर्यांतितद्वदिमेबाणाममांगानिविदारयंतीत्यर्थः ८वायुमित्रमग्निस्तत्सुतःषण्मुखस्तद्बंधुर्गजाननस्तद्वाहनंमूषिकस्तदरातिस्सर्पस्तद्भूषणःशिवस्तच्छिरोवलंबिनीगंगातज्जोभीष्मस्तद्वैरीशिखंडीतद्भगिनीद्रौपदीतस्याःपतिरर्जुनस्तस्यसखाकृष्णः॥ ९कइवब्रह्मेवाचरतिकेतिआचारेक्विप् १०सुमनसापुष्पाणामन्यत्रदेवानांसंगात् ११अइवविष्णुरिवाचरतिअति १२भवइवशिवइवाचरतिभवति १३कलापोभूषणंतद्वत्वात्पक्षेकलापश्चंद्रस्तद्वत्वात् १४जरारहितैस्तरुणैःसेव्यःपक्षेनिर्जरैर्देवैःसेव्यः १५महान्पक्षेकासः १६लंघनंसमीपस्थितिश्च १७भेषजंप्रीतिश्च १८उपवासेउल्लंघनेच १९दैवेचंद्रेच २०दृष्टांतंउकारोनंच २१इदंतत्वेनसस्वत्वेनतत्वेनेतिभिन्नपदंइदंतत्वेनउकारांतत्वेनच॥

यस्यषष्ठीचतुर्थीचविहस्यचविहायच॥ अहंकथं[1]द्वितीयास्याद्विती
यास्यामहंकथं॥१५॥समरेहेमरेस्वोऽकंबाणंमुंचतिराघवे॥ सरावणो
ऽपिमुमुचे[2]मध्येरीतिधरंशरं॥१६॥[3]शिलार्पितपदद्वंद्वा[4]नासार्पितकर
द्वया॥अभूद्यात्कस्तनीनारीकथमेतद्भविष्यति॥१७॥ [5]सुवर्णस्य
[6]सुवर्णस्य[7]सुवर्णस्यचजानकि॥प्रेषितातवरामेण[8]सुवर्णस्यचमु
द्रिका॥१८॥ [9]अकुबेरपुरीविलोकनंनधरोस्तूनुकरंकदाचन॥अथ
तत्प्रतिकारहेतवे[11]ऽद्भमयंतीपतिलोचनंभज॥१९॥ अयिकांतपश्य
[12]मेघं नहिनहिपापंतवाऽत्तिपुण्यायाः॥ नहिनहिपश्य[13]पयोधरमप
सारयकंचुकीमुरसः॥२०॥ निश्चितं[14]ससुरःकोपिन[15]कुलीनःसमे
[16]मेतिः॥सर्वथा[17]सुरसंबद्धं[18]काव्यंयोनाऽभिनंदति॥२१॥येनाऽकारि
[19]पराभूति[20]र्दिननायकसूनवे॥य[21]ङ्गोत्रात्मभवाकांतंत[22]न्महःश्रेयसे
ऽस्तुवः॥२२॥ अनेक[23]सुषिरं[24]वाद्यं[25]कांतंचकृषिसंज्ञितं॥[26]योचक्रिणाच
सदाऽराध्यंयोजानातिसपंडितः॥२३॥सुकपरिविंदःशब्दःसुब्र
ह्मण्यस्यवाचकःकेन॥स्तनभरनमितानारीकेनोपायेनरंजयकां
तं॥२४॥[27]शंकरंपतितंदृष्ट्वा[28]पार्वतीहर्षनिर्भरा॥रुरुदुःपन्नगाःस
र्वेहाहा[29]शंकरशंकर॥२५॥अंतेमूलाजनपदाःशिवशूलाह्निजातयः

---

९२४ द्वयंबहिर्लापिका· अत्रप्रश्नद्वयस्यैकमुत्तरं उपरिविहरणेनेति आद्येसुकपरि॰ विंदशब्देउपरि वि इत्येतेषांवर्णानांहरणेननिष्कासनेनस्कंदइतिशब्दःसुब्रह्मण्यस्य षडाननस्यवाचकोभवति॰ द्वितीयेउपरिविहरणेनेत्यस्यविपरीतरत्तेनेत्यर्थः

१सहधर्मिणी २मध्यभागेरीतिः पित्तलंतद्विशिष्टं अथचमध्येरीकारविशिष्टंशरंशरीरमित्यर्थः ३ अधस्ताद्दारुणिशिला ४ नासाग्रारूपरिस्थितं ५ हेम्नः ६ शोभनाक्षरस्य॥ ७ शोभनवर्णस्य ८स्तुत्यस्य ९अनलकाविधवेत्यर्थः १०मंगलकारकं ११ अनललोचनंशिवं १२ मेघं अभ्रं पक्षेमे अघमितिच्छेदः अघंपापं १३ मेघस्तनंच १४सुरयासहितः मद्यपइत्यर्थः पक्षे सः सुरइतिपदच्छेदः सुरोदेवः १५ सत्कुलप्रसूतः पक्षे कौलीनः १६ समेसाधौअमतिःश्रद्धारहितइतियावत् पक्षेसमेविष्णौमतिर्यस्यसः तत्पुरुषेकृतीत्यत्रबहुलग्रहणाद्धृद्युभ्यावप्यत्रसप्तम्याअलुक्। १७शोभनरसविशिष्टं· कर्पूरचितं पक्षे· असुरैः संबद्धंयुक्तं १८कविकृतिं पक्षे शुक्रं १९पराजयः पराउत्कृष्टाभूतिरैश्वर्यंच २० कर्णाय सुग्रीवाय यमाय च २१गोत्राः पर्वतास्तेगोपास्तेषामात्मभवागोपिकास्तासांकांतंमनोहरं अथचगोत्रायाः पृथ्व्या आत्मभवासीतासाकांतायस्यतत् अथच·गोत्रस्यहिमालयस्यात्मभवापार्वतीसाकांतायस्यतत् २२महः श्रीकृष्णाख्यंरामाख्यंशिवाख्यंच २३ बिलं २४ वकारःआद्योयस्य २५ ककारःअंतेयस्य २६सर्पेणअन्तरं वल्मीकं २७शंकरःश्रेष्ठचंदनः २८पर्वतवासिनीस्त्री· भिल्ली२९ अट्टमन्नमि·

प्रमदाः केशशूलिन्यो भविष्यंति कलौ युगे ॥२६॥ [१]अधुना म[२]धुकरपतिना गिलितोऽप्य[३]पकारदंपतीयेन ॥ त्रातः स पालयेत्त्वां [४]विकाररहितो विनायको लक्ष्म्याः ॥२७॥ कुंदकुंजममुं पश्य सरसीरुहलोचने ॥ [५]अमुना कुंदकुंजेन सखि मे किं प्रयोजनं ॥२८॥ राजन्कमलपत्राक्ष तत्ते भवतु चाऽक्षयं ॥ आसादयति यद्रूपं [६]करेणुः करणैर्विना ॥२९॥ [७]स्तनमंडलमाश्रित्य नरलस्य वरयोषितां ॥ कदाकर्णयते गीतं रमयास हरंगराट् ॥३०॥ [८]उपरिगतं हि सवर्णं हृत्वा करतो ददासि रंतुं मे ॥ धन्यः सरोजयुगलं त्यक्त्वा स्तनयुगमथाऽस्पृशत्कृष्णः ॥३१॥ [९]अच्युत भक्तिवशादिह समभावस्तत्प्रसंगेन ॥ सारमतेरभ्युदयति रतिरिति नैवाद्भुतं किंचित् ॥३२॥ मंजुलघौ संभावितगुणे क्वचिन्नापदाधारे ॥ अयि सखि तत्रोपपतौ मम चेतो न त्वनीदृशे पत्यौ ॥३३॥ ॥ ॥

---

(३३) कापिविदुषितरानायिकासखींप्रतिवदति· अयिसखितत्रतस्मिन्नुपपतौ ममचेतःअस्तीतिशेषः कीदृशे· मंजुलघौमंजुःसुंदरःसचासौलघुरिष्टश्चेतिविशेषणोभयपदःकर्मधारयः पुनःकी० संभावितगुणे· संभाविताःगुणाः सौंदर्यादयोयत्र· क्वचित्कदाचिदपिनआपदाधारे आपद्रहितेइत्यर्थः अनीदृशेउक्तगुणरहितेपत्यौमम चेतोनास्तीति· व्याकरणपक्षे· उपपतौउपपतिशब्देममनोस्ति· की० मंजुलाघिसंज्ञायस्मिन्· संभावितःघेर्ङितीतिगुणोयस्य नाइतिपदस्यआङोनास्त्रियामितिसूत्रविहितस्याऽऽधारेआश्रये· अनीदृशघिसंज्ञागुणनादेशरहितेकेवलेपतिशब्दे·

तिप्रोक्तंशिवोवेदउदाहृतः· केशोभगमितिप्रोक्तंशूलोवित्रयउच्यते· १ अपगतःधुकारोयस्मात्तेन २ मधुकरपतिर्मकरपतिस्तेन· ३ पकारशून्योदंपतीदंतीत्यर्थः ४ विइत्यक्षरेणरहितःविनायकःनायकइत्यर्थः ५ अमुनाकुकाररहितेन ६ करेणुःकरणैर्विना क् र ण् एतद्व्यंजनत्रयंविनायद्रूपमासादयति प्राप्नोतितत्तेऽक्षयंभवत्वित्यन्वयः उक्तव्यंजनत्रयरहितं अ ए उः इतिस्वरत्रयंतत्र अ ए इत्यत्रवृद्धौ ऐ उः इत्यत्रआयादेशेआयुरितिसिद्धं ७ स्वस्यमंडलमाश्रित्यहेकदंबेघमास्तनगर्जितमाकुरुयतोरंगराट् रंगनाथःरमयासहवरयोषितांगीतंआकर्णयतेइत्यन्वयः ८ कृष्णोराधिकांपृच्छति उपरिगतंसवर्णं समानवर्णंसरोजयुगलंकरतोहृत्वास्वहस्तेनआहत्यमेरंतुंददासि· ततोराधयातस्मिन्दातुंगृहीतेसति उवर्णेनपरिगतंयुक्तंसवर्णरहितंएतादृशंसरोजयुगलंउरोजयुगलमेवइतिधियाकमलयुगंत्यक्त्वास्तनयुगलमेवकृष्णोऽस्पृशत् ९ इहसंसारेअच्युतभक्तिवशात्समभावःसमत्वंशत्रुमित्रादिषु·तत्प्रसंगेनभक्तिप्रसंगेनसारमतेःश्रेष्ठबुद्धेःपुंसःरतिःप्रीतिःअभ्युदयतीतिनकिंचिदत्राऽद्भुतं· व्याकरणपक्षे· भोअच्युतअच्युताअहीनाभाप्रतिभापरस्या॥ क्तिवशात् क्तिप्रत्ययवशात्समप्रसिद्धोमभावःमकारस्याभावोलोपोभवतीतिशेषः तत्प्रसंगेनक्तिप्रत्ययप्रसंगेनरम्धातोःसारतिःअभ्युदयतीत्यपिनाद्भुतं रमुक्रीडायामित्यस्माद्धातोःक्तिनिअनुदात्तोपदेशेतिमलोपेरतिरितिरूपंसिद्ध्यति॥

अयिसखिशस्तःसखिवत्पतिरितिकिंत्वंनजानासि॥शस्तो[1]ऽतिसखिवदुपपतिरित्यालिकथंत्वयाऽपिनाऽबोधि॥३४॥एकोनाविंशतिःस्त्रीणांस्नानार्थंशरयूंगता॥विंशतिःपुनरायाता एकोव्याघ्रेणभक्षितः॥३५॥कृत्वाप्रदग्धंतनयंसशो[2]का पुनर्निशम्याऽऽसशरीरभावं॥पश्यत्सुदेवेषुचधावमाना रमामुदाशंकरमालिलिंग॥३६॥रामंसीतांलक्ष्मणंजीविकार्थे विक्रीणीतेयोनरस्तंचधिक्धिक्॥अस्मिन्पद्येयोऽपशब्दान्नवेत्ति व्यर्थप्रज्ञंपंडितंतंचधिक्धिक्॥३७॥गोकर्णराडाभरणंयदीयं यद्गव्यहव्येडजमाददाह॥कुंयेनचूडामणिरादिगंतात् पायादपायादुरगात्मजार्धः॥३८॥त्रैलोक्येनोपमैतस्याःसखेकिमितिभाषसे॥अनंतरासानादिर्वानतृतीयेतिमेमतिः॥३९॥स्ववर्णालंकृताकन्या हेमाऽलंकारवर्जिता॥साकन्यावि[4]धवाजाता गृहेरोदितिनत्पतिः॥४०॥द्वंद्वोद्विगुरपिचाऽहंमद्गेहेनित्यमव्ययीभावः॥तत्पुरुषकर्मधारययेनाऽहंस्यांबहुव्रीहिः॥४१॥

---

(३४)अयिसखिपतिःसखिवत्शस्तःमित्रवद्विश्वसनीयः इतित्वंकिंनजानासि·सखीप्रत्याह हेआलिउपपतिःजारःअतिसखिवत् अतिशयितामित्रवत् शस्तइतित्वयाऽपिकथंनाऽबोधि व्याकरणपक्षे पतिशब्दःशस्तःशसइतिशस्तःपंचम्यंतात्तसिः द्वितीयाबहुवचनात्परंसखिवत्सखितुल्यरूपोज्ञेयः नादेशाभावेनकार्यैक्यात्· उपपतिशब्दःशस्तःद्वितीयाबहुवचनात्परंअतिसखिशब्दवत्नादेशभाक्· (३७)जीविकार्थेचापण्येइत्यत्रअपण्येइत्युक्तत्वात् हस्तिकान्विक्रीणीतेइत्यत्रेव रामकं सीतकं लक्ष्मणकं इतिप्रयोगाएवसाधवः· (३८)यदीयंआभरणंगोकर्णराट् गावावेवनेत्रेएवकर्णौयेषांचक्षुःश्रवसइत्यर्थः तेषुराजतेइति· यद्गव्यहव्येट् यस्यगविनेत्रेभवःउत्पन्नःहव्येट् हव्यस्वामीअग्निःअजंमदनंआददाह· येनचूडामणिःभानांइनःस्वामीचंद्रइत्यर्थःसचूडामणिःशिरोरत्नंयस्य अगात्मजार्धःउःशिवःअपायात्आदिगंतात् कुंपृथ्वींपायात् रक्षतु· (३९)कश्चित्स्वनायिकांस्तौतितंप्रतिअन्यःप्रतिभाषते· हेसखेएतस्याःत्रैलोक्येउपमानास्तीतिकिमितिकुतोभाषसे यतःसाउपमैव अनंतरामध्यवर्णरहिताउमेतियावत्·अथवा सेवोमानादिःआद्यवर्णरहितामालक्ष्मीतियावत् उपमाउपमानंअस्तीतिभावः तृतीयानास्तिइतिमेबुद्धिः·

१एकोनाइतिविंशतेर्विशेषणेनविरोधः·एकः नानरः इतिपदच्छेदेनपरिहारः·२श्रेष्ठचंदनं ३सुष्ठुवर्णेनकांत्याअलंकृतेतिविरोधपरिहारः ४ विविधाःधवाःपतयोयस्याःजारिणीत्यर्थः ५ यतः स्त्रीपुरुषरूपव्यक्तिद्वयात्मकः ६ द्वौगावौयस्य·गोस्त्रियोरितिह्रस्वः·७भावोवस्तुमात्रंअव्ययीव्ययाभाववान् मद्गेहेकस्यापिवस्तुनोव्ययोनास्तीत्यर्थः यद्वाअव्ययीभवनंअव्ययीभावः ८ तत्तस्मात् हेपुरुषयेनाहंबहुव्रीहिर्बहुधान्यविशिष्टः स्यांतत्कर्मधारयेत्यन्वयः समासषट्कप्रतिपादनमत्रचित्रं॥

अहंचत्वंचराजेंद्र [1]लोकनाथावुभावपि॥ बहुव्रीहिरहंराजन्षष्ठीतत्पुरुषोभवान्॥४२॥ क्वापिबाला[2]रमणवसतिंप्रेषयंतीकरंडंसातन्मूलेसभयमलिखद्[3]व्यालमस्योपरिष्टात्॥ [4]गौरीनाथं[5]पवनतनयं[6]चंपकंचाऽस्यभावंपृच्छत्यार्यान्प्रतिकुथमिदंमल्लिनाथःकवींद्रः॥ ॥४३॥ विलासिनीकांचनपट्टिकायांपाटीरपंकैर्विरहीविलिख्य॥ तस्याः[8]कपोलेव्यलिखत्[9]पवर्गं[10]तवर्गमोष्ठेचरणे[11]टवर्गं॥४४॥ काचिद्वियोगानलतप्तगात्री प्राणान्समाधारयितुंलिलेख॥ बाह्वोर्भुजंगंहृदिराहुबिंबंनाभौचकर्पूरमयंमहेशं॥४५॥ अपःपिबन्प्रपापालीमनुरक्तोविलोकयन्॥ अगस्त्यं चिंतयामास चतुरःसाऽपिसागरान्॥४६॥ रामंवानरवाहिनींपुररिपुंराहुंरवेःसारथिंकुंभीगर्भसमुद्भवंमुररिपुंमारस्यमौर्वीरवं॥ तन्वीनूतनपल्लवैर्विरचितेशय्यातलेशायिनीसख्यावीजिततालवृंतपवनाबालामुहुर्निंदति॥ ४७ ॥ ले

---

(४५) सर्पग्रासभीत्याप्राणाःस्वतोननिर्गमिष्यंतीत्याशयेनबाह्वोर्भुजंगंलिलेख· चंद्रस्य स्वभागतयाऽऽकृतिसिद्धेर्मृतानांमनोग्रहीतुमागच्छेदित्याशयेनहृदिराहुं· मन्मथत्रासायशिवंचलिलेखेतिभावः (४६) समुद्रमपिकरेचुलुकयतोमुनेःसामर्थ्यंममचेत्स्यात्तर्हिझटिति· तद्दशांसभावान्विरमेनांपश्यामीतिपाथाभिप्रायः यदिसागराः सन्निहिताःस्युस्तदानवरतंजलधारांविसृजंती चिरमेतद्दर्शनसुखमनुभवेयमितिप्रपापाल्यभिप्रायः (४७) कोकिलरक्षककाकविशेषकत्वाद्रामं मरुपाद्यविशेषणाद्वानरवाहिनीं मन्मथविशेषणात्पुररिपुंचंद्रविशेषणाद्राहुं रवेःशीघ्रमस्तादिप्रापणेनरात्रिसंपादनादनूरुं· चंद्रोत्पादकसमुद्रविशेषणादगस्त्यं मन्मथोत्पादनान्मुररिपुंनिनिंदेतिभावः कोकिलादीनांकामोद्दीपकत्वरसशास्त्रप्रसिद्धं॥ १ लोकाजनानाथाःस्वामिनोयस्यैवंविधोऽहं· याचकत्वात् लोकानांजनानांनाथस्त्वं राजत्वेनपालकत्वात् उत्तरार्द्धेबहुव्रीहिरित्यस्यबहुव्रीहिप्रतिपाद्यार्थभूतइत्यर्थः तत्पुरुषइत्यस्यतत्पुरुषप्रतिपाद्यार्थभूतइत्यर्थः २ प्रियनिवासं ३ करंडस्थितपुष्पसौरभगंधवाहोहरेदितितद्भक्षकंसर्पं ४ पुष्पबाणोबाणार्थंदहेदितितद्वैरिणंशिवं ५ सूर्यःपुष्पंस्वकरैःशोषयेदितिजन्मकालेएवभक्ष्यबुद्ध्याहर्तुंप्रवृत्तंभयजननायहनूमंतं ६ तन्मकरंदंभृंगोहरेदितिचंपकमलिखदितिभावः चंपकेभृंगानगच्छंतीतिप्रसिद्धेः ७ चंदनद्रवैः ८ गल्ले ९ पवर्गस्योष्ठस्थानीयत्वात् ओष्ठाभ्यांतवचुंबनंकरिष्यामीतिसूचितं १० तवर्गस्यदंतस्थानत्वाद्दंतैस्तवौष्ठौखंडयिष्यामीतिसूचितं ११ टवर्गस्यमूर्धस्थानत्वाद्यदित्वंरुष्टासितर्हित्वांशिरसानमामीतिसूचितं॥

नेतुःप्रयाणोन्मुखवतांसमीक्ष्यनक्षत्रमुक्तावलिमस्यकंठे॥अधार
यत्क्षासतुवासराणांसंख्यापरोऽभूत्सखिकोऽत्रभावः॥४८॥ त्व
द्विरहमसहमाना निंदतिबालादिवानिशंशंभुं॥ राहुमपिरामचंद्रं
रामानुजमपिचपन्नगारातिं॥४९॥ सर्वज्ञःसन्वदसिबहुधादी
यतेदीयतेवैदाधातूनांभवतिसदृशंरूपमेषांचतुर्णां॥ द्वौदानार्थौ
भवतिचतथापालनेखंडनेवानोजानीमःकथयतिभवान्कस्यधा
तोःप्रयोगं॥५०॥ब्रह्मनांतमपिक्लीबंमनःसांतंनपश्यति॥किंचि
त्रंलोकजनकंवाक्कांतानैत्यकांतकं॥५१॥अर्धरात्रौदिनस्यार्धे
अर्धचंद्रेर्धभास्करे॥रावणेनहृतासीताकृष्णपक्षेसिताष्टमी॥५२
शमीगर्भस्ययोगर्भस्तस्यगर्भस्ययोरिपुः॥रिपुगर्भस्ययोगर्भःसमे
विष्णुःप्रसीदतु॥५३॥कहमस्मिगुहावक्तिप्रश्नेमुष्मिन्किमुत्तरं॥
कथमुक्तंनजानासिकदर्थयसियत्सखि॥५४॥योरीक्षणंभूधर
जोहिनाथःयत्रतृतीयंदयितोपवीतं॥यस्यावरंह्यादशलोचना
ख्यःकाष्ठासुतःपातुसदाशिवोवः॥५५॥स्थाणुःस्वयंमूलविही
नएवपुत्रोविशाखोरमणीत्वपर्णा॥परोपनीतैःकुसुमैरजस्रंफ
लत्यभीष्टंकिमिदंविचित्रं॥५६॥वपुप्रादुर्भावादनुमितमितंजन्म
निपुरापुरारेनप्रायःक्षणमपिभवंतंप्रणतवान्॥नमन्मुक्तःसंप्र
त्यहमतनुरग्रेप्यनतिमान्महेशक्षंतव्यंतदिदमपराधद्वयमपि॥
॥५७॥इतिबृहत्शार्ङ्गधरवि०प०प्रहेलिकापह्नुतिकूटाख्यानपरि०॥

---

(४८)नक्षत्रमालाधारणेननक्षत्रोदयवेलायामागमनंकर्त्तव्यमितितयासूच्यते·वासर
संख्याकरणेनसप्तविंशतिदिनमध्यएवमयाऽगम्यतइतितेनसूचितं(४९)मन्मथाव
शेषणाच्छंभुं चंद्रावशेषणाद्राहुंमलयाद्यवशेषणाद्रामचंद्रं मन्मथजनकत्वाद्बलरा
मानुजं वासुभक्षिसर्पहननात्पन्नगारातिंगरुडंनिंदितवतीतिभावः(५०)त्वंसर्वज्ञः
सन्बहुधावारंवारंदीयतेदीयतेइतिवदसि· दीयतेइतिरूपंचतुर्णामपिदाधातूनांसदृशं
भवतितन्मध्येद्वौदानार्थौ· दाणदानेडुदाञ्दानेइति· एकःपालने·देङ्रक्षणेइति एकःखंड
नेदोऽवखंडनेइति एतन्मध्येभवान्कस्यधातोःप्रयोगंकृत्वावदतितंनजानीमः(५१)
नविद्यतेअंतोयस्यतन्नांतं अथचनकारांतं ब्रह्म अंतेनसहितंसांतं अथचसकारांतं सांतं
मनोनांतंब्रह्मनपश्यतीतियुक्तमेव ककारोंतेयस्याःअथचकांतारमणीअकस्यदुःख
स्यांतकंनाशकं अथचककारांतंनभवतीत्यकांतकं स्वार्थेकः स्वयंकांतावाक्अकांतक
मपिलोकजनकर्तृत्वात्कांतंब्रह्मनैतीतिविचित्रमितिभावः।

॥अथक्रियागुप्तकर्तृगुप्तकर्मगुप्तसंधिगुप्तबिंदुमतीचित्रभाषाख्यानं॥ ॥आगतः पांडवाःसर्वेदुर्योधनसमीहया॥ तस्मैगांचसुवर्णंचरत्नानिविविधानिच॥१॥ कस्यापि॥ यःधनसमीहयाआगत स्तस्मैसर्वेपांडवाःगांचविविधानिरत्नानिचाददुर्ददतिस्म इतिक्रियागुप्तं॥ गौरीनरवरसादृश्यस्पर्द्धयाशशिनंदधौ॥ इहैवगोप्यतेकर्तावर्षेणापिनलभ्यते॥२॥ कस्यापि॥ इःकामस्तंहंतीतिइहाईश्वरः इतिकर्तृगुप्तं॥ अन्नवस्त्रसुवर्णानिरत्नानिविविधानिच॥ ब्राह्मणेभ्योनदीतीरेददातिव्रजसत्वरं॥३॥ कस्यापि॥ हेब्राह्मणईभ्यःसमृद्धः॥ इतिकर्तृगुप्तं॥ एहिहरेमणिपश्यकौतुकेधूलिधूसरतनुंदिगंबरं॥ स्नापितहृदनपंकजंपपौमातरुक्तमपिकिंनबुध्यसे॥४॥ कस्यापि॥ कौपृथिव्यांतुकंबालकं॥ इतिकर्मगुप्तं॥ पिवतस्तेशरावेणवारिकल्हारशीतलं॥ केनेमौवुर्विदग्धेनहृदयेसन्निवेशितौ॥५॥ कस्यापि॥ शरौबाणौहेएणहरिण॥ इतिसंधिगुप्तं॥ वृक्षोमहानेषमार्गमावृत्यतिष्ठति॥ तावत्त्वयानगंतव्यंयावदन्यत्रगच्छति॥६॥ हेवटो ब्राह्मणवृक्षोभल्लूकः॥ इत्यपिसंधिगुप्तं॥ नमयागोरसाभिज्ञंचेतःकस्मात्प्रकुप्यति॥ अस्थानरुदितैरेतैरलमालोहितेक्षणे॥७॥ दंडिनः॥ ननिषेधः॥ मेममआगोरसाभिज्ञमपराधरसज्ञात्इतिगुप्तःसंधिः॥ प्रातःप्रातःसमुत्थायद्वौस्तनीचकमंडलू॥ अत्रक्रियापदंवक्तुमवधिर्ब्रह्मणोवयः॥८॥ ललाटतिलकोपेतःकृष्णःकमललोचनः॥ गोकुलेऽत्रक्रियांवक्तुंयोजानातिसपंडितः॥९॥ पंपासरसिरामेणसस्नेहंसविलासया॥ सीतयाकिंकृतंसार्धमत्रैवोत्तरमीक्ष्यतां॥१०॥ राजन्नेवघनश्यामनिस्त्रिंशाःकर्षदुर्जय॥ आकल्पंवसुधामेनांविद्विषोद्यरणेबहून्॥११॥ कांतयाकांतसंयोगेकिमकारिनवोढया॥ अत्रापिचोत्तरंवक्तुमवधिर्ब्रह्मणोवयः॥१२॥ दामोदरायपुष्पात्मनपुष्पमूलफलान्यपि॥

---

१ प्रातइतिक्रिया·प्रा·पूरणे·लट्प्रथमपुरुषद्विवचनं २ ललाट लट्बाल्ये लिट् ३ सस्ने ष्णा शौचे कर्मणिलिट् ४ अव अवरक्षणे ५ द्य दोऽवखंडने लोट् ६ अत्रापि त्रपूष लज्जायां कर्मणि लुङ्॥

अत्रक्रियापदंगुप्तंमर्यादादशवार्षिकी॥ १३॥ विराटनगरेराजन् कीचकादुपकीचकं॥अत्रक्रियापदंगुप्तंमर्यादादशवार्षिकी॥ १४॥ कांतेविनानदीतीरंमद्मालोक्यकेकिनी॥अत्रक्रियापदंगुप्तंमर्यादादशवार्षिकी॥१५॥ अम्लानपंकजामालाकंठेरामस्य सी तया॥सुंधातुधाश्रमंस्यत्रप्रत्यक्षेपिक्रियापदं॥१६॥ नारसिंहाऽऽकृतिंवीक्ष्य वनेमत्तमतंगजः॥अत्रक्रियापदंगुप्तंमर्यादादशवार्षिकी॥१७॥संध्यावंदनवेलायांतडागेचद्विजोत्तमैः॥ अत्रक्रियापदंगुप्तंमर्यादादशवार्षिकी॥१८॥राक्षसेभ्यःसुतांहृत्वाजनकस्यपुरींययौ॥ अत्रकर्तृपदंगुप्तंमर्यादादशवार्षिकी॥१९॥ नकरोतिनामरोषंनवदतिपरुषंनहंत्यपंशत्रून्॥रंजयतिमहीमखिलांतथाऽपिधीरस्य वीरस्य॥२०॥ शरदिंदुकुंदधवलंनगपतिनिलयंमनोहरंदेवं॥ यैःसुकृतंकृतमनिशंतेषामेवप्रसादयति॥२१॥शीकराऽऽसारसेवाहिसरोजवनमारुतः॥प्रक्षोभयतिपांथस्त्रीनिःश्वासैरिवमांसलः॥२२॥ सुभगतवाननपंकजदर्शनसंजातनिर्भरप्रीतेः॥शमयतिकुर्वन्दिवसःपुण्यवतःकस्यरमणीयः॥२३॥पूतिपंकमयेऽत्यर्थंकासारेदुःखिताअमी॥ दुर्वारामानसंहंसागमिष्यंतिघनाऽऽगमे॥२४॥अहंमहानसापातःकस्मितोनरकस्तव॥मयामांसादिकंभुक्तंभीमंजानीहिमांबक॥२५

---

(१३) हेदामोदरपुष्पमूलफलानिआयआनय इटकिटकटीत्यत्रप्रश्लिष्टस्यई धातोराङ्पूर्वस्यलोटोरूपमिदं उपसर्गसमभिव्याहारेणआनयनार्थकत्वं (१४) विःपक्षीकीचकाद्वेणोःकीचकांतरमाटबभ्राम· (१५) केकिनीमयूरीइरंमदंमेघज्योतिर्विद्युतमितियावत्· आलोक्यविनानदीतिविशेषेणपुनःपुनर्वाशाब्दंकरोतीत्यर्थः। (१६) प्रत्यक्षेपिक्षिप्ता (१७)॥ गजःसिंहस्याकृतिंवीक्ष्यनाऽरनजगाम· ऋगतौ कर्तरिलिट् (१८) हेद्विजोत्तमएैः आगच्छ (१९) राक्षसानांइभ्यःस्वामीरावणः जनकस्यसुतांहृत्वापुरींलंकांययौ (२०) अयंपुरुषोरोषंनकरोति· परुषंकठोरंन वदतिः शत्रून्नहंति· नामेतिप्रसिद्धं तथापिअस्यवीरस्यधीःअखिलांमहींरंजयति (२१) यैरनिशंसुकृतंकृतंतेषामेवमनःशरदिंदुसादिविशेषणविशिष्टंदेवंहरंप्रसादयति· (२२) पांथस्त्रीनिःश्वासैर्मांसलःपुष्टइवेत्युत्प्रेक्षा· शीकरेत्यादिविशेषणविशिष्टोनवनमारुतःवेगवान्वायुःसरःप्रक्षोभयति· कर्मगुप्तं (२३) दिवसःशंसुखंकुर्वन्अयतिगच्छति· कर्मगुप्तं (२४) दुष्टंवाःजलंतेनदुर्वारा कलुषितजलवत्त्वेनहेतुनेत्यर्थः हेतुगु· (२५) महानसात्महताशकटेनआयातःआगतः नरकोमृत्युःकरणगुप्तं॥

अंभोरुहमयेस्नात्वावापीपयसिकामिनी॥ददातिभक्तिसंपन्नापुष्प
सौभाग्यकाम्यया॥२६॥प्रशस्त्यायुक्तमार्गस्यतवसंमानितांश्रिताः
स्पृहयंतिनकेनामगुणरत्नालयप्रभो॥२७॥शिलीमुखैस्त्वयावीरदु
र्वारैर्निर्जितोरिपुः॥बिभेत्यत्यंतमलिनोवनेऽपिकुसुमाऽकुले॥२८॥
याकटाक्षच्छटापातैःपवित्रयतिमानवं॥एकांतेमेपितप्रीतिरस्त्विऽ
स्याकमलालया॥२९॥विपद्यमानतास्मिन्नासर्वस्यैवनिरूष्मणः॥य
थाऽत्रभस्मपद्मांचनिर्वाणंहंत्ययंजनः॥३०॥लूनेवमधुमासेऽस्मिन्
सहकारद्रुमंजरी॥इयमुन्निद्रमुकुलेभातिन्यस्तशिलीमुखा॥३१॥
भानुर्वैजायतेलक्ष्म्यासरस्वत्याऽथवामता॥अत्रषष्ठीपदंगुप्तंमया
द्वादशवार्षिकी॥३२॥भवानिशंकरोमेशंप्रतिपूजापरायणः॥कर्तृ
कर्मक्रियागुप्तंमयाद्वादशवार्षिकी॥३३॥कमलेकमलेनित्यंमधूनि
पिबतस्तव॥भविष्यतिनसंदेहःकुष्ठदोषाकरोदये॥३४॥सर्वज्ञेऽ
नत्वयाकिंचिन्नास्त्यविज्ञातमीदृशं॥मिथ्यावचस्त्वयाचत्वमसत्यं
वेत्सिनक्वचित्॥३५॥विषादीभैक्ष्यमश्नातिसदारोगंनमुंचति॥कु
ष्टेनाऽपित्वयावीरशंभुनाऽरिःसमःकृतः॥३६॥निरुध्यमानवद्यां
गयाचक्रान्दुःखसंचयान्॥अत्रक्रियापदंगुप्तंयोजानातिसपंडितः
॥३७॥इति०॥अथबिंदुमती॥त्रिनयनचूडारत्नंमित्रंसिंधोःकुमुद्वतीदयि
तः॥अयमुदयतिघुसृणारुणारमणीवदनोपमश्चंद्रः॥३८॥ठिं००ठूव००ठिं०
ठिठोः०ु०ुठुठो०ठिः००ु००िठु००ठु०००ठी००ठो००ठु०ः इति
बिंदुमति॥अथचित्रं॥विश्वस्यहेतुरमरैर्बहुगीयसेत्वंविश्वंभरेशिव

---

(२६)अंभोरुहं अये इति पदच्छेदः इः कामस्तस्मै अये कामाय· संप्रदानशु०(२७)प्रश
स्त्यै उक्तमार्गस्येति पदच्छेदः प्रशस्त्यै कल्याणाय· संप्रदानशु०(२८)अलिनः भ्रमरा
त्· अपादानशु०(२९)एकस्यां कांते भर्तरि· सप्तमीशु०(३०)विपदि अमानता इति पद
च्छेदः निर्गतः ऊष्मा द्रव्यरूपो यस्मात्तस्य अमानता आदराभावः प्रांतमूष्मरहित
मित्यर्थः सप्तमीशु०(३१)उन्निद्रमुकुला एः इति पदच्छेदः एः कामस्य·(३२)भाकां
तिः नुः मनुष्यस्य(३३)हे करउमेशं प्रति अनिशं पूजापरायणः भव·(३४) कं अले
इति पदच्छेदः कमिति सुखे· स्वं यथा स्यात्तथा पिबतः संबुद्धिशु०(३५)स
र्वज्ञानां इनः स्वामी तत्संबोधनं· संबुद्धिशुद्धिः(३६)विषादीरिवन्नःपक्षेविषमत्तीति वि
षादी सदा सर्वदा रोगं व्याधिं न मुंचति पक्षे सदारः सस्त्रीकः अंगशैलं न मुंचति॥७॥

शिवेत्रिगुणात्ममूर्त्तौ।विद्योमतोपिपरमांप्रथमांवदंतित्वंयोगिनः
स्तुतिपराःप्रणिधानहृद्या॥३९॥शार्ङ्गधरस्य॥अस्यवसंतति
लकाछंदसोदुर्गास्तुतिरूपस्यपद्यस्यचतुर्णामपिपादानांषष्टसप्त
माष्टमाक्षरलोपेनइंद्रवज्रावृत्तंशिवस्तुतिश्चजायते॥नमामिमा
मनोनुन्नमानंमुनिक्षमानिनं॥नानाननममानाममोंनामानमुमेन
मुं॥शार्ङ्गधरस्यव्याख्यानं॥नमामिनमस्करोमिकंउंविष्णुंनकेव
लंतमेवअपितुउमेनंपार्वतीनाथंहरिहरमित्यर्थः॥किंभूतंमामनो
नुन्नमानंमालक्ष्मीस्तस्यामनसोनुन्नोपहृतोमानोयेनसतथातेल
क्ष्मीचांचल्यगर्वापहारिणं॥पुनःकिंअमानिनंमानरहितं॥किंभूतंना
नाननंनानाविधान्याननानिमुखानियस्यदशावतार— त्वादनेकविध
मुखं॥पुनःअमानामंअमानमाकाशममतीत्यमानामस्तं॥पुनःओं
नामानंब्रह्मरूपमेवंविधंउंउमेनंहरिहरंनमामि॥द्व्यक्षरंपद्यं॥तारता
रतरैरेतैरुत्तरोत्तरतोरुतैः॥रतानोंतित्तिरीरोतितीरेतीरेतरोतरौ॥
॥४०॥द्व्यक्षरः॥कालिदासस्य॥नागविशेषेशेषशेषेशेषेथसंहृते
जगति॥हंस्यसिकालंकालंकालंकालं——घनेस्तुतिर्भवति॥
॥४१॥सानुप्रासः देवेश्वरस्य॥लीनोस्मितेनशुचिनामृदुमोदितेन
व्यालोकितेनलघुनागुरुणागतेन॥व्याजृंभितेनचघनेनचदर्शितेन
साहंतितेनगलितंममजीवितेन॥४१॥ दंडिनः सानुप्रासः॥मधुर
यामधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया॥मधुकरांगन
यामुहुरुन्मदध्वनिभृतानिभृताक्षरमुज्जगे॥४२॥ माघकवेः॥कठि
नानुप्राससहितंचतुर्थपादांतयमकं॥आम्नायानाम हांत्यावागी
तिर्नीतिर्भीतिःप्रीतिः॥भोगोरोगोमोदोमोहोध्यायेच्छेशंसेमेदेशे॥४३
॥चतुर्मात्रिकोविद्युन्मालाछंदःदंडिनः॥ अस्यार्थः॥ आम्नायानांवे
दानामंत्यावागुपनिषदाहाकथयत्॥किंईतिर्नीतिःभोगोरोगःभी
तिःप्रीतिःमोदोमोहःक्षेमेशुभेस्थाने॥आत्मपरान्मनोध्यायेदिच्छे
त्॥ इतिचित्राः॥अथभाषाचित्रं॥उत्संगकलितोरुकटारीभाजि
राउतभयंकरभालाः॥ संतुपायकमणाजयतेस्त्वंगोभिगोहरमिला

वद्दलावी॥१॥ कस्यापि॥अस्यव्याख्या॥हेराजन् तवपायकगणाः सेवकलोकाःउत्सरंगकलितोरुकटारीभाजिराःसंतु॥उत्सरंगाःअतिमुदिताःकलितोरुकटाःकलितपृथुकपोलाः ये अरीभाःशत्रुगजाः तेषां योसौ आजिःसंग्रामःतंरातिददातीतिउत्सरंगकलितोरुकटारीभजिराःउतपुनःभयंकरभालाःभृकुटीभीषणललाटाः संतु तैःपायकगणैः इलाइवःपृथ्वीरक्षकः इलावी जितकंदर्पस्त्वं अगोग्रहंयथास्यादेवंगां पृथिवींजयपरदेशानात्मीयान्कुरु॥नूनंबाहल्लछाद्दशोहयसरीनिःस्साणशब्दःखरःशत्रुपांडिलुटालितोटिहतिसाएवंभणत्युड्डलः॥रूढंगर्वभयामयालिसहसारेकंतमेरेकहेकंठपागनिवेशयाहिशरणंश्रीमल्लदेवंप्रभुं॥२॥श्रीकंठपंडितस्येतिभाषाचित्रं॥ इति॰ वृ॰ शा॰ प॰ प॰

अथप्रश्नोत्तराख्यानंतेषुअंतर्लापिकाः

गच्छंतिक्वाजिवह्नोहुतनिजतनवःकाभिनत्तिस्वकूलं किंस्याद्वोज्यंविकल्पेक्वकचनिभनखैःकिंनृसिंहेणभिन्नं॥कीदृग्दित्याःप्रसूतिःकिमनलशमनंकान्नृपैःपालनीयाकोवंद्यःकःप्रमार्ष्टि त्रिभुवनकलुषंस्वर्धुनीवारिपूरः॥१॥ कस्यापि॥स्वर्धुनीवारिपूरःपुनरप्यनुलोमेनस्वर्धुनीवारिःपूःअःपुनरपिस्वर्धुनीवारिपूरः॥पुंसःसंबोधनंकिंविदधतिकरिणांकेरुजोग्नेर्भिषक्कुकिंकाशून्यात्तेरिपूणांनरवरनरकंकोवधीद्द्रोचक्रंकिं॥केवावर्षासुनस्युर्विसमविहरिणाकिंनखाग्रैर्विभिन्नंकोवामार्गेविसर्पन्विघटयतितरून्नर्मदावारिपूरः॥२॥ कस्यापि॥ नःमदाःवारिपूरःअःपुनरप्यनुलोमेननर्मदावाः रिपूरः पुनःसर्वंनर्मदावारिपूरः॥ केभूषयंतिस्तनमंडलानिकीदृक्सुमाचंद्रमसःकृतश्रीः॥ किमाहसीतादशकंठभीताहारामहादेवरतानमातः॥३॥कस्यापि॥हाराःमहादेवरताःतमातःपुनःसर्वंहारामहादेवरतानमातः॥रवेःकवेःकिंसमरस्यसारःक्रूपेर्भयंकिंकिमुशांतिभृंगाःखलाङ्घ्रयंविष्णुपदेंचकेषांभागीरथीतीरसमाश्रितानां॥४॥कस्या॰॥भांगीरथीईतिःरसंआश्रितानां॥कःप्रार्थ्यतेमदनविह्वलयायुवत्याभातिकपुंडूकमुपेतिकशंवतासुः॥ कानादरोभवतिकेनविराजतेऽज्ञः बाह्यास्थिकिंफलमु

दाहरनालिकेरं॥५॥कस्यापि॥नाअलिकेअरंपुनःप्रतिलोमेनरंकेअलिनापुनःसर्वेनालिकेरं॥कस्यमरौद्रुरधिगमःकैःकमलेकयथविरचितावासः॥कैस्तकष्यतिचामुंडावदरीपवस्त्रेकुतोभ्रष्टाः॥६॥धर्मह्रासस्य॥आद्यु नरजातिकस्यजलस्यकः भ्रमरः कैः शिरोभिःकुतःपृथिव्याः॥नलिनीदलगतजल वत्तरुणंकिंयौवनंधनंचायुः॥केशशधरकरनिकरानुकारिणःसज्जनाएव॥७॥कस्यापि॥किंक्रूरंस्त्रीहृदयंकिंगृहिणःप्रियहितायदारगुणाः॥कःकामःसंकल्पःकिंदुष्करसाधनंप्रज्ञा॥८॥दंडिनः॥काशंभुकांताकिमुचंद्रकांतंकांतामुखंकिंकुरुतेभुजंगः॥कःश्रीपतिःकाविषमासमस्यागौरीमुखंचुंबतिवासुदेवः॥९॥कालोकमाताकिमुदेहमुख्यंरत्तेःकिमादेकुरुतेमनुष्यः॥कोदैत्यहंतावद्वैक्रमेणगौरीमुखंचुंबतिवासुदेवः॥१०॥व्रजंतिपद्मानिकदाविकासंप्रियागतेभर्तरिकिंकरोति॥रात्रौचनित्यंविरहाःकुलाकासूर्योदयेरोदितिचक्रवाकी॥११॥संतश्चलुब्धाश्चमहर्षिसंघाविप्राःकृषिष्ठाःखलुमाननीयाः॥किंकिंसमिच्छंतितथैवसर्वेनेच्छंतिकिंमाधवदाघयानं॥१२॥कःखेचरतिकारम्याकाजप्याकिंविभूषणं॥कोवंद्यःकीदृशीलंकावीरमर्कटकंपिता॥१३॥किंकुर्वंसुषसिद्विजाःप्रतिदिनंकेमाननीयाःप्रभोःकावासाहसिकीनिशासुसततंद्यौःकीदृशीवर्तते॥कुत्राःस्तेमधुनारिकेरजफलैःकैःस्यात्पिपासाशमः संध्यावंदनमाचरंतिविबुधानारीभगांतर्जलैः॥१४॥किंतृष्णाकारिकीदृग्रथचरणमहोरौतिकःकाःब्धिकाचिःकोःपस्मारीभुजंगेकिमुकलिशमनंत्वार्यसंबोधनंकिं॥कासुंदर्योमपींदुःकथमचलभ्रतःकाचसंबुद्धिरग्नेर्बीजंकिंकाःवनीजारमणमतिहराहेमसारंगलीला॥१५

---

(९) शंभुकांताका-उ॰गौरी एवमेवअन्यत्रऊह्यं भुजंगोजारः(१२)संतःमानंलु॰ब्धाःधनंमहर्षिसंघाःवनं· विप्राःदानं· कृषिष्ठाःघनं·माननीयाः·यानंइच्छंति·सर्वेपिमाधवेवैशाखेदाघःउष्णतस्मिन्यानंगमनंनेच्छंति॥(१३)खेकःचरति·विःपक्षीरम्या·रमा जप्या-ऋक् विभूषणं-कटकं वंद्यः-पिता· लंका-वीरमर्कटैर्हनुमदादिभिःकंपितानाशितेत्यर्थः(१४)उषसिद्विजाःप्रतिदिनंकिंकुर्वंति-संध्यावंदनं·एवमग्रेप्यूह्यं(१५)किंतृष्णाकारि-हेम·रथचरणं-सारं अराभिःसहितं·कोरौति गलीप्रशस्तकंठःरौतिगा

कोनिर्दग्धस्त्रिपुररिपुणाकश्चकर्णस्यहंतानद्याःकूलंविघटयतिकः
कःपरस्त्रीरतश्च॥कःसल्लज्ञोभवतिसमरेभूषणंकिंकुचानांकिं
दुःसंगाद्भवतिमहतांमानपूजापहारः॥१६॥सीमंतिनीषुकाशांता
राजाकोऽभूद्गुणोत्तमः॥विद्वद्भिःकासदावंद्याअत्रैवोक्तंनबुध्यते॥१
॥१७॥कंसंजघानकृष्णःकाशीतलवाहिनीगंगा॥केदारपोषणरताः
कंबलवंतंनबाधतेशीतं॥१८॥युधिष्ठिरःकस्यपुत्रोगंगावहतिकी
दृशी॥हंसस्यशोभाकावास्तिधर्मस्यत्वरितागतिः॥१९॥लंकाभू
पनिशाचरोरघुपतिंयुद्धेकथंदृष्टवान्दीनेपातिपितेवयःपक्षपतिः
कस्तस्यवाहःप्रियः॥केनाऽपूर्वफलंनरैःसुकृतिभिःकस्मिन्स्थले
भुज्यतेजारायेभुवितान्प्रशास्तिकतमोस्येषामिहैवोत्तरं॥२०॥का
पांडुपत्नीगृहभूषणंकिंकोरामशत्रुःकिमगस्त्यजन्मा॥कःसूर्यपुत्रो
विपरीतपृच्छाकुंतीसुतोरावणकुंभकर्णः॥२१॥करोतिशोभामल
केस्त्रियाःकोदृश्यानकांताविधिनाचकोक्ता॥अंगेतुकस्मिन्दहनः
पुरारेःसिंदूरबिंदुर्विधवाललाटे॥२२॥भोजनांतेचकिंपेयंजयंतःक
स्यवैसुतः॥कथंविष्णुपदंप्रोक्तंतक्रंशक्रस्यदुर्लभं॥२३॥क्वसति
लघुजंतुःकिंनिदानंहिवांतझटितिवदपशुंकंलबकंठवदंति॥प्र
सवसमयदुःखंवेत्तिकाकामिनीनांतिलतुषपुटकोणेमक्षिकोष्ट्रप्र
सूता॥२४॥

पति॰ अब्धिकांचिः इलापृथिवी॰ अपस्मारी–लालीलालावान्॰ भुजगेकिं–गरंविषं॰
कलिशमनं–सामसांत्वं नदइतिलोके आर्यसंबोधनं–हे॰ सुंदर्योका–हेलालीला ई
दुःमलीमलवान्कलंकीतियावत् अचलभृतःसंबुद्धिःसागअगेर्दृक्षैःसहित अग्ने
वीजं–रं अवनिजासीतातद्रमणोरामस्तत्प्रतिहरा–हेमसारंगलीलाहेम्नःसुवर्णस्य॰
सारंगोमृगस्तस्यलीला(१६)त्रिपुररिपुणाकोनिर्दग्धः मारःमदनः एवमग्रेपि॰दुःसं
गात् महतांकिं–मानपूजापहारःमानपूज्ययोः अपहारःनाशः(१७)सीमंतिनीषुका
शांता–सीता एवमग्रेपिचरणाद्यंताक्षरयोर्मेलनेनोत्तरं (१८) कृष्णःकंपुरुषंसंजघा
नमारितवान्–कंसं एवमग्रेपि (१९) चतुर्थपादस्थपदत्रयेणप्रश्नत्रयस्योत्तरं (२०)
अत्रपादाद्याक्षरद्वयविपर्यासेनउत्तरं यथालंका–भूपेइत्यत्रकालिमित्यादिउत्तरार्धे
केनेत्यस्यसुखेनेत्यर्थः (२१) अत्रचतुर्थपादस्थैःपंचभिःपदैरुत्तरं॰ रावणेनसहितः
कुंभकर्णः इयंविपरीतपृच्छा (२२) चतुर्थपादस्यसिंदूरबिंदुरित्यादिपदत्रयेणोत्त
रं (२३) तक्रमित्यादिपदत्रयेणप्रश्नत्रयस्योत्तरं (२४)

पृथ्वीसंबोधनंकीदृक्कविनापरिकीर्तितं॥
केनेदंमोहितंविश्वंप्राप्यःकेनाऽऽप्यतेयशः॥२६

कुत्रोदेत्युदयाचलस्यतरणीरम्यागतिःकस्यखेकान्याभांति
चकिंकरोतिगणकोयष्टिंदिधृत्येतिकः॥कस्मिन्जाग्रतिजंतवो
नचकदासूतेचकाकःप्रियःशृंगाग्रेतुरगस्यभानिगणयत्संधोऽ
न्हितंध्यासुतः॥२७॥विवाहेपुरंध्रीजनैर्लिप्यतेकानकेमानमायां
तिगर्वोन्नताका॥घनेवारिधौरामतःकंपतेकाहरिद्रादरिद्राःसरि
द्रावणश्रीः॥२८॥ अन्यस्त्रीस्पृहयालवोजगतिकेपद्मामगम्या
चकाकोधातुर्दशनेसमस्तमनुजैःकाप्रार्थ्यतेऽहर्निशं॥दृष्ट्वैकांयवने
श्वरोनिजपुरेपद्माननांकामिनींमित्रंप्राहकिमादरेणसहसायाराऽ
नदींदृशमा॥२९॥ कस्मिन्शेतेमुरारिःक्वनुखलुवसतिर्वायसीको
निषेधःस्त्रीणांरागस्ककस्मिन्क्वनुखलुसितिमाशौरिसंबोधनं
किं॥संबुद्धिःकाऽहिमांशोर्विधिहरवयसांचाऽपिसंबुद्धयःकाब्रूते
लुब्धःकथंवाकुरुकुलहननंकेनतत्केशवेन॥३०॥कीदृक्षागिरिशात
नुर्जयेचधातुर्विष्णोकाविचुधजरातमस्तृतीया॥मध्यार्णेसतिक
थमात्यकोस्तिदेसोमाऽन्यसकलकलाजसानसाहा॥३१॥कीदृग्मत्त
मतंगजःकमभिनत्यादेननंदात्मजःशब्दःकुत्रहिजायतेयुवतयः
कस्मिन्सतिव्याकुलाः॥विक्रेतुंदधिगोकुलात्प्रचलिताकृष्णेनमा
र्गेधृतागोपीकाचननंकिमाहकरुणंदानीअनोखेभये॥३२॥॥

---

(२६)पृथ्वीसंबोधनं को·इनाकामेनक·विनायशः·आप्यते(२७)अत्रशृंगाग्रेइत्यादिभिरष्टभिःपदैःक्रमेणाष्टावुत्तराणि·यथा उदयाचलस्यक्रुत्रकस्मिन्प्रदेशेतरणिःसूर्यःउदेति शृंगाग्रे एवमग्रेप्यूह्यं(२८) अत्रचतुर्थपादस्यचतुर्भिःपदैःक्रमेणचत्वारिउत्तराणि (२९)अत्रपूर्वार्धस्थप्रश्नचतुष्टयस्यचतुर्थपादस्थयारानदीदृशमा इत्येतानिचत्वारिउत्तराणि·याराः१ जाराःउत्तरार्धस्यपंचमप्रश्नस्यहेमित्रएतादृशीदीपकलिकामयाकदापिनदृष्टेत्यर्थकं यारानदीदृशमेति यावनीभाषयाउत्तरं (३०) मुरारिःकेउदकेशेते वायसीवसतिःशवे निषेधः नस्त्रीणांरागःनवे सितिमाश्वेतत्वे क·शकेयवनविशेषे शौरिसंबोधनं-केशव अहिमांशोः सूर्यस्यसंबुद्धिः-इन विधिहरवयसांसंबुद्धयःक्रमेण·क·ईश·वे·लुब्धःकथं ब्रूतेनेति॥

अन्यस्त्रीस्पृहयालवोजगतिकेपञ्चाशगम्याचकाकोधातुर्दशनेमस्तमनुजैः कामार्थ्यतेनित्यशः॥सेहट्टायवनेश्वरोलवपुरेपञ्चाननांकामिनीं मित्रंप्राहकिमादरेणवचनंवारानदीदंसुमा॥२३॥नाराविष्णूरणत्विट्खगहृद परमोस्कंदसंबुद्धयः कककस्याद्दातुत्रयंलुग्विकरणपठितंकुत्रनत्वावबोधः॥चत्वारस्तद्धितांताः कनुखलुविगतैकैकवर्णस्वभावाः किंसूत्रंपाणिनीयंविलसतिनसहस्रोक्तिभिर्भास्वरेपि॥२४॥ ॥इतिअंतर्लापिका॥ ॥७ ॥७॥ ॥

अथबहिर्लापिका

नीचेष्वयावनीवाक्तः कः स्याच्छुभदोजने॥शंभोराववरणंकिंकिंभजंतेव्याधयोजनं॥१॥ श्रीहरिहरदेवानां॥प्रश्नोत्तरंकिंअवेलाभोजिनंअवेलाभः अजिनंपुनः सर्वंअवेलाभोजिनं॥कस्मिन्स्वपतिकंसारिः कावृत्तिरधमानृणां॥किंब्रूतेपित्तरंबालाकिंहस्तारमतेजनः॥२॥कस्यापि॥प्रश्नोत्तरंकिंशेषेसेवावापररूपंशेषे।सेवा।वा।पररूपं॥अथप्रश्नोत्तरेषूक्तिप्रत्युक्तयः॥ किंयन्मात्रजलंविप्रजानुदघ्नंनराधिप॥ तथापीयमवस्थानेनहिसर्वेभवादृशाः॥३॥प्रथमपादंतृतीयपादंचनदीमुत्तितीर्षोर्भोजस्योक्तिः॥ द्वितीयपादंचतुर्थपादंचराजदर्शनार्थंगच्छताकाष्ठभारवाहपंडितस्यप्रत्युक्तिः॥भूरिभारसमाक्रांतबाधतिस्कंधएषते।नतथाबाधतेस्कंधोयथाबाधतिबाधते॥४॥पूर्वार्धंमृगयायागृहमागच्छतः शिबिकारूढस्यभोजराजस्योक्तिः॥उत्तरार्धंचराजदर्शनार्थंगच्छतः शिविकावाहपंडितस्यप्रत्युक्तिः॥यदेतच्चंद्रांतर्जलदलवलीलांवितनुतेतदाचष्टेलोकः शशकइतिनोमांप्रतितथा॥अहंत्विंदुंमन्येत्वदरिविरहक्रांततरुणीकटाक्षोल्कापातव्रणकिणकलंकांकिततनुं॥५॥पूर्वार्धंरात्रौचंद्रंवर्णयतोभोजस्योक्तिः उत्तरार्धंचराजदर्शनार्थंगतचोरपंडितस्य॥इदमनुचितमक्रमश्चपुंसांयदिहजरास्वपिमान्मथाविकाराः॥यदपिनकृतंनितंबिनीनांस्तनपतनावधिजीवितंरतंवा॥६॥पूर्वार्द्धंसारक्रीडांकुर्वन्त्याः शीलाभट्टारिकायाः उत्तरार्द्धंचभोजस्य॥ अथोह

टककोटयस्त्रिनवतिर्मुक्ताफालानांतुलाः पंचाशन्मदगंधलुब्धमधुपाः क्रोधाद्धुरासिंधुराः॥ लावण्योपचयप्रपंचचतुरंपण्यांगनानां शतंदत्तोपांड्यनृपेणढौकितमिदंवैतालिकायार्पय॥७॥ निखिलमपिपद्यंविज्ञापयतोभांडागारकस्योक्तिः॥ वैतालिकायार्पयेतिक्षत्राक्षराणिवैतालिकगीतदत्तकर्णस्यविक्रमादित्यस्यप्रत्युक्तिः॥ अलमतिचपलत्वात्स्वप्नमायोपमत्वात्स्मरणतिविरसत्वात्संगमेनांगनायाः॥ इतियदिशतकृत्वस्तत्त्व मालोकयामस्तदपिनहरिणाक्षींविस्मरत्यंतरात्मा॥८॥ पूर्वार्द्धंशिष्यंप्रतिगुरोरुक्तिः॥ उत्तरार्धेचराजकन्यानुरक्तस्यबिल्हणस्यभित्तिलेखंप्रत्युक्तिः॥ अंगणंतदिदमुन्मदद्विपश्रेणीशोणितविहारिणो हरेः॥ उल्लसत्तरुणकेलिपल्लवोशल्लकींत्यजतिकिंमतंगजः॥९॥ पूर्वार्द्धंतच्चित्तपरीक्षिकायाराजकन्याया उक्तिः॥ उत्तरार्द्धंतदनुरक्तस्यबिल्हणस्यप्रत्युक्तिः॥ निरर्थकंजन्मगतंनलिन्यायया नदृष्टंतुहिनांशु बिंबं॥ उत्पत्तिरिंदोरपि निःफलैवस्पृष्टाविनिद्रानलिनीनयेन॥१०॥ पूर्वार्द्धंबिल्हणस्योक्तिः उत्तरार्द्धंराजकन्यायाः॥ किमिच्छतिनरःकाश्यांभूपानांकोरणेहितः॥ कोवंद्यःसर्वदेवानांदीयतामेकमुत्तरं॥११॥ विराजराजपुत्रारेर्यन्नामचतुरक्षरं॥ अर्द्धंयस्तुशत्रूणामुत्तरंतवमंदिरे॥१२॥ प्राप्तेवसंतसमयेवदकिंतरूणां किंस्त्रीयवेविरहिणामुरगःकिमेति॥ किंकुर्वते मधुलिहोमधुपानमत्ताः कीदृग्वनंमृगगणास्त्वरितंत्यजंति॥१३॥ भागीरथीकथंभूताकामिनीप्राहकिंप्रियं॥ एकमेवोत्तरंदेहिशास्त्रलौकिकभाषया॥१४॥ बुधःकीदृग्वचोब्रूतेकोरोगीकश्चनास्तिकः॥ ॥

---

(११) उ· मृत्युंजयः अत्रपूर्वार्धस्यप्रश्नद्वयस्यपदद्वयेनोत्तरं· उत्तरार्धस्यप्रश्नस्य एकपदेनोत्तरं (१२) वयः पक्षिणस्तेषांराजागरुडस्तद्राजा विष्णुस्तत्सुतोमदनस्तच्छत्रुःशिवस्तस्यचतुरक्षरंनाममृत्युंजयइति तदर्धंमृत्युरितितवशत्रूणांमंदिरे उत्तरमर्द्धंजयइति तवमंदिरेवसति वै कस्यचित्पुरुषस्यराजानंप्रत्याशीर्वादः (१३) अत्रद्वे नवनवह्निना विकलंव्याकुलमित्यर्थकेन (द्वविकलं) इतिसमुदितांतोत्तरेप्रथमाद्यक्षराणामंत्याक्षरेणयोजनेपूर्वेषांचतुर्णांप्रश्नानामुत्तराणिभवंति· यथाप्रथमेकिंभवतीतिप्रश्नेदलमिति एवमेवोत्तरत्रवविहंगमबवयोःसावर्ण्यात्(वरं,विहं) इतिकलंअव्यक्तमधुरंइति (१४) मल्लापहाहत्युत्तरं॥

कीदृक्चंद्रंनमस्यंतिकिंसूत्रंपाणिनेर्वद॥१५॥ किंत्राणंजगतां
नपश्यतिचकःकेदेवताविद्विषःकिंदातुःकरभूषणंनिरुदरःकः
किंपिधानंदृशां।केस्वेखेलनमाचरंतिसुदृशांकिंचारुनाभूषणंबु
द्ध्याब्रूहिविचार्यसूक्ष्ममतिमंस्त्वेकंद्वयोरुत्तरं॥१६॥ गतासाकिं
स्थानंपथिसहतयाकास्थितवतीनृपेणेत्थंपृष्टासखिचतुरदूतीस्थि
नवती॥विलोक्याऽलंकारंनिजमथचशाकंनरपतिंनिराकांक्षंचक्रेक
थयकथमेतत्प्रभवति॥१७॥ गतक्लेशाऽऽयासाविमलमनसःकुत्रमुन
यस्तपस्यंतिस्वस्याःसुररिपुरिपोःकाचदयिता॥कविप्रेयःकिंस्याऽ
न्नवलघुयुतैरष्टगुरुभिर्बुधावृत्तंवर्णैःस्फुटघटितबंधंकथयत॥१८॥
उरसिमुरभिदःकागाढमालिंगिताऽऽस्तेसरसिजमकरंदाऽऽमोदितानं
दनेका॥गिरिसमलघुवर्णैरर्णवाख्यातिसंख्यैर्गुरुभिरपिकृताकाछं
दसांवृत्तिरस्ति॥१९॥ कोनयतिजगदशेषंसंयमथबिभरांबभूवकं
विष्णुः॥नीचैःकुत्रसगर्वःपाणिनिसूत्रंचकीदृक्सं॥२०॥नम्राघतेरख
लःकस्मैसुसिङं·तंकिमुच्यते॥लादेशानांनवानांचतिङांकिंनामकथ्यतां
॥२१॥

---

(१५)अर्थवदधातुरप्रत्ययःप्रातिपदिकं· बुधः कीदृक्वचोब्रूतेअर्थवत् एवमग्रेपि·
(१६) अंधः अन्धं· दृष्टिविहीनश्च दानवाः दैत्याः दानवारिच यानोदकमित्यर्थः तमः राहुः
अंधकारश्च· वयः पक्षिणः तारुण्यंच· एतानिचत्वारि उत्तराणिप्रत्येकंप्रश्नद्वयस्य(१७)
कश्चिद्राजाकांचिन्नायिकांस्वगृहमानयत्· ततश्चतद्भर्तारमागतंदृष्ट्वातांस्वगृहंप्राप
यितुंदूतीमाज्ञापयतिस्म· साचदूतीतांस्वगृहंप्रापय्यपुनःराजनिकटेआगत्यस्थितव
तीतामित्याहराजा· साकिंस्वस्थानंगता· गतवत्यातयासहपथिमार्गेकास्थितवती· एवंप्र
ष्टापृष्टाचतुरादूतीस्थितवतीसतीनिजमलंकारंपोहोचीतिभाषाप्रसिद्धं तथाशाकंमेथी
तिभाषाप्रसिद्धंशाकविशेषंच अवलोक्यतावन्मात्रेणैवनरपतिंनिराकांक्षमुत्तरविषयेआ
कांक्षारहितंचक्रे· एतदलंकारशाकावलोकनंकथंप्रभवतिराज्ञोनैराकांक्ष्यसंपादनेक
थंसमर्थंभवतीतिकथयेतिकविप्रश्नः· अत्रप्रथमप्रश्नस्यप्रासेत्यर्थकंपोहोचीतिभाषयो
त्तरं द्वितीयप्रश्नस्यतु अहमासमित्यर्थकंभाषयामेथीत्युत्तरमितितात्पर्यंबोध्यं (१८) मु
नयः कुत्र तपस्यंतीतिप्रश्नेशिखरिणिपर्वतेइत्युत्तरं सुराणांरिपुर्हिरण्यकशिपुस्तस्य
रिपुर्विष्णुस्तस्यदयिताकेतिप्रश्नेई लक्ष्मीरित्युत्तरं कविप्रेयः कवीनांप्रियंवृत्तंकिमिति
प्रश्नेशिखरिणीत्युत्तरं (१९) मुरभिदःविष्णोरुरसिआलिंगितामालक्ष्मीः अलिनीभ्रम
री· मालिनी· इतित्रीण्युत्तराणिक्रमेण (२०) यमः अगंपर्वतं· धने· यमोगंधने· इतिच
त्वारिउत्तराणिक्रमेणज्ञेयानि· (२१) परस्मै· पदं· परस्मैपदं· इतित्रीण्युत्तराणि· ॥

सततं श्लाघते कस्मै नीचो ऽनुविकिमुत्तमं॥ कर्तर्यपि रुचादीनां धातूनां किं पदं भवेत्॥२२॥ कः कर्णारिपिता गिरीन्द्रतनया कस्य प्रिया कस्य तुक् को जानाति परेङ्गितं विषमगुः कुत्रोद्भूत् कामिनां॥ भार्या कस्य विदेहजा तु दति का भीमेन्द्रि निंद्यश्च कस्तत्त्वल्पुत्तरमध्यमाक्षरपदं सर्वार्थसंपत्करं॥२३॥ कः स्यादंबुदयाचकोऽनुबत यः केकामयं तेपतिं लज्जा केन निवार्यते निकटं केदासे कयं पावनी॥ भाषादर्शयतेति वस्तु महाराष्ट्रे कदा वा भवेदाद्यंताक्षरयोर्हि लोपरचनाचातुर्यतः पूर्यतां॥२४॥ का मेघादुपयाति कृष्णदयिता का वा सभा कीदृशी कां रक्षत्यहिहा शरद्धि कवये त्वं धैर्यहं त्रीच का॥ कं धत्ते गणनायकः करतले कांचंचला कथ्यतामारोहादवरोहतश्च निपुणैरेकं द्वयोरुत्तरं॥२५॥ कुत्र श्रीः स्थिरतामुपैति भुवि को दुःखी किमीप्सत्यदं धर्मादीन् विनिवारयंति पथिके पांथस्य दीनस्य चा॥ कासं बुद्धिरिह श्रियश्च वतमसः कौ नाश के प्रोच्यतां गच्छंतं पथिकं किमाह यवनः संगाभिलाषान्वितः॥२६॥ इति॰ वृ॰ शा॰ वि॰ प॰ बहिर्लापिकाख्यानंपरिच्छेदः॥

अथ जातिः

मंडलीकृत्य बर्हाणि कंठैर्मधुरगीतिभिः॥ कलापिनः प्रनृत्यंति काले जीमूतवालिनि॥१॥ कलक्वणितगर्भेण कंठेनाघूर्णितेक्षणः॥ पारावतः परावृत्य रिरंसुश्चुंबति प्रियां॥२॥ दंडिनइमे॥ स्थित्वा स्कंधे पादु

---

(२२) आत्मने, पदं, आत्मनेपदं. इति त्रीण्युत्तराणि.

(२३) उत्तराणिः—

वा स वः
ह र स्य
ह्र स्व स्य
म ति मान्
म न सि
रा म स्य
कु स्तु तिः
अ भ्यं गः

एतन्मध्यमाक्षरैः संजातं पदं वाक्यं (सरस्वति नमस्तुभ्यमिति.) अत्र तुक् आगमो ह्रस्वस्य पिति कृति तुगिति सूत्रेण विहितः अत्र विषमाः पंच गावो बाणा यस्येति विषमगुः कामः॥

पांभः समजठरशिराश्चक्रमूर्तिर्मुहूर्तं धूर्तः संसक्ततीरः कतिचिदपि पदान्युच्चकैः कुंचितांघ्रिः॥ पश्चात्क्रौंचो वांभसार्यत्वरितगतिरपां मध्यमाविश्य चंचाचंचंतीमूर्धकंठः कथमपि शफरीं स्फारिताक्षो बकोत्ति॥३॥ गोविन्दराजदेवानां॥ न्यंचन्नंचलचंचुचुंबनचलच्चूडाग्रमुग्रं पतत्वक्राकारकरालकेसरसटास्फारस्फुरत्कंधरं॥ वारंवारमुदंघ्रिचंचलघनभ्रश्यन्नखक्षुण्णयोर्दृप्ताकुक्कुटयोर्द्वयोः स्थितिरितिक्रूरक्रमं युध्यतोः॥४॥ वररुचेः॥ पक्षावुत्क्षिप्य धुन्वन्सकलतनुरुहाभोगविस्तारितात्मा प्रागेवोड्डीननिद्रः स्फुरदरुणकरोद्भासितं स्वं निरीक्ष्य॥ प्रातः प्रोत्थाय नीडे स्थितचपलतनुर्घर्घरध्वानमुच्चै रुद्ग्रीवं पूर्वकायोन्नतविकटपदः कुर्कुटो रारटीति॥५॥ कस्यापि॥ आलोकत्रस्तनारीकृतसभयमहानादधावज्जनौघव्याप्तद्वारप्रदेशप्रचुरकलकलाकर्णनस्तब्धचक्षुः॥ काष्टं दंडं गृहाणेत्यतिमुखरजनैस्ताडितो लोष्टघातैर्भीतः सर्पो गृहीस्यानधिगतविवरः कोणतः कोणमेति॥६॥ दिवाकरकिशोरस्य॥ धूलीधूसरतनवो राज्यस्थितिरचनकल्पितैकनृपाः॥ कृतमुखवाद्यविकाराः क्रीडंति सुनिर्भरं बालाः॥७॥ रुद्रदत्तस्य॥ आयातो भवतः पितेति सहसा मातुर्निशम्योदितं धूलीधूसरितो विहाय शिशुभिः क्रीडारसान्प्रस्तुतान्॥ दूरात्स्मेरमुखः प्रसार्य ललितं बाहुद्वयं बालको धन्यस्यास्य पुरः समेति परया प्रीत्या रटन्घर्घरं॥८॥ उत्कटस्य॥ अकूर्चारंभोपि प्रतिचिबुकदेशं करतलं प्रतिज्ञायां कुर्वन्युवतिषु दृशं स्निग्धतरलं॥ कुमारो हंकारात्परिषदि समानानगणयन्भुजौ वक्षः पश्यन्नववयसि कांतिं वितनुते॥९॥ शार्ङ्गधरस्य॥ खड्गहस्तोरिमालोक्य हर्षामर्षसमन्वितः॥ शूरः पुलकितो रक्तनेत्रो हसति जृंभते॥१०॥ लक्ष्मीधरस्य॥ गायति हसति च नृत्यति हृदयेन धृतां प्रियां विचिंतयति॥ समविषमं न च विंदति गृहगमनसमुत्सुकः पथिकः॥११॥ कस्यापि॥ मातर्धर्मपदेद्यां कुरुमपिस्रोतेद्य वैदेशिके द्वारालिंदककोणके सुनिभृतं यास्यामि सुप्ता निशि॥ इत्युक्ते सहसा प्रचंडगृहिणीवाक्येन निर्भर्त्सितः स्कंधन्यस्त

पलालमुष्टिविभवः पांथः पुनः प्रस्थितः॥१२॥ रविदत्तस्य॥ भद्रं
तेसदृशंयदध्वगशतैःकीर्तिस्तवालंबते स्थानेस्म नुत्तमंस्फः
कृतिनादानेनकर्णोजितः॥ इत्यालोक्यभृशंदशाकरुणयापीता
तुरेणस्फुतःपांथेनैकपलालमुष्टिरुचिनागर्वायतेहालिकः॥१३
कस्यापि॥ विलासमसृणोल्लसन्मुशलदोलदोःकंदलीपरस्परपरिस्खल
लद्वलयनिःस्वनोद्धुराः। लसंतिकलहंकृतिप्रसभकंपितोरः
स्थलत्रुटद्गमकसंकुलाःकमलकंडनीगीतयः॥१४॥ आकर्षन्निवगांव
मन्निवखुरैःपश्चार्द्धमुड्डंनिवस्वीकुर्वन्निवखंपिबन्निवदिशोवायू
न्समुष्णन्निव॥ सागारप्रकरांस्पृशन्निवभुवंछायाममृष्यन्निव
प्रेंखच्चामरवीज्यमानवदनःश्रीमान्हयोधावति॥१५॥ सिंहदत्त
स्य॥ परोत्तुन्नःपश्चाद्व्रजतिविधृतश्चोत्क्षिततनुःसमुत्पत्योत्तानःपतति
पथिलोकान्प्रविशति॥ हयःकिंचित्किंचिद्यदिनयतिनपतिःक्वचि
द्दोकशाघातेतिष्ठत्यथचरणघातेनखनति॥१६॥ सूक्तिसहस्रा
त्॥ आघ्रायाघ्रायगंधंविकटमुखपटोद्दर्शयन्दन्तपंक्तिंधावत्यु
न्मुक्तनादोमुहुरपिचरसाहूत्यापृष्ठलग्नः॥ गर्दभ्याःपादघातद्वि
गुणितसुरतप्रीतिराकृष्टशिश्नोवेगादारुह्यमुह्यन्नवतरतिखरं
खंडितेच्छश्चिरेण॥१७॥ मयूरस्य॥ घ्रात्वाश्रोणीमजायाविततम
तिमुखवक्रसंकोचभंगंस्थित्वासूर्यंनिरीक्ष्यप्रविकसितसटोत्ख
ट्टयन्क्ष्मांखुरेण। बोबोकारान्प्रकुर्वन्मणिशकलनिभंबालय
नेत्रयुग्मंछागश्चाटूननेकांश्वशुरइवविटोमन्मथांधःकरोति॥१८
॥कस्यापि॥ पार्श्वास्फालावलेपाच्चटुलितचरणोल्लेखिताकाशदेशः
संघट्टाटोपकोपप्रकटितरसनापल्लवालीढसृक्कः ॥ किंचित्तावी
कृतास्यःस्फुरदधरपुटःस्फारिताताम्रचक्षुर्घ्रोणावासाभिलापाद
पसरतिरुषंदर्शयन्नेषमेषः॥१९॥ शंखवर्मणः॥ ग्रीष्मादित्यकरप्रत
प्तसिकतामध्योपविष्टःसुखंशेतेगौरवरोमरुत्स्थलभुविप्रोथंनिधा
यक्षितौ॥ गुंजज्जाहककंटकाहतमरुद्धूतोत्पतत्तूलिभिःछिन्नांगः
कृकलासकोपिनिभृतंमार्तंडमुद्वीक्ष्यते॥२०॥ मार्गेदेहिपदंनिधेहि

निभृतंतंशब्दमाकर्णयन्श्वानेवारयकेदलात्कलकलुःकोपंसखेतावकः॥ इत्यन्योन्यमनेकधामृगवधव्यापारपारंगमैर्व्याधैःकोप्यधिकोरसःप्रतिपदंजालद्भिरुत्साद्यते॥२१॥ पुष्पाकरस्य॥ वामस्कंधनिषण्णशार्ङ्गकुटिलप्रांतार्पिताधोमुखस्यंदच्छोणितलंबमानशशकान्वेणीस्खलच्चामरान्॥ ज्यातंप्रोतकपोतपोतलिपतद्रक्ताक्ततूणीरकाल्लोपश्यत्करिकुंभभेदजनितास्कंदान्पुलिंदान्पुरः॥२२॥ क्षेमेंद्रस्य॥ गर्जन्हरिःसांभसिशैलकुंजेप्रतिध्वनीनात्मकृतान्नीरीक्ष्य॥ पदंबबंधक्रमितुंसरोषःप्रतर्कयन्नन्यमृगेंद्रनादं॥२३॥ भट्टस्वामिनः॥ लीढाजस्रविपांडुराग्रनखयोराकीर्णदीर्णंमुखंविन्यस्याग्रिमयोर्युगेचरणयोःसद्योविभिन्नद्विपः॥ एतस्मिन्मदगंधवासितरसःस्रावज्ञतिर्यक्कुलस्तक्रांताहृतिधूतलोलमधुपःकुंजेषुशेतेहरिः॥२४॥ अंभोमुचांसलिलमुद्वमतांनिशीथेतालीवनेषुनिभृतंस्थिरकर्णतालः॥ आकर्णयंतिकरिणोर्द्धनिमीलिताक्षाधारारवान्दशनकोटिनिषण्णहस्ताः॥२५॥ कस्यापि॥ नयनपथनिरोधक्रोधनिर्धूतवालाभ्रमदविरलरोमस्तोमबद्धांधकारः॥ क्रमिकवलनलोभोद्धातवाल्मीकरंध्रोत्थितफणिफणघातैरुच्छलत्येषभल्लः॥२६॥ मदनस्य॥ यदर्कांशुक्रांतस्फुरदरुणपुण्यादधियात्प्रविष्टोनासांतक्वणितमणिडिंभःप्रकुरुते॥ कपिःस्थित्वास्थित्वातदिदमनुशृण्वन्विचकितोधुनोत्यास्यंरौतिप्रचलतिचलत्पुच्छलवितो॥२७॥ कस्यापि॥ गर्जित्वामेघधीरंप्रथममथशनैर्मंडलीकृत्यदेहंशृंगाभ्यांभावयंत्यावभिमुखमवनिंधारयंतौखुराग्रैः॥ मंदंमंदंसमेत्यस्थिरनिहितपदंदंतघातौसरोषंयुध्येतेवालयंतौकुटिलतमसकृच्चारुपुच्छंमहोक्षौ॥२८॥ कस्यापि॥ आहत्याहत्यमूर्ध्नाद्रुतमनुपिबत्प्रस्नुतंमातुरोधःकिंचित्कुंचैकजानोरनवरतचलच्चारुपुच्छस्यधेनुः॥ उत्तीर्णकर्णकस्यप्रियतनयतपादत्तहुंकारमुद्राविश्रंसक्षीरधारालवशबलमुखस्यांगमातृप्तिलेढि॥२९॥ मयूरस्य॥ इतिश्रीशार्ङ्गधरविरचितायांपद्धत्यांजातिपरिच्छेदः॥ ७॥ ७॥ ७॥

अथसदाचारः

श्रोत्रियंसुभगामग्निंसाग्निंगांधार्मिकंनदीं।। प्रातरुत्थाययःपश्ये
दापद्भ्यःसप्रमुच्यते।।१।।पापिष्ठंदुर्भगामंत्यंनग्नमुत्कृत्तनासिकं
।।अप्रियंप्रातरुत्थायपश्यन्कलिमवाप्नुयात्।।२।।प्रेतधूमेविरे
केचवांतेचक्षुरकर्मणि।।दुःस्वप्नेदुर्जनस्पर्शेस्नानमात्रंविधीयते
।।३।।उदक्यापतितम्लेच्छचांडालाद्यतिभाषणे।।मार्जारश्वखर
स्पर्शेविण्मूत्रोत्सर्गदर्शने।।४।।अश्रुवीक्ष्णेश्रुपातेचकलहेश्वा
सकासयोः।।रथ्याप्रसर्पणेभ्यंगेक्षुतेकर्णमुपस्पृशेत्।।५।।कुर्या
दाचमनाभावेभास्करस्यावलोकनं।।स्पृशेद्वासाद्रेतृणगोगोवि
ट्भूदक्षिणश्रुतीः।।६।।देवाधिकारणेमूढान्विरोधस्थान्द्विजा
नपि।।विलोक्योपस्पृशेत्स्पृष्ट्वासवासाजलमाविशेत्।।७।।अ
जाश्वंमुखतोमेध्यंगावोमेध्यास्तुपृष्ठतः।।ब्राह्मणाःपादतोमे
ध्याःस्त्रियोमेध्यास्तुसर्वतः।।८।।नास्तियज्ञंस्त्रियाकिंचिन्न
व्रतंनोपवासकं।।यातुभर्तरिशुश्रूषातयास्वर्गंजयत्यसौ।।९।।
मृतेभर्तरियानारीब्रह्मचर्यव्यवस्थिता।।मृतासालभतेमोक्षं
भर्तारंसानुगच्छति।।१०।।तिस्रःकोट्योर्धकोटीचयानिलोमानि
मानुषे।।तावत्कालंवसेत्स्वर्गेभर्तारंयानुगच्छति।।११।।व्यालग्रा
हीयथाव्यालंबलादुद्धरतेबिलात्।।एवंपतिंसमुद्धृत्यनारीस्व
र्गेषुमोदते।।१२।।पृथक्चितांसमारुह्यनविप्रागंतुमर्हति।।भर्तृ
देहेनयायातिनस्यालोकाःसनातनाः।।१३।।शुचिर्भूमिगतंतोयंशु
चिर्नारीपतिव्रता।।शुचिःक्षेमंकरोराजासंतोषीब्राह्मणःशुचिः।।१४।।
नित्यमास्यंशुचिःस्त्रीणांशकुनिःफलपातने।।वत्सोपिस्तनपाने
स्याश्वामृगग्रहणेशुचिः।।१५।।गच्छेदेकोनपंथानंस्वयंनोपान
हौहरेत्।।शिरसानवहेद्भारंनप्रधावेतवर्षति।।१६।।नस्नानमाच
रेद्भुक्त्वानातुरोनमहानिशि।।नवस्त्रैःसहनाजस्रंनाविज्ञातेजला
शये।।१७।।नद्यायद्यत्परिभ्रष्टंयच्चाव्रतसमन्वितं।।गतंप्रत्यागतंयच्च
तत्तोयंपरिवर्जयेत्।।१८।।ब्राह्मणाजागोमहिष्याःस्तनाःशुष्कानवोदकाः

॥नद्यःसुह्याद्दशाहेनसुष्कापोभूमिमानवः॥१९॥प्रवहद्ब्राह्मणंतोयंतडागेक्षत्रियोदकं॥वापीकूपगतंवैश्यंशूद्रंचगृहभांडगं॥२०॥अप्स्वात्मानंनवीक्ष्येतनावगाहेत्ययोरयं॥संदिग्धनावंनारोहेन्नबाहुभ्यांनदींतरेत्॥२१॥शीतास्वप्सुनिषिच्योष्णामंत्रसंभारसंभृताः स्नानंगृहेषुकुर्वाणःप्राप्नोतिस्नानजंफलं॥२२॥मुखेनाग्निंनोपधमेन्नाधःकुर्यान्नलंघयेत्॥नामेध्यंप्रक्षिपेद्वन्हौनचपादौप्रतापयेत्॥२३॥देवालयंचत्वरंचनक्तंसेवेतनद्रुमान्॥शून्याटवींशून्यगृहंश्मशानंनदिनेष्वपि॥२४॥जलंपिबेन्नांजलिनानशयानंप्रबोधयेत्॥परान्नानिचरंतींगांधयंतींननिवारयेत्॥२५॥शय्यादीपाधमस्तंभच्छायांदूरेणसंत्यजेत्॥मर्मालापंनकुर्वीतधीमानसहनैःसह॥२६॥नोद्धूजानुश्चिरंतिष्ठेन्नस्यादुत्कटकासनः॥ननासिकांविकुष्णीयान्नस्वयंकर्तयेन्नखान्॥२७॥सर्वथासंत्यजेद्वादंनकिंचिन्मर्मणि स्पृशेत्॥सर्वान्परित्यजेदर्थान्स्वाध्यायस्यविरोधतः॥२८॥कुशांस्वर्णंसदाधार्यंबर्हिर्मांसेनधारयेत्॥नागंधंबिभृयात्पुष्पंनात्मार्थेगुंफयेत्स्रजं॥२९॥नित्यमामलकेलक्ष्मीर्नित्यंहरितगोमये॥नित्यंशंखेचपद्मेचनित्यंशुक्लेचवाससि॥३०॥बालार्कंप्रेतधूमंचवृद्धांस्त्रीपल्वलोदकं॥आयुःकामोनसेवेतरात्रौचदधिभोजनं॥३१॥नोत्संगेभक्षयेन्नाश्नन्मौलिंभूमिंचनस्पृशेत्॥क्वचिद्गच्छेन्नचोच्छिष्टःपश्येज्ज्योतींषिनाशुचिः॥३२॥ब्राह्मणोब्रह्मतीर्थेनत्रिरद्भिःसमुपस्पृशेत्॥कुर्वन्नाचमनंविष्णुमोंकारंचापिसंस्मरेत्॥३३॥हस्तद्वयस्थितैर्दर्भैस्समाचामेतियोद्विजः॥सोमपानफलंतस्यभुक्त्वायज्ञफलंलभेत्॥३४॥गृहेपिनिवसन्विप्रोमुनिर्मांसविवर्जिनात्॥मांसादोन्योपिमात्सस्यत्यागात्स्वर्गंव्रजेध्रुवं॥३५॥आत्मार्थंयःपशुंहन्यात्सोवश्यंनरकंव्रजेत्॥देवान्पितॄन्समभ्यर्च्यखादन्मांसंनदोषभाक्॥३६॥अनभिद्यापरस्वेषुसर्वसत्वेषुसौहृदं॥कर्मणांफलमस्तीतिमनसात्रितयंचरेत्॥३७॥प्राणातिपातःस्तैन्यंचपरदाराभिमर्षणं॥त्रीणिपापानिकायेननित्यशःपरिवर्जयेत्॥३८

असत्प्रलापःपारुष्यंपैशून्यमनृतंतथा॥चत्वारिवाचाराजेन्द्रनजल्पे
न्नैवचिंतयेत्॥३९॥अहिंसासत्यवचनंसर्वभूतानुकंपनं॥शमो
दानंयथाशक्तिर्गार्हस्थ्योधर्मउच्यते॥४०॥देवान्पितॄन्मनुष्यांश्च
भृत्यान्गृह्याश्चदेवताः॥भोजयित्वाततःपश्चाद्गृहस्थोभोक्तुमर्हति
॥४१॥वृक्षांछित्वामहींभित्त्वाहत्वाकीटपिपीलिकान्॥दत्वान्नंकार्षि
कोर्थिभ्यःसर्वपापैःप्रमुच्यते॥४२॥राज्ञोदत्वातुषड्भागंदेवतानांच
विंशतिं॥त्रिंशद्दत्वाचविप्राणांकार्षिकोनावसीदति॥४३॥चक्षुर्दद्या
न्मनोदद्याद्वाचंदद्याच्चसूनृतां॥उत्थायचासनंदद्यादेषधर्मःसना
तनः॥४४॥ग्रासादर्धमपिग्रासमर्थिभ्यःकिंनयच्छति॥इच्छानुरू
पोविभवःकदाकस्यभविष्यति॥४५॥तृणानिभूमिरुदकंवाक्चतु
र्थीचसूनृता॥सतामेतानिहर्म्येभ्योनोच्छिद्यंतेकदाचन॥४६॥उ
ष्णकालेजलंदद्याच्छीतकालेहुताशनं॥प्रावृट्कालेगृहंदेयंसर्व
कालेषुभोजनं॥४७॥अवृत्तिव्याधिशोकार्ताननुवर्तेतशक्तितः॥आ
त्मवत्सततंपश्येदपिकीटपिपीलिकाः॥४८॥गांपंकाद्ब्राह्मणींदास्या
द्वृत्तिलोपाद्द्विजंवधात्॥मोचयन्मुच्यतेजंतुःपापादामरणांतिकात्॥४९॥
नकश्चिदपिजानातिकिंकस्यश्वोभविष्यति॥अतःश्वःकरणीयानि
कुर्यादद्यैवबुद्धिमान्॥५०॥अनेनमर्त्यदेहेनयल्लोकद्वयशर्मदं॥वि
चिन्त्यतदनुष्ठेयंकर्महेयंततोन्यथा॥५१॥उपकारःपरोधर्मःपरार्थं
कर्मनैपुणं॥पात्रेदानंपरःकामःपरोमोक्षोवितृष्णता॥५२॥अंजन
स्यक्षयंदृष्ट्वावाल्मीकस्यतुसंचयं॥अवंध्यंदिवसंकुर्याद्दानाध्ययन
कर्मसु॥५३॥दीपोपशमनंपुंसांकूष्मांडच्छेदनंस्त्रियः॥अचिरेणैवका
लेनकुलच्छेदोभवेद्ध्रुवं॥५४॥अलाबुंवर्तुलाकारंवृंताकंकुंदसन्नि
भं॥प्राणांतेपिनचाश्नीयान्मसूरान्नंसवल्कलं॥५५॥परदारानगंतव्याः
सर्ववर्णेषुकर्हिचित्॥नहीदृशमनायुष्यंत्रिषुलोकेषुविद्यते॥५६॥
मात्रास्वस्रादुहित्राचनविविक्तासनोभवेत्॥बलवानिंद्रियग्रामोवि
द्वांसमपकर्षति॥५७॥प्रकीर्णकेशामनवेक्ष्यकारिणींसदाचभर्तुः
प्रतिकूलभाषिणीं॥परस्यवेश्माभिरतामपत्रपामेवंविधांयोषितमा

सुवर्जयेत्॥५८॥ हृताधिकारांमलिनांपिंडमात्रोपजीविनीं॥परिभूतामधःशय्यावासयेद्व्यभिचारिणीं॥५९॥ कुचैलिनंदंतमलापधारिणं बह्वाशिनंनिष्ठुरवाक्यभाषिणं॥सूर्योदयेचास्तमयेचशायिनंविमुंचतिश्रीरपिचक्रपाणिनं॥६०॥ एकच्छागंद्विरावेयं त्रिगवंपंचमाहिषं॥षडश्वंसप्तमातंगंशक्रस्यापिश्रियंहरेत्॥॥६१॥शिरःसुधौतंचरणौसुनिर्मलौवरांगनासेवनमल्पभोजनं॥अनग्नशायित्वमपर्वमैथुनंचिरप्रनष्टांश्रियमानयंतिषट्॥६२॥षष्ठीषुतैलंपललमष्टमीषुक्षौरंक्रियाचैवचतुर्दशीषु॥स्त्रीसेवनंनएकलासुपुंसामायुःस्वार्थस्तुनयोवदंति॥६३॥ स्नातुर्जनस्यदशमीतनयास्त्रयोदश्यर्थनिहंत्यभयमेतदपिद्वितीया॥सप्तम्यनिंदुनवमीषुचसंपदिच्छुःस्नायात्कदाचिदपिनामलकैर्मनुष्यः॥६४॥रोहिणीसहितमुत्तरात्रयंकीर्तयंतिमुनयोध्रुवाह्वयं॥बीजहर्म्यनगराभिषेचनारामशांनिषुहितंस्थिरेध्रुव॥६५॥रोहिणीषुकरपंचकेशिवभेउत्तरासुचपुनर्वसुद्वये॥रेवतीषुवसुदैवतेचभेनव्यवस्त्रपरिधानमिष्यते॥६६॥ रविर्नृपविलोकनेसुरगुरुर्विवाहो त्सवेरणेधरणिनंदनोभृगुसुतःप्रयाणेबली॥शनिस्तुमखदीक्षणेसकलशास्त्रबोधेबुधःशशीनिखिलकर्मसुध्रुवमुदाहृतःसूरिभिः॥॥६७॥ एतानिधर्मशास्त्रपुराणज्योतिःशास्त्रेभ्यः॥इति॰सदाचारः

अथधर्मविवृत्तिः

ऊर्ध्वबाहुर्विरौम्येषकश्चिन्नचशृणोतिमे॥धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यते॥१॥ यस्यधर्मविहीनस्यदिनान्यायांतियांतिच॥सलोहकारभस्त्रेवश्वसन्नपिनजीवति॥२॥परदारपरद्रोहपरद्रव्यपराङ्मुखः॥गंगाप्याहकदागत्यमामयंपावयिष्यति॥३॥उत्थायोत्थायबोद्धव्यंकिमद्यसुकृतंकृतं॥आयुषःखंडमादायरविरस्तंप्रयास्यति॥४॥केषामप्येते॥अजरामरवत्प्राज्ञोविद्यामर्थंचसाधयेत्॥गृहीतइवकेशेषुमृत्युनाधर्ममाचरेत्॥५॥श्रूयतांधर्मसर्वस्वंश्रुत्वाचैवावधार्यतां॥ आत्मनःप्रतिकूलानिपरेषांनसमाच

रेत्॥६॥एतौव्यासस्य॥परलोकहितंतातप्रातरुत्थायचिंतये
त्॥ईहतेकर्मणापूर्वोविपाकश्चिंतयिष्यति॥७॥मदालसायाः
॥श्रीदोधनार्थिनांधर्मःकामिनांसर्वकामदः॥धर्मोयथापवर्गेण
पारंपर्येणसाधकः॥८॥यज्ञाध्ययनदानानितपःसत्यंधृतिःक्ष
मा॥अलोभइतिमार्गोयंधर्मस्याष्टविधःस्मृतः॥९॥अनृशंसं
क्षमासत्यमहिंसादमआर्जवं॥प्रीतिःप्रसादोमाधुर्यमार्दवंच
यमादश॥१०॥भावशुद्धिर्मनुष्यैस्तुकर्तव्यासर्वकर्मसु॥अन्य
थाचुंब्यतेकांताभावेनदुहितान्यथा॥११॥कृत्वापिपातकंकर्म
योदद्यादन्नमर्थिने॥ब्राह्मणायविशेषेणनसपापेनलिप्यते॥१२
॥आश्मशानान्निवर्त्तंतेज्ञातयःसहबांधवैः॥त्वयापिनैवगंतव्यंत
त्कर्मसुकृतंकुरु॥१३॥केषामप्येते॥धर्मेरतिर्भवतुनःसततोच्छ्रि
तानांसत्येकएवपरलोकगतस्यबंधुः॥अर्थाःस्त्रियश्चमनुजैरिह
सेव्यमानानैवासभावमुपयांतिनचस्थिरत्वं॥१४॥कस्यापि॥या
वत्स्वस्थमिदंशरीरमरुजंयावज्जरादूरतोयावच्चेंद्रियशक्तिरप्र
तिहतायावत्क्षयोनायुषः॥आत्मश्रेयसितावदेवविदुषाकार्यःप्रय
त्नोमहान्प्रदीप्तेभवनेतुकूपखननेप्रत्युद्यमःकीदृशः॥१५॥भ
र्तृहरेः॥धर्माज्जन्मकुलेशरीरपटुतासौभाग्यमायुर्धनं धर्मेणै
वभवंतिनिर्मलयशोविद्यामहीसंपदः॥कांतारेषुमहावनेषुसत
तंधर्मःपरित्रायतेधर्मःसम्यगुपासितोभवतिहिस्वर्गापवर्गप्रदः
॥१६॥कस्यापि॥यन्नागामदभिन्नगंडकरटास्तिष्ठंतिनिद्रालवो
द्वारेहेमविभूषितास्तुरगाह्रेषंतियद्दर्पिताः॥वीणावेणुमृदंग
शंखपणवैःस्नानंचयद्बोध्यते तत्सर्वंसुरलोकराज्यसदृशंध
र्मस्यविस्फूर्जितं॥१७॥कस्यापि॥गंगोद्भेदेकुरुक्षेत्रेविश्रांतोमणिक
र्णिके॥वेण्यांगयायांमोंकारोस्नात्वादत्वासुखीभवेत्॥१८॥शर
णागतरक्षार्थंस्त्रीगोद्विजहितायच॥स्वाम्यर्थेयस्त्यजेत्प्राणां
स्तस्यलोकाःसनातनाः॥१९॥योनकामान्नसंरंतात्तद्वेषात्धर्ममुत
सृजेत्॥यथोक्तकारीसोम्यश्चससुखंमृत्युमिच्छति॥२०॥यत्तदा

नतपस्तीर्थसेविभिर्निर्जितेंद्रियः।।भौमेष्वंतरिक्षेषुस्वर्गेषुमनु
जोव्रजेत्।।२१।।वसंतिसुरलोकेषुनिजपुण्येनयेनराः।।विमानैर्वि
विधाकारैःसर्वकामसमृद्धिभिः।।२२।।तेभ्यश्चप्रच्युताराज्ञाम
न्येषांचमहात्मनां।।जायंतेस्फारिवनांगेहेमहस्तपरिपालकाः।।
।।२३।।गायंतिदेवाःकिलगीतकानिस्वर्गापवर्गस्यचहेतुभूताः।।
धन्यास्तुतेभारतभूमिभागेभवंतिभूयःकृतिनःसुखेन।।२४।।पु
नःकृत्वाद्भुतंकर्मपूर्वाभ्यासेनमानवाः।।सरलोकंप्रयांत्येवभा
ग्यवंतोजितेंद्रियाः।।२५।।परात्परंपरंयांतिनारायणपरायणाः
ननेतत्रगमिष्यंतियेद्विषंतिमहेश्वरं।।२६।।वासुदेवेमनोयस्य
जपहोमार्चनादिषु।।तस्यांतरायोविज्ञेयोदेवेंद्रत्वाधिकंफलं
।।२७।।गत्वागत्वानिवर्त्तंतेचंद्रसूर्यादयोग्रहाः।।अद्यापिननि
वर्त्तंतेद्वादशाक्षरचिंतकाः।।२८।।षडक्षरेणमंत्रेणपुष्पमेकम
पिस्वयं।।लिंगस्यमूर्ध्नियोदद्यात्सभूयोपिनजायते।।।।२९।।उपो
ष्यैकादशीःसर्वास्तथाकृष्णचतुर्दशीः।।ध्यात्वाहरिहरंदेवंप्रा
प्नोतिपरमंपदं।।३०।।एतेपुराणेभ्यः।।मोहादवाचीमबुधाःप्र
तीचींप्राचीमुदीचीमपिपर्यटंति।।संच्छिन्नयेमानसएवतीर्थेस्व
च्छेसुखंस्नातुमपारयंतः।।३१।।इतिश्री०धर्मनिवृत्तिपरिच्छेदः।

अथपातकविवृत्तिः

कथंतेस्युस्तुसहंताःस्फुरखरास्त्रिषुशेरते।।मरणांतरितायेषांनर
केषूपपत्तयः।।१।।कतिपयदिनपरमायुषिमदकारिणियौवनेदुरा
त्मनः।।विदधतितथापराधंजन्मैवयथावृथाभवति।।२।।श्रीधन
देवानांयद्वैरूप्यमनाथताविकलतानीचेकुलेजन्मनादारिद्र्यंस्व
जनाच्चपरिभवोमौर्ख्यंपरप्रेष्यता।।तृष्णालौल्यमनिर्वृतिःकु
शासनंकुस्त्रीकुभोज्यंरुजःसर्वंपापमहीरुहस्यमहतोव्यक्तंफ
लेहस्यते।।३।।कस्यापि।।व्याधिर्वित्तविनाशःप्रियविरहाद्दुर्भगत्व
मुद्वेगः।।सर्वत्राशाभंगःस्फुटंभवत्यकृतपुण्यस्य।।४।।कस्यापि।।
त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिःपक्षैस्त्रिभिर्दिनैः।।अत्युग्रपुण्य

पापानामिहैवफलमश्नुते॥५॥ मित्रद्रोहःकृतघ्नस्यस्त्रीघ्नस्य
पिशुनस्यच॥ चतुर्णामपिचैतेषांनिःकृतिंनैवशुश्रुमः॥६॥ब्रह्म
हत्यासुरापानंस्तेयंचगुरुतल्पगः॥ महांतिपातकान्याहुस्तत्संस
र्गीचपंचमः॥७॥ अकृतज्ञमकार्यंचदीर्घरोषमनार्जवं॥ चतुरो
विद्धिचांडालान्जन्मनास हपंचमः॥८॥ ब्रह्मघ्नेचसुरापेचचौरे
भग्नव्रतेतथा॥ निःकृतिर्विहितालोकेकृतघ्नेनास्तिनिष्कृतिः॥९॥
धर्मशास्त्रेभ्यःऋतुस्नातांचयोभार्यांनैवगच्छतिमूढधीः॥ घोरा
यांब्रह्महत्यायांयुज्यतेनात्रसंशः॥१० अदुष्टांपतिनोभार्यांमूढो
यस्तुपरित्यजेत्॥ सप्तजन्मानिसस्त्रीत्वंलभतेनात्रसंशयः॥११॥
कूटसाक्षीमृषावादीयश्चासदनुशास्तिवै॥ तेमोहमृत्यवःसर्वेत
थायेवेदनिंदकाः॥१२॥ रौरवंकूटसाक्षीतुयातियश्चानृतोनरः॥ कुं
भीपाकंप्रयांत्येवमानवा गुरुतल्पगाः॥१३॥ मार्कंडेयात्॥ स्त्री
बालस्वामिमित्रघ्नोगोघ्नविश्वासघातिनः॥ सुरापोब्रह्महाचौरो
यांत्येतेसर्वनारकान्॥१४॥ असत्प्रतिगृह्णीताच्चनरकोयात्यधो
मुखे॥ एकोमिष्टान्नभुग्यःसयातिपूयवहन्नरः॥१५॥ आगारदा
हीमित्रघ्नःशाकुनिग्रामयाजकः॥ रुधिरांधेपतंत्येतेसोमविक्रयि
णश्चये॥१६॥ मधुहाग्रामहंताचयातिवैतरणींनरः॥ असिपत्रव
नंयातिद्र्पाहननिकृं तनः॥१७॥ मृगच्छागादिहंताचवह्निज्वा
लेनिपात्यते॥ व्रतलोपाश्रमभ्रष्टोयातिसंदंशनारके॥१८॥ कृत
पापेनुतापोवैयस्यपुंसःप्रजायते॥ प्रायश्चित्तंतुतस्यैकंहरिसंस्म
रणंपरं॥१९॥ एतेविष्णुपुराणात्॥ नरकेभ्यःसमुत्तीर्णःपापीतिर्य
क्त्वमश्नुते॥ तरुकीटपतंगेषुश्वापदैकशफादिषु॥२०॥ मानुष्यंप्रा
प्यकुब्जोवाकुत्सितोवामनोथवा॥ म्लेच्छचांडालशूद्रेषुवैश्यक्ष
त्रेषुजायते॥२१॥ शारीरैःकर्मदोषैश्चयातिस्थावरतांनरः॥ वा
चिकैःपक्षिमृगतांमानसैरंत्यजातितां॥२२॥ पतितात्प्रतिगृह्या
थखरयोनिंव्रजेद्द्विजः॥ शिष्योगुरुस्त्रियंगत्वाश्वयोनौसंप्रपद्यते
॥२३॥ गर्दभोजायतेजंतुःपित्रोश्चाप्यवमानकः॥ मातापितरमा

क्रुष्यसारिकासंप्रजायते॥२४॥भर्तृपिंडंसमश्नन्यस्तदुष्टानि
निषेवते।।सोपिमोहसमापन्नोजायतेवानरोनरः॥२५॥न्यासाप
हर्तानरकाद्विमुक्तोजायतेकृमिः।।असूयकश्चनरकान्मुक्तोभव
तिलावकः॥२६॥विश्वासहंताचनरोमीनयोनिंप्रपद्यते।।अन्ना
पहारीचनरोमूषकःसंप्रजायते॥२७॥परदाराभिमर्षाच्चवृको॰
घोरोपिजायते।।गुरोःसख्युस्तथाराज्ञोभर्तुर्भार्यामुपेयिवान्॥
॥२८॥श्वसृगालवृकोलूकव्यालसूकरतांलभेत्।।देवतातिथि
विप्राणामदत्वायोन्नमश्नुते॥२९॥प्रमुक्तोनरकात्सोपिवायसः
संप्रजायते॥ज्येष्ठंपितृसमंवापिभ्रातरंयोवमन्यते॥३०॥नरका
त्सोपिविभ्रष्टःक्रौंचयोनौप्रपद्यते॥शूद्रश्चब्राह्मणींगत्वाकृमियो
निंप्रपद्यते॥३१॥तस्यामपत्यमुत्पाद्यकाष्ठांतःकीटकोभवेत्॥
अशस्त्रंपुरुषंहत्वानरःसंजायतेखरः॥३२॥कृमिःस्त्रीवधक
र्ताचबालहंताचजायते॥हतेकांस्येतुहारीतःकपोतोरोप्यभाजने
॥३३॥हत्वातुकांचनंभांडंकृमियोनौप्रपद्यते॥मयूरोवर्णकान्हृत्वा
हृतेचैवांशुकेशुकः॥३४॥छुछुंदरिःशुभागंधान्त्वंगेहत्वाशशोभ
वेत्॥भूनारीकांचनगवांहत्वागत्वाचनारकात्॥३५॥तृणगु
ल्मलतावल्लीत्वक्सारतनुतांलभेत्॥ ॥मार्कंडेयपुराणात्॥
॥सर्वपातनसंघातकस्सदावानलोपरं॥गोविंदनामकथनंगंगास्ना
नंचमेमतं॥३६॥मुकुंददामोदरवासुदेवश्रीकांतचक्रायुध
कृष्णविष्णो।।गोविंदनारायणपद्मनाभत्रिविक्रमानंतहरेनम॰
स्ते॥३७॥शार्ङ्गधरस्य॥नटस्यमुहूर्तंवाशिशीतमुष्णमथापिवा
॥गांगंपयःपुनात्येवपापादामरणांतिकात्॥३८॥कस्यापि॥त्य
जदुर्जनसंसर्गंभजसाधुसमागमं॥पुण्यंकुरुदिवारात्रंस्मरनि
त्यमनित्यतां॥३९॥कस्यापि॥स्वपुरुषमभिसमीक्ष्यपाशहस्तं
वदतियमःकिलतस्यकर्णमूले॥परिहरमधुसूदनप्रपन्नान्प्र
भुरहमन्यनृणांनवैष्णवानां॥४०॥श्रीविष्णुपुराणात्॥श्यामदूर्वा
दलश्यामंपद्माक्षंपीतवाससं॥स्तुवंतिनामभिर्दिव्यैर्नतेसंसारिणोनराः

॥४१॥ पद्मपुराणात्॥ इति॰ वृ॰ शा॰प॰ पातकवृत्तिःपरिच्छेदः॥

॥ अथ खेचरभूचरेषु पूर्वं सूर्यान्योक्तयः

रवेरेवोदयः श्लाघ्यः कोऽन्येषामुदयग्रहः॥ न तमांसि न तेजांसि य
स्मिन्नभ्युदिते सति॥१॥ खद्योतो द्योतते तावद्यावन्नोदयते शशी
॥उदिते तु सहस्रांशौ न खद्योतो न चंद्रमाः॥२॥ तस्यैवाभ्युदयो
भूयात् भानोर्यस्योदये सति॥ विकासभाजो जायंते गुणिनः कम
लाकरः॥३॥ केषामप्येते॥ देवो हरिर्वहतु वक्षसि कौस्तुभं तमने
वकांचनपुनर्द्युमणेः प्रतिष्ठा॥ यत्पादसंगतितरंगितसौरभा
णि धत्ते स एव शिरसा सरसीरुहाणि॥४॥ महादेवस्य॥ उद्यंत्व
मूनि सुबहूनि महामहांसि चंद्रोऽप्यलं भुवनमंडलमंडनाय॥ सू
र्ये हते न तदुदेति न चास्तमेति येनादितेन दिनमस्तमिते च रात्रिः
॥५॥ करान्प्रसार्य रविणा दक्षिणाशावलंबिना॥ न केवलमनेना
त्मा दिवसोऽपि लघूकृतः॥६॥ निमीलनाय पद्मानामुदयायाल्पते
जसां॥ तमसामवकाशाय व्रजत्यस्तमसौ रविः॥७॥ येनोन्मथ्यत
मांसि मांसलघनस्पर्धानि सर्वंजगच्चक्षुष्मत्सरमार्यतः कृतमिदं
देवेन तिर्यक्त्विषा॥ तस्मिन्नस्तमिते विवस्वति कियान्क्रूरो जनो
दुर्जनो यद्भाति धृतिं शशांकशकलालोके प्रदीपेथवा॥८॥ केषा
मप्येते॥ पातः पूष्णो भवति महते नोपतापाय यस्मात्काले नास्तं क
इह न गता यांति यास्यंति चान्ये॥ एतावत्तु व्यथयति यदा लोकबा
ह्यैस्तमोभिस्तस्मिन्नेव प्रकृतिमहति व्योम्नि लब्धोऽवकाशः॥९॥ग
ते त स्मिन् भानौ त्रिभुवनसमुन्मेषविरहव्यथां चंद्रो नेष्यत्यनुचि
तमितो नास्ति किमिति॥ इदं चेतस्तापं जनयतितरामत्रयदमी प्र
दीपाः संजातास्तिमिरहतबुद्धोद्धुरशिखाः॥१०॥ मल्लभट्टस्यैतौ॥
यत्पादाः शिरसा न केनविधृताः पृथ्वीभृतां मध्यगास्तस्मिन् भास्व
ति राहुणा कवलिते लोकत्रये चक्षुषि॥ खद्योतैः स्फुरितं तमोभिरु
दितं ताराभिरुज्जृंभितं धूकैरुत्थितमाः किमत्र करवैः किं केन नो चे
ष्टितं॥११॥ परिमलस्य॥ करस्फोटोऽम्बरत्याग स्तेजोहानिः सरागता॥

वारुणीसंगताऽवस्था भानुनाऽप्यनुभूयते॥१२॥ पूर्वाण्हे प्रतिबोध्य पंकजवनान्युत्सार्य नैशं तमः कृत्वा चंद्रमसं प्रकाशरहितं निस्तेजसं तेजसा॥ मध्यान्हे सरितां पयः प्रविततैरापीय दीप्तैः करैः सायान्हे रविरस्तमेति विवशः किं नाम शोच्यं भवेत्॥१३॥ क्षपां क्षामीकृत्य प्रसभमुपहृत्याऽम्बु सरितां प्रताप्योर्वीं कृत्स्नां तरुगहनमुच्छोष्य सकलं॥ क्व संप्रत्युष्णांशुर्गत इति तदन्वेषणपरास्तडिद्दीपाऽलोकैर्दिशि दिशि चरंतीह जलदाः॥१४॥ धुनोति ध्वांतानि व्यपनयति नीहारपटलं कुलं राजीवानां दलयति रथांगं रमयति॥ जगद्व्यापी देवः सुखयति जनानां च नयनं न याति स्थेमानं यदि तदिह दैवं जयतु कः॥१५॥ पततु नभसो गच्छत्वस्तं निमज्जतु वारिधौ व्रजतु वरुणागारद्वारं प्रभाभिरनादृतः॥ तदपि तरणिर्दत्वा पादं शिरस्सु महीभृतां दलिततिमिरव्रातः प्रातः पुनः सकृदेष्यति॥१६॥ ॥इति श्रीबृहत् शार्ङ्गधरविरचितायां पद्धत्यां सूर्यान्योक्तयः परिच्छेदः॥॥

अथ चन्द्रान्योक्तयः

आलोकवंतः संत्येव भूयांसो भास्करादयः॥ कलावानेव तु ग्रावद्रावकर्मणि कर्मठः॥१॥ प्रल्हादनस्य॥ दैवाद्यद्यपि तुल्योऽभूद्भूतेशस्य परिग्रहः॥ तथापि किं कपालानि तुलां यांति कलानिधेः॥२॥ भवभूतेः॥ अहो नक्षत्रराजस्य साभिमानिविचेष्टितं॥ परिक्षीणस्य वक्रत्वं संपूर्णस्य सुवृत्तिता॥३॥ हरमुकुटे सुरतटिनीनिकटस्थितिलोभतो द्विजेंद्रेण॥ अपि गरलं फणिभृत्कृत्तिरीक्षणतीक्ष्णांशुशु क्षणिक्षांतः॥४॥ निजकरनिकरसमृध्या धवलय भुवनानि पर्वणि शशांकः॥ सुचिरं हेतिन सहते हतविधिरिह हरिह सुस्थितं कमपि॥५॥ उडुगणपरिवारो नायकोऽप्यौषधीनाममृतमयशरीरः कांतियुक्तोऽपि चन्द्रः॥ भवति विकलरश्मिर्मंडलं प्राप्य भानोः परसदननिविष्टः को लघुत्वं न याति॥६॥ कस्यापि॥ प्रथमदिवसचंद्रः सर्वलोकैकवंद्यः स तु सकलकलाभिः पूर्णबिंबोऽपि नार्हः॥ अतिपरिचयदोषः कस्य नो हंति मा

नंनवनवगुणरागीप्रायशः सर्वलोकः॥७॥शिरसाधार्यमाणोपि सोमःसौम्येनशंभुना॥तथापिकृशतांधत्ते कष्टः खलुपराश्रयः॥ ॥८॥ व्यज्यमानकलंकस्य वृद्धौवृद्धौकलानिधेः॥ आशास्महेवयंपूर्वांसर्वश्लाघ्यांकृशांदशां॥९॥ केषामप्येते॥नयनमसिजनार्द्दनस्यशंभोर्मुकुटमणिःसुहृदांत्वमादिदेवः॥त्यजसिनमृगमात्रमेकमिंदोविरमतियेनकलंककिंवदंति॥१०॥उमापतिधरस्य ॥यद्यपिशिरोधिरोहतिरौद्रःक्रोधेनसिंहिकातनयः॥त्यजतिनशरणयातंसागरसूनुर्मृगंतदपि॥११॥श्रीमदनस्य॥क्षीणःक्षीणःसमीपत्वपूर्णःपूर्णोतिदूरतां॥उपैतिमित्राद्यश्चंद्रोयुक्तंतन्मलिनात्मनः॥१२॥यज्जातोसिपयोनिधौहरजटाजूटेप्रसिद्धोसियद्विश्वस्योदरदीपकोसिविधिनासृष्टोसियच्चामृतैः॥भ्रातःशीतमयूखसर्वमधुनाम्लानीकृतंतत्त्वयाराजीवंयदपास्यकैरवकुलंनीतंविकाशास्पदं॥१३॥लब्धंजन्मसहश्रियास्वयमपित्रैलोक्यभूषाकरःस्थित्यर्थंपरमेश्वरोभ्युपगतस्तेनापिमूर्ध्नाधृतः॥वृद्धिंशीतकरस्तथापिनगतःक्षीणःपरंप्रत्युतप्रायःप्राक्तनमेवकर्मबलवत्कःकस्यकर्तुंक्षमः॥१४॥केषामप्येते॥पादन्यासक्षितिधरगुरोर्मूर्ध्निकृत्वासुमेरोःक्रांतंयेनक्षपिततमसामध्यमंधामविष्णोः॥सोयंचन्द्रःपततिगगनादल्पशेषैर्मयूखै र्दूरारोहोभवतिमहतामप्यपभ्रंशहेतुः॥१५॥ कालिदासस्य॥ पीयूषंवपुषोस्यहेतुरुदयोविश्वस्यनेत्रोत्सवःपुष्टंभानुकरैरिदंत्रिभुवनंज्योत्स्नाभरैःसिंचति॥सर्वाशाप्रतिरोधकांधतमसध्वंसायबद्धोद्यमेधिक्धातारमिहापिलक्ष्मलिखितुंयस्यप्रवृत्तंमनः॥१६॥कस्यापि॥निरर्थकंजन्मगतंनलिन्याययानदृष्टंतुहिनांशुबिंबं॥उत्पत्तिरिंदोरपिनिःफलैवदृष्टावनिद्रानलिनीनयेन॥१७॥ कस्यापि॥विरमतिमिरसाहसादमुष्माद्यदिरविरस्तमितःसतस्ततःकिं॥कलयसिनपुरोमहोर्मिधाराद्युतिनिधिरभ्युदयायसयेशशांकः॥१८॥बल्लालसेनस्य॥उच्चैःस्थानकृतोदयैर्बहुविधैर्ज्योतिर्भिरुद्यत्प्रभैर्मुक्ताद्यैःकिमरीभिरत्र

वितथंप्रौढिंदधानैरपि॥यावल्लोकतमोपहेनभवतालक्ष्मीर्नविस्ती
र्यतेतावच्चंद्रकथंप्रयातिपरमोवृद्धिंसरत्नाकरः॥१८॥त्रिलोचनऽ
हासस्य॥नक्षत्राणिबहूनिसंतिपरितःपूर्णोदयान्यंबरेकिंतैःशांतिमु
पैतिदीर्घतिमिरंकिंवाधिरुज्जृंभते॥किंस्याद्वातेचकोरपारणविधिर्भ्रा
तःसुधादीधितेतन्नूनंभवनैकतापशमनःश्लाघ्यस्तवैवोदयः॥१९॥
निष्पीडितोयद्यपिदैवयोगान्निशाकरश्चाऽपिविधुंतुदेन॥तथाऽपि
पीयूषविशेषवर्षीसुधाकरःकैरवकाननेषु॥२०॥ वक्रोऽस्तुबाल्येत
दनुप्ररूढःकलंकवानस्तुजडोऽस्तुचंद्रः॥महेशमौलौन्वपदंदधातुजा
येतवंद्योविविधोपकारात्॥२१॥ तारागणाश्चंद्रमसंभजंते नजातुऽ
नाथंनलिनाऽऽकराणां॥एनावतातस्यकिमस्तिहानिर्ज्ञातातयोरंतरमे
षलोकः॥२२॥किंमत्रेर्नोपुत्रःकिमुनहरचूडामणिरसौनकिंहंतिध्वांतं
जगदुपरिकिंवानवसति॥यदेतस्यांतःस्थाविलसतिलघुर्लस्यकणि
काविधातुर्दोषोऽयंनतुगुणनिधेस्तस्यकिमपि॥२३॥ मारस्यमिऽ
त्रमसिकिंचसुधामयूखशंभावपिप्रणयितांप्रकटीकरोषि॥विश्वा
सपात्रमसियद्द्विषतोस्तयोरप्येतत्तवप्रकृतिशुद्धतनोश्चरित्रं॥२४
यस्योदयेनैवदिशांप्रसादस्तापाऽपनोदोऽपिजगत्त्रयस्य॥चकोरचं
चूपुटपारणेतुचंद्रस्यतस्याऽस्तिकियान्प्रयासः॥२५॥ध्माताफाऽ
लतलाऽनलैःकवलिताकंठस्थहालाहलैरालीढाऽथजटाऽटवीविऽ
लुठितैराशीविषाणांगणैः॥छन्नाभस्मभिराहताऽस्थिपटलैःक्लिन्नाऽ
द्रवमांबरैःस्वीयांमुंचतिमाधुरींहरशिरोरत्नंकिमिंदोःकला॥२६॥ततः
कुमुदनाथेनकामिनीगंडपांडुना॥नेत्राऽऽनंदेनचन्द्रेणमाहेंद्रीदिगलं
कृता॥२७॥पश्योदेतिवियोगिनीदिनमणिश्चंडीशचूडामणिस्तारा
मौक्तिकहारनायकमणिःशृंगाररक्षामणिः॥प्रौढाऽनंगभुजंगमस्त
कमणिःकंदर्पसीमंतिनी कांचीमध्यमणिश्चकोरपरिषच्चिंतामणिऽ
श्चंद्रमाः॥२८॥ आकाशवापीसितपुंडरीकंशाणोपलंमन्मथसाय
कानां॥पश्योदितंसादरमायताक्षिसंध्यांऽगनाकंदुकमिंदुबिंबं॥२९॥
ॐकारोमदनद्विजस्यगगनक्रीडैकदंष्ट्रांऽकुरस्तारामौक्तिकशक्तिरंध

न्नमसस्त्वंवैरमस्यांऽकुशः॥शृंगाराऽर्गलकुंचिकाविरहिणीमर्मच्छि
दाकर्त्तरीसायंवारवधूनखक्षतमियंचांद्रीकलाराजते॥३०॥कृष्ण
वर्णंहृदयेसितदीप्तिंदुर्धियःकिलकलंकिनमाहुः॥कृष्णवर्णसमु
दीरणमात्रादेवपङ्कलतिदृश्यकलंकः॥३१॥कलानिधिरवेरयंसमु
पलभ्यरूपंस्वयंदिनांऽतसमयेऽस्पृशत्समदिपद्मिनींरागवान्॥
धवाऽन्यकरसंगमान्मुकुलितेतिपूर्वाऽकृतिंसमीक्ष्यजहृसुःप्रिया
ध्रुवमभूदतःपांडुरः॥३२॥नयनमसिनार्दनस्यशंभोर्मुकुटमणि:
सुहृशांत्वमादिदेवः॥त्यजसिनमृगमात्रमेकमिंदोचिरमिहयेनक
लंकिनंवदंति॥३३॥वरमेकाकलारम्याययाऽधःक्रियतेभवः॥व
ह्वीभिरपिकिंताभिःकलेकोयासुदृश्यते॥३४॥शुक्लेपक्षेशीतरश्मि
र्बलीयान्नप्राधान्यंतारकायास्तदृष्टं॥शक्त्यायुक्तेविद्यमानेऽपि
कांतेनप्राधान्यंयोषितांक्काऽपिदृष्टं॥३५॥आस्तेविधुःपरमनिर्वृत
एवमौलौशंभोरितित्रिजगतीजनचित्तवृत्तिः॥अंतर्निगूढनयना
नलदाहदुःखंजानातिकःपरमृतेबतशीतरश्मेः॥३६॥दोषाकरोऽपि
कुटिलोऽपिकलंकितोऽपिमित्राऽवसानसमयेविहितोदयोऽपि॥चंद्र
स्तथाऽपिहरवल्लभतामुपैतिनैवाऽऽश्रितेषुमहतांगुणदोषशंका॥
॥३७॥आननानिहरिणीनयनानामद्भुतानिचसमीक्ष्यजगत्यां॥
लज्जयैवघनमंडललीनोमंदमंदमहहेंदुरुदेति॥३८॥वीथीषुवी
थीषुविलासिनीनांमुखानिसंवीक्ष्यशुचिस्मितानि॥जालेषुजालेषु
करंप्रसार्यलावण्यभिक्षामटतीवचंद्रः॥३९॥एकैवसाऽमृतमयी
सुनरामनर्घ्याकाप्यस्त्यसौहिमकरस्यकलायथैव॥आरोपितोगु
णविदापरमेश्वरेणचूडामणौनगणितोऽस्यकलंकदोषः॥४०॥श्रे
यान्विधोर्बहुलपक्षपरिक्षयोऽपिनोपूर्णताऽपिजलधेरिहवर्णनीया॥
याह्वारिनस्पृशतिहंतपृथक्जनोऽपियस्यामृतैर्मखभुजोऽपिमुदंलभं
ते॥४१॥जन्मक्षीरमहार्णवेसहभुवःश्रीपारिजातादयोबिंबंयस्यसु
धामयंत्रिभुवनाधीशस्यमूर्ध्निस्थितिः॥इत्थंसर्वचराचरप्रियकरे
यस्योदयेचेद्भवेत्संकोचःकमलस्यदुष्कृतिरसौनिंद्योनताराधिपः॥

द्वंद्वंनिंदतुनामवायनलिनीनिंदंतुचक्राह्वयानैवानेनसुधाकरस्य
रूपमाहानिर्नवादुर्यशः॥एतेनैवकृतार्थतास्यजनतायन्मोदमालं
बतेयज्ज्योत्स्नासुचिरंचकोरपरिषच्चंचूपुटंन्यस्यति ॥४२॥निधेः
कलानामपिरीतिरेषामर्माणिमेसंस्पृशतीवभूयः॥कुतोविशेषा
त्कुमुदेनुरागःकुतोविरागश्चकुशेशयेषु॥४३॥ लक्ष्मीकेलिगृ
हेकुशेशयदृशांपाणिद्युतिद्रोहिणिश्यामासूक्तिसुधासहोदरमधुप्र
स्यंदसंदोहिनि॥जीवातुस्त्रिदिवौकसांत्रिजगतामाप्यायनंचंद्रमा
स्त्वंचेदंबुरुहेनरज्यसिगुणश्लाघावतास्तंगता॥४४॥ यातेयंरज
नीसहैवभवताभावीप्रकाशोदिशांसूर्येणापिचिरंचकोरनिचयैःस्थे
यंक्वचित्कानने॥उद्यद्दारुणचंडभानुजदलज्ज्वालेजगन्मंडलेकस्मै
चंद्रसमर्प्यकैरवकुलंव्योमांतमालंबसे॥४५॥ इतिश्रीवृहत्शा
र्ङ्गधरविरचितायांपद्धतौचन्द्रान्योक्तिपरिच्छेदः॥ ७॥ ७॥

अथमेघान्योक्तयः

एकस्यतस्यमन्येधन्यामभ्युन्नतिंजलधरस्य॥विश्वंसशैलका
ननमाननमवलोकतेयस्य॥१॥प्रल्हादनस्य॥संप्रतिनकल्पतर
वोनसिद्धयोनापिदेवतावरदाः॥जलदत्वयिविश्राम्यतिस्तृष्टिरियं
भुवनलोकस्य॥२॥वस्तुपालस्य॥क्षणदृष्टनष्टतडितोनिजसंपत्तेः
पयोदनिवहेन॥ज्ञातुंसाधुयदुचितंभुवनेभ्योवितरतावारि॥३॥क
स्यापि॥प्रावृषेण्यस्यमालिन्यंदोषकोभीष्टवर्षिणः॥शारदभ्रस्यशुभ्र
त्वंवदकुत्रापियुज्यते॥४॥जलधरजलभरनिकरैरपहरपरितापमु
द्धतंजगतः॥नोचेदपसरदूरंहिमकरकरदर्शनेवितर॥५॥चंद्रकवेः
॥चातकःस्वानुमानेनजलंप्रार्थयतेंबुदात्॥सस्त्वौदार्यतयासर्वांप्ला
वयत्यंबुनामहीं॥६॥शैलेयेषुशिलातलेषुचगिरेःशृंगेषुगर्तेषुच
श्रीखंडेषुविभीतकेषुचतथापूर्णेषुरिक्तेषुच॥स्निग्धेनध्वनिनाखि
लेषुजगतीचक्रेसमंवर्षतोवंदेवारिदसार्वभौमभवतोविश्वोपकारि
व्रतं॥७॥कस्यापि॥नीहाराकरसारसागरसरित्कासारनीरश्रियं
त्यक्त्वातोयदचातकेनमहतीयेवासमालंबिता॥तस्यैतत्कलितंस

मुञ्चसिशिलासंताडनंमस्तकेगाढंगर्जसिवज्रमुज्झसितडित्खेलाभिसंतर्जसि॥८॥कस्यापि॥क्षुद्राःसंतिसहस्रशःस्वभरणव्यापारमात्रोद्यतास्वार्थोयस्यपरार्थएवसपुमानेकःसतामग्रणीः॥दुःपूरोदरपूरणायपिबतिस्रोतःपतिंवाडवोजीमूतस्तुनिदाघसंभृतिजगत्संतापविछित्तये॥९॥ कस्यापि॥ अन्योपिचंदनतरुर्महनीयमूर्तेःसेकार्थमुत्सहतितद्गुणवृद्धतृष्णः॥ग्रावोटकस्यपुनरस्यमहाशयोयमंभो दएवशरणंयदिनिर्गुणस्य॥१०॥ कस्यापि॥ अयेहेलावेलातुलितकुलशैलेजलनिधौकृतोवारामोघंवतजलदमोघंवितरसि॥ समंतादुत्तालज्वलदनलकीलःकवलनक्लमोपेतानेतानुपचरपयोभिर्विटपिनः॥११॥ विल्हणस्य॥ मार्गोभूरिमरुज्जलंस्थलभुविस्वप्नेपिनोलभ्यतेतीव्रोवातिसमीरणःक्वचिदपिच्छायाभृतोनद्रुमाः॥अंगारप्रक रान्किरन्नपिरविर्ग्रीष्मेतपस्यंबरेतद्भोःपांथहितायपूरयधरांपाथोदपाथोभरैः॥१२॥ शार्ङ्गधरस्य॥भेकैःकोटरशायिभिर्मृतमिवक्ष्मांतर्गतंकच्छपैःपाठीनैःपृथुपंकपीठलुलितैर्यस्मिन्मुहुर्मूर्छितं॥तस्मिन्शुष्कसरस्यकालजलदेनोन्नस्यतत्तत्कृतंयेनांतर्विनिमग्नवन्यकरिणांयूथैःपयःपीयते॥१३॥अकालजलदस्य॥आश्वास्यपर्वतकुलंतपनोष्मतप्तंदुर्दाववह्निविधुराणिचकाननानि॥ नानानदीनदशतानिचपूरयित्वारिक्तोसियज्जलदसैवतवोत्तमाश्रीः॥१४॥ अपिजलदयदिनदास्यसिकतिचित्त्वंचातकायजलकणिकां॥तदियमचिरेणभवितासलिलांजलिदानयोग्यस्ते॥१५॥विलपतितथास्तारंगोयंभवानयमुन्नतोजलमपिचतेसंयोगोयंकथंचिदुपस्थितः॥उपकुरुकुरुप्रह्वंचेतोनवेत्सियदग्रतोजलधरपुनःक्वत्वंक्वायंक्वतेजलबिंदवः॥१६॥ त्वयिवर्षतिपर्जन्येसर्वेपल्लविताद्रुमाः॥ अस्माकमर्कवृक्षाणांपूर्वपत्रेषुसंशयः॥॥१७॥ त्वमेवचातकाधारइतिकेषांनगोचरः॥धिगंभोधरतस्यापिकार्पण्योक्तिंप्रतीक्षसे॥१८॥केषामप्येतौ॥एतदत्रपथिकैकजीवितंपश्यशुष्यतितरांमहत्सरः॥धिङ्मुधांबुधररुद्धसन्ततिर्वर्द्धिताकि

मिति होद्वाहिनी ॥१९॥ सकाशातर्षस्य ॥ असुं कालक्षेपं त्यज जलद्गंभीरमधुरैः किमेभिर्निर्घोषैः सृजझटिति झांकारिसलिलं ॥ अये पश्यावस्थामकरुणसमीरव्यतिकरज्वलद्दावज्वालावलिजटिलमूर्त्तैर्विटपिनः ॥२०॥ अचलस्य ॥ शोषंगते सरसि शैवलमंजरीणामंतस्तिमिर्लुठति तापविशीर्णदेहः ॥ अस्मांतरे यदि न वारिद वारिपूरैरप्लावयेस्तदनु किं मृतमंडनेन ॥२१॥ कालातिक्रमणं कुरुष्व तडितां विस्फूर्जितैस्त्रासय स्फारैर्भीषय गर्जितैरतितरां कार्श्यमुखे दर्शय ॥ अस्यानन्यगतेः पयोद मनसो जिज्ञासया चातकस्याधेहि त्वमिहाविलंतदपि न त्वत्तः परं याचते ॥२२॥ भूयो गर्जितमंबुद्मकटिलाविद्युत्त्वमापूरितं दूरावग्रह तिष्ठ तिष्ठ तदलं हृस्यात वातः परं ॥ निर्दग्धाखिलशालिहालिकवधूसन्न्यस्तनेत्रैः परं नैराश्यादिह वर्षितव्यमधुना केदारपूरं पयः ॥२३॥ नैतान्स्वयमुपभोक्ष्यसि जलदो खरादिषु क्वापि ॥ तत्किं तत्र न मुंचसि मुक्ता भवंति यत्रापः ॥ २४ ॥ यदंबुकणमादाय प्राप्तोसि जलदोन्नतिं ॥ तस्योपर्यंबुधेर्गर्जन् मलिनस्योचितेवते ॥२५॥ केषामप्येतौ ॥ वरतरुविघटनपटवः कटवश्चुंबंति वायवो बहवः ॥ सत्कुसुमबहुलपरिमलगुणविन्यासे कुतीत्वेकः ॥२६॥ आपो विमुक्ताः क्वचिदापएव क्वचिन्न किंचिद्गरलं क्वचिच्च ॥ यस्मिन्विमुक्ताः प्रभवंति मुक्ताः पयोद तस्मिन् विमुखः कुतस्त्वं ॥२७॥ केषामप्येतौ ॥ गर्जन्नंबु ददाति तच्च कणिकारूपेण यत्र क्वचित् वर्षाकालमपेक्ष्य दानसमये कार्पण्यं विधत्ते मुखे ॥ पश्चात्पांडुरतामुपैति लघुनामप्येति भूयस्ततः श्रीमद्राम नृपालशेखर विभो दाता कियान्वारिदः ॥२८॥ मुंच मुंच सलिलं दयानिधे नाऽस्ति नाऽस्ति समयो विलंबने ॥ अद्य चातककुले मृते पुनर्वारि वारिधर किं करिष्यसि ॥२९॥ वितर वारिद वारिदातुरे चिरपिपासित चातकपोतके ॥ प्रचलिते मरुति क्षणमन्यथा क्व च भवान् क्व पयः क्व च चातकः ॥३०॥ आसन्यावंति पात्रआसन्चातकाऽमूर्णिचांऽबुद ॥ तावंतोऽपि त्वया मेघ न मुक्ता वारिविंदवः ॥३१॥ दवदहनजटालज्वालजालाऽऽहतानां परिगलितलता

नांम्लायतांभूरुहाणां॥अयिजलधरशैलश्रेणिशृंगेषुतोयंवितरसिब
हुकोयंश्रीमदस्तावकीनः॥३२॥शृण्वन्पुरःपरुषगर्जितमस्यहंत
रेपांथविक्लवमनानमनागपिस्याः॥विश्वार्तिवारणसमर्पितजीव
नोऽयंनाऽकर्णितःकिमुसखेभवतांऽबुवाहः॥३३॥नोपेक्षानचद
क्षिण्यंनप्रीतिर्नचसंगतिः॥तथाऽपिहरतेतापंलोकानामुद्यतोघनः
॥३४॥धीरध्वनिभिरलंतेनीरदमेमासिकोगर्भः॥उन्मदवारणबुध्या
मध्येजठरंसमुच्छलति॥३५॥नाऽहंजलदकदाचिच्चातकइवजीवनं
याचे॥अहमस्मिनीलकंठस्तुष्येऽहंशब्दमात्रेण॥३६॥जलदः
समुद्रसेवामाचरतिसमग्रभुवनभरणाय॥कुरुतेतामपिहतम
तिरात्मंभरिरनिशमौर्वाग्निः॥३७॥आसक्ताःप्रतिकोटरंविषध
राभानोःकरामूर्धनिज्वालाजालकरालदावदहनःप्रत्यंगमालिं
गति॥सर्वानन्दनचारुचंदनतरोरेतस्यजीवातवेरेजीमूतविमुं
चवारिबहुशोयुष्मद्यशोजृंभतां॥३८॥तेतेचातकपोतकावितृषि
तादावाग्निमग्नंवनंसन्निर्वापितमुष्णतापितमहीनिर्वापितास
र्वतः॥कासाराःपरिपूरिताःपृथुपयोधाराभिरंभोधरत्वय्येवायम
होमहोर्जितमहादानावदानक्रमः॥३९॥नीरंदूरंतदपिविरसंजंग
मानोलताद्यास्तस्मिन्दातर्यपिजलनिधौकोलभेतांबुबिंदुं॥दाना
ध्यक्षेत्वयिजलधरक्वापिकुत्रापिशैलाःशालावंतोऽमृतनिभजलैः
स्तर्पितास्सर्वएते॥४०॥अकूपाराद्वारिप्रचुरतरमादायजलदःसदा
नाध्यक्षोपिप्रकिरतिजलंनाद्भुतमिदं॥समेघोधन्योयस्सरिकिरतिमु
क्ताफलतयायदीयासौकीर्तिर्नटतिनृपनारीकुचतटे॥४१॥तापंलुं
पसिसर्वतोवितरसेमुक्ताफलंमुक्तिपुक्षेत्रंसिंचसिकिंचपल्लवयसिश्री
खंडमुख्यान्द्रुमान्॥क्षारंक्षारमिदंजलंजलनिधेरादायजीमूत
हेविश्वंजीवयसिब्रवीतुजगतिप्रौढोपिकस्तेगुणान्॥४२॥नभसि
निरवलंबेसीदतादीर्घकालंत्वदभिमुखनिषण्णोत्तानचंचूपुटेन॥
जलधरजलधारादूरतस्तावदास्तांध्वनिरपिमधुरस्तेनश्रुतश्चात
केन॥४३॥यन्नारदेषुसरलेषुनपक्षपातोजातोबतस्फुटमसौकुटजे

पुरागः॥विश्वैकजीवनपटोरपिवारिवाहदुर्वारवायुवशागस्यनतद्विचित्रं॥४४॥गर्जितवधिरीकृतककुभा।किमपिकृतंनघनेन॥कियतीचानकचंचुपुटीसापिभृतानजलेन॥४५॥संतापंजगतोविलुंपसिधरांधाराभिरासिंचसिक्षेत्राण्यंकुरयस्यमून्मुकुलयस्याह्लायनीयद्रुमान्॥सारंगस्यनभोनिवेशितदृशश्चंचूपुटीपूरणे वैमुख्यंवहसित्वमंबुदयदिमय्येतुकोनामतत्॥४६॥कूपांभांसिपिवेत्तुकूपरसिकावापीषुवापीजुषोनाद्येयाश्चपतत्रिणोपिमुदितामास्वादयंतामपः॥सारंगस्यनभोनिवेशितदृशः किंतेनयावन्नहीमंभोभिस्त्वपयन्नसावुदयतेनम्रातृषेण्योघनः॥४७॥हर्षवर्षन्विधिक्षेचिरसमयतृषाशुष्यतांचातकानां भूयस्तापोपशांतिंवितरसितरसालोकशोकंधुनोषि॥ अंभोदैतन्नवैकंपरममनुचितंयत्सिधत्सेसुधांशुंवाचामीशंकविंबाबुधमपिवहसिप्रेमरक्तद्योतवर्गे॥॥४८॥आश्रयःक्रियतामेषतरुःसन्मार्गमाश्रितः॥पाथोदसिच्यतांकालेनोपेक्ष्योदूरभावतः॥४९॥यत्पल्लवःसमभवत्कुसुमंयदसीत्तत्सर्वमस्यभवतःपयसःप्रसादः॥यद्रूरुहेफलविधौनददासिवारिप्राचीनमंबुदयशोमलिनीकरोषि॥५०॥कर्त्तव्योहृदिवर्त्ततेयदितरोरस्योपकारस्तदामाकालंगमयांबुवाहसमयेसिंचैनमंभोभरैः॥शीर्णेपुष्पफलेदलेविगलितेमूलेगतेशुष्कतांकस्मैकिंहितमाचरिष्यसिपरीतापस्कृतेस्यास्यति॥५१॥नैवालवालवलयंभरितंद्रुमाणांनार्द्रीकृतापिवनचातकपोतचंचुः॥दावानलाकुलतरुःशमितोनशीघ्रंभारायवारिधरवारिभृतवाभूत्॥५२॥नोचिंतामणिभिर्नकल्पतरुभिर्नोकामधेन्वादिभिर्नोदैवैश्चपरोपकारनिरतैःस्थूलैर्नसूक्ष्मैरपि।अंभोदेहनिरंतरंजलभरैस्तामुर्वरांसिंचताधैर्येणधुरंत्वयाद्यवहतामन्येजगज्जीवितं॥५३॥हे पाथोदयशोन्नतंहिभवतादिग्व्यापिचव्यापृतंमन्येधीरयतःकरिष्यसिखलुक्षीराब्धितुल्यंसरः॥किंत्वेषक्षमतेनहिक्षणमपिभीष्मोष्मणाव्याकुलःपाठीनादिगणस्त्वदेकशरणस्तद्वर्षतावत्

कियत्॥५४॥ पानीयमानीयपरिश्रमेण पाथोदपाथोनिधिमध्यतस्त्वं॥ कल्पद्रुमे सीदति साभिलाषे महोषरे मुंचसि किं निमित्तं॥५५॥ नांधोस्कंधनतिःसरःस्फुरन्मनो वापि शुनापि हितं कर्णेष्वर्णवसेकथानचकुतानाद्यापि नद्यो मनः॥ सारंगेण समुत्तरंगरसनादंडेन चंडातपक्लांतेनापि निरंतरं जलद देहत्वय्येव दत्तं मनः॥५६॥ इति श्रीबृहत्शार्ङ्गधरविरचितायां पद्धत्यां मेघान्योक्तिपरिच्छेदः॥ ॥

अथवाय्वन्योक्तयः

अलिपटलैरनुयातां स्वहृदयहृदयज्वरं विलुंपंतीं॥ मृगमदपरिमललहरीं समीर किं पामरपुरे किरसि॥१॥ भवभूतेः॥ ये जात्या लघवः सदैव गणनां याता न ये कुत्रचित् पद्भ्यामेव विमर्दिताः प्रतिदिनं भूमौ विलीनाश्चिरं॥ उत्क्षिप्ताश्चपलाशयेन मरुता पश्यांतरिक्षे सखे तुंगानामुपरि स्थितिं क्षितिभृतां कुर्वंत्यमी पांसवः॥२॥ मल्लभट्टस्य॥ परमोमरुत्सखाग्नेस्तेजो वृद्धिं तनोति तज्जेतुं॥ दीपं हरति तदस्य ज्ञानं प्रतिपत्ति निर्वहणं॥३॥ कस्यापि॥ कोयं भ्रांतिप्रकारस्तव पवनपदं लोकपादाहतीनां तेजस्विव्रातसेव्ये नभसि नयसि यत्पांशुपुरं प्रतिष्ठां॥ अस्मिन्नुत्थाप्यमाने जननयनपथोपद्रवस्तावदास्तां केनोपायेन सह्यो वपुषि कलुषता दोष एव त्वयैव॥४॥ हेहो दग्धसमीरसर्पति भवत्यस्मिन्वने शाखिनां शाखाकर्षणजःसकोपि सुचिरं जज्वालदावानलः॥ येनादाहि पलायमानहरिणं भस्मीभवद्भूरुहं प्लुष्यन्निर्झरमुत्सन्नप्लवगकुलं चेष्टद्भुजंगं वनं॥५॥ कस्याप्येतौ॥ हे मांभोरुहपत्तने परिमलस्तेनावसंतानिलस्तत्रत्यैरिव यामिकैर्मधुकरैरारब्धकोलाहलः॥ निर्यातस्त्वरयाव्रजन्निपतितः श्रीखंडपंकद्रवैर्लिप्ते केरलकामिनीकुचतटे खंजःशनैर्गच्छति॥६॥ लतां पुष्पवतीं स्पृष्ट्वा सुस्नातश्च महार्णवे॥ पुनस्तत्स्पर्शभीत्येव वायुर्याति शनैःशनैः॥७॥ वायुरेव महाभूतं वदंतु निखिला जनाः॥ आयुरेवैष भूतानामिति मन्यामहे वयं॥८॥ अहह चंडसमीरण दारुणं किमिदमाचरितं चरितं त्वया॥ यदिह चातकचंचुपुटोदरे पतति वारि तदेव निवारितं॥ ९॥

इतिश्रीबृहत्शार्ङ्गधरविरचितायांपद्धत्यांपवनान्योक्तिपरिच्छेदः।।

अथहंसान्योक्तयः

कंसारिचरणोद्भूतसिंधुकल्लोललालितं।। मन्येहंसमनोनीरेकुल्या
नां रमतेनते।।१।। शार्ङ्गधरस्य।। अंभोजिनीवननिवासविलासमे
वहंसस्यहंतुनितरांकुपितोविधाता।। नत्वस्यदुग्धजलभेदविधौप्रसि
द्धांवैदग्ध्यकीर्त्तिमपहर्तुमसौसमर्थः।।२।। भर्तृहरेः।। अपसरणमे
वशरणंमौनंवाराजहंसस्य।। कटुरटतिनिकटवर्त्तीवाचालष्टिट्टि
भोयत्र।।३।। मृगांगनाजनमनोहरहारिगीतांराजीवरेणुकणकीर्ण
पिशंगतोयां।। रम्यांहिमाचलनदींप्रविहायहंसहेहेहताशवदकां
दिशमुत्सुकोसि।।४।। स्थित्वाक्षणंविततपक्षनितांतरिक्षेमातंगसं
गकलुषांनलिनींविलोक्य।। उत्सन्नमन्युपरिघर्घरनिःस्वनेनहंसे
नसाधुपरिहृत्यगतेनलीनं।।५।। सरसिबहुशस्ताराछायांदशन्प
रिवंचितः।। कुमुदविटपान्वेषीहंसोनिशास्वविचक्षणः।।६।। नदश
तिपुनराशंकीदिवापिसितोत्पलं।। कुहकचकितोलोकःसत्येप्यपा
यमपेक्षते।।७।। वातोदोलितपंकजोत्थितरजःपुंजांगरागोज्वलोयःशृ
ण्वन्किलकूजितंमधुलिहांसंजातहर्षःपुरा।। कांताचंचुपुटापवर्जि
तबिसग्रासग्रहेप्यक्षमःसोयंसंप्रतिहंसकोमरुगतःकौपंपयोया
च्यते।।८।। तरौतीरोद्भूतेक्वचिदपिदलाच्छादिततनुःपतद्धारासारां
गमयविषमांप्रावृषमिमां।। निवृत्तायांतस्यांसरसिसरसोत्फुल्लन
लिनेसएवत्वंहंसःपुनरपिविलासांस्तदुहते।।९।। रेराजहंसकिमि
तित्वमिहागतोसियोसौबकःसइहहंसइतिप्रतीतः।। तद्गम्यताम
नुपदेनपुनःस्वभूमौयावद्वदंतिनबकेखलुमूढलोकाः।।१०।। कस्या
प्येते।। योदिव्यांबुजनीलमत्तमधुपप्रोद्गीथरम्यंसरस्त्यक्त्वामानस
मल्पवारिणिरतिंबध्नातिकेदारिके।। तस्यालीकसुखाशयापरिभव
क्रोडीकृतस्याधुनाहंसस्योपरिटिट्टिभोयदिपदंधत्तेत्रकोविस्मयः।।
।।११।। अन्यासासरसीमरालमुनिभिर्यत्तीरसोपानिकाविन्यस्तान्वलि
तंदुलान्कवलयन्हृष्टोस्तिहंसैर्मुखैः।। एषापक्कणवापिकाकमलिनी

खंडेनगुप्तात्मभिर्व्याधैस्तद्विधमुग्धबंधनविधौकोनामनोत्सृज्यते॥
॥१२॥ ओहंसास्तावदंभोरुहकुहररजोरंजितांगाःसहेलंहंसीभिःप
द्मखंडेमधुरमधुकरारावरम्येरमंते॥ यावन्नायंदुरंतोहरगलगरलव्या
लजालालिनीलप्रोन्मीलन्मेघमालामलिनसकलदिक्मंडलोभ्येति
कालः॥१३॥ हेपक्षिन्नागतस्त्वंकुतइहसरसस्तत्कियद्धोविशालं
किंमद्धाम्नोपिबाढंतद्तिशठमहामाययाब्रूहिमिथ्या॥ इत्थंकूपोद
रस्थःशपतितटगतंदर्दुरोराजहंसंनीचःप्रायःशठार्थोभवतिहिविष
मोनापराधेनदुष्टः॥१४॥ केषामप्येते॥ यःसंतापमपाकरोतिजग
तांयश्चोपकारक्षमःसर्वेषाममृतात्मकेनवपुषाप्रीणातिनेत्राणि
यः॥ तस्याप्युन्नतिमंबुदस्यसहसेयन्नत्वमेतावतावर्णेनैषपरंम
रालधवलःकृष्णश्चरित्रैरसि॥१५॥ भोजस्य॥ गतंतद्गांभीर्यंतट
मपिचितंजालिकशतैःसखेहंसोत्तिष्ठत्वरितममुतोगच्छसरसः॥
नयावत्पंकांतःकलुषिततनुर्भूरिविलसन्बकोसौवाचालश्चरणयु
गुलंमूर्ध्निकुरुते॥१६॥ यदिनामदैवगत्याजगद्सरोजंसदैवसंजातं॥
अवकरनिकरंविकिरतितत्किंकृकवाकुरिवहंसः॥१७॥ अस्तियद्य
पिसर्वत्रनीरंनीरजमंडितं॥ रमतेनमरालस्यमानसंमानसंविना॥१८
॥ आकारःकमनीयतांकुलगृहंनीलालसासागतिःसंपर्कःकमलालयैः
कुलतयालोकोत्तरंकूजितं॥ यस्येयंगुणसंपदस्तिमहतीतस्यातिभ
व्यस्यतेसंरब्धत्वमसद्गुमद्गुकलहंनाहंसहेहंसहे॥१९॥ नद्योनीच
रतादुरापपयसःकूपाःपयोराशयःक्षारोदुष्टबकोटसंकटतटोद्देशास्त
डागादयः॥ इत्थंभूतलमाकलय्यसकलानंभोनिवेशानितित्वांभोमा
नससंस्मरन्पुनरसौहंसःसमभ्यागतः॥२०॥ केषामप्येते॥ कस्त्वंलोहि
तलोचनाऽस्यचरणोहंसःकुतोमानसात्किंतत्राऽस्तिसुवर्णपंकजवना
न्यंभःसुधासन्निभं॥ रत्नानांनिचयाःप्रवाललतिकावैदूर्यरोहःक
चिच्छंबूकानहिसंतिनेतिचबकैराकर्ण्यहीहीकृतं॥२१॥ हंसोऽध्वगश्रमम
पोहयितुंदिनांतेकारंडकाकबककोककुलंप्रतिष्ठः॥ मूकोऽयमित्यु
पहसंतिलुनंतिपक्षान्नीचाऽश्रयोहिमहतामपमानहेतुः॥२२॥ पुरा

सरसिमानसेविकचसारसाऽलिस्खलत्परागसुरभीकृतेपयसियस्ययातंवयः॥सपल्वलजलेऽधुनामिलदनेकभेकाऽऽकुलेमरालकुलनायकःकथयरेकथंवर्ततां॥२२॥नीरक्षीरविवेकेहंसाऽऽलस्यंत्वमेवतनुषेचेत्॥विश्वस्मिन्नधुनाऽन्यःकुलव्रतंपालयिष्यतिकः॥२३॥येवर्द्धिताःकनकपंकजरेणुमध्येमंदाकिनीविमलनीरतरंगभंगैः॥तेसांप्रतंविधिवशात्खलुराजहंसाःशैवालजालजटिलंजलमाश्रयंति॥२४॥हाहंतमानससरःसलिलावतंसरेराजहंसपयसोःप्रविवेचनाय॥चेच्छक्तिमान्खलुभवान्नतदाकिमुस्यात्किंवाकपोतउतवाकलविंकपोतः॥२५॥हंसोवेत्तिपरागपिंजरतनुःकुत्रापिपद्माकरेप्रेयान्मेबिसकंदलीकिसलयंभुंक्तेस्वयंनिर्वृतः॥नोजानातितपस्विनीयदनिशंजंबालमालोडयन्शैवालांकुरमप्यसौनलभतेहंसोविशीर्णच्छदः॥२६॥प्रम्लानानलिनीजलानिकिरणैःसूर्यस्यशोषंययुर्नाशंप्रापविहंगमावलिरियंतृष्णाविशीर्णेक्षणा॥एतेतीरमहीरुहाअपिपतत्पत्रश्रियोद्यापिरेकोयंराजमरालसुष्कसरसीतीरेरतिप्रक्रमः॥२७॥नेदंसरःसरसवारिनवारिजंवानैतन्मधूनिमधुपाःसहवासिनोवा॥हेमारविंदवनवासविलास भाजोरेहंसमानसजुषस्तवमानसेपि॥२८॥सेवसेवसरसीरमणीयायत्रयत्रवलतेनवरागः॥राजहंसरसिकस्मरणीयाश्रीमतातदपिमानसकेलिः॥२९॥गांगमंबुसितमंबुयामुनंकज्जलाभमुभयत्रमज्जतः॥राजहंसतवसैवसुभ्रताचीयतेनचनचापचीयते॥३०॥कंचिदेवसमयंसमागमात्वांनविस्मरतिशश्वदंबुजं॥मानसेविहरहंसमानसेमाविमुंचपुनरस्यसोहृदं॥३१॥एषापुष्करिणीमरालमलिनैश्छन्नाकुवीथीजलैर्यस्यामज्जनयाविधेररूपपाचेहूस्तकमांकांक्षसे॥विश्रंभोबकमंडलेषुविनयोभेकेषुसंबंधिताराज्यंधेषुविधीयतांकृपणताकोयष्टिकश्रेणिषु॥३२॥ ॥इतिश्रीवृहत्शार्ङ्गधरविरतायांपद्धत्यांहंसान्योक्तिपरिच्छेदः॥ ७ ॥ ७ ॥ ७॥

अथमधुकरान्योक्तयः

मधुकरतवकरनिकरैःकिंकिंक्रांतंवनंनकुसुमानां॥तद्दमरसिजमुकुले
लब्धंकिंचिद्यदन्यतस्त्वत्किं॥१॥गौरींचंपककलिकामपहायभ्रांत
दुर्बुद्धे॥शाल्मलिकुसुमदलेषुस्वैरंगुंजन्नलज्जसेमधुप॥२॥शार्ङ्गध
रस्यैतौ॥भ्रमन्वनांतेनवमंजरीषुनषट्पदोगंधफलीमजिघ्रत्॥सा
किन्नरम्यासचकिंनरंताबलीयसीकेवलमीश्वरेच्छा॥३॥लक्ष्म्याः
॥भ्रमरभ्रमतादिगंतराणिक्वचिदासादितमीक्षितंश्रुतंवा॥वदसत्यम
पास्यपक्षपातंयदिजातीकुसुमानुकारिपुष्पं॥४॥श्रीदेवगणदेवानां॥
अभिनवनलिनीविनोदलुब्धोमुकुलितकैरविणीवियोगभीरुः॥भ्र
मतिमधुकरोयमंतरालेश्रयतिनपंकजिनींकुमुद्वतींवा॥५॥श्रीधनद
देवानां॥नोमल्लीमयमीहतेनभजतेमत्तेभकुंभस्थलींवासंतींसहतेन
चंदनवनामालंबतेनक्वचित्॥जातीमेवहृदीश्वरीमिवमहानंदैककंदां
कुरांध्यायन्निर्वृतिमेतिषट्पदयुवायोगीववीतभ्रमः॥६॥श्रीपुष्याकरदे
वानां॥क्रमेलवत्केलिवनंप्रविश्यचुचुंबतुंबीकुसुमंषडंघ्रिः॥प्राणीच
तुर्भिश्चरणैःपशुश्चेत्सषड्भिरंघ्र्यर्धपशुःकथंनः॥७॥कस्यापि॥केतकी
कुसुमंभृंगःखंड्यमानोपिसेवते॥दोषाःकिंनामकुर्वंतिगुणापहृतचेत
सां॥८॥कस्यापि॥अन्यासुतावदुपमर्दसहासुभृंगलोलंविनोदयम
नःसुमनोलतासु॥मुग्धामजातरजसंकलिकामकालेबालांकदर्थय
सिकिंनवमल्लिकायाः॥९॥विकटनितंबायाः॥मदनमवलोक्यनिःफ
लमनित्यतांबंधुजीवकुसुमानां॥वनमुपगम्यभ्रमरःसंप्रतिजातो
जपासक्तः॥१०॥फुल्लेषुयःकमलिनीकमलोदरेषुचूतेषुयोविवसतः
केलिकांतरस्थः॥पश्याद्यतस्यमधुपस्यशरद्व्यपायेकष्टेणवेणुवि
वरेदिवसाःप्रयांति॥११॥स्वामोदवासितसमग्रदिगंतरालारक्तामनो
हरशिखासुकुमारमूर्त्तिः॥सेव्यासरोजकलिकानुयदैवजातानीत
स्तैदैवविधिनामधुपोन्यदेशं॥१२॥किंक्वापिप्रलयानलैर्विटपिनोनि
दग्धाभस्मीकृताःकिंस्विद्वगजेनपंकजवनंनिष्कंदमुन्मूलितं॥किं
वाहंतकृतांतकेसरिभयात्सक्तोमदःकुंजरैःयेनास्मिन्विरसेकरीरकु
सुमेहाभृंगविश्राम्यसि॥१३॥अनुसरतिकरिकपोलभ्रमरःकर्णेन

ताड्यमानोपि॥ गणयतिनतिरस्कारंदानांधविलोचनोनीचः॥
॥१४॥ मधुकरगणश्चूतंत्यक्त्वागतोनवमल्लिकांपुनरपिगतोरक्ताशो
कंकदंबवनंततः॥ तदपिसुचिरंस्थित्वातेभ्यःप्रयातिसरोरुहंपरि
चितजनद्वेषीलोकोनवंनवमीहते॥१५॥ यस्याःसंगमवांछयान
गणितावाधोविनिद्रोत्पलायामालिंग्यसमुत्सुकेनमनसायातं॰
परांनिर्वृतिं॥ भग्नातामवलोक्यचंदनलतांभृंगेनयज्जीव्यते धै॰
र्येनामतदस्तुतस्य नपुनःस्नेहानुरूपंकृतं॥१६॥ अपसरमधु
करदूरंपरिमलबहुलेपिकेतकीकुसुमे॥ इहनहिमधुलवलाभोभ
वतिपरंधूलिधूसरंवदनं॥१७॥ दग्धासाबकुलावलीकवलितास्ते॰
तेरसालद्रुमाःप्लुष्टास्तेपिविनिद्रपुष्पपटलीपीतातपाःपादपाः॥
भ्रांतंभृंगदवाग्निनावनमिदंवल्मीकशेषंकृतंकिंत्वंसंप्रतिकान॰
नांतरपरिसंदायमंदायसे॥१८॥ दूरादुज्झतिचंपकंनचभजत्यं
भोजराजीरजोनोजिघ्रत्यपिपाटलापरिमलंधत्तेनचूतेरतिं॥ मंदा
रेयदनादरीविचकिलोपांतेवसं तृप्यतेतन्मन्येक्वचिदंगभृंगत
रुणेनास्वादितामालती॥१९॥ येवर्धिताःकरिकपोलमदेनभृंगाः
प्रोत्फुल्लपंकजरजःसुरभीकृतांगाः॥ तेसांप्रतंप्रतिदिनंक्षपयंति॰
कालंनिंबेषुचार्ककुसुमेषुचदैवयोगात्॥२०॥ कृत्वापिकोशपानंभ्र
मरयुवापुरतएवकमलिन्याः॥ अभिलषतिबकुलकलिकांमधुलिह
मलिनेकुतःसत्यं॥२१॥ इहसरसिसहर्षमंजुगुंजाभिरामंमधुकर
कुरुकेलिंसार्धमंभोजिनीभिः॥ अनुपममकरंदामोददत्तप्रमोदास
जतिनवतनिद्रांमालतीयावदेषा॥२२॥ येनामोदिनिकेसरस्यमु
कुलेपीतंमधुस्वेच्छयानीतायेननिशाशशांकधवलाःपद्मोदरे शा
रदीः॥ भ्रांतं येनमदप्रवाहमलिनेगंडस्थलेदंतिनांसोयंभृंगयुवा
करीरविटपेबध्नातितुष्टिंकुतः॥२३॥ यस्तोषंनगतःकमलेषुम॰
ल्लीचंपकबकुलकुसुमेषु॥ तस्यालेर्यदिनिंबेवासःकथयकथंनभव
त्युपहासः॥२४॥ केषामप्येते॥ भ्रमरमरणभीतिंमुंचचांपेयपुष्पे
विहरहरतदीयंसौरभंसौहृदेन॥ मधुकरमधुरंचेद्वस्तुहस्तेनल

श्यंभवतुतदुपभोगेनिष्टमिष्टंफलंवा॥२५॥ हंसभट्टस्य॥ अलि
रयंनलिनीदलमध्यगःकमलिनीमकरंदमदाऽलसः॥विधिवशा
त्परदेशमुपागतःकुटजपुष्परसंबहुमन्यते॥२६॥गंधैराढ्याभु
वनविदिताकेतकीस्वर्णवर्णापुष्पभ्रांत्याक्षुधितमधुपःपुष्पमध्ये
पपात॥ अंधीभूतस्तदनुरजसाकंटकैश्छिन्नपक्षःस्थातुंगंतुंक्षण
मपिसखेनैवशक्तोद्विरेफः॥२७॥गंधाढ्यांनवमल्लिकांमधुकरस्त्य
क्त्वागतोयूथिकांतांत्यक्त्वाऽथागतःसचंदनवनंपश्चात्सरोजंगतः
॥बद्धस्तत्रनिशाकरेणसहसारोदित्यसौमंदधीःसंतोषेणविनाप
राभवपदंप्राप्नोतिसर्वोजनः॥२८॥येनाऽमेदमरंदेदलदरविंदेदि
नान्यनायिषत॥कुटजेखलुतेनेहातेनेहामधुकरेणकथं॥२९॥
अमरतरुकुसुमसौरभसेवनसम्पूर्णकामस्य॥पुष्पांतरसेवेयं
भ्रमरस्यविडंबनामहती॥३०॥सरजस्कांपांडुवर्णांकंटकसंक
राऽकिताम्॥केतकींसेवसेहंतकथंरोलंबनिस्त्रपः॥३१॥सदंभो
नांभोजंपरिहृषतिसंभोगरहितोगतोऽमंदेकुंदेवहतिमकरंदंन
हिमनः॥ ततो मन्येऽरण्येक्वचिदधिकपुण्येपिललितांलवंगीमा
संगीभजतिनवभृंगीपरिवृढः॥३२॥निरानंदःकौंदेमधुनिविधु
रोबालबकुलेरसालेसालंबोलवमपिलवंगेनरमते॥प्रियंगौना
संगंरचयतिनचूतेपिरमतेस्मरन्लक्ष्मीलीलाकमलमधुपानंम
धुकरः॥३३॥एणीदृशःश्रवणसीम्नियदानयंतितेनैवतस्यमहि
मानवचंपकस्य॥त्वंतत्रनोविहरसेयदिभृंगतेननैतस्यकिंचिदपि
तत्तुतवैवहानिः॥३४॥श्रियोवासांभोजेत्रिदिवसरिदंभोजकुहरे
हरेर्नाभ्येपद्मेमधुमधुकरोयःकिलपपौ॥सदैवादुन्मीलत्तपनक
रतापव्यतिकरव्यथाकंपःसंप्रत्यतरुमरुभूमौविचरति॥३५॥रा
त्रिर्गमिष्यतिभविष्यतिसुप्रभातंभास्वानुदेष्यतिहसिष्यतिपंकज
श्रीः॥ इत्थंविचिंतयतिकोषगतेद्विरेफेहाहंतहंतनलिनींगजउज्ज
हार॥३६॥भ्रातर्भ्राम्यलवंगवल्लिषुपिबस्वैरंनवांभोरुहंमाध्वीं
माधविकांमधूनिमधुराण्याकंठमास्वादय॥कस्मादापतितोसि

केतकमिदंयस्मिन्नदीर्घरजोदृष्टिंलुंपतिसूच्यग्रःप्रविचिनाःकृंतंतिमर्माण्यपि॥३७॥लतास्तास्तास्ताहृङ्मधुरसवतीःपंकजवनीःसमालिंगन्चुंबन्नयमगमयद्भूरिसमयं॥इदानींचेन्नीचेविचरतिरुचेरेषल्कुचेकुचेष्टयंधात्तुर्भवेत्तिनहिवाच्योमधुकरः॥३८॥आस्वाद्यात्रमधूनिषट्पदमदंमागाःकषायांकुरैर्माकंदस्यपिकान्प्रतारितवतोमूर्धनिमध्यासितः॥प्रत्यासन्नतमेपिकेपिभवतेयेनार्पितातादृशीमाध्वीतस्यविवेकविच्युतिरियंषाड्गुण्यमेतन्नते॥३९॥फलानांचदलानांचसंत्रुतेतेविवेकिनः॥मकरंदविशेषज्ञोमिलिंदमपहायकः॥४०॥आनम्राःस्तवकभरेणपल्लविन्यःशोभंतेकलिनलताःपरागपूर्णाः॥आमोदेमधुनिचमार्दवेचतासांयोभेदःस॰खलुमधुव्रतैकवेद्यः॥४१॥इहरूपमात्रसारेचित्रकृतेकनकक॰ल्हारे॥नरसोनापिचगंधोमधुकरवंधोमुधाभ्रमसि॥४२॥आलिंगसेचारुलतालवंगीमाचुंबसेचांबुजिनींक्रमेण॥तांचूतवल्लीमधुपप्रकामंसंताडयस्येवपदैःकिमेतत्॥४३॥स्नानंदमेषमकरंदमिहारविंदेविंदेतषट्पदयुवेतिजनैरदंकि॥दैवादकांडपरिमुद्रितपुंडरीककोषादभूदहहनिस्सरणंपुमर्थः॥४४॥अपिदलन्मुकुलेबकुलेयथापदमधायिकदापिनहेलया॥अहहसासहसाविधुरेविधौमधुकरीवदरीमनुसेवते॥४५॥आजन्मकल्पतरुकाननकामचारीयत्कौतुकादुपगतःकुटजेमिलिंदः॥तत्कर्मणःसुसदृशंफलमेतदेवयत्प्रापसाम्यमधुनामधुमक्षिकाभिः॥४६॥ ॥इतिश्री॰बृहत्शार्ङ्गधरविरचितायांपद्धत्यांमधुकरान्योक्तिपरिच्छेदः॥७॥

अथकोकिलान्योक्तयः

काकैःसहविवृद्धस्यकोकिलस्यकलागिरः॥खलसंगेपिनैष्ठुर्यंकल्याणप्रकृतेःकुतः॥१॥समुज्झिरसिकिंवाचःपुंस्कोकिलसुकोमलाः॥अभ्रेस्मिन्जडपाषाणगुरुर्निर्घोषभैरवे॥२॥अस्यांसुखबधिरलोकनिवासभूमौकिंकूजितेनखलुकोकिलकोमलेन॥एतेहिदेवहतकास्तदभिन्नवर्णंत्वांकाकमेवकलयंतिकलानभिज्ञाः॥३॥कस्या॰

कोकिल कलप्रलापैरलमलमालोकसे रसालं किं॥ शरनिकरभरि
तशरधिः शबरः सरतीह परिसरे सधनुः॥ ४॥ श्रीधनददेवानां॥ न
वैतद्धाचि माधुर्यं जाने कोकिल कृत्रिमं॥ यैः पोषितोसि तानेव जात
पक्षो जहासियत्॥ ५॥ भोजस्य॥ मूकीभूय तमेव कोकिल मधुं बंधुं
प्रतीक्षस्व हे हेलोल्लासितमल्लिकापरिमलामोदानुकूलानिलं॥ यै
नास्तव सूक्तयः सफलतामायांत्यमी तूल्लसत्यां भूत्कर्षभृतो निदा
घदिवसाः संतापसंदायिनः॥ ६॥ कस्यापि॥ येनानंदमये वसंतसम
ये सौरभ्यहेलामिलद्भृंगालीमुखरे रसालशिखरे नीताः पुरावासराः
॥ आः कालस्य वशेन कोकिलयुवा सोप्यद्य सर्वा दिशः खेलद्वायस
चंचुघातविदलन्मूर्धा मुहुर्धावति॥ ७॥ भेरीभांकारस्य॥ क्वचि
ज्झिल्लीनादः क्वचिदुलूककोलककलहः क्वचित्केकारावः क्वचिदपि
कपीनां कलकलः॥ क्वचिद्घोरः फेरुध्वनिरयमहो दैवघटनात्कथं का
रं तारं रसति चकितः कोकिलयुवा॥ ८॥ कस्यापि॥ यस्याकर्ण्य वचः
स्वधाकवलितं वाचंयमानामपि न्यग्राणि ग्रथयंति मन्मथकथां चेतां
सि चैत्रोत्सवे॥ रे रे काक वराक साकमधुना पुंस्कोकिलेनामुना स्पर्द्धां
बंधमुपेयुषस्तव तु किं लज्जापि नो जागरा॥ ९॥ मल्लभट्टस्य॥ रे बाल
कोकिल करीरमरुस्थलीषु किं दुर्विदग्धमधुरध्वनिमातनोषि॥ अ
न्यः स कोपि सहकारतरुप्रदेशो राजंति यत्र तव विभ्रमभाषितानि॥
॥ १०॥ रसालशिखरालीनाः शतं संतु पतत्रिणः॥ तन्मंजरीरसामो
दबिंदुरेष कुहूमुखाः॥ ११॥ हे कीर कैरवसकृगीरिति संकलय्य मामत्र
संरससि सज्जनरंजनाय॥ बालोपि यत्र कलकंठककंठपीठसंलोठि
कोमलकुहूकृतपूर्णकर्णः॥ १२॥ एतौ श्रीचंद्रदेवस्य॥ दात्यूहाः सर
सं रसंतु सुभगं गायंतु केकाभृतः कादंबाः कलमालपंतु मधुरं कूजंतु
कोयष्टयः॥ दैवाद्यावदसौ रसालविटपिच्छायामनासादयन्निर्वि
ण्णः कुसुमेषु कोकिलयुवा संजातमौनव्रतः॥ १३॥ भ्रातः कोकिल
कूजितेन किमलं नार्हस्यनर्घोगुणं तूष्णीं तिष्ठ विशीर्णपर्णपटलछ
न्नः क्वचित्कोटरे॥ प्रोद्दामद्रुमसंकटः कटुरटत्काकावलीसंकुलः॥

कालोयंशिशिरस्यसंप्रतिसखेनायंवसंतोत्सवः॥१४॥केषाम
व्यते॥रेरेकोकिलमाभजमौनंकिंचिदुदंचयपंचमरागं॥नोचेत्वा
मिहकोजानीतेकाककदंबकपिहितेचूते॥१५॥सस्तुह्निरसिकिंबा
चःपुंस्कोकिलसुकोमलः॥श्वभ्रेऽस्मिन्जडपाषाणगुरुनिर्घोषभै
रवे॥१६॥अविश्वसन्धूर्त्तधुरंधरोऽपिनरःपुरंध्रीपुरतोऽधएव॥
अशेषशिक्षाकुशलोऽपिकाकःप्रतार्यतेकिंनपिकांगनाभिः॥१७॥
तत्किंस्मरसिनभुक्तंयत्पिकरेकाकमंदिरेपूर्वं॥सहकारकुसुमका
लेहठेनकुरुषेऽधुनारावं॥१८॥तावत्कोकिलविरसान्यापयदिव
सान्वनांतरेनिवसन्॥यावन्मिलद्लिमालःकोऽपिरसालःसमु
ल्लसति॥१९॥एकस्त्वंगहनेऽस्मिन्कोकिलनकलंकदाचिदपिकुर्याः॥
साजात्यशंकयाऽमीनत्वांनिघ्नंतुनिर्दयाःकाकाः॥२०॥किंकोमलैः
कलरवैःपिकतिष्ठतूष्णीमेतेतुपामरनराःस्वरमाकलय्य॥कोवा
रटत्ययमपेनिकटेकटूनिरेवध्यतामितिवदंतिगृहीतदंडाः॥२१॥
शृगालशशशार्दूलदूषितंदंडकावनं॥पंचमंगायतानेनकोकिले
नप्रतिष्ठितं॥२२॥तावच्चकोरचरणायुधचक्रवाकपारावतादिवि
हगाःकलमालपंतु॥यावहूसंतरजनीघटिकावसानमासाद्यको
किलयुवानकुहूकरोति॥२३॥पिकस्तावत्कृष्णःपरमरुणयापश्य
तिदृशापरापत्यद्वेषीस्वसंतमपिनोपालयतियः॥तथाप्येषोऽ
मीषांसकलजगतांवल्लभतमोनदोषागण्यंतेखलुमधुरवाचांक्व
चिदपि॥२४॥आस्वाद्यैषकषायमंकुरमुरुप्रेमानुबद्धाशयोमाकं
दस्ययशांसिकोकिलयुवानिर्मातिदिग्भित्तिषु॥माध्वीकानिनिपी
यतस्यमधुपास्तत्रैवगुंजंत्यमीकोब्रूतामसतांसतांचवचसांव
र्त्तीतिगंचेष्टितं॥२५॥अंभोजप्रकरोऽथकेतककुलंकुंदोत्करःकैरव
व्रातोमल्लिगणोऽथचंपकचयोजातीसमूहोऽथवा॥नोचेदादरमा
प्नोतिपिकतेखेदंवृथामाकृथायस्मात्क्वापिकदापिकोऽपिभवितायस्त्व
द्गुणान्ज्ञास्यति॥२६॥इतिश्रीवृ॰शा॰वि॰प॰कोकिलान्योक्तिपरिछेदः

अथचातकान्योक्तयः

एकएवखगोमानीसुखंजीवतिचातकः॥म्रियतेवापिपासायांयाचतेवापुरंदरं॥१॥दीनोन्नतचलपक्षस्तयाबद्धपिलब्ध्यमवस्तु॥चातकसत्वंभावनयाकिमपियदस्तित दस्तु॥२॥चातकस्यलघुचंचुसंपुटेनोपतंतिखलुवारिबिंदवः॥सागरीकृतमहीतलस्यकिंदोषएषजलदस्यदीयते॥३॥सत्यंसत्यंमुनेर्वाक्यंनादत्तमुपतिष्ठते॥अंबुभिःपूरितापृथ्वीचातकस्यमरुस्थली॥४॥बीजैरंकुरितंलताभिरुदितंवल्लीभिरुज्जृंभितं कंदैःकंदलितंजनैःप्रमुदितंधाराधरेवर्षति॥भ्रातश्चातकपातकंकिमपितेसम्यग्नजानीमहेयेनास्मिन्नपतंतिचंचुपुटकेछिन्नाःपयोबिंदवः॥५॥चातकधूमसमूहंदृष्ट्वामाधववारिधरबुद्ध्या॥इहहिभविष्यतिभवतोनयनयुगादेववारिणांपूरः॥६॥रक्ताब्जपुंजरजसारुणितान्विमुच्यस्वस्थानस्सुधासमरसान्नपिवारिराशीन्॥यश्चातकःपिबतिवारिधरोदबिंदून्मन्येतदानतिभयास्थिरसोभिमानी॥७॥कूपेपानमधोमुखंभवतिमेनयोवराकःस्त्रियःसारंगैर्बकटिट्टिभैःसहसरस्येवंसमालोकयन्॥नास्त्येतृषितोपिहीनसलिलंकूपैर्व्रतंजंतुभिर्मीनादुन्नतकंधरःसुरपतिंतच्चातकोयाचते॥८॥गर्जितबधिरीकृतककुभाकिमपिकृतं नघनेन॥कियतीचातकचंचुपुटीसापिभृतानैवजलेन॥९॥अन्येपिसंतिबततामरसावतंसाहंसावली वलयिनोजलसन्निवेशाः॥कोप्याग्रहोगुरुरयंबतचातकस्यपौरंदरींयदभिवांछतिवारिधारां॥१०॥अन्येतेजलदायिनोजलधरास्तृष्णांविनिघ्नंतियेभ्रातश्चातककिंवृथात्रटितैःखिन्नोसिविश्राम्यतां॥मेघःशारदएषकाशधवलःपानीयरिक्तोदरोगर्जत्येवहिकेवलंभृशतरंनोबिंदुमप्युज्झति॥११॥समागमिष्यतांभोदवेत्तिकःसमयंतव॥रौतिनोयदिसारंगस्तदेनैःखेपुरःसरः॥१२॥यावत्तिष्ठतिचातकोयमसुभिःकंठस्थलस्थायिभिस्तावद्देहिपयःपयोदफलतुत्वद्वारिकल्पद्रुमः॥नोचेदस्यत्तृषार्त्तपीडिततनोःप्राणैःप्रियाणोकृते कस्मैदास्यसिकोग्र

हीष्यतिपुनस्तापस्कृतेस्यास्याति॥१३॥यःकृष्णंकुरुतेमुखंजन
यतित्रासंतडिद्भिस्कृयोयश्चप्रार्थयितुःपरंदलयतिश्रोत्राणियोग
र्जितैः॥सत्यंचातकतंतथाविधमपिभ्रातस्त्वयायाचताजीमूतेह
तमेवतुल्यमनयोरर्थित्वतिर्यक्त्वयोः॥१४॥धिग्वारिदंपरिहृता
न्यजलाशयस्ययच्चातकस्यकुरुतेनतृषाप्रशांतिं॥धिक्चातकंतम
पियोःर्थितयास्तलज्जस्तत्तादृशंचयदुपैतिपिपासितोपि॥१५॥वि
श्वोपजीव्येपिपिबत्यपोनपद्माकरेयद्यपिचातकोयं॥स्वार्थस्सति
स्तस्यतृषातुरस्यलघुत्वमत्रास्तिनकिंचिदस्य॥१६॥केषामप्येते॥
रेरेचातकसावधानमनसामित्रक्षणंश्रूयतामंभोदाबहवोवसंति
गगनेसर्वेःपिनैतादृशाः॥केचिद्वृष्टिभिरार्द्रयंतिधरणींगर्जंतिकेचि
द्वृथायंयंपश्यसितस्यतस्यपुरतोमाब्रूहिदीनंवचः॥१७॥उर्ध्वी
कृतग्रीवमहोमुधैवकिंयाचसेचातकपोतमेघं॥अस्मूर्जितंगर्जित
मात्रमस्मिन्नंभोधरेबिंदुलवस्तुदूरे॥१८॥दंभोलिस्फूर्जदंभोधर
विपुलतडिद्दंभगंभीरनादेरंभःसंभारसंभावनकुतुकिकुलंचातः
कानांप्रनृत्यत्॥ऊर्ध्वंविन्यस्तचंचूपुटमुपरिपरिभ्राम्यदुस्रातवाः
तैरंभोदोन्मुक्तमंभःकणमपिनचिरात्प्राप्यनम्रंमियोभूत्॥१९॥
इतिश्रीवृहत्शार्ङ्गधरविरचितायांपद्धत्यांचातकान्योक्तिपरिछेदः

अथमयूरान्योक्तयः

एतस्मिन्मलयाचलेबहुविधैःकिंतैरकिंचित्करैःकाकोलूककपोतको
किलशतैरेकोपिपार्श्वस्थितः॥केकीकूजतिचेत्तदाविघटितव्याला
वलीबंधनःसेव्यःस्यादिहसर्वलोकमनसामानंदनश्चंदनः॥१॥क
स्यापि॥केकीकर्णारुन्ततेकुसुमकवरीकांतिहारःकपालःकंठच्छा
यापुरारेर्गलरुचिरुचिरासौहृदंमेघसंघैः॥विम्बद्वेषिद्विजिह्वस्फुरदु
रुपिशतैर्नित्यमाहारवृत्तिःकैःपुण्यैःप्राप्तमेतत्सकलमपिसखेचित्र
रत्नंमयूरः॥२॥शार्ङ्गधरस्य॥वेगज्वलद्विटपिपुंजमहारवोयगर्ज
नतीवतरहेतिरियंनशंपा॥दावाग्निधूमनिवहोयमयेनमेघःकिंनृ
त्यसिद्रुतमितोव्रजतत्कलापिन्॥३॥लक्ष्मीधरस्य॥अयेनीलग्रीव

क्वकथयस्वतेद्यमुनयःपरंतोपंयेपांनववरविलासोवितनुते॥अमीदूराक्रूराःक्वणितमिदमाकर्ण्यसहसात्वरंतेहंतुंत्वामहहशवराःपुंखितशराः॥४॥ कस्यापि॥ हारीताःसरसंरसंतुमधुरंकूजंतुपुंस्कोकिलाः सानंदंगिरमुद्गिरंतुच —— शुकाःकिंतैःशिरस्थैरपि॥एकेनापितलस्थितेनवदनाश्रीखंडनिस्तर्जनाव्यालानांचशिखंडिनानतुमहत्पांडित्यमुद्दंडितं॥५॥श्रीचंद्रदेवानां॥किंदूरेणपयोधरानुपरिकिंनान्येरटंतःश्रुता निर्व्यापारतयाचपक्षिषुगताःकिंवानपक्षावृथा॥रम्यंवागगनेनकिंविहरणंकिंतूग्रकाकावलीपर्यायप्रतिपत्तिलाघवभयाद्भूमौस्थितोबर्हिणः॥६॥अस्मात्विचित्रवपुषश्चिरपृष्ठलग्नात्कस्माद्विमुंचतिभवान्यदिवाविमुंच॥रेनीलकंठपुरुहानिरियंतवैवमौलौपुनःक्षितिभृतांभविनास्थितिर्नः॥॥७॥यत्नाद्पिकःपश्येच्छिखि नामाहारनिर्गमस्थानं॥यदिजलदनिनदमुदितास्तएवमूढाननृत्येयुः॥८॥ नाहंजलधरभवतश्चातकइवजीवनंयाचे॥अहमस्मिनीलकंठोतवखलुतुष्यामिशब्दमात्रेण॥९॥समंतादाक्रांतादवदहनसंघैःशिखरिणःकिरातैराकीर्णाःकरकलितकांडैर्वनभुवः॥विडालैरालीढाःसपदिसरसीनांपरिसराःशिखंडीपांडित्यंनिजमहहकुत्रप्रकटतु॥१०॥ इतिश्रीशार्ङ्गधरविरचितायांपद्धत्यांमयूरान्योक्तिपरिच्छेदः॥ छ ॥ छ ॥

अथशुकान्योक्तयः

शुकतवपठनव्यसनंनगुणःकिंतुसगुणाभासः॥समजनियेनतवामरणंशरणंपंजरवासः॥१॥ श्रीधनदेवानां॥सत्सांगत्यमवाप्ययःपुरवनेनानारसास्वादवत्कीरः— शास्त्रविचारचारुवचनैरानंदकारीजने॥दैवेनास्फुटवाक्प्रपंचविहितश्रोत्रस्यतस्याटवींप्राप्तस्यात्मसभाप्रगल्भकपिषुस्यान्मौनमेवोचितं॥२॥भ्रातःकीरकठोरचंचुकषणक्रोधायतैःकूजितैः किंमाधुर्यनिषिक्तसूक्तिविशदःकंठावटुःशोष्यते॥सेयंदैववशाद्दशापरिणताराजन्यपात्रस्यतेभिल्लीछिद्रितभिन्नमुद्रितघटःप्राप्तोपतःपंजरः॥३॥ कस्यापि॥

माणिक्यद्रवलिप्तमौक्तिकतुलांबिभ्रंतिनोदाडिमीबीजान्येषनिरी
क्षतेनरमतेहैमेप्यहोपंजरे॥तन्नादृग्वनवाससंभवमहामोदैकमे
दुस्विनीवृत्तिर्मेगलितानयाहृतगिरेत्येवंशुकःशोचते॥४॥राघव
चैतन्यानां॥इदमपटुकपाटंजर्जरःपंजरोयंविरमतिनगृहेस्मिन्
क्रूरमार्जारयात्रा॥शुकमुकुलितजिह्वस्थीयतांकिंवचोभिस्तवव
चनविनोदेनादरःपामराणां॥५॥कृष्णमिश्रस्य॥अमुष्मिन्नुद्या
नेविहगखलएषप्रविकलंविलोलःकाकोलःक्वणतिपटुयावत्सटुत
रं॥सखीतावत्कीरद्रढयहृदिवाचंयमकलांनमौनेनन्यूनीभवति
गुणभाजांगुणगणः॥६॥इयंपल्लीभिल्लैरनुचितसमारंभरसिकैः
समस्ताद्राक्रांताविषविषमबाणप्रणयिभिः॥तयोरस्यस्कंधेगमय
समयंकीरतिभृतंनवाणीकल्याणीतदिहमुखमुद्रैवशरणं॥७
भर्तृहरेः॥अखिलेषुविहंगेषुहंतस्वच्छंदचारिषु॥शुकपिंजरबं
धस्तेमधुराणांगिरांफलं॥८॥किंशुकेशुकमातिष्ठचिरंभाविफले
च्छया॥बाह्यरंगप्रसंगेनकेकेनाऽनेनवंचिताः॥९॥अमुष्मिन्ना
रामेतरुभिरभिरामेविटपिनःस्फुटंनृत्यझंगीविविधनवसंगीत
कलनात्॥परानंदैःपूर्णाःकइवतववर्णावलिपदक्रमश्रोतावेत्ताद्वि
जवरशुकश्राम्यसिकुतः॥१०॥द्राक्षांभद्रेहिमधुवावदनेनिधेहिदे
हेविधेहिकिमुवाकरलालनानि॥जातिस्वभावचपलःपुनरेषकी
रस्तत्रैवयास्यतिकृशोदरिसक्तवेधः॥११॥अयंकीरश्रेणीपरिवृढ
रयावासरशतंकिमर्थंत्वंव्यर्थंस्वपरस्मिपलाशेरभसतः॥यदाशु
ष्यारंभेमुखमालिनिमाकिंशुकतरोस्त्वदैवंदेज्ञातंफलपरिचयोदु
र्लभतरः॥१२॥यातेयातमधःस्थितेस्थितमुपर्यालोकितेलोकितंय
घुल्लानशुकोयमाकलयतेशुद्धांतहस्तस्थितः॥तत्सर्वेमणिभित्ति
मेत्यभवतांछायाशुकांगीकृतंतस्मिन्कर्णसुधांवितन्वतिगिरंतूष्णीं
किमुस्थीयते॥१३॥अपारःपाथोधिःपुलिनपदवीयोजनशतंनिरा
लंबोमार्गोवियतिकिलशून्यादशादिशः॥इतीवायंकीरःकतिपयप
दान्येवगगनेमुहुर्भ्राम्यन्भ्राम्यन्पततिगुणरक्षेपुनरपि॥१४॥

सुभाषितस्याध्ययनानुसक्तंशुकंधराकाः प्रहसंतिकाकाः॥तमेव
संसत्सुगिरंकिरंतंदृष्ट्वाभवंतित्रययाननतास्याः॥१५॥ ॥इतिश्री
वृहत्शार्ङ्गधरविरचितायांपद्धत्यांशुकान्योक्तिपरिच्छेदः॥ ७॥

अथकाकान्योक्तयः

गात्रंतेमलिनंतथाश्रवणयोरुद्वेगकृत्क्रेंकितंभक्ष्यंसर्वमपिस्व-
भावचपलंदुश्चेष्टितंतेसदा॥एतैर्वायससंगतोस्यविनयैर्दोषैः
कबीजैःपरंयत्सर्वत्रकुटुंबवत्सलमतिस्तेनैवधन्योभवान्॥१॥
उपाधिभिःसंततसंगतोपिनहिस्वभावंविजहातिभावः॥आज
न्मउन्मज्जतिदुग्धसिंधौतथापिकाकःकिलकृष्णएव॥२॥शार्ङ्ग
धरस्य॥पथिनीपतितांशून्येदृष्ट्वानिरावरणाननां दधिभृतघटीं
गर्वोन्नद्धःसमुन्नतकंधरः॥निजसमुचितास्तास्ताश्चेष्टाविकार
शताकुलोयदिनकुरुतेकाणःकाकोभूयःकदानुकरिष्यति॥३॥म
ल्लभट्टस्य॥आमरणादपिविरुतंकुर्वाणाःस्पर्धयासहमयूरैः॥
किंजानंतिवराकाःकाकाःकेकारवंकर्तुं॥४॥तुल्यवर्णच्छदः
कृष्णःकोकिलैःसहसंगतः॥केनविज्ञायतेकाकःस्वयंयदिनभा
षते॥५॥रूक्षस्यामधुरस्यचातिमलिनच्छायस्यधृष्टस्यचक्षु
द्रस्यक्षतिकारिणोनिचपलस्याल्हादविच्छेदिनः॥येयंनिंबफ
लेषुकाकभवतस्तिक्तेषुनैसर्गिकीप्रीतिस्तत्सदृशंविधेर्विलसि
तंनिष्पन्नमेतच्चिरात्॥६॥प्रत्यंगणंप्रतितरुंप्रतिवारिनीरंका
काश्चरंतिचलचंचुपुटारटंतः॥नोयांतितृप्तिमयमंडितपुंडरी
कखंडेवसन्नहहतृप्यतिराजहंसः॥७॥कृष्णंवपुर्वहतुचुंबतु
सत्फलानिरम्येषुसंचरतुचूतवनांतरेषु॥पुंस्कोकिलस्यचरि
तानिकरोतुकामंकाकःकलध्वनिविधौननुकाकएव॥८॥किंके
कीवशिखंडमंडिततनुःकिंकीरवत्पाठकःकिंवाहंसइवांगना
गतिगुरुःसारीवकिंसुस्वरः॥किंवाहंतशकुंतराजपिकवत्कर्णा
मृतस्यंदनः काकःकेनगुणेनकांचनमयेव्यापारितःपंजरे॥
॥९॥अत्रस्थःसखिलक्षयोजनगतस्यापिप्रियस्यागमंवेत्सि

ख्यातिचधिक्सुकादयइमेसर्वेपठंतःस्थिताः।मत्कांतस्यवियोगताप
दहनज्वालावलीचंदनःकाकस्तेनगुणेनकांचनमयेव्यापारितःपंज
रे॥१०॥केषामप्येते॥वयंकाकावयंकाकाजल्पंतीतिप्रगेद्विकाः॥
तिमिरारिस्तमोहन्यादितिशंकितमानसाः॥११॥तत्काकत्वयिसुऽ
क्ताःकटुवाग्मैववर्ण्यधूर्तताऽशुचिताः॥यदिविष्ठारसपुष्टेनत्रनंदोऽ
षाहितञ्चित्रं॥१२॥विधिरेवविशेषगर्हणीयःकरटत्वंरटकस्तवाऽ
पराधः॥सहकारतरौचकारयस्तेसहवासंसरलेनकोकिलेन॥१३॥
अहोमोहोवराकस्यकाकस्ययदसौगुरुः॥सरीसर्त्तिनरीनर्त्तिय
दयंशिखिहंसयोः॥१४॥कर्णाऽरुंतुदमंतरेणरणितंगाहस्वकाक
स्वयंमाकंदंमकरंदशालिनमिहत्वांमन्महेकोकिलं॥धन्यानिस्थ॰
लवैभवेनकतिचिद्वस्तूनिकस्तूरिकांनेपालक्षितिपालफालपति
तेपंकेनशंकेतकः॥१५॥काकत्वंफलनम्रमाम्रविपिनंदैवात्समासा
दयन्किंकर्णौवधिरीकरोषिपरुषक्केंकारकोलाहलैः॥मौनंचेद
वलंबसेरतभरप्रक्रांतपुंस्कोकिलभ्रांत्यापित्वयिसंचरंतिनकथंसु
धांकरास्सच्छटाः॥१६॥इतिश्रीवृ०शा०वि०प०काकान्योक्तयःपरि०

॥अथबकान्योक्तयः॥

नालेनैवस्थित्वापादेनैकेनकुंचितग्रीवं॥जनयतिकुमुदभ्रांतिंवृ
द्धबकोबालमत्स्यानां॥१॥ वृद्धेः॥एषबकःसहसैवविपन्नःशा॰
ग्रमहोक्कनुतह्नतमस्य॥साधुकृतोतनकश्चिदपित्वांवंचयितुंसुश
ठोपिसमर्थः॥२॥बकोटब्रूमस्त्वांलघुनिसरसिकापिशफरैस्तवन्या
यावृत्तिर्नपुनरवगाढुंसमुचितः॥इतश्चेतस्याभ्रंलिहलहरिहेल
तरलितक्षितिध्वग्रासैकग्रहिलतिमिपोतःपतिरपां॥३॥नकोकिला
नामिवमंजुगुंजितंनलब्धलास्यानिगतानिहंसवत्॥नबर्हिणाना
मिवचित्रपक्षितागुणास्तथाप्यस्तिबकेबकव्रतं॥४॥जातिस्तस्य
नमानसेनसुचिभिर्वृत्तिर्मृणालांकुरैर्नब्रह्मोद्वहनेननिर्मलयशः
प्राप्तिर्नवाचःकलाः॥जीवत्सात्वबधेनबाह्यधवलोभ्राम्यत्सगर्वंपु
नर्मिथ्यैवोन्नतकंधरःशठबकोहंसैःसहस्पर्द्धते॥५॥उभौश्वेतौपक्षौ

वियतिविषयेवारितगतिःसदामीनंभुंक्तेवसतिसकलंस्याणुशिरसि॥बकेसर्वेप्यांद्रोगुणसमुदयःकिंचिदधिकोगुणाःस्थानेमान्यानरवरतनुस्थानरहिताः॥६॥रेरेशिष्टबकोटनाकतटिनीतीरेतपस्विव्रतंध्यानेनानिमिषोपभोगमनसायुक्तंकरोषीदृशं॥एवंयत्किलमानसस्यपदवींकांक्षस्ययुक्तंहितन्नीरक्षीरविवेकनिर्मलधियोहंसस्यनान्यस्यसा॥७॥केषामप्येते॥नैर्मल्यंवपुषस्तवऽस्तिवसतिःपद्माकरेजायतेमंदंयाहिमनोरमांवदगिरंमौनेनसंपादय॥धन्यस्त्वंबकराजहंसपदवींप्राप्तोऽसिकिंतैर्गुणैर्नीरक्षीरविभागकर्मनिपुणाशक्तिःकथंलभ्यते॥८॥अंभसिलीनान्दीनान्मीनान्कीनाशवन्नयसि॥धिक्धिक्चलतांतवतांकुटिलद्विजलंबकोटबककोट॥९॥इतिश्रीवृ॰शार्ङ्गधरवि॰प॰बकान्योक्तिपरिच्छेदः॥

अथखद्योतान्योक्तयः॥

जर्जरतृणाग्रमदहन्सर्षपकणमप्रकाशयन्नूनं॥कीटत्वमात्मनतात्वद्योतःख्यापयन्नवनि॥१॥जयवर्धनस्य॥इंदुःप्रयास्यतिविनश्यतितारकःश्रीःस्थास्यंनिलीढतिमिरा नमणिप्रदीपाः॥अंधंसमग्रमपिकीटमणेभविष्यत्युन्मेषमेष्यतिभवानपिदूरमेतत्॥२॥कस्यापि॥अदृष्टव्यापारंगतवतिदिनानामधिपतौयशःशेषीभूतेशशिनिगतधाम्निग्रहगणे॥तथांधंसंजातंजगदुपनतेमेघसमयेयथामीगण्यंतेतमसिपटवःकीटमणयः॥३॥आनंदवर्धनस्य॥घनसंतमसमलीमसदशदिशिनिशियद्विराजसितदन्यत्॥कीटमणेदिनमधुनातरणीकरांतरितसितकिरणं॥४॥इतिखद्योतान्योक्तयः॥

अथसिंहान्योक्तयः

एकोहमसहायोहंकृशोहमपरिच्छदः॥स्वप्नेप्येवंविधाचिंतामृगेंद्रस्यनजायते॥१॥कस्यापि॥मृगेंद्रंवामृगारिंवास्करवंव्याहरंतांजनः॥नस्योभयमपिव्रीडाक्रीडादलितदंतिनः॥२॥मृगेभ्योरक्षतेक्षेत्रंनरैस्तृणमयैरपि॥सिंहाक्रांतंपुनर्मूढनहयैर्नचदंतिभिः॥३॥मृगैर्नहृंशशैर्लीनंवराहैस्खलितंरुषा॥हयानांह्रेषितंश्रुत्वासिंहैःपूर्ववद

सिते॥४॥हरिरलसविलोचनःसहेलंबलमवलोक्यपुनर्जगाम नि
द्रां॥अधिगतपतिविक्रमास्तभीतिर्नतुवनितास्यविलोकयांचका
र॥५॥एकाकिनिवनवासिन्यराजलक्ष्मण्यनीतिशास्त्रज्ञे॥सत्त्वो
च्छ्रितेमृगपतौराजेतिगिरःपरिणमंति॥६॥केषामप्येते॥नास्योच्छ्रा
यवतीतनुर्नदशनौनोदीर्घदीर्घःकरःसत्त्वंवारणनैषकेसरशिशुस्त्वा
डंबरैःस्पर्धते॥तेजोबीजमजेयमस्यहृदयेन्यस्तंपुनर्वेधसाताहृ
क्ताहृशमेवयेनसुतरांभोज्यंपशुंमन्यते॥७॥आनंदवर्द्धनस्य॥क्षु
त्क्षामोपिजरान्वितोपिशिथिलप्राणोपिकष्टांदशामापन्नोपिविपन्न
दीधितिरपिप्राणेषुगच्छत्स्वपि॥मत्तेभेंद्रविभिन्नकुंभपिशितग्रासैक
बद्धस्पृहःकिंजीर्णंतृणमत्तिमानमहतामग्रेसरःकेसरी॥८॥भर्तृह
रेः॥येनानर्गलकालकेलिदलितप्रत्यग्रकादंबिनीधाराधोरणिधौतधा
तुषुपुराशैलेषुलीलायितं॥सोयंशृंगनिपातभग्नचरणःस्फारस्फुर
त्फेरवीफूत्कारैःकुपितोखगाद्दतिमुहुःपाणीमृगग्रामणीः॥९॥भेरी
भांकारस्य॥अनिशंमतंगजानांबृंहितमाकर्ण्यतेयथाविपिने॥म
न्येतथानजीवतिगजेन्द्रफलकवलनःसिंहः॥१०॥शार्ङ्गधरस्य॥
खनन्नाखुबिलंसिंहपाषाणशकलाकुलं॥प्राप्नोतिनखभंगंवाफलंवामू
षकोभवेत्॥११॥जीर्णोविक्रमहीनोपिकृशोपियदिकेसरी॥तथागजा
ननस्याथशंकातंकायशस्यते॥१२॥अस्मिन्नंभोदवृंदध्वनिजनि
तरुषिप्रेक्षमाणेंतरिक्षंमाकाकव्याकुलोभूस्तरुशिखरवशवंकल्पले
शानशानः॥धत्तेमत्तेभकुंभव्यतिकरकरजग्रामसूक्ष्माग्रजाग्रद्ग्रास
व्यासक्तमुक्ताधवलितकवलोनस्पृहामत्रसिंहः॥१३॥महीपति
मंडलीकस्य॥ग्रामाणामुपशल्यसीमनिमदोद्रेकस्फुटत्सौष्ठवःफे
त्कारध्वनिमुज्झिरंतिबहवःसंभूयगोमायवः॥सोन्यःकोपिघनाघनध्व
निघनःपारींद्रगुंजारवःशुष्यद्गंडमलोलशुंडमचलत्कर्णंगतैर्यःश्रु
तः॥१४॥बिल्हणस्य॥एणःक्रीडतिशूकरस्वरवनतिद्वीपीचगर्वायते
क्रोष्टाक्रंदतिवल्गतेचशशकोवेगाद्द्रुरूर्ध्वावति॥निःशंकःकरिपोतकस्त
रुलतासुन्मोटतेलीलयाहेहोसिंहविनात्वयाद्यविपिनेकीदृग्दशावर्तते

॥१५॥कस्यापि॥रेमातंगमदांबुडंबरतयारोलंबरोलंवहन्वन्याना
मवलंवनंवनमिदंभुक्तंत्वयदुत्कंठसे॥हृष्टस्तत्किमहोमहोन्नतधरा
धौरेयधात्रीधरप्रस्थप्रस्थितमेघयूथमथनोत्कंठेनकंठेरवः॥१६॥वि
ल्हणस्य॥यस्यावंध्यरुषःप्रतापवसतेर्नादेनधैर्यद्रुहःस्रुच्यंतिस्म
महाप्रवाहसरितःसद्योपिदिग्दंतिनां॥दैवात्कष्टदशावशंगतवतः
सिंहस्यतस्याधुनाकर्षत्येवकरेणकेसरिसटाभारंजरत्कुंजरः॥१७॥
कस्यापि॥यत्तोयंविधिरेवयस्यसहसादिग्दंतिनोप्यंतकंनायाताः
किलयेनविंध्यवसुधागम्यानकस्याप्यभूत्॥तस्मिन्कौतुकिनात्व
याकरिपतौलुप्तेकपालस्थलीभृंगःकेसरिवीरसंप्रतिपुनःकुत्रैषवि
श्राम्यतु॥१८॥कस्यापि॥स्वल्पस्नायुवसाऽवशेषमलिनंनिर्मांसम
प्यस्थिगोःश्वालब्ध्वापरितोषमेतिनतुतत्तस्यक्षुधःशांतये॥सिंहोऽ
जंबुकमंकमागतमपित्यक्त्वानिहंतिद्विपंसर्वःकृच्छ्रगतोऽपिवांछति
जनःसत्वाऽनुरूपंफलं॥१९॥सिंहःशिशुरपिनिपततिमदमलिनक
पोलभित्तिषुगजेषु॥प्रकृतिरियंसत्ववतांनखलुवयस्तेजसोहेतुः
॥२०॥एकेनाऽपिसुपुत्रेणसिंहीस्वपितिनिर्भयं॥सहैवदशभिःपुत्रै
र्भारंवहतिरासभी॥२१॥किमपेक्ष्यफलंपयोधरान्ध्वनतःप्रार्थय
तेमृगाधिपः॥प्रकृतिःखलुसामहीयसःसहतेनाऽन्यसमुन्नतिंय
या॥२२॥उत्तुंगशैलशिखरस्थितपादपस्यकाकोऽपिपक्वफलमाल
भतेसपक्षः॥सिंहोबलीगजविदारणदारुणोऽपिसीदत्यहोतरुतले
खलुहीनपक्षः॥२३॥जीर्णोऽपिक्रमहीनोऽपिकृशोऽपियदिकेसरी
॥तथाऽपियूथनाथस्यशंकाऽऽतंकायकल्पते॥२४॥नाऽभिषेकोनऽ
संस्कारःसिंहस्यक्रियतेवने॥विक्रमार्जितसत्त्वस्यस्वयमेवमृगेंद्र
ता॥२५॥दिगंतेश्रूयंतेमदमलिनगंडाःकरटिनःकरिण्यःकारुण्या
ऽऽस्पदमसमशीलाःखलुमृगाः॥इदानींलोकेऽस्मिन्ननुपमशिखानां
पुनरयंनखानांपांडित्यंप्रकटयतुकस्मिन्मृगपतिः॥२६॥नयत्रस्थेमानं
दधुरतिभयभ्रांतनयनागलद्दानोद्रेकभ्रमदलिकदंबाःकरटिनः॥लुठऽ
न्मुक्ताहारेभवतिपरलोकंगतवतोहरेरद्यद्वारेशिवशिवशिवानांकलकलः॥

वेतंडगंडकंडूतिपोडित्यपरिपंथिना॥हरिणाहरिणाऽऽलीषुकथ्य
तांकःपराक्रमः॥२७॥यद्यपिचदैवयोगात्सिंहःपतितोऽतिदुस्तरे
कूपे॥ तदपिचवांछतिसततंकरिकुंभविदारणंमनसि॥२८॥यूना
येनविभिन्नवारणघटाकुंभोछलन्मौक्तिकश्रेणीभिःपरिपूरितास्त
टभुवोभूमीभृतांकोटिशः॥तस्यैवाद्यनिवाससीम्निकलभाःक्रीडंति
निःसाध्वसंपारींद्रस्यजरातुरस्यतदहोजीर्णोजिगीषारसः॥२९॥
वयोभिमानादपमाननाचेह्रीयतेफेरुजरत्तरेण॥हेलाहता ने
ककरींद्रसूनोहरींद्रसूनोरपिकापिहानिः॥३०॥कुरंगीणांयूथंनि
भृतमिदमंगीकृतभयंनिरातंकोयन्निर्दयहृदयभावोदयतुतत्॥
निवेद्योवाकस्मिन्नयमविनयःकेसरियुवाहगन्मत्तेभानांयुवति
षुविधत्तेनखपदं॥३१॥पारींद्रशावकनतावकरीतिरेषावेषानरैर्वि
हरसिश्वसृगालशावैः॥कुंभींद्रकुंभदलनोत्पतनाक्रमेछांवंशोचितां
नखलुरीतिमुरीकरोषि॥३२॥ कःकःकुत्रनघुर्घुरायितघुरीघोरोघु
रेत्सूकरःकःकःकंकमलाकरंविकमलंकर्त्तुंकरीनोद्यतः॥केकेका
निवनान्यरण्यमहिषानोन्मूलयेयुर्यतःसिंहीस्नेहविलासबद्धवस
तिःपंचाननोवर्त्तते॥३३॥ मातंगाःकिमुवल्गितैःकिमफलैराडंबरै
र्जंबुकाःसारंगामहिषामदंव्रजतकिंशून्येषुशूरानके॥कोपाटोपस
मुद्भटोत्कटसटाकोटेरिभारेःपुरःसिंधुध्वानिनिहुंकृतेस्फुरतियत्त
द्गर्जितंगर्जितं॥३४॥ हेलाविदलितकरिकुलकंठीरवकीदृशःप्रको
पोयं॥लोलेबालशृगालकेवलकोलाहलाधारे॥३५॥ अंतर्बलान्य
हमस्यमृगाधिपस्यवाचानिवेद्यकथमद्यलघूकरोमि॥जानंतिकिं
तुकरजक्षतकुंभिकुंभनिर्मुक्तमौक्तिकमयानिवनांतराणि॥३६॥ आ
बद्धकृत्रिमसटाजटिलांसभित्तिरारोपितोमृगपतेःपदवींयदिश्वा॥
मत्तेभकुंभतटपाटनलंपटस्यनादंकरिष्यतिकथंहरिणाधिपस्य॥
॥३७॥ इतिश्रीवृ॰शार्ङ्गधरविरचितायांपद्धत्यांसिंहान्योक्तिपरिछेदः

अथगजान्योक्तयः

नीवारप्रसवाग्रमुष्टिकवलैर्योवर्द्धितःशैशवे पीतंयेनसरोजपत्रपुट

केहोमावशेषंपयः॥तंपश्चान्मदमंथरालिवलयन्यालुप्तगंडंगजं
सानंदंसमयेचपश्यतिमुहुर्दूरेस्थितस्तापसः॥१॥ कर्णेचामरचा
रुकंचुकलिकाःकंठेमणीनांगणःसिंदूरप्रकरःशिरःपरिसरेपार्श्वां
तिकेकिंकिणी॥लब्धश्चेन्नृपवाहनेनकरिणावद्धेनभूषाविधिस्तत्किं
भूधरधूलिधूसरतनुर्मान्योनवन्यःकरी॥२॥कस्यापि॥केलिंकु
रुष्वपरिभुंक्ष्वसरोरुहाणिगाहस्वशैलतटनिर्झरिणीपयांसि॥
भावानुरक्तकरिणीकरलालितांगमुंचप्रचंडमृगराजरणाभिला
षं॥३॥आनंदवर्धनस्य॥पीतंयत्रहिमंपयःकवलितायस्मिन्मृणा
लांकुरास्तापार्त्तेननिमज्ज्ययत्रसरसोमध्येविमुक्तःश्रमः॥धिक्त
स्यैवजलानिपंकिलयतोपाथोजिनीमन्मथःकूलान्युत्खनतःकरीं
द्रभवतोलज्जापिनोजायते॥४॥रे वावारिणिवारणेनविपुलेराजी
वराजीरजःपुंजापिंजरितोर्मिणिप्रतिगलद्दानांबुगंधोत्कटे॥भूतंये
नमृगारिरक्तमसकृद्दंतांतरालेस्थितंकोष्मंसोपिपयःपपोहतवि
धेःकोगोचरेनागतः॥५॥कयोरप्येतौ॥नापोनापगतःस्तृषापिन
कृशाधौतानधूलीतनोर्नस्वच्छंदमकारिकंदकवलःकानामकेली
कथा॥दूरोत्क्षिप्तकरेणहंतकरिणास्पृष्टानवापद्मिनीप्रारब्धोमधु
कैरवारणमहोझांकारकोलाहलः॥६॥लक्ष्मणसेनस्य॥नाभूवं
न्भुवियस्यकुत्रचिदपिस्पर्धाकराःकुंजराःसिंहेनापिनलंघिताकिम
परंयस्योद्धतापह्नुतिः॥कष्टंसोपिकदर्थ्यतेकरिवरःस्फारारवैःफेरवै
रापातालगभीरपंकपटलीमग्नोद्यभग्नोद्यमः॥७॥बिल्हणस्य॥भो
भोःकरींद्रदिवसानिकियंतितावदस्मिन्मरौसमतिवाहयकुत्रचित्त्वं॥
रेवाजलैर्निजकरेणुकरप्रयुक्तैर्भूयःशमंगमयितासिनिदाघदाहं
॥८॥गोविंदराजस्य॥नगृह्णातिग्रासंनचकमलकिंजल्किनिजले
नपंकेवाल्हादंव्रजतिविसभंगार्धशवले॥ललंतीप्रेमार्द्रामपिविष
हतेनान्यकरिणींस्मरन्दावभ्रष्टांहृदयदयितांवारणपतिः॥९॥पा
द्राघातविघूर्णितावस्कमनीत्रासाकुलाःपक्षिणःपंकांकानिसरांसि
गंडकषणक्षोदस्खलाःशाखिनः॥प्राप्येदंकरिपोतकैर्विधिवशाच्छा

दूलभून्यंवनंतत्तन्नामकृतंविसृंखलतयाबद्धुंनयत्त्वार्यते॥१०॥घासग्रासंगृहाणत्यजकरिकलभप्रीतिबंधंकरिण्याःपाशग्रंथिंव्रणानामविरलमधुनादेहिपंकानुलेपं॥दूरीभूतास्तवैतेशबरवरवधूर्विभ्रमोद्भ्रांतदृश्यारेवातीरोपकंठच्युतकुसुमरजोधूसराविंध्यपादाः॥११॥केषामप्येते॥दानार्थिनोमधुकरायदिकर्णतालैर्दूरीकृताःकरिवरेणमदांधबुध्या॥तस्यैवगंडयुगमंडनहानिरेषाभृंगापुनर्विकचपद्मवनेचरंति॥१२॥कस्यापि॥आरामोयमनर्गलेनबलिनाभग्नःसमग्रोप्ययंत्वंतःसंभृतहर्षवर्धितनदोदग्रंकिमुन्माद्यसि॥मातंगप्रतिवर्षमेवभवतोभावीनिदाघज्वरस्तत्रापिप्रतिकारमर्हसिसरवेसम्यक्समालोचितुं॥१३॥गलेपाशस्तीव्रश्चरणयुगलेगाढनिगडोदृढःस्कंधेबद्धःशिरसिसृणिघातःखरतरः॥नरस्कंधारूढोवतमरणयोग्येपिविषमेनजानीमोत्यर्थंद्विरदवदकस्मात्तवमदः॥१४॥कौपेपयसिलघीयसितापेनकरःप्रसारितःकरिणा॥सोपिनपयसालिप्तोलाघवमात्मापरंनीतः॥१५॥कौपंवारिविलोक्यवारणपतेकिंविस्मितेनास्यतेप्रायोभाजनमस्यसंप्रतिभवांस्तत्पीयतामादरात्॥उन्मज्जच्छफरीपुलिंदललनापीनस्तनास्फालनस्फारीभूतमहोर्मिनिर्मलजलादूरेधुनानर्मदा॥१६॥नोमन्येदृढबंधनात्सनमिदंनैवांकुशापातनंस्कंधारोहणताडनात्परिभवंनैवान्यदेशागमं॥चिंतामेजनयंतिचेतसियथास्मृत्वास्वयूथंवनेसिंहत्रासितभीतिभीरुकलभाःयास्यंतिकस्याश्रयं॥१७॥पत्युर्यत्पतितावशेषकवलग्रासेनवृत्तिःकृतापीतंयच्चकरावगाहकलुषंतत्पीतशेषंपयः॥प्राणान्पूर्वतरंविहायतदिदंमासंकरिण्याःफलंयद्बंधंव्रणकातरस्यकरिणःक्लिष्टेनदृष्टंसुखं॥१८॥यदिमत्तोसिमतंगजकिममीभिरसालसरसतरुवल्लनैः॥हरिमनुसरखरनखरव्यपनयतिसकरटकंडूतिं॥॥१९॥केषामप्येते॥लुलायेगोमायोमृगपरिषदिश्वापदकुलेकरिण्यनकार्पण्यंकिमिहमहिमानंगमयसि॥निमग्नःपंकेस्मिन्ननुभ

वकरींद्राऽधिपदशामभद्रंभद्रंवाविधिलिखितमुन्मूलयतिकः॥२०॥ कलभतवांऽतिकमागतमलिमेनंमाकदाप्यवज्ञासीः॥ अपिदानसुंदराणांद्विपवर्याणामयंशिरोधार्यः॥२१॥ गिरिगव्हरेषुगुरुगर्वगुंफितोगजराजपोतनकदाऽपिसंचर॥ यदिबुध्यतेहरिशिशुःस्तनंधयोभविताकरेणुपरिशेषितामही॥२२॥ लीलामुकुलितनयनंकिंसुखशयनंसमातनुषे॥ परिणामविषमहरिणाकरिनायकवर्धतेवैरं॥२३॥ क्रीडाऽकारितडागवारिणिगतातंकंनपंकेरुहैर्वल्लीकाचनशल्लकीतरुगतानाकर्षिताहर्षतः॥ नाश्लिष्टाकरिणीकरेणकरिणाकामातुरेणामुनादंष्ट्राभिर्विकटाननःशिवशिवव्यालोकिपंचाननः॥२४॥ निषेवंतामेतेवृषमहिषमेषाश्वहरिणागृहाणिक्षुद्राणांकतिपयतृणैरेवसुखिनः॥ गजानामास्थानंमदसलिलजंबालितभुवांतदेकंविंध्याद्रेर्विपिनमथवाभूमसदनं॥२५॥ जहीहिशुरुगर्जितंविजहिशुंडयासीत्कृतंपरिभ्रमशतैर्वनंकिमुगजेंद्रगर्वायसे॥ पयानकिलकेसरीगिरिदरीषुनिद्रांत्यजन्विमूर्छयतिजृंभयासुभगतावकीनंमनः॥२६॥ सांद्रामोदवतीस्वकीयवसतीःपंकेरुहाणांततीस्त्यक्त्वायंभ्रमरःकरींद्रभवतामभ्याशमभ्यागतः॥ एतच्चेतसिसंप्रधार्यजगतीविख्यातदानैस्तथायुष्माभिःक्रियतांयथोपरमतेहास्यायनास्यागमः॥२७॥ यूथान्यग्रेगतानिप्रबलबलभूतोबद्धवैरामृगेंद्रामूलादाकृष्यमाणाःसपदितटरुहोभूरुहानिष्पतंति॥ दृष्ट्वाहृष्यन्निहंतप्रतिदिनमखिलाभिल्लपल्ल्याअधीशाहस्तालंबायकेषांकलयतुवदनंपंकमग्नःकरींद्रः॥२८॥ गजस्यपंकमग्नस्यत्रपाकरमिदंमहत्॥ पारमुद्धृत्यकृच्छ्रान्नहरिणोपिहसत्यसौ॥२९॥ ऊर्णानैषदधातिनापिविषयोवाहस्यदोहस्यवाप्तिर्नास्यमहोदरस्यबहुशोघासैःपलालैरपि॥ हाकष्टंचिरमस्यपृष्ठशिखरेगोणीसमारोपणेकोगृह्णातिकपर्दकैरयमितिग्राम्यैर्गजोहस्यते॥३०॥ इतिश्रीवृ॰शार्ङ्गधरवि॰पद्धत्यांगजान्योक्तिपरिच्छेदः॥७

अथमृगान्योक्तयः

दूर्वांकुरतृणाहाराधन्यास्तात वनेमृगाः॥ विभवोन्मत्तचित्तानांन
पश्यंतिमुखानियत्॥१॥ कतिकतिनमदोद्वृत्ताश्चरंतिप्रतिशिख
रंप्रतिकाननंकुरंगाः॥ क्वचिदपिपुनरुत्तमामृगास्तेमदयतियन्म
दएवमेदिनीशान्॥२॥ छित्वापाशमपास्यकूटरचनांभंक्त्वाबला
द्वागुरांपर्यंताग्निशिखाकुलायजटिलान्निःसृत्यदूरंवनात्॥ व्या
धानांशरगोचरादतिजवेनोत्प्लुत्यगच्छन्मृगःकूपांतःपतितःकरोति
विमुखेकिंवाविधौपौरुषं॥३॥ इहकिंकुरंगशावककेदारेकलमंज
रींत्यजसि॥ तृणधन्वातृणबाणस्तृणघटितःकपटपुरुषोयं॥४॥ दु
नतरमितोगच्छन्प्राणैःकुरंगवियुज्यसेकिमितिवलितग्रीवंस्थि
त्वामुहुर्मुहुरीक्षसे॥ विदधतिहतव्याधानांतेमनागपिनार्द्रतांक
ठिनमनसामेषामेतेविलोकितविभ्रमाः॥५॥ स्थलीनांदग्धानामु
परिमृगतृष्णामनुसरंस्तृषार्तःसारंगोविरमतिनखिन्नेपिमनसि
॥ अजानानस्तत्वंनसमृगयतेन्यत्रसरसीमभूमौप्रत्याशानचफल
तिविघ्नंप्रकुरुते॥६॥ अल्पेनस्खलनेनयत्रपतनंकृच्छ्रेणयत्रोन्न
तिर्दूरेवेत्रलतावितानगहनेकष्टप्रवेशक्रमः॥ हेसारंगमनोरमा
वनभुवस्त्यक्त्वाविशेषार्थिनाकिंभूभृत्कटकस्थितेव्यसनिनाव्य
र्थंखुराःशातिताः ॥७॥ सारंगोनलतागृहेषुरमतेनोपांशुलेभूत
लेनारम्यासुवनोपकंठहरितच्छायासुशीतास्वपि॥ तामेवायतलो
चनामनुदिनंध्यायन्मुहुःप्रेयसींशैलेंद्रोदरकंदरासुगतधीःशृंग
वशेषःस्थितः॥८॥ वसन्नरण्येषुचरंतिदूर्वांपिबंतितोयान्यपरिग्र
हाणि॥ तथापिवध्याहरिणानराणां —— — कोलोकमाराधयितुंस
मर्थः॥९॥ मुक्तापीडस्य॥ आःकष्टंवनवाससाम्यकृतयासिद्धा
श्रमभ्रांत्यापल्लीवासकुरंगसंगतिभवाप्राप्तोसिमृत्योर्मुखं॥ यत्राने
ककुरंगकोटिकदनक्रीडोल्लसल्लोहितस्रोतोभिःपरिपूरयंतिपरि
खामुद्दामराःपामराः॥१०॥ बिल्हणस्य॥ स्वच्छंदंहरणेनयाविर
हितादैवात्समासादिताभंगप्रस्रुतदुग्धबिंदुमधुराशालेनवामंज
री॥ निश्वासानलदग्धकोमलतृणाप्रख्यापितांतर्व्यथस्तामेवप्रति

वासरंसुनिरिवध्यायन्वनेमुष्यति॥११॥धर्मकीर्तेः॥सेयंस्थली
नवतृणांकुरुजालमेतत्सेयंमृगीतिहृदिजातमदःकुरंगः॥नैवंतु
वेत्तियदिहांतरितोलताभिरायातिसज्जितकठोरशरःकिरातः॥१२
॥इन्द्रकवेः॥रोमंथमास्वयमंथरमेत्यनिद्रांमुंचश्रमंतदनुसंच
रेयथावत्॥दूरंसपामरजनोसु नयःकिलैतेनिःकारणंहरित
पोतशरःकिरातः॥१३॥धर्मवर्धनस्य॥एणीगणेषुगुरुगर्वनिमी
लिताक्षःकिंकृष्णसारखलुखेलसिकाननेऽस्मिन्॥सीमामिमां
कलयभिन्नकरीन्द्रकुंभमुक्तामयींहरिविहारवसुंधरायाः॥१४॥
अयिकुरंगितपोवनविभ्रमादुपगतोऽसिकिरातपुरीमिमां॥इह
नपश्यसिदारयमारयग्रसपिबेतिशुकानपिजल्पतः॥१५॥तृण
मुखमपिनखलुत्वांत्यजंतिहेहरिणवैरिणःशबराः॥यशसेवं
जीवितमिदंत्यजयोजितशृंगसंग्रामः॥१६॥त्यक्तंजन्मघनंतृणां
कुरवतीमातेवमुक्तास्थलीविश्रांतिस्थितिहेतवोनगणिताबंधू
पमाःपादपाः॥बालाऽपत्यवियोगकातरमुखीत्यक्ताऽर्धमार्गेमृगी
मृग्यंतःपदवींतथाऽप्यकरुणाव्याधानमुंचंतिमां॥१७॥यद्रूक्षं
मुहुरीक्षसेनधनिनांब्रूषेनचाटून्मृषानैषांगर्वगिरःशृणोषिनच तान्
प्रत्याशयाधावसि॥कालेबालतृणानिखादसिपरंनिद्रासिनिद्राऽऽग
मेतन्मेब्रूहिकुरंगकुत्रभवताकिंनामतप्तंतपः॥१८॥नाऽत्रव्याधश
राःपतंतिपरितोनैवाऽत्रदावानलोनाऽप्युच्चावचभीतिरस्तिकुह
चिन्नोवागुराभंगुराः॥पर्यालोच्यकुरंगकेनविहितोनक्षत्रनाथाऽऽ
श्रयोनोजानातियदत्रदास्यतिविधिःस्वर्भानुदंतव्रणं॥१९॥अग्रे
व्याधःकरधृतशरःपार्श्वतोजालमालापृष्ठेवह्निर्दहतिनितरांस
न्निधौसारमेयाः॥एणीगर्भादलसगमनाबालकैरुद्धपादाचिंता
विष्टावदतिहिमृगंकिंकरोमिक्वयामि॥२०॥मध्येज्यात्रुटिताशरा
सनमहोभग्नंदवाग्नेर्भयान्निर्यातःशबरःश्वनासहगतोदग्धाश्च
पाशास्ततः॥मेघस्तत्रसमागतोविधिवशात्तेनाऽतिशांतंवनंश्रीकृष्ण
स्यकृपालवोयदिभवेत्कःकंनिहंतुंक्षमः॥२१॥व्योमार्द्धेज्वलितोर

विःकवलितंदावानलैःकाननंधूम्याभिर्नदिशःस्फुरंतिपरितःपंथाशिलादंतुरः॥इत्थंलोहितवसिक्तसृक्वणियथाप्राणंमृगेधावतिव्याधेनापिशरासनेकरुणयानारोपिताःपत्रिणः॥२२॥सौरभ्येणत्रिभुवनमनोहारिणाकाननेस्मिन्मत्कस्तूरीहरिणभवतावासितोदिग्विभागः॥तस्यैतत्तेफलमुपगतंपत्रिभिर्लुब्धकानांविद्धःप्राणांस्त्यजसिनगुणःश्रेयसेनिर्गुणेषु॥२३॥ ॥इतिश्रीवृहत्शार्ङ्गधरविरचितायांपद्धत्यांमृगान्योक्तिपरिच्छेदः॥७॥ ७॥॥

अथकरभान्योक्तयः

वपुर्विषमसंस्थानंकर्णज्वरकरोरवः॥करभस्याशुगत्यैवच्छादितादोषसंहतिः॥१॥भल्लाटस्य॥कुमुदशबलैःफुल्लांभोजैःसरोभिरलंकृतंमरकतमणिश्यामांशाष्पैर्विहायवनस्थलीं॥स्मरतिकरभोयद्वृक्षाणांचरन्मरुधन्वनांपरिचयरतिःसादुर्वारानसागुणवैरिता॥२॥जीवनायकस्य॥यस्मिन्नुच्चैर्विषमगहनांतर्गतास्वादुवल्लीस्वैच्छंमुक्तास्खलितगलेनात्मचेतोनुलग्ना॥तत्तारुण्यंकरभगलितंकुत्रतेप्राग्विलासा यत्स्वाधीनंतदपिसुलभंतेनतुष्टिंविधेहि॥३॥करभदयितेयोसौपीलुस्त्वयामधुलब्धयाव्यपगतघनच्छायस्त्यक्तोनसादरमीक्षितः॥चलकिसलयैःसोपीदानींप्ररूढनवांकुरःकरभदयितावृंदैरन्यैःसुखंपरिभुज्यते॥४॥चिंतांमुंचगृहाणपल्लवमिदंप्लक्षस्यशाल्मस्यवागांगस्यास्यजलस्यचंद्रवपुषोगंडूषमेकंपिव॥जीवन्नूस्यसिताःपुनःकरभहेदाशेरकीयाभुवोरम्याःपीलुशमीकरीरबदरीकूजत्कपोताकुलाः॥५॥यस्यासीन्नवपत्रपीलुबदरग्रासोपसंतुष्टयेदीर्घाध्वन्यनुगम्यतेनपदवीयस्यास्ययूथैरपि॥सोयंसंप्रतियातिवालकरभःक्षीणोद्यमःक्षामतांमन्येनूनमनेनदेवहतकेनास्वादितंतन्मधु॥६॥पीलूनांफलवल्कषायमधुरंरोमंथयित्वामरौशाखाग्रंयदखादिचारुकरभीवक्त्रार्पितंप्रेमतः॥तत्स्मृत्वाकरभेणखेदविधुरंदीर्घंतथाफूत्कृतंप्राणानामथवत्तदेवसहसाप्रस्थानतूर्यंयथा॥७॥दुःप्रापमंबुप

वनःपरुषोतितीव्रःछायाभृतोननरवःफलभारनम्राः॥इत्थंस
खेकरभवच्चिभवंतमुच्चैःकासंगतिःखलुमरौरमणीयतायाः॥८॥
अस्याननस्यभवनाखलुकोटिरेषाकंठारिकायदिभवेद्विशीर्ण
पर्णा॥योग्याकथंकरभक— कल्पतरोर्लतायास्तेपल्लवाविमल
विद्रुमभंगभाजः॥९॥ दाशरकोरसस्येषयुक्तंभारेधिरोहति॥उ
त्तार्यमाणेपिपुनर्यत्तत्रकिंसुकुर्महे॥१०॥ केषामप्येते॥करभद
यितेयत्तत्पीतंसुदुर्लभमेकदामधुवनगतंतस्यालाभेविरौषिकिंसु
लुका॥कुरुपरिचितैःपीलोःपत्रैर्धृतिंमरुगोचरेजगतिसकलेक
स्यावाप्तिःसुखस्यनिरंतरं॥११॥ भगवतोव्यासस्य॥रूक्षंवपुर्न
चविलोचनहारिरूपंनश्रोत्रयोःसुखदमारटितंकदाऽपि॥इत्थंन
साधुतवकिंचिदिदंचसाधुतुच्छेरतिःकरभकंटकिनिद्रुमेयत्॥१२॥

अथरासभान्योक्तयः

रेरासभवस्त्रभारवहनात्कुग्रासमश्नासिकिंराजाऽश्वाऽवसथं
प्रयाहिचणकाऽभ्यूषान्सुखंभक्षय॥सर्वान्पुच्छवतोहयाइतिवि
दंयत्राऽधिकारेस्थिताराजातेरूपदिष्टमेवमनुतेसस्यंतदस्याःपरे॥१॥

अथवृषभान्योक्तयः

नास्यभारग्रहेशक्तिर्नचवाहगुणःक्वचित्॥देवागारेबलीवर्दस्त
थाप्यश्नातिभोजनं॥१॥श्रीव्यासस्य॥ अनतिसीदतिसेकतवर्त्म
निप्रचुरभारभरक्षपितोक्षके॥गुरुभरोद्धरणोद्धुरकंधरःस्मरतिसा
रथिरघधुरंधरं॥२॥मार्गेकर्दमदुर्गमेजलभृतेगर्ताशतैराकुलेखि
न्नेशाकटिकेभरेतिविषमेदूरंगतेरोधसि॥शब्दैनैतदहंब्रवीमिम
हताहत्वोच्छ्रितांतर्जनीमीदृक्षेविषमेविहायधवलंवोढुंक्षमःको
धुरं॥३॥दंताःसप्तवलंविषाणयुगलंपुच्छांचलःकर्बुरःकुक्षिश्चं
द्रकितोवपुःकुसुमितंसत्यद्भुतंचेष्टितं॥ अस्मिन्दुष्टवृषेमृशा
मिनगुणग्रामानभिज्ञात्मनोग्रामीणस्यतथापिचेतसिचिरंधुर्ये
भ्रमःस्फूर्जति॥४॥केषांचिद्धवलाश्चिरंनिवसतांचित्तेपरासां
पुनर्नीलोवाकपिलोथवावरवृषोरक्तोथवामेचकः॥ग्रामीणेरव

धीरितोपिशिथिलस्कंधोप्यनुच्चैःश्रवाःस्वांतेमेपरतंत्रतंडुलतनु
र्जागर्त्स्यपंकर्बुरः॥५॥श्रीकंठस्य॥गुरुर्नायंभारःक्वचिदपिनपंथा
स्त्रुटितोननेकुंठाशक्तिर्वहनमपितेंगेनविकलं॥इहद्वंगेनान्य॰
स्तवगुणसमानस्तदधुनाधुनानेनस्कंधंधवलकिमुत्सुकःपथि
भरः॥६॥नध्यानंकुरुषेनयासिविकटंनोच्चैर्वहस्याननं दर्पान्नो
ल्लिखसिक्षितिंखुरपुटैर्नावज्ञयावीक्ष्यसे॥किंतुत्वंवसुधातले॰
कधवलःस्कंधाधिरूढेभरेतीराण्यद्यतटीविटंकविषमान्युल्लंघय॰
न्नीक्षसे॥७॥यस्यादौव्रजमंडनस्यवहतोगुर्वींधुरंधैर्यतोधौरेयैः
प्रगुणीकृतस्ययुगपत्स्कंधैःसमस्तैरपि॥तस्यैवंश्लथकंबलस्य
धवलस्योत्थापनेसांप्रतंद्रागत्रैवजरावसीदितनोर्गोपुण्यमुन्ने
ष्यते॥८॥एतानिबालधवलप्रविहायकामंगोष्ठांगणेतरलतर्णक
चेष्टितानि॥स्कंधंनिधेहिधुरिपूर्वधुरीणमुक्तेनेतव्यतामुपगतो॰
स्तितवैवभारः॥९॥नखनतिखुरैःक्षोणीपृष्ठंननर्दतिसादरंप्रकृति
पुरुषंप्रेक्षाप्यग्रेनकुप्यतिगोतरं॥वहतिचधुरंधुर्योधैर्यादनुद्धतकंध
रोजगतिगुणिनःकार्यौदार्यात्सरानतिशेरते॥१०॥नदेवसेवया
यातिकर्मबंधःपरिक्षयं॥जघासघासमेवासौबलीवर्दःकपर्दिनः
॥११॥इतिश्रीवृ॰शार्ङ्गधरविरचितायांपद्धत्यांवृषभान्योक्तिपरिच्छेदः

अथसामान्यवृक्षान्योक्तयः

किंजातोसिचतुष्पथेघनतरोच्छन्नोसिकिंछाययाच्छन्नश्चेत्फलितो
सिकिंयदिफलैःपूर्णोसिकिंसन्नतः॥हेसद्वृक्षसहस्वसंप्रतिसखे॰
शाखाशिखोत्कर्षणक्षोभामोटनजंभनाविजननतःस्वैरंबदुश्चेष्टितैः
॥१॥भगदत्तज्ञानधर्मणः॥छायासुप्तमृगःशकुंतनिवहैर्विष्वग्विलि
प्तच्छदःकीटैरावृतकोटरःकपिकुलैःस्कंधेकृतप्रश्रयः॥विस्रब्धंम॰
धुपैर्निपीतकुसुमःश्लाघ्यःसएकस्तरुर्यत्रांगीकृतसत्वसंप्लवभरे
भग्नाःपदोन्येद्रुमाः॥२॥बीजकस्य॥शाखाशतचितविपत्तःसंति॰
किंयंतोनकाननेतरवः॥परिमलभरमिलदलिकुलदलितदलाःशा
खिनोविरलाः॥३॥वैद्यभानुपंडितस्य॥इहोद्यानेसंप्रत्यहहपरि॰

शिष्टाःक्रमवशादमीवल्मीकास्तेभुजगकुललीलावसतयः॥गतास्तेविस्तीर्णस्तवकभरसौरभ्यलहरीपरीतव्योमानःप्रकृतिशुरवःकेपितरवः॥४॥तीव्रोनिदाघसमयोवहुपथिकजनाश्चमारवःपंथाः॥मार्गस्थस्तरुरेकःकियतांसंतापमपहरति॥५॥सत्यग्रैःपत्रनिचयैस्तरुर्यैरेवशोभितः॥जहातिजीर्णास्तानेवकिंवाचित्रंकुजन्मनः॥६॥रोलंबैर्नविलंवितंविघटितंधूमाकुलैःकोकिलैर्मायूरैश्चलितंपुरेवरभसाकीरैरधीरैर्गतं॥एकेनापिसुपल्लवेनतरुणादावनलोपप्लवःकोसौयोनविपत्सुमुंचतिजनोमूर्ध्नापियोलालितः॥७॥पत्रपुष्पफलच्छायामूलवल्कलदारुभिः॥धन्यामहीरुहायेभ्योनिराशायांतिनार्थिनः॥८॥छायावंतोगतव्यालाःस्वारोहाःफलदायिनः॥मार्गद्रुमामहांतश्चपरेषामेवभूतये॥९॥भुक्तंस्वादुफलंकृतंचशयनंशाखाग्रजैःपल्लवैस्तच्छायापरिशीतलंसुललितंपीतंव्यपेतश्रमैः॥विश्रांताःसुचिरंपरंसुमनसःप्रीतिःकिमत्रोच्यतेत्वंसन्मार्गतरुर्वयंचपथिका यामःपुनर्दर्शनं॥१०॥केषामप्येते॥भुक्तानियैस्तवफलानिपचेलिमानिक्रोडस्थितैरहहवीतभयैःप्रसुप्तं॥तेपक्षिणोजलरयेणविकृष्यमाणंपश्यंतिपादपभवंतममीतटस्थाः॥११॥महादेवस्य॥विपन्नंपद्मिन्यामृतमनिमिषैर्यातमलिभिःखगैरप्युड्डीनंरथचरणहंसप्रभृतिभिः॥दशांदीनांनीतेसरसिविषमग्रीष्मदिवसैःकुलीनत्वादास्तेतटरुहतरुःकोपितदपि॥१२॥नागयेयस्य॥शाखोटशाल्मलिपलाशकरीरकाद्याःशृण्वंतुपुण्यनिलयोयदसौवसंतः॥युष्मभ्यमर्थयतुपल्लवपुष्पलक्ष्मींसौरभ्यसंभवविधिस्तुविधेरधीनः॥१३॥गंगदेवस्य॥पांथाधारइतिद्विजाश्रयइतिश्लाघ्यस्तरूणामितिस्निग्धच्छायइतिप्रियोदृशइतिस्थानंगुणानामिति॥पर्यालोच्यमहातरोतवघनच्छायांवयंसंश्रितास्तत्तत्कोटरवासिनोहिरसनादूरीकरिष्यंतिनः॥१४॥हिमसमयोवनवह्निर्दवनःपवनस्तडिल्लताभिभवः॥हंतसहंतेयावत्तावद्द्रुमकुरुपरोपकृतिं॥१५॥येपूर्वंपरि

पालिताफलभरछायादिभिःप्राणिनोविश्रामद्रुमकथ्यतांतवविप
त्कालेकृतेसांप्रतं॥एताःसंगतिमात्रकल्पितपुरस्कारास्तुधन्या
स्त्वचोयासांछेदनमंतरेणपतितोनायंकुठारस्त्वयि॥१६॥वृद्धिर्य
स्यतरोर्मनोरथशतैराशावताप्रार्थिताजातोसौसरसःप्रकाशफल
दःसर्वाश्रयोपाश्रितः॥नानादेशसमागतैरविदितैराक्रांतमन्यैःख
गैस्तल्लब्धावसरेपिहंतशकुनिर्दूरेस्थितोवीक्षते॥१७॥केषामप्ये
ते॥मूलंस्थूलमतीवबंधनदृढंशाखाःशतंमांसलावासोदुर्गमही
धरेतरुपतेकुत्राऽस्तिभीतिस्तव॥एकःकिंतुमनागयंजनयतिस्वां
तेममाऽधिज्वरंज्वालालीवलयीभवन्नकरुणोदावानलोघस्म॰
रः॥१८॥धत्तेभरंकुसुमपत्रफलावलीनांघर्मव्यथांवहतिशीतभवां
रुजंच॥योदेहमर्पयतिचान्यसुखस्यहेतोस्तस्मैवदान्यगुरवेत
रवेनमस्ते॥१९॥कश्चिन्नवंपल्लवमादधातिकश्चित्प्रसूनानिफ
लानिकश्चित्॥परंकरालेऽस्यनिदाघकालेमूलेनदातासलिल
स्यकश्चित्॥२०॥इयंबालावल्लीमृदुकिसलयंतापविलयंघनच्छा
यंशालंनवमतिविशालंपरिगता॥परंत्वस्याभ्यंतर्गरललवभस्मी
कृतवनंभुजंगंप्रोत्तुंगंकथमिववराकीकलयतु॥२१॥ ॥इतिश्री
हहत्शार्ङ्गधरविरचितायांपद्धत्यांसामान्यवृक्षान्योक्तिपरिच्छे॰

अथवृक्षविशेषास्तत्रादौकल्पद्रुमः

कल्पद्रुमोपिकालेनभवेद्यदिफलप्रदः॥ कोविशेषस्ततस्तस्यव
न्यैरन्यैर्महीरुहैः॥१॥स्वर्णैःस्कंधपरिग्रहोमरकतैरुल्लासिताःप॰
ल्लवामुक्ताभिस्तवकश्रियोमधुलिहांरत्नानिनीलोत्पलैः॥संक॰
ल्पानुविधायियस्यफलितंकस्तस्यधत्ते तुलांधिग्जातिंद्रुमसं
कथासुयदयंकल्पद्रुमोपिद्रुमः॥२॥बिल्हणस्य॥औदार्यंभुवन
त्रयेऽपिविदितंसंभूतिरंभोनिधेर्वासोनंदनकाननेपरिमलोगीर्वा
णचेतोहरः॥एवंदातृगुणोत्करःसुरतरोःसर्वोऽपिलोकोत्तरःस्या
दर्थिप्रवराऽर्थितार्पणविधावेकोविवेकोयदि॥३॥नमयारचि
तंतवालवालंपयसावाविहितस्तवाभिषेकः॥अपिकल्प॰

तरोपरोपकारेभवतोविश्वविलक्षणःप्रकारः॥ ५॥ ९॥

॥ ॥ इतिश्रीवृहच्छारंगधरविरचितायांपद्धत्यां ॥ ॥

॥ ॥ कल्पवृक्षान्योक्तिपरिच्छेदः॥ ९॥ ९॥ ॥ ॥

अथपारिजाताः

परिमलसुरभितनभसोवहवःकनकाद्रिपरिसरेतरवः॥ तदपिसुराणांचेतसिनिवसितमिवपारिजातेन॥ १॥ वल्लभदेवस्य॥ इतिपा०

अथचंदनं

संस्येवगिलिताकाशा महीयांसोमहीरुहाः॥ तथापिजनताचित्तनंदनश्चंदनद्रुमः॥ १॥ हरिगणस्य॥ कांताकेलिंकलयतुतरुःकोपिकश्चित्प्रसूणामम्लानत्वंजनयतुफलैःकोपिलोकान्धुनोतु॥ धन्यंमन्येमलयजमहोयःप्रभूतोपतापंसंसारस्यद्रुतमपनयत्यात्मकायव्ययेन॥ २॥ शार्ङ्गधरस्य॥ केचिल्लोचनहारिणःकतिपयेसौरभ्यसंभारिणःकेप्यन्येफलधारिणःप्रतिदिशंतेसंतुहंतद्रुमाः॥ धन्योयंहरिचंदनःपरिसरेयस्यस्थितोशाखिभिःशाखोटादिभिरप्यहोमृगदृशामंगेषुलीलायितं॥ ३॥ पुष्पाकरस्य॥ भ्रातश्चंदनकिंब्रवीमिविटपस्फूर्जत्फणाभीषणागंधस्यापिमहामुखाःफणभृतोगुप्त्यैपदेतेकृताः॥ दैवात्पुष्पफलान्वितोयदिभवानत्रा भविष्यत्तदानोजानेकिमकल्पयिष्यदधिकंरक्षार्थमस्यात्मनः॥ ४॥ भोजस्य॥ एतैर्दक्षिणगंधवाहवहनैःश्रीखंडकिंसौरभंब्रूमस्तेपरितोमधुव्रतयुवायेनायमानीयते॥ माकंदादपहस्यपंकजवनादुद्धूयकेतोदलादुत्क्राम्यद्विपमंडमंडलदलादाकृष्यहृष्यन्मनाः॥ ५॥ यद्यपिचंदनविटपीविधिनाफलपुष्पवर्जितोविहितः॥ निजवपुषैवपरेषांतथापिसंतापमपहरति॥ ६॥ धिक्चेष्टितानिपरशोपरिशोचनीयवालप्रवालमलयाद्रिरुहद्रुहस्ते॥ निर्भिद्यमानहृदयोपिमहानुभावःसत्वन्मुखंपुनरभिःसुरभीकरोति॥ ७॥ वासःशैलशिलातलेषुसहजःसंगोभुजंगैःसहप्रेंखत्क्षारपयोधिवीचिभिरभूद्भूतस्यसेकक्रिया॥ जानीमोनवयं

प्रसीदतुभवान्श्रीखंडतत्कथ्यतांकस्मात्तेपरतापखंडनमहो
पांडित्यमभ्यागतं॥८॥आमोदैस्तेदिशिदिशिगतैर्दूरमाकृष्यमाणः
साक्षाल्लक्ष्मींतवमलयजद्रष्टुमभ्यागताःस्म॥किंपरश्रा
मःस्मभगभवतःक्रीडतिक्रोडएवव्यालस्तन्न्येभवतुकुशलंमुंच
नःसाधुयामः॥९॥मूलंभुजंगैःशिखरंप्लुवंगैःशाखाविहंगैःकुसु
मानिभृंगैः॥दातृत्वशक्तिःखलुचंदनस्यपरोपकारायसतांविभू
तयः॥१०॥नास्त्येवतच्चंदनपादपस्ययन्नाश्रितंसत्त्वभरैःसमंता
त्॥इतिपाठांतरेमुत्तरार्द्धं॥केषामप्येते॥लोकानंदनचंदनद्रुम
सखेनाऽस्मिन्वनेस्थीयतांदुर्वंशैःपरुषैरसारहृदयैराक्रांतमे
तद्वनं॥तेष्वन्योन्यनिघर्षजातदहनज्वालाऽऽवलीसंकुलानस्तान्येवकुलानिकेवलमिदंसर्वंदहेत्सुर्वनं॥११॥अयिमलयज
महिमाऽयंकस्यगिरामस्तुविषयस्ते॥उद्गिरतोयद्गरलंफणि
नःपुष्णासिपरिमलोद्गारैः॥१२॥पाटीरतवपटीयान्कःपरिपा
टीमिमामुरीकर्तुं॥यत्पिषतामपिनृणांपिष्टोऽपितनोषिपरिम
लैःपुष्टिं॥१३॥यैस्त्वंगुणगणवानपिसतांद्विजिह्वैरसेव्यनोनी
तः॥तानपिवहसिपटीरजकिंकथयामस्त्वदीयमौन्नत्यं॥१४॥
उपानीतंदूरात्परिमलमुपाघ्रायमरुतासमायासीदस्मिन्मधु
रमधुलोभान्मधुकरः॥परोदूरेलाभःकुपितफणिनश्चंदनतरोः
पुनर्जीवन्यायाद्यदितदिहलाभोयमतुलः॥१५॥एणाद्याःप
शवःकिरातपरिषन्नैषागुणग्राहिणीसंचारोस्तिननागरस्यविष
येच्छिन्नंमुनीनांमनः॥धूमेनातिसुगंधिनाऽत्रविपिनेदिक्चक्रमामोदयन्नामूलंपरिदह्यतेऽगरुतरुःकस्मैकिमाचक्ष्महे॥
१६॥कालागरोस्सुरभिताऽतिशयेपिसंगाद्दारभ्यतेसुरभिताऽपरपादपेपि॥पाटीरपाटवमिदंतवसंगिवातैस्तादात्म्यमेतिकतरो
नतरोःसमूहः॥१७॥आपत्स्वेववह्निमहताशक्तिरभिव्यज्यतेनसं
पत्सु॥अगरोस्तथानगंधःप्रागस्तियथाऽग्निपतितस्य॥१८॥
इतिश्रीवृ॰शार्ङ्गधरविरचितायांपद्धत्यांचंदनान्योक्तिपरिच्छेदः॥

अथागुरुः

अगुरुरितिवदतुलोकोगौरवमत्रैवपुनरहंमन्ये॥ दर्शितगुणैव
वृत्तिर्यस्यजनेजनितदाहेपि॥१॥ वल्लभदेवस्य॥ आरामाभरण
स्यपल्लवचयैरापीततिग्मत्विषःपाथोदप्रशमंनयागुरुतरोरे
तस्यदावज्वरं॥ ब्रूमस्त्वामुपकारकातरगतप्रायाःपयःसंपदो
दग्धोप्येषतरुर्दिशःपरिमलैरापूर्यनिर्वास्यति॥२॥इत्यगुरुः॥

अथचंपकः

अंतःप्रतप्तमरुसैकतदह्यमानमूलस्यचंपकतरोक्वविकासचिंता
॥प्रायोभवत्यनुचितस्थितिदेशभाजांश्रेयःस्वजीवपरिपालनमात्र
मेव॥१॥धर्मवर्द्धनस्य॥केनापिचंपकतरोवततरोपितोसिकुग्राम
पामरजनांतिकवाटिकायां॥ यत्रप्ररूढनवशाकविवर्धलोभा
द्गोभग्नवाटघटनोचितपल्लवोसि॥२॥विज्जकायाः॥उद्यानपा
लकलशांऽबुनिषेचनानामेतस्यचंपकतरोरयमेवकालः॥अस्मि
न्निदाघनिहतेघनवारिणावासंवर्धितेतववृथोभयथोपयोगः॥
॥३॥साधारणतरुबुध्यानमयाबद्धस्तवाऽऽलवालोऽपि॥लज्ज
यसिमामिदानींचंपकभुवनाऽधिवासिभिःकुसुमैः॥४॥यद्यपि
खदिराऽरण्येगुप्तोवस्तेहिचंपकोवृक्षः॥ तदपिचपरिमलमतु
लंदिशिदिशिकथयेत्समीरणस्तस्य॥५॥ इतिचंपकान्योक्तयः

अथाशोकः

किंतेनम्रतयाकिमुन्नततयाकिंवाघनच्छाययाकिंवापल्लवलील
याकिमनयाचाशोकपुष्पश्रिया॥यस्त्वन्मूलनिषण्णखिन्नपथि
कस्तोमंस्तुवन्नन्वहंनस्वादूनिमृदूनिखादतिफलान्याकंठमु
त्कंठितः॥१॥भोजस्य॥मृदूनांस्वादूनांलघुरपिफलानांनविभ
वस्तवाशोकस्तोकस्तवकमहिमासोप्यसुरभिः॥यदेतन्मेतन्वी
करचरणलावण्यसुभगंप्रवालंवालंस्यात्तरुषुसकलंकःकिमप
रः॥२॥सरस्वतीकुटुंबस्य॥रक्तस्त्वंनवपल्लवैरहमपिश्लाघ्यैः
प्रियायागुणैस्त्वामायांतिशिलीमुखाःस्मरधनुर्मुक्तास्तथामाम

पि॥कांतापादतलाऽहतिस्तवमुदेतद्वन्ममाऽप्यावयोःसर्वंतुल्यमशोककेवलमहंधात्रासशोकःकृतः॥३॥गर्वायसेविकचकोरकमंजुगुंजदुद्दृत्तषट्पदघटाविभवेनकिंनु॥वामभ्रुवांचरणताडनदोहदानिकिंनामनस्मरसितावद्शोकतानि॥४॥उन्मीलयंतिकुसुमानिमनोरमाणिकेनामनात्रतरवःसमयोचितानि॥कस्येदृशंकथययदोहदमस्तिनस्ययादृग्विनिर्मितमशोकमहीरुहस्य॥५॥

अथमालती

किंमालतीकुसुमताम्यसिनिष्ठुरेणकेनापियत्किलविलूनमितोलताग्रात्॥लोकोत्तरेणविलसद्गुणगौरवेणकोनामुनाशिरसिनामकरिष्यतित्वां॥१॥भ्रमेंद्रस्य॥म्रदीयस्त्वाधिक्यान्नभवतिविमर्दक्षममिदंनचान्येभ्योरूपेभवतिकुसुमेभ्योधिकतरं॥प्रसूनंमालिन्यास्तदपिहृदयाल्हादकरणंप्रवीणैरामोदैर्भवतिजगतोमौलिनिलयं॥२॥कस्यापि॥भवतिहृदयहारीकोपिकस्यापिहेतुर्नखलुगुणविशेषःप्रेमबंधप्रयोगे॥किसलयतिवनांतेकोकिलालापरम्येविकसतिनवसंतेमालतीकोत्रहेतुः॥३॥कस्यापि॥कुसुमस्तवकानम्राःसंत्येवपरितोलताः॥नथापिभ्रमरभ्रांतिंहरत्येकैवमालती॥४॥कस्यापि॥गुंजतिमंजुमिलिंदेमालतिमामौनमुपयासीः॥शिरसावदान्यगुरवःसादरमेनंवहंतिसुरतरवः॥५॥किंमालतिम्लापसियद्यविद्यश्चुचुंबतुंबीकुसुमंषडंघ्रिः॥पदैश्चतुर्भिर्हियुतःपशुश्चेत्सषड्घ्रिरध्यर्धपशुःकथंनो॥६॥मालतीकुसुमेभातिगुंजन्मत्तमधुव्रतः॥प्रयाणेपंचबाणस्यशंखमापूरयन्निव॥७॥इ०

अथमल्लिका

नचगंधवहेनचुंबितानचपीतामधुपेनमल्लिका॥पिहितैवकठोरशाखयापरिणामस्यजगामगोचरं॥१॥इतिमल्लिकान्योक्तिः

अथकेतकी

रोलंबस्यचिरायकेतकपरिष्वंगेष्वभंगोरसःसुज्ञातंबतकेतकस्यचमनोभृंगप्रसंगोत्सुकं॥जानात्येवमिथोनुरागमनयोःसर्वोपिनैसर्गिकंप्रत्यूहायदलेषुधिक्समभवन्मर्मोभिधःकंटकाः॥१॥कस्यापि॥पत्राणिकंटकशतैःपरिवेष्टितानिवार्तापिनास्तिमधुनोरजसांधकारैः॥आमोदमात्ररसिकेनमधुव्रतेननालोकि

तानितवकेतकिदूषणानि॥२॥ कस्यापि॥ एकास्तुकेतकिलतासुविकासिनीषुसौभाग्यमद्भुततरंभवतीविभर्त्ति॥यत्कंटकैर्व्यथितमात्मवपुर्नजानस्तामेवसेवितुमुपक्रुरुतेद्विरेफः॥३॥महादेवस्य॥ इतिश्रीवृ॰शा॰वि॰पद्धत्यांकेतकयन्योक्तिः॥४॥

अथपाटला

पाटलयावनमध्येकुसुमितयामोहितस्तथाभ्रमरः॥सैवेयमितियथाभूत्मतीतिरस्यान्यकुसुमेषु॥१॥शार्ङ्गधरस्य॥इतिपाटला

अथसहकारः

वेत्ताकोकिलएवज्ञातान्वरसालएवनियतमिदं॥यःपंचममुद्गायतियस्यास्तिपुलकमुकुलताच॥१॥ अधिश्रीरुद्यानेत्वमसिभवतःपल्लवचयोधुरीणःकल्याणोतवजगतिशाखाश्रमहरा॥मुदेपुष्पोल्लेखःफलमपिचतुष्ट्यैतनुभृतांरसालत्वांतस्मात्श्रयतिशतशःकोकिलकुलं॥२॥कस्यापि॥ नतादृक्कर्पूरेनचमलयजेनोमृगमदेफलेवापुष्पेवानवभवतियादृक्परिमलः॥परंत्वेकोदोषस्त्वयिखलुरसालेयदधिकःपिकेवाकाकेवालघुगुरुविशेषंनकुरुषे॥३॥कस्यापि॥उत्तंसकौतुकरसेनविलासिनीनांलूनानियस्यननवैरपिपल्लवानि॥उद्यानमंडपतरोसहकारसत्वमंगारकारकरगोचरतांगतोसि॥४॥उत्पलराजस्य॥कतिपल्लवितानपुष्पितावातरवःसंतिसमंततोवनांते॥जगतीविजयेतुपुष्पकेतोःसहकारीसहकारएकएव॥५॥कस्यापि॥योदृष्टःस्फुटदस्थिसंपुटवशान्निर्यत्नवालांकुरोदैवात्सद्विदलादिकक्रमवशादारूढशाखस्ततः॥स्निग्धंपल्लवितोघनंमुकुलितःस्फारच्छदंपुष्पितःसोत्कर्षंफलितोभृशंचविनतःकोप्येषनूनंद्रुमः॥॥६॥हेतुकस्य॥एतस्मिन्वनमार्गभूपरिसरेसौंदर्यमुद्रांकितःशाखाभिःफलपुष्पपत्रनिचयैश्चभृतःसएकःपरं॥येवीक्ष्यस्मितवक्त्रमुत्कृतमहासंतोषमुल्लासितस्फारोत्कंठमकुंठितक्रममभीधावंतिपांथव्रजाः॥७॥भट्टनायकस्य॥छायाफलानिमुकुला

निचयस्यविश्वसाल्हाद्यंतिसहकारमहीरुहस्य॥आमृष्यत
स्यशिखयानवपल्लवानिमग्नासिरेद्बहुताशहताशकष्टं॥८॥॰
कूष्मांडीफलविस्फलंनयदपिन्यग्रोधवन्नोच्चतारंभापत्रनिभंद॰
लंनकुसुमंनोकेतकीपुष्पवत्॥सौरभ्यंकुसुमेफलेनदपितत्किंचि
त्समुज्जृंभतेलोकोयेनरसालशालनिकरास्त्यक्तागुणांस्तौत्ति
ते॥९॥शार्ङ्गधरस्य॥यावत्फलोदयमुखःसहकारजातःप्रागेवकं
टकचयेनवृतोसितावत्॥छायापितेनसुलभाफलमस्तुदूरंत॰
न्निःफलोपिहिवरंगुणसेवयानः॥१०॥कस्यापि॥लोडितमखि
लंगहनंपरितोदृष्टाश्चविटपिनःसर्वे॥सहकारनप्रपेदेमधुपेन
तवोपमाजगति॥११॥गर्वमाकुरुशर्करेतवगुणान्जानंतिरा॰
ज्ञांगृहेयेदीनाधनवर्जिताश्चकृपणाःस्वप्नेऽपिपश्यंतिनो॥आ
म्रोऽहंमधुकूपकैर्ममफलैस्तृप्ताहिसर्वेजनाहेरंडेतवकिंगुणा
ममफलैस्तुल्यंनकिंचित्फलं॥१२॥उत्फुल्लरम्यसहकाररसा
लबंधोकूजत्पिकावलिनिवासतथाविधेहि॥गुंजद्भ्रमद्भ्रमरक
स्त्वयिबद्धतृष्णोनान्यान्प्रयातिपिचुमंदकरीरवृक्षान्॥१३॥॰
शश्वन्निसर्गमलिनाःसहकारकामंलुठंतितान्यपिमधूनितव
द्विरेफाः॥युक्तंनतत्तवकषायरसप्ररोहैरेतान्प्रतार यसिकिं
कलकंठयूनः॥१४॥फलितस्यरसालशाखिनःफलदानव्य॰
सनैकशालिनः॥विनिपात्यदलातुकःफलंश्रमसुप्ताध्वगपाणि
पल्लवे॥१५॥कतिकतिनवसंतेवल्लयःशाखिनोवाकिसलय
सुमनोभिःशोभमानावभूवुः॥तदपियुवजनानांप्रीतयेकेव॰
लोभूदभिनवकलिकालीभारशालीरसालः॥१६॥रेरेरसालतरु
सारवचोवधेहिवासंतिकीस्वफलपल्लवपुष्पलक्ष्मीः॥तावद्वि
कस्वरपिकद्विजसात्कुरुद्राकूनव्यग्रि तोसिकलभैःशलभै॰
श्चयावत्॥१७॥यद्यध्वनीनचिरमध्वनिधर्मखिन्नःकासारती
रुहमाश्रयनघमाघं॥छायांनकेवलमितःश्रमितालभंतेका
मंपचेलिमफलंविमलंजलंच॥१८॥उन्मीलद्रसबिंदुगंधकु

सुमावल्योवसंतोद्येकांताःकोमलपल्लवाःकतिकतिक्रोडाव॰
नेसंतिन ।।सौभाग्यैकनिधेरसालतदपिश्रीमंजरीशालिनस्त्व
त्तोऽन्यत्रचकुत्रचिन्मधुकरश्रेणीनविश्राम्यति।।१९।।सौरभ्य
गर्भमकरंदकरंबितानिपंकेरुहाण्यपिविहायसमागतस्त्वां
।।संसारसारसहकारतथाविधेहियेनोपहासविषयोनभवेद्द्वि
रेफः।।२०।।स्निग्धाग्राःफलिनोरताःपरिमलैःपौष्पैर्मधुस्यंदिनोना
नंदायभवंतिकिंवनभुवांभूमीरुहाभूरिशः।।माधुर्यंमधुनस्तवैव
परमंमाकंदमन्यामहेमाध्वीमर्मभिदोदृढंमधुलिहःसूतायतोमर्मणि ।।२१

अथपनसः

गरीयंसौरभ्यंरसपरिचयेनार्हतिसुधासितामृद्वीकापिप्रथिमनि
निमग्नःफलभरः।।परार्थैकेशश्रीरितिपुलकितंकंटकमिषादहो
तेचारित्रंपनससमनसःकस्यनमुदे।।१।।हृष्टाशाखावकीर्णफ
लभरनमितंभूमिभागावनद्धंत्यक्त्वाशालमकांडंपनससमुपगत
श्चिंतयित्वेतिकीरः।।हत्वाचंचुंप्रहर्षाद्विगलितपयसासंभृता
शेषपक्षो — भिन्नश्चोड्डीयगंतुंगगनपरिचितायागतिःसापिनष्टा।।२।।

अथकदली

तालीतरोरनुपकारिफलंफलित्वालज्जावशादुचितएवविना॰
शयोगः।।एतन्नचित्रमुपकृत्यफलैःपरेभ्यःप्राणान्निजानुज्झ॰
तीतियत्कदलीजहाति।।१।।कस्यापि।।इतिकदल्यन्योक्तिः।।४।।

अथद्राक्षा

यद्यपिनभवतिहानिःपरकीयांचरतिरासभोद्राक्षां।।असमंजसंतु
मत्वातथापिखलुखिद्यतेचेतः।।१।।द्राशेरकस्यदासीयंवदरीय
दिरोचते।।एतावतैवकिंद्राक्षानसाक्षादमृतप्रदा।।२।।इतिद्राक्षा।।

अथदाडिमः

आयुष्यप्रसरान्मनोहरतयाविश्वास्यविश्वंजनंहंहोदाडिमताव
देवसहसावृद्धिंस्वकीयामिह।।यावन्नेतिपरोपभोगसहतामेषांत
तस्त्वांतथाज्ञात्वातेहृदयंद्विधादलतियत्तेनातिवंद्योभवान्।।१।।

मयिजीवतिबीजाढ्येकिमन्येबीजपूरकाः॥ इतिसंचिंत्यमनसा
विदद्रेदाडिमीफलं॥२॥ भोजस्य॥ इतिश्रीदाडिमान्योक्तिः॥७॥

अथनालिकेरः

प्रथमवयसिपीतंतोयमल्पंस्मरंतःशिरसिनिहितभारानालिके
रानराणां॥ददतिफलमनल्पंस्वादुमाजीवितांतंनहिकृतमु
पकारंसाधवोविस्मरंति॥ कस्यापि॥१॥ इतिनालिकेरः॥७॥

अथतालः

अध्वन्यध्वनिभूरुहःफलभृतोनम्रानुपेक्ष्याद्दूरात्तद्दूराद्दुन्नति
संश्रयव्यसनिनःपांथस्यमूढात्मनः॥यन्मूलंसमुपागतस्यमधु
रच्छायाफलैःकाकथाशीर्णेनापिहिनोपयोगमगमत्पर्णेनतालद्रुमः॥१

अथभूर्जः

दौर्जन्यमात्मनिपरंप्रथितंविधात्राभूर्जद्रुमस्यविफलस्यसमर्प
णेन॥किंचर्मभिर्निशितशस्त्रप्रपातावकृत्तैराशांनपूरयतिसोर्थिप
रंपराणां॥१॥गोविंदराजस्य॥कुर्वंतुनामजनतोपकृतिंप्रसून
च्छायाफलैरविकलैःकुसुमैर्द्रुमास्ते॥सोढास्त्रकर्तनरुजःपर
रक्षणार्थमेकेनभूर्जतरुणाकरुणापरेण॥२॥वैद्यभानुपंडितस्य॥

अथाश्वत्थः

वर्धितैःसेवितैःकिंतैःसत्यश्वत्थेन्यपादपैः॥वर्धितोनरकाद्रक्षेत्स्पृ
ष्टोरिष्टानिहंतियः॥१॥मागधमाधवस्य॥इतिअश्वत्थान्योक्तिः

अथन्यग्रोधः

विस्तीर्णोदीर्घशाखाश्रितशकुनिशतःशाखिनामग्रणीस्त्वंन्यग्रो
धक्रोधमंतःप्रकटयसिनचेद्वच्मिकिंचित्तदल्पं॥जल्पोप्येषत्र
पाकृत्यलघुपरिकराक्वापिकूष्मांडवल्लीपल्लीपृष्ठप्रतिष्ठाहसतिहि
फलनेत्वत्फलानांकिमन्यत्॥१॥ कस्यापि॥महातरुर्वाभवतिसमू
लोवाविनश्यति॥नांतरप्रत्ययानेतिन्यग्रोधकलिकांकुरः॥२॥७॥

अथमधूकः

तत्तेजस्तरुणेनिदाघसमयेतद्धारिमेघागमे तज्जाड्यंशिशिरेमदे

कशरणैःसोढुंपुरायैर्दलैः॥आयातोप्यधुनाफलस्यसमयःकोयंविनातैरितिस्मृत्वातानिशुचेवरोदित्तिगलत्पुष्पैर्मधूकद्रुमः॥॥१॥मूलादेवयदस्यविस्तृतिभरच्छायाप्यनन्यादृशीतेयस्यप्रसवाःस्रमंजुलरसैरानंदयंतःप्रजाः॥स्नेहंचप्रकटीकरोतिपरमंभूयःफलानांगुणैर्हित्वैकैकगुणांस्तरून्भजसखेतस्मान्मधूकद्रुमं॥२

अथशाल्मलिः

हंसाःपद्मवनाशयामधुलिहःसौरभ्यलाभाशयापांथाःस्वादुफलाशयावलिभुजोगृध्राश्चमांसाशया॥दूरादुन्नतपुष्परागनिकरैर्निःसारमिथ्योन्नतेरेरेशाल्मलिपादपप्रतिदिनंकेनत्वमावंचिताः॥१॥कस्यापि॥कायःकंटकभूषितोनचघनच्छायाकृतःपल्लवाःपुष्पाणिच्युतसौरभाणिनदलश्रेणीमनोहारिणी॥किंब्रूमःफलपाकमस्ययदुपन्यासेपिलज्जामहेतज्ज्ञोःकेनगुणेनशाल्मलितरोजातोसिसीमद्रुमः॥२॥कस्यापि॥इतिशाल्मलिः

अथनिंबः

निंबकिंबहुनोक्तेननिःफलानिफलानिते॥यानिसंजातपाकानिकाकानिःशेषयंत्यमी॥१॥यस्मादर्थिजनोमनोभिलषितंलब्धासुखामेदुरःसार्धंबंधुजनैश्चकारविविधान्भोगान्विलासोद्धुरः॥तंदैवेनविवेकशून्यमनसानिर्मूल्यचूतद्रुमंस्थानेतस्यतुकाकलोकवसतिर्निंबःसमारोपितः॥२॥यश्चनिंबंपरशुनायश्चैनंमधुसर्पिषा॥यश्चैनंगंधमाल्याद्यैःसर्वस्यकटुरेवसः॥३॥इतिनिंबः॥

अथबब्बुलः

गात्रंकंटकसंकटंप्रविरलच्छायानतापापहानिर्गंधःकुसुमोत्करस्तवफलंनक्षुद्विनाशक्षमं॥बब्बूलद्रुममूलमेतिनजनस्तत्तावदास्तामहोअन्येषामपिशाखिनांफलवतांगुणैर्हृतिर्यास्यते॥१॥

अथखदिरः

पदंतदिहनास्तियन्नखदिरैःखरैरावृतंनतेपिखदिरानमेकुटिलकंटकैराहताः॥नतेकुटिलकंटकाःकिमपियेनमर्मच्छिदःसमुज्ज

तदृथास्थितंवत सहध्वमध्वश्रमं॥१॥ चेद्नेविषधरान्सहामहे वल्कसुंदरमशुक्तिमल्लुतः॥ रक्षितुंवद्किमात्मसौष्ठवं संचिताःखदिरकंटकास्त्वया॥२॥ भल्लाटस्य॥ इतिश्रीखदिरान्योक्तिः॥

अथकिंशुकः

किंशुकेशुकमातिष्ठचिरभाविफलाशया॥ वाह्यरंगप्रसंगेन केकेनानेनवंचिताः॥१॥ किंशुके किंशुकः कुर्यात्फलितेपिबुभुक्षितः॥ अस्थानरिसमृद्धेपि किंकुर्युरुपरिजीविनः॥२॥ कस्यापि॥ किंशुककिंशुकमुखवल्कुसुमानिविकासयस्यनिशं॥ यस्यां जनोऽनुरागीसागीरैतैःकदापिनोच्चार्या॥३॥इतिकिंशुकः॥॥

अथशाखोटः

कस्त्वंभोःकथयामिदैवहतकंमांविद्धिशाखोटकंवैराग्यादिववृक्षसाधुविदितंकस्मादिदंभाषसे॥ वामेनात्रवटस्तमध्वगजनःसर्वात्मनासेवतेनच्छायापिपरोपकारकृतयेमार्गस्थितस्यापिमे॥१॥

अथपीलुः

धन्याःस्वस्थफलाअपिप्रियतमास्तेपीलुरस्याःक्षितौक्षुत्क्षीणेनजनेनहिप्रतिदिनंयेषांफलंभुज्यते॥ किंतैस्तत्रमहाफलैरपिपुनःकल्पद्रुमाद्यैर्द्रुमैर्येषांनामसमनागपिश्रमनुदेच्छायापिनप्राप्यते॥१॥ शक्तिकुमारस्य॥ इतिश्रीपील्वन्योक्तिः॥छ॥

अथकरीरः

फलंदूरतरेप्यास्तांपुष्पासिकुस्मैजनान्॥ इतरास्तरवोमन्ये करीरतवकिंकराः॥१॥ किंपुष्पैःकिंफलैस्तस्यकरीरस्यदुरात्मनः॥ येनवृद्धिंसमासाद्यनकृतःपात्रसंग्रहः॥२॥ इतिकरीरः॥॥

अथबिल्वः

आमोदीनिस्कमेदुराणिचमृदुस्वादूनिचस्मारुहामुद्यानेषुवनेषुलब्धजनुषांसंतीतरेषामपि॥ किंतुश्रीफललाभवैवजयिनीमालूरदिङ्मण्डले यस्यैतानिफलानियौवनवतीवक्षोजलक्ष्मीगृहाः॥१॥ कस्यापि॥ इतिबिल्वान्योक्तिः॥छ॥छ॥॥

अथशालः

शाखासंततिसन्निरुद्धनभसोभूयांसएवावनौविद्यंतेतरवःफ
लैरविकलैरार्त्तिच्छिदःप्राणिनां॥किंतुद्वित्रिदलैरलंकृततनोशा
लेऽनुमस्तुंगतांदत्वायेननिजंशिरःसुकृतिनाकेनामनप्रीणितः॥१॥

अथपलाशः

उपनदिपुलिनेमहापलाशःपवनसमुच्छलदेकपत्रपाणिः॥दव
दहनविनष्टजीवितानांसलिलमिवैषददातिपादपानां॥ १॥

अथेक्षुः

परार्थेयःपीडामनुभवतिभंगेपिमधुरोयदीयःसर्वेषामिहखलुवि
कारोप्यभिमतः॥नसंप्राप्तोवृद्धिंयदिसभृशमक्षेत्रपतितःकिमि
क्षोर्दोषोसौनपुनरगुणायामरुभुवः॥१॥ इन्द्रराजस्य॥सुखेयद्वै
रस्यंवपुरपिपुनर्ग्रंथिनिचितंनसंतप्तःकोपिक्षणमपिभजेन्मूल
मभितः॥फलंचैवाप्राप्यंवितथशरलिम्नस्यभवतस्तदिक्षोर्नि
युक्तंविहितमितरैर्यंत्रदलनं॥२॥कस्यापि॥कांतोसिनित्यमधु
रोसिरसाकुलोसिकिंचासिपंचशरकार्मुकमद्वितीयं॥इक्षोतवा
स्तिसकलंपरमेकनूनंयत्सेवितोभजसिनीरसतांक्रमेण॥३॥ ॥

अथकर्पासः

श्लाघ्यंक र्पासफलंयस्यगुणैरंध्रवंतिविहितानि॥मुक्ताफलानि
तरुणीकुचकलशतटेषुविलसंति॥१॥निःशेषोस्थितियस्यदुः
सहतरंप्राप्तंतुलारोहणंग्राम्यस्त्रीनखलुंचनव्यतिकरस्तंत्रीप्र
हारव्यथा॥मातंगोज्झिततुंडवारिकिणिकापानंचकूर्चाहतिः
कार्पासेनपरार्थसाधनविधौकिंकिंनचांगीकृतं॥२॥नीरसान्यपि
रोचंतेकार्पासस्यफलानिनः॥येषांगुण मयंजन्मपरेषांगुह्यगुप्तये॥
॥३॥कार्पासकृतकूर्पासशतैरपिनशाम्यति॥शीतंप्रीतोदरीपी
नवक्षोजालिंगनंविना॥४॥केषामप्येते॥इतिकार्पासान्योक्तिः॥

अथशणः

भूर्नःपरोपकृतयेनिजकवचविकर्तनंसहते॥परबंधनायतुश

णःप्रेक्षध्वमिहांतरंकीदृक्॥१॥ वल्लभस्य॥ इतिशणान्योक्तिः॥

अथकंटकारिका

उचितंनामनारिंग्याकेतक्यामपिकंटकाः॥ रसगंडोज्झितेकिंतेकंटकाकंटकारिके॥ कस्यापि॥ इतिकंटकारिकान्योक्तिः॥॥

अथधत्तूरः

महेशस्त्वांधत्तेशिरसिरसराजस्यजयिनीविभुतिस्त्वत्संगात्कनकमयमेतत्त्रिभुवनं॥ तनोतित्वत्सेवाननुकनकवृक्षस्त्वदपरः परःकोनुस्यात्तद्यदिनसुलभीभावमभजः॥१॥ मल्हादनस्य॥ उन्मत्तधूर्ततरुणेंदुनिवासयोग्येस्थानेपिशाचपतिनाविनिवेशितोऽसि॥ किंकैरवाणिविकसंतितमःप्रयातिचंद्रोपलोद्रवतिवार्धिरुपैतिवृद्धिं॥२॥ धत्तूरकंटकफलप्रतिरोधबुध्यावैरंवृथैवकुरुषेपनसेनसार्धं॥ संतोहसंतिनभजंतिचचेतसात्वांभ्रांताभवंतिपुरुषास्तवसेवनेन३

अथतृणानि

उत्तुंगैस्तरुभिःकिमेभिरखिलैराकाशसंस्पर्द्धिभिर्धन्योसौनितरामुलूपविटपीनद्यास्तटेवस्थितः॥ एवंयःकृतबुद्धिरुद्धतजलव्यालोलवीचीवशान्मज्जंतंजनमुद्धरामिसहसातेनैवमज्जामिवा॥१॥ राणाकस्य॥ रूढस्यसिंधुतटमनुगतस्यतृणस्यापिजन्मकल्याणं॥ यत्सलिलमज्जदाकुलजनस्यहस्तावलंबनंभवति२

अथतांबूलं

वल्लीनांकतिनस्फुरंतिपरितःपत्राणिकिंतैरिहस्निग्धैरप्यतिकोमलैरपिनिजामेवाश्रयद्भिःश्रियं॥ तानेवस्तुमहेमहाजनमुखश्रीकारिजन्मव्रतान्यान्सूतेनवनागरप्रियतमान् तांबूलवल्लीदलान्॥१॥ किंवीरुधोभुविनसंतिसहस्रशोन्या यासांदलानिनपरोपकृतिंभजंते॥ एकैववल्लिषुविराजतिनागवल्लीयानागरीवदनचन्द्रमलंकरोति॥२॥ कस्यापि॥ इतितांबूलवल्ल्यः

अथतुंबी

सर्वास्तुंब्यःसमकटुरसास्तुंबिवल्लीप्रसूतास्तासांबद्धाअपिक

त्तिपयादुस्तरंतारयंति॥शब्दायंतेसरसमपराःशुष्ककाष्टेविलग्नास्तन्मध्येन्याज्वलितहृदयाःशोणितंसंपिबंति॥१॥इति॰

अथबकुलान्योक्तिः

निसर्गादारामेतरुकुलसमारोपसुकृतीकृतीमालाकारोबकुलमपिकुत्राऽपिनिद्धे॥इदंकोजानीतेयदयमिहकोणांऽतरगतोजगज्जालंकर्त्ताकुसुमभरसौरभ्यभरितं॥१॥इतिबकुलान्योक्तिः॥

अथपद्मिन्यन्योक्तिः

अयिमकरंदस्यंदिनिपद्मिनिमन्येतवैवसुभगत्वं॥पुष्पवतीमपिभवतींत्यजतिनवृद्धःसुचिर्हंसः॥१॥कमलिनिमलिनीकरोषिचेतःकिमितिबकैरवहेलिताऽनभिज्ञैः॥परिणतमकरंदमार्मिकास्तेजगतिभवंतुचिरायुषोमिलिंदाः॥२॥इतिपद्मिन्य॰॥

अथकस्तूरिकान्योक्तिः

अयिबतगुरुगर्वंमास्मकस्तूरियासीरखिलपरिमलानांमौलिनासौरभेण॥गिरिगहनगुहायांलीनमत्यंतदीनंस्वजनकममुनैवप्राणहीनंकरोषि॥१॥अयिस्त्यक्तासिकस्तूरिपामरैःपंकशंकया॥अलंखेदेनभूपालाःकिंनसंतिमहीतले॥२॥जन्मस्थानंनखलुविमलंवर्णनीयोनवर्णोदूरेपुंसांवपुषिरचनापंकशंकांकरोति॥यद्यप्येवंसकलसुरभिद्रव्यगर्वाऽपहारीकोजानीतेपरिमलगुणःकोऽपिकस्तूरिकायाः॥३॥इतिकस्तूरिकान्योक्तिः॥ छ॥

इतिश्रीबृहच्छार्ङ्गधरविरचितायांपद्धत्यांवृक्षविशेषान्योक्तिपरि॰॥

अथपर्वतान्योक्तयः

विंध्यमंदरसुमेरुभूभृतांयत्पतिस्तुहिनपर्वतोभवत्॥ईश्वरश्वशुरताप्रभावतस्तद्भवंजगतिजृंभतेयशः॥१॥शार्ङ्गधरस्य॥येसंतोषसुखप्रबोधमनसस्तेषांनभिन्नामृदोयेप्यन्येधनलोभसंकुलधियस्तेषांतुदूरेनृणां॥इत्थंकस्यकृतेकृतःसविधिनातादृक्पदंसंपदांस्वात्मन्येवसमाप्तहेममहिमामेरुर्नमेरोचते॥२॥विद्यापतेः॥आचस्वमहेतबकिमद्यतनीमवस्थांतस्याद्यविंध्यशि

खरस्यमहाव्रतस्य ।। यत्रैवसप्तमुनयस्तपसानिषेदुःसोयंकिलाद्यवसतिःपिशिताशनानां ।। ३ ।। कस्यापि ।। किंतेनहेमगिरिणारजताद्रिणावायत्रस्थितास्तरव स्तरवस्तएव ।। मन्यामहेमलयमेवयदाश्रयेणशाखोटनिंबकुटजा अपिचंदनानि ।। ४ ।। कस्यापि ।। सुरारातिर्लक्ष्मींत्रिपुरविजयीशीतकिरणंकरींद्रंपौलोमीपतिरपिचलेभेजलनिधेः ।। त्वयाकिंवालब्धंकथयमथितोमंदरगिरे शरण्यःशैलानांयद्यमद्यंरत्ननिलयः ।। ५ ।। शाक्राद्रक्षियदिपक्षिसुगंतथापिमेनाकसंततिवनेहगतागतानि ।। निःसत्वताचनिरपत्रपताचकिंतुपाथोनिधौनिपतिताभवतर्जिनात्र ।। ६ ।। कस्यापि ।। एकस्यायमुदेतिमूर्द्धनिगिरेरन्यस्यचैषक्रमादस्तंयातिकलानिधेस्तदुभयोरस्तःप्रशस्तोचलः ।। कोनामोदयिनंकरोतिनशिरोमाणिक्यमस्तंपुनर्यातंयःकुरुतेभवानिवसदुःप्रापोस्तिपृथ्वीतले ।। ७ ।। कस्यापि ।। रोहणाचलशैलेषुकस्तुलांकलयेत्तव ।। यस्यपाषाणखंडानिमंडनानिमहीभृतां ।। ८ ।। प्रल्हादनस्य ।। रत्नानांनकिमालयोजलनिधिः किंनस्थिरामेदिनीकिंनव्योममहत्पदंसुकृतिनांकिंनामनैवोन्नतां ।। हंहोरोहणकिंनयाचकचमूर्निःसंकटंकोस्तिक्षांतिःस्वीकरणेनगोत्रतिलकस्त्रैलोक्यवंद्योभवान् ।। ९ ।। कस्यापि ।। नाधन्यानांनिवासंविदधतिगिरयःशेखरीभूतचंद्राःशृंगै ज्योत्स्नाप्रवाहंद्रुतमिवतुहिनंदिङ्मुखेषुक्षिपंतः ।। येषामुच्चैस्तरूणामविहतगतिनावायुनाकंपितानामाकाशेविप्रकीर्णाकुसुममवयद्वाभातिताराग्रहौघः ।। ।। १० ।। यामस्तेशिवमस्तरोहणगिरेमत्तःस्थितिमच्युतावर्त्तिष्यतिकथं कथंकथमपिस्वप्नेपिमेवंकथाः ।। भ्रातस्तेमणयोवयंयदिभवन्नामप्रसिद्धास्ततःकिंशृंगारपरायणाःक्षितिभुजोनांगीकरिष्यंतिनः ।। ११ ।। इतिश्रीर०शा०वि०प० पर्वतान्योक्तिपरिच्छेदः ।।

अथगिरिनिर्झरः

कल्लोलसंचलदगाधजलैरलोलैःकल्लोलिनीपरिवृढैःकिमपेयतो

यैः॥जीयात्सजर्जरतनुर्गिरिनिर्झरोयंयद्विप्रयापितृषितावित्
षीभवंति॥१॥ यद्वैभवायनिजवारिणिवारिसिंधोःक्षारंविमिश्रय
सिनिर्झरतद्वृथैव॥धिग्वैभवंतुतद्भीतृषितास्तवैवनीरापहं
तमधुरामकरंकिरंति॥२॥ इतिगिरिनिर्झरः॥ ० ॥ ० ॥ ०॥

अथागस्त्यान्योक्तयः

कंपंतेगिरयःपुरंदरभियामैनाकमुख्याःपुनःक्रंदंत्यंबुधराःस्फुरं
तिवडवावक्रोद्गतावन्हयः॥भोकुंभोद्भवमुच्यतांजलनिधिःस्व
स्त्यस्तुतेसांप्रतंनिद्रालुःश्लथबाहुवल्लिकमलाश्लेषीहरिःसीदं
ति॥१॥ कस्यापि॥अखर्वपर्वगतोस्यविच्छिन्नोयस्यवारिधिः॥
हास्यएवमुनेःपाणिरधस्ताद्विंध्यभूभृतः॥२॥ कस्यापि॥अल्पी
यसैवपयसायत्कुंभःपूर्यतेप्रसिद्धंतत्॥ब्राह्म्यंतेजःपश्यतकुं
भोद्भूतःपपौजलधिं॥३॥ कयोरपि॥ इतिश्रीअगस्त्यान्योक्तिपरि०॥

अथसमुद्रान्योक्तयः

नावज्ञानाथवैदग्ध्यादुदधेर्मह्निमैवसः॥यत्तीरपंकमग्नानिमहा
रत्नानिशेरते॥१॥ यद्यपिबद्धःशैलैर्यद्यपिगिरिमथनमुषितसर्व
स्वः॥तदपिविभीतकभूधररक्षाविधोदीक्षितोजलधिः॥२॥ यद्यपि
स्वच्छभावेनदर्शयत्युदधिर्मणीन्॥तथापिजानुदध्नोयमितिचे
तसिमाकृथाः॥३॥रत्नैरापूरितस्यापिमदलेशोस्तिनांबुधेः॥मु
क्ताःकतिपयाःप्राप्यमातंगामदविह्वलाः॥४॥ अधःकरोषियद्र
त्नंमूर्ध्नाधारयसेतृणं॥ दोषस्तवैषजलधेरत्नंरत्नंतृणंतृणं॥५॥
केषामप्येते॥स्वस्त्यस्तुविद्रुमवनायनमोमणिभ्यःकल्याणिनी
भवतुमौक्तिकशुक्तिमाला॥प्राप्तंमयासकलमेवफलंपयोधेर्यद्दा
रुणैर्जलचरैर्नविदारितोस्मि॥६॥ इंद्रकवेः॥आदायवारिपरितः
सरितांमुखेभ्यःकिंतावदर्जितमनेनदुरर्णवेन॥क्षारीकृतंचवड
वादहनेहुतंचपातालकुक्षिकुहरेविनिवेशितंच॥७॥ श्रीशुकस्य॥
ग्रावाणोमणयोहरिर्जलचरोलक्ष्मीःपयोमानुषीमुक्तौघाःसिकताः
प्रवाललतिकाःशैवालमंभःसुधा॥तीरेकल्पमहीरुहःकिमपरंनाम्ना

पिरत्नाकरोदूरेकर्णरसायनंनिकटतस्तृष्णापिनोशाम्यति॥८॥क
स्यापि॥ एतस्मादमृतंसुरैःशतमखेनोच्चैःश्रवाःसद्गुणःकृष्णेना
हुतविभ्रमैकवसतिर्लक्ष्मीःसमासादिता ॥ इत्यादिप्रचुराःपुरात
नकथाःसर्वेभ्यएवंश्रुताअस्माभिर्नचदृष्टमत्रजलधौमिष्टंपयो
पिकिंचित्॥९॥कस्यापि॥संख्येयानिभवंतितेयुगशतैर्गांभीर्यमु
ख्यागुणाःसत्यंवारिनिधेलवापितदिदंचित्तेविधत्तेव्यथां॥ स्व
च्छंदेनतिमिंगिलान्निजकुलग्रासंमुहुःकुर्वतेयत्तेवारयितुंनिजे
पिविषयेनस्वामिनाविद्यते॥१०॥कस्यापि॥वातोल्लासितकल्लो
लंघितेसागरगर्जितं॥यस्यतीरेतृषाक्रांतःपांथःपृच्छतिकूपिकां
॥११॥तृषंधरायाःशमयत्यशेषांयःसोंबुदोगर्जतिगर्जतूच्चैः॥य
स्त्वेषकस्यापिनहंतितृष्णांसकिंमुधागर्जतिनिस्त्रपोब्धिः॥१२॥
कस्यापि॥ कल्लोलैःस्थगयन्मुखानिककुभामभ्रंलिहैरंभसाक्षा
रेणापिदिवानिशंजलनिधेगर्जन्विभ्राम्यसि॥एतत्तेयदिघोर
नक्रनिलयंस्वादुव्यधास्यद्विधिःकिंकर्तासितदानवेब्धितरलैः
स्तैरेवदुग्धेष्टितैः॥१३॥कस्यापि॥यद्वीचीभिःस्पृशसिगगनंयच्च
पातालमूलैरत्नैरूढीपयसिपयसापत्तिधत्सेधरित्रीं॥धिक्सर्वं
तत्तवजलनिधेयद्विमुच्याश्रुधारातीरेनीरग्रहणरसिकैरध्वगैरु
ज्झितोसि॥१४॥गौडाभिनंदस्य॥अयंवारामेकोनिलयइतिर
त्नाकरइतिश्रितोस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः॥कए
वंजानीतेनिजकरपुटीकोटरगतंक्षणादेनंताम्यत्तिमिमकरमापा
स्यतिमुनिः॥१५॥मालवरुद्रस्य॥चपलतरतरंगैर्दूरमुत्सा
रितोपिप्रथयतितवकीर्तिंदक्षिणावर्त्तशंखः॥परिगणयपयोधेः
पद्मनाभाययोग्यंतवनिकटनिषण्णैःक्षुल्लकैःश्लाघ्यताकां॥
१६॥कस्यापि॥इतःस्वपितिकेशवःकुलमितस्तदीयद्विषामित
श्चशरणार्थिनःशिखरिपत्रिणःशेरते॥इतोपिवडवानलैःसह
समस्तसंवर्तकैरहोविततमूर्जितंभरसहंचसिंधोर्वपुः॥१७॥
भर्तृहरेः॥यामारोहतिवांछतिस्थगयितुंतेजोपितेजस्विनामु

स्तैर्गर्जतिपूरयन्नपिमहीमंभोभिरंभोधरः॥कांश्चिद्द्रागुपजीव्य
तोयच्चुलुकान्सिंधोभवत्संनिधोपानीयप्रचयेषुसत्स्वपिननेजा
नोविकारःक्वचित्॥१८॥अयेवारांराशेकुलिशकरकोयप्रतिभ
यादयंपक्षप्रेम्णागिरिवरसुतस्त्वामुपगतः॥त्वदंतर्वास्तव्योय
दिपुनरयंबाडवशिखिप्रदीप्तःप्रत्यंगंग्लपयतिततःकोस्यशरणं॥
॥१९॥कयोरपि॥किंवाच्योमहिमातवात्रजलधेयस्येंद्रवज्राहति
त्रस्तस्माभृद्मज्जदंबुनिचयेमज्जत्कलंकाकृतिः॥मैनाकोपि
गभीरनीरविलसत्पाठीनपृष्टोल्लसच्छैवालांकुरकोटिकोटरकुटी
कुड्यंतरेनिर्वृतः॥२०॥तादृक्स ¯ प्तसमुद्रमुद्रितमहीभूभृद्भि
रभ्रंकषैःस्रोतोभिःपरिवारितादिशिदिशिद्वीपैःसमंतादियं॥य
स्यस्फारफणावलीमणिचयेमज्जत्कलंकाकृतिःशेषःसोप्यग
मद्यदंगदपदंतस्मैनमःशंभवे॥२१॥एतौवाधिरकवेः॥आस्तां
तावदहोसमुद्रमहिमादूरेऽपिकर्णप्रियस्तीरेयस्यपिपासयैवम
रणंप्राप्नोतिशीघ्रंजनः॥तस्मादंबुनिधेर्वरंलघुसरःकूपोऽथवा
वापिकायत्रस्वात्मरुहृयेनसलिलंपेपीयतेस्वेच्छया॥२२॥सा
कंग्रावगणैर्लुठंतिमणयोबालाऽर्कबिंबोपमानीरेनीरचरैःसमंस
भगवान्निद्रातिनारायणः॥एवंवीक्ष्यतवाऽविवेकमथचप्रोढिंप
रामुन्नतेःकिंनिंदाम्यथवास्तवीमिकथयक्षीरार्णवत्वामहं॥२३
किंखलुरत्नैरेतैःकिंखलुरत्नायितेनवपुषाते॥सलिलमपियन्न
तावकमर्णववदनंप्रयातितृषितानां॥२४॥माकुरुगुरुतागर्वंल
घुरन्योनाऽस्तिसागरत्वत्तः॥जलसंग्रहमन्यस्मात्त्वयिसतिकुर्वं
तिपोतस्थाः॥२५॥पीत्वागर्जंत्यपस्तेदिशिदिशिजलदास्त्वंशर
ण्योगिरीणांसुत्रामात्रासभाजांत्रिदशविटपिनांजन्मभूमिस्त्व
मेव॥गांभीर्यंतच्चतादृक्तवसलिलनिधेकिंतुविज्ञाप्यसेहेस
र्वोपायेनमैत्रावरुणिमुनिकृपादृष्टयःकांक्षणीयाः॥२६॥निःपी
तपीनतिमिराणिमनोहराणिरत्नानिसंतिनकियंतितवांतिकेषु॥
एतस्यकौस्तुभमणेर्व्रजतःपरंतुपाथोनिधेस्मरणमांतरमावहेथाः॥

॥२७॥ देवैर्यद्यपितक्षवह्निमथितःकेदारवद्वानरैर्बद्धःसिन्धुवदं
जनाविजनुषाकुल्यावदुल्लंघितः॥ किंचासीच्चुलकेंबुबिंदुवदयं
द्राक्कुंभयोनेर्मुनेर्नोत्तारोपमितिप्रजाजलनिधेरासीद्यथापिप्लु
था॥२८॥ त्वमद्यसिंधोजगदेकबंधोरत्नानिदातुंविमुखोसिक
स्मात्॥ किंवास्मृतःकल्पमहीरुहस्तेदानैःकृतार्थीकुरुतेजगंति
॥२९॥ पीयूषेणसुराःश्रियासुररिपुर्मर्यादयामेदिनीशक्रःकल्प
रुहाशशांककलयाश्रीशंकरस्तोषितः॥ मैनाकादिनगानिजोदरग
ताःसंस्थानतःस्थापितास्त्वच्चूलीकरणेघटोद्भवमुनिःकेनापिनो
वारितः॥३०॥ इतिश्रीवृ॰शा॰विर॰प॰समुद्रान्योक्तिपरिच्छेदः॥

अथरत्नान्योक्तयः

अनस्तमितसारस्यतेजसस्तद्विजृंभितं॥ येनपाषाणखण्डस्य
मौल्यमल्पंवसुंधरा॥१॥ यस्यवज्रमणेर्भेदेभिद्यंतेलोहसूच
यः॥ करोतितत्रकिंनामनारीनखविलेखनं॥२॥ सोमकांतोमणिः
स्वच्छःसूर्यकांतस्तथानकिं॥ उद्गारेतुविशेषोस्तितयोरमृतव
ह्निजः॥३॥ स्फटिकस्यगुणोयोसौसएवायातिदोषतां॥ धत्ते
स्वच्छतयाछायांयतोमलवतामपि॥४॥ सुधाकरकरस्पर्शाद्द्र
वीभवतिसर्वतः॥ चंद्रकांतमणेस्तेनमृदुत्वंलोकविश्रुतं॥५॥ व
पुःपरीणाहगुणेनतेभ्योयशस्विनःकिंमणयोभवंति॥ तथापिचू
डासुमहीपतीनांतएवखेलंतिनगंडशैलाः॥६॥ त्यजनिजगुणा
भिमानंमरकतपतितोसिपामरेवणिजि॥ काचमणेरपिमौल्यंल
भतेयत्तदपितेश्रेयः॥७॥ भ्रष्टंनृपतिकिरीटाद्भूमौपतितंतिरो
हितंरजसा॥ विधिविलसितेनरत्नंजनचरणविडंबनासहसे
॥८॥ आघ्रातंपरिलीढमुग्रनखरैःक्षुण्णंचयच्चर्चितंक्षिप्तंय
द्भूतनीरसत्वकुपितेनेतिव्यथांमाकृथाः॥ हेसद्रत्नतवैतदेव
कुशलंयद्वानरेणादरादंतःसारविलोकनव्यसनिनाचूर्णीकृतं
नाश्मना॥९॥ उत्तंसेषुननर्तनंक्षितिभुजांनप्रेंखकेलसितःसा
कांसंलुठितोनचस्तनतटेलीलावतीनांक्वचित्॥ कष्टंभोश्चिरमं

तरेणजलधेर्दैवाद्विशीर्णेभवत्वेलव्यालकुलांगघर्षणपरिक्षीणेप्रमाणेमणिः॥१०॥केषामप्येते॥पौरस्त्यैर्दाक्षिणात्यैःस्फुरद्गुणैर्मतिभिर्मित्रपाश्चात्यसंघैरौदीच्यैर्यत्परीक्ष्यक्षितिपतिमुकुटेन्यासिमाणिक्यमेकं॥यद्येतस्मिन्कथंचित्कथयतिकृपणःकोपिमालिन्यमन्येप्रेक्षावंतस्तदानंनिरवधिजडतामंदिरंसंगिरंते॥॥११॥अच्युतस्य॥येगृह्णंतिहठात्तृणानिमणयोयेचाप्ययःखंडकंतेदृष्टाःप्रतिधामदग्धमणयोविच्छिन्नसंख्याश्चिरं॥नोजानेकिमभावतःकिमथवादैवाद्दहोश्रूयतेनामाप्यत्रतुतादृशस्यहिमणेरत्नानिगृह्णातियः॥१२॥कस्यापि॥केनासीनःस्फखमकरुणेनाकरादुद्धृतस्त्वंविक्रेतुंवासमभिलषितःकेनवास्मिन्कुदेशे॥यस्मिन्वित्तव्ययभरसहोग्राहकस्तावदास्तांनास्तिभ्रातर्मरकतमणेत्वत्परीक्षाक्षमोपि॥१३॥शार्ङ्गवर्मणः॥नखवेतांशुवर्द्धकारदल॰नाद्द्योतितारोदसीनाशैरावततन्निरस्तदितिजत्रासःकृतोवासवः॥नोचिंतामणिरत्नवत्त्रिभुवनेच्छिन्नाविपश्चार्थिनांभूत्वातं॰स्यहरेरुरःप्रणयिनाकिंकौस्तुभेनार्जितं॥१४॥यन्मुक्तामणयोंबुधेरुदरतःक्षिप्तामहावीचिभिःपर्यंतेषुलुठंतिनिर्मलरुचःस्पष्टट्टहासाइव॥नत्तस्यैवपरीक्षयाजलनिधेर्द्वीपांतरालंविनारत्नानांतुपरिग्रहव्यसनिनःसंत्येवसांपात्रिकाः॥१५॥कस्यापि॥सिंधुस्तरंगैरुपकल्प्यफेनान्रत्नानिपंकैर्मलिनीकरोति॥तथापितान्येवमहीपतीनांकिरीटकोटीषुपदंलभंते॥१६॥समुद्रेणात्तस्यत्तदनुचितरंगैरकरुणैःसमुत्क्षिप्तोस्मीतित्वमिहपरितापंत्यजमणे॥अवश्यंक्वापित्वद्गुणपरिचयाकृष्टहृदयोनरेंद्रस्त्वांकुर्यान्निजमुकुटकोटिप्रणयिनं॥१७॥इतिश्रीवृ·शा·प·रत्नान्योक्तिपरिच्छेदः॥ ॥

अथशंखान्योक्तयः

उच्चैरुच्चरतुचिरंझिल्लीवत्वर्त्मनिततंसमारुह्य॥दिग्व्यापिशब्दगुणोशंखःसंभावनाभूमिः॥१॥कस्यापि॥कीदृग्गृहंकुटिलोंतःकठिनःक्षारांबुसंभवःशून्यः॥शंखःश्रीपतिनिकटेकेनगुणेनस्थिति

लेभे॥२॥शार्ङ्गधरस्य॥अंतःकुटिलतांविभ्रच्छंखप्रकृतिनिष्ठुरः
हुंकारोतियदाध्मातस्तदैवबहुगण्यते॥३॥कस्यापि॥तातःक्षी
रनिधिःस्वसाजलधिजाभ्रातासुरेशद्रुमःसौजन्यंसहकौस्तुभे
नशुचितायस्यद्विजेशादपि॥धिक्कर्माणिसएवकंबुरधुनापाखं
डकांताकरेविश्रांतःप्रतिवासरंप्रतिगृहंभैक्ष्येणकुक्षंभरिः॥
४॥कस्यापि॥सर्वाशापरिपूरिहुंकृतिमहाजन्मापिदुग्धोदधेर्गो
विंदाननचुंबिसुंदरतरंपूर्णेंदुबिंबाद्वपुः॥श्रीरेखाःसहजागुणः
किमपरंभण्यंतएतेहियत्कौटिल्यंहृदिपांचजन्यभवतस्तेनाति
लज्जामहे॥५॥शंखाःसंतिसहस्रशोजलनिधेर्वीचिच्छटावा
हिताःपर्यंतेषुलुठंतियेदलशतैःकल्माषितक्ष्मातलाः॥एकःको
पिसपांचजन्यउदभूदाश्चर्यधामासतांयःसंवर्तभरक्षमैर्मधुरि
पोःश्वासानिलैःपूर्यते॥६॥कस्यापि॥क्वचांभोधौजन्मक्वचवपु
रिदंकुंदधवलंक्वचावासस्थानंहृतमहहविष्णोःकरतले॥क्वनीचानामा
स्येपरिणतिरियंचुंबनविधौविनावेदंशंखःकरुणकरुणंरोदिति
मुहुः॥७॥ध्वनिरतिमधुरःशुचित्वमुच्चैर्जनिरपिशंखनदीनतस्त
वाभूत्॥अवगतमखिलंवहिःसितत्वंकुटिलतरंपुनरंतरंनविद्मः
॥८॥इतिश्रीवृहच्छार्ङ्गधरविरचितायांपद्धत्यांशंखान्योक्तिपरि०॥

अथनद्यन्योक्तयः

यद्यपिदिशिदिशिसरितःपरितःपरिपूरितांभसःसंति॥तदपिपुरंद
रतरुणीसंगतिसुखदायिनीगंगा॥१॥आजन्मस्थितयोमहीरु
हइमेकामंसमुन्मूलिताःकल्लोलाःक्षणभंगुराःपुनरमीनीताःप
रामुन्नतिं॥अंतर्ग्राहपरिग्रहोवहिरपिभ्राम्यंतिगंधद्विपाभ्रातः
शोणनदोस्तियोनजगतित्वत्तःपराभिद्रुवान्॥२॥छायांप्रकु
र्वंतिनमंतिपुष्पैःफलानियच्छंतितटद्रुमाये॥उन्मूल्यतानेवन
दीप्रयातितरंगिणीनांक्वप्रतिपन्नमस्ति॥३॥कतिपयदिवसस्थायी
पूरोदूरोन्नतोपिभविताते॥तटिनितटद्रुमपावनपातकमेकंचि
रस्थायी॥४॥कुरुगंभीराशयतांकल्लोलैर्जनयलोकविश्रांतिं॥

वीतपयोधरलक्ष्मीःकस्यनचरणैर्विलंघ्यासि॥५॥केषामप्येतेतटिनिचिरायविचारयविंध्यभुवस्तवपवित्रायाः॥शुष्यंत्याअपियुक्तंकिंखलुरथ्योदकाऽऽदानं॥६॥इतिनद्यान्योक्तिपरिच्छेदः

अथतडागान्योक्तयः

हंसैर्लब्धप्रशंसैस्तरलितकमलस्त्तरंगैस्तरंगैर्नीरैरंतर्गभीरैश्चपलवककुलन्यासलीनैश्चमीनैः॥पालीरूढद्रुमालीतलसुखशयितःस्त्रीप्रणीतैश्चगीतैःश्रांतिप्रक्रीडदातुःस्नवसलिलचलश्चक्रवाकस्तटाकः॥१॥ कस्यापि॥ क्रौंचःक्रीडतुकूर्दतांचकुररःकंकःपरिव्रज्यतांमद्गुर्माद्यतुसारसश्चरसतुप्रोड्डीयतांटिट्टिभः॥ भेकाःसंतुबका वसंतुचरतुस्वच्छंदमादिस्तटेहेह्रोपद्मसरःकुतःकतिपयैर्हंसैर्विनाश्रीस्तव॥२॥ कयोरपि॥ अयमवसरःसरस्तेसलिलैरुपकर्तुमर्थिनामनिशं॥ इदमतिस्खलितमंभोभवतिपुराजलधराभ्युदये॥३॥ वल्लभस्य॥एतस्मिन्परिमंडलेपरिचरत्कल्लोलकोलाहलक्रीडत्कंकमपंकशंकविलसन्निःशंकमत्स्यव्रजं॥ केनेदंविकसत्कुशेशयकुटीकोणक्वणत्षट्पदंस्त्रैणप्रीणितपांथमुज्वलजलंचक्रेविशालंसरः॥४॥कस्यापि॥स्तोकांभःपरिवर्त्तितागशफरीग्रासार्थिनःसर्वतोलुप्यंतेबकटिट्टिभप्रभृतयस्तल्पेषुसाधुस्थितिं॥सद्यःशोषमुपागतेद्यसरसिश्रीसद्मपद्माकरेत्यास्मिन्पंकजिनीविलासरुचयोहंसाःक्वयास्यंत्यमी॥५॥ इंद्रकवेः॥माद्यद्दिग्गजदानलिप्तकरटप्रक्षालनक्षोभिताव्योम्नःसीम्निविचेरुरप्रतिहतायस्योर्मयोनिर्मलाः॥ कष्टंभाग्यविपर्ययेणसरसःकल्यांतरस्थायिनस्तस्याप्येकबकप्रचारकलुषंकालेनजातंजलं॥६॥ विज्जकायाः॥रेपद्माकरयावदस्तिभवतोमध्येपयःपूरितंतावच्चक्रचकोरकंककुररश्रेणींसमुल्लासय॥पश्चात्त्वंसमटट्टकोटचटुलत्राटीपुटव्याहतित्रुट्यत्कर्कटपर्वर्व्यतिकरैर्निंदास्पदंयास्यसि॥७॥कस्या॥यातेमय्यचिराल्लिदाघमिहिरज्वालाशतैःशुष्कतांगंताकंप्रतिपांथसंततिरसौसंता

पमाला॰कुला॥एवंयस्यनिरंतराऽधिपटलैर्नित्यंवपुःक्षीयतेध्यानंजीवनमस्यमार्गसरसोधिग्वारिधीनांजनुः॥८॥आपेदिरेंऽबरपथंपरितःपतंगाभृंगारसालमुकुलानिसमाश्रयंति॥संकोचमंचतिसरस्त्वयिदीनदीनोमीनोनुहंतकतमांगतिमभ्युपेतु॥॥९॥इयत्यांसंपत्तावपिचसलिलानांत्वमधुनानतृष्णामार्तानांहरसियदिकासारसहसा॥निदाघेचंडांशौकिरतिपरितोऽंगारनिकरंकृशीभूतःकेषामहहपरिहर्ताऽसिखलुतां॥१०॥अमरैर्गतंमधुकरैश्चलितंप्रकरैःप्रयातमपिपक्षिदृशां॥विभवेगतेसकलमेवगतंध्रुवमेकमंचतियशःसरसः॥११॥सोपानानितिरोहितानिपदवीच्छन्नातृणैर्नूतनैःकालुष्यंपयसांविलोक्यशनकैरुड्डीयहंसागताः॥माधुर्यंनमधुव्रतोत्रनगिरांपद्मानिमग्नानिकैर्भेकानामिहगर्जितंपरमहोरथ्यैवनष्टंसरः॥१२॥एकेनराजहंसेनयाशोभासरसोभवेत्॥नसाबकसहस्रेणपरितस्तीरवासिना॥१३॥विपन्नंपद्मिन्याद्रुतमनिमिषैर्यातमलिभिःखगैरप्युड्डीनंरथचरणहंसप्रभृतिभिः॥दशादीनालेभेसरसिविषमैर्ग्रीष्मदिवसैःकुलीनत्वादास्तेतटरुहतरुःकोपितदपि॥१४

॥इतिश्रीवृहच्छार्ङ्गधरविरचितायांपद्धत्यांतडागान्योक्तिपरि०॥

अथकमलान्योक्तयः

रेपद्मिनीदलंतवात्रमयाचरित्रंदृष्टंविचित्रमिवयद्विदितंध्रुवंतत्॥यैरेवशुद्धसलिलैःपरिपालितस्त्वंतेभ्यःपृथग्भवसिपंकभवोसियस्मात्॥१॥शार्ङ्गधरस्य॥पंकजजलेषुवासःप्रीतिर्मधुपेषुकंटकैःसंगः॥यद्यपितदपि ‾ ‾ ‾ तवैतत्चित्रंमित्रोदयेहर्षः॥२॥लक्ष्मीधरस्य॥कुसुमंकोशातक्याःविकसतिरात्रौदिवाचकूष्मांड्याः॥अलिकुलनिरूपरुचिरंकिंतुयशःकुमुदकमलयोरेव॥३॥कृष्णस्य॥वरमश्रीकृतालोकेनासमानसमानता॥इतीवकुमुदोद्भेदेकमलैर्मुकुलायितं॥४॥कस्यापि॥नालस्यप्रसरोजडेष्वपिकृतावासस्यकोशेरुचिर्दंडेकर्कशतामुखेतिमृदुतामित्रे

महान्त्रश्रयः।। आमूलंगुणसंग्रहव्यसनताद्वेषश्चदोषागमेयस्यैषास्थितिरंबुजस्यवसतिर्युक्तैवतत्रश्रियः।।५।। कस्यापि।। प्रसारितकरेमित्रेजगदुद्योतकारिणि।किन्नकैरवलज्जातेकुर्वतःशोकसंवृत्तिं।।६।।कस्यापि।। लक्ष्मीसंपर्कजातोयंदोषःपद्मस्यनिश्चितं।।यद्देषगुणसंदोहधाम्निचंद्रेपराङ्मुखः।।७।।रत्नाकरतनुजनुषिद्विजराजेराजतिश्रियोमित्रे।।अमृतकरेचकलावतिपद्मनिवासाकुतोभवति।।८।।धनदेवानां।। उदितवतिद्विजराजेकस्यनहृदयेमुदःपदंदधति।।संकुचसिकमलयदयंहरहरवामोविधिर्भवतः।।९।। कस्यापि।।अंतश्छिद्राणिभूयांसिकंटकाबहवोबहिः।।कथंकमलनालस्यनाभूवन्भंगुरागुणाः।।१०।। कस्यापि।।एतेनगुणाःपंकजसंतोपिनतेप्रकाशमायांति।।यल्लक्ष्मीवसतेस्तवमधुपैरुपजीव्यतेकोशः।।११।। केषांचित्।। कामंभवंतुमधुलंपटषट्पदौघसंघट्टघर्घरघनध्वनयोब्जखंडाः।।गायन्नतिश्रुतिसुखंविधिरेवयत्रभृंगःसकोपिधरणीधरनाभिपद्मः।।१२।। श्रुतिधरस्य।। अपिदलदरविंदस्यंदमानंमरंदंतवकिमपिलिहंतोमंजुगुंजंतुभृंगाः।।दिशिदिशिनिरपेक्षस्तावकीनंवितन्वन्परिमलमयमन्योबांधवोगंधवाहः।।१३।।स्वच्छंदंदलदरविंदतेमरंदंविंदंतोविदधतुगुंजितंमिलिंदाः।।आमोदानथहरिदंतराणिनेतुंनैवान्योजगतिसमीरणात्प्रवीणः।।१४।।समुत्पत्तिःस्वच्छेसरसिहरिहस्तेनिवसनंनिवासःपद्मायाःसुरहृदयहारीपरिमलः।।गुणैरेतैरन्यैरपिचललितस्यांबुजतवद्विजोत्तंसेहंसेयदिरतिरलीवोन्नतिरियं।।१५।।नीरान्निर्मलतोजनिर्मधुरतारामामुखस्पर्धिनीवासोयस्यहरेःकरेपरिमलोगीर्वाणचेतोहरः।।सर्वस्वंतदहोमहाकविगिरांकामस्यचांभोरुहत्वंचेत्प्रीतिमुरीकरोषिमधुपेकिंत्वांप्रतिब्रूमहे।।१६।।पद्मिनिकिमितिक्रीडसिमधुपैर्लज्जालवोऽपिनहिकिंते।।हरहरविस्मृत्यात्तंकंतुलज्जासवितृरक्तायाः।।१७।।एकस्मिन्जनिरावयोःसमजनिस्वच्छेसरोवारिणिभ्रातःकाविदि

हैवकानिचिदह्नान्यत्रव्यतीतानिनौ॥लब्धंतामरसत्वयामृगदृशांलीलावतंसास्पदंशैवालंविलुठामिपामरवधूयादाहतेपाथसि॥॥१८॥यावत्वांनखलुहसंतिकैरविण्योयावत्वांतरणिकराःपरामृशंति॥यावत्तेमधुविभवोनवोस्तितावन्माध्वीकंवितरसरोजषट्पदेभ्यः॥१९॥वैमुख्यमृगलांछनस्यमनसोनिर्मातिमेनव्यथांनोदूयेचिरलालितामधुलिहःसर्पंतियन्नांतिकं॥जल्पंतीबहुरक्षराणिमधुपश्रेणीरवच्छद्मनायत्कादंबकुमुद्वतीहसतिमांतन्मेमनस्ताम्यति॥२०॥संभूतिस्तवमानसेसरसिजत्वत्सौरभैर्वासिताःसर्वास्ताःककुभस्तवास्तिपरमोबंधुर्विवस्वानिति॥त्वंचेद्द्यगुणानवद्यशिशिरेशीतानिलैःशीर्यसिप्रायःप्राप्तमिदंतदत्रपरमंदिष्टेब्द्दृष्टंबलं॥२१॥खद्योतास्तरलीभवंतिभगवानस्तंगतोभानुमान्कोकःशोकमुपैतिमत्तमनसःक्रेंकुर्वतेकौशिकाः॥इत्थंचेत्तदसद्विवेकविधुरोधातातदेतादृशंनद्रष्टव्यमितीवमुद्रितवतीपद्मेक्षणंपद्मिनी॥२२॥विभ्रम्यकाननमसौदिवसावसानेत्वय्येवषट्पदयुवाहृदयंबबंध॥राजीवचेन्मलिनिमानमुरीकरोषिकःस्यादहोमधुलिहामधुनावलेवः॥२३॥रेपद्मिनीपत्रभवच्चरित्रंचित्रंप्रतीमोवयमत्रकिंचित्॥त्वंपंकजन्मपियदृच्छभावादपिस्पृशस्यंबुनपंकसंगि॥२४॥इतिकमलान्योक्तयः

अथकुंदं

संदर्शयस्वमधुवैभवमस्तियत्तेरेकुंदकिंदुरभिमानमुरीकरोषि॥एतन्नचेतसिकरोषिसरोजबंधुःपुष्पंधयोपिममसौरभमातनोति॥१॥एषषट्पदयुवायदायताःकुंदयापयतियामिनीस्त्वयि॥दुर्वहातदपिनापचीयतेपद्मिनीहृदयवेदनापदि॥२॥इतिकुंदः

अथकुमुद्वती॥

जनिःसरोंकादतिपंकिनोयत्पल्लोलुपैर्वामधुपैर्विहारः॥कलंकएवैषकुमुद्वतीनांकलंकिनःकिंतुकलावतीनां॥१॥प्रसारितकरेमित्रेजगदुद्योतकारिणि॥किन्नकैरवलज्जातेकुर्वतःकोपसंहतिं॥

॥२॥अपित्वयाकैरविणिव्यधायिमुधासुधावंधुनिधामभावः॥
जनापवादःपरितःप्रयातःसमागमोहंतनजातुजातः॥३॥इतिकुमु॰

अथकूपान्योक्तयः

चित्रंनतद्यदयमंबुभिरंबुदौघैःसिंधुप्रवाहपरिपूरणयामहीयान्
॥त्वंतर्षिनामुपकरोषियदल्पकूपनिष्पीड्यकुक्षियुगलंहिमह
त्वमेतत्॥१॥दिनमविसितंविश्रांतास्मपामरकूपहेपरमुपकृतं
शेषंवक्तुंवयंनपुनःक्षमाः॥भवतिस्फुत्तैरधन्यानामशेषजलोभ
वानियमपिघनच्छायाभूत्तटोपरिशामी॥२॥कयोरप्येतौ॥भीष
ष्यामपृतनुवदन्क्रूरपातालकुक्षिक्रोडप्रांतोपहृतविभवस्याप
किंतेब्रवीमि॥येनत्वत्तःसमभिलषितोवांच्छितंक्षुद्रकूपक्लाम्य
न्मूर्तेर्भवतिसहसाकस्यनाधोमुखत्वं॥३॥यद्यपिबहुगुणग
म्यंजीवनमेतस्यकूपमुख्यस्य॥जयतितथापिविवेकोदानंपात्रा
नुमानेन॥४॥भोजस्य॥सगुणैःसेवितोपांतोविनतैःप्राप्तदर्शनः
॥नीचोपिकूपःसत्पात्रैर्जीवनार्थंसमाश्रितः॥५॥नितरांनीचोऽ
स्मीति त्वंखेदंकूपमाकदाऽपिकृथाः॥अत्यंतसरसहृदयोयतः
परेषांगुणग्रहीतासि॥६॥नयत्रगुणवत्पात्रमेकमप्यस्तिसन्नि
धौ॥कस्तत्रभवतःपांथकूपेंबुग्रहणादरः॥७॥इतिकूपान्योक्तयः॥

अथमरुस्थलान्योक्तयः

मरौनास्त्येवसलिलंकृच्छ्राद्यदपिलभ्यते॥तत्कटुस्तोकमुष्णंचन
करोतिवितृष्णतां॥१॥पायंपायंपिबपिबपयःसिंचसिंचांगमंगं
भूयोभूयःकुरुकुरुसखेमज्जनोन्मज्जनानि॥एषाशेषश्रमशम
पटुर्दुःखिताधन्यबंधुःसिंधुर्दूरीभवतुभवतोमारवःपांथपंथाः॥२
कस्यापि॥भोभोःकिंकिमकांडएवपतितस्त्वंपांथकान्यागतिस्त
त्तादृक्तृषितस्यमेखलमतिःसोयंजलंगृह्णते॥अस्थानोपगता
मकालसुलभांतृष्णांप्रतिक्रुध्यहेत्रैलोक्यप्रथितप्रभावमहिमाम
र्गोस्त्यसौमारवः॥३॥अभिनवगुप्तस्य॥सत्पादपान्विपुलपल्ल
वपुष्पपुंजसंपत्स रीतवपुषःफलभारनम्रान्॥योमार्गसिंजित॰

शकुंतसमाश्रितोरुशाखान्मरौमृगयतेनततोस्तिमुग्धः॥४॥
किमसिविमनाः किंवोन्मादीक्षणादपिलस्यसेपुनरपिपयःपूर्वा
नकाश्चनताः क्रियाः॥स्वसमजलदांजानन्नपिप्रविश्यमरुस्थ
लींशिशिरमधुरंवारिप्राप्तुंयदध्वगवांच्छसि॥५॥नरसिंहस्य॥

अथदावानलः

यस्यांमहत्वभाजोभवंतिगुणनामिताधनुर्दंडाः॥दहतस्तांवं॰
शालिं कोवनवन्हेर्विवेकस्ते॥१॥हेदावानलशैलाग्रवासिनः
साधुशाखिनः॥मुग्धव्यर्थंत्वयादग्धाःप्रेरितेनप्रभंजनैः॥२॥दु
र्दैवप्रभवप्रभंजनजवादुद्भूतभूमीरुहानेतान्सत्वगुणाश्रयान
------करुणःप्लुष्यन्किमुन्माद्यसि॥ब्रूमस्त्वांवनहव्यवा
हयद्मीदग्धार्धदग्धाअपिद्रष्टव्यास्तवतत्क्षयाद्विटपिनोना॰
मापिनज्ञायते॥३॥अभ्युन्नतेपिजलदेजगदेकसारसाधारणप्र
णयहारणहायदेते॥उल्लासलास्यललितंनखोनयांतिहेदाव
पावकसतावकएवदोषः॥४॥विध्वस्तामृगपक्षिणोविधुरितां
नीताःस्थलीदेवता धूमैरंतरिताःस्वभावमलिनैराशामहीत्ता
पिताः॥भस्मीकृत्यसपुष्पपल्लवदलैर्नम्रान्महापादपान्नुदृप्ते
नदवानलेनविपिनंवल्मीकशेषंकृतं॥५॥इतिदावानलः॥७॥

अथतुला

गुरुषुमिलितेषुशिरसाप्रणमसिलघुषून्नतासमेषुसमा॥उचि
तज्ञासितुलेकिंतुलयसिगुंजाफलैःकनकं॥१॥इतितुला॥७॥

अथमुरली

माधवस्यमुरलीमुखलग्नारागमावहतुकिंतुवयस्ये॥वंशजा
हमितिमास्तकंसगर्वायाबिभर्त्तिबहुशोविवराणि॥१॥परिपी॰
ड्यकरद्वयेनगाढंपरपुंसापरिचुंबितानना॥मुरलीमहनीयवंश
जाप्सुहराक्रंदममंदमातनोतु॥२॥ इतिमुरली॥ ७ ॥ ९ ॥ ॥

अथकुंभः

भ्रातःकांचनलेपगोपि‾तवहिस्ताम्राकृतिःसर्वतोमाभैषीःकलश॰

स्थिरोभवचिरंदेवालयस्योपरि।।ताम्रत्वंगतमेवकांचनमयीकीर्तिः९स्थिरातेऽधुनानोतस्तत्वविचारणप्रणयिनोलोकावहिर्बुद्धयः।। १ ।।

अथसंकीर्णान्योक्तयः

बिभ्राणेत्वयिभस्मकःसमभवन्मंदादरश्चंदनेकःक्षौमंकलयांचकारनकृतीकृत्तिंवसानेत्वयि।।धत्तूरस्पृहयालुतांत्वयिगतेनस्याजकःकेतकींस्वातंत्र्याज्जहिहित्वमीश्वरगुणान्लोकोस्तितद्ग्राहकः।।१।।कस्यापि।।त्वंचेत्संचरसेवृषेणलघुताकानामदिग्दंतिनांव्यालैःकांचनकुंडलानिकुरुषेहानिर्नहेम्नःपुनः।।मूर्ध्नाचेद्वहसेजडांशुमयशःकिंनामलोकत्रयीदीपस्यांबुजबांधवस्यजगतामीशोसिकिंब्रूमहे।।२।।छेत्सिब्रह्मशिरोयदिप्रथयसिप्रेतेषुसख्यंयदिक्षीवःक्रीडसिमातृभिर्यदिरतिंधत्सेश्मशानेयदि।।सृष्टांसंहरसिप्रजांयदितथाप्याधायभक्त्यामनःकंसेवेकरवाणिकिंत्रिजगतीशून्यात्वमेवेश्वरः।।३।।धोइकवेः।।दामोदरमुदराहितभुवनंयोवहतिलीलयागरुडः।।कस्यतरोरुपरिष्टाद्विश्रम्योऽसौखेदमपनेयात्।।४।।अहिरहिरितिसंभ्रमपदमितरोजनःकिमपिकातरोभवतु।।विहगपतेराहारेसततुसरलमृणालविसदलरुचिरः।।५।।मुक्तोसिभुवनभारेमावक्रांवितनुकंधरांशेष।।त्वय्येकस्मिन्दुःखिनिसुखितानिभवंतिभुवनानि।।६।।कस्यापि।।यःपीयूषसहोदरैस्तपयतिज्योत्स्नाजलैःसर्वतोयश्चत्वामधिकाधिकंज्वलयतिप्रोद्दामतापैःकरैः।।भ्रातर्व्योमतयोरपिस्थितिमिहव्यातन्वतोविक्रियानिर्मुक्तस्यमहत्वमेतदसमंदूरेधिरूढंतव।।७।।भोजस्य।।शैत्यंनामगुणस्तवैवतदनुस्वाभाविकीस्वच्छताकिंब्रूमःशुचितांभवंतिशुचयःस्पर्शेनयस्यापरे।।किंचातःपरमुच्यतेस्तुतिपदंयज्जीवनंदेहिनांत्वंचेन्नीचपथेनगच्छसिपयःकस्त्वांनिरोद्धुंक्षमः।।८।।कस्यापि।।जलभ्रमोत्पत्तिकृतोगुणोघान्त्राकाशयंसांमृगतृष्णिकायां।।जलाशयभ्रांतिरभून्ममैषाप्रभूतसंतापकरीपिपासा।।९।।अब्जंत्वब्जमथाब्जभूस्ततइदंब्रह्मां

डुमंडात्सुनः विश्वंस्थावरजंगमंतदितरत्तन्मूलमित्थंपयः॥धि
कृत्वांघोरइवप्रयासिनिभृतंनिर्गत्यजालांतरैर्बध्यंतेविवशास्त्वदे
कशरणास्त्वामाश्रिताजंतवः॥१०॥कयोरप्येते॥समुद्रस्यापत्यं
प्रथितमहिमामुद्रितभुवःस्वसाप्रालेयांशोस्त्रिनयनशिरोधाम
वसतेः॥सुरारातेर्योषित्सरसिरुहकिंजल्कनिलयातथापिश्रीः
स्त्रीत्वात्स्पृशतिचपलालिंगतिखलान्॥११॥ तापापहेस्फुटहृदये
रुचिरेप्रबुद्धेमित्रानुरागनिरतेधृतसद्गुणौघे॥त्यागप्रदानपरिपू
रितषट्पदौघेसुक्तंतवेहकमलेकमलेस्थितिर्यत्॥१२॥जंभारि
रेवजानातिरंभासंभोगविभ्रमं॥घटचेटीविटःकिंस्विज्जानात्य
मरकामिनीं॥१३॥ यदेतत्कामिन्याःस्मरतविरतौपल्लवरुचाकरे
णाधूतःसत्वमसिसहहारेणगुणिना॥मुहुःकुर्वन्गीतंकुचक
लशपीठोपरिलुठन्नयेवीणादंडप्रकटयफलंकस्यतपसः॥१४
॥यदेतन्नेत्रांभस्तदपिचसमासाद्यतरुणींकपोलेन्यासक्तंकुचक
लशमस्याःकलयति॥ततःश्रोणीबिंबंव्यवसितविलासंतदु
चितंस्वभावस्वच्छानांविपदपिसुखंनांतरयति॥१५॥यत्पूर्वंप
वनाग्निशस्त्रसलिलैश्चीर्णंतपोदुःकरंतस्यैतत्फलमीदृशंपरि
णतंयज्ज्ञातरूपंवपुः॥मुग्धापांडुकपोलचुंबनसुखंसंगश्चर
त्नोत्तमैःप्राप्तंकुंडलवांछसेकिमपरंयन्मूढदोलायसे॥१६॥
सद्वृत्तसद्गुणविचित्रमहार्हकांतकांताघनस्तनतटोचितचारु
मूर्ते॥आःपामरीकठिनकंठविलग्नभग्नहाहारहारितमही
भवतागुणित्वं॥१७॥कस्यापि॥मौलौसन्मणयोगृहंगिरिगुहा
त्यागःकिलात्मत्वचोनिर्यत्नोपतनैश्चवृत्तिरनिलैरेकत्रचर्ये
दृशी॥अन्यत्रानृजुवर्त्मवाग्द्विरसनावक्त्रेविषंवीक्षणंसर्वामं
गलसूचकंकथयभोभोगिन्नखेकिंत्विदं॥१८॥दुश्चरितेरेव
निजैर्भवतिदुरात्माविशंकितोनित्यं॥दर्शनपथमापन्नंपन्नगकु
लमाकुलंभवति॥१९॥यस्मैददातिविवरंभूमिःफूत्कारमात्र
भीतेव॥आशीविषःसदैवास्तोद्यकरंडस्थितिंसहते॥२०॥

भेकेनक्वणतासरोषपरुषंयत्कृष्णसर्पाननेदातुंकर्णचपेटमुज्झि
तभियाहस्तःसमुल्लासितः॥यच्चाधोमुखमीक्षणंविदधतानागेन
तूष्णींस्थितंतत्सर्वंविषमंत्रिणोभगवतःकस्यापिलीलायितं॥२१
कस्यापि॥ कृत्वाकुंभसमुद्भवेनमुनिनाकिंचिन्महत्याहितंसिंधा
वंधकुटुंबदर्दुरकुलंहर्षादिदंध्यायति॥ गांभीर्याद्यदितेनबिभ्य
तिनवात्रस्यतिभेकीशिशोरत्रागस्त्यस्फरवंवसंतुतिमयोजातानु
कंपावयं॥२२॥ आपूर्येतपुनःस्फुरच्छफरिकासारोर्मिभिर्वारिभि
र्भूयोपिप्रविजृंभमाणनलिनंपश्येमतोयाशयं॥ इत्याशाशत तं
तुबद्धहृद योनक्तंदिनंदीनधीःशुष्यत्यातपशोषितस्यसरस(
स्तीरेजरत्सारसः॥२३॥ अस्तंगतोयमरविंदवनैकबंधुर्भास्वान्न
लंघयतिकोपिविधिप्रणीतं॥ हेचक्रधैर्यमवलंब्यविमुंचशोकंधी
रास्तरंतिविपदंनतुदीनचित्ताः॥२४॥ रात्रिर्गमिष्यतिभविष्यति
सुप्रभातंभास्वानुदेष्यतिहसिष्यतिपंकजश्रीः॥ इत्थंविचिंतयति
कोशगतेद्विरेफेहाहंतहंतनलिनींगजउन्मुमूल॥२५॥ हंसःप्र(
यातिशनकैर्यदियातुतस्यनैसर्गिकीगतिरियंनहितत्रचित्रं॥ ग
त्यातयाजिगमिषुर्वकएवमूढश्चेतोदुनोतिसकलस्यजनस्य
नूनं॥२६॥ कल्याणंनःकिमधिकमितोजीवनार्थंपथस्त्वंस्थिता
वृक्षानहहदहसिभ्रातरंगारकार॥ नन्वेतस्मिन्नशनिपिशुनैरा
तपैराकुलानामध्वन्यानामशरणमरुप्रांतरेकोभ्युपायः॥२७॥
भ्रातर्ग्राम्यकुविंदकंदलयतावस्त्राण्यमूनित्वयागोणीविभ्रमभा
जनानिसुबहून्यात्माकिमायास्यते॥ किंत्वेकंरुचिरंचिराद्भि
नवंवासस्तदासूत्र्यतांयन्नोज्झंतिकुचस्थलात्क्षणमपिक्षोणी
भुजांवल्लभाः॥२८॥ रेलांगलिकनिषद्याक्रोडेलाहंपुरायदद्राक्षीः॥
स्पर्शास्पर्शविशेषात्तदखिलमजनिष्टहेमनृपयोग्यं॥२९॥ अच्यु
तस्य॥ दुर्गानदीशिथिलबंधविलासिनीनौरभ्युन्नताजलमुचो(
विषमःसमीरः॥ आरूढवान्निजकुटुंबयुतोध्वनीनस्तत्कर्ण॰
धारकुरुयत्नसदृशंकुलस्य॥३०॥ वंशःप्रोस्नुरसौघुणाव्रणमयो

जीर्णावरत्राइमाःकीलाःकुंठतयाविशंतिनमहीमाहन्यमानाअपि॥ आरोहव्यवसायस्य हस्तमिदंशैलूषसंसज्यतांदूरे श्रोर्निकटेकृतांतमहिषग्रैवेयघंटारवः॥३१॥ मौलिःस्वर्णकिरीटकांतिरुचिरःकेयूरभव्यौभुजौत्वङ्गत्साःकिलकंचुकिप्रभृतयोदेवेतिविज्ञाप्यसे॥ इत्थंकल्पनयाकुशीलवनृपाहंकारदार्ढ्यंरथानृत्यांतेभवतोभविष्यतिमसीमात्रावशेषंवपुः॥३२॥ अमीतिलास्तैलिकनूनमेतांस्त्वेहाद्वस्थांभवतोपनीताः॥ द्वेषोभविष्यद्यदमीषुनूनंतन्नजानेकिमिवाकरिष्यः॥३३॥ किंव्यक्तीकुरुषेसरोजसुकुलाकारासुरोजश्रियंलीनेनाधरपल्लवेकुस्कमितांकिंवास्मितेनामुना॥ आकूतामृतशीतलाःश्रमयसेकिंवागिरोनागरीसुग्धेकामिनिकिंसुधाघटयसिक्लीबेकटाक्षच्छटाः॥३४॥ वक्रांनेषतनूविवर्त्तनगतिंगृह्णातिसाविस्मितंस्मेरैर्दृग्वलनैरमुष्यनमनाक्केतःपरावर्त्तते॥ हस्तेत्वंमुनिदारकस्यपतिताकल्याणितन्वीयतांवेदीमार्जनबर्हिरर्पणवषट्कर्त्तव्यपाकैर्वयः॥३५॥ स्रग्दाममूर्ध्निनिधेहिगवेधुकानांगुंजामयीमुरसिधारयहारयष्टिं॥ वालेकलावतिचिरंपतितासिपल्लीतल्लोहमन्यदपिभूषणमेषणीयं॥३६॥ केषामप्येते॥ भ्रातःकांचनलेपगोपितवहिस्ताम्रारुतेतत्त्वतोमाभैषीकलशस्थिरोभवसुखंदेवालयस्योपरि॥ ताम्रत्वंगतमेवकांचनमयीकीर्त्तिःस्थिरातेधुनानांतस्तत्त्वविचारणप्रणयिनोलोकाबहिर्बुद्धयः॥३७॥ नयत्रगुणवत्पात्रमेकमप्यस्तिसंनिधौ॥ कस्तत्रभवतःपांथकूपांबुग्रहणग्रहः॥३८॥ रक्षपात्रगतंस्नेहंप्रदीपश्रीविवर्धनं॥ प्रयास्यंतिविनातेनभस्मत्वंयेभवद्गुणाः॥३९॥ महादेवस्य॥ कोहितुलामधिरोहतिशुचिनादुग्धेनसहजमधुरेण॥ तप्तंविकृतंमथितंकेवलमुद्गिरतियत्स्नेहं॥ ॥४०॥ दृढतरगलविनिबंधःकूपनिपातोपिकलशतेधन्यः॥ पज्जीवनदानैस्त्वंसतृषामर्षनृणांहंसि॥४१॥ यत्सद्गुणोपिसरलोपितटस्थितोपिवंशोद्भवोपिविदधासिनृशंसकर्म॥ वक्रात्मनोवडि

शादंडतदेतदस्यजानामिसंगतिफलंतवकेटकस्य॥४२॥ द्वात्रिंशद्दशनद्विषिमध्येभ्रमसिनिस्यशः॥तदिदंधिक्षिताकेनजिह्वेसंचारकौशलं॥४३॥ अनिलनिखिलविश्वंप्राणितित्वत्प्रयुक्तंसपदिचविनिमीलत्याकुलंत्वद्वियोगात्॥वपुरसिपरमीशस्योचितंनोवितंतेसुरभिमसुरभिंवायत्समंस्वीकरोषि॥४४॥ अयित्यक्तासिकस्तूरिपामरैःपंकशंकया॥ अलंखेदेनभूपालाःकिंनसंतिमहीतले॥४५॥ कस्यापि॥ जन्मस्थानंनखलुविमलंवर्णनीयोनवर्णोदूरात्पुंसांवपुषिरचनापंकशंकांतनोति॥यद्यप्येवंसकलसुरभिद्रव्यगर्वापहारीनोजानीतेपरिमलगुणःकोपिकस्तूरिकायाः॥॥४६॥विद्यापतेः॥ कौस्तुभमुरसिमुरारेःशिरसिशशीद्योततेपुरंजयिनः॥जलजन्मानौजलधेर्जग्मतुरियंतीगतिंपश्य॥४७॥ कस्यापि॥तुल्यंभूभृतिजन्मतुल्यमुभयोर्मूल्यंचतुल्यंवपुःस्वल्पंदार्ढ्यमुदग्रटंकदलनंतुल्यंचपाषाणयोः॥एकस्याखिलवंदनीयविधिनादेवत्वमारोपितंतद्द्वारेविहितापरस्यतुपदाघातास्पदंदेहली॥४८॥ तृषार्तैःसारंगैःप्रतिजलधरंभूरिविरुतंघनैर्मुक्ताधाराःसपदिपयसस्तान्प्रतिमुहुः॥खगानांकेमेघाःकइहविहगावाजलमुचामयाच्योनार्तानामनुपकरणीयोनमहतां॥४९॥ भ्रातःपंजरलावकमाकुरुसंतोषमन्यनिधनेन॥भ्रातस्तवैवधातुस्वामित्वंकिंनजानासि॥५०॥ मलोत्सर्गंगजेंद्रस्यमूर्ध्निकाकःकरोतियत्॥कुलानुरूपंतत्तस्ययोगजोगजएवसः॥५१॥ ग्रासाद्गलितसिक्थस्यकिंगतिंकरिणांभवेत्॥पिपीलिकाःपुनस्तेनसकुटुंबोपिजीवति॥५२॥ बंधनस्थोहिमातंगःसहस्रभरणक्षमः॥अपिस्वच्छंदचारीश्वास्वोदरापूरणेक्षमः॥५३॥ ऊर्णांनैवदधातिनैवविषयोवाहस्यदोहस्यवातृप्तिर्नास्यमहोदरस्यबहुभिर्घासैःपलालैरपि॥हाकष्टंकथमस्यपृष्ठशिखरेघोणीसमारोप्यतेकोगृण्हातुकपर्दकैरलमितिग्राम्येर्गजोहास्यते॥५४॥ केषामप्येते॥पिबपयःप्रसरिक्षितिपांतिकंकलयकांचनकांचनसृंखलां॥इदमवद्यतमंहिपरी

हस्तेभघणासंप्रतिकेसरिणस्तुलां॥५५॥भीमसिंहपंडितस्य॥उदस्योच्चैःपुच्छंशिरसिनिहितंजीर्णजटिलंयदृच्छाव्यापन्नद्विपशिततलेशाःकवलिताः॥गुहागर्तेशून्येशुचिरमुषितंजंबुकसखेकिमेतस्मिन्कुर्मोयदसिभगतःसिंहमसतां॥५६॥भट्टेंदुराजस्य॥यस्यांसकेसरियुवापदमावबंधगंधद्विपेंद्ररुधिरारुणितांगणायां॥तामद्यपर्वतदरीधुतधूम्रलोमागोमायुरेष वपुषामलिनीकरोति॥५७॥निष्कंदाभरविंदिनीस्थपुटितोद्देशांकमेरुस्थलींजंबाल्लाविलमंबुकर्तुमितरास्सूतेवराहीसुतान्॥दंष्ट्रायांचतुरर्णवोर्मिपटलैरा प्लावितायामिपंयस्याएवशिशोःस्थितावसुमतीसापौत्रिणीपुत्रिणी॥५८॥कस्यापि॥शतपदेशतपदाशतेक्षणायदिनगो यदमप्यातिवर्त्तितुं॥किमियतांद्विपदस्यहनूमतोजलपदैःक्रमणेविदितामहे॥५९॥भल्लाटस्य॥वृक्षांदोलनमद्यतेह्यनुगतंघर्मस्ययूथस्यवामूकान्वेषणरोषसौख्यबहुलाश्चेशमुखोस्याःकुतः॥ह्यारण्येफलपूर्णगल्लकुहरस्यानेषुताभीषिकाभीतःसंप्रतिकौशिकाकुलचलव्यालःकपेनृत्यसि॥६०॥दामोदरदेवानां॥आकर्ण्यगर्जितरवंघनगर्जतुल्यंसिंहस्ययांतिवनमन्यदिभाभयार्त्ताः॥तत्रैवपौरुषनिधिःस्वकुलेनसार्द्धंदर्पोद्धुरोवसतिवीजभयोवराहः॥६१॥शार्ङ्गधरस्य॥सद्वृत्तसद्गुणविचित्रमहार्हकांतेकांताघनस्तनतटोचितचारुमूर्त्ते॥आःपामरीकठिनकंठविलग्नभंगहाहारहारितमहोभवतागुणित्वं॥६२॥उत्तुंगमत्तमातंगमस्तकन्यस्तलोचनः॥आसन्नेऽपिचसारंगेनवांछांकुरुतेहरिः॥६३॥यद्यपिचंदनविटपीविधिनाफलकुसुमवर्जिताहिकृतः॥निजवपुषैवपरेषांतथापिसंतापमपनयति॥६४॥अस्तियद्यपिसर्वत्रनीरंनीरजमंडितं॥रमतेनैवहंसस्यमानसंमानसंविना॥६५॥विषभारसहस्रेणगर्वंनाऽऽयातिवासुकिः॥वृश्चिकोबिंदुमात्रेणऊर्ध्वंवहतिकंटकं॥६६॥दिव्यंचूतरसंपीत्वागर्वेनोयातिकोकिलः॥पीत्वाकर्दमपानीयंभेकोरटरटायते

६७॥त्यजकिंशुकपुष्पितताभिमानंनिजशिरसिभ्रमरोपसेवनेन॥वि
कसन्नवमल्लिकावियोगात्कुरुतेवन्हिधियात्वयिप्रवेशं॥ ६८॥
काकस्यगात्रंयदिकांचनस्यमाणिक्यरत्नंयदिचंचुदेशे॥एकैक
पक्षेग्रथितंमणीनांतथाऽपिकाकोनतुराजहंसः॥६९॥सच्छिद्र
निकटेवासोनकर्त्तव्यःकदाचन॥घटीपिबतिपानीयंताड्यतेझल्ल
रीयथा॥७०॥माकंदराजपरिरंभणलालिताऽपिमल्लीवधूर्मधुपरा
गवतीबभूव॥दृष्ट्वाऽपितत्कुटिलतांनजहातिचूतःप्रायःकुजाति
निवहेषुकृतोऽभिमानः॥७१॥आबद्धकृत्रिमसटाजटिलांऽसभि
त्तिरारोपितोमृगपतेःपदवींयदिश्वा॥मत्तेभकुंभतटपाटनलंपट
स्यनादंकरिष्यतिकथंहरिणाऽधिपस्य॥७२॥कैवर्तकर्कशकर
ग्रहणच्युतोऽपिजालांतरेनिपतितःशफरोवराकः॥दैवात्ततो
विगलितोगिलितोबकेनवक्रेविधौवदकथंव्यवसायसिद्धिः॥७३
माधुर्यसाराधरितामृतस्यतत्कंटकित्वंपनसस्यसत्यं॥उन्मादि
नोमातुलपुत्रकस्यकथंसहामोवतकंटकित्वं॥७४॥प्रदीपकि
मुकुप्यसिप्रलयमारुतप्रज्वलत्प्रभापटलपाटलप्रकटपावक
व्यक्तये॥त्वमंगकिमुकामिनीकुचतटीपटीपल्लवप्रकंपनपरि
स्फुरत्पवनलेशपारंगतः॥७५॥यांकांतिंवहसिपरांप्रदीपभद्र
स्नेहाऽसावित्तिहृदिमास्मप्रमन्यथास्त्वं॥सस्नेहेत्वयिनिशिभा
नुनाऽऽहितासौनैवंचेदहहनिसतिक्वागतासा॥७६॥समुप
गतवतिदैवादवहेलांकुटजमधुकरेमागाः॥मकरंदतुंदिलाना
मरविंदानामयंमहामान्यः॥७७॥अपरिकरवालधाराऽऽकाराः
क्रूराभुजंगमपुंगवात्॥अंतःसासाद्राक्षादीसागुरवोजयंतिके
ऽपिजनाः॥७८॥विश्वास्यमधुरवचनैःसाधून्येवंचयंतिनम्रत
माः॥तानपिदधासिमातःकाश्यपियातस्तवापिचविवेकः॥७९॥
एकोविश्वसतांहराम्यपघृणःप्राणानहंप्राणिनामित्येवंपरिचिंत्य
मास्ममनसिव्याधाऽनुतापंकृथाः॥भूपानांभवनेषुकिंचविमलक्षे
त्रेषुगूढाशयाःसाधूनामरयोवसंतिकतिनत्वत्तुल्यकक्षाःखलाः।८०

अमितगुणोऽपिपदार्थोदोषेणैकेननिंदितोभवति॥निखिलरसायनमहितोगंधेनोग्रेणलशुनइव॥८१॥उपकारमेवतनुतेविपद्गतःसद्गुणोमहताम्॥मूर्छांगतोमृतोवानिदर्शनंपारदोऽत्ररसः॥८२॥गिरयोगुरवस्तेभ्योऽप्युर्वीगुर्वीततोऽपिजगदंडं॥तस्मादप्यतिगुरवःप्रलयेऽप्यचलामहात्मानः॥८३॥दूरीकरोतिकुमतिंविमलीकरोतिचेतश्चिरंतनमघंचुलुकीकरोति॥भूतेषुकिंचकरुणांबहुलीकरोतिसंगःसतांकिमुनमंगलमातनोति॥८४॥अनवरतपरोपकरणव्यग्रीभवदमलचेतसांमहतां॥आपातकाटवानिस्फुरंतिवचनानिभेषजानीव॥८५॥मृतस्यलिप्साकृपणस्यदित्साविमार्गगायाश्चरुचिःस्वकांते॥सर्पस्यशांतिःकुटिलस्यमैत्रीविधातृसृष्टौनहिदृष्टपूर्वा॥८६॥उत्तमानामपिस्त्रीणांविश्वासोनैवविद्यते॥राजप्रियाःकैरविण्योरमंतेमधुपैःसह॥८७॥अयाचितःसुखंदत्तेयाचितश्चनयच्छति॥सर्वस्वंचाऽपिहरतेविधिरुच्छृंखलोनृणां॥८८॥कोटिद्वयस्यलाभेऽपिनतंसद्वंशजंधनुः॥असद्वंश्यःशरःस्तब्धोलक्ष्यलाभाभिशंकया॥८९॥अज्ञातयाप्रेम्णावाचूडामणिमाकलय्यकाचमणिं॥नृपतिर्वहेतशिरसातेनाऽसौनह्यनर्घ्यमणिः॥९०॥मांगल्यंप्रथयन्यशोविशदयन्धाटींसुखेयोजयन्भूपानांकलयन्कथांविरचयन्हस्तांगुलीःस्फोटयन्॥दानंपल्लवयन्गुणंद्विगुणयन्नेत्रांचलंघूर्णयन्लंपाकःसविधंसमेत्यसुहृदशांकिनामनोभाषते॥९१॥अंतर्वसतिमार्जारीशुनीवाराजवेश्मनि॥वहिर्वद्धोऽपिमातंगस्ततःकिंलघुतांगतः॥९२॥अस्मिन्केलिवनेसुगंधपवनेक्रीडत्सुरंध्रीजनेगुंजद्भृंगकुलेविशालवकुलेकूजत्पिकीसंकुले॥उन्मीलन्नवपाटलापरिमलेमल्लीप्रसूनाकुलेयद्येकापिनमालतीविकसितानत्किंनरम्योमधुः॥९३॥दुर्लीलपल्लिपतिपुत्रहस्तेकस्तूरिकस्तेवदुर्विपाकः॥आरभ्यसौरभ्यकथाक्षमोनमालिन्यमात्रेवचसोवकाशः॥९४॥जन्मस्था

नंनखलुविमलंवर्णनीयोनवंशोदूरेपुंसांवपुषिरचनापंकशंकां
करोषि॥यद्यप्येवंसकलसुरभिद्रव्यगर्वापहारीकोजानीतेपरिमल
गुणःकस्तकस्तुरिकायाः॥९५॥उदस्योच्चैःपुच्छंशिरसिनिहितं
जीर्णजटिलंपदेच्छान्यापन्नंहिपपिशितलेशाःकवलिताः॥गुहा
गर्तेशून्येसुचिरमुषितंजंबुकसखेकिमेतस्मिन्कुर्मोयदसिनगतः
सिंहसमतां॥९६॥अपित्यक्तासिकस्तूरिपामरैःपंकशंकया॥अ
लंखेदेनभूपालाःकिंनसंतिमहीतले॥९७॥भस्मनिस्मररिपोरनु
रागोहीयतेनघनसारपरागः॥भूषणंयदिफणीनमणीनांकांचि
दप्यपचितिर्नचहेम्नः॥९८॥हेहेमकारपरदुःखविचारमूढकिं
मांमुहुःक्षिपसिवारशतानिवन्हौ॥आतापितेनमयिवर्णगुणाति
रेकोलाभःपरंतवमुखेखलुभस्मपातः॥९९॥अनभालितएवके
वलंखनिगर्भेनिधिरेषजीर्यतु॥नतुसीदतुमूल्यहानितोवणिजा
लोचनगोचरीकृतः॥१००॥संग्रामांगणमागतेदशमुखेसौमित्रि
णाविस्मितंसुग्रीवेणविवर्त्तितंहनुमताव्यालोलमालोकितं॥श्री
रामेणपरंतुपीनपुलकस्फूर्जत्कपोलश्रियासांद्रानंदरसालसानि
रुधिरेबाणासनेदृष्टयः॥१०१॥आलापंकलकंठिकानकुरुतेकी
रानधीरध्वनिंव्याहारंकलयंतिकोमलगिरःकूजंतिनोबर्हिणः॥
नीराडंबरदुर्दिनांबरतलेदूरेद्विरेफध्वनिःकाकाःकेवलमेवकेरु
तरवैःकुर्वंतिकर्णज्वरं॥१०२॥बंधनस्थोपिमातंगःसहस्रभरण
क्षमः॥अपिस्वच्छंदचारीश्वास्वोदरेणापिपीडितः॥१०३॥नागाःस
सुपक्षमकातरधियावैवर्ण्यमाकर्णयश्रीकार्णाट वसुंधराधिप
सुधासिक्तानिसूक्तानिनः॥वर्ण्यंतेकतिनार्णवानचनदीदाव
ग्निविंध्याटवीइंद्रामारुतनिर्झरप्रभृतयस्तेभ्यःकिमाःस्तंमया॥
१०४॥इतिश्रीबृहच्छार्ङ्गधरवि०पद्धत्यांसंकीर्णान्योक्तिपरिच्छेदः॥

अथमिश्रप्रकरणं

गतःसकालोयत्रासीदवज्ञाकल्पशाखिनां॥उदुंबरफलेभ्यो
ऽपिस्पृहयामोऽद्यजीवितं॥१॥दुष्टाभार्याशठंमित्रंभृत्यश्चोत्तरदा

यकः॥ससर्पेचगृहेवासोमृत्युरेवनसंशयः॥२॥त्वंचेन्नीचजना
नुरागरभसादस्मासुमंदाऽऽदरः कानोमानदमानहानिरियतीभूः
किंत्वमेकःप्रभुः॥गुंजापुंजपरेपरापतिचयाझ्झिल्लीजनेरुझ्झितं
मुक्तादामनधारयंतिकिमहोकंठेकुरंगीदृशः॥३॥पंचभिःसहगं
तव्यंस्थातव्यंपंचभिःसह॥पंचभिःसहवक्तव्यंनदुःखंपंचभिःसह
॥४॥त्यजेदेकंकुलस्याऽर्थेग्रामस्यार्थेकुलंत्यजेत्॥ग्रामंजनपद
स्यार्थेआत्मार्थेपृथिवींत्यजेत्॥५॥ अमृतंदुर्लभंनृणांदेवाना
मुदकंतथा॥पितृणांदुर्लभःपुत्रस्तक्रंशक्रस्यदुर्लभं॥६॥याति
न्यायप्रवृत्तस्यतिर्यंचोऽपिसहायतां॥अपंथानंतुगच्छंतंसोद
रोऽपिविमुंचति॥ ७॥विद्याऽभ्यासोविचारश्चसमयोरेवशोभते
॥विवाहश्चविवादश्चसमयोरेवशोभते॥८॥लक्ष्मीर्वसतिजि
ह्वाग्रेजिह्वाग्रेमित्रबांधवाः॥जिह्वाग्रेबंधनंप्राप्तंजिह्वाग्रेमरणं
ध्रुवं॥९॥यस्मिन्देशेनसंमानोनप्रीतिर्नचबांधवाः॥नचविद्या
ऽगमःकश्चिन्नतत्रदिवसंवसेत्॥१०॥वहेदमित्रंस्कंधेनयाव
त्कालविपर्ययः॥अथैवमागतेकालेभिंद्याद्घटमिवाऽश्मनि॥
॥११॥सर्वनाशेसमुत्पन्नेह्यर्धंत्यजतिपंडितः॥अर्धेनकुरुतेका
र्यंसर्वनाशोनजायते॥१२॥मूर्खशिष्योपदेशेनदुष्टस्त्रीभरणेन
च॥द्विषतांसंप्रयोगेणपंडितोऽप्यवसीदति॥१३॥गतश्रीर्गणका
न्द्वेष्टिगताऽऽयुश्चचिकित्सकान्॥गतश्रीश्चगतायुश्चब्राह्मणा
न्द्वेष्टिभारत॥१४॥सुहृदिनिरंतरचित्तेगुणवतिभृत्येपियासुना
रीषु॥स्वामिनिशक्तिसमेतेनिवेद्यदुःखंजनःसुखीभवति॥१५॥
अर्थाऽऽतुराणांनगुरुर्नबंधुःकामातुराणांनभयंनलज्जा॥विद्या
तुराणांनसुखंननिद्राक्षुधातुराणांनरुचिर्नवेला॥१६॥अन्वया
गतविद्यानामन्वयागतसंपदां॥विदुषांचप्रभूणांचहृदयेनाऽव
लिप्यते॥१७॥ज्योतिषंशकुनंधर्मंप्रायश्चित्तंचिकित्सितं॥विना
शास्त्रेणयोब्रूवेतमाहुर्ब्रह्मघातकं॥१८॥ मक्षिकामशकोवेश्या
मूषिकोयाचकस्तथा॥ग्रामणीर्गणकश्चैवसप्तैतेपरभक्षकाः॥

॥१९॥अकृतोपद्रवःकश्चिन्महानपिनपूज्यते॥अर्चयंतिनरानागं
नतार्क्ष्यंनगजादिकं॥२०॥शोभंतेविद्ययाविप्राःक्षत्रियाविजयश्रिया
॥श्रियोऽनुकूलदानेनलज्जयाचकुलांगनाः॥२१॥गंतव्याराज
सभाद्रष्टव्याराजवल्लभाः पुरुषाः॥यद्यपिनभवत्यर्थोभवत्यन
र्थप्रतीकारः॥२२॥ब्राह्मणागणकावेश्याःसारमेयाश्चकुक्कुटाः
दृष्ट्वान्येषुकुप्यंतिनजानेतस्यकारणं॥२३॥पुत्रपौत्रवधूभृत्यैः
संपूर्णमपिसर्वदा॥भार्याहीनगृहस्थस्यशून्यमेवगृहंमतं॥२४
एकंदृष्ट्वाशतंदृष्ट्वादृष्ट्वापंचशतान्यपि॥अतिलोभोनकर्तव्यश्चक्रं
भ्रमतिमस्तके॥२५॥अक्षरद्वयमभ्यस्तंनास्तिनास्तीतियत्पुरा॥
तदिदंदेहिदेहीतिविपरीतमुपस्थितं॥२६॥नवेवयसियःशांतःस
शांतइतिमेमतिः॥धातुषुक्षीयमाणेषुशांतिःकस्यनजायते॥२७
अर्थाहसंस्कचितदानविहीनलुब्धं भूम्योहसंतिममभूमिरिति
ब्रुवाणं॥जाराहसंतितनयानुपलालयंतंमृत्युर्हसत्यवनिपंरणरंगभी
रुं॥२८॥ऋणकर्तापिताशत्रुर्माताचव्यभिचारिणी॥भार्यारूपवं
तीशत्रुःपुत्रःशत्रुरपंडितः॥२९॥विवाहकालेऋतुसंप्रयोगेप्रा
णाऽत्ययेसर्वधनाऽपहारे॥विप्रस्यचार्थेऽप्यनृतंवदेयुःपंचाऽनृता
न्याहुरपातकानि॥३०॥दृष्टिपूतंन्यसेत्पादंवस्त्रपूतंजलंपिबेत्
सत्यपूतंवदेद्वाक्यंमनःपूतंसमाचरेत्॥३१॥धिग्गृहंगृहिणीशू
न्यंधिक्कलत्रमपुत्रकं॥धिक्पुत्रमविनीतंचधिग्ज्योतिषमजातकं
॥३२॥अश्वंनैवगजंनैवव्याघ्रंनैवचनैवच॥अजापुत्रंबलिंदद्या
द्देवोदुर्बलघातकः॥३३॥दुर्मंत्रीराज्यनाशायग्रामनाशायकुंजरः
॥श्यालकोगृहनाशायसर्वनाशायमातुलः॥३४॥जलेतैलंखले
गुह्यंपात्रेदानंमनागपि॥प्राज्ञेशास्त्रंस्वयंयातिविस्तारंवस्तुशक्ति
तः॥३५॥हरिंहरीतकींचैवगायत्रींचदिनेदिने॥मोक्षाऽरोग्यतपः
कामश्चिंतयेद्धसपेज्जपेत्॥३६॥उद्योगःकलहःकंडूर्द्यूतंमद्यंपरस्त्रि
यः॥आहारोमैथुनंनिद्रासेवनात्तुविवर्धते॥३७॥पुराकृतकरग्रहाव
सनपात्ररक्षाकरीस्थिताशयनसंनिधौगुणवतीनिगूढाऽनना॥

मताजठरपूर्तयेभुजशिरःसमारोपिता मनोहरतिधींगटीसुव
तिवत्सवासेनृणां॥३८॥निद्राप्रियोयःसतुकुंभकर्णोहतःसमीके
रघुनंदनेन॥तवोऽस्यपत्नीविधवाप्रजाताश्रोतुंसमायातिकथां
पुराणं॥३९॥मानरहितःस्वकार्यसाधनसुपटुर्महाजलधिवासी
॥श्रुसेकहृष्टगोत्रःप्रियभक्तश्चित्तपावनोभगवान्॥४०॥सत्तारकं
नाहिनांतमंतर्यस्यस्थितिस्ततः॥भवेन्नयनतेसख्यंगुणैरेतैरमा
पते॥४१॥स्त्रीविनश्यतिरूपेणब्राह्मणोराजसेवया॥गावोदूरप्र
चारेणहिरण्यंलाभलिप्सया॥४२॥दरिद्रताधीरतयाविराजते
कुरूपताशीलतयाविराजते॥कुभोजनंचोष्णतयाविराजतेकुव
स्त्रताशुभ्रतयाविराजते॥४३॥संहतिःश्रेयसीपुंसांस्वकुलैर॰
ल्पकैरपि॥तुषेणाऽपिपरित्यक्तानप्ररोहंतितंडुलाः॥४४॥अल्पा
नामपिवस्तूनांसंहतिःकार्यसाधिका॥तृणैर्गुणत्वमापन्नैर्बध्यंते
मत्तदंतिनः॥४५॥कृतार्थःस्वामिनंद्वेष्टिकृतदारस्तुमातरं॥जा
ताऽपत्यापतिंद्वेष्टिगतरोगश्चिकित्सकं॥४६॥विस्मयःसर्वथाहे
यःप्रत्यूहःसर्वकर्मणां॥तस्माद्विस्मयमुत्सृज्यसाध्यसिद्धिर्विधी
यतां॥४७॥षट्कर्णोभिद्यतेमंत्रश्चतुष्कर्णःस्थिरोभवेत्॥द्विकर्ण
स्यचमंत्रस्यब्रह्माऽप्यंतंनगच्छति॥४८॥भूमिपतावर्थपतौबाले
वृद्धेतपोनिधौविदुषि॥योषितिमूर्खेगुरुषुचविदुषानैवोत्तरंदेयं॥
॥४९॥यशःपुण्यंकलत्राणिपुत्रोत्पत्तिर्निधिस्तथा॥सुकृतादेवल
भ्यंतेनचपार्थपराक्रमात्॥५०॥राज्ञिधर्मिणिधर्मिष्ठाःपापेपापाः
समेसमाः॥लोकास्तमनुवर्ततेयथाराजातथाप्रजा॥५१॥क्षांति
तुल्यंतपोनाऽस्तिनतोषात्परमंसुखं॥नाऽस्तितृष्णापरोव्याधिर्न
चधर्मोदयापरः॥५२॥यत्राऽस्तिलक्ष्मीर्विनयोनतत्रअभ्यागतो
यत्रनतत्रलक्ष्मीः॥उभौचतौयत्रनतत्रविद्यानैकत्रसर्वोगुणस
न्निपातः॥५३॥वैद्यावदंतिकफपित्तमरुद्विकारान्ज्योतिर्विदो
ग्रहगतिंपरिवर्तयंति॥भूताऽभिषंगइतिभूतविदोवदंतिप्राचीनक
र्मबलवन्मुनयोवदंति॥५४॥द्वारिप्रविष्टःसहसाततःकिंदृष्टःप्रभुः

स्मेरमुखस्ततःकिं॥कथाश्रुताश्रोत्ररमात्ततःकिं व्यथानशांतायदि
जाठरीया॥५५॥सक्षैतानिनपूर्यंतेपूर्यमाणान्यनेकशः॥ब्राह्मणो
ऽग्निर्यमोराजापयोधिरुदरंगृहं॥५६॥संतोषस्त्रिषुकर्तव्यःस्व
दारेभोजनेधने॥त्रिषुचैवनकर्तव्योदानेतपसिपाठने॥५७॥मृ
गामृगैःसंगमनुव्रजंतिगावश्चगोभिस्तुरगास्तुरंगैः॥मूर्खाश्चमू
र्खैःसुधियःसुधीभिःसमानशीलव्यसनेषुसख्यं॥५८॥यःकुंत
पाणिरिहभूपइतिप्रसिद्धोभूखंडमात्रविभवःपरसेवकश्च॥ त
स्याऽत्मजःसततमिच्छतिराजशब्दंव्रीडेजगज्जननिहंतनिरा
श्रयाऽसि॥५९॥एकःपंचत्वमासाद्यजायतेपुनरष्टधा॥अहोवा
णिज्यसंपत्तिःकाशीपुरनिवासिनां॥६०॥सुपर्णपरिसेवितस्तद
नुसाधुपूगाऽन्वितोद्विजाऽवनमहाफलस्तदनुसारसंधानभाक्
॥सदैवसुधयाऽशनंभवतियस्यविष्णोःसमस्तमासुरितिसेव्य
तांभवतिवैयतोरागिता॥६१॥सुकुलजन्मविभूतिरनेकधाप्रिय
समागमसौख्यपरंपरा॥नृपकुलेगुरुताविमलंयशोभवतिपु
ण्यतरोःफलमीदृशं॥६२॥कल्पांतवातसंक्षोभलंघिताऽशेषभू
भृतः॥स्थैर्यप्रसादमर्यादास्ताएवहिमहोदधेः॥६३॥पादसेवा
हनेवज्रीकेशसंवाहनेफणी॥अहोभाग्यंपुरंध्रीणांदधिसंमथने
रविः॥६४॥बोधितोऽपिबहुसूक्तिविस्तरैःकिंखलोजगतिसज्ज
नोभवेत्॥स्नापितोऽपिबहुशोनदीजलैर्गर्दभःकिमुहयोभवेत्क
चित्॥६५॥संपत्सरस्वतीसत्यंसंतानंसदनुग्रहः॥सत्तासुकृत
संभारःसकाराःसप्तदुर्लभाः॥६६॥कृतेचरेणुकाकृत्यात्रेतायां
जानकीतथा॥द्वापरेद्रौपदीकृत्याकलौकृत्यागृहेगृहे॥६७॥मांसं
मृगाणांदशनागजानांमृगद्विषांचर्मफलंद्रुमाणां॥स्त्रीणांस्वरू
पंचनृणांहिरण्यमेतेगुणावैरकराभवंति॥६८॥आदरेणयथास्तौ
तिधनवंतंधनेच्छया॥तथाचेद्विश्वकर्त्तारंकोनमुच्येतबंधनात्॥
६९॥यस्यचाऽप्रियमन्विच्छेत्कुर्यात्तस्यसदाप्रियं॥व्याधोमृग
वधंकर्तुंसम्यग्गायतिसुस्वरं॥७०॥नपुत्रात्परमोलाभोनभार्याऽ

या:सुखंपरं।। नधर्मात्परमंमित्रंनाऽनृतात्पातकंपरं।।७१।।अर्थना
शंमनस्तापंगृहेदुश्चरितानिच।। वचनंचापमानंचमतिमान्नप्रका
शयेत्।।७१।।ऐश्वर्यस्यविभूषणंसुजनताशौर्यस्यवाक्संयमोज्ञा
नस्योपशमःकुलस्यविनयोवित्तस्यपात्रेव्ययः।। अक्रोधस्तपसः
क्षमाप्रभवितुर्धर्मस्यनिर्व्याजतासर्वेषामपिसर्वकारणमिदंशी
लंपरंभूषणं।।७२।। अभ्रच्छायाखलप्रीतिर्नवसस्यानियोषितः।।किं
चित्कालोपभोग्यानियौवनानिधनानिच।।७३।।परोऽपिहितवान्
बंधुर्बंधुरप्यहितःपरः।। अहितोदेहजोव्याधिर्हितमारण्यमौष
धं।।७४।।जलबिंदुनिपातेनक्रमशःपूर्यतेघटः।।सहेतुःसर्वविद्या
नांधर्मस्यचधनस्यच।।७५।।सुपात्रदानाच्चभवेद्धनाऽढ्योधन
प्रभावेणकरोतिपुण्यं।।पुण्यप्रभावात्सुरलोकवासीपुनर्धनाढ्यः
पुनरेवभोगी।।७६।।कुपात्रदानाच्चभवेद्दरिद्रोदारिद्र्यदोषेणक
रोतिपापं।।पापप्रभावान्नरकंप्रयातिपुनर्दरिद्रःपुनरेवपापी।७७
प्रभुर्विवेकीधनवांश्चदाताविद्वान्विरागीप्रमदासुशीला।।तुरंग
मःशस्त्रनिपातधीरोभूमंडलस्याऽऽभरणानिपंच।।७८।।प्राप्य
चलानधिकारान्शत्रुषुमित्रेषुबंधुवर्गेषु।।नाऽपकृतंनोपकृतंन
सत्कृतंकिंकृतंतेन।।७९।।सत्यभामासमाश्लिष्टःसाधुवृंदावनेर
तः।।यशोदयासमायुक्तस्त्वांपायात्त्वादृशोहरिः।।८०।।वित्तंपरि
मितमधिकव्ययशीलंपुरुषमाकुलीकुरुते।।ऊनांऽशुकमिवपी
नस्तनजघनायाःकुलीनायाः।।८१।।सौवर्णानिसरोजानिनिर्मा
तुंसंतिशिल्पिनः।। तत्रसौरभनिर्माणेचतुरश्चतुराननः।।८२।।स
र्वोद्वेगकरंमृगादनमसुंसंत्यज्यहाधिकृत्यपालोकस्याऽनपकारिणं
गिरिनदीतीराऽटवीनिर्वृतं।। अभ्रांतंतृणमेणशावमदयंव्याध
भ्रताऽसुंरख्यादेवोदुर्बलघातकोऽयमितिसागाथायथार्थीकृता
।।८३।।स्वदेशजातस्यनरस्यनूनंगुणाऽधिकस्याऽपिभवेदवज्ञा।।
निजांऽगनायद्यपिरूपराशिस्तथाऽपिलोकःपरदारसक्तः।।८४।।
घृतंनश्रूयतेकर्णेदधिस्वप्नेऽपिदुर्लभं।।मुग्धेदुग्धस्यकावार्ता त

क्रंशाक्रस्यदुर्लभं॥८५॥ कोनयातिवशंलोकेमुखेपिंडेनपूरितः॥
मृदंगोमुखलेपेनकरोतिमधुरध्वनिं॥८६॥ब्रह्मन्नध्ययनस्यनै
षसमयस्तूष्णींबहिःस्थीयतांस्वल्पंजल्पबृहस्पतेजडमतेनै
षासभावज्रिणः॥वीणांसंहरनारदस्तुतिकथाऽऽलापैरलंतुंबु
रोसीतारल्लकभल्लभग्नहृदयःस्वस्थोनलंकेश्वरः॥८७॥ येषां
श्रीमद्यशोदासुतपदकमलेनाऽस्तिभक्तिर्नराणांयेषामाभीरक
न्याप्रियगुणकथनेनाऽनुरक्तारसज्ञा॥येषांश्रीकृष्णलीलाल
लितगुणरसेसादरौनैवकर्णौधिक्तान्धिक्तान्धिगेतान्क
थयतिसततंकीर्तनस्थोमृदंगः॥८८॥ नकश्चिदपिजानातिकिं
कस्यश्वोभविष्यति॥ अतश्वःकरणीयानिकुर्याद्यैवबुद्धिमान्
॥८९॥ किंचित्रंयदिराजनीतिकुशलोराजाभवेद्धार्मिकः किंचि
त्रंयदिवेदशास्त्रनिपुणोविप्रोभवेत्पंडितः॥ तच्चित्रंयदिरूपयौ
वनवतीसाध्वीभवेत्कामिनीतच्चित्रंयदिनिर्दयोऽपिपुरुषःपापं
नकुर्यात्क्वचित्॥९०॥पितारत्नाऽऽकरोयस्यलक्ष्मीर्यस्यसहो
दरी॥शंखोरोदितिभिक्षार्थीनादत्तमुपतिष्ठति॥९१॥ लुब्धानां
याचकःशत्रुश्चोराणांचंद्रमारिपुः॥जारस्त्रीणांपतिःशत्रु
र्मूर्खाणांबोधकोरिपुः॥९२॥ परोपदेशवेलायांशिष्टाःसर्वेभ
वंतिवै॥ विस्मरंतीहशिष्टत्वंस्वकार्येसमुपस्थिते॥९३॥आक
र्ण्यभूपालयशस्त्वदीयंविधूनयंतीहनकेशिरांसि॥ विश्वंभरा
भंगभयेनधात्रानाऽकारिकर्णोभुजगेश्वरस्य॥९४॥ अगाधहृ
दयाभूपाःकूपाइवदुरासदाः॥घटकागुणिनोनोचेत्कथंलभ्येत
जीवनं॥९५॥ अलभ्यंलब्धुकामस्यजनस्यगतिरीदृशी॥अल
भ्येषुमनस्तापःसंचिताऽर्थोविनश्यति॥९६॥ शत्रुवाक्याऽमृतं
श्रुत्वातेनसौहार्दमार्जवं॥नहिधीरेणकर्तव्यमात्मनःशुभमि
च्छता॥९७॥ स्त्रीणांहिसाहचर्याद्भवंतिचेतांसिभर्तृसदृशानि॥
मधुरापिहिमूर्छयतेविषविटपिसमाश्रितावल्ली॥९८॥अध्वाजरा
मनुष्याणामनध्वावाजिनांजरा॥अमैथुनंजरास्त्रीणांवस्त्राणामा

तपोजरा॥९९॥ वाजीचारुगतिःशशांकधवलंछत्रंप्रियापृष्ठ
तःप्रोत्तुंगस्तनमंडलाचपुरतोभृत्याःपुनःपंचषट्॥ तांबूलंम
धुरंसखाचचतुरःसंपद्यतेचेत्सखिप्राहुस्तत्कृतप्रयाणमितरत्सा
णप्रयाणंबुधाः॥१००॥ विप्रेभ्यःसाधुदानंरिपुजनसुहृदांचोप
कारान्कुरुत्वंसौजन्यंबंधुवर्गेनिजहितमुचितंस्वामिकार्येय
थार्थं॥ श्रोत्रेतेतथ्यमेतत्कथयतिसततंलेखनीभाग्यशालि
न्नोचेन्नष्टेऽधिकारेममसुखसदृशंतावकाऽस्यंभवेद्धि॥१०१॥
व्यालाश्रितोऽपिविफलोऽपिसकंटकोऽपिवक्रोऽपिपंकजनितोऽ
पिदुरासदोऽपि॥ गंधेनबंधुरसिकेतकपुष्पजेनह्येकोगुणःखलु
निहंतिसमस्तदोषान्॥१०२॥ अकूर्चारंभोऽपिप्रतिचिबुकदेशंकर
तलंप्रतिज्ञायांकुर्वन्प्रयुवतिषुदृशंस्निग्धतरलां॥ कुमारोहुंकारा
त्परिषदिसमानाननगणयन्भुजौवक्षःपश्यन्नववयसिकांतिंवित
नुते॥१०३॥ कीटोऽपिभ्रमरीभवेद्विरतध्यानात्तथाचेदहंरामः
स्यांत्रिजटेहताऽस्मिपुरतोदंपत्यसौख्यच्युता॥ एवंचेत्कृतकृ
स्तैवभवितारामस्तवध्यानतःसीतात्वंचनिहत्यरावणरिपुंगं
ताऽस्मिरामांऽतिकं॥१०४॥ राजंस्त्वत्कीर्तिचंद्रेणतिथयःपूर्णिमाः
कृताः॥ मद्गेहान्नबहिर्यातितिथिरेकादशीभयात्॥१०५॥ धर्म
प्रसंगादपिनाऽऽचरंतिपापंप्रयत्नेनसमाचरंति॥ आश्चर्यमेतद्धि
मनुष्यलोकेऽमृतंपरित्यज्यविषंपिबंति॥१०६॥ अर्थीलाघवमु
च्छ्रितोनिपतनंकामाऽऽतुरोलांछनंलिःस्वोवंचनमुन्मनाविकल
तांदोषाऽऽकुलःसंशयं॥ लुब्धोऽकीर्त्तिमसंगरःपरिभवंदुष्टोऽन्य
दोषेरतिंदुर्वागप्रियतांदुरोदरवशःप्राप्नोतिकष्टंमुहुः॥१०७॥ का
कःपद्मवनेरतिंनकुरुतेहंसोनकूपोदकेमूर्खःपंडितसंगमेनरम
तेदासोनसिंहासने॥ कुस्त्रीसज्जनसंगमेनरमतेनीचंजनंसेवते
यायस्यप्रकृतिःस्वभावजनिताकेनाऽपिनत्यज्यते॥१०८॥ काकः
पक्षबलेनभूपतिगृहेग्रासंयदिप्राप्तवान्किंवातस्यमहत्वमस्य
लघुतापंचाननस्याऽगता॥ येनाऽऽक्रम्यकरींद्रगंडयुगलंनिर्भि

द्यहेलालवालब्ध्वाग्रासवरंवराटकधियामुक्तागणस्त्यज्यते॥
१०९॥ अशनंमेवसनंमेजायामेबंधुवर्गोमे॥ इतिमेमेकुर्वाणंका
कवृकोहंतिपुरुषाऽजं॥११०॥ अगस्तितुल्याश्चघृताऽब्धिशोष
णेदंभोलितुल्यावटकाऽद्रिभेदने॥ शाकाऽवलीकाननवन्हिरूपा
स्तएवभक्ताइतरेभटाश्च॥१११॥ चत्वारोधनदायादाधर्माऽग्निनृ
पतस्कराः॥ तेषांज्येष्ठाऽवमानेनत्रयःकुप्यंतिबांधवाः॥११२॥ ध
न्यागोकुलकन्यावयमिहमन्यामहेजगति॥ यासांनयनसरोजे
ष्वंजनभूतोनिरंजनःसाक्षात्॥११३॥ नरकोपस्थितिंनामना
न्यांमन्यामहेवयं॥ यदेषादृश्यतेऽमुष्मिन्नरेकोपस्यरेस्थितिः
॥११४॥ परदाररतिःफलाऽभिसंधिर्बहुदंभोभगकामनाममत्वं
॥चरितंमुहुरस्मदीयमेतदपवर्गस्यकथंनुभाजनंस्मः॥११५॥
कविमतिरिवबहुलोहासुघटितचक्राप्रभातवेलेव॥ हरमूर्तिरि
वहसंतीभातिविधूमाऽनलोपेता॥११६॥ गंधःसुवर्णेफलमिक्षुदं
डेनाऽकारिपुष्पंखलुचंदनेषु॥ विद्वान्धनाऽढ्योनतुदीर्घजीवी
धातुःपुराकोऽपिनबुद्धिदोऽभूत्॥११७॥ निजगुणगरिमास्फुरवाक
रःस्यात्स्वयमनुवर्णयतांसतांनतावत्॥ निजकरकमलेनका
मिनीनांकुचकलशाऽऽकलनेनकोविनोदः॥११८॥ परैःप्रोक्तागु
णायस्यनिर्गुणोऽपिगुणीभवेत्॥ इंद्रोऽपिलघुतांयातिस्वयंप्र
ख्यापितैर्गुणैः॥११९॥ क्षोणीशाऽऽश्रयिणांपरोपकरणाऽभावाद्
वाऽप्रश्रियांकार्पण्यात्कुधियामनध्ययनतोयूनांप्रवासाऽऽश्रया
त्॥ ज्ञातॄणांजगदीशभक्तिविरहादायुर्वृथागच्छतीत्येवंकांस्यस
मुद्भवःप्रतिदिनंनादोवदत्युच्चकैः॥१२०॥ स्यादत्यंतनिरक्षरःक्षि
तिपतिःश्रीकारमात्राऽऽश्रयान्मंत्रीतत्कथिताऽर्थलेखनपरस्तत्से
वकोजायते॥ अध्येतातदगारमेवभजतेविद्वांस्ततंयाचतेयावा
न्नृपस्यगिरासमंपरिचयस्तावान्विदूरेश्रियः॥१२१॥ कमलेक
मलाशेतेहरःशेतेहिमालये॥ क्षीराऽब्धौचहरिःशेतेमन्येमत्कुण
शंकया॥१२२॥ सदवनमसदनुशासनमाश्रितभरणंचराजचिह्नानि॥

अभिषेकःपटबंधोबालव्यजनंव्रणस्याऽपि॥१२३॥ गुणवतस्त
वहारनयुज्यते परकलत्रकुचेषुविलुंठनं॥स्पृशतिशीतकरोज
घनस्थलीमुचितमस्तितदेवकलंकिनः॥१२४॥ अकृत्वंगमत
स्तर्कंनशातक्रतुनाहृतं॥नाऽदत्तमितिवाक्यार्थोनर्कंशक्रस्यदु
र्लभं॥१२५॥ असेवितेश्वरद्वारमदृष्टविरहव्यथं॥ अनुक्तक्लीब
वचनंधन्यंकस्याऽपिजीवितं॥१२६॥ आसन्नमेवनृपतिर्भजते
मनुष्यंविद्याविहीनमकुलीनमसंगतंवा॥प्रायेणभूमिपतयःप्र
मदालताश्चयःपार्श्वतोवसतितंपरिवेष्टयंति॥१२७॥ कनकभू
षणसंग्रहणोचितोयदिमणिस्त्रपुणिप्रणिधीयते॥नसविरौति
नचाऽपिहिशोभतेभवतियोजयितुर्वचनीयता॥१२८॥ दौर्मंत्र्या
न्नृपतिर्विनश्यतियतिःसंगात्सुतोलालनाद्विप्रोऽनध्ययनात्कुलं
कुतनयाच्छीलंखलोपासनात्॥ह्रीर्मद्यादनवेक्षणादपिकृषिः
स्नेहःप्रवासाश्रयान्मैत्रीचाऽप्रणयात्समृद्धिरनयात्त्यागात्प्रमा
दाद्धनं॥१२९॥ लोभश्चेदगुणेनकिंपिशुनतायद्यस्तिकिंपातकैः
सत्यंचेत्तपसाचकिंशुचिमनोयद्यस्तितीर्थेनकिं॥सौजन्यंयदिकिं
जनैःस्वमहिमायद्यस्तिकिंमंडनैःसद्विद्यायदिकिं धनैरपयशो
यद्यस्तिकिंमृत्युना॥१३०॥ शशीदिवसधूसरोगलितयौवनाका
मिनीसरोविगतवारिजंमुखमनक्षरंस्वाकृतेः॥प्रभुर्धनपरायणः
सततदुर्गतःसज्जनोनृपांगणगतःखलोमनसिसप्तशल्यानि
मे॥१३१॥ लज्जागुणौघजननींजननीमिवस्वामत्यंतशुद्धहृदया
मनुवर्तमानां॥तेजस्विनःसुखमसूनपिसंत्यजंतिसत्यव्रतव्य
सनिनोनपुनःप्रतिज्ञां॥१३२॥ गृह्णात्येषरिपोःशिरःप्रजविनंक
र्षत्यसौवाजिनंधृत्वाचर्मधनुःप्रयातिपुरतोनाऽसौकरोदक्षिणः
॥धृतंचौर्यंकथंतथाचशपथंकुर्यान्नवामःकरोदानाऽनुद्यमतां
निरीक्ष्यविधिनाशौचाऽधिकारीकृतः॥१३३॥ बहुतरहितेरसात
लउत्तिष्ठंतेहिसुमनसस्तपसि॥कांतारैजनवेगंविषह्यसद्रसफ
लास्तुविरलास्युः॥१३४॥ यस्ययोदुर्लभोभोगस्तस्यतद्यत्नतःक्षतिः

॥वाप्यांयथोष्ट्रयोगेनयतिःसशिबिकोऽपतत्॥१३५॥पतंगपाक
समयेपतंगपतिविक्रमाः॥पतंगस्योदयेचेलुःपतंगाइववानराः
॥१३६॥किंवाच्यंसूर्यशशिनोर्दारिद्र्यंमहतांपुरः॥दिनरात्रिवि
भागेनपरिधत्तोयदंबरं॥१३७॥मुरारिपदभक्तिश्चेत्तदामाघेरतिं
कुरु॥मु०॥१३८॥शीलभारवतीकांतापुष्पभारवतीलता॥अर्थ
भारवतीवाणीभजतेकामपिश्रियं॥१३९॥यथानयतिकैलासंन
गंगानसरस्वती॥तथानयतिकैलासंनगंगानसरस्वती॥१४०॥
त्वंनोगोत्रगुरुस्त्ववेंदुरधिपस्तस्याऽमृतंत्वत्करेएनोव्याधशराऽऽहतां
प्रणयिनींतन्वींपुनर्जीवय॥इत्यश्चैर्गगनेनिशाकरमृगेकारुण्य
मातन्वतःशृंगाऽग्रादपतन्मृगस्यरुदतोबाष्पांऽबुभूमंडले॥१४१
कन्याप्रसूतस्यधनुःप्रसंगादंगाधिकासादितविक्रमस्य॥धनंज
याऽधीनपराक्रमस्यहिमस्यकर्णस्यचकोविशेषः॥१४२॥सए
वरसिकोलोकेश्रुत्वाकाव्यंपरैःकृतं॥उत्पद्यतेचयुगपन्नयने
क्ष्णोश्चयस्यवाः॥१४३॥तांबूलस्यगुणाःसंतिसखेशतसहस्र
शः॥एकोऽपिचमहान्दोषोयस्यलालाविसर्जनं॥१४४॥प्रतिगृह
कोणंगुणिनोलूताकीटाइवस्फुरंतिशतं॥तज्ज्ञासकःस्वगोभिःको
वारविरिवगुणज्ञोऽस्ति॥१४५॥सरलप्रियंगुणाऽढ्यंलंबितमा
लंविचित्रतिलकंच॥वनमिववपुस्त्वेतत्कथमवनंनृपजनस्या
ऽस्य॥१४६॥असौभाग्यंधत्तेपरमसुखभोगाऽऽस्पदमयंविचित्रं
तद्गेहंभवतिपृथुकार्तस्वरमयं॥निविष्टःपल्यंकेकलयतिसकां
तारतरणंप्रसादंकोपंवाजननिभवतीयत्रतनुते॥१४७॥भूपःकू
पइवाऽऽभातिनमज्जनसुखाऽऽवहः॥ददातिगुणसंबंधाद्यथा
पात्राऽनुरूपतः॥१४८॥रात्रिःशिवाकाचनसन्निधत्तेविलोचने
जाग्रतमप्रमत्ते॥समानधर्मायुवयोःसकाशेसखाभविष्यत्य
चिरेणकश्चित्॥१४९॥साहित्यपाथोनिधिमंथनोत्थंकर्णाऽमृ
तंरक्षतहेकवींद्राः॥यत्तस्यदैत्याइवलुंठनायकाव्याऽर्थचोराःप्र
गुणीभवंति॥१५०॥शस्त्रंनखलुकर्त्तव्यमितिपित्रानियोजितः॥

॥तदेवशस्त्रंकृतवान्पितुराज्ञानलंघिता॥१५१॥ कांतेधावयमेपादावितिभर्त्रानिवेदिता॥ नतथाधाविनौपादौभर्तुराज्ञानलंघिता॥१५२॥ पुष्पेषुमातापुरुषायमाणालज्जावतीविश्वसृजंविलोक्य॥ नाभीसरोजेनयनंमुरारेर्वामेनरंवारयतिस्मचित्रं॥१५३॥ पुराकवीनांगणनाप्रसंगेकनिष्ठिकाधिष्ठितकालिदासा॥अद्याऽपितत्तुल्यकवेरभावादनामिकासाऽर्थवतीबभूव॥१५४ पुरोत्पीडेतडागस्यपरीवाहःप्रतिक्रिया॥ शोकक्षोभेचहृदयंप्रलापैरेवधार्यते॥१५५॥ रमणीयःसहिपुरुषोरमणीयत्रैवरज्यतिविदग्धा॥ श्लोकःसएवसुभगश्चित्तंसक्तंहियत्ररसिकस्य॥ ॥१५६॥ आपरितोषाद्विदुषांनसाधुमन्येप्रयोगविज्ञानं॥ वलवदपिशिक्षितानामात्मन्यप्रत्ययंचेतः॥१५७॥ श्लेष्माऽगारेवसतिर्जाताऽस्माकंतदत्रमायात॥आंदोलनच्छलादिहनिवारयंतीवमौक्तिकानिविटान्॥१५८॥ अद्यापिदुर्निवारंस्तुतिकन्यावहतिकौमारं॥सद्भ्योनरोचतेसाऽसंतोऽप्यस्यैनरोचंते॥१५९॥ तेकौपीनधनास्तएवसकलंधात्रीफलंभुंजतेनेषांद्वारिनदंतिवाजिनिवहास्तैरेवलब्धाक्षितिः॥ तैरेवंसमलंकृतंनिजकुलंकिंवाबहुब्रूमहेयेदृष्टाःपरमेश्वरेणभवतातुष्टेनरुष्टेनवा॥१६०॥ स्वमस्तकसमारूढंमृत्युंपश्येज्जनोयदि॥ आहारोऽपिनरोचेतकिमुताऽन्याविभूतयः॥१६१॥ अंधंदरिद्रिणमपिप्रिययाविहीनंवीक्ष्येश्वरेवदत्तियाचवरंत्वमेकं॥ नेत्रेननाऽपिवसुनोवनितासवत्रेछयाऽभिरामसुतदर्शनमित्युवाच॥१६२॥ मिथिलाहृसत्ययोध्यांत्वंसखिपरपूरुषाऽनुरक्ताऽसि॥ मिथिलांपरिहसतिचसात्वंसखिजनकाऽनुरक्ताऽसि॥१६३॥ सन्मानाविकधोरणीनिपतितामध्येजलंस्रेपपीपंथाःपर्वतदुर्गमोघनघनच्छन्नश्चताराषथः॥ हंहोमारुतदुस्तरोजलनिधिःशीर्णाचनौःसांप्रतंमध्येमज्जयवातटंगमयवाहस्तेनवाऽस्तेहृयं॥१६४॥ अस्मानवेहिकलमानलमाहृतानांयेषांमचंडमुसलैरवदाततैव॥स्नेहंविमुच्यसहसाखलतांप्रयां

तिपेस्वल्पपीडनवशान्नवयंतिलास्ते ॥१६५॥उपभोक्तुंनजानाति
श्रियंप्राप्याऽपिमानवः॥ आकंठजलमग्नोऽपिश्वालिहत्येवजिह्व
या॥१६६॥ अबलायत्रप्रबलाशिशुरवनीशोनिरक्षरोमंत्री॥नहि
नहितत्रधनाऽऽशाजीवितआशाऽपिदुर्लभाभवति॥१६७॥ अपक्व
पाकच्चर्वणंफणिफणामणेःकर्षणंकरेणगिरितोलनंजलनिधेःप
द्लंघनं॥प्रसुप्तहरिबोधनंनिशितखड्गसंस्पर्शनंकदाचिदखिलं
भवेन्नवशगात्मनस्याऽर्जनं॥१६८॥सर्पस्यरत्नेकृपणस्यवित्तेस
त्याःकुचेकेसरिणश्चकेशे॥मानोन्नतानांशरणागतेचमृतौभवेद
न्यकरप्रचारः॥१६९॥शिशुरपिनिपुणोगुरोगरीयान् नतुवपुषैव
महान्महत्प्रतिष्ठः॥मणिरणुरपिभूषणायपुंसांनतुपृथुलशि
लाविलासहेतुः॥१७०॥तर्कभाषामुखेयस्यहस्तेयस्यचमंजरी
॥मुक्तावलीयस्यकंठेतस्यवश्यामनोरमा॥१७१॥विनाऽपिताते
नविनाजनन्यागजाननःशंभुसुताऽभिधानः॥विनैवशास्त्रेणवि
नैववेदैर्माध्यंदिनानामिवपाठकोऽभूत्॥१७२॥श्लोकस्तस्तो
कतांयातियत्रतिष्ठंतिसाधवः॥ लकारोलुप्यतेतत्रयत्रतिष्ठंत्यसा
धवः॥१७३॥ आर्त्तादेवान्नमस्यंतितपःकुर्वंतिरोगिणः॥निर्धना
दानमिच्छंतिवृद्धानारीपतिव्रता॥१७४ श्रुतिर्विभिन्नास्मृतय
श्चभिन्नानैकोमुनिर्यस्यवचःप्रमाणं॥धर्मस्यतत्त्वंनिहितंगुहा
यांमहाजनोयेनगतःसपंथाः॥१७५॥ ननटोनविटोनगायको
नचवेश्याघटकोनचाऽपिवेश्या॥ कथमत्रलभेमहिप्रतिष्ठा म
सतीवायुवतीनमेऽस्तिरामा१७६॥अमितगुणोऽपिपदार्थोदोषे
णैकेननिंदितोभवति॥सकलरसायनमहितोगंधेनोग्रेणलशु
नइव॥१७७॥कस्याऽपिकोप्यतिशयोऽस्तिसतेनलोकेख्यातिंप्र
यातिनहिसर्वविदस्तुसर्वे॥किंकेतकीफलतिकिंपनसःसुपुष्पः
किंनागवल्ल्यपिचपुष्पफलैरुपेता॥१७८॥ननांदासाऽऽनंदाहसि
तवदनाऽभूद्गृहिनिकाकृतार्थाचश्वश्रूःकुपितहृशिपत्यौमम्प्रिस
रिव॥सचेदुच्चैर्ब्रूतेकठिनवचनैस्तर्हिसकलाःकरिष्यंतिप्रायोव

सनरहितास्तांडवविधिं॥१७९॥नकेशेषुस्नेहोनचकुचतटीचंदनरसोनवावीटीवक्त्रेनचनयनयोरंजनकथा॥नचाऽल्पोऽप्याऽकल्पोनचसुवसनंनैवकुसुमंस्तुषात्वंपापानांफलमधनगेहेषुसुदृशां॥१८०॥अनुयाताऽनेकजनःपरपुरुषैरुह्यतेऽस्यनिजदेहः॥अधिकारस्थःपुरुषःशव इवनशृणोतिवीक्षतेकुमतिः॥१८१॥संग्रहंनाकुलीनस्यसर्पस्येवकरोतियः॥सएवश्लाघ्यतेमंत्रीसम्यग्गारुडिकोयथा॥१८२॥जामाताजठरेजायाजातवेदाजलाशयः॥पूरितानैवपूर्यंतेजकाराःपंचदुर्भराः॥१८३॥ऽजननीजन्मभूमिश्चजान्हवीचजनार्दनः॥जनकःपंचमश्चैवजकाराःपंचदुर्लभाः॥१८४॥बिलाद्बहिर्बिलस्यांतःस्थितमाऽर्जारसर्पयोः॥मध्येचाऽखुरिवाऽभातिपत्नीद्वययुतोनरः॥१८५॥जरारूपंहरतिहिधैर्यमाशामृत्युःप्राणान्धर्मचर्यामसूया॥कामोह्रियंवृत्तमनार्यसेवाक्रोधःश्रियंसर्वमेवाऽभिमानः॥ऽ॥१८६॥ज्यायांसमपिशीलेनविहीनंनैवपूजयेत्॥अपिशूद्रंचधर्मज्ञंसद्वृत्तमभिपूजयेत्॥१८७॥ज्वलतिचलितेंधनोऽग्निर्विप्रकृतःपन्नगःफणंकुरुते॥प्रायःस्वंमहिमानंक्षोभात्प्रतिपद्यतेजंतुः॥१८८॥तक्षकस्यविषंदंतेमक्षिकायाविषंशिरः॥वृश्चिकस्यविषंपुच्छंसर्वांगेदुर्जनोविषं॥१८९॥तृणंब्रह्मविदःस्वर्गस्तृणंशूरस्यजीवितं॥जिताऽक्षस्यतृणंनारीनिस्पृहस्यतृणंजगत्॥१९०॥दूतोनसंचरतिखेनचलेच्चवार्तापूर्वंनजल्पितमिदंनचसंगमोऽस्ति॥व्योम्निस्थितंरविशशिग्रहणंप्रशस्तंजानातियोद्विजवरःसकथंनविद्वान्॥१९१॥देयंभोज्यधनेधनंसुकृतिभिर्नोसंचितंसर्वदा श्रीकर्णस्यबलेश्चविक्रमपतेरद्याऽपिकीर्तिःस्थिता॥आस्वर्यंमधुदानभोगरहितंनष्टंचिरात्संचितंनिर्वाणादपिपाणिपादयुगलंघर्षंत्यहोमक्षिकाः॥॥१९२॥धनंयदिगतंगतंचरणयुग्मरेणूपमंधरायदिगतागताऽथयमेकिमेतावता॥इदंपुनररुंतुदंधनिगणैरिदानींननैर्दरि

द्रुगणनाविधेयदहमंकृपातेधृतः॥१९३॥नभोभूषापूषाकम
लवनभूषामधुकरोवचोभूषासत्यंवरविभवभूषावितरणं॥म
नोभूषामैत्रीमधुसमयभूषामनसिजःसदाभूषासूक्तिःसक
लगुणभूषाचविनयः॥१९४॥प्रागल्भ्यहीनस्यनरस्यविद्याश
स्त्रंयथाकापुरुषस्यहस्ते॥नतृप्तिमुत्पादयतेशरीरेवृद्धस्यदा
राइवदर्शनीयाः॥१९५॥मानुष्येसतिदुर्लभापुरुषतापुंस्त्वेपु
नर्विप्रताविप्रत्वेबहुविद्यताऽतिगुणताविद्यावतोऽर्थज्ञता॥अ
र्थज्ञस्यविचित्रवाक्यपटुतातत्राऽपिलोकज्ञतालोकज्ञस्यस
मस्तशास्त्रविदुषोधर्मेमतिर्दुर्लभा॥१९६॥शत्रोरपिगुणावा
च्यादोषावाच्यागुरोरपि॥सर्वदासर्वयत्नेनपुत्रेशिष्येहितंव
देत्॥१९७॥साश्रीर्यानमदंकुर्यात्ससुखीतृष्णयोज्झितः॥त
न्मित्रंयस्यविश्वासःपुरुषःसजितेंद्रियः॥१९८॥सुकुलेयोज
येत्कन्यांपुत्रंविद्यासुयोजयेत्॥व्यसनेयोजयेच्छत्रुमिष्टंधर्मे
णयोजयेत्॥१९९॥सुलभंवस्तुसर्वस्यनयात्यादरणीयतां॥
स्वदारपरिहारेणपरदाराऽर्थिनोजनाः॥२००॥द्यूतेहारितस
र्वआद्यइतरोमल्लश्चमद्याऽशनःषंढोऽन्यःपरमंदुराशयसखो
ऽन्योगोपराट्पंचवै॥एकस्त्रीनिरताश्चपांडवगुणान्बिभ्रत्य
मीसूनवस्तस्मात्सांडुगुणंवहामिनितरांतच्चिंतयाऽनारतम्॥
॥२०१॥ऊर्जितंसज्जनंदृष्ट्वाद्वेष्टिनीचःपुनःपुनः॥कवलीकुरु
तेस्वस्थंविधुंदिविविधुंतुदः॥२०२॥एकस्यकर्मसंवीक्ष्यकरोत्य
न्योऽपिगर्हितं॥गतानुगतिकोलोकोनलोकःपारमार्थिकः॥२०३
॥क्वचिद्रुष्टःक्वचित्तुष्टोरुष्टस्तुष्टःक्षणेक्षणे॥अव्यवस्थितचि
त्तस्यप्रसादोऽपिभयंकरः॥२०४॥क्षतेप्रहारानिपतत्यभीक्ष्णं
धनक्षयेदीप्यतिजाठराग्निः॥आपत्सुवैराणिसमुल्लसंतिछि
द्रेष्वनर्थाबहुलीभवंति॥२०५॥गुरुपत्न्यांनिशाधीशोब्राह्म
ण्यांपाकशासनः॥गतःपंचेषुलक्ष्यत्वंकाकथाऽन्यस्यदेहि
नः॥२०६॥गुरोरप्यवलिप्तस्यकार्याऽकार्यमजानतः॥

उत्सवप्रतिपन्नस्यन्याय्यंभवतिशासनं॥२०७॥गोष्ठिककर्मनियुक्तःश्रेष्ठीचिंतयतिचेतसाहृष्टः॥वसुधावस्तुसंपूर्णामयाऽद्यलब्धाकिमन्येन॥२०८॥ग्रासादपितदर्धंचकस्मान्नोदीयतेर्थिषु॥इच्छाऽनुरूपोविभवःकदाकस्यभविष्यति॥२०९॥चर्मखंडंद्विधाभिन्नमपानोद्गारधूपितं॥येरमंतिनरास्तत्रकृमितुल्याःकथंनते॥२१०॥चलंचित्तंचलंवित्तंचलेजीवितयौवने॥चलाचलमिदंसर्वंकीर्तिर्यस्यसजीवति॥२११॥ राजनिविदुषांमध्येवरसुरतानांसमागमेस्त्रीणां॥साध्वसदूषितहृदयोवाक्पटुरपिकातरोभवति॥२१२॥यत्राऽऽकृतिस्तत्रगुणावसंतिनैतद्धिसम्यक्कविभिःप्रणीतं॥येनाऽतिचार्वंग्यपिमेहृदिस्थादुनोतिगात्रंविरहेप्रियाऽसौ॥२१३॥यस्मिन्रुष्टेभयंनाऽस्तितुष्टेनैवधनाऽऽगमः॥निग्रहाऽनुग्रहौनस्तःसरुष्टःकिंकरिष्यति॥२१४॥आलस्योपहताविद्यापरहस्तगताःस्त्रियः॥अल्पबीजंहतंक्षेत्रंहतंसैन्यमनायकं॥२१५॥निर्विषेणाऽपिसर्पेणकर्तव्यामहतीफणा॥विषमस्तुनचाप्यस्तुखटाटोपोभयंकरः॥२१६॥एकएवपदार्थस्तुत्रिधाभवतिवीक्षितः॥कुणपंकामिनीमांसंयोगिभिःकामिभिःश्वभिः॥२१७॥ वैद्यस्तर्कविहीनोनिर्लज्जाकुलवधूर्यतिर्मूर्खः॥कटकेचप्राहुणिकोमस्तकशूलानिचत्वारि॥२१८॥अलिरनुसरतिपरिमलंलक्ष्मीरनुसरतिनयगुणसमृद्धिं॥निम्नमनुसरतिसलिलंविधिलिखितंबुद्धिरनुसरति॥२१९॥राजाऽऽश्रयस्तस्करताऽश्वपण्यमाथर्वणंचाऽपिसमुद्रयानं॥एतानिसिध्यंतिमहाफलानिविपर्ययेप्राणहराणिपंच॥२२०॥अन्यानिशास्त्राणिविनोदमात्रंप्राप्तेषुकालेषुनतेषुकिंचित्॥चिकित्सितज्योतिषमंत्रवादाःपदेपदेप्रत्ययमावहंति॥२२१॥नारीपरमुरसद्रष्टीकविरव्यवहारवित्॥अपथ्यसेवीरोगीचकिंपद्भिर्नोपहस्यते॥२२२॥इतिसिं०

अथरंभाशुकसंवादः

रंभोवाच॥मार्गेमार्गेनूतनंचूतखंडंखंडेखंडेकोकिलानांविरा

वः॥रावेरावेमानिनीमानभंगोभंगेभंगेमन्मथः पंचबाणः॥१॥
॥शुकउवाच॥मार्गेमार्गेजायतेसाधुसंगः संगेसंगेश्रूयतेकृष्ण
कीर्त्तिः॥कीर्त्तौकीर्त्तौनस्तदाकारवृत्तिर्वृत्तौवृत्तौसच्चिदानंदभासः॥
॥२॥तीर्थेतीर्थेनिर्मलंब्रह्मवृंदंवृंदेवृंदेतत्वचिंतानुवादः॥वादेवा
देजायतेतत्वबोधोबोधेबोधेभासतेचंद्रचूडः॥३॥ रंभोवाच॥गे
हेगेहेजंगमाहेमवल्लीवल्ल्यांवल्ल्यांपार्वणचंद्रबिंबं॥बिंबेबिंबे
दृश्यतेमीनयुग्मंयुग्मेयुग्मेपंचबाणप्रचारः॥४॥शुकउवाच॥
स्थानेस्थानेदृश्यतेरत्नवेदीवेद्यांवेद्यांसिद्धगंधर्वगोष्ठी॥गो॰
ष्ठ्यांगोष्ठ्यांकिन्नरहूहूगीतंगीतेगीतेगीयतेरामचंद्रः॥५॥रंभो॰
पीनस्तनीचंदनचर्चितांगीविलोलनेत्रातरुणीसुशीला॥नाऽलिं
गिताप्रेमभरेणयेनवृथागतंतस्यनरस्यजीवितं॥६॥शुकउ॰
॥अचिंत्यरूपोभगवान्निरंजनोविश्वंभरोज्ञानमयश्चिदात्मा
॥विशोधितोयेनहृदिक्षणंनोवृथागतंतस्यनरस्यजीवितं॥७॥
रं॰॥कामातुरापूर्णशशांकवक्त्राबिंबाधराकोमलनालगौरा॥
नांऽदोलितास्वेहृदयेभुजाभ्यांवृथागतं॰॥८॥शुक॰॥चतुर्भुज
श्चक्रधरोगदायुधःपीतांबरःकौस्तुभमालयालसन्॥ध्यानेधृतो
येननबोधकालेवृथागतं॰॥९॥रं॰॥विचित्रवेषानवयौवनाढ्या
लवंगकर्पूरसुवासिदेहा॥नालिंगितायेनदृढंभुजाभ्यांवृथा॰॥
॥१०॥शुक॰॥नारायणःपंकजलोचनःप्रभुःकेयूरवान्कुंडल
मंडिताऽननः॥भक्त्यास्कृतोयेनसमाधितोनोवृथाग॰॥११॥
॥रं॰॥प्रियंवदाचंपकहेमवर्णाहारावलीमंडितनाभिदेशा॥सं
भोगशीलारमितानयेनवृथागतं॰॥१२॥शुक॰॥श्रीवत्सलक्ष्मां
कितहृत्प्रदेशस्तार्क्ष्यध्वजःशार्ङ्गधरःपरात्मा॥नसेवितोयेननृज
न्मनाऽपिवृथागतं॰॥१३॥रं॰॥चलत्कटीनूपुरमंजुघोषानासा
ऽग्रमुक्तानयनाऽभिरामा॥नसेवितायेनभुजंगवेणीवृथा॰॥१४
॥शुक॰॥विश्वंभरोज्ञानमयःपरेशोजगन्मयोऽनंतगुणप्रकाशी॥
नाऽऽराधितोनाऽपिधृतोनयोगेवृथागतंतस्यनरस्यजीवितं॥१५॥

रं०॥ तांबूलरागैःकुसुमप्रकर्षैःसुगंधतैलेनचवासितायाः॥ नोम
र्द्दितोयेनकुचौनिशायांवृथागतं०॥१६॥ शु०॥ ब्रह्मादिदेवोऽखि
लविश्वदेवोमोक्षप्रदोऽतीतगुणःप्रशांतः॥ धृतोनयोगेनहृदि
स्वकीयेवृथागतं०॥१७॥ रं०॥ कस्तूरिकाकुंकुमचंदनैश्चसुच
र्चितायाःगुरुधूपितांबरा॥ उरःस्थलेनोलुठितानिशायांवृ०॥
॥१८॥ शु०॥ आनंदरूपोनिजबोधरूपोदिव्यस्वरूपोबहुनाम
रूपः॥ तपःसमाधौकलितोनयेनवृथा०॥१९॥ रं०॥ कठोरपी
नस्तनभारनम्रासुमध्यमाचंचलखंजनाक्षी॥ हेमंतकालेर
मितानयेनवृथा०॥२०॥ शु०॥ तपोमयोज्ञानमयोविजन्मा
विद्यामयोयोगमयःपरात्मा॥ चित्तेधृतोनोतपसिस्थितेनवृ०॥२१
॥रं०॥ सुलक्षणामानवतीगुणाढ्याप्रसन्नवक्त्रामृदुभाषिणी
या॥ नोचुंबितायेनसुनाभिदेशेवृथा०॥२२॥ शु०॥ पत्न्यार्जितं
सर्वसुखंविनश्वरंदुःखप्रदंकामिनिभोगसेवितं॥ एवंविदित्वा
नधृतोहियोगोवृथा०॥२३॥ रं०॥ विशालवेणीनयनाऽभिरामा
कंदर्पसंपूर्णनिधानरूपा॥ भुक्तानयेनैववसंतकालेवृ०॥२४॥
॥शु०॥ मायाकरंडीनरकस्यहंडीतपोविखंडीसुकृतस्यभंडी॥
नृणांविखंडीविरसेविताचवृथा०॥२५॥ रं०॥ समस्तशृंगार
विनोदशीलालीलावतीकोकिलकंठनाला॥ विलासितानोनव
यौवनेनवृथा०॥२६॥ शु०॥ समाधिहंत्रीजनमोहयित्रीधर्मेकु
मंत्रीकपटस्यतंत्री॥ सत्कर्महंत्रीकलिताचयेनवृथा०॥२७॥ रं०
बिल्वस्तनीकोमलितासुशीलासुगंधकुंतालसिताचगौरा॥ ना
॥श्लेषितायेनचकंठदेशेवृथा०॥२८॥ शु०॥ चिंताव्यथादुःखम
यीसदोषासंसारपाशाजनमोहकर्त्री॥ संतापकोशाभजिताचयेन
वृथा०॥२९॥ रं०॥ आनंदकंदर्पनिधानरूपाझणत्कणत्कंकणनू
पुराढ्या॥ नास्वादितायेनसुधाऽधरस्या वृथागतं०॥ ३०॥ शु०
कापट्यवेषाजनवंचिकासाविण्मूत्रदुर्गंधदरीदुराशा॥ संसेवि
तायेनसदामलाढ्यावृथागतंतस्यनरस्यजीवितं॥३१॥ रं०॥

चंद्राऽऽननासुंदरगौरवर्णाव्यक्तस्तनीभोगविलासदक्षा॥नोऽन्दोलितावेशायनेषुयेनवृथा०॥३२॥शृं०॥उन्मत्तवेषामदिरासुमत्तापापप्रदालोकविडंबनीया॥योगच्छलायेनविभाजिताचवृ०॥३३॥रं०॥आनंदरूपातरुणीनतांगीसद्धर्मसंसाधनसृष्टिरूपा॥कामार्थदापस्यगृहेननारीवृथा०॥३४॥शृं०॥अशौचदेहापतितस्वभावावपुःप्रगल्भाबलल्लोभशीला॥मृषावदंतीकलिताचयेनवृथागतं०॥३५॥रं०॥क्षामोदरीहंसगतिःप्रमत्तासौंदर्यसौभाग्यवतीप्रलोला॥निष्पीडितायेनरतौयथेच्छंवृथा०॥३६॥शृं०॥संसारसद्भावनभक्तिहीनाचित्तस्यचोरात्हदिनिर्दयाच॥विहाययोगंकलितानरेणवृथागतंत०॥३७॥॥रं०॥सुगंधैःसुपुष्पैःसुशय्यासुकांतावसंतोऋतुःपूर्णिमापूर्णचंद्रः॥यदानाऽस्तिपुंस्त्वंनरस्यप्रभूतंततःकिंततःकिंततःकिंततःकिं॥३८॥शृं०॥सुरूपंशरीरंनवीनंकलत्रंधनंमेरुतुल्यंवचश्चारुचित्रं॥हरेरंघ्रियुग्मेमनश्चेदलग्नंततःकिंततःकिंततःकिंततःकिं॥३९॥ ॥इतिश्रीरंभाशुकसंवादेशृंगारज्ञाननिर्णयः॥

अथराधाकृष्णसंवादः

कासुंदरीवल्लववल्लभासुत्वच्चित्तभित्तौवदशालभंजी॥त्वंमालतीमंडितकेशपाशेमच्चित्तभित्तौकिलशालभंजी॥१॥पुरातनस्याऽपिचनिर्जरत्वेकोनामहेतुर्वदसत्यमेव॥लावण्यधन्येवृषभानुकन्येनवाऽधरोत्थाऽमृतपानमेव॥२॥पयोधरेविद्युदभून्मुरारेपयोधरोविद्युतिनैवदृष्टः॥राधेस्थितायांत्वयिविद्युतीहपयोधरद्वंद्वमितिद्व्यलोकि॥३॥दातुंशरीरंपरपूरुषायनैवोत्सहेऽहंनरकाद्बिभेमि॥दत्तेशरीरेनरकस्यहंत्रेकानामभीतिर्नरकाद्भवस्याः॥॥४॥त्वंब्रह्मवीजारमहर्निशंयासीमंतिनीगायतिकिंफलंसा॥प्राप्नोतिराधेव्यभिचारदोषान्मुच्येत्तथाऽसौभवनागपाशात्॥५॥निशाऽवसानेतवविप्रयोगात्प्राणाममदीयाविकलीभवंति॥राधेवदप्राणपतेर्वियोगेप्राणाःकथंनोविकलीभवेयुः॥६॥निर्मासिचित्तेव

जसुंदरीणां कामेविभोलोचनगोचरस्त्वं॥किमत्रचित्रंतवभाति
चित्ते कामस्यराधेजनकोऽहमस्मि॥७॥जनाजगत्यांजगदीश
मश्चत्वांराधिकाजारमुदाहरंति॥निंदंतुलोकायदिवास्तुवंतु॰
प्राणेश्वरींत्वांनपरित्यजामि॥८॥कलानिधिंगोकुलराजमानंश्या
मप्रियंत्वांविधुमेवमन्ये॥त्वदुक्तरीत्याविधुशब्दवाच्यंराधाधवं
मांनकथंब्रवीषि॥९॥भक्तिर्मयासाकतमाविधेयाययाप्रसादोभ
वतोमुरारे॥ममप्रसादायविधेहिराधेभक्तिंपरामात्मनिवेदना॰
त्मां॥१०॥विधिंसमुल्लंघ्यपरांगनासुप्रसंगमंगीकुरुषेकथंनु॥
विधेर्विधातुर्विधिलंघनेमेकानामभीतिर्भणभामिनीह॥११॥उदी
र्यमाणेऽपिचसांत्ववादेमानाऽपनोदोनहिराधिकायाः॥मानोऽस्तु
तेपद्यपराधिकःस्यांस्वप्नेऽपिनैवास्म्यपराधिकोऽहं॥१२॥मुक्ति
समीपुर्भवभीतिभाजोभवत्पदांभोजरजोजुषंतः॥बद्धस्त्वया॰
हंभुजवल्लरीभ्यांराधेनिकुंजेमधुमाधवीनां॥१३॥आभीरनार्याः
करमाद्धानोनशंकसेमाधवकिंब्रवीषि॥पल्लीपतिर्वल्लववल्लभा
याःकरग्रहेकिंविदधीतशंकां॥१४॥इतिश्रीराधाकृष्णसंवादः॥

अथाश्वधाटीकाव्यं

अंकाहतक्षितिजमंकाऽनभिज्ञशशिशंकाकराऽऽस्यसुषमंटंकारिचा
पमनुलंकाऽऽशरक्षतजपंकाऽवरूषितशरं॥त्वंकामदंविहितरंका॰
वनंदनुजकंकालनोदिनमनातंकायवत्सभजतंकालमेघरुगहंकारहारि
वपुषं॥१॥

अंकेति हेवत्सत्वंअनातंकायआतंकोभवरोगस्तन्निवृत्त्यर्थंअंकेआहताक्षितिजासी
तायेनैवंविधंतंरामंभजेत्यन्वयः॥कीदृशंतंअंकोलांछनंतदनभिज्ञोयःशशीतच्छंका
कराआस्यसुषमामुखकांतिर्यस्यैवंभूतं. पुनःकी॰ टंकारःप्रत्यंचाशब्दस्तद्विशिष्टश्चा
पोधनुर्यस्यतं. अनुपश्चात् पु॰की॰ लंकासंबंधिनोयेआशराराक्षसास्तेषांरक्तकर्दमेन
लिप्तःशरोयस्य. पु॰की॰ कामान्भक्तमनोरथान्ददातिसःएवंभूतं. पु॰की॰ विहितंरंकाणां
दीनानामवनंरक्षणंयेनतं. पु॰की॰ दनुजोदुंदुभिनामादानवस्तस्ययःकंकालःअस्थिपंज
रस्तंउदतिक्षिपतीत्येवंभूतं. सुग्रीवायस्वबलंप्रदर्शयितुंवालिहतस्यकस्यचिद्दानवस्यास्थि
पंजरंरामोवामपादांगुष्ठेनसलीलंचिक्षेपेतिरामायणेप्रसिद्धं. पु॰की॰ नीलमेघस्यकांतिवि
षयेयोहंकारःमत्सदृशाअन्यन्नीलंनास्तीत्येवंरूपस्तंहरतीत्येवंभूतंवपुःशरीरंयस्य अ
तिनीलवपुषमित्यर्थः॥१॥

मागामनस्त्वमनुरागाऽतिभूमिमुपभोगानवाप्तुमनसामाऽऽगारदारसुतयोगा न किंवत्तवियोगात्मकाः परिणतौ॥ यागादिजन्यपरभागा अविग्रहविभागार्हशैलतनयं वेगादुपास्स्व भवरोगाऽपहं विधृतनागाऽजिनं पुररिपुं॥२॥ वाचामरंदमधुमोचासुधामधुरिमाऽऽचामदक्षरसयाह्वाचापल्लान्नरपिशाचाननुपासितुमनाऽचार किंनु यतसे॥ काचायमाविनटसाचाऽऽपदत्र न सुमोचाग्रिमाक्रमपितं याचासुपास्यमभियाचाऽपवर्गसुखमाचार्यमाश्रितवटं॥३॥

संप्रतिस्वमनउपदिशति हेमनः त्वंउपभोगान्स्रक्चंदनादिविषयान् अवाप्तुमुं अनसारथेन अनुरागातिभूमिंपरांकाष्ठांमागाः मागच्छ ननु किमर्थंमावारयसीतिचेत्तत्राह मागारदारसुतयोगाः मालक्ष्मीः आगारं गृहं दाराः स्त्री सुताश्च एषांसंयोगाः परिणामेवियोगात्मकाः न किं अपितु तथैव. वतेति खेदे स्वर्गसुखमपितथैवेत्याह यागादिनाज्योतिष्टोमादिना उत्पन्ना ये परा उत्कृष्टा भागाः पीयूषाप्सरआदिरूपास्तेपि अवसाने वियोगात्मका एवेति पूर्वेणसंबंधः पदभागा इतिपाठे स्वर्गादयः तर्हिकिमस्माभिः कर्तव्यमित्यपेक्षायामाह पुररिपुं शिवं वेगाच्छीघ्रमुपास्स्व भज. कीदृशं पु० अविग्रहविभागार्हशैलतनयं विग्रहेण देहेन यो विभागो भेदस्तमर्हतीति विग्रहविभागार्हा तथा न भवतीत्येवं विधा शैलतनया यस्य तं अत्यंतानुरागवशादर्धांगीकृतदारमित्यर्थः पु० की० भव एव रोगस्तमपहंतीति तथाभूतं. पु० की० विधृतं नागस्य अजिनं चर्म येन तं गजकृत्तिवाससमित्यर्थः॥२॥

पूर्वश्लोकान्मनइत्यनुसंधेयं हे अनाचारमनः अथवा जीवसामान्येनायमुपदेशः हे अनाचारजीव, त्वं मरंदः पुष्परसः, मधु क्षौद्रं, मोचा कदलीफलं, सुधा अमृतं, एतत्संबंधी यो मधुरिमा माधुर्यं तस्याचामे भक्षणे दक्षो रसो यस्यास्तया विधया. तुच्छीकृतमकरंदादिरसमाधुर्ययेत्यर्थः एतादृशा वाचा वाण्या. हा इति खेदे. चापल्लान्मौर्ख्याद्धेतोर्नरपिशाचान्नररूपान् पिशाचान् पिशाचतुल्यानधमान्नरानित्यर्थः उपासितुं तन्मनोरंजयितुं किंनु यतसे किमर्थं यत्नं करोषि नन्वापत्परिहाराय तथा करोमीतिचेद्यथाकथंचिद्द्रव्यादिलाभेनैतादृशस्यापत्परिहारेपि मरणादिपरंपरारूपमहापदो विद्यमानत्वेन तस्याकिंचित्करत्वाद्विफलोयमुद्यमस्तव. उक्तमहापत्परिहारस्तेभ्यो नरपिशाचेभ्यो दुर्घट इत्याक्षिप्य सर्वथापत्परिहारोपायमुपदेष्टुमाह. काचाय काचवत्तुच्छं धनादि लब्धुं मा विनट नरपिशाचानामग्रे नृत्यं माकुर्वित्यर्थः। यतोऽग्रिमा अग्रतः स्थिता सा निरतिशयदुःखप्रदत्वेन प्रसिद्धा आपत् मरणादिरूपा आपत्तिः अत्र अ

खंजायिनोऽधिमतिगंजापरोपिबतसंजायतेत्रधनदःसंजाघटीतिगुणपुंजायितस्यनतुगुंजामितंचकनकं॥किंजाग्रतीजयसिकिंजानतीस्वपिषिसिंजाननूपुरपदेतंजा———पुरेशिनवकंजाक्षिसाधुतदिदंजातुवाकिमुशिवे॥४॥आटीकसेऽगकरिघोटीपदातिजुषिवाटीभुविक्षितिभुजांचेटीभवंस्तदपिशाटीनतेवपुषिवीटीनवाऽधिवदनं॥कोटीररत्नपरिपाटीभृशाऽरुणितजूटीविधुंतनुलसत्पाटीरलिप्तिमिभधाटीजुषंस्मरवधूटीनुतांभजशिवां॥५॥

स्मिन्नरपिशाचात्तुसरणेसतिनस्कमोचामोचयितुमशक्येत्यर्थः तर्हिकिंकर्तव्यमित्यपेक्षायामेकंकुर्वित्याह· कमपिअनिर्वचनीयंप्रत्यांब्रह्मादीनामुपास्यं आश्रितवदमाचार्यश्रीदक्षिणामूर्त्तिप्रतिअपवर्गसुखमभियाचप्रार्थय॥३॥

अधिमति मतौ खंजायितः खंजवदाचरितः कुंठितमतिर्मूढइत्यर्थः तथैवगंजापरोपिमदिरागृहासक्तोपिनरःधनदःसंजायते कुबेरतुल्यधनवान्भवतीत्यर्थःगुणपुंजायितस्यगुणनिधेर्नरस्यगुंजामितमपिकनकंनसंजाघटीतिनलभ्यतेइत्यर्थः हेशिवेत्वंजाग्रतीसतीकिंजयसि, जानतीत्वंस्वपिषिकिं, तदिदंपूर्वार्धोक्तंसाधुशोभनंकिमुवा सिंजानौशब्दायमानौनूपुरौययोरेवंभूतेपदेचरणेयस्याः तंजापुरंतंजौरइतिप्रसिद्धंकेचित्तुळजापुरमितिवदंति· तस्यस्वामिनी नवीनंयत्कंजंकमलंतद्वदक्षिणीयस्याः॥ ४ ॥

एवंस्वकीयमनसः समाधानंकृत्वान्यमुपदिशति आटीकसेइति हेअंगत्वंचेटीभवन्दासःसन्करिघोटीपदातिजुषिहस्त्यश्वपदातिसेवितायांक्षितिभुजांराज्ञांवाटीभुविउद्यानभूमौआटीकसेपरिभ्रमणंकरोषि तदपितथापितेतववपुषिशाटीशरीरपरिधानार्थवस्त्रंनास्तिपरंचअधिवदनंवदनेवीटीतांबूलंनास्ति एवंचव्यर्थश्रमकारीत्वमतीवमूर्खोऽसीतिभावः तर्हिमयाकिंकार्यमितितत्राह कोटीरोमुकुटस्तस्ययारत्नपरिपाटीमाणिक्यपंक्तिस्तयाभृशमत्यंतमरुणितोरक्तोजूटीविधुःकेशपाशसमीपवर्तीभालचंद्रोयस्यास्तामेवंभूतां तनौलसंतीशोभमानापाटीरलिप्तिश्चंदनलेपोयस्यास्तां तथाइभोगजस्तस्यधाटीगतिस्तांभजंतींसुराणांवधूट्यःस्त्रियस्ताभिर्नुतांस्तुतांशिवांपार्वतींभज॥ ५॥

पंडावदग्रिमपिचंडाऽवपूर्तिमनुरंडाविधेयकुटिलोहुंडाविवेकधनिचंडालगेहभुविदंडाऽऽहतिंकिमयसे॥ खंडाऽमृतद्युतिशिखंडामुपास्वस्फुरखंडाऽर्चितांऽघ्रिकमलांभंडासुरद्रुहमचंडात्मिकांचितिमखंडांजडात्मसुखदां॥ ६॥ गाढात्वयासपदिराढापुरीवसुनिबाढाऽवबद्धरतिनासोढातथातपनगाढाऽऽतपप्रसररूढाऽतिवृष्टिविततिः॥ मूढाऽपिकिंफलमगूढाजरैवशिरसोढाकुतोनविनुतोद्रोढाजनोर्जनितषोढामुखःसमितिवोढसहाटकगिरेः॥ ७ ॥ दंतावलाऽश्वभृतिचिंतापरोऽसिबतकिंतावतावदफलंहंताखिलंक्वचनगंतातदेतदथसंतापमंचसिपरं॥

पंडेति हे पंडावदग्रिम पंडितश्रेष्ठ. पिचंडस्योदरस्यावपूर्तिर्भरणं तामनुलक्षीकृत्य रंडानां पांसुलानां विधेया वचनग्राहिण आज्ञापालास्ते च ते कुटिलवक्त्रा उहंडा उद्धूता अविवेकिनो विवेकशून्या एतादृशा ये धनिनस्त एव चंडालास्तद्गेहभुवि दंडाऽऽहतिं दंडप्रहारं किमयसे प्राप्नोषि उद्धूताः पुरुषा गृहमागतं याचकं दंडेन ताडयंतीति सर्वेषां विदितमेव तस्मात् हे जड पठन् मूर्ख खंडामृतद्युतिः अर्धचंद्रः शिखंडः शिरोभूषणं यस्यास्तां सुराणां देवानां खंडः समूहस्तेनार्चितं पूजितं अंघ्रिकमलं पादपद्मं यस्यास्तां अखंडां चितिं अखंडचिद्रूपिणीं अचंडात्मिकां अचंडः अकोपनः आत्मा स्वभावो मनो वा यस्यास्तां भंडासुरद्रुहं भंडासुरघातिनीमंबां उपास्व. तस्या उपासनां कुर्वित्यर्थः॥ ६॥

गाढेति वत्स निधने बाढाववद्धरतिना बाढं दृढं अववद्धा रतिः प्रीतिर्येन तादृशेन त्वया राढापुरी नगरीविशेषः गाढा प्रविष्टा. तथा तपनः सूर्यस्तस्य गाढोऽत्युग्रो य आतपप्रसरस्तेन रूढा प्रकर्षेणोद्भूता सा चासावतिवृष्टिस्तस्या विततिर्विस्तारः सोढा त्वयेति शेषः षह मर्षणे. रे मूढ अगूढा व्यक्ता जरैव शिरसा ऊढा धृता. एवं कृत्वापि किं फलं त्वयाप्तं न किंचिदपीत्यर्थः अतः क्लेशमात्रफलदमुद्यमं त्यक्त्वा सप्रसिद्धः परमेश्वरस्त्वया कुतः कारणान्न विनुतो विशेषेण स्तुतः कोसाविति चेत्तत्राह जनितः षोढामुखः षण्मुखो येन. षडाननपितेति यावत्. जनोर्जन्मनः भवस्येति यावत्. उपलक्षणमिदं जन्मप्रभृतिमरणांतदुःखसंघस्य द्रोढा द्रोहकृत्तन्नाशक इत्यर्थः समिति त्रिपुरवधसंग्रामे हाटकगिरेः स्वर्णपर्वतस्य मेरोरित्यर्थः वोढा वहनकर्ता. त्रिपुरासुरवधकाले त्र्यंबकः पृथ्वीं रथं ब्रह्माणं सारथिं मेरुं धनुर्विष्णुं शरं चंद्रार्कौ रथचक्रे कृत्वा त्रिपुरं हतवानिति पुराणेषु प्रसिद्धं॥ ७ ॥

दंतावलेति रे मदांध त्वं गजाश्वभरणचिंतापरः असितावत्ता तवेति शेषः

त्वंतातभावयदुरंतारमानवरतंतामसःस्वपिहिमासंतारकंविनतसंतानकंसपदितंतावदाश्रयशिवं।।८।।वंदारुलोकततिमंदारपादपममंदायमानकरुणंवृंदावनोढपशुवृंदाऽवनंप्रणतवृंदारकंचरणयोः।। नंदाऽऽहृतंकुशलसंदायितत्किमपिकंदायितंश्रुतिगिरांकुंदाभकीर्त्तिमुचुकुंदार्चितंत्वहृदिमुकुंदाह्वयं स्मरमहः।।९।।क्रोधाऽकुलोविगतबोधाऽन्वयोऽसदनुरोधाऽनुगोनभव भोःसाधारणीनखलुबाधाभवस्यभुविगाधानमोहवसतिः।।वेधागुरुश्चपटुमेधाविभुर्नहिनिषेधायकर्मविततेराधायताततद्हृदिराधाधिपांऽघ्रियुगमाधारतांव्रजमुदा।। १० ।।

किंफलमस्तीतिवदकथय· ननुगजाश्वशिबिकाद्युपभोगेनमनसःपरमाल्हादएवफलमितिचेद्भ्रांतोसिइत्याह हंतेतिखेदे तदेतत् गजाश्वप्रभृतिसर्वं कुत्राऽपिगंतागमिष्यतित्वत्तोबलीयांसंप्रतीतिभावः अथअनंतरंपरंसंतापं अंचसिप्राप्नोषि· तस्मात् हेतातरमालक्ष्मीःदुरंतादुष्परिणामाइतित्वंभावय विचारय परंचानवरतंसततंतामसःसन् तमोगुणाभिनिविष्टःसन्मास्वपि हिमाशयीथाः अज्ञानांधोमाभूरित्यर्थः तर्हिविनतसंतानकंभक्तकामकल्पद्रुमंतंशिवंतावन्निश्चयेनसपदिसत्वरंआश्रयआश्रयंकुरुतेनतवाखंडितंकल्याणंस्यादितिभावः ।।८।।

अथवाविष्णुभक्तिंकुर्वित्याह वंदारुलोकेति वंदनशीललोकानांयाततिःपरंपरातस्यामंदारपादपःकल्पवृक्षस्तत् अमंदायमानकरुणं अनल्पदयावत् वृंदावनेव्रजेऊढारक्षिंगलायेपशवोगोमहिष्यादयस्तेषांवृंदंसमूहस्तस्यरक्षकं प्रणतानम्रावृंदारकादेवायस्यतत् नंदेनगोपेनाहृतंसत्कृतं कुशलंकल्याणंददातिइत्येवंशीलं श्रुतिगिरांवेदवाणीनांकंदायितंमूलभूतं कुंदपुष्पवद्धवलाकीर्त्तिर्यस्यतत् मुचुकुंदाभिधेनराज्ञाअर्चितंपूजितं मुकुंदसंज्ञकंमुक्तिदायकं महस्तेजःस्मरस्मृतिपथमानय ।। ९ ।।

उपदेशांतरमाह क्रोधेति भोःपौत्रमदीयंवचनंप्रतिकूलंमत्वात्वंक्रोधाकुलःक्रोधव्याप्तः विगतःबोधान्वयोज्ञानानुवृत्तिर्यस्यतथाभूतःसन् असतांदुष्टानामनुरोधआनुकूल्यंतदनुगच्छतीतितथाविधोमाभूः कुतः भवस्य संसृतेर्बाधापीडासाधारणीसामान्यानखलुभुविमोहवसतिःमोहस्थानंगाधाउत्तानास्वल्पेत्यर्थः नभवति किंच पटुःसमर्थामेधाबुद्धिर्यस्यतथाभूतोवेधाःब्रह्माचपरंगुरुराचार्यः कर्मवितते:प्राक्तनकर्मविस्ताररूपिणः

नानाविधेजनुषिकानामसौख्ययुजिरानाकपृष्ठमपिवाजाना
सियदिविषयसूनारुचिर्भवसिदूनाःशयोभृशतरं॥मानाःतिगोवि
हितदाःनाध्वरादिरिहकीनाशभीतिरहितोमीनायताक्षमधिगाना
दरंकलयसूनास्त्रजीवनहरं॥११॥सापायमेत्यवपुरापातरम्यम
नुतापाहतेसकृतुकंद्वीपानगाहिषिसमीपाःतिगानकृतभीपानखेद्गण
नः॥

सुखदुःखदसंसारस्यनिषेधायनाशायविभुःसमर्थोनभवतिहीतिनिश्च
येन अतःहे तात. राधाविटोराधिकाजारः श्रीकृष्णस्तस्यांःघ्रियुगंचरणद्वं
द्वंहृदिमनसिआधायध्यात्वामुदांमोक्षसुखानांआधारतांपात्रतांव्रज
गच्छेति॥१०॥

नानाविधेति हेतातेस्यनुषंजनीयं नानाविधेअनेकप्रकारेनृदेवति
र्यगादिरूपेजनुषिजन्मनिसौख्ययुजिःसौख्ययोगः आनाकपृष्ठंस्वर्गलोक
मभिव्याप्यापिकानामास्ति. स्वर्गादीनामपिक्षयिष्णुत्वेननकाप्यस्तीत्यर्थः
इहेर्ष्याद्वेषादिजन्यक्लेशवत्स्वर्गादिलोकेष्वपिपुण्यतारतम्येनभोगेषूत्क
र्षापकर्षयोःसत्वेनपुण्यपरिक्षयेपतनभयेनचेतोप्यधिकतरक्लेशसत्वादि
तिभावः एतदहमेवकथयामीतिमामन्यस्वकिंतुस्वयमेवाग्रेत्वंज्ञास्यसी
त्याह जानासीति यत् यदात्वंविषयसूनारुचिःविषयेषुनत्सूनेयेसूनायां
यागीयायांरागप्राप्तायांवारुचिरभिलाषोयस्यैवंविधोभवसितदाभृशतर
मत्यंतंदूनाशयःक्लेशादिबाहुल्येनोपतप्तांतःकरणःसन् जानासि मयाबोधि
तमिहामुत्रसुखाभावंज्ञास्यसीत्यर्थः उभयत्रवर्तमानसामीप्येवर्तमानव
द्वेतिलट् तस्मादुभयत्रनिरवधिसुखकामनाचेदेवंकुर्वित्याह मानातिगइति
मानंप्रमाणमतीत्यगच्छतीतिमानातिगःएतावंतएवदानयागादयोमया
कर्तव्याइत्येवमियत्तांविहायेत्यर्थः विहितदानाध्वरादिःकृतदानयजना
दिः अतएवकीनाशभीतिरहितोयमभयरहितःसन्मीनायताक्षंमत्स्य
सदृशदीर्घनयनं अधिगानादरंअधिअधिकोगानविषयेआदरोयस्यतंगा
नप्रियमित्यर्थः सूनास्त्रःकुसुमायुधःकामस्तस्यजीवनंहरतीतितथाविध
स्तंस्मरहरंसदाशिवमित्यर्थः भजसेवस्व इहदानयजनादिजन्यपुण्य
बलाद्यमभयनिरस्त्याचित्तस्वास्थ्येनाक्षय्यानंदरूपतावाप्तयेविषयविरक्ति
पूर्वकंस्मरहरमेवसेवस्वेतिभावः॥ ११ ॥

सापायेति सापायंनाशयुक्तं आपातरम्यंपतनंमर्यादीकृत्यरमणीयंप
तनेसत्यतीवनिंद्यंईदृशंवपुःशरीरंएत्यप्राप्यनकृताभियःभयस्यपातस्य
चखेदानांगणनायेनतादृशोऽहंसमीपातिगान् दूरानित्यर्थः द्वीपान्

भूपानसेविषिसुरूपाकृतेऽहहनतूपागमंसुखलवंगोपायमांसपदि
गोपालधुर्यतवकोपायनाऽस्मिविषयः॥१२॥किंबालनस्फुरतिसं
बाधकंभृशविडंबाऽऽस्पदंपरिणतौनिंबादितिक्तरससंबाध
मत्रननुबिंबाऽधराविलसितं॥लंबाऽलकांधुतविलंबादरांघु
सृणजंबालजालविलसद्बिंबामनूनशशिबिंबाऽऽननांसततमं
बामुपास्वसदयां॥१३॥रंभादिगाढपरिरंभाऽऽदरेणसुचिरंभा
वतोऽत्रयजसेत्वंभावयस्वकिमुशंभाव्यनेनजडसंभावितक्ष
यमिदं॥त्वंभादुदित्वरमहंभावतःकलयजंभारिसंस्तुतपदं
तंभात्युकमदमदंभाकुलोनखरसंभारदारितरिपुं॥ १४ ॥

देशविशेषानगाहिविधनेच्छयाप्रोषितवानस्मि हेसुरूपाकृते भूपानसेविषिसेवितवानस्मि एवंकृत्वापि सुखलवंसुखलेशंनतु उपागमनंनप्राप्तवानस्मि अतो हे गोपालधुर्य श्रीकृष्ण सपदि मांगोपाय पाहीत्यर्थः तवकोपायाहंविषयोनास्मि ममोपरि कोपंमाकुर्वित्यर्थः ॥ १२ ॥

किमिति हे बालमूढ अत्रामुष्मिन्लोके बिंबाधराविलसितंबिंबपक्वतुंडिकेरीफलंतद्वदरुणोऽधरोयासांतासांविलसितंविलासः संबाधकंअत्यंतंबाधकं तथाभृशविडंबास्पदंअत्यंतप्रतारणात्मकं तथापरिणतौपरिपाकावस्थायांनिंबादितिक्तरससंबाधंनिंबादिवत्तिक्तरसेनव्याप्तंईदृशंनस्फुरतिकिं अपितुभासतएवेत्यर्थः अतस्तदनुरागंपरित्यज्य अंबांपार्वतींजगन्मातरमित्यर्थः उपास्वभज कीदृशीं लंबालकांदीर्घकेशीं पु॰ की॰ धुतविलंबादरांधुतस्तिरस्कृतोविलंबोभक्तरक्षणविषयस्तस्मिन् आदरोययातां. पु॰ की॰ घुसृणंकुंकुमंतस्ययज्जंबालंजालंपंकजालंतद्वद्विलसद्बिंबंसत्सदृश ओष्ठोयस्यास्तामारक्तौष्ठीमित्यर्थः पुनःकी॰ अनूनशशिबिंबाननांपूर्णचंद्रमंडलमुखींतथासदयां ॥ १३॥

रंभादीति रंभादीनांस्ववेश्यानां गाढपरिरंभोगाढालिंगनंतस्यआदरेणलोलुपतयासुचिरंबहुकालंभावतःश्रद्धया अत्रइहलोकेयजसेज्योतिष्टोमादीन्करोषि. अनेनक्रतुयजनेनशंसुखंकिंभाविभविष्यतिइतित्वंभावयस्वविचारंकुरु रेजडमूर्खइदंयागार्जितंस्वर्गसुखंसंभावितक्षयंअवश्यंक्षयशीलं॥ तस्मात् अहंभाकुलः दंभोगर्वःसोमयाज्यहमितितेनआकुलोव्याप्तोनभवतीतितथाभूतःसन् अहंभावतःसोऽहंभावेनतदाकारवृत्त्येतिभावः त्वंभात् उदित्वरंप्रादुर्भूतंनृसिंहमित्यर्थः तंकलयचिंतयतस्य॰

रामाःर्चितांघ्रिरभिरामाःःकृतिःकृतविरामासुपर्वविपदांकामाः
र्त्तिहृत्सफलकामानिदेशरतकामादिनिर्जरवधूः॥भामाहरस्य
नुतभामाजपासदृशभामाननीयचरितासामामवत्वखिलः
सामादृतस्कृतिरसामान्यमुक्तिसुखदा॥१५॥मायातवेयः
मुरुगायाःविवेकनिधिमायामिनीकिमपिमामायासयत्यकृ
तजायातनूजधनकायादिदोषकलनं॥सायातनातुनिरपाया
मताजगतिहायामिकंनुशरणंमायानिबासपरिपायानबाः
बुधरदायाददेहभगवन्॥१६॥हारंददासिकुचभारंजिघ्रक्षसिच
सारंगचंचलदृशःसारंतुमिच्छतिहिजारंनिषेव्यतवकारंजनेहघटतां
॥

ध्यानंकुर्वितियावत् कीदृशं जंभारिसंस्कृतपदं जंभारिणाइंद्रेणसंस्तुतंपदंयस्य -पु० की० भावुकप्रदं क्षेमदातारं पु० की० नखरसंभारदारितरिपुं नखरसंभारेणनखसमूहेनदारितःविदारितः रिपुःहिरण्यकशिपुर्येनैवंभूतं॥ १४ ॥

रामेति रामार्चितांघ्रिःरामवंदितपदा अभिरामामनोहरा आकृतिर्यस्याःसुपर्वविपदांदैत्यकृतदेवविपत्तीनांकृतविरामा विरामोनाशः कामार्त्तिहृत्कामपीडानाशिकासफलकामाअवंध्यमनोरथा निदेशः आज्ञा तस्मिन्रतास्तत्पराः कामादिनिर्जराणांवध्वोरत्याद्यायस्याःसाहरस्यशिवस्यभामास्त्री नुतःभामःक्रोधः असुरवधकालोत्पन्नोयस्याःसाअतएवजपासदृशाभाकांतिर्यस्याअरुणेत्यर्थः माननीयंपूजनीयंचरितंयस्याः साईदृशीसाप्रसिद्धादेवी भवानीत्यर्थः मांअवतुरक्षतु शेषंस्पष्टं॥१५॥ ॥

मायेति हेउरुगायपुरुष्टुत आयामिनी विस्तारवती तवेयंमायाअविद्या अविवेकनिधिंअतएवाकृतेनकृतंजायाभार्या तनूजःपुत्रः धनंस्वर्णादिकायोदेहः एषांदोषकलनंदोषचिंतनंयेनतंतथाविधंमांकिमपि अनिर्वाच्यंयथास्यात्तथाआयासयतिखिन्नंकरोति कीदृशोऽसावायासइत्याह साप्रसिद्धायातनामरणकालजन्यातुनिरपायादुश्चिकित्स्यासर्वैर्मता हाइतिखेदे जगतिमरणधर्मविशिष्टेकंनुशरणंयामि सर्वेपिमत्समामरणधर्माणोनकोपिशरण्यइतिभावः अतोहेमायानिवास नवांबुधरोनूतनमेघः तद्दायादोबांधवस्तत्सदृशइत्यर्थः देहोयस्यहेभगवन्षड्गुणैश्वर्यसंपन्नपरिपायास्त्वंमांपाहीतिभावः ॥१६॥

हारमिति हेसखेत्वंसारंगचंचलदृशःकुरंगाक्ष्याःकुचभारंजिघृक्षसिग्रही

स्मारं विहाय मदमारंभरम्यमनुवारं भज श्रुतिगिरां सारं महेशमविकारं जनुर्विलयपारं प्रयास्यसि सखे ॥१७॥ नीलालकानयनलीलाविमोहमयकीलालराशिजठरे वेलातिलंघमनुवेलावमज्जिरिह ते लाघवाय न हि किं ॥ कोलाभ एष इति कोलायितो जयसि हालासमस्थितवयः कालाहितं शमितहालाहलं सततमालानयात्ममनसा ॥१८॥ दावानलार्चिरिव तावानयं तपति हा वाम्यकृत्कलिरहो को वा परस्त्वदिह भो वासुदेव मम यो वारयेत तमिमं ॥ सेवाविधानभृशहेवाकसिद्धमुनिदेवाःधुनाचरणपोर्भावाःनतायशिशुभावाःश्रितायवितराःवासतां निजमुदं ॥ १९ ॥

तुमिच्छसि अतएव तस्यै हारं मुक्ताहारं ददासि सा त्वद्दत्तमुक्ताहारविलसत्कुचकुंभा जारं निषेव्य अत्यंतं प्रसाद्य रंतुमिच्छति हि इति निश्चयेन मह्यास्येमा संशयं कुर्वित्यर्थः इह ईदृशे कपटव्यवहारे तव कारं जनाघटतां नैवेत्यर्थः तर्हि किं करोमीति चेदेवं कुर्याः आरंभरम्यं प्रारंभकाले रमणीयं परिणामे त्वतीवगर्ह्यमित्यर्थः स्मारं स्मरसंबंधिनं मदं विहाय श्रुतिगिरां वेदवाक्यानां सारं अविकारं विकृतिरहितं कालत्रयाबाध्यमित्यर्थः महेशमनुवारं भज किं तेन स्यादिति चेच्छृणु जनुर्विलययोर्जन्ममरणयोः पारं मोक्षं प्रयास्यसि गमिष्यसि ॥१७॥

नीलालकेति नीलालकाया नीलकुंतलाया नयनलीलाकटाक्षविसर्पणं स एव मोहस्तन्मयो यः कीलालराशिः समुद्रः संभोगशृंगाररसस्तस्य जठरे मध्ये वेलातिलंघं अतिकालं अनुवेलं वारंवारं अवमज्जिः प्रतिक्षणमवमज्जनं ते तव लाघवाय लघुत्वाय न हि किं अपि तु सर्वथैव लघुत्वजनिका स्यात् क एष लाभो न कोपीत्यर्थः अमुमेव लाभं मन्यसे चेत्तत्राह हे हालासमस्थितवयः हालासमं मदिरासमं स्थितं वयस्तारुण्यरूपं यस्य यथा हाला नादयति ज्ञानावरणं च करोति तथा तारुण्यमपि कोलायितः सूकरवदाचरितो जयसि नृपशुरूपेणोत्कर्षमावहसीति भावः तर्ह्येवं कुर्वित्याह शमितहालाहलं विषं येन तं कालस्य मृत्योरहितं द्वेष्टारं मृत्युंजयमिति यावत् सततं आत्ममनसा आलानय बधान सेवनेन मृत्युंजयं वशीकुर्वित्यर्थः ॥ १८ ॥

दावानलेति तावान् तावत्परिमाणः वाम्यं कौटिल्यं करोतीति वाम्यकृत् भयंकलिः दावानलार्चिरिव दावाग्निज्वालेव तपति संतापयति हा इति खेदे अहो इत्याश्चर्ये भो वासुदेव इहामुष्मिन् लोके त्वदपरः त्वत्तोऽन्यस्तमि

आशाभरेणनिखिलाऽऽशासुधावनमथाऽऽशातकुंभगिरिवाक्लेशा
ऽऽवहंविविधदेशाऽटनंद्रविणलेशायनाऽपिवहृते॥ आशाऽतिदाम
वितुमाशास्वपाणिधृतपाशामनेकजगतामीशामुपासितगिरीऽ
शामिहांऽगदिगधीशाऽर्चितांऽघ्रिनलिनां॥२०॥एषाजराशिरसिवे
षाऽन्यभावकृतशेषाऽऽमयैकवसतिस्तोषायसौम्यनहिदोषाऽऽलया
भृशमपोषाऽऽस्पदीकृतगुणा॥शेषाऽऽयुषःकुरुविशेषाऽर्हमेतदिहशे
षाऽहिक्लृप्तधनुषोरोषाद्यपास्यतनुशोषावहंकलययोषामनंगजयिनः
॥२१॥

मंममकलिंकोवारयेतनकोपीत्यर्थः त्वयातुनंदव्रजेवत्सागोपाश्चदावानला द्रक्षिताइतिश्रीमद्भागवतेप्रसिद्धमेवतस्मात् सेवाविधानेसेवाकरणेभृशं हेवाकाःस्पर्धायुक्ताःएवंभूताःसिद्धाःनारदादयोदेवयोनिविशेषावामुनयः कपिलादयः देवाइंद्रादयः यस्मिंस्तथाभूतहेभगवन् चरणयोर्भवत्सद्यो र्भावेनशुद्धांतःकरणेनआनतायनम्रायशिशुभावाश्रितायमह्यमितिशेषः निजमुदांलक्षरूपानंदानांआवासतांवितरदेहीत्यर्थः॥१९॥

आशाभरेणेति आशाभरेणद्रव्यलिप्साभरेण आशातकुंभगिरिस्वर्ण पर्वतमभिव्याप्यमेरुगिरिपर्यंतमित्यर्थः निखिलाशासुसर्वासु दिक्षुधावनमटनंतथाचविविधदेशानामटनंक्लेशावहंक्लेशमात्रफलकंजातमितिशेषः तद्भ्रमणंद्रविणलेशायापिनवहृतेनाभूत् अतोहेतोः हे अंगइहलोके आशातिदांआशामतिक्रम्ययाद्ददातिभगवतीतामाशास्वउपास्वेतिभावः कुतः अवितुंदारिद्र्यादिदुःखात्त्रातुंआत्मानंरक्षितुमित्यर्थः अन्यत्स्पष्टं ॥२०॥

एषेति हेसौम्यवेषान्यभावकृत् वेषस्यकृष्णकेशत्वादिरूपस्य अन्यभावोवैपरीत्यंवलीपलितत्वादिरूपंकरोतीतितथा च परं, अशेषामयैकवसतिः सर्वरोगाणांमुख्यस्थानं, अतएवदोषालयाअनेकदोषस्थानभूता तथाभृशमधिकं अपोषास्पदीकृताःगुणाःविद्याभ्यासाद्योयया एवंभूताएषाजराशिरसि आगतातोषायनहिसंतोषं जनयितुंनप्रभवतीत्यर्थः तस्मात् तनुशोषावहंशरीरशोषकारिरोषाद्यपास्यक्रोधादीन् हित्वाशेषायुषःअवशिष्टस्यायुषःविशेषार्हं विशेषयोग्यमेतत्कुरु किंतदित्याह इहास्मिन्संसारे शेषाहिक्लृप्तधनुषः शेषाख्यपन्नगेनक्लृप्तंधनुर्येनतथाभूतस्यानंगजयिनःकामजेतुःशिवस्येत्यर्थः योषांस्त्रियंभवानींकलय आश्रयेत्यर्थः॥२१॥

संसारधन्वभुविकिंसारमामृशसिशंसाऽधुनाशुभमतेत्वंसाधुसंतनुहितंसाहसेनतुनृशंसाऽऽहृतेनकिमहो॥हंसाऽऽशयस्थमतिहंसात्मभासमथतंसामभिःपरिगृणन्कंसाऽरिवंद्यमवतंसायितेंदुमिहसंसाधयाऽर्थमखिलं॥२२॥गेहाऽऽत्मजद्रविणदेहादिकंजनितमोहाऽनुबंधमवितुंभोहानिरापिकियतीहाऽपिसुस्थितिमतीहानतेनिजहिते॥वाहायितोक्षभवदाहाऽपहंसलिलवाहाऽभकंठसुषमंबाहालसन्मृगमनाहार्यसौख्यकरमाहात्म्यमाभजमहः॥२३॥वालीसुतश्रवणपालीसुगालललितचूलीविराजितकुलाकेलीगतानुगमरालीकुलामधुरमालीभिराहृतकथा॥
॥

संसारेति संसारधन्वभुवितापादिजनकत्वात्मरुभूमितुल्येसंसारेकिं सारंआमृशसिजानासिनकिमपीत्यर्थः जानासिचेदिदंतावदत्रसारमिति शंसकथयहेशुभमतेअधुनात्वंसाधुहितंसंतनु· आत्महितंकुर्वितिभावः नृशंसाहृतेनघातुकपुरुषैःस्वीकृतेनसाहसेनपरधनपरस्त्रीहरणप्राणिवधादिकेनअहोकष्टंकिंस्यात् नकिंचित्कल्याणंस्यादित्यर्थः तस्मात्हंसाशयस्थंयोगिहृदयस्थं अतिहंसात्मभासंसूर्यमतिक्रांता आत्मभाःस्वकांतिर्यस्यतं· सूर्यातिशायितेजसमित्यर्थः कंसारिवंद्यंविष्णुपूज्यं अवतंसायितेंदुंचंद्रशेखरंभगवंतंसामभिःप्रेमगीतैःसामवेदस्थैर्मंत्रैर्वागृणन् कीर्तयन् अखिलमर्थंचतुर्विधपुरुषार्थरूपंसंसाधयसंपादय॥२२॥

गेहेति जनितः उत्पादितःमोहानुबंधःअज्ञानसंबंधोयेनतादृशंगेहात्मजद्रविणदेहादिकं गेहंगृहं, आत्मजःपुत्रः; द्रविणंद्रव्यं, तद्देहादिकंअवितुंरक्षितुंभोः इहापिअस्मिन्लोकेकियतीकिंपरिमाणाहानिः अनेकदुःखसहनरूपास्वार्थोन्मूलनरूपाचआपिप्राप्तातथापितेतवनिजहितेस्वहितेसुस्थितिमतीयातायातनिवृत्तिविषयिणीईहाइच्छानभवतिइतिशेषःस्वहितंतुईश्वरभजनंविनानभविष्यतीत्यतस्तदेवकुर्वित्याह वाहायितोक्षवाहनीकृतबलीवर्द भवदाहापहंसंसारतापनाशकं तथासलिलवाहोमेघस्तस्येवाभाकांतिर्यस्यास्तथाविधाकंठसुषमाकंठशोभायस्यतत् बाहायांहस्तेलसन्मृगोयस्यतत् अनाहार्यंत्रिकालाबाध्यंमोक्षाख्यंसुखंतस्यकरंउत्पादकंमाहात्म्यंयस्यतथाभूतंनीलकंठाख्यंमहस्तेजोभज॥२३॥

वालीति साकालीममशुभायभवतु कीदृशीसा- वालीयुतश्रवणपालीयुगा

नालीकदृक्कुसुमनालीकपाणिरिहकालीयशासिसहजानालीदलाभ
तनुमालीसदाभवतुकालीशुभायममसा॥२४॥दक्षाऽध्वरप्रशमदक्षा
ग्रहंविबुधपक्षाऽभिपालनपरंलक्षाऽमृतद्युतिवलक्षात्मकंहृतविपक्षा
त्तविस्मयकथं॥उक्षाऽधिरोहिहतलक्षाऽसुरप्रकरमक्षामताश्रयदय॰
त्र्यक्षाह्वयंप्रणतरक्षामणिंप्रणयियक्षाऽधिपंस्मरमहः॥२५॥राम
नाम्नःस्वपौत्रस्यकामनापूरणोत्सुकः॥अश्वधाटींजगन्नाथोविश्व
हृद्यामरीरचत्॥२६॥इतिपंडितेंद्रजगन्नाथविरचितमश्वधाटीका॰
व्यं॥

वालीकेशगुच्छः अथवाबवयोःसावर्ण्यात् बालीकर्णभूषणविशेषःतयायुतंश्रवणपालीयुगंयस्याःसा· पुं०की० ललितारम्यायाचूलीकर्णमूलंतस्यांविराजमानंबकुलपुष्पंयस्याःसा· तथाकेल्याक्रीडयायत् गतंगमनंतदनुगंतदनुगामिमरालीकुलंहंसीसंघोयस्याः यद्गतिसदृशगतिशालीहंसीसमूहःसेत्यर्थः तथाआलीभिःसखीभिर्मधुरंयथास्यात्तथाआदृताकथायस्याः अलीकाअनृतान अलीकानालीकासफलेत्यर्थः तादृशीदृक्यस्याःसा अमोघदर्शनेत्यर्थः कुसुमसहितं नालीकंइतरपुष्पसहितंकमलंपाणौयस्याः तथाकालीयः यमुनाह्रदस्थःकृष्णसर्पस्तंशास्तीतिकालीयशासीकृष्णस्तत्सहजातद्भगिनी यशोदोदरेदुर्गाप्रादुर्भावस्य भागवतेप्रसिद्धत्वात् तथानालीदलस्येवाभायस्याएतादृशीयातनुस्तयामालतेसाश्यामवर्णेत्यर्थः॥२४॥

दक्षेति हेवत्सत्र्यक्षाह्वयंत्रिलोचनाख्यंमहःशिवाख्यंतेजःस्मरचिंतय कीदृशं तत्-दक्षयज्ञध्वंसनेदक्षःपटुःआग्रहोयस्य·पुं०की० विबुधानांदेवानांविदुषांवा पक्षस्तत्पालनपरं देवपक्षपातीत्यर्थः पुं०की० लक्षसंख्याकायेअमृतद्युतयश्चंद्रास्तेषामिववलक्षोधवलआत्मादेहोयस्य पुं०की० हृताःपराजितायेविपक्षाःशत्रवस्त्रिपुरादयस्तैःआत्तःप्राप्तःविस्मयःआश्चर्यंयस्यांतथाविधाकथायस्य पुं०की० उक्षाधिरोहिनंदिकेश्वराधिरूढंपुं०की० हतोलक्षसंख्याकानामसुराणांप्रकरःसमूहोयेनपुं०की० अक्षामतांपुष्टिंआश्रयतीत्यक्षामताश्रयाविपुलेतियावत् एतादृशीदयायस्य·पुं०की० प्रणतानांनम्राणांभक्तानांरक्षामणिंपालकमित्यर्थः पुं०की० प्रणयीप्रणयसंपन्नोमित्रमितियावत् एवंभूतोयक्षाधिपःकुबेरोयस्यतत्तादृशं॥ २५॥

रामेति॥ रमयतीतिरामःविद्याविनयादिगुणैःसर्वेषांमनोरमइत्यन्वर्थंरामइतिनामयस्यतस्यस्वपुत्रपुत्रस्यकामनापूरणोत्सुकोमनोरथपूरणोत्कंठितोजगन्नाथाभिधःपंडितोविश्वहृद्यांपंडितरंजनींअश्वधाटींअरीरचत्रचयामास॥२६

गुणरत्नर्षिभूयुक्तेप्रजापतिसमाह्वये॥शाकेधिमासेभाद्राख्येगीष्पतौप्रतिपत्तिथौ॥अश्वधाट्यादर्पणाख्याव्याख्याकृष्णेननिर्मिता॥ संपूर्णं ॥

अथराजसभावर्णनं

गुरुरेकःकविरेकःसदसिमघोनःकलाधरोप्येकः॥अद्भुतमत्रसभायांगुरवःकवयःकलाधराःसर्वे॥१॥ नाहूतापिपुरःपदंरचयतिप्राप्तोपकंठेहठात्पृष्टानप्रतिवक्तिकंपमयतेस्तंभंसमालंबते॥ वैवर्ण्यंस्वरभंगमंचनिवलान्मंदाक्षमंदाननाकष्टंभोःप्रतिभावतोप्यभिसभंवाणीनवोढायते॥२॥साग्नयोपिकीलशीतलशीलाविश्रुताअपिबहुश्रुतवंतः॥पंडिताअपिजडाःपरवादेश्रोत्रियाइहसदानिवसंति॥३॥सारस्वतेस्रोतसिदूरमग्नैःसुधीवरैरुद्धृतसूक्तिरत्नै।नतत्किमप्युर्वरितंयदेषामुपायनीकृत्यपुरोभवेयं॥४॥ ॥इतिराजसभावर्णनम्॥छ॥छ॥छ॥छ।

अथसामान्यराजप्रशंसा

सरस्वतीस्थितावक्त्रेलक्ष्मीवेश्मनिसंस्थिता॥कीर्तिःकिंकोपिताराजन्येनदेशांतरंगता॥१॥सरस्वतीकुटुंबस्य॥तुलामारुह्यरविणावृश्चिकेनहतंपदं॥भवताशिरसिन्यस्तमयत्नेनैवभोगिनां॥२॥किंकृतेनमयत्रत्वंयत्रत्वंकिमसौकलिः॥ कलौचेद्भवतोजन्मकलिरस्तुकृतेनकिं॥३॥सर्वदासर्वदोसीतिमिथ्यासंस्तूयसेजनैः॥नारयोलेभिरेपृष्टंनवक्षःपरयोषितः॥४॥असिधारापथेनाथशत्रुशोणितपिच्छले॥आजगामकथंलक्ष्मीनिर्जगामकथंयशः॥५॥कोप्यन्यःकल्पवृक्षोयमेकोस्तिक्षितिमंडले॥यत्पाणिपल्लवोप्येकःकुरुतेधःसुरद्रुमं॥६॥अपूर्वेयंधनुर्विद्याभवताशिक्षिताकुतः॥मार्गणौघःसमायातिगुणोयातिदिगंतरं॥७॥केषामप्येते॥देवत्वंजयपस्यराजत्तिमहाराष्ट्रीकुचोच्चंकुलंलाटीवाङ्मृदुनर्मवैदिवनितानाभीगभीरंमनः॥आभीरीकटिविस्तृतामतिरसिगौडीकचश्यामलाकर्णाटीरतिनिष्ठुरोरणरसःकीरीमुखोत्थंयशः॥८॥तेकेपीनधरास्तएवहिपरंधात्रीफलंभुंजतेतेषांद्वारिनदंतिवाजिनिवहास्तैरेवलब्धाक्षितिः॥तैरेतत्समलंकृतंनिजकुलंकिंवाबहुब्रूमहेयेदृष्टापरमेश्वरेणभवतारुष्टे

ननुष्टेनवा॥९॥कयोरपि॥संग्रामांगणमागतेनभवताचापेस
मारोपितेदेवाकर्णयथेनयेनसहसापद्यत्समालंबितं॥कोदंडेन
शराःशरैररिशिरस्तेनापिभूमंडलंतेनत्वंभवताचकीर्तिरतुला
कीर्त्याचलोकत्रयं॥१०॥देवत्वद्यशसिप्रसर्पतिजगल्लक्ष्मीसुधो
च्चैःश्रवश्चंद्रैरावणकौस्तुभाःस्थितिमिवामन्यंतदुग्धांबुधौ॥
किंत्वेकःपुनरस्तिदूषणकरोयन्नोपयातिभ्रमात्कृष्णंश्रीःशि
तिकंठमद्रितनयानीलांबरंरोहिणी॥११॥क्षीरोदीयंतिसद्यः
सकलजलधयोवासुकीयंतिनागाःकैलासीयंतिशैला दिवि
चदितिषदःशंकरीयंतिसर्वे॥यौष्माकीणेसमंतात्त्वचलतिधव
लेचारुकीर्तिप्रतानेयद्योषाकाचभूषाःकिमितिनसहसामौक्ति
कीयंतिदेव॥१२॥कस्यापि॥किंवृत्तांतैःपरगृहगतैःकिंतुनाहं
समर्थस्तूष्णींस्थातुंप्रकृतिमुखरोदाक्षिणात्यस्वभावः॥गेहेगे
हेविपणिषुतथाचत्वरेपानगोष्ठ्यामुन्मत्तेवभ्रमतिभवतोवल्ल
भादेवकीर्त्तिः॥१३॥मातंगदिवाकरस्य॥युधिष्ठिरोसिभीमोसि
चरितैरर्जुनोभवान्॥प्रज्ञयासहदेवोसिवाच्यतानकुलस्यते॥
॥१४॥बलिकर्णदधीच्याद्यापुरापंचत्वमागताः॥पंचत्वंनगताश्चि
त्रंत्वपिजीवतिपंचमे॥१५॥यद्गुणैर्ग्रथितैःशुद्धैरमितैर्ब्रह्मगो
लकः॥विधत्तेकीर्त्तिकन्यायाःक्रीडाकंदुककौतुकं॥१६॥केषा
मप्येते॥यशोदयामंडितकांतदेहोबाल्येपिगोपालजनस्यनेता
॥गोमंडलंपासिबलेनयुक्तःकथंनराजन्पुरुषोत्तमोसि॥१७॥क
स्यापि॥साशंकस्यसमाकुलीकृतमतेरत्यंतनिस्तेजसःछिन्नां
गस्यविकंपमानहृदयस्यारूढमन्योर्भृशं॥लज्जासंसजतःक्रमंवि
मृशतोविघ्नान्बहून्पश्यतोयःक्लेशार्थिजनस्यवक्तुमनसोमाभूत्स
तेविद्विषां॥१८॥कस्यापि॥नोकामःप्रतिहन्यतेप्रणयिषुस्वप्नेपि
नाथत्वयानैवाधःकुरुषेविषंहिरसनव्यालानतेवल्लभाः॥नोबद्ध
स्तवमूर्तयोनचतनुर्नित्यंजडानुग्रहव्यग्रानोविषमाचहृत्कमथ
चख्यातःक्षितावीश्वरः॥१९॥क्षिप्तापांवीरकंठस्यलवहलगल

द्रक्तधारांबुवर्षैर्मोद्यन्मातंगकुंभोच्छलनविलुलितैर्मुक्तिकैःपुष्पि
तायां॥संग्रामोद्यानभूमौतुरगखुरमुखोत्खातकृष्णस्थलायांजा
तंत्वत्खङ्गवल्याःफलमतुलरसास्वादहृद्यंजयश्रीः॥१९॥उद्यद्दा
लांकुरश्रीर्दिशिदिशिदशनैरेभिराशागजानांरोहन्मूलासगौरैरु
रगपतिफणैरत्रपातालकुक्षौ॥अस्मिन्नाकाशदेशेविकसितकुसु
मराशिभिस्तारकाणांनाथत्वत्कीर्तिवल्लीफलतिफलमिदंबिंबमिं
दोःसुधाब्धिं२१॥हारानाहरदेवचंद्रधवलान्नोचेत्पयोधेस्तटीसं
प्राप्तेस्त्वयिसैन्यवारणगणे र्मज्जद्भिरक्षोभितं।सिंदूरारुणमंबु
मेघपटलीपीतोज्झितंशुक्तिषुस्वल्पैरेवदिनैःकरिष्यतिमहीमा
तांम्रमुक्ताफलां॥२२॥दर्पांधगंधगजकुंभकपालकूपां संक्रांत
निम्नघनशोणितशोणशोचिः॥वीरैर्व्यलोकियुधिकोपकषायकां
तिःकालीकटाक्षइववयस्यकरेकृपाणः॥२३॥इंदुनिंदतिचंदनं
नसहतेमल्लीस्रजंनेक्षतेहारंद्वेष्टिसिताब्जमुज्झतिबिसस्तो
मंविगृण्हंतिन॥श्रीभूपालमहीधरेषुविपिनेष्वंभोधितीरेषुचल
त्कीर्तिस्त्वदरिप्रियाचविलसत्युच्चैस्फुरत्सांद्रिमा२४॥कृष्णत्वघन
मंडलस्यगलितंलग्नंमुखेत्वद्विषांविद्युद्दामजगामतावकम
तिंगर्जिर्भवद्दुंदुभिं॥वृष्टिस्त्वत्परिपंथिपार्थिववधूनेत्रेषुच
क्रेस्थितिंचापतेवसुधाधिनाथबलभित्कोदंडकांतिःस्थिता॥२५
॥सिंदूरंसीमंतात्स्मितंमुखाद्वैरिराजवनितानांयस्यप्रतापयश
सीहरतःस्मकृणासहने॥२६॥धनद्देवानां॥अभिमतफलदाता
त्वंचकल्पद्रुमश्चप्रकटमिहविशेषंकंचनोदाहरामः॥कथमिव
मधुरोक्तिप्रेमसन्मानमिश्रंतुलयितुसुरशाखीदेवदानंत्वदीयं॥
॥२७॥कल्पद्रुमोनजानातिनददातिबृहस्पतिः॥अयंहिजगती
जानिर्जानातिचददातिच॥२८॥नालिंगतिकुचद्वयंभवदिभप्रो
त्तुंगकुंभद्वयत्रासाद्वेणिलतासुनैवदधतिप्रीतिंतवासिभ्रमात्॥
भ्रूभंगान्भवदीयदुर्धरधनुर्भ्रांत्याभजंतेनतेवैरिक्षोणिभुजांनि
जांबुजदृशांभूमंडलाखंडल॥२९॥भग्नासुरिपुसेनासुनरेंद्रत्वं

मह्रामह्राः॥ खड्गांतर्निजमेवैकमद्राक्षीः संमुखंमुखं॥३०॥देव
त्वद्विजयप्रयाणविलसत्सद्वाजिराजव्रजक्षुण्णक्ष्मातललीन
पांसुपटलव्याप्तानिमेषेक्षणः॥सुत्रामाबहुमन्यतेफणिपतिं
पातालमूलस्थितंसोप्युद्दामकरींद्रदुर्धरभरक्रांतःसहस्रेक्षणं
॥३१॥नभिक्षादुर्भिक्षेमिलतिदुरवस्थाःकथमृणंलभंतेकर्माणि
द्विजपरिवृढान्कारयतुकः॥ अदत्त्वैवयथासंगृहपतिरसावस्त
समयेक्वयामःकिंकुर्मोगृहिणिगहनोजीवनविधिः॥३२॥अस्तुः
क्रोयदिनप्रकुप्यसिमृषावादंनचेन्मन्यसेतद्भूमोद्भुतकीर्तना
यरसनाकेषांनकंडूयते॥देवत्वत्तरुणप्रतापदहनज्वालावली
शोषिताःसर्वेवारिधयस्तवारिवनितानेत्रांबुभिःपूरिताः॥३३॥
यत्रप्रयामाकविज्ञान्यपिचटकवधूचंचुकोटिच्युतानिप्रोड्डीयंते
स्ववेश्मन्यशनविरहितेवर्धनश्रोत्रियाणां॥दैवेदातर्यकस्माच्च
तुलशिशुकराकृष्टहारावलीतोभ्रष्टास्तत्रैवदृष्टायुवतिभिरल
संपूरिणीमौक्तिकौघः॥३४॥इतिश्रीसामान्यराजप्रशंसापरि०

अथविशिष्टराजवर्णनं

गायंतुकिन्नरगणाःसहकिन्नरीभिःश्रीरामचंद्रशिखरेषुहिमा
चलस्य॥शेषेंदुकुंददलवालमृणालवालनीहारहारहरहास
सितंयशस्ते॥१॥ वाल्मीकस्य॥ कूर्मःपादोत्रयष्टिर्भुजगपतिर
सौभाजनंभूतधात्रीतैलापूर्णाःसमुद्राःकनकगिरिरयंवृत्तवर्ति
प्ररोहः॥ज्योतिश्चंडांशुरोचिर्गगनमलिनिमाकज्जलंदह्यमा
नाशत्रुश्रेणीपतंगाज्वलतिरघुपतेत्वत्प्रतापप्रदीपः॥२॥हनू
मतः॥तत्कृतंयन्नकेनापितद्दत्तंयन्नकेनचित्॥तत्साधितमसा
ध्यंयद्विक्रमार्केणभूभुजा॥३॥हस्तीवन्यःस्फटिकघटितेभि
त्तिभागेस्वबिंबंदृष्ट्वादृष्ट्वाप्रतिगजइतित्वद्विषांमंदिरेषु॥दंता॰
घाताद्दलितदशनस्तंपुनर्वीक्ष्यसद्योमंदंमंदंस्पृशतिकरिणी
शंकयाविक्रमार्कः॥४॥कयोरप्येतौ॥स्पृश्यत्कृष्टासिपिष्टोत्कटक
टिघटाकुंभकूटावटांतर्निष्ठ्यूतासृक्तटिन्यास्तटनिकटरटत्कोण

पादाट्टहासः॥श्रीभोजत्वद्रणक्ष्मातटभटविकटोरःस्थलत्रोटकुप्यत्क्रुधौघत्रोटकोटीप्रकटचटचटाशब्दरौद्रोभवद्राक्॥५॥भोभोश्रीभोजदेव श्रयतविनयतःशत्रवःक्षत्रवर्गाःत्राणत्राणायनोकानभवतिभवतांक्ष्माप्यरण्यंशरण्यं॥मत्वामातंगकुंभद्वितयमितिपुराक्रूरवृत्तिर्भिनत्तिक्रुद्धःश्रुत्वांतकांताकुचकलशयुगंरंहसासिंहशावः॥६॥श्रीभोजसाम्यंनवकल्पवृक्षःसदावदान्योपिकथंप्रयाति॥यतोभवद्दानसुपुष्टविग्रहव्येनकुक्षिंभरिरस्यभर्ता॥७॥एते देवेश्वरस्य॥मेदश्चंद्रकिरीटपूजनरसेतद्ध्यानकृष्णार्चनेस्तंभःशंभुनितंबिनीप्रणतिषुव्यग्रोनधातुर्गृहे॥अस्माकंपरमर्दनोस्तिवदनेन्यस्तेनसंरक्षितःपृथ्वीराजनरेश्वरादितिनृणांतत्पत्तनेपूज्यते॥८॥विनायकपंडितस्य॥आविंध्यादाहिमाद्रेर्विरचितविजयस्तीर्थयात्राप्रसंगादुद्ग्रीवेषुप्रहर्षान्नृपतिषुविनमत्कंधरेषुप्रपन्नः॥आर्यावर्त्तंयथार्थंपुनरपिकृतवान्म्लेच्छविच्छेदनाभिर्देवःशाकंभरींद्रोजगतिविजयतेवीरराट्क्षोणिपालः॥९॥ब्रूतेसंप्रतिबाहुवाणतिलकःशाकंभरीभूपतिश्रीमान्विग्रहराजएषविजयीसंतानजानात्मजः॥अस्माभिःकरदंव्यधायिहिमवद्विंध्यांतरालंभुवःशेषस्वीकरणायमास्तुभवतामुद्योगशून्यंमनः॥१०॥एतौत्रिगमनृपतिपाणयूपयज्ञप्रशस्तेः॥माचक्रचक्रिविरहज्वरकातरोभूःसंकोचमंबुजनयाहिनयामिनीनां॥हंमीरभूपहयपादविदीर्णभूमिरेणूत्करैरयमकारिदिवांधकारः॥११॥कस्यापि॥राजन्राजमृगांकशंकरकथकिंपत्रिकायामिदंश्लोकःकस्यतवैवदेवशृणुमःसंपठ्यतांपठ्यते॥एतासामरविंदसुंदरदृशांद्राक्चामरांदोलनादुद्वेल्लद्भुजवल्लिकंकणरणत्कारःक्षणंवार्यतां॥१२॥अर्धंदानववैरिणागिरिजयाप्यर्द्धंहरस्याहृतंदेवेत्थंभुवनत्रयेस्मरहराभावेसमुन्मूलति॥गंगासागरमंबरंशशिकलाशेषश्चपृथ्वीतलंसर्वज्ञत्वमधीश्वरत्वमगमत्त्वांमांचभिक्षाटनं॥१३॥एतौशंकरकवेः॥

पृथ्वीश्रीमदनंगभीममहतीतद्वेष्टनंवारिधिःपीतोसौकलशोद्भवेनमुनिनासव्योम्निखद्योतवत्॥नहिष्णोर्दनुजाधिनाथजयिनःपूर्णेपदंनाभवद्देवश्चेतस्मिवर्ततेतवसदात्वत्तोमहान्नापरः॥१४॥सार्वभौमस्य॥चक्रःपप्रच्छपांथंकथयममसखेनास्तिसकोऽपिदेशोवस्तंनोयत्ररात्रिर्भवतिभुविखगायेतिसंप्रत्युवाच॥नीतेमेरोस्समाप्तिंकनकवितरणैःश्रीजगद्देवनाम्नासूर्येणांतर्हितेऽस्मिन्कतिपयदिवसैर्वासराद्वैतसृष्टिः॥१५॥मुखेहारावालिर्नयनयुगलेकंकणभरोनितंबेपत्रालीसतिलकमभूत्पाणियुगलं॥अरण्येश्रीकर्णत्वदरियुवतीनांविधिवशाद्पूर्वोयंभूषाविधिरहहःजातःकिमधुना॥१६॥कीर्तिःकातवीरभद्रभवतःस्वर्वाहिनीगाहिनीदिक्पालानितिलान्यरीत्यद्धतीपाण्योःप्रतापानलं॥सप्तांभोनिधिमंडलान्यधिगतात्वय्येकपत्नीव्रतख्यातेविष्णुपदंस्पृशत्यनुदिनंशेषस्यशीर्षान्यपि॥१७॥विंध्याद्रिःकरिसाधनीनिरुपमोरत्नाकरःकोशभृत्सौगंधीमलयाचलःपरिचराःसर्वेपिविद्याधराः॥विश्वासापरिपूरणंवितरणंदेशोप्यहोदक्षिणःपांड्याखंडलवीरपांड्यभवतःकिंकिंनलोकोत्तरं॥१८॥स्कंदर्शनकवेः॥तवांगणेस्कंद्रवीरपांड्यमतंगजाःशृंखलिनोविभांति॥आवासदानादरिभूपतीनामाशांतशैलाद्वसापराधाः॥१९॥मुंचतिमुंचतिकोशंत्यजतित्यजतिक्षमामाशु॥अर्जुनदेवकृपाणेभजतिचभजतिप्रकंपमरिवर्गः॥२०॥कयोरपि॥अंतर्विष्णोस्त्रिलोकीनिवसतिफणिनामीश्वरेसोऽपिशेतेसिंधोःसोऽप्येकदेशेतमपिचुलकयांकुंभयोनिश्चकार॥धत्तेखद्योतलीलामयमपिनभसिश्रीनृसिंहक्षितींद्रत्वत्कीर्त्तेःकर्णनीलोत्पलमिदमपिचप्रेक्षणीयंविभाति॥२१॥अपायिमुनिनापुरापुनरमायिमर्यादयाअनारिकपिनापुरापुनरदाहिलंकारिणा॥अमंथिमुरवैरिणापुनरबंधिलंकारिणाक्वनामवसुधापतेतवयशोंबुधिःक्वांबुधिः॥२२॥अस्यक्षोणिपतेःपरार्धपरमालसीहृताःसंख्ययामज्ञाचक्षुरवेस्यमाणबधिरश्रा

व्याःकिलाऽकीर्त्तयः॥गीयंतेस्वरमष्टमंकलयताजातेनवंध्योदरान्मूकानांप्रकरेणकूर्मरमणीदुग्धोदधेरोधसि॥२३॥द्वारंखड्गिभिरावृतंबहिरपिप्रस्विन्नगंडैर्गजैरंतःकंचुकिभिःस्फुरन्मणिधरैरध्यासिताभूमयः॥आक्रांतंमहिषीभिरेवशयनंत्वद्विद्विषांमंदिरेराजन्सैवचिरंतनप्रणयिनीभून्येऽपिराज्यस्थितिः॥२४॥त्वंद्वित्राणिपदानिगच्छसिमहीमुल्लंघ्ययातिद्विषस्त्वंबाणान्दशपंचमुंचसिपरेसर्वाणिशस्त्राण्यपि॥तेदेवीपतयस्त्वदस्त्रनिहतास्त्वंमानुषीणांपतिर्निद्रातेषुकथंस्तुतिस्तवकथंश्रीकर्णनिर्णीयतां॥२५॥कीर्तिस्तवक्षितिपयातिभुजंगगेहेमातंगसंगमकरीचदिगंतरेषु॥त्यक्त्वाऽवरंव्रजतिनंदनमप्यकंपकिंकिंकरोतिननिरर्गलतांगतास्त्री॥२६॥कामोवामदृशांनिधिर्नयजुषांकालानलोविद्विषांस्वःशाखीविदुषांगुरुर्गुणवतांपार्थोधनुर्धारिणां॥लीलावासगृहंकलाकुलजुषांकर्णःसुवर्णार्थिनांश्रीमान्वीरवरःक्षितीश्वरवरोवर्त्तिसर्वोपरि॥२७॥शौर्यंकेसरिणापरोपकरणंकल्पद्रुमेणार्पितंलावण्यंमकरध्वजेनचशरच्चंद्रेणशुभ्रंयशः॥धैर्यंतेकमठाधिपेनविपुलंगांभीर्यमंभोधिनासौभाग्यंतुतवैवकेवलमिदंनत्वकेननोविद्महे॥२८॥समाजेसम्राजांसदसिविदुषांधाम्निधनिनांनिकायेनीचानामपिचतरुणीनांपरिषदि॥वयंयत्रैवास्मःक्षणमतिथयस्तत्रशुश्रुमःस्फुरद्रोमोद्भेदाःस्फभगभवतःपौरुषकथाः॥२९॥कर्णस्तेनतुलांकथंकथमपिप्राप्तुंक्षमोनोयतस्तेदुःशासनकेनशल्यनृपतौदुर्योधनेवानवा॥नोदुष्टेशकुनौसदावितरणस्वीयत्वबुद्धिर्मनागास्तेधर्मरतिर्मतिर्नरहरौनद्वेष्टताबंधुषु॥३०॥अभ्युद्धृतावसुमतीदलितंरिपूःक्षिप्तमक्षमेकवलिताबलिराजलक्ष्मीः॥एकत्रजन्मनिकृतंयदनेनराज्ञाजन्मत्रयेतदकरोत्पुरुषःपुराणः॥३१॥कामंकामसमस्त्वमत्रजगतिख्यातोसिपत्रसर्वदारूपेणैवमहीपतेतवधनुःपांडित्यमन्यादृशं॥त्वंयस्मिन्विशिखंविमुंचसितमेवो

हृिश्रयमुक्तत्रपंत्तद्यत्कंचुकमुज्झतस्मृहमहोधावंतिदेवांगनाः
॥३२॥एकस्त्रिधावसतिचेतसिचित्रमत्रदेवद्विषांचविदुषांचमृगी
दृशांच॥तापंचसंमदरसंचरतिंचपुष्णन्शौर्योष्मणाचविनयेनच
लीलयाच॥३३॥कोदंडस्तवहस्तगोहृदिवलत्यर्त्तिस्तवद्वेषिणांते
दातारभसेनमार्गणगणास्तानेवसंसेवते॥वीरत्वंतुजयस्यमित्रम
निशंतेयांतिवैकुंठतांसंग्रामेतवभूपतेमहदिदंचित्रंसमालोक्य
ते॥३४॥सर्वेलुंठितमुद्भटैस्तवभटैस्तेनद्विषत्सुश्रवस्त्राणायत्व
यियोजितांजलिपुटंकाकूक्तिमातन्वते॥त्राणंदूरतएवतिष्ठतुमन
स्तासांत्वयालुंठितंतन्नभीरवदामिकुप्यसिनचेत्साधोरयंक्र
मः॥३५॥जीवाकृष्टिंसचक्रेमृधभुविधनुषःशत्रुरासीद्गतासुर्ल
क्षाप्तिर्मार्गणानामभवदरिवलेतद्यशस्तेनलब्धं॥मुक्तातेनक्षमे
तित्वरितमरिगणैरुत्तमांगैःप्रतिष्ठापंचत्वंद्वेषिसैन्येस्थितम
वनिपतिर्नापसंख्यांतरंसः॥३६॥सुराणांपातासौसपुनरति
पुण्यैकहृदयोग्रहस्तस्याःस्थानेगुरुरुचितमार्गेसनिरतः
॥करस्तस्यात्यर्थंवहतिशतकोटिप्रणयितांससर्वस्वंदाता
तृणमिवसुरेशंविजयते॥३७॥आलानंजयकुंजरस्यदृषदां
सेतुर्विपद्वारिधेःपूर्वाद्रिःकरवालचंडमहसोलीलोपधानंश्रि
यः॥संग्रामामृतसागरप्रमथनक्रीडाविधौमंदरोराजन्राजति
वीरवैरिवनितावैधव्यदस्तेभुजः॥३८॥अर्धदानववैरिणागिरि
जयाप्यर्धंहरस्याहृतंराजन्विश्वमनीश्वरंसमभवत्तावदाक
र्णय॥गंगावारिधिमंबरंशशिकलानागाधिपःक्ष्मातलंसर्वज्ञ
त्वमधीश्वरत्वमगमत्त्वांमांचभिक्षाशिना॥३९॥अशर्मदहन
ज्वलत्कटुकटाक्षरूक्षेक्षणाक्षपितशात्रवेजयतिसिंधुरा
धीश्वरे॥वयंनबहुमन्महेनिजभुजानमज्जोडीवत्सुतास्त्रशि
खिताडवज्वलितखांडवंपांडवं॥४०॥नालिंगतिकुचद्वयंभव
दिभप्रोत्तुंगकुंभद्वयत्रासाद्वेणिलतासुनैवदधतिप्रीतिंतवासि
त्रमात्॥भ्रूभगान्नभवदीयदुर्धरधनुर्भ्रांत्याभजंतेनतेवैरिस्त्री

णिभुजोनिजांबुजदृशांभूमंडलाखंडलः॥४१॥वक्षोंभोजेसरस्वत्यधिवसतिसदाशोणएवाधरस्तेवाहुःकाकुस्थवीर्यस्मृतिकरणपटुर्दक्षिणस्तेसमुद्रः॥वाहिन्यःपार्श्वमेताःकथमपिभवतोनैवमुंचंत्यभीक्ष्णंस्वच्छेतर्मानसेस्मिन्नूकथमवनिपतेतेंबुपानाभिलाषः॥४२॥मेदिन्यांविषमेषुरित्यनुदिनंशृंगारवीरोद्भटाचार्यःश्रीजगतीपतिःकमलदृक्कैर्नोमनोगीयते॥शय्यायांचरणंगणेचपतिताःसीदंतिनिश्चेतनाःकामिन्यश्चविरोधिनश्चशतशोयेनामुनाखंडिताः॥४३॥नक्षत्रभूःक्षत्रकुलप्रसूतेर्युक्तोनभोगैःखलुभोगभाजः॥सुजातरूपोपिनयातियस्यसमानतांकांचनकांचनाद्रिः॥४४॥राजानःशशिभास्करान्वयभुवःकेकेनसंजज्ञिरेभर्त्तारंपुनरेकमेवहिभुवस्त्वांवीरमन्यामहे॥येनांगंपरिमृद्यकुंतलमथाकृष्णब्युदस्यायतंचोलंप्राप्यचमध्यदेशमसत्कुलकांच्यांकरःप्रापितः॥४५॥केचिद्दूराःसहेलंनिजभवनगतामोचिताःकेपिकेचित्क्लेशात्क्लेशांतराणिक्षणमपिगमिताःकेपिनीतानिबंधं॥हत्वाहत्वाचकेचित्प्रतिपदमदयंप्रापिताव्यर्थभावंक्षोणीनाथस्यतस्योन्नतभुजपरिघेनारयःसारयश्च॥४६॥भूसंपर्करजोनिपातमलिनाःस्वस्वाद्गृहात्प्रच्युताःसामान्यैरपिजंतुभिःकरतलैर्निःशंकबुध्याधृताः॥संलग्नाःक्वचिदेकतामुपगताःक्वापिप्रबुद्धाःक्वचिन्मुक्ताःक्वापिचसारिवत्प्रतिगृहंभ्रांतास्तवारिस्त्रियः॥४७॥लावण्योकसिसमतापगरिमण्यग्रेसरेत्यागिनांदेवत्वय्यवनीभरक्षमभुजेनिष्पादितेवेधसा॥इंदुःकिंघटितःकिमेषविहितःपूषाकिमुत्पादितंचिंतारत्नमहोमुधैवकिमभीसृष्टाःकुलक्ष्माभृतः॥॥४८॥वेधावेदनयाक्लिष्टोगोविंदोपिगदान्वितः॥शंभुःशूलीविषादीचदेवकेनोपमीयसे॥४९॥लब्धार्धचंद्रईशःकृतकंसभयंचपौरुषंविष्णोः॥ब्रह्मापिनाभिजातःकेनोपमिमीमहेनृपभवंतं॥५०॥तृष्णापहारीविमलोद्विजावासोजनप्रियः॥ह्रदः

पद्माकरः किंतुवुधस्त्वंसजलाश्रयः ॥५१॥ सरलप्रियंगुणाढ्यं वितमालंबिचित्रतिलकंच॥ वनमिववपुस्तवैतत्कथमवनंपरिजनस्याभूत्॥५२॥ वाणकरवीरदमनकशतपत्रवंधुजीवकुसुमानि॥ नृपविविधविटपिरूपस्तथापिविटपः कथंनासि॥५३॥ सदाहंसालसंविभ्रन्मानसंप्रचरज्जलं॥ भूभृन्नाथोपिनायाति यस्यसाम्यंहिमालयः॥५४॥ दृष्ट्वामंडलमध्यलग्नमधुलिड्वृतंडुलक्षत्स्फुरत्तत्कोदंडलसल्लतेषुलहरीः कोनक्षमाखंडल॥ स्वारात्तांडवभागकांडवनभुग्धाराज्वलत्त्वांडुवक्रुध्यत्पांडवकांडवर्षमतुलंब्रह्मांडवर्त्मस्मरेत्॥५५॥ यद्पिकटकयात्रारोधिपाथोधिनातेदिशिदिशिममयत्नात्पारसीकक्षितीशा॥ तदपिकुरुसुधानोजीवितांतंनितांतंव्यथयतिबहुभार्यंनैकनारीवियोगः ॥५६॥ यस्योच्छिन्नानवेदामनसिसदयतादूषणानामभावोदक्षोदूरेणुदृष्याजहतिकठिनतांदानशक्तिर्गरिष्ठा॥ आधत्तेयश्चकुंदंशिरसिदरवतांयश्चदूरीकृतार्तिः सश्रीमान्वीरसिंहस्त्वमिवतवरिपुस्त्वदंभंप्रतीमः॥५७॥ अयेयदिसमीहसेपरपुरावरोधंसदासमाकलयमद्वचः किमपिरूपनारायण॥ प्रतीपनृपनागरीनयननीरकल्लोलिनीसमुत्तरणचातुरींतुरगराजमध्यापय॥५८॥ कालिंदिब्रूहिकुंभोद्भवजलधिरहंनामगृह्णासिकस्माच्छत्रोर्मेनर्मदाहंत्वमपिवद्तुकथंमत्सपत्न्याश्चनाम॥ मालिन्यंब्रूहिकिंतेप्रविरलविगलत्कज्जलैर्मालवीनांनेत्रांभोभिः किमासांसमजनिकुपितोगुर्जराणामधीशः॥५९॥ स्फम्यत्संस्पर्धिपृथ्वीपतिहृदयसरस्तोषशोषंदधानेत्वह्नोहंसास्कमत्तापेतपतिबहुगुणारामजामस्मितींद्र॥ सूर्योमित्रत्वमागात्समजनिदहनः कृष्णवर्त्मानिमज्जन्यारावारांवुपूरेनिवसतिवडवावन्हिरन्यत्किमुद्यां॥६०॥ क्वचिन्नेभोजनिर्व्याजंदूयंतृणकणायते॥ क्रोधेविरोधितासैन्यंप्रसादेकनकोच्चयः॥६१॥ ऐश्वर्यनहुषस्यशंभुविषयश्रद्धादशास्यस्यसाशौर्यश्रीरघुनायकस्यसहजं

गांभीर्यमंभोनिधेः॥ दातृत्वंबलिकर्णयोरिहजगत्येकत्रचे॰
त्स्यात्तदा श्रीवीरक्षितिपालमौलिनृपतेःसाम्यंकथंचिद्भवेत्॥
६२॥श्रीकंठासक्तहस्तोधिगनमणिगणःशैशवाभ्यस्तविद्योला
वण्यध्वस्तकामोकविजनमिलितोयौवना ह्यप्रकामः॥ आदत्त
क्षोणिदंडोद्विजवशकृतधीःकंकणाहारयुक्तःसश्रीमान्वीर
वीरत्वमिवतववरिपुस्तत्रमुक्तादिवर्णैः॥६३॥उच्चैःकल्याणवा
हीकरजितवसुधःसर्वदापूर्णकामोविख्यातःकर्णतुल्यानच
वचसिकटुश्चित्रपाकानुभावी॥कोपापेक्षीपरस्मादुचितव
हुकथस्तत्परःपुण्यलोकेचित्रंराजाधिराजत्वमिवनववरिपुस्त
त्रकंपंप्रतीमः॥६४॥लोकानांमानमात्रंमनुजजनरतिःस्कंस
स्फूटांघ्रिरक्षोराज्ञांमासत्वदक्षःकृतसमयमरामंडितोवीरवर्गैः
॥कायत्वि ण्मीनकेतुःकरकलितयवाकोषमानैर्विहीनःश्रीमही
राधिराजस्त्वमिवतववरिपुस्तत्रमंदंप्रतीमः॥६५॥वादानाशा
नुयुक्तोनगरकृतमतिर्यौवनाक्रांतदेहःसंग्रामप्राप्तधैर्योनवि
दलितरुचीराजलक्ष्मातिहीनः॥नित्यंदारासभस्थःप्रस्ववत
नुनिभोयःसभिक्षानुवर्त्तीश्रीमहीराधिराजत्वमिवतववरिपुस्त
त्रमुक्तादिवर्णैः॥६६॥ नानाभूषणभूषितःप्रतिभयापात्रंप्रभूत
स्थितिर्भार्यासक्तकरोभवाधिकरुचिर्भूरीकृताश्वद्विपः॥शश्व
त्संगतभासमानमुकुटोभिक्षप्रवृन्दादरस्त्वंराजेंद्ररिपुस्तवापि
नितरांभेदःपरंभेदकृत्॥६७॥प्रात्यावासकसज्जताप्रथमतस्त्वा
योद्धुमुत्कंठितायोधास्तेभिसृतामनागरिचमूस्वाधीननाथा॰
स्थिता॥भीत्याप्रोषितभर्तृकासमभवत्त्वत्सायकैःखंडितादू
रादंतरिताविधायकलहंहाविप्रलब्धाविधे॥६८॥शक्तिःसर्वा
तिरिक्ताविलसतिनचतेपीलुपाकप्रियत्वंवाक्यंधर्मेप्रमाणंस्वय
मपिरचितंनान्यईशोस्तिकश्चित्॥नोवायंभेदआस्तेक्वचिदपि
विषयेनैवमिथ्याप्रवादश्चित्रंपांडित्यमेतद्वहसिरघुपतेगौत॰
माद्यैरतर्क्यं॥ ६९ ॥ ॥प्रामाण्यंस्वतएवनेवपरतोविज्ञायते॰

मानताशाब्दस्यापियथार्थतास्त्कतिवचोराशेर्मनोवृत्तयः॥वि
श्वव्यापकतांगतोनचमहानन्योभ्रमःक्वापितेनास्त्येदेवमतं
किमस्तिभवतःशास्त्रेषुनज्ञायते॥७०॥शक्तिंप्रमापयतिवीरत
वोपमानंप्रामाण्यमात्तवचनेषुपरैवजातिः॥जातौगुणागुणगु
णाश्रयिणोविशेषावैशेषिकंकिमपिदर्शनमद्भुतंते॥७१॥अखं
डिताशक्तिरथोपमानंनस्वीकृतंनच्छलरीतिरस्ति॥अस्पृष्ट
संदेहविपर्ययस्यकोयंतवन्यायनयेनिवेशः॥७२॥प्रामाण्यंपरतः
स्वतोपिभवतोविज्ञायतेसम्मतेभूमींद्रप्रचुरक्षणस्थिरतयावर्णा
श्चिरंस्थापिताः॥सर्वज्ञैकसदीश्वरोपिनपरंब्रूतेभवानीश्वरं
तन्नैयायिकनायकस्यभवतोमीमांसकत्वंकुतः॥७३॥स्वांते
वैभवमस्तिनैवपरतःप्रामाण्यनिर्धारणंनैवातद्वतिनत्प्रकारकम
तिर्नैवोपमानंतव॥त्वद्देशेषुविभातिनच्छलकथानोवाक्वचित्सं
शयःश्रीवीरप्रथिताकथ्येषुनरियंनैय्यायिकत्वप्रथा॥७४॥स्व
तःप्रकाशोमनसोमहत्त्वंधर्मेषुशक्तिर्नतथान्यथाधीः॥भूपाल
गोपालपदैकभक्तेरन्यैवनैयायिकतातवेयं॥७५॥नलोपोव
र्णानांनखलुपरतःप्रत्ययविधिर्निपातोनास्त्येवक्वचिदपिनभ
ग्नाःप्रकृतयः॥गुणोवावृद्धिर्वासततमुपकारायजगतांमुनेर्द
क्षीपुत्रादपितवसमर्थःपदविधिः॥७६॥पूर्वत्रासिद्धबुद्धिर्द्वि
गुणितकरणेप्यस्तितेल्पप्रयत्नोयःकश्चिन्नैवलोपंभजतिबहु
तरापेक्षिणोप्यंतरंगाः॥नोबाबाधःपरेणक्वचिदपिविषयेनापवा
देगुणानांवृद्धीनांवर्णमात्रंसदनमितिनवोरामसाधुत्वमार्गः
॥७७॥उत्सर्गस्सन्नशिष्टाविविधगुणगणायत्रजातिप्रतिष्ठांबा
धेनप्राक्तनानांनचनियमविधिर्नापिसंख्यार्थदाने॥ऊहःसर्व
त्रयस्यस्फुरतिचसकलःसत्यएवार्थवादोमीमांसाभावमंचत्यभि
नवमधुनामूर्त्तिरेषात्वदीया॥७८॥विकृतिष्वपिकार्यमासजंते
नभजंतेपरमाश्रयंकदापि॥दधतेबहुकर्मभेदबुद्धिंफलवंतो
पिगुणाविचित्रमेतत्॥७९॥निखिलेषुगुणेषुचित्रतातेमनसो

भवमद्भुतंनवैव॥ नचतेपरतःप्रमाण भावस्तदपिन्यायनिविष्ट
तातिचित्रं॥८०॥मीमांसकोमहीपोयमन्यथाशक्तिमान्कथं॥
नैय्यायिकोपिस्यादेवपरशक्तेस्तुखंडनात्॥८१॥नमिथ्या
वादस्तेनचविगुणचर्चोस्त्वभिरतिर्नचावाच्यंकिंचिद्वचस्तिनम
नाड्माधिनिमतिः॥तथाप्येतच्चित्रंयदसिजगतीजानिरधुना
त्वमेवैकोलोकेनिगमपरभागार्थनिपुणः॥८२॥एकंवस्तुपद
स्तिविश्वजनतानंदप्रमोदात्मकंसत्यंतत्वमसीतिवाक्यमखि
लंत्वय्येवविश्राम्यति॥त्वामाकर्ण्यनकिंचिदन्यदवनीशृंगारभो
सन्मतेत्वय्यास्तेजनकादिकीर्त्तिजनकेकिंज्ञानमीमांसया॥८३
॥त्वद्रूपेषुयमो — जयेषुनियमोपातेस्थिरंचासनंश्वासोश्वास
विनिग्रहोगुणगणेप्रत्याहृतिःश्रीमतः॥ध्यानंमूर्त्तिनिधारणाच
धरणेधर्मेसमाधिर्यतस्तन्निर्विण्णहृदःकिमीश्वरपरेवांछतिपा
तेजले॥८४॥नानन्वयस्तेनचतेविरोधोऽलंकारकोटीतवनोप
मापि॥क्षितीशनोतेविषमंचकिंचित्साहित्यसौहित्यनिधिस्त
थापि॥८५॥प्रामाण्यंपरतोनशक्तिगणनासादृश्यलोपःसदा
कार्यंचेश्वरकर्तृनन्वनुमितौज्ञानंविशिष्टात्मकं॥सर्वंन्यायन
यानुसारिविबुधैचैतन्यनाशोपमान्नश्यन्तेन्मणिपालभूपभव
तोनैयायिकत्वंकुतः॥८६॥दृष्टांतोनसवास्तिवाचिनचतेसंदेह
लेशःक्वचिद्व्याजोक्तिर्नकदापिशास्त्रकलनेनैवानुमानेक्वचि॥
सामान्यंचविशेषवन्नयनुषेनास्सेपबुद्धिर्मनाकुव्याघातोपिनचा
मुरेप्यथकथंसाहित्यतर्कज्ञता॥८७॥नित्यंवृद्धिमुपैषिसंकल
यसेसर्वाःकलाःसर्वदासानंदंकुमुदाकरंवितनुषेनास्तेकलंकस्त
वा॥सर्वाशाःपरिपूरयन्समुदयंधत्सेऽनिशंसर्वतोनश्रीराजबहा
दुरेंद्रनृपतेचंद्राधिकस्त्वंकथं॥८८॥मेघोभातिजलेनगोस्तपय
सोविद्वन्मुखंभाषयातारुण्येनचकामिनीमधुरयावाण्यापिकः
खंजलात्॥मालिन्यान्नयनंश्रियाचसदनंतांबूलरागान्मुखंब्र
ह्मांडसकलंत्वयानरपतेभातिस्मचित्रंमहत्॥८९॥इतिश्री

वृहच्छार्ङ्गधरविरचितायांपद्धत्यांविशिष्टराजवर्णनपरिच्छेदः

अथरणवर्णनं

भवत्तुरगनिष्ठुरक्षुरदृढप्रतोचिताक्षणात्समरविच्युतप्रतिनृ
पालचेलांचिता॥इयंरणधराभवद्विरददानधाराजलैःकिमुत्त
णतलेपितंवसनपट्टयासिंचति॥१॥कृपाणकरिणानलंरुधिरनी
रपूरच्छटाजटाव्रततिसंकुलंभटतिमिंगिलैराकुलं॥प्रमथ्यसम
रार्णवंवरमकर्षिलक्ष्मीस्त्वयाविधायमदमेथरंमथनमंदरंसिंधु
रं॥२॥कोदंडंनददातिदेवभवतेकोदंडमातन्वतेकोनारातिमुपैति
पारमुदधेःकोनारुणेलोचने॥काकुंजांतरमेत्यचैरतरुणीकाकुं
नवाभाषतेराजन्नर्जतिवारणेतवपुनःकोवारणेवर्त्तता॥३॥क
रवारिरुहेणसंधुना नेतरवारिंनृपतौमुकुंददेवे॥वरयेत्समरा
वतीतरुण्यःप्रथमंकांचनपारिजातमालाः॥४॥प्रस्फुटद्दोर्दंडसं
डस्पवनमितरणच्चंडकोदंडदंडोन्मुक्तेषूच्छिन्नमूर्च्छत्प्रति
नृपतिभुजाखंडमुंडाचकीर्णा॥गायन्नृत्यत्प्रवल्गद्रजनिचरव
धूदत्ततालैःकरालैर्वेतालैरट्टहासप्रकटितदशनैर्युद्धभूर्भाति
भीम॥५॥रक्तंनक्तंचरौघःपिवन्निवमतिग्रस्तकुंतःशकुंतःक्रव्यं
नव्यंगृहीत्वाप्रणदतिमुदितोमत्तवेतालबालः॥क्रीडत्यक्रीडम
स्मिन्रुधिरमधुवशात्सूतनानूतनांगीयोगिन्योमांसमेदप्रमुदि
तमनसःसूरशक्तिंस्तुवंति॥६॥स्पष्टाकृष्टासिविष्टोत्कटकरटि
सटाकुंभकूटावटांतर्निर्य्यूतास्रकूतटिन्यास्तटनिकटरटत्कोण
पाताट्टहासा॥श्रीभोजत्वद्रणस्मासतभटविकटोरःस्थलत्रोट
कुप्यद्धोघचोटिकोटिप्रकट चटचटाशब्दरौद्राभवद्राक्।७॥

अथारिपलायनं

अधाक्षीन्नोलंकामयमयमुदन्वंतमतरहिशल्यंसौमित्रेरयमु
पनिनायौषधिवनं॥इतिस्मारंस्मारंत्वदरिनगरीभित्तिलिखितं
हनूमंतंदंतैर्दशतिकुपितोराक्षसगणः॥१॥कस्यापि॥राजन्राज
सुतानपाठयतिमांदेव्योपितूष्णींस्थिताकुब्जेभोजयमांकुमार

सच्चित्रैर्नोद्यापि किं भुज्यते ॥ इत्थं राजशुकस्तवारिभवने मुक्तोध्व
गैः पंजराच्चित्रस्थानि विलोक्य शून्यवलभावेकैकमाभाषते ॥२॥
कस्यापि ॥ कुरुवककराघातक्रीडासुखेन वियुज्यसे वकुलविट
पिन्स्मर्तव्यं ते मुखासवसेवनं ॥ चरणघटनावंध्यो यास्यस्यशो
कसशोकतामिति निजपुरत्यागे यस्य द्विषां जगदुस्त्रियः ॥३॥
रत्नाकरस्य ॥ क्रामंत्यः क्षतकोमलांगुलिगलद्रक्ताः सदर्भाः स्थ
लीः पादैः पातितयावकैरिव गलद्बाष्पांबुधौताननाः ॥ भीता भ
र्तृकरावलंबितकरास्त्वद्वैरिनार्योधुना दावाग्निं परितो भ्रमंति
पुनरप्युद्यद्विवाहा इव ॥४॥ कस्यापि ॥ क्षणं कांतारागप्रसर॰
विलसन्मानसरतिः क्षणं शालोत्संगं द्विजकुलरवाकृष्टहृदयः
॥ क्षणं पत्रध्वानश्रुतिपुलकितो यद्भयभराद्भ्रमन्नास्तेरण्ये रिपु
र्वनपालस्थितिमिव ॥५॥ वैद्यभानुपंडितस्य ॥ तन्वीमुज्झि
तभूषणं कलगिरं रोमोद्गमं बिभ्रतीं वेपंतीं व्रणिताधरां विवस
नां सीत्कारमातन्वतीं ॥ दोर्भ्यां चंडतुषारपातसभयामालिंग्य
कंठे भृशं स्वां मूर्तिं दयितामिवाग्निरसिकां त्वद्विद्विषः शेरते ॥६॥
यातीतः पांथ पथा व्रजति ननु कथं स्थावरं वर्त्म मुग्धे मार्गं पृच्छा॰
मि पृच्छ स्थितमिदमिह ते विस्मितं वीक्ष्य नेत्रे ॥ अध्वानं ब्रूहि पे
तध्वनि भवति वचश्चित्रमुद्दामनेत्राहृष्यं नेदावमूढा पथि पथि
कविटैस्त्वद्विषां नाथ नार्यः ॥७॥ भूसंपर्करजोनिपातमलिनाः स्व
स्थाकृष्टाश्च्युताः सामान्यैरपि जंतुभिः करतलैर्निःशेषमालिंगि
ताः ॥ संलग्नाः क्वचिदेकतामुपगताः क्वापि प्रवृद्धाः क्वचित्स्फुटाः
क्वापि च सारवसति गृहं राजंस्त्वदारिस्त्रियः ॥८॥ सालकामानसु
त्कापि सालकाननवर्जिता ॥ हारावरुद्धकंठापि विहारारिवधूस्त
व ॥९॥ स्वांते सीमंतरत्ने मरकतिनिन्हते हेमताटंकपत्रे लुप्तासं
मेखलायां काणिकमणि तुलाकोटियुग्मे गृहीते ॥ शोणं बिंबोष्ठका
त्यात्वदरिमृगदृशामित्वरीणामरण्ये राजन्गुंजाफलानां स्त्र
ज इति शबरा नैव हारं हरंति ॥१०॥ केषामप्येते ॥ कर्षद्भिः सिच

पांचलान्यतिरसात्कुर्वद्भिरालिंगनंगृह्लानैःकचमालिहद्भिर
धरंविभ्रामयद्भिःक्रो॥प्रत्यक्षेपिभवद्विरोधिनृपतेरंतःपुराणा
महोधिकूकष्टंविटपैर्विटैरिववनेकिंनामनोचेष्टितं॥११॥धन
ददेवानां॥त्वद्वैरिणोवीरपलायितस्यप्रकाशयन्त्यक्रमरण्यं
मार्गान्॥कृशानुरासीदभिनंदनीयस्तुंगेषुलग्नेनिजमंदरेषु
॥१२॥राजन्द्विषस्तेभयविद्रुतस्यभालस्थलंकंटकिनोवनां
तः॥अद्यापिकिंवानुभविष्यतीतिविपाटयन्त्यष्टमिवाक्षराणि
॥१३॥स्नाताःप्रावृषिवारिवाहपटलैःप्रोद्भूतदूर्वांकुरव्याजेना
त्तकुशाःप्रणालसलिलैर्दत्वानिवापांजलीन्॥प्रासादास्तववि
द्विषांपरिपतत्कुड्यस्यपिंडस्थलात्कुर्वंतिप्रतिवासरंनिजपति
प्रेतायपिंडक्रियाः॥१४॥केषामप्येते॥मौलिंमानविधिंविनान
मयितुंहारंस्वयंगुंफितुंनिर्यातुंदयितस्यपाणिकमलच्छायां
विनावर्त्मनि॥निद्रातुंचविनांकपालिशयनंद्रष्टुंचशून्यादिशः
सख्यात्वत्प्रतिवीरनीरजमुखीसाकूतमध्याप्यते॥१५॥अये
मातस्तातःक्वगतइतियद्वैरिशिशुनादरीगेहलीनानिभृतमि
हपृष्टास्वजननी॥करेणास्यंतस्यद्रुतमथनिरुध्याश्रुसृतया
विनिश्वस्यस्फारंशिवशिवदृशैवोत्तरयति॥१६॥अलसभुजल
ताभिर्नादृतोनागरीभिर्भवनदमनकानांनातिथिर्वाबभूव॥त्व
दरिनगरमध्येसंचरन्चैत्रजन्माजरदजगरपीतःसीयतेगंध
वाहः॥१७॥त्वद्वैरिभवनलिखितांसीतामाहर्तुमुद्यतस्य॥कोण
कपिमंडलयोःशिवशिवभूयोभवतिसंरंभाः॥१८॥हस्तीव
न्यःस्फटिकघटितेभित्तिभागेस्वबिंबंदृष्ट्वादृष्ट्वाभ्रमतिगजइति
त्वद्विषांमंदिरेषु॥दंताघाताद्दलितदशनस्तेषुनवीस्यसद्यो
मंदंमंदंस्पृशतिकरिणीशंकयाविक्रमार्क॥१९॥मुखेहारावा
प्तिर्नयनयुगलेकंकणभरोनितंबेपत्रालीसतिलकमभूत्पाणि
युगलं॥अरण्येश्रीकर्णत्वदरियुवतीनांविधिवशादपूर्वोयंभू
पाविधिरहहजातःकिमधुना॥२०॥सिंजानेमंजरीतिस्तनकल

शयुगंचुंबितंचंचरीकैस्त्रासोल्लासलोलाःकिसलयमनसापाणयःकीरदष्टः॥नल्लोपापाल्लपंस्यःपिकनिनदधिपाताडिताःकाकलोकैरित्थंराजेंद्रसिंहत्वदरिमृगदृशांनाप्यरण्यंशरण्यं।२१ प्राप्तास्त्रासासिपासातिशयमुपगताःपातुमारण्यमंभोयुष्मद्विद्वेषियोषाःश्वसितसमुदयैस्तत्तदीयैरशोषि।एतत्तंवीक्ष्यमूर्छानिपतिततनवोनैवजीवेयुरेताश्चिंतोपेताःशबर्योनिजनयनजलैःपल्वलंपूरयेयुः॥२२॥गांधारागुप्तदारास्त्वयिचलतिगलद्वाष्पधाराविह्वारारागरत्रासान्वगाराःक्षितिपकुलमणेर्गुर्जराजजेशाः।तैलंगास्त्यक्तलिंगास्त्रिभुवनतिलकक्लिश्यदंगाःकलिंगामोरंगा मुक्तरंगासपदिसमभवन्वीरगंगाविहंगाः॥॥२३॥वीरत्वद्वैरिदारागहनगिरिगुहागव्हरांतस्तमिस्रंलत्रासाद्गुह्यवासादरकलितत्वद्दोयद्यदेवप्रपन्नाः॥तत्तज्ज्योऽत्स्नायमानंधरणिपरिवृढप्रेक्ष्ययुष्मद्यशोभिःसद्योमोहांधकारानुसरणशरणावासरान्वाहयंति॥२४॥वीरश्रीक्षोणिपालत्वद्विहितभवनेसंचरंतीकिरातीकीर्णान्यालोक्यरत्नान्युरुतरखदिरांगारशंकानिलांगी॥मुक्ताश्रीखंडखंडंतदुपरिमुकुलीभूतनेत्राधमंतीश्वासामोदानुयातैर्मधुकरनिकरैर्धूमशंकांबिभर्त्ति॥२५॥त्वदरिनृपतिमाशावाससंधूलिधाराधवलमहहभिक्षुंवीक्ष्यभर्गभ्रमेण॥सुरभिरुदधिवेलाकाननंगाहमानोदिशऽतिकुसुमवाणंदूरतोनिर्गमाय॥२६॥ घ्रातंतालफलाशयास्तनतटंबिंबभ्रमेणाधरोदृष्टःपाकविदीर्णदाडिमधियालीढाःस्फुरंतोरदाः॥भ्राम्यंतीभ्रमनिस्पृहानुविपिनंत्वद्वैरिसीमंतिनीनिद्राणामुहुराहतामुहुरपिक्षिप्ताचशाखामृगैः॥२७॥वीरसिंहारिनारीणामंजनाक्ताश्रुबिंदवः॥उरोजेपतितारेजुःसरोजेमधुपाइव॥॥२८॥ अनारतपरिस्रवलन्नयनवारिधाराशतप्रवृद्धपथनिम्नगासलिलरुद्धयानोद्यमा॥त्वदीयरिपुकामिनीबहुविदेशमानेषिणीविनिंदतिवलंदशागुरुरूपाश्रुषंमारुषं॥२९॥सालकानन

शुक्तापिसालकाननवर्जिता॥ह्लारावरुद्धकंठापिद्विहाशारिवधूस्तव॥३०॥स्वकांतद्वकांतारोयद्वैरिसुदृशामभूत्॥जघनस्तनमुच्चैर्योब्यलिखत्कंटकैर्नखैः॥३१॥कीर्त्यापारंप्रयांत्यावरममचरमंलंमितेनप्रतापाद्ध्रीनांशोषवार्तांस्वसद्सिनिभृतंकेनचित्कापिलीलां॥लक्ष्म्याकोशेह्लिनासौवरमसिसुधयाकामधेन्वाकटाक्षैकोपेक्ष्वेडेनशश्वद्द्युशशिवशशिनावारिणाह्लारिनेत्रे॥३२॥एतद्भीतारिनारीगिरिबिलविगलद्धासरानिष्पतंतीसंक्रीडाहंसमोहग्रहिलशिशुभृशप्रार्थितोन्निद्रचंद्रा॥आक्रंदद्भूरिन्नत्तयनतलमिलच्चंद्रहंसानुबिंबप्रत्यासत्तिप्रतृष्यत्तनयविहसितैराश्वसीन्यश्वसीश्च॥३३॥अपर्णेयंभूभृद्वनमटतिवल्कांबरधराजटालोदिग्वासाःशिखरिणिशिवोयंनिवसति॥इतिभ्रांत्यान्योन्यंक्षणमिलितयोःक्षोणितिलकद्विषद्दंपत्योस्तेशिवशिवशिवेतिप्रणतयः॥३४॥मृगःप्रमीललोचनःपिकःस्तुतोक्तिमोचनःश्रितानतिःस्कृतानतिर्मरालिकास्खलद्गतिः॥निरीक्ष्यतेलसन्मनेस्कमल्लशाहभूपतेतवारिकामिनीवृथाद्भुतंद्रुताटवीयया॥॥३५॥पलायितातवारिवामलोचनायदातदापुलिंदनायकैःसुलिप्तकालकूटसायकैः॥विहायनासिकासुमौक्तिकंस्रजंचमौक्तिकींविलुंठिताःपुमर्थपंचमेहमल्लभूपते॥३६॥आदायादायमुक्तास्तद्वुशिखिधियादायमाणिक्यसर्वंधूमभ्रांतिंवहंत्यःस्ववदनमल्लामोदलुब्धालिवृंदे॥पत्तुंभिल्यःप्रवृत्ताःसरभससमसकृद्यत्तद्विषत्पत्नेषुभ्रूमःकिंकीर्त्तिपूरंधवलितवसुधंमल्लशाहस्यतस्य॥॥३७॥इतिश्रीवृहच्छार्ङ्गधरविरचितायांप॰अरिपलायनपरिच्छेदः

अथप्रतापवर्णनं

अस्युक्तौयदिनप्रकुप्यसिमृषावादंतचेन्मन्यसेतद्भूमोद्भुतदर्शनेनरसनाकेषांनकेडूयते॥देवत्वत्तरुणप्रतापदहनज्वालावलीशोषिताःसर्वेवारिधयस्तवारिवनितानेत्रांबुभिःपूरिताः॥१॥क्षोणीकामनिजामशाहभवतःप्रौढैःप्रतापानलैर्द्रागेवद्रवरूपतामुप

गतेचामीकराणांचये॥अश्रयद्वासवधामधोरणिमुहुर्मज्जद्ग्रहग्रामणित्रस्यत्कामिनिनिःपतद्वनित्तलंमेरोःसमुन्मीलति॥ २॥ कीर्त्तौव्याप्तिमवेत्यवैरिवनिताबाष्पोदधेःसाधनादुत्तुंगेपृथिवीभुजांपरिवृढेशश्वद्विपक्षेस्थितं॥सर्वक्ष्मापतिमौलिमंडनमणेश्रीरामचंद्रप्रभोचित्रंपश्यतवप्रतापदहनंजानंतिसत्ताकिंकाः॥३॥प्रत्यर्थिवामनयनानयनांबुपूरैःसद्यःस्खलद्बहलकज्जलजालनीलैः॥पुष्णस्त्वत्तापतपनस्तपनाद्यवीयानारभ्यतेयदमुनायमुनासहस्रं॥४॥लंकाधामनिवीरभानुनृपतेःप्रेक्ष्यप्रतापोदयंप्रत्यागारमधीरनीरजदृशोभूयोहुताशभ्रमात्॥क्षुभ्यद्घ्राणिविधूतपाणिविगलन्मुक्तामणिप्रस्खलद्बाष्पश्रेणिविलोलवेणिदयितंकंठस्थलेविभ्रति॥५॥ मार्तंडमंडलसमंभवतःप्रतापंयेवर्णयंतिनहितेकवयःप्रवीणाः॥अंभोनिधौविलयमेतिपरंपतंगःपारंप्रयातिजलधेस्तु तवप्रतापः॥६॥श्रीमद्वीराधिवीरपृथुतरमहसस्त्वत्प्रतापाग्निकीलाज्ज्वलाब्धेःशोषवार्त्ताशरणमनुगतःकुत्रचित्कश्चिदेव॥चंद्रःकौर्मीसकुधास्येत्रिदशतरुवरःपाणिपद्मेचकोशेलक्ष्मीःक्ष्वेडंचकोपेजलधरकुसुमंवैरिकांतादृगंते॥७॥त्वत्प्रतापस्यभानोश्चअंतरंमहदंतरं॥सच्छत्रान्नबाधतेपूर्वोविच्छत्रान्बाधतेपरः॥८॥

अथकीर्तिवर्णनम्

चंद्रंचंद्रार्धचूडंचतुरुदधिचयंचंद्रिकांचंद्रकांतंचार्वंगीलोचनांतंचमरसहचरीवालभारोच्चयंच॥खर्वीकुर्वंतिदर्वीकिरतिलकमपिध्वस्तगुर्वीतिभातिस्वर्वीथिप्रस्थितारेदलयतिगृहिणीत्वद्यशस्तोमसोमाः॥१॥ इंदुंनिंदतिचंदनंनसहतेविद्वेष्टिपंकेरुहंहारंभारमवैतिनैवकुरुतेकर्पूरपूरेमनः॥स्वर्गंगामवगाहतेहिमगिरिंगाढंसमालिंगतेत्वत्कीर्त्तिर्विरहातुरेवनमनागेकत्रविश्राम्यति॥२॥ कीर्त्तिस्तेधनिकाधनंमधुरिमातस्याधमर्णासुधासीतांशुःप्रतिभूस्तदर्थनकृतेसैषादिवंधावति॥सालीनात

ववाचिवीरनृपतेचंद्रोनिरंध्रिध्वनिःशंकातंकभृदंशुकावृततनु
र्नक्तंपरिभ्राम्यति॥३॥ धीरक्षीरसमुद्रसांद्रलहरीलावण्य
लक्ष्मीजुषस्त्वत्कीर्तेस्तुलनांमृगांकमलिनोदत्तांकथंचंद्रमाः॥
स्यादेतत्वद्रातिसौधशिखरप्रोद्भूतदूर्वांकुरग्रासव्यग्रमतिःप
तेवदिपुनस्तस्यांकशायीमृगः॥४॥राजेतिक्षणदाकरंविजय
तेदानोरुलक्ष्मीरितिस्वर्णागंबहुवाहिनीपतिरितिक्षीरोदमा
स्कंदति॥दुर्गाधीशइतिस्फुटंपुररिपुंविद्वेष्टिभोगोद्भटश्रीरित्य
हेतिवासकिंस्वयशसादिल्लींद्रचूडामणिः॥५॥मन्येरण्येकु
लगिरिगुहागव्हरेपर्यटंतीविद्राद्भैःकिमपिचरणेवीरवर्यस्य
कीर्तिः॥इंदौकुंदेकुमुदमुकुलेचामरेचंदनेवादत्वादत्वामृदुनि
पुरतःपादमेषाग्रयाति॥६॥यस्यक्षोणिपतेर्विहायसियशोराशौ
चमत्कुर्वतिद्राक्कर्पूररजोभ्रमेणवणिजोवीथीमुपस्कुर्वते॥चं
चुंचंचलयंतिचंद्रकिरणभ्रांत्याचकोराःपयोबुध्याव्योम्निनियो
जयंतिकलशीमानीयवामभ्रुवः॥७॥कर्पूरादपिकेतकादपिदल
त्कुंदादपिस्वर्नदीकल्लोलादपिकैरवादपिचलत्कांतादृगंतादपि॥
दूरोन्मुक्तकलंकशंकरशिरःशीतांशुखंडादपिस्वेनाभिस्त्वत्की
र्त्तिभिर्धवलितासमग्रार्णवामेदिनी॥८॥विद्वद्गोष्ठीगरिष्ठमतिभटर
मनश्रीनिजामप्रतीमःकृत्वात्वत्कीर्त्तिगाथांवहन्तिगणविधिंपद्य
योनिःकठिन्या॥वक्रालेखागुरूणाममृतकरकलांकेचुमल्लीमरा
लाःस्युर्व्हालेखामधूनांविसभुजगनभोनिम्नगादंतिदंताः॥९॥
त्वत्कीर्तिमौक्तिकफलानिगुणेस्त्वदीयैःसंदर्भितुंत्वदरिवामदृ
शःप्रवृत्ताः॥नांतोगुणेषुनचकीर्तिपुरंध्रलेशोहारोनजातइति
नाश्चमिथोहसंति॥१०॥देवत्वद्यशसासदासुमहसागीर्वाण
वृंदेखिलेशंभोर्भावममवापिढेतुसहसायत्कौतुकंतच्छृणु॥सा
कूताःसकुतूहलाःसचलिताःसोत्कंठिताःसाद्भुताःसाशंकाश्च
मुहुर्मुहुर्मेधुरिपोर्लक्ष्म्यादृशःपातिताः॥११॥किंशीतांशुमरीचयः
किमुसुरस्रोतस्विनीवीचयःकिंवाकेतकसूचयःकिमथवाचंद्रोप

लानांचयः॥ इत्थंजातकुतूहलाभिरभितःसानंदमालोकिताःको
ताभिस्त्रिदिवौकसांदिशिदिशिक्रीडंतियत्कीर्तयः॥१२॥ क्षीरोदी
यंतिसद्यःसकलजलधयोवासुकीयंतिनागाःकैलासीयंति
शैलादिविचदिविषदःशंकरीयंतिसर्वे। पौष्माकीणेसमंतात्प्रस
रतिनितरांदेवकीर्त्तिप्रतानेसद्योषाकाचभूषास्तदपिनसहसा
मौक्तिकीयंतिसद्यः॥१३॥ वापीपातालमूलंजलमुरगनदीक
च्छपःस्वच्छकंदःशेषोनालंदलानांवितसिरपिफणाःकर्णिका
शैवशैलः॥ तारास्तारापरागामधुचमधुमतीकेसरादंतिदंता
त्तस्मिंस्त्वत्कीर्त्तिपद्मेभ्रमतिमधुकरःशार्वरीसार्वभौमः॥१४॥
अनुक्षणमनुक्षणंक्षितिपरक्ष्यमाणात्वयाप्रयातिविदिशोदश
प्रबलकीर्तिरेकाकिनी॥ इयंनियतमर्थिषुप्रतिदिनंवितीर्णोरसा
जहातिनतवांतिकंद्वितयमेतदत्यद्भुतं॥१५॥ पृथ्वीपतेश्शुभम
तेभवतोभवस्यब्रूमोवयंस्फुयशसाकियदंतरंवा॥ गौरीचकार
गिरिशोनिजमर्धमेगंगौरीकृतंतुभवताभुवनंसमस्तं॥१६॥ ए
कादशरुद्राणामेकागौरीत्यनौचितींमत्वा॥ राघवनृपतवयश
सादशापिगौरीकृताहरितः॥१७॥ त्वत्कीर्त्तिराजहंस्यावैरिवधू
वदनभाजनस्थमपि॥ पीतंहासक्षीरंव्यक्तीकृतमश्रुनीरंच॥१८
अंतःसंतोषबाष्पैःस्थगयतिनदृशस्ताभिराकर्णयिष्यंनंगेनान
त्तिरोमारचयतिपुलकश्रेणिमानंदकंदा॥ नक्षोणीभंगभीरुः
कलयतिचशिरःकंपनंतन्नविद्मःशृण्वन्नेतस्यकीर्त्तीःकथमुर
गपतिःप्रीतिमाविष्करोति॥१९॥ समुन्नतघनस्तनस्तवकचुंबितुं
बीफल क्वणन्मधुरवीणयाविबुधलोकवामभ्रुवा॥ त्वदीयमुप
गीयतेहरकिरीटकोटिस्फुरत्तुषारकरकंदलीकिरणपूरगौरंयशः
॥२०॥

अथकीर्तिप्रतापौ

गुणाधारेगौरेयशसिपरिपूर्णेविलसतिप्रतापोवाभिन्नान्दहति
तवभूमींद्रतिलक॥ नवैवद्व्याणीत्यकथयदहोमूढतमधी
श्चतुर्धातेजोपिव्यभजतकणादःकथमसौ॥१॥ कीर्त्यास्यचंद्रक

रकोमलयातिशरभ्रंशोणंनवार्ककिरणप्रतिमप्रतापैः॥श्यामद्यु
तिद्विषदकीर्त्तिमयी — भिरित्थंचित्रंतदंवरमराजतदिग्वधूनां
॥२॥क्षितिपकिमपिचित्रंजागरूकेपिशुभ्रयशसिशशिरुकंवेलप्र
तापेऽर्कबिंबे॥नयनकुवलयानित्वद्विषत्कामि — नीनामपि
चवदनपद्मान्याशुयत्संकुचंति॥३॥इतिकीर्तिप्रतापौ॥छ॥॥

अथमृगया

मेदश्छेदकृशोदरंलघुभवत्युत्थानयोग्यंवपुःसत्वानामपिल
क्ष्यतेविकृतिमच्चित्तंभयक्रोधयोः॥उत्कर्षःसचधन्विनांयदिष
वःसिध्यंतिलक्ष्येचलेमिथ्यैवव्यसनंवदंतिमृगयामीदृग्वि
नोदःकुतः॥१॥चंद्रोनेनकलंकितोवततवनेरामोऽमुनावंचितः
किंचानेनकुलांगनानयनयोर्लावण्यलक्ष्मीर्हृता॥शास्यानाम
भिधासकस्यभवतःश्रीरुद्रचंद्रप्रभोतन्मन्येहरिणस्यहंतहन
नायाखेटकोपक्रमः॥२॥शंकुव्याकीर्णरंकुद्रुतनिशितशरक्षु
ण्णदिव्यंतरक्षुःस्वाघोषस्तब्धकंठीरववरचकितव्यस्तमातंग
यूथं॥खड्गव्यालूनकंठंतुमुलकलकलभ्रांतकूजच्छकुंतंभल्ल
ध्वस्ताच्छ——————भल्लंवनभुविमृगयाकर्मतेनप्रते
ने॥३॥निहतनिहततूर्णंधत्तधत्तत्वराभिर्मिलतमिलतकेके
कुत्रकुत्रप्रयांति॥इतइतइतएतेयांतियांतीत्यरण्यादतुलकल
कलश्रीःसर्वतःप्रादुरासीत्॥४॥हरिण्यहरिणग्राममाचक्राम
हुताशनः॥इंदोःक्रोडमृगंधर्त्तुमिवधूमोनभोययौ॥५॥इति॰॥

अथराजसेवकः

ऐश्वर्यादनपेतमीश्वरमयंलोकोऽर्थतःसेवतेतंगच्छंत्यनुयेविप
त्तिषुपुनस्तेतत्प्रतिष्ठाशया॥भर्त्तुर्येप्रलयेपिपूर्वसुकृतासंगेन
निःसंगयाभक्त्याकार्यधुरंवहंतिकृतिनस्तेदुर्लभास्त्वादृशाः॥१॥
अप्राज्ञेनचकातरेणचगुणःस्याद्भक्तियुक्तेनकःप्रज्ञाविक्रमशा
लिनोपिहिभवेत्किंभक्तिहीनात्फलं॥प्रज्ञाविक्रमभक्तयःसमुदितायेषां
गुणाभूपतेतेभृत्यानृपतेःकलत्रमितरेसंपत्सुचापत्सुच॥२॥

अथराजयात्रावर्णनं

श्रीमद्वीरमहीमहेन्द्र भवतः प्रस्थानकालोद्भवद्वादित्रध्वनिभीत
भानुहरयोन्मार्गं वरं प्रागमन्॥ तस्मिन्नेव मुपद्रवे किलविपर्यस्ते
समस्तै रवेर्युग्याः सप्तरथ्यांगमेकमपदं सूतश्चिराद्दुद्भ्रमः ॥१॥
त्वयि प्रचलति प्रभो तुरगवल्गना सुस्कु - - - - - - - -
रद्दूरावलयधूलिभिः सकलमेवकीर्णं नभः॥ दिवाकरहयावली
निरवलंबसंचारतः श्रमापनयनाय किं वसुमतीयमूर्ध्वंगता ॥२॥
गर्वग्रंथिलगुर्जरज्वरकरः कर्णाटकर्णाटवी दावाग्निर्द्रविडेंद्रवी
र्यदलनो गौडेंद्रनिद्राहरः॥ हम्मीरप्रमदामदालसलसद्धून
र्तनस्तंभनः प्रस्थाने तव वीरडिंडिमचमत्कारः समुज्जृंभते॥३॥
अंगाः संजातभंगा वनवनवसतिप्राप्तरंगाः कलिंगास्तैलंगाः
स्वर्गगंगाऽभिषवणमतयः श्रीर्यदंगाश्च वंगाः॥ लाटाः स्विद्य
ल्ललाटाः पदगमनदृढाश्वासलोलाश्च चोला जायंते श्रीनिः
जामपृथुरणभवतः प्रौढनिःसाणनादात्॥४॥ देवेदिग्विज
योद्यते धृतधनुः प्रत्यर्थिसीमंतिनी वैधव्यव्रतदायिनि प्रतिदि
शं कुहूपरिभ्राम्यति॥ आस्तामन्यनितंबिनीरतिरपि प्रायोनपे
क्ष्यं करे भर्तुर्धर्तुमदान्मदांधमधुपीनीलीनिचोलं धनुः॥५॥ दे
वत्वद्विजयोद्यमे हरिखुरव्रातक्षतक्ष्मातलात्प्रोद्यन्नाद्रजः परा
गपटले दिक्चक्रमाक्रामति॥ अक्ष्णां पंक्तिशतानि निंदति नि
जं हस्तद्वयं निंदति स्वां निंद्यनिमेषतां परिपतद्बाष्पांबुधारो
हरिः॥६॥ कांचीं कांचीनधत्ते कलयति न दृशा केलितल्पं कलिं
गीसिंदूरं दूर एव क्षिपति करतलन्यस्तमांध्रीपुरंध्री॥ सौराष्ट्री
मार्ष्टि भूयः सपदि नयनयोरक्तता रक्तिमानं कार्णाटी कर्णिकायां
मलिनयति मनो मानसिंहप्रयाणे॥७॥ हारानाहरदेवचंद्रवद
नान्नोचैस्तयोधस्तटी संभाषेत पिमत्तवारणगणैर्मज्जाद्विराक्षो
भितं॥ सिंदूरारुणमंबुमेघपटली पीतोज्झितं शुक्तिषु स्वल्पैरे
वद्दिनैः करिष्यति महीमाता प्रमुक्ताफलं॥८॥ अटत्कटकघोट

कंप्रकटटापटंकारवच्चटच्चटदितिस्फुटत्स्फुटतिमेदिनीखर्परं॥निजामधरणीपतौवलतिकौतुकाडंबरादिदंभुवनमंडलंदरदरीदरीदर्त्यहो॥९॥ घुष्मद्घातिजिताजिराजिचरणक्षेपक्षतैर्मोहिनींसंक्षुक्षोणिमवेक्ष्यसिंचतिघनैर्भर्नानदीनांजलैः॥ आशामंडलमुत्कटध्वजपटैर्वातंननोतिद्रुतंचंचच्चंचलरेणुराशिवनमिवाशीघ्रंदिवंगच्छति॥१०॥धूर्ताधोरणदेववासवकरीपंकेनलिप्तःकथंनीतःस्वर्गतरंगिणीजलमसौतत्रास्तिपंकःकुतः॥सर्वाशाविजयोत्सवंप्रतिकृतोद्योगेधराधीश्वरेस्फायत्तेकरिकर्णतालपवनोद्भूताश्वभूरेणवः॥११॥चोलीचोलीननुकलयतेगुर्जरीजर्जरांगीभूर्जाक्रांतंविशतिविपिनंमालवीमालवीथीं॥नोसंगीतंरचयतिमनागंगवंगीकृशांगीनांगीरागंरहसितनुतेभूपतेत्वत्प्रयाणे॥१२॥दृप्यद्वैरिकरींद्रसिंहशरदिल्लज्जैत्रपात्रोद्यमेमेघास्त्वार्थितमिंद्रचापमहसाविद्युद्द्युचागर्जिते॥श्यामत्वेनचदृष्टिभिर्धनुषितेखड्गेचभेर्याःरिपोर्वक्त्रेतल्लसनादृशोस्थितमतीत्याश्चर्यमाकर्ण्यतां॥१३॥इ०

अथराजनीतिः

राजास्यजगतोवृद्धेर्हेतुर्वृद्धाभिसंमतः॥नयनानंदजनकःशशांकइववारिधेः॥१॥धार्मिकंपालनपरंसम्यक्परपुरंजयं॥राजानमभिमन्यंतेप्रजापतिमिवप्रजाः॥२॥पर्जन्यइवभूतानामाधारःपृथिवीपतिः॥विकलेपिहिपर्जन्येजीव्यतेनतुभूपतौ॥३॥प्रजांसंरक्षतिनृपःसावर्धयतिपार्थिवं॥वर्धनाद्रक्षणंश्रेयस्तन्नाशेन्यत्सदप्यसत्॥४॥आत्मानंप्रथमंराजाविनयेनोपपादयेत्॥ततोमात्यांस्ततोभृत्यांस्ततःपुत्रांस्ततःप्रजाः॥५॥राज्ञिधर्मिणिधर्मिष्ठाःपापेपापाःसमेसमाः॥लोकास्तदनुवर्ततेयथाराजातथाप्रजा॥६॥नृपाणांचनराणांचउभयोस्तुल्यमूर्तिता॥आधिक्यंतुक्षमाधैर्येमाज्ञादानेपराक्रमः॥७॥सदानुरक्तप्रकृतिःप्रजापालनतत्परः॥विनीतात्मानरपतिर्भूयसींश्रियमश्नुते

॥८॥प्रजांनरंजयेद्यस्तुराजारक्षादिभिर्गुणैः॥अजागलस्तनस्येव
तस्यराज्यंनिरर्थकं॥९॥अजामिवप्रजांहन्याद्योमोहात्पृथिवी
पतिः॥तस्यैवजायतेतृप्तिर्द्वितीयस्यकथंचन॥१०॥प्रजापीडन
संतापात्समुद्भूतोहुताशनः॥राज्ञःकुलंश्रियंप्राणान्नादग्ध्वाविनि
वर्तते॥११॥यथाबीजांकुरःसूक्ष्मःप्रयत्नेनाभिवर्द्धितः॥फलप्रदो
भवेत्कालेतद्वल्लोकःस्तुरक्षितः॥१२॥हिरण्यधान्यरत्नानिस्त्रियो
वारणावाजिनः॥तथान्यदपियत्किंचित्प्रजाभ्यःस्यान्महीपतेः॥१३
॥उत्खातान्प्रतिरोपयन्कुसुमितांश्चिन्वंल्लघून्वर्धयन्नत्युच्चान्न
मयन्पृथूंश्चलघयन्विश्लेषयन्संहतान्॥क्षुद्रात्कंटकिनोब
हिर्नियमयन्स्वारोपितान्पालयन्मालाकारइवप्रयोगनिपुणोरा
जाचिरंतिष्ठति॥१४॥अकृत्वानिजदेशस्यरक्षांयोविजिगीषते
॥सनृपःपरिधानेनवृतमौलिःपुमानिव॥१५॥विजिगीषुररिर्मि
त्रंपार्ष्णिग्राहोथमध्यमः॥उदासीनोन्तरांतर्धिरित्येषानृपतेः
स्थितिः॥१६॥निर्विषोपियथासर्पोफणाटोपैर्भयंकरः॥तथाडंब
रवान्राजानपरैरभिभूयते॥१७॥पुष्पैरपिनयोद्धव्यंकिंपुनर्निशि
तैःशरैः॥जयेभवतिसंदेहःप्रधानपुरुषक्षयः॥१८॥भूमिर्मित्रंहि
रण्यंवाविग्रहस्यफलत्रयं॥नास्त्येकमपियद्येषांनतुकुर्यात्कथं
चन॥१९॥साम्नैवहिप्रयोक्तव्यमादौकार्यंविजानता॥साम्नासिद्धा
निकार्याणिविक्रियांयांतिनक्वचित्॥२०॥नविश्वसेदमित्रस्य
मित्रस्यापिनविश्वसेत्॥विश्वासाद्भयमुत्पन्नंमूलान्यपिनिकृं
तति॥२१॥शपथैःसंधितस्यापिनविश्वासंव्रजेद्रिपोः॥राज्यलो
भाद्यतोवृत्रःशक्रेणशपथैर्हतः॥२२॥उपकारगृहीतेनशत्रुणा
शत्रुमुद्धरेत्॥पादलग्नंकरस्थेनकंटकेनैवकंटकं॥२३॥नोपे
क्षितव्योविद्वद्भिरामयोरिरवज्ञया॥वह्निरल्पोपिसंवृद्धःकुरुते
भस्मसाद्वनं॥२४॥कौर्मसंकोचमास्थायप्रहारानपिमर्षयेत्॥
कालेकालेचमतिमानुत्तिष्ठेत्कृष्णसर्पवत्॥२५॥तस्माद्भयाद्धिभेत
व्यंयावद्भयमनागतं॥आगतंतुभयंदृष्ट्वाप्रहर्तव्यमभीतवत्॥२६॥

परोपिहितवान्बंधुर्बन्धुरप्यहितःपरः॥अहितोदेहजोव्याधिर्हि
तमारण्यमौषधं॥२७॥यच्छक्यंग्रसितुंग्रासंग्रस्तंपरिणमेच्चयत्
॥हितंचपरिणामेस्यात्तदद्यंभूतिमिच्छता॥२८॥मातातस्माहसं
काशैर्विभवैर्गर्वमागतः॥स्वगात्राण्यपिभारायभवंतिहिविपर्यये॥
॥२९॥मात्वंतातबलेस्थित्वाबाधिष्ठादुर्बलंजनं॥नहिदुर्बलदग्धा
नांकुलेकिंचित्प्ररोहति॥३०॥यातिमिथ्याभिभूतानांपतंत्यश्रूणि
रोदतां॥तानिसंतापकान्घ्नंतिसपुत्रपशुबांधवान्॥३१॥ब्राह्मणेषु
चयेशूराःस्त्रीषुजातिषुगोषुच॥वृंतादिवफलंपक्वंधृतराष्ट्रपतंति
ये॥३२॥देवब्रह्मस्वपुष्टानिसेन्यानिपृथिवीपतेः॥युद्धकालेविशी
र्यंतेसैकतेसेतवोयथा॥३३॥प्रणीतश्चाप्रणीतश्चयथाग्निर्दैवतं
महत्॥एवंविद्वानविद्वांश्चब्राह्मणोदैवतंपरं॥३४॥अदैवंदैवतं
कुर्याद्दैवतंवाप्यदैवतं॥ब्राह्मणालोकपालांश्चसृजेयुरतिकोपि
ताः॥३५॥युगेयुगेचयेधर्मास्तेषुधर्मेषुयेद्विजाः॥तेषांनिंदानकर्त
व्यायुगरूपाहितेद्विजाः॥३६॥आक्रम्यब्राह्मणैर्भुक्तंपरिक्षीणै
श्चबांधवैः॥गोभिश्चनृपशार्दूलराजसूयाद्विशिष्यते॥३७॥गतश्री
र्गणकान्द्वेष्टिगतायुश्चचिकित्सकान्॥गतश्रीश्चगतायुश्चब्राह्म
णान्द्वेष्टिभारत॥३८॥बुद्धौकलुषभूतायांविकारेप्रत्युपस्थिते॥
अनयोनयसंकाशोहृदयान्नापसर्पति॥३९॥नकालःखड्गमुद्य
म्यशिरःकृंततिकस्यचित्॥कालस्यबलमेतावद्विपरीतार्थदर्श
नं॥४०॥ज्ञानन्नपिजनोदैवात्प्रकरोतिविगर्हितं॥नकर्मगर्हितं
लोकेकस्यचिद्रोचतेकृतं॥४१॥मातातसंपदामग्रमारूढोस्मी
तिविश्वसीः॥दूरारोहपरिभ्रंशविनिपातोतिदारुणः॥४२॥कितवा
यंप्रशंसंतियंप्रशंसंतिचारणाः॥यंप्रशंसंतिबंधक्यःसपार्थपुरुषा
धमः॥४३॥राजानोयंप्रशंसंतियंप्रशंसंतिवैद्विजाः॥साधवोयंप्र
शंसंतिसपार्थपुरुषोत्तमः॥४४॥प्रज्ञागुप्तशरीरस्यकिंकरिष्यं
तिसंहताः॥गृहीतहस्तच्छत्रस्यवारिधाराइवारयः॥४५॥बहूना
मप्यसाराणांसमुदायोहिदारुणः॥राज्ञाभृत्याःप्रकर्तव्यास्तेहिसर्व

क्रियास्समाः॥४६॥तृणैरावेष्ट्यतेरज्जुस्तयानागोहिबध्यते॥एवंज्ञात्वानरेंद्रेणभृत्याकार्याविचक्षणाः॥४७॥कुलीनाःशौर्यसंपन्नाभग्नाःशास्त्रसमाहृताः॥महावृष्टिंसमुदितातृणराशिंव्यपोहनत्॥॥४८॥ताडितोपिदुरुक्तोपिदंडितोपिमहीभुजा॥नचिंतयतियःपापंसभृत्योर्होमहीभुजां॥४९॥योनाहूतःसमभ्येतिद्वारेतिष्ठतिसर्वदा॥पृष्टःसत्यंमितंब्रूतेसभृत्योर्होमहीभुजां॥५०॥सालस्यंसुखंक्रूरंस्तब्धंव्यसनिनंशठं॥असंतुष्टमभक्तंचत्यजेद्भृत्यंनराधिपः॥५१॥रिक्ताःकर्मणिपटवस्तृप्तास्त्वलसाभवंतिभृत्याये॥तेषांजलौकसामिवपूर्णानांरिक्तताकार्या॥५२॥क्रूरंव्यसनिनंलुब्धमप्रगल्भंभयाकुलं॥मूर्खमन्यायकर्तारंनाधिपत्येनयोजयेत्॥॥५३॥नयोगिभिर्विनाराज्यंनास्तिभूपेहिकेवले॥तस्मादमीविधातव्यारक्षितव्याःप्रयत्नतः॥५४॥वेदवेदांगतत्वज्ञोजपहोमपरायणः॥आशीर्वादपरोनित्यमेषराजपुरोहितः॥५५॥क्रमागतोहितमतिःसर्वभावपरीक्षकः॥धीरोयथोक्तवादीचएषदूतोविधीयते॥५६॥प्रवीणोवाक्पटुर्धीमान्स्वामिभक्तश्चनिस्पृहः॥अलुब्धःसत्यवादीचएषशासनलेखकः॥५७॥मेधावीवाक्पटुर्धीमांल्लघुहस्तोजितेंद्रियः॥शब्दशास्त्रपरिज्ञाताएषलेखकउच्यते॥५८॥इंगिताकारतत्त्वज्ञोबलवान्प्रियदर्शनः॥समयज्ञःस्वामिभक्तःप्रतीहारःसउच्यते॥५९॥शूरोर्थशास्त्रनिपुणःकृतशास्त्रकर्मासंग्रामकेलिचतुरश्चतुरंगयुक्तः॥भर्तुर्निदेशवशगोभिमतश्चनंत्रेसेनापतिर्नरपतेर्विजयागमाय॥६०॥काणाःकुब्जाश्चषंढाश्चतथावृद्धाश्चपंगवः॥एतेस्वांतःपुरेनित्यंनियोक्तव्याःक्षमाभृता॥६१॥सिद्धान्नमिवराजेंद्रसर्वसाधारणास्त्रियः॥पुरोक्षेचसमक्षेचरक्षितव्याःप्रयत्नतः॥६२॥सूक्ष्मेभ्योपिप्रसंगेभ्योरक्ष्यानार्योहिसर्वदा॥द्वयोर्हिकुलयोःशोकमावहेयुररक्षिताः॥६३॥महिष्यात्हृष्टयाभाव्यंगृहकार्येषुदक्षया॥सुसंस्कृतोपस्करयाव्ययेचामुक्तहस्तया॥६४॥धर्मशास्त्रा

र्थेकुशलाःकुलीनाःसत्यवादिनः॥समाःशत्रौचमित्रेचनृपतेःस्युः
सभासदः॥६५॥नसासभायत्रनसंतिवृद्धावृद्धानतेयेनभवंति
धर्मं॥नासौधर्मोयत्रनैवास्तिसत्यंनतत्सत्यंयच्छलेनानुविद्धं॥६६
सभावानप्रवेष्टव्यावक्तव्यंनासमंजसं॥अब्रुवन्विब्रुवन्वापिनरः
किल्बिषमश्नुते॥६७॥तस्मात्सभ्यःसभांगत्वारागद्वेषविवर्जि
तः॥वचस्तथाविधंब्रूयाद्ययाननरकंव्रजेत्॥६८॥मातापिता
गुरुर्भ्राताभार्यापुत्रःपुरोहितः॥नादंड्योनामराज्ञोस्तिस्वधर्मे
योनुतिष्ठति॥६९॥अवध्योब्राह्मणोबालःस्त्रीतपस्वीचरोगवा
न्॥क्रियंतेव्यंगताह्येषांततोदोषैर्नलिप्यते॥७०॥नतुहन्यान्म
हीपालोदूतंकस्यांचिदापदि॥दूतान्हत्वातुनरकमाविशेत्सचिवैः
सह॥७१॥विशोधयेन्म हीपालोमंत्रिशालामशेषतः॥अयुक्तो
नार्हतिस्थातुमस्यांमंत्ररहस्यवित्॥७२॥मंत्रतंत्रांतरप्रीतिर्देश
कालोचितस्थितिः॥यस्त्वराज्ञिभवेद्भक्तःसोमान्यःपृथिवीपतेः॥
॥७३॥अंतःसारैरकुटिलैःसुस्निग्धैःसुपरीक्षितैः॥मंत्रिभिर्धार्य
तेराज्यंसत्स्तंभैरिवमंदिरं॥७४॥नरपतिहितकर्त्ताद्वेष्यतांयाति
लोकेजनपदहितकर्त्ताप्युच्यतेपार्थिवेन्द्रैः॥इतिमहतिविवादेव
र्तमानेसमानेनृपतिजनपदानांदुर्लभःकार्यकर्त्ता॥७५॥षट्कर्णो
भिद्यतेमंत्रश्चतुःकर्णःस्थिरोभवेत्॥द्विकर्णस्यतुमंत्रस्यब्रह्मा
प्यंतंनगच्छति॥७६॥एकंहन्यान्नवाहन्यादिषुर्मुक्तोधनुष्मता॥
बुद्धिर्बुद्धिमतायुक्ताहंतिराज्यंसनायकं॥७७॥नतद्रथैर्ननागेंद्रै
र्नहयैर्नचपत्तिभिः॥कार्यंसंसिद्धिमभ्येतियथाबुध्याप्रसाधितं॥
॥७८॥दुर्योधनःसमर्थोपिदुर्मंत्रीप्रलयंगतः॥राज्यमेकश्चकारो
च्चैःसुमंत्रीचंद्रगुप्तकः॥७९॥अशृण्वन्नपिबोद्धव्यंमंत्रिभिःपृथि
वीपतिः॥यथास्वदोषनाशायविदुरेणांबिकासुतः॥८०॥पृष्टोब्रूते
हितंब्रूतेपरिणामेसुखावहं॥मंत्रीचेत्प्रियवक्तास्यात्केवलंसरि
पुःस्मृतः॥८१॥सुलभाःपुरुषाराजन्सततंप्रियवादिनः॥अप्रिय
स्यचपथ्यस्यवक्ताश्रोताचदुर्लभः॥८२॥दुर्गाणिराज्ञाकार्याणि

सजलानिदृढानिच॥द्रव्यमन्नंचतेष्वेवस्थापनीयंप्रयत्नतः॥
॥८३॥दुर्गंबहुविधंज्ञेयंपर्वतस्यजलस्यच॥प्राकारस्यवनस्या
पिभूमेरपिभवेत्क्वचित्॥८४॥नगजानांसहस्रेणनरथैर्नैववा
जिनां॥तथासिध्यंतिकार्याणियथादुर्गप्रभावतः॥८५॥विषं
हीनोयथानागोमदहीनोयथागजः॥सर्वेषांपश्यतांयातिदुर्गही
नश्चभूपतिः॥८६॥शतमेकोहिसंधत्तेदुर्गस्थोहिधनुर्द्धरः॥त
स्माद्दुर्गंप्रशंसंतिनीतिशास्त्रविदोजनाः॥८७॥एकःशतंयोधय
तेप्राकारस्थोधनुर्धरः॥शतंसहस्राणितथासहस्रंलक्ष्यमेवच
॥८८॥त्रिविधाःपुरुषाराजन्नुत्तमाधममध्यमाः॥नियोजयेत्तथै
वैतांस्त्रिविधेष्वपिकर्मसु॥८९॥तुल्यार्थंतुल्यसामर्थ्यंमर्मज्ञं
व्यवसायिनं॥अर्धराज्यहरंभृत्यंयोनहन्यात्सहन्यते॥९०॥नि
र्विशेषंयदाराजासमंभृत्येषुतिष्ठति॥तत्रोद्यमःसमर्थानामुत्सा
हःपरिहीयते॥९१॥प्रसादोनिष्फलोयस्ययस्यक्रोधोनिरर्थकः
॥नतंभर्तारमिच्छंतिपतिंवृद्धमिवांगनाः॥९२॥त्यजेत्स्वामिन
मत्यग्रमत्यग्रात्कृपणंत्यजेत्॥कृपणाद्विशेषज्ञंतस्माच्चकृ
तनाशकं॥९३॥अविवेकिनिभूपालेनश्यंतिगुणिनांगुणाः॥प्रवा
सरसिकेकांतेयथासाध्व्यास्तनोन्नतिः॥९४॥किंसुकेकिंशुकःकु
र्यात्फलितेपिबुभुक्षितः॥अदातरिसमृद्धेपिकिंकुर्युरुपजीवि
नः॥९५॥सेवयाधनमिच्छद्भिःसेवकैःपश्ययत्कृतं॥स्वातंत्र्यं
यच्छरीरस्यमूढैस्तदपिहारितं॥९६॥वरंवनेफलंभैक्ष्यंवरंभा
रोपजीवनं॥पुंसांविवेकहीनानांसेवयानधनार्जनं॥९७॥जीवं
तोपिमृताःपंचव्यासेनपरिकीर्तिताः॥दरिद्रोव्याधिनोमूर्खःप्र
वासीनित्यसेवकः॥९८॥नकश्चिच्चंडकोपानामात्मीयोनामभू
भृतां॥होतारमपिजुह्वंतंदहत्येवहुताशनः॥९९॥गृध्राकारो
पिसेव्यःस्याद्धंसाकारैःसभासदैः॥हंसाकारोपिसंत्याज्योगृध्रा
कारैःसभासदैः॥१००॥चक्रंसेव्यंनृपःसेव्योनसेव्यःकेवलो
नृपः॥पश्यचक्रस्यमाहात्म्यंमृत्पिंडःपात्रतांगतः॥१॥गंतव्यारा

जसभाद्रष्टव्याराजपूजितालोकाः॥ यद्यपिनभवेत्यर्थास्तथाप
नर्थाविनश्यंति॥२॥ अत्यासन्नविनाशायदूरतश्चाफलप्रदाः॥
मध्यभावेनसेव्यंतेराजावन्हिर्गुरुःस्त्रियः॥३॥ आसन्नमेवनृ
पतिर्भजतेमनुष्यंविद्याविहीनमकुलीनमसंगतंवा॥प्रायेणभू
मिपतयःप्रमदालताश्चयःपार्श्वतोभवतितंपरिवेष्टयंति॥४॥
यस्मिन्नेवाधिकंचक्षुरारोपयतिपार्थिवः॥कुलीनेवाकुलीने
वासश्रियोभाजनंभवेत्॥५॥ धवलान्यातपत्राणिवाजिनश्चम
नोरमाः॥ सदामत्ताश्चमातंगाःप्रसन्नेसतिभूपतौ॥६॥राजा
मातरिदेव्यांचकुमारेमुख्यमंत्रिणि॥पुरोहितेप्रतीहारेसमंवर्ते
तराजवत्॥७॥ यत्राहवेषुबध्यंतेसामर्थ्यमपराङ्मुखाः॥ वि
कटैरायुधैर्यांतितेस्वर्गेयोगिनोयथा॥८॥ पदानिक्रतुतुल्या
निआहवेष्वनिवर्त्तिनां॥राजासुकृतमादत्तेहतानांविपलायिनां
॥९॥ तथाहवादिनंक्लीबंनिर्हंतिपरमांगतिं॥नहन्याद्विनिवृत्तं
चयुद्धप्रेक्षणमागतं॥१०॥द्विजाअपिनगच्छंतियांगतिंनापियो
गिनः॥स्वाम्यर्थेसंत्यजन्प्राणांस्तांगतिंयातिसेवकः॥११॥राज
तुष्टोपिभृत्यानांमानमात्रंप्रयच्छति॥तेपिसंमानमात्रेणप्राणैः
प्रत्युपकुर्वते॥१२॥सारासारपरिच्छेत्तास्वामीभृत्यस्यदुर्लभः॥अ
नुकूलःशुचिर्दक्षःप्रभोर्भृत्योहिदुर्लभः॥१३॥ अतितेजस्व्यपिनृ
पःपानासक्तोनसाधयत्यर्थान्॥तृणमपिदग्धुमशक्तोवडवाग्निः
संपिबन्नब्धिं॥१४॥ पानभक्षास्तथानार्योमृगयागीतवादिने॥ए
तानियुक्त्यासेवेतप्रसंगोयत्रदोषवान्॥१५॥ नृपःकामासक्तोग
णयतिनकार्यंनचहितं यथेष्टंस्वच्छंदश्चरतिकिलमत्तोगजइव॥
ततोमानाध्मातःपततितुयदाशोकगहनेतदामात्येदोषान्क्षिप
तिननिजंवेत्यविनयं॥१६॥गुणवदगुणवद्वाकुर्वताकार्यजातंप
रिणतिरवधार्यायत्नतःपंडितेन॥ अतिरभसकृतानांकर्मणा
माविपत्तेर्भवतिहृदयदाहीशल्यतुल्योविपाकः॥१७॥आयाच्चतु
र्थभोगेनव्ययंकर्मप्रवर्तयेत्॥प्रभूततैलदीपोहिचिरंभद्राणिपश्यति॥

॥१८॥ अर्थानामर्जनंकार्येवर्धनंरक्षणंतथा ॥ भक्ष्यमाणोनिराद्यासुमेरुरपिहीयते ॥१९॥ कर्मणामनसावाचाचक्षुषाचचतुर्विधं ॥ प्रसादयतिलोकंयस्तंलोकोनुप्रसीदति ॥२०॥ संयोजनंसंकथनंसंप्रश्नोथसमागमः ॥ ज्ञातिभिःसहकार्याणिनविरोधःकदाचन ॥२१॥ संहतिःश्रेयसीराजन्विगुणेष्वपिबंधुषु ॥ तुषेणापिपरित्यक्तानप्ररोहंतितंडुलाः ॥२२॥ मृदोःपरिभवोनित्यंवैरंतीक्ष्णस्यनित्यशः ॥ उत्सृज्यतद्द्वयंतस्मान्मध्यांवृत्तिंसमाश्रयेत् ॥२३॥ अबुद्धिमाश्रितानांचक्षंतव्यमपराधिनां ॥ नहिसर्वत्रपांडित्यंसुलभंपुरुषेक्वचित् ॥२४॥ तेजस्विनिक्षमोपेतेनातिकर्कशमाचरेत् ॥ अतिनिर्मथनादग्निश्चंदनादपिजायते ॥२५॥ किमप्यसाध्यंमहतांसिद्धिमेतिलघीयसां ॥ प्रदीपोभूमिगेहांतर्ध्वांतंहंतिनभानुमान् ॥२६॥ अरावप्युचितंकार्यमातिथ्यंगृहमागते ॥ छेत्तुमप्यागतेच्छायांनोपसंहरतेद्रुमः ॥२७॥ हंतुमेघोपसरतिमृगेंद्रःसंकुचत्यपि ॥ बुद्धिमंतःसहंतेचनिधायत्हृदिकिंचन ॥२८॥ व्रजंतितेमूढधियःपराभवंभवंतिमायाविषुयेनमायिनः ॥ प्रविश्यहिघ्नंतिशठास्तथाविधानसंवृतांगानिशिताइवेषवः ॥२९॥ कोहंकोदेशकालौसमविषमगुणाःकेरयःकेसहायाः काशक्तिःकोभ्युपायःफलमिहचकियत्कीदृशीदैवसंपत् ॥ संपत्तौकोनिबंधःप्रविदितवचनस्योत्तरंकिंनुमेस्यादित्येवंकार्यसिद्धाववहितमनसोहस्तगाःसंपदःस्युः ॥३०॥ स्वधर्मेराघवश्चैवस्वधर्मेदशकंठकः ॥ एवंवदंतिलोकाश्चयतोधर्मस्ततोजयः ॥३१॥ धर्मःप्रागेवचिंत्यःसचिवगतमतीसर्वदालोकनीयोप्रच्छाद्यौरोषरागौमृदुकठिनरसौयोजनीयौचकाले ॥ ज्ञेयंलोकानुवृत्तंवरचरनयनैर्मंडलंवीक्षणीयमात्मायत्नेनरक्ष्योरणशिरसिपुनःसोपिनापेक्षणीयः ॥३२॥ क्रतौविवाहेव्यसनेरिपुक्षयेयशस्करेकर्मणिमित्रसंग्रहे ॥ प्रियासुनारीष्वधनेषुबंधुषुधनव्ययस्तेषुनगण्यतेबुधैः ॥३३॥

स्वाम्यमात्यश्चराज्यंचकोशोदुर्गवलंसुहृत्।।एतावदुच्य
तेराज्यंसत्वबुद्धिव्यपाश्रयं।।३४।।संधिविग्रहयानानिसंस्थितिः
संश्रयस्तथा।।द्वैधीभावश्चभूपानांषड्गुणाःपरिकीर्तिताः।।३५
उत्साहस्यप्रभोर्मंत्रस्यैवंशक्तित्रयंजगुः।।आत्मनःसुहृदश्चै
वतन्मित्रस्योदयास्त्रयः।।३६।।सामदानेभेददंडावित्युपायच
तुष्टयं।।हस्त्यश्वरथपादाताःसेनांगंस्याच्चतुष्टयं।।३७।।दु
ष्टाविनीतशत्रूणांभयकृद्बंधुसन्निभं।।शस्त्रधारणमोज्यस्यंरक्षो
विघ्नक्रुद्धापहं।।३८।।वर्षानिलरजोधर्महिमादीनांनिवारणं।।रा
ज्यलक्ष्मीगृहंवर्ण्यंचक्षुष्यंछत्रधारणं।।३९।।चामरंश्रीकरंदिव्यं
राज्यशोभाकरंपरं।।सिंहासनंसुस्वैश्वर्यकरंलोकानुरंजनं।।४०।।
सुमनोवररत्नानांधारणंदिव्यरूपकृत्।।पापलक्ष्मीप्रशमनंचं
दनाद्यनुलेपनं।।४१।।स्नानंनाममनःप्रसादजननंदुःस्वप्नवि
ध्वंसनंशौचस्यायतनंमलापहरणंसंवर्धनंतेजसां।।रूपोद्यो
तकरंरिपुप्रमथनंकायाग्निसंदीपनंनारीणांचमनोहरंश्रमहृ
रंस्नानेदशैतेगुणाः।।४२।।तांबूलंमुखरोगनाशिनिपुणंसंवर्ध
नंतेजसोनित्यंजाठरवह्निवृद्धिजननंदुर्गंधदोषापहं।।वस्त्रा
लंकरणंप्रहर्षजननंविद्वन्नृपाग्रेरणेकामस्यायतनंसमुद्भवक
रंलक्ष्म्याःसखस्यास्पदं।।४३।।देवतातिथिविप्राणांपूजनंपाप
नाशनं।।लोकद्वयेपिशुभकृद्दानंधर्मयशस्करं।।४४।।सुतभृ
त्यसुहृद्वैरिस्वामिसद्गुरुदैवते।।एकैकोत्तरतोवृद्ध्याश्रीकराः
पत्रमूर्धनि।।४५।।मध्येभानोस्तुमाणिक्यंपूर्ववज्रंतुभार्गवे।।चं
द्रस्यमुक्ताआग्नेयांयाम्यांविद्रुमभूमिजे।।४६।।नैरृत्यांराहुगो
मेदंपश्चिमेमंदनीलकं।।वायव्येकेतुवैडूर्यंपुष्परागंगुरूत्तरे।।४७
।।मारकतंबुधेशानेस्थापनीयंविचक्षणैः।।एतल्लक्षणसंयुक्ता
मुद्रादारिद्र्यनाशिनी।।४८।।माणिक्यंतरणेस्तथातिविमलंमुक्ता
फलंशीतगोर्माहेयस्यचविद्रुमंमरकतंसौम्यस्यरागोत्तमं।।दे
व्यस्यचपुष्परागमुदितंशुक्रस्यवज्रंशनेर्नीलंनिर्मलमन्ययो

श्वगदितेगोमेदवैडूर्यके॥४९॥ एतेनानाग्रंथान्॥ ॥ ॥
राजानंप्रथमंविंदेत्ततोभार्यांततोधनं॥ राजन्यसतिलोकेस्मिन्
कुतोभार्याकुतोधनं॥५०॥पर्जन्यइवभूतानामाधारःपृथिवीपतिः
॥विकलेऽपिहिपर्जन्येजीव्यतेनतुभूपतौ॥५१॥ यःकुलाऽभिजना
ऽचारैरतिशुद्धःप्रतापवान्॥धार्मिकोनीतिकुशलःसस्वामीयु
ज्यतेभुवि॥५२॥कथंनामनसेव्यंतेयत्नतःपरमेश्वराः॥अचिरेणै
वयेतुष्टाःपूरयंतिमनोरथान्॥५३॥सुहृदामुपकारकारणात्
द्विषतामप्यपकारकारणात्॥ नृपसंश्रयइष्यतेबुधैर्जठरंको
नबिभर्त्तिकेवलं॥५४॥ बालोऽपिनाऽवमंतव्योमनुष्यइतिभूमि
पः॥ महतीदेवताह्येषानररूपेणतिष्ठति॥५५॥यस्यप्रसादेपद्मा
ऽस्तेविजयश्चपराक्रमे॥ मृत्युश्चवसतिक्रोधेसर्वतेजोमयोहिसः
॥५६॥ यस्मिन्नेवाऽधिकंचक्षुरारोहयतिपार्थिवः॥सुतेऽमात्ये
ऽप्युदासीनेसलक्ष्म्याऽऽश्रीयतेजनः॥५७॥ राजन्दुधुक्षसियदिक्षि
तिधेनुमेतां तेनाऽद्यवत्समिवलोकममुंपुषाण॥तस्मिंश्चस
म्यगनिशंपरितुष्यमाणेनानाफलैःफलतिकल्पलतेवभूमिः॥
॥५८॥सत्याऽनृताचपरुषाप्रियवादिनीचहिंस्रादयालुरपिचा
र्थपरावदान्या॥नित्यव्ययाप्रचुरनित्यधनाऽऽगमाचवेश्यांगने
वनृपनीतिरनेकरूपा॥५९॥ आज्ञाकीर्त्तिःपालनंब्राह्मणानांदानं
भोगोमित्रसंरक्षणंच॥ येषामेतेषड्गुणानप्रवृत्ताःकोऽर्थस्तेषां
पार्थिवोपाश्रयेण॥६०॥ राजंस्त्वद्दर्शनेनैवगलंतित्रीणितत्क्षणा
त्॥रिपोःशस्त्रंकवेर्दैन्यंनीवीबंधोमृगीदृशां॥६१॥बहुधाराज्य
लाभेनयस्तोषस्तवभूपते॥बहुधाराऽन्यलाभेनसतोषोममभू
पते॥६२॥राजसेवामनुष्याणामसिधाराऽवलेहनं॥पंचाननपरि
ष्वंगोव्यालीवदनचुंबनं॥६३॥इच्छेद्यस्तुसुखंनिवस्तुमवनौग
च्छेत्सराज्ञःसभांकल्याणींगिरमेवसंसदिवदेत्कार्येविदध्यात्कृती
॥अक्लेशात्धनमर्जयेदधिपतेरावर्जयेद्वल्लभान्कुर्वीतोपकृतिंजन
स्यजनयेत्कस्यापिनाऽप्रक्रियां॥६४॥अयुक्तंयुक्तंवायदभिहितम

ज्ञेनविभुनासक्तयाद्येतन्नित्यंजडमपिगुरुंतस्यविनुयात्॥विविक्तैर्नैस्पृह्यंकथमपिसभायामभिनयेत्स्वकार्यंसंतुष्टेक्षितिभृतिरहस्येवकथयेत्॥६५॥ सिध्यंतिकर्मसुमहत्स्वपियन्नियोज्याः संभावनागुणमवेहितमीश्वराणां॥ किंवाऽभविष्यदरुणस्तमसांवधायतंचेत्सहस्रकिरणोधुरिनाःकरिष्यत्॥६६॥ आलोकांतप्रतिहततमोवृत्तिरासांप्रजानांतुल्योद्योगस्तवचसवितुश्चाधिकारोमतोनः॥तिष्ठत्येकःक्षणमधिपतिर्ज्योतिषांव्योममध्येषष्ठेकालेत्वमपिलभसेदेवविश्रांतिमन्हः॥६७॥ भुजंगभोगसंक्रांताकलत्रंतवमेदिनी॥ अहंकारःपरांकोटिमारोहतिकुतस्तव॥६८॥अचिराधिष्ठितराज्यःशत्रुःप्रकृतिष्वरूढमूलत्वात्॥नवसंरोपणशिथिलस्तरुरिवसुकरःसमुद्धर्तुं॥६९॥ सम्प्रतिबंधकार्यंप्रभुरधिगंतुंसहायवानेव॥दृश्यंतमसिनपश्यतिदीपेनविनासचक्षुरपि॥७०॥ भोगिनःकंचुकाःसक्ताःक्रूराःकुटिलगामिनः॥सुदुष्टामंत्रसाध्याश्चराजानःपन्नगाइव॥७१॥ अकस्माद्द्वेष्टियोभक्तमाजन्मपरिसेवितं॥ नव्यंजनेरुचिर्यस्यत्याज्योनृपइवातुरः॥७२॥ धर्मःप्रागेवचिंत्यःसचिवमतिगतिर्भावनीयासदैवज्ञेयालोकानुवृत्तिर्वरचरनयनैर्मंडलंवीक्षणीयं॥ प्रच्छाद्यौरागरोषौमृदुपरुषयुतौवर्जनीयौचकालेस्वात्मायत्नेनरक्ष्योरणशिरसिपुनःसोपिनावेक्षणीयः॥७३॥ मित्रंस्वच्छतयारिपुंनयबलैर्लुब्धंधनैरीश्वरंकार्येणद्विजमादरेणयुवतिंप्रेम्णाशनैर्बांधवान्॥अत्युग्रंस्तुतिभिर्गुरुंप्रणतिभिर्मूर्खंकथाभिर्बुधंविद्याभीरसिकंरसेनसकलंशीलेनकुर्याद्वशं॥७४॥ तुल्यार्थंतुल्यसामर्थ्यंमर्मज्ञंव्यवसायिनं॥अर्धराज्यहरंभृत्यंयोनहन्यात्सहन्यते॥७५॥इतिश्रीवृहच्छार्ङ्गधरविरचितायांपद्धत्यांराजनीतिपरिच्छेदः॥७॥

अथसामान्यनीतिः

अनुगंतुंसतांवर्त्मकृत्स्नंयदिनशक्यते॥ ॥स्वल्पमप्यनुगंतव्यंमार्गस्थोनावसीदति॥१॥प्रत्यहंप्रत्यवेक्षेतनरश्चरितमात्मनः॥

किन्नमेपशुभिस्तुल्यंकिंतुसत्पुरुषैरिति॥२॥सद्भिरेवसहासी
तसद्भिःकुर्वीतसंगतिं॥सद्भिर्विवादंमैत्रींवानासद्भिःकिंचिदाचरे
त्॥३॥नद्विषंतिनयाचंतेपरनिंदांनकुर्वते॥अनाहूतानचायां
तितेनाश्मानोनदेवताः॥४॥पठतोनास्तिमूर्खत्वंजपतोनास्ति
पातकं॥मौनिनःकलहोनास्तिनभयंचास्तिजाग्रतः॥५॥गतेपि
वयसिग्राह्याविद्यासर्वात्मनाबुधैः॥यद्यपिस्यान्नफलदासुल
भासान्यजन्मनि॥६॥यदीच्छसिवशीकर्तुंजगदेकेनकर्मणा
॥परापवादसस्येभ्योगांचरंतींनिवारय॥७॥वाङ्माधुर्याद्या
तिलोकेप्रियत्वंवाक्पारुष्याद्यातिलोकेप्रियत्वं॥किंतद्द्रव्यंको
किलेनोपनीतंकोवालोकेगर्दभस्यापराधः॥८॥यस्यचाप्रिय
मन्विच्छेत्तस्यकुर्यात्सदाप्रियं॥व्याधामृगवधंकर्तुंगीतंगायं
तिसुस्वरं॥९॥प्रहरिष्यत्प्रियंब्रूयात्प्रहृत्वापिप्रियोत्तरं॥अपि
चास्यशिरःछित्वानुशाच्छोचेत्तथापिच॥१०॥अनागतविधा
तारमप्रतीकारकोपनं॥स्थिरारंभंवदान्यंचनरंश्रीरुपतिष्ठते
॥११॥सुमंत्रितेसुविक्रांतेसुकृतेसुविचारिते॥प्रारंभेकृतबुद्धी
नांसिद्धिरव्यभिचारिणी॥१२॥नालसाःप्राप्नुवंत्यर्थान्नशठान
चमानिनः॥नचलोकरवाद्भीतानचशश्वत्प्रतीक्षिणः॥१३॥
नोदन्वानर्थितामेतिसचांभोभिःप्रपूर्यते॥आत्मातुपात्रतांनेयः
पात्रमायांतिसंपदः॥१४॥सर्वथास्वहितमाचरणीयंकिंकरिष्य
तिजनोबहुजल्पः॥विद्यतेनहिसकश्चिदुपायःसर्वलोकपरि
तोषकरोयः॥१५॥काकतालीययोगेनयदनात्मवतीक्षणं॥
करोतिप्रणयंलक्ष्मीस्तदस्याःस्त्रीत्वचापलं॥१६॥योयमर्थंप्रा
र्थयतेयदर्थंघटतेपिच॥अवश्यंतदवाप्नोतिनचेच्छांतोनिवर्त्त
ते॥१७॥केचिदज्ञानतोनष्टाःकेचिन्नष्टाःप्रमादतः॥केचिज्ज्ञा
नावलेपेनकेचिन्नष्टैस्तुनाशिताः॥१८॥मित्रस्वजनबंधूनांबु
द्धेर्धैर्यस्यचात्मनः॥आपन्निकषपाषाणेनरोजानातिसारतां॥
॥१९॥दुःस्थैरपिनिजैरेवप्रारब्धंतंसर्वमुत्तमं॥वृत्तंजीर्णावरेवापि

ह्लृदृकार्पटमर्हति॥२०॥चिंतनीयाहिविपदामादावेवप्रतिक्रिया
॥नकूपखननंयुक्तंप्रदीप्तेवन्हिनागृहे॥२१॥वरंदारिद्र्यमन्या
यप्रभवाद्विभवादिह॥कृशताभिमतादेहेपीननतानतुशोफनः॥
॥२२॥अपरीक्ष्यनकर्त्तव्यंकर्तव्यंसुपरीक्षितं॥पश्चाद्भवतिसंता
पोब्राह्मणीनकुलेयथा॥२३॥दिवानिरीक्ष्यवक्तव्यंरात्रौनैवच
नैवच॥संचरंतिमहाधूर्तावटेवररुचिर्यथा॥२४॥गावोदूरप्रचा
रेणहिरण्यंलोभलिप्सया॥स्त्रीविनश्यतिरूपेणब्राह्मणोराज
सेवया॥२५॥अतिदानाद्बलिर्बद्धोनष्टोमानात्सुयोधनः॥विन
ष्टोरावणोलौल्यादतिसर्वत्रवर्जयेत्॥२६॥धनमस्तीहवाणिज्यं
किंचिदस्तीहकर्षणं॥सेवयापीषदस्तीतिभिक्षानैवचनैवच॥
॥२७॥स्पृशन्नपिगजोहंतिजिघ्रन्नपिभुजंगमः॥हसन्नपिनृ
पोहंतिमानयन्नपिदुर्जनः॥२८॥जानंतिपशवोगंधाद्वेदाज्जा
नंतिवाडवाः॥चराज्जानंतिराजानश्चक्षुर्भ्यामितरेजनाः॥२९
॥सपक्षोलभतेकाकोवृक्षस्यविविधंफलं॥पक्षहीनोमृगेंद्रोपि
भूमिसंस्थोनिरीक्षते॥३०॥सपक्षोलभतेलक्षंगुणमुक्तोपिमा
र्गणः॥नलक्षतेस्वोविपक्षःगुणैरापूर्यतेयदा॥३१॥अलब्धा
पिफलंराज्ञःसंश्रितायांतिसंपदः॥महाह्रदसमीपस्थंपश्यनी
लंविनश्यति ३२ सर्वसहायेऋजवःप्रतिज्ञातार्थपालकाः॥परोप
कारिणःसेव्यानिर्धनाअपिवैनराः॥३३॥युक्तियुक्तंप्रगृह्णी
याद्बालादपिविचक्षणः॥रवेरविषयंवस्तुकिंनदीपःप्रकाश
येत्॥३४॥कटुकंवामधुरंवाप्रस्तुतवचनंमनोहारि॥वामेग
र्दभनादश्वित्तप्रीत्यैप्रयाणेषु॥३५॥वृथावृष्टिःसमुद्रेषुवृथा
तृप्तस्यभोजनं॥वृथादानंसमर्थस्यवृथाखंडेविभूषणं॥३६
अजायुद्धमृषिश्राद्धंप्रभातेमेघडंबरं॥दंपत्योःकलहश्चैवपरि
णामेनकिंचन॥३७॥सप्तैतानिनपूर्यंतेपूर्यमाणान्यनेकशः॥
ब्राह्मणोग्निर्यमोराजासमुद्रमुदरंगृहं॥३८॥वस्त्रंगांचबहुक्षी
रांजलपात्रमुपानहौ॥औषधंबीजमाहारंसंक्रीणीतयथाप्नुयात्॥

॥३९॥ अर्थनाशंगृहेतापंगृहेदुश्चरितानिच॥ वचनंचापमानंच
मतिमान्नप्रकाशयेत्॥४०॥अवृत्तिकंत्यजेद्देशंवृत्तिंसोपद्रवांत्य
जेत्॥त्यजेन्मायाविनंमित्रंधनंप्राणहरंत्यजेत्॥४१॥सौहृदेन
परित्यक्तंनिःस्नेहंखलवत्यजेत्॥सोदरंभ्रातरमपिकिमुतान्यं
पृथग्जनं॥४२॥यन्निमित्तंभवेच्छोकोदुःखंवात्रासएवच॥आया
सोवायतोमूलंतदेकांगमपित्यजेत्॥४३॥त्यजेदेकंकुलस्यार्थे
ग्रामस्यार्थेकुलंत्यजेत्॥ग्रामंजनपदस्यार्थेआत्मार्थेपृथिवींत्य
जेत्॥४४॥नगणस्याग्रतोगच्छेत्सिद्धेकार्येसमंफलं॥यदिका
र्यविपत्तिःस्यान्मुखरस्तत्रहन्यते॥४५॥पंचयत्रनविद्यंतेनतत्र
दिवसंवसेत्॥धनिकःश्रोत्रियोराजानदीवैद्यस्तुपंचमः॥४६॥
चलत्येकेनपादेनतिष्ठत्येकेनपंडितः॥नासमीक्ष्यपरस्थानंपूर्वं
मायतनंत्यजेत्॥४७॥अनायकेनवस्तव्यंनवसेद्बहुनायके॥
आत्मनःशांतिमन्विच्छन्नवसेद्बालनायके॥४८॥सर्वेयत्रविनेता
रःसर्वेपंडितमानिनः॥सर्वेमहत्वमिच्छंतितद्वृंदमवसीदति॥४९
घटंभिंद्यात्पटंछिंद्यात्कुर्याद्रासभरोहणं॥येनकेनाप्युपायेनप्र
सिद्धःपुरुषोभवेत्॥५०॥नहीदृशंसंचलनंत्रिषुलोकेषुविद्यते
॥दयामैत्रीचभूतेषुदानंचमधुराचवाक्॥५१॥विवादोधनसं
बंधोयाचनंस्त्रीषुसंगतिः॥आदानमग्रतःस्थापिमैत्रीभंगस्यहे
तवः॥५२॥दर्शितानिकलत्राणिगृहेसुप्तमशंकितं॥कथितानि
रहस्यानिसौहृदंकिमतःपरं॥५३॥नमातरिनदारेषुनसौदर्ये
षुबंधुषु॥विश्रंभस्तादृशोयादृङ्मित्रेपुंसांनिरंतरं॥५४॥शोका
रातिपरित्राणप्रीतिविश्रंभकारणं॥केनसृष्टमिदंरत्नंमित्रमि
त्यक्षरद्वयं॥५५॥दुःखेनश्लेष्यतेभिन्नंश्लिष्टंदुःखेनभिद्यते
॥मित्रश्लिष्टानुयाप्रीतिःसादुःखैकप्रदायिनी॥५६॥ययोरेवस
मंवित्तंययोरेवसमंकुलं॥तयोर्मैत्रीविवाहश्चनतुपुष्टविपुष्टयोः
॥५७॥चिबुकेयस्यरोमाणिनवक्षसिनगल्लयोः॥तेनमैत्रीनकर्त
व्यायदिनिर्मानुषंजगत्॥५८॥दानेतपसिशौर्येचयस्यनप्रथितंयशः

विद्यायामर्थलाभेवातस्यजन्मनिरर्थकं॥५९॥परोपकारशून्य
स्यधिङ्मनुष्यस्यजीवितं॥जीवंतुपशवोयेषांचर्मप्युपकरिष्यति
॥६०॥यज्जीव्यतेक्षणमपिप्रथितैर्मनुष्यैर्विज्ञानविक्रमयशोभिर
भग्नमानं॥तन्नामजीवनफलंप्रवदंतिसंतःकाकोपिजीवतिचिरं
बलिमेवभुंक्ते॥६१॥किंतेनजातुजातेनमातुर्यौवनहारिणा॥
आरोहतिनयःस्वस्यवंशस्याग्रेध्वजोयथा॥६२॥अजातमृत
मूर्खेभ्योमृतौजातौसुतौवरं॥यतस्तौस्वल्पदुःखाययावज्जीवं
जडोदहेत्॥६३॥नपुत्रःपितरंद्वेष्टिस्वभावात्स्वस्यरेतसः॥ब्रा
ह्मणंनाहिविद्वेषीजायतेन्यस्यरेतसः॥६४॥तथाचोक्तं॥यःसु
तःपितरंद्वेष्टितंविद्यादन्यरेतसं॥यस्तुनारायणंद्वेष्टितंविद्या
दन्यरेतसं॥६५॥किंकुलेनविशालेनशीलमेवात्रकारणं॥कृमयः
किंनजायंतेकुसुमेषुसुगंधिषु॥६६॥नपुत्रत्वेनपूज्यंतेगुणैरा
साद्यतेपदं॥रवेर्व्यापारमादत्तेप्रदीपोनपुनःशशी॥६७॥अध
मामातुलैःख्यानाःश्वशुराच्चाधमाधमाः॥उत्तमाआत्मना
ख्याताःपितुःख्याताश्चमध्यमाः॥६८॥ज्येष्ठोभ्रातापितृसमो
मृतेपितरिसर्वदा॥सर्वेषांवृत्तिदातास्या त्सएतान्परिपालये
त्॥६९॥कनिष्ठास्तंनमस्येरन्सर्वेच्छंदानुवर्त्तिनः॥तमेवसुपजी
व्येरन्यथैवपितरंतथा॥७०॥विभागेचसमानास्तेपितुर्द्रव्यस्यके
वलं॥लघोःपूर्वतरोयस्तुगुरुःसहिनिगद्यते॥७१॥ऋणशेषश्चा
ग्निशेषःशत्रुशेषस्तथैवच॥पुनःपुनःप्रवर्ततेतस्माच्छेषंन
रक्षयेत्॥७२॥कुभोज्येनदिनंनष्टंकुकलत्रेणशर्वरी॥कुपु
त्रेणकुलंनष्टंतन्नष्टंयन्नदीयते॥७३॥चतुरःसृजतःपूर्वमुपा
यास्तेनवेधसा॥नसृष्टःपंचमःकोपिगृह्यतेयेनयोषितः॥७४
स्त्रियस्तुयःकामयतेसन्निकर्षश्चगच्छति॥ईषत्स्वकुरुतेसेवां
तंतमिच्छंतियोषितः७५सदेवभर्ताजानीयान्मंत्रमूलपरांस्त्रियं
॥उद्विजेततदैवास्याःसर्पाद्वेश्मगतादपि॥७६॥वर्बरश्चतपस्वी
स्याच्छूरश्चाप्यकृतव्रणः॥मद्यपास्त्रीसतीराजन्नितिनश्रद्दधामहे

॥७७॥जल्पंतिसार्धमन्येनपश्यन्त्यन्यं सविभ्रमं॥हृदयेचिं
तयं– —त्यन्यंनस्त्रीणामेकतोरतिः॥७८॥नाग्निस्तृप्यतिका
ष्ठांनांनापगानांमहोदधि॥नांतकःसर्वभूतानांनपुंसांवामलो
चना॥७९॥स्थानंनास्तिक्षणोनास्तिनास्तिप्रार्थयितानरः॥तेननार
दनारीणांसतीत्वमुपजायते॥८०॥साभार्यायाप्रियंब्रूतेसपुत्रो
यत्रनिर्वृतिः॥तन्मित्रंयत्रविश्वासःसदेशोयत्रजीव्यते॥८१॥
लक्ष्म्यापरिपूर्णोहंनभयंमेस्तीतिमोहनिद्रैषा॥परिपूर्णस्यैवें
दोर्भवतिभयंसिंहिकासूनोः॥८२॥अतिपरिचयाद्वज्ञासंतत
गमनादनादरोभवति॥लोकःप्रयासवासीकूपेस्नानंसमाचरति
॥८३॥अतिपरिचयादवज्ञासंततगमनादनादरोभवति॥मलये
भिल्लपुरंध्रीचंदनतरुकाष्ठमिंधनंकुरुते॥८४॥अतिपरिचयाद
वज्ञाइतियद्वाक्यंमृषैवतद्भाति॥अतिपरिचितेप्यनादौसंसारे॰
स्मिन्नजायतेवज्ञा॥८५॥व्रजत्यधःप्रयात्युच्चैर्नरःस्वैरेवचेष्टि॰
तैः॥अधःकूपस्यखनकऊर्ध्वंप्रासादकारकः॥८६॥एतेनीति
शास्त्रेभ्यः॥ब्राह्मेमुहूर्तेपुरुषस्त्यजेन्निद्रामतंद्रितः॥नरंप्रातः
प्रबुद्धंहिश्रयतिश्रीर्गुणाश्रया॥८७॥नोत्तरस्यांप्रतीच्यांचकु॰
र्वीतशयनेशिरः॥शय्याविपर्ययाद्गर्भोदितःशक्रेणपातितः॥
॥८८॥कुर्यान्नपरदारेच्छांविश्वासंस्त्रीषुवर्जयेत्॥हतोदशा
स्यः सीतार्थेहतःपत्न्या विदूरथः॥८९॥नमद्यव्यसनेक्षीवःकु
र्याद्वातांविपप्लवं॥वृष्णयोहिययुःक्षीवास्तृणप्रहरणैःक्षयं९०
॥दानेसत्वाश्रितंकुर्यान्नपश्चात्तापवान्भवेत्॥बलिनात्मापि॰
तोबंधेदानशेषस्यशुद्धये॥९१॥ब्राह्मणान्नावमन्येतब्रह्म शा
पोतिदुःसहः॥तस्यकायोगतःकोपाद्ब्राह्मणस्यपरीक्षितः॥९२॥
दंभारंभोद्भूतंकर्मनाचरेदिहनिःफलं॥ब्राह्मणाद्दंभलब्धास्त्र
विद्याकर्णस्यनिष्फला॥९३॥नस्त्रीजितःप्रमूढःस्याद्रूढराग
वशीकृतः॥पुत्रशोकादसरथोजीवंजायाजितोत्यजत्॥९४॥
क्षिपेद्वाक्यशरान्घोरान्नपारुष्यविषप्लुतान्॥वाक्पारुष्यरुषा

चक्रेभीमःकुरुकुलक्षयं॥९५॥परेषांक्लेशदंकुर्यान्नपैशून्यंप्र
भुप्रियं॥पैशून्येनगतोराहोश्चंद्रार्कौभक्षणीयतां॥९६॥कुर्यान्नी
चजनाभ्यस्तांनयाच्ञांमानहारिणीं॥बलिप्रार्थनयाप्रापलघुतांपु
रुषोत्तमः॥९७॥वक्रैःक्रूरतरैर्लुब्धैर्नकुर्यात्प्रीतिसंगतिं॥वशि
ष्ठस्याहरेद्धेनुंविश्वामित्रोनिमंत्रितः॥९८॥तीव्रेतपसिलीनाना
मिंद्रियाणांनविश्वसेत्॥विश्वामित्रोपिसोत्कंठोमेनकावशमाग
तः॥९९॥भक्तंरक्तंसदापीतंनिर्दोषंनपरित्यजेत्॥रामस्त्यक्त्वा
सतींसीतांशोकशल्याकुलोभवेत्॥१००॥नक्रोधाद्यातुधानस्य
भीमामिच्छेद्विधीयतां॥निपीतभ्रातृरुधिरःप्रापनिंदांवृकोदरः
॥१॥वर्जयेदिंद्रियजयैर्निर्जनेजननीमपि॥पुत्रीकृतोपिप्रद्युम्नः
कामितःशंबरःस्त्रियः॥२॥प्रभुप्रसादेविश्वासंनकुर्यात्स्वप्रसन्नि
भे॥नंदेनमंत्रीनिक्षिप्तःशकटोलोहबंधने॥३॥नलोकायत्तवा
देननास्तिकस्याददैवतः॥हरिर्हिरण्यकशिपुंजघानस्तंभनिर्ग
तः॥४॥अप्युन्नतपदारूढःपूज्यान्नैवापमानयेत्॥नहुषश्शक्र
तांप्राप्यच्युतोगस्त्यापमानतः॥५॥हितोपदेशंशृणुयात्कुर्वी
तचयथोदितं॥विदुरोक्तमकृत्वाभूत्कौरवःशोकभाजनः॥६॥न
पुत्रायत्तमैश्वर्यंकुर्यादार्यःकथंचन॥पुत्रार्पितप्रभुत्वोभूद्धृत
राष्ट्रस्तृणोपमः॥७॥श्रुतिस्मृत्युक्तमाचारंनत्यजेत्साधुसेवितं
॥दैत्यानांश्रीवियोगोभूत्तस्त्यधर्मक्रियामुचां॥८॥नदीनांच
नखीनांचशृंगीणांशस्त्रपाणिनां॥विश्वासोनैवकर्तव्योस्त्री
षुराजकुलेषुच॥९॥नकुर्यादभिचारेच्छांवश्यादिकुहकक्रियां
॥लक्ष्मणेनेंद्रजित्कृत्याभिचारसमयेहतः॥१०॥व्याकुलोपि
विपत्स्यंतेस्मरेद्विष्णुंसदात्हृदि॥शरतल्पगतोभीष्मःसस्मारग
रुडध्वजं॥११॥एतेक्षेमेंद्रस्य॥संदेहोवैष्णवेमार्गेनकार्योन्यैःकु
दर्शनैः॥रामप्रभावमद्यापिपतोब्धौपश्यसेतुना॥१२॥शार्ङ्गध
रस्य॥अध्वाजरामनुष्याणामनध्वावाजिनांजरा॥असंभोगोजरा
स्त्रीणांवस्त्राणांमलिनंजरा॥१३॥कविःकरोतिकाव्यानिस्वादु

जानंतिपंडिताः॥सुंदर्याअपिलावण्यंपतिर्जानातिनोपिता॥ ॥
इतिश्रीवृहच्छार्ङ्गधरविरचितायांपद्धत्यांसामान्यनीतिपरि०॥

अथमिश्रकनीतिः

मणिःशाणोल्लीढःसमरविजयीहेतिनिहितोमदक्षीणोनागः
शरदिसरितःश्यानपुलिनाः॥कलाशेषश्चंद्रःसुरतमृदितावा
लवनितानतिम्नाशोभंतेगलितविभवश्चार्थिषुनृपाः॥१॥शशी
धूस दिवसरोगलितयौवनाकामिनीसरोविगतवारिजंमुखमनक्षरं
स्वाकृतेः॥प्रभुर्धनपरायणःसततदुर्गतःसज्जनोनृपांगणगतः
खलोमनसिसप्तशल्यानिमे॥२॥एतौभर्तृहरेः॥अविधेयोभृ
त्यजनःशठानिमित्राण्यदायकःस्वामी॥अविनयवतीचभार्या
मस्तकशूलानिचत्वारि॥३॥शक्तिरहितोप्रकुप्यतिसेवासक्तोपि
मानमुद्वहति॥अधनोपिहिकामयतेजानातिविधिर्विडंबयितुं
॥४॥दुर्मंत्र्यान्नृपतिर्विनश्यतियतिःसंगात्सुतोलाडनाद्विप्रोन
ध्ययनात्कुलंकुतनयाच्छीलंखलोपासनात्॥मैत्रीचाप्रणया
त्समृद्धिरनयात्स्नेहःप्रवासाश्रयात्स्त्रीमर्द्यादनवेक्षणादपि
कृषिस्त्यागात्प्रमादाद्धनं॥५॥कोर्थान्प्राप्यनगर्वितोभुविनरःक
स्यापदोस्तंगताःस्त्रीभिःकस्यनखंडितंभुविमनःकोनामराज्ञां
प्रियः॥कःकालस्यनगोचरांतरगतःकोर्थीगतोगौरवंकोवादु
र्जनवागुरानिपतितःक्षेमेणजातःपुमान्॥६॥क्लीबेधैर्यमद्यपे
तत्वचिंतासर्पेक्षांतिःस्त्रीषुकामोपशांतिः॥काकेशौचंद्यूतका
रेचसत्यंराजामित्रंकेनदृष्टंश्रुतंवा॥७॥मांसंमृगाणांदशनंगजा
नांमृगद्विषांचर्मफलंद्रुमाणां॥स्त्रीणांचरूपंहिनृणांहिरण्यमेते
गुणावैरकराभवंति॥८॥लुब्धस्यनश्यतियशोविषमस्यमैत्रीन
ष्टक्रियस्यकुलमर्थपरस्यधर्मः॥विद्या फलंव्यसनिनःकृपणस्य
सौख्यंराज्यंप्रमत्तसचिवस्यनराधिपस्य॥९॥शाठ्येनमित्रंकपटे
नधर्मंपरोपतापेनसमृद्धिभावं॥सुखेनविद्यांपरुषेणनारींवां
छंतियेव्यक्तमपंडितास्ते॥१०॥धातुवादेनवित्ताशामोक्षाशाकौ

लिकेमते॥ जामातरिचपुत्राशात्रयमेतन्निरर्थकं॥११॥ राजाघृणीब्राह्मणःसर्वभक्षीस्त्रीचावश्यादुष्टबुद्धिःसहायः॥ प्रेष्यःप्रतीपोधिकृतःप्रमादीत्याज्याइमेयश्चकृतंनवेत्ति॥१२॥ वैद्यंपानरतंनटंकुपठितंस्वाध्यायहीनंद्विजंयुद्धेकापुरुषंहयंगतरयंमूर्खंपरिव्राजकं॥ ॥राजानंचकुमंत्रिभिःपरिवृतंदेशंचसोपद्रवंभार्यायौवनगर्वितांपररतांमुंचंतितेपंडिताः॥१३॥ वृक्षंक्षीणफलंत्यजंतिविहगाःशुष्कंसरःसारसाःनिर्द्रव्यंपुरुषंत्यजंतिगणिकाभ्रष्टंनृपंमंत्रिणः॥ पुष्पंपर्युषितंत्यजंतिमधुपादग्धंवनांतंमृगाःसर्वेःकार्यवशाज्जनोभिरमतेकाकस्यकोवल्लभः॥१४॥ स्वफलनिचयःशाखाभंगंकरोतिवनस्पतेर्गमनमनसंवक्राक्षेपःकरोतिशिखंडिनः॥ चतुरगमनजास्तोयोश्वःसगोरिवबाध्यतेगुणवतिजनेप्रायेणैतेगुणाःखलुदूषणं॥१५॥ त्यजतिभयमकृतपापंमंत्रंचशाठःप्रमादिनंविद्या॥ ह्रीःकामिनमलसंश्रीःक्रूरंस्त्रीदुर्जनंलोकः॥१६॥ द्वाविमौपुरुषौलोकेसुखिनौनकदाचन॥ यश्चाधनःकामयतेयश्चकुप्यत्यनीश्वरं॥१७॥ द्वाविमौपुरुषौलोकेपरप्रत्ययकारकौ॥ स्त्रियःकामितकामिन्योलोकःपूजितपूजकः॥१८॥ द्वाविमौपुरुषौलोकेस्वर्गस्योपरितिष्ठतः॥ प्रभुश्चक्षमयायुक्तोदरिद्रश्चप्रदानवान्॥१९॥ द्वाविमौपुरुषौलोकेनभूतोनभविष्यतः॥ प्रार्थितोयश्चकुरुतेयश्चनार्थयतेपरं॥२०॥ द्वाविमौपुरुषौलोकेशिरःशूलकरौपरौ॥ गृहस्थोयोनिरारंभोयतिश्चसपरिग्रहः॥२१॥ द्वाविमावंभसिक्षेप्यौगाढंबध्वागलेशिलां॥ धनिनंचाप्रदातारंदरिद्रंचातपस्विनं॥२२॥ संतश्चेदमृतेनकिंयदिखलस्तत्कालकूटेनकिंदानारोयदिकल्पशाखिभिरलंयद्यर्थिनःकिंतृणैः॥ किंकर्पूरशलाकयायदिदृशःपंथानमेतिप्रियःसंसारेपिसतींद्रजालमपरंयद्यस्तितेनापिकिं॥२३॥ लोभश्चेदगुणेनकिंपिशुनतायद्यस्तिकिंपातकैःसत्यंचेत्तपसाचकिंसुचिमनोयद्यस्तितीर्थेनकिं॥ सौजन्यंयदिकिंगुणैःस्वमहिमायद्यस्तिकिंमंडनैःसद्वि

द्यायदिकिंधनैरपयशोयद्यस्तिकिंमृत्युना॥२४॥मित्रंस्वच्छ
तयारिपुंनयबलैर्लुब्धंधनैरीश्वरंकार्येणद्विजमादरेणयुव
तिंप्रेम्णासमैर्बांधवान्॥उग्रंसंस्तुतिभिर्गुरुंप्रणतिभिर्मूर्खं
कथाभिर्बुधंविद्याभीरसिकंरसेनसकलंशीलेनकुर्याद्वशं॥२५
केषामप्येते॥वाजीचारुगतिःशशांकधवलंछत्रंप्रियापृष्ठतःप्रो
त्तुंगस्तनमंडलाविजयिनोभृत्याःपुरःपंचषाः॥तांबूलंचतुरंस
खाचचतुरःसंपद्यतेचेत्स्थि प्राहुस्तत्कटकप्रयाणमितरस्मा
णप्रयाणंतदा॥२६॥कस्यापि॥जवोहिसप्तेःपरमंविभूषणंत्र
पांगनायाःकृशतातपस्विनः॥द्विजस्यविद्यानृपतेरपिक्षमापरा
क्रमःशस्त्रबलोपजीविनां॥२७॥पोडवकुलस्य॥वासःशुभ्रमृतु
र्वसंतसमयःपुष्पंशरन्मालतीधानुष्कःकुसुमायुधःपरिमलः
कास्तूरिकोस्त्रंधनुः॥वाणीतर्करसोज्वलाप्रियतमाश्यामाव
योनूतनंमार्गीःशांभवएवपंचमलयीगीतिःकविर्बिल्हणः॥२८॥
बिल्हणस्य॥इंदुकैरविणीवकोकपटलीवांभोजिनीबांधवंमेघं
चातकमंडलीवमधुपश्रेणीवपुष्पाकरं॥माकंदंपिकसंहतीवत
रुणीप्राणेश्वरंप्रोषितंचेतोवृत्तिरियंममप्रियसखेत्वांद्रष्टुमुत्कंठ
ते॥२९॥नित्यंब्रह्मयथास्मरंतिमुनयोहंसायथामानसंसानंदा
स्फुटशल्लकीवनयुतांध्यायंतिरेवांगजाः॥युष्मद्दर्शनलालसाः
प्रतिदिनंयुष्मान्स्मरामोवयंधन्यःकोपिसवासरोत्रभवितायत्रा
वयोःसंगमः॥३०॥एतौराघवचैतन्यस्य॥शत्रुर्दहतिसंयोगेवि
योगेमित्रमप्यहो॥उभयोर्दुःखदायित्वंकोभेदःशत्रुमित्रयोः॥३१
प्रियवाक्यप्रदानेनसर्वेतुष्यंतिजंतवः॥तस्मात्तदेववक्तव्यंवचनेकिंदरिद्रता

अथगजप्रशंसा

॥इविनीतिः॥

यतोगजैर्विनाराज्ञांराज्यशोभानजायते॥जयप्रतापौसैन्यस्यर
क्षातस्मादिहोच्यते॥१॥पुरास्वर्गेसुखेनासन्कामगाःखेचराग
जाः॥मुनिशापाद्गताभूमौततोजातावनेचराः॥२॥भद्रोमंदोमृगो
मिश्रश्चतुर्धाजायतेगजः॥त्रयोयुगत्रयेभूवन्मिश्राःकलियुगेगजाः॥३

शार्ङ्गधरस्य॥ यतःसत्त्वंततोधर्मोयतोधर्मस्ततोधनं॥ यतोरूपंततःशीलंयतोनागास्ततोजयः॥४॥ यद्वद्वनमसिंहंचयद्वद्राष्ट्रमपार्थिवं॥ यद्वच्छौर्यमशस्त्रंतुतद्वत्सैन्यमकुंजरं॥५॥ प्राकारकोपुराट्टालकपाटोद्घाटनादिषु॥ भंजनेमर्दनेचैवनागावज्रोपमाःस्मृताः॥६॥ शरजालांचितमुखःकोन्यःशक्तःपरंगजात्॥ हंतुंप्राकारमुन्मुख्यरथाश्वनरकुंजरान्॥७॥ एकशक्तिप्रहारेणम्रियतेश्वोनरोपिहि॥ सहेच्छतंप्रहाराणांमहायुद्धेषुवारणः॥८॥ क्रीडासुचनरेंद्राणांजलेपुष्पितपंकजे॥ स्नपयंतिगजाहस्तैर्लग्नपुष्करपुष्करैः॥९॥ स्त्रियोवतारयंत्येलमृन्मयाद्वनिश्चलाः॥ नास्तिहस्तिसमोबंधुर्नास्तिहस्तिसमःसखा॥१०॥ बालकाख्यात्॥ चीत्कारैर्नाशयंतःस्वपतिभटमनोमोदयंतोमदाढ्याःप्रौढाःसंग्रामसीम्निस्ववलवहलतांबाढमाढौकमानाः॥ शुंडादंडप्रहारैःपरममपिबलंकंपयंतःपरेषांयेषांसर्वेगजेंद्राभुविविजयविधौतेमताभूमिपालाः॥११॥ चलंतियेषांनमतंगजेंद्राःपुरःप्रयाणेवनशैलतुल्याः॥ वांछंतिनैवंविजयंकथंतेराजेतिशब्दंचकथंलभंते॥१२॥ सेतुंसंभेदयंतोच्चलविकटभटप्रोन्नतिंत्रोटयंतःप्राकारंदारयंतःपरमनसिपरांभीतिमुत्पादयंतः॥ व्यूहंविद्रावयंतःसुघनमपिवनंहेलयोत्पाटयंतो येषांमाजौगजेंद्राःखलुधरणिभुजांतज्जयःसिद्धएव॥१३॥ रक्षंतिपक्षंमुदिताःस्वकीयंमथ्नंतिसैन्यंकुपिताःपरेषां॥ प्राणैरपीच्छंतिहितंप्रभूणांगजैःसमानंक्वबलंबलीयः॥१४॥ तावद्गर्जंतिवीर्यात्परनिधनविधौयुद्धमध्येपिधीरास्तावद्धावंतिवेगंपरमपिदधतःसंमुखीनास्तुरंगाः॥ स्थूलारूढःसुसज्जोमदमुदितमनामानिमानंविधुन्वन्यावन्नायातिकोपात्कृतविविधरवाटोपएकोपिनागः॥१५॥ सैन्योत्तारणतोधुनीषुसमतंयोवारिवंधायतेयोमथ्नन्परितःपरोद्धनवलंयुद्धेषुयोधायते॥ यःस्वीयक्षितिनाथरक्षणविधौसोन्वेकदुर्गायतेसमाजेविजिगीषुभि

र्गजगणःकैःपार्थिवैर्नोर्घ्यते॥१६॥ मातंगे रथयैर्महेंद्रभवनंपुण्याधिकंजन्यते यैःश्यामैरपिसर्वलोकमिहिताकीर्त्तिःसितातन्यते॥ यैर्मत्तैरपिसंगरे रिपुमदःशेषंसमानीयते तेमीभाग्यवतःप्रयांतिपुरतःस्तंबेरमाभूपतेः॥१७॥ एतौगुणाकरस्य॥ तवाग्रतोवीरमहीमहेंद्रमंदंगजाःस्मेरवलिनोविभांति॥ आवासस्थानादरिभूपतीनामाशांतशैलाइवसापराधाः॥१८॥ स्वीयोद्यानप्रगंधप्रकुपितहृदयोन्नारितोद्दंडशुंडैरुन्नच्छस्तुच्छगुच्छप्रतिकरटिधियासिंधुरैर्धावमानैः॥ तत्मादन्यासनम्रीभवदचलभरोद्भ्रांतिधारावघूर्णत्पारावारांबुपूर्णाधरणिरतितरांशंकमानाचकंपे॥ ॥१९॥

अथभद्रलक्षणानि

प्रतिमानेषुविपुलश्चारुपृष्ठायताननः॥ सुखेस्फरभिनिश्वासस्ताम्रजिव्होष्ठतालुकः॥१॥ तथास्यतुल्यसंस्थानौदंतौशुभ्रौविशेषतः॥ मधुपिंगलनेत्रश्चमहाकायोमहाबलः॥२॥ पुरस्तादुच्छ्रितश्चापिपश्चादवनतोपिच॥ धनुर्विनतवंशश्चसमपादतलःशुभः॥३॥ विंशत्याश्वनखैर्युक्तोयोष्टादशभिरेवच॥ विद्युद्वाग्निसिंहेभ्योनविभेत्यंकुशादपि॥४॥ अन्वर्थवेदीशूरश्चरूपावान्नचकर्कशः॥ कल्याणमेधातेजस्वीसभद्रःपरिकीर्तितः॥५॥

अथमंदलक्षणानि

महाग्रीवोमहावक्षोमहाप्रोथोमहोदरः॥ पीनोरुवंशःसांद्रत्वक्कविभक्तमहाशिराः॥१॥ वहलैर्मृदुभिर्दीर्घैर्युक्तःस्निग्धैस्तनूरुहैः॥ स्थिरैःस्थिराकृतितलैःपादैश्चपृथुभिःसमैः॥२॥ स्थिरस्निग्धेविशालेचपीनेचापिप्रकीर्त्तिते॥ विषाणेतस्यविद्वद्भिरोष्टेदीर्घश्चवरोमशः॥३॥ कूर्मसंस्थानगमनोमंदोमंदगतिक्रमः॥ संमील्पलोचनेनित्यंनिद्रांधइवगच्छति॥४॥ धीरोनुरक्तोहस्तिन्यांजितहृगोजितश्रमः॥ निर्भयोमंदबुद्धिश्चधृतिमान्मंदउच्यते॥५॥

अथमृगलक्षणानि

तनुत्वकर्णपादोयस्तन्वास्यस्तनुमेहनः॥ तनुवंशोदरश्चैवतनु

व्यक्ततनूरुहः॥१॥दीर्घजिह्वविषाणश्चदीर्घगात्रस्तथावसः
॥प्रध्वस्तकर्णरोमत्वक्खुरस्त्वाश्चापिसंवृत्तः॥२॥निपानेगोचर
स्थानेशय्यायांचाप्यनिर्वृतः॥रूपादिभयशंकीचनित्यमेववन
स्थितः॥३॥ह्रस्वश्रवणलांगूलोदीर्घविक्रमतेक्रमैः॥पुनःपुनश्च
विनदंदुर्मतिश्चापिधावति॥४॥मिश्रलक्षणं॥बह्वाशीबह्लीकश्चदं
डपातेषुचाक्षमः॥गच्छेत्सकष्टवेगश्चभारंप्राप्यावसीदति॥५॥
कृच्छ्राच्चाप्यायतेनागःक्षिप्रंचपरिहीयते॥कट्वम्ललवणैश्चै
वरूक्षैश्चातुरतांव्रजेत्॥६॥नित्यंचसांत्वयेदेनंनचैनमपिता
पयेत्॥सर्वेषांलक्षणैःकैश्चिद्युक्तोमिश्रोभवेद्गजः॥७॥ छ॥

अथगजप्रक्रिया

एवंविधान्गजान्ज्ञात्वा वनादानीयपार्थिवः॥विनयेशिष्यवत्तु
र्यांस्तुत्रवत्परिपालयेत्॥१॥शूरमारोहकंकुर्याद्दृशागंचविशेष
तः॥शूरत्वंकातरत्वंचतदायत्तंगजेयतः२।सज्जितःकल्पितःशू
रःशूरारूढःप्रतापवान्॥जयत्येकोपिमातंगःषट्सहस्राणिवा
जिनां॥३॥शरतोमरचक्रैश्चगजस्कंधहतानराः॥स्वर्गंक्षणात्प्र
यांत्येवतस्मात्स्वर्गोपमागजाः॥४॥ इतिगजप्रशंसापरिच्छेदः।

अथतुरगप्रशंसा

पुरासपक्षाहरयोविचेरुःखेचराःकिल॥गंधर्वेभ्यःसमुत्पन्नाःस
दास्वच्छंदचारिणः॥१॥तेजोवाय्वंबुदृग्गणैःसर्वैर्लक्षितलक्षणाः
॥वीक्ष्यशक्रोजगादेवंशालिहोत्रंमहामुनिं॥२॥छिंधिपक्षानमी
षांत्वंयथास्युर्वाहनानिमे॥ हृषीकास्त्रेणसोप्येषांपक्षांस्तत्रीत
येच्छिनत्॥३॥ततःप्रसादितस्तैस्तुवरंप्रादादिदंमुनिः॥युष्म
त्पक्षोपमोवेगश्चरणानांभविष्यति॥४॥यूयंशक्रादिदेवानांवाह
नत्वंगमिष्यथ॥तथाभूमिपतीनांचगौरवेणसमन्विताः॥५॥यो
राजाभवतांतुष्टिंखाद्यप्रसादिभिस्तथा॥करिष्यतिससर्वत्रज
यभागीभविष्यति॥६॥अथागस्त्यभुवंराज्ञांगतावाहनतांहयाः॥
तेषुधर्मार्थकामांश्चसादयंत्युपकारिणः॥७॥आमूलमंडलंयस्य

गृहेसंतिनवाजिनः॥ गृहभित्तिषुतेनापिलेख्यादुरितशांतये॥८
अश्वायस्ययशस्तस्ययस्याश्वास्तस्यकांचनं॥ निपसपृथिवेगे
नमिषतांसर्वधन्विनां॥९॥ शत्रुंनिहत्ययात्येकःशूरोवाजिप्रभा
वतः॥ शस्त्रास्त्रैर्भिन्नदेहोपिश्रांतोपिगुरुभारतः॥१०॥ नमुंच
तिरणेनाथमतःकोन्योहयात्सुहृत्॥ दूरस्थोपिबलीशत्रुर्नशे
तेरजनीष्वपि॥ ११॥ तस्यभीत्यागृहेयस्यहरयोवेगवत्तराः॥
नगजैर्ननरैःकार्यसिद्धिमभ्येतिभूभृतां॥१२॥ तथानिमेषमा
त्रेणयथावाहैःसुसाधितैः॥१३॥ धूलीभिर्दिवमंधयन्नवधिरय
न्नाशाःखुराणांरवैर्वातंसंयतिखंजयन्जवजयैस्तोतॄन्गुणै
र्मूकयन्॥ धर्माराधनसन्नियुक्तजगताराज्ञासुनाधिष्ठितःसो
द्रोत्कालमिषाद्विग‾हतिपदास्त्रष्टुंतुरंगोपिगां॥१४॥ वातं
स्थावरयन्नभःस्फुटकयन्स्त्रोतस्वतींसूत्रयन्सिंधुंपल्वलयन्
वनंविटपयन्भूमंडलंलोष्टयन्॥ शैलंसर्षपयन्दिशंचपलयन्
लोकत्रयंक्रोडयन्हेलारब्धरयोहयस्तवकथंकारंगिरांगोच
रः॥ १५॥ अलक्षितगतागतैःकुलवधूकटाक्षैरिवक्षणात्तुनप
थीतलैःप्रणयकेलिकोपैरिव॥ स्फुरत्तमसृणोन्नतैर्मृगदृशामु
रोजैरिवत्वदीयतुरगैरिदंधरणिचक्रमाक्रम्यते॥१६॥ निर्मांसं
मुखमंडलेपरिमितंमध्येलघुंकर्णयोःस्कंधेबंधुरमप्रमाणमुर
सिस्निग्धंचरोमोद्गमे॥॥ पीनंपश्चिमपार्श्वयोःपृथुतरंपृष्ठेप्रधानं
जवेराजावाजिनमारुरोहसकलैर्युक्तंप्रशस्तैर्गुणैः॥१७॥ मेख
लीयतिमेदिन्याःककुभःकंकणीयति॥ मंडलीतुरगःकुर्वन्ज
गतःकुंडलीयति॥१८॥ आकर्षन्निवगांवमन्निवरान्यश्वार्ध
मुह्यन्निवस्त्रीकुर्वन्निवखंपिबन्निवदिशेवायुंसमश्नन्निव॥ सां
गारप्रकरांस्पृशन्निवमहींप्रोड्डीयगच्छन्निवचंचच्चामरवीज्यः
मानवदनःश्रीमान्हयोधावति॥१९॥ इतिहयप्रशंसा॥७॥ ॥

अथतुरंगानांसामान्यप्रशंसा

ब्राह्मणक्षत्रियविशांशूद्राणांचैवलक्षणैः॥ज्ञेयाहयोत्तमास्तेषु

पूर्वपूर्वःशुभावहः॥१॥प्रायेणब्राह्मणःशुक्लःक्षत्रियोलोहितःस्मृतः॥वैश्यःपीताभवर्णःस्यात्कृष्णवर्णश्चतुर्थकः॥२॥पुष्पगंधःसदाविप्रःक्षत्रियोगुरुगंधकः॥घृतगंधोभवेद्वैश्यःमीनामोदीचतुर्थकः॥३॥विवेकीसघृणोविप्रस्तेजस्वीक्षत्रियोबली॥दुष्टभावस्तथावैश्योनिःसत्वःकातरोपरः॥४॥ब्राह्मणाक्षेमकृत्येषुसिद्धिंगच्छंतिवाजिनः॥क्षत्रियायुद्धकार्येषुवैश्याद्रव्यार्जनेसदा॥५॥शूद्राश्चान्येषुकृत्येषुज्ञात्वैवंवाजिनःसदा॥आरुहेद्युक्तकार्येषुयइच्छेच्छाश्वतींश्रियं॥६॥सदासुप्ताभवंत्येतेवाजिनोयेतुभूतले॥जायत्यायोधनेप्राप्तेककैरस्यचभक्षणे॥७॥सुलक्षणमहावेगाःसमत्वाश्चातिघस्मराः॥जितश्रमाविनीतायेराजार्हास्तेहयाःस्मृताः॥८॥ इतिअश्वानांसामान्यप्रशंसा॥छ॥

अथपृथगवयवानांलक्षणानि

आताम्रापूजितावोष्टौबलिहीनौमृदुत्वचौ॥जिह्वारक्ताचतनीचतालुरक्तंप्रशस्यते॥१॥घनस्निग्धाःसुबद्धाश्चसमादंतास्तुशोभनाः॥नातिदीर्घौपृथूनैवह्रस्वौवाहस्यशोभनौ॥२॥अत्यंतनिर्गतेचैवसुवद्धेनैवचाविले॥प्रशस्तेवाजिनांनेत्रेमध्वाजेकालकारके॥३॥स्वावर्तंचविशालंचललाटंवाजिनांशुभम्शस्तंशिरःसुसंवृत्तमावर्तद्वयभूषणं॥४॥ह्रस्वताकर्णयोःशस्तातीक्ष्णातनुतातथा॥सुदृढांकुंचितांतीक्ष्णांधन्यांग्रीवांविदुर्बुधाः॥५॥केशरंचजटाहीनंमृदुदीर्घंप्रशस्यते॥अनावर्तौदृढश्चैवस्कंधोवाहस्यपूजितः॥६॥उरोविशालंशस्तंचकक्षेदीर्घोन्नतेशुभे॥ऊरूवृत्तौसमौबाहूगूढंजानुप्रशस्यते॥७॥अवक्रेमांसहीनेचवाजिजंघेसुशोभने॥कूर्चंसमंसुगंधिस्याद्ग्रंथिव्रणविवर्जितं॥८॥दृढामंडकिकाःकृष्णाःवर्तुलाःपृथलाःखुराः॥पार्श्वावभ्युन्नतौदीर्घौसुदृढौचसमौशुभौ॥९॥अविलेविसुवृत्तंचजठरंवाजिनांशुभं॥नातिदीर्घंसमंपृष्टंकिंचिच्चविनतंशुभं॥१०॥एतेशालिहोत्रस्य॥पीनाकटिःसुवृत्तश्चपश्चा

ह्नागः पृथुःस्तुभः॥ मृदुस्निग्धायतैर्युक्तं वालैःपुच्छं प्रशस्यते॥११
वृषणौचसमौवृत्तौविल्वमात्रौविलोमशौ॥ कृष्णावर्णविहीनंच
ह्रस्वंमेद्नमिष्यते॥१२॥ इति पृथगवयवानांलक्षणानि॥७॥

अथस्वांगभागलक्षणानि

ऊर्ध्वव्रीहित्रयंमानमंगुलस्यनिगद्यते॥ हस्तोपिहिसमाख्या
तश्चतुर्विंशतिरंगुलैः॥१॥ द्वात्रिंशदंगुलंवक्त्रमुत्तमाश्वस्यकी
र्तितं॥अंगुलद्वयहीनंतुमुखंस्यान्मध्यवाजिनः॥२॥ ततोपिद्व्यं
गुलंन्यूनंकनिष्ठस्यमुखंस्मृतं॥शीर्षाचोत्तमवाहस्यषट्पंचा॰
शन्मितांगुलैः॥३॥चत्वारिंशत्षडधिकामध्यमाश्वस्यकीर्तिताः
॥षड्विंशदंगुलैर्ग्रीवाहीनाश्वस्यप्रकीर्तिता॥४॥ उरःपृष्ठंकटि
श्चैवमुखतुल्यंसमादिशेत्॥ कर्णौसप्तांगुलौप्रोक्तौनालुकंचष
डंगुलं॥५॥ सूक्ष्मोऋजुःपुच्छदंडःकथितोविंशदंगुलः॥द्वावि
शदंगुलोत्सेधेजंघेचैवोत्तमेमते॥६॥ अष्टादशतथामध्येहीने
चैवचतुर्दश॥ सप्तांगुलःखुरःप्रोक्तउत्तमाश्वस्यपंडितैः॥७॥ष
डंगुलोभवेन्मध्यःकनिष्ठःपंचसंमितः॥चतुर्हस्तश्चविख्याततउ
त्सेधेनहयोत्तमः॥८॥अर्धहस्तेनहीनस्तुभवेन्मध्यस्तुरंगमः॥
ततोहस्तेनहीनश्चहीनएवहयःस्मृतः॥९॥पंचहस्तेप्रमाणेनदै
र्घ्यमुत्तमवाजिनि॥चतुर्भिर्मध्यमंप्रोक्तंत्रिभिःसार्धैस्तथाधमः॥
१०॥अपांगात्पुच्छमूलंतुतिर्यगश्वं प्रमाणयेत्॥खुरांतात्क॰
कुदंयावदूर्धमानेनबुद्धिमान्॥११॥ इतिस्वांगभागलक्षणानि॥८

अथहयानांशुभलक्षणानि

अथातःसंप्रवक्ष्यामिलक्षणानीहवाजिनां॥ शुभैर्निवर्णैरावर्तैं॰
स्तानिविंद्याद्विशारदाः॥१॥सर्वश्वेतोहयोयस्तुश्यामैकश्रवणो
भवेत्॥ सवाजीवाजिमेधार्हःश्यामकर्णःप्रकीर्तितः॥२॥यस्य॰
पादाःसिताःसर्वेनथावक्त्रंचमध्यतः॥ कल्याणपंचकःप्रोक्तःस
दाकल्याणकृच्चसः॥३॥ यस्यपादाःसिताःसर्वेपुच्छंवक्षोमु
खंतथा॥ मूर्धजाश्चशितायस्यतंविद्यादष्टमंगलं॥४॥मुखेचेंद्र

कसंवीतोजंबूफलसमाकृतिः॥ श्वेतपादः सविज्ञेयोमल्लिकाक्षः सुपूजितः॥५॥ कृष्णोवाजीभवेद्यःसकृष्णतालुर्नदुष्यति॥ कुत्सितावर्तकर्णोपि यावत्कल्याणकः शुभः॥६॥ इतिहःशुभलं०

अथशुभावर्त्ताः

एकोललाटेद्वौमूर्ध्नि द्वौद्वौपार्श्वेपपार्श्वयोः॥ द्वौचवक्षसिविज्ञेयः प्रयाणेचैकएवतु॥१॥ ध्रुवावर्त्तादशप्रोक्तावाजिनांशुभकारकाः॥ प्रयाणेमारुतोभालेवन्हिर्वक्षसिचाश्विनौ॥२॥ सूर्याचंद्रमसौमूर्ध्नि रंध्रेस्कंदगजाननौ॥ उपरंध्रेहरीशौचदशावर्ताअतःशुभाः॥३॥ त्रयोयस्यललाटस्थाआवर्ताअधरोत्तराः॥ निःश्रेणिसापरिज्ञेयावाजिऋद्धिकरापरा॥४॥ अनेनैवप्रकारेणत्रयोग्रीवास्थिताःशुभाः॥ ललाटेयुगलावर्तौ चंद्रार्कौशुभकारकौ॥५॥ कंठेचिंतामणिर्ज्ञेयश्चिंतितार्थप्रदःसदा॥ आवर्तःपृष्ठवंश्यःसस्तूर्याख्यःशुभःस्मृतः॥६॥ नकुलस्यैते॥ इतिशुभवार्ताः॥

अथाशुभलक्षणानि

चत्वारोप्यसिताःपादाःसर्वश्वेतस्यवाजिनः॥ भवंतियस्यसत्याज्योयमदूतःसदूरतः॥१॥ अन्यवर्णशिरोयस्यपुच्छंवायस्यवाजिनः॥ पुच्छेनशिरसावापिनानावर्णःसनिंदितः॥२॥ हीनदंताधिकश्चैवकरालःकृष्णतालुकः॥ कुद्दालोमुशलीश्रृंगीषडेतेस्वामिघातकाः॥३॥ व्याघ्राभश्चस्तनीचैवद्विखुरःककुदीतथा॥ एकांडश्चैवजातांडोवाहाःपादाःप्रकीर्तिताः॥४॥ पंचभिःसप्तभिर्दंतैर्वाहौहीनाधिकौस्मृतौ॥ करालीवाधरैर्दंतैःछाद्यंतेयस्यचोत्तराः॥५॥ कृष्णस्तालुर्भवेद्यस्यसभवेत्कृष्णतालुकः॥ कुद्दालस्त्वोत्तरैर्दंतैःछाद्यतेयस्यचाधरः॥६॥ सितैकचरणःपुच्छहीनस्तुमुशली स्मृतः॥ कलाभावर्तकःकर्णदेशेयस्यसश्रृंगिकः॥७॥ व्याघ्राभोव्याघ्रवर्णश्चस्तनयुक्तःस्तनीस्मृतः॥ द्विखुरोगोखुराकारैःखुरैर्विद्याद्विचक्षणः॥८॥ आवर्तःककुदेयस्यसस्मृतःककुदीहयः॥ मुष्केनैकेनलंबेनहयस्त्वेकांडसंज्ञितः॥९॥ अंडाभ्यांरोमशाभ्यांतु

जावांडोनिहतःस्मृतः॥भस्माभंवक्रपुच्छंचकृष्णनीलंपरित्य॰
जेत्॥१०॥निंद्यःकेवलकृष्णश्चसर्वश्वेतश्चपूजितः॥११॥ छ॥

अथदुरावर्ताः॥

पुच्छेजानुनिकक्षायांमेढ्रेगुल्फेहनौहृदि॥भ्रूदेशेनेत्रपरितःक
र्णाग्रेतदधस्तथा॥१॥ अधरोष्ठेचघोणायांकंडकेचिबुकेतथा॰
मुष्केनाभौत्रिकेकुक्षावावर्तास्त्वतिनिंदिताः॥२॥शार्ङ्गधरस्य॥

अथाश्वानांशुभाशुभचेष्टितं

येर्लुधाःकथयंत्याशुशुभंवायदिवाशुभं॥स्वामिनोवाजिनांचिन्है
स्तद्विज्ञेयंविचक्षणैः॥१॥ यःसन्नद्धोहयोएसमूर्ध्ववक्रःकरोतिवा
॥खुराग्रेनालिखन्भूमिंसशंसतिरणेजयं॥२॥ यःकरोत्यसकृन्मू
त्रपुरीषंवासमोक्षणं॥सशंसतिपराभूतिमत्यंतंयश्चदुर्मनाः॥३॥
निष्कारणंनिशांतेयोहेषारावंकरोत्यपि॥परचक्रागमंशंसीस
विज्ञेयोविचक्षणैः॥४॥पुलकान्वितपुच्छोयोजायतेयस्यघोटकः
सशंसतिस्थिरस्यापिद्रुतंतस्यप्रयाणकं॥५॥स्फुलिंगायस्यदृ
श्यंतेपुच्छतोश्वस्यवह्निजाः॥निर्गच्छतःप्रभोर्नाशंसशंसति॰
निशागमे॥६॥ अश्वशालांसमाविश्ययदांतर्मधुमक्षिकाः॥मधु
जालंप्रबध्नंतिम्रियंतेश्वास्तदाध्रुवं॥७॥ सटंकवारयेद्यन्मात्प्रवि
शंतंहयालये॥मधुराग्रेसदाधार्योरक्तवक्रोमहाकपिः॥८॥नकुलस्य

अथाश्वानांजन्मदेशाः

अथाश्वानांजन्मदेशान्प्रवक्ष्याम्यनुपूर्वशः॥उत्तमानांचमध्यानां
हीनानांयत्रसंभवः॥१॥उत्तमास्ताजिकाःप्रोक्ताःपारसीकसमुद्भ
वाः॥ केकाणाःस्वेतलानाचतथासौराष्ट्रजाहयाः॥ २॥ छ॥ छ॥

अथमध्यमाः॥

उरोजानाश्वकीराश्चतुरुष्काःशद्विजाश्चये॥हरुजाःसैंधवाम॰
ध्याःस्थलजातास्तथाहयाः॥१॥ ॥इतिमध्यमाः॥ छ॥ छ॥

अथहीनाः

शोभलाश्चार्जुनाश्चैवतथासारस्वताहयाः॥ अधमाष्टांकपाः

सर्वेयेचप्राग्दक्षिणोद्भवाः॥१॥ ॥इतिहीनाः॥ ७ ॥ ७ ॥॥

अथाश्ववाहनविधिः

अथातःसंप्रवक्ष्यामिहयारोहणमुत्तमं॥येनविज्ञानमात्रेणरेवं
तम्प्रियतांव्रजेत्॥१॥रूपावर्तगतिच्छायाःसत्वंवर्णोवयोबलं॥
वेगहीनस्यवाहस्यसर्वमेतन्निरर्थकं॥२॥तस्माद्वेगजितंवाह
तरुणंपुष्टविग्रहं॥वाहयेद्वाहकःसज्जस्करंगेसांत्वयन्मुहुः॥
॥३॥सार्द्रांसुकठिनांचैवपाषाणोदकसंयुतां॥तृणकाष्ठयुतांचैव
रंगभूमिंविवर्जयेत्॥४॥समाचविपुलाचैवकिंचित्सांशुसमन्वि
ता॥एकांतेविजनेचैवरंगभूमिःप्रशस्यते॥५॥स्थूलश्चक्रोधनो
मूर्खोभीतोत्कवबलाशनः॥अस्थानदंडपातीयोवाजीतस्यन
धावति॥६॥दृढासनोश्वतत्वज्ञःप्राज्ञःसत्वबलोन्नरः॥सुस्था
नदंडपातीचसोत्तमोवाहकःस्मृतः॥७॥चलकिशलयपादःक
र्णमध्येकदृष्टिर्नचलतिकटिदेशेस्वासनेसंस्थितश्च॥हयहृद
यमतिज्ञःस्थानदंडावपातीसखलुतुरगयोक्तापूज्यतेपार्थिवेंद्रैः॥
॥८॥ब्राह्मणंभक्तिदानेनसौम्येनक्षत्रियंतथा॥वैश्यंशब्देनदंडेन
शूद्रंदंडेनवाहयेत्॥९॥द्वेषितेस्खलितेभीतेतथाचोन्मार्गगा
मिनि॥कुपितेभ्रांतचित्तेचषट्सुदंडंनिपातयेत्॥१०॥द्वेषितेस्कं
धमुद्दिष्टंस्खलितेजघनांतरं॥भीतेवक्षस्थलंहन्याद्वक्त्रंचोन्मा
र्गगामिनि॥११॥कुपितेपुच्छसंस्थानंभ्रांतेजानुद्वयंतथा॥सर्व
स्यमाप्तदंडस्यदंडमेकंनिपातयेत्॥१२॥अस्थानेताडितेवा
जीवहून्दोषानवाप्नुयात्॥तावद्भवंतितेदोषायावज्जीवत्यसौह
यः॥१३॥अवाहिताविनश्यंतिसर्वकर्मक्षमाअपि॥कृशावा
धिपरीतांगाजायंतेस्यंतवाहनात्॥१४॥पंचधाराप्रवक्ष्यामिऋ
षिभिर्याप्रकीर्तिताः॥प्रथमाविक्रमाधाराद्वितीयापुलकास्मृता
॥१५॥तृतीयापूर्णकंठेचचतुर्थीत्वरितास्मृता॥पंचमीताडिता
षष्ठीनिरालंबाःप्रकीर्तिताः॥१६॥विक्रमागतिरित्युक्ताचातुः
पादीप्लुतास्मृताः॥मुखपादसमायुक्तापूर्णकंठीचसाभवेत्॥१७॥

॥१७॥ स्वेच्छयाचरिताधारात्ताडिताचैवपंचमी॥षष्ठीचैवतुया
धारास्वर्गलोकेषुतिष्ठति॥१८॥ यासंख्यारोमकूपाणांवाहकस्य
हयस्यच॥ तावद्वर्षाण्वसेत्स्वर्गेहयपृष्ठेहृतोनरः॥१९॥ यंलोकं
वाजिपृष्ठेषुहतागच्छंतिमानवाः॥ तंलोकंनाधिगच्छंतिवड
वास्कहताश्वये॥२०॥ इतिअश्ववाहनविधिः॥ ७॥ ७॥७॥

अथवाजिनांवयोज्ञानासुज्ञीने

दंतोद्भेदंप्रवक्ष्यामिवाजिनांमुख्यलक्षणं॥ येनविज्ञानमात्रे
णवयोज्ञानंप्रतीयते॥१॥ षड्भिर्दंतैःसिताग्रैर्भवतिहयशिशु॰
स्तैःकषायैर्द्विरब्दःसंदंशैर्मध्यमास्यैःपतितसमुदितैस्त्रिश्चतुः
पंचवर्षः॥ संदंशानुक्रमेणत्रिकसमगुणिताःकालिकापीतशु
क्लाःकाचं - माक्षीकशंखाबहुचलनमतश्चावपातंचविद्धि॥
॥२॥ लघुत्वंमातृदोषेणपितृदोषेणमंदता॥ दौर्बल्यंस्वामिदो॰
षेणस्वदोषोनास्तिवाजिनां॥३॥ महाघोणामहाकायामहो
रस्कामहास्वनाः॥ स्निग्धांगाःसर्वदायेचतेषामायुर्भवेद्बहु॥४
कर्णाग्रेपीडितेयेषांसिंदूराभस्यदर्शनं॥ शोणितस्यभवेत्क्षि
प्रंतेवाहाश्चिरजीविनः॥५॥ नविष्करंतियोग्रासंसुभक्षाहृस्व
मेहनाः॥ महाशिरोललाटाश्चवाजिनश्चिरजीविताः॥६॥ न
भोजिघ्रंतियेवाहाभास्करार्पितदृष्टयः॥ पृथुकुक्षिकटीकक्षाः
सुनिद्राश्चिरजीविनः॥७॥ स्निग्धादीर्घाश्चवक्त्रश्चप्रोथस्या
यस्यवाजिनः॥ भवंतिविपुलारेखास्तंविद्याच्चिरजीविनं॥८॥
अर्धप्रोतस्थितारेखात्हृदयेयस्यवाजिनः॥ तस्यमृत्युःसमु
द्दिष्टोदशमंप्राप्यवत्सरं॥९॥ अंगुलायांदशार्धनवर्षाणांतस्य
जीवितं॥ जीवेत्त्रयोदशाब्दानियस्यस्याच्चतुरंगुलाः॥१०॥ विन
तःपूर्वकायेनस्थूलजानुश्चयोहयः॥ सूनाक्षिकूटस्तब्धास्यः
स्वल्पायुःपरिकीर्तितः॥११॥ जयदेवस्यैते॥ समाषष्टिर्द्विघ्नाम॰
नुजकरिणांपंचचनिशाहयानांद्वात्रिंशत्खरकरभयोःपंच॰
ककृतिः॥ पंचाब्दाख्यंवृषमहिषयोर्द्वादशाब्दंशुनःस्याच्छा॰

गाद्दीनांदशकसहिताआयुषोयंप्रकारः॥१२॥ कस्यापि॥ छ॥

अथौषधानिवाजिनांकृते

व्योषाजातिविडंगहिंगुकुटजत्वक्केतकीसैंधवैःश्यामासर्षप
दीप्यकाद्दशगुणंमांसंरसोनासमं॥ संधायाम्लरसैर्दभेनसततंयो
विद्युदाख्यामिमांसप्तिःसप्तयुगाब्दिकोहृद्यानसंपादयास्यामयान्
॥१॥ इतिबिज्जुलीनलस्य॥ दूर्वान्वितंयवानीरंत्रिशिरंसर्वदा
सुभं॥ हरीतकीहितानित्यंलवणंत्रिदिनोतरे॥२॥ छ ॥छ॥

अथाश्वपरीक्षा

असितगुरुचतुष्कःश्यामलग्रंथिपादःस्रवतिकरसमीपेमूत्र
धारांसवेगं॥ दशनचलखलीनःकुर्कुटस्कंधबंधःकिटिवरक
ठिनोरुर्दूरगःस्यात्तुरंगः॥१॥ शार्ङ्गधरस्यैते॥ सबलविपुलका
योभर्तुरादेशवर्तीसमरविजयसंपत्कारकस्यात्तुरंगः॥ विकस
दसितनेत्रःस्निग्धगंभीरहेषास्त्वरितचतुरगामीवायुवेगःसस
त्वाः॥२॥ इतिश्रीवृ॰शार्ङ्ग॰वि॰पद्धत्यांतुरगप्रशंसापरिच्छेदः

अथखड्गलक्षणं

खड्गाल्लक्ष्मीस्तथाराज्यंयशःखड्गादवाप्यते॥ खड्गादिवैरनाशं
चयत्नतामपि द्ध्महे॥१॥ नकुलस्य॥ अथलक्षणानि॥ ॥
लोहानांलक्षणंवक्ष्येयथोक्तंमुनिपुंगवैः॥ निरंगसांगभेदेनते
लोहाविविधामताः॥३॥ निरंगाःकांचिपांड्यादिभेदाद्बहुविध
मताः॥ असिकर्मकृतेशस्तानानाव्याधिविनाशनाः॥३॥ व
क्ष्येतेषांयशोयस्मात्सांगाःखड्गादिकर्मसु॥ नामभेदेनचिन्हा
निलोहानामभिदध्महे॥४॥ क्षुद्रांगंसुदृढंयस्यनीलमीषत्प्र
तीयते॥ रोहिणींतांविजानीयात्तत्क्षणेबहुवेदना॥५॥ नीलपिं
डंसमांगंचनीलंपिंडंविदुर्बुधाः॥ मयूरकंठसंस्थानमंगंयस्यप्रती
यते॥६॥ मयूरग्रैवकंलोहंतंविदुर्मुनिपुंगवाः॥ नागकेसरपुष्पा
भमंगंयस्यप्रतीयते॥७॥ मयूरवज्रकंप्राहुर्लोहशास्त्रविदोः
जनाः॥ यस्मिंस्तित्तिरपक्षाभमंगंलोहेप्रतीयते॥८॥ दुर्लभं

तन्महामूल्यंनिन्निरांगंसुपाकजं॥स्रुवर्णसदृशाकारात्वंग
भूमिःप्रतीयते॥९॥सुवर्णवज्रकंविंद्याद्बहुमूल्यंमहागुणं॥
अविच्छिन्नंसुसूक्ष्मांगंदूर्वाभांगमपाकजं॥१०॥यस्मिन्शै
वालमालानमाहुस्तंमुनिपुंगवाः॥मुल्कंपार्श्वद्वयंयस्यमध्ये
स्वर्णमयांगकं॥११॥धूमवत्सीमसंस्थानंमौषलंवज्रकंविदुः
॥मृणालनालप्रतिमंविवरैरग्रसंस्थितैः॥१२॥कंकोलवज्रं
कंप्राहुःस्वर्णकंवज्रचिंतकाः॥ अंगंप्रतीयतेयत्रबहुग्रंथिसमं
न्वितं॥१३॥दुर्लभंतन्महामौल्यंग्रंथिवज्रकमुच्यते॥ लोहार्ण
वस्येते॥रूप्यामत्रसमाभूमिरंगंश्वेतंप्रतीयते॥१४॥तंधवल
गिरिंपांडं---पांडिज्ञाःप्रवदंतिहि॥ तन्वीपत्रावलीकालासै
वर्णांगासिपत्रिका॥प्राहुःकालगिरिःपांडिलोहशास्त्रविशार
दाः॥१५॥धारासुभ्राभवेद्यस्यमध्यंकज्जलसन्निभं॥कृष्णारं
गेश्वितंगात्रंविद्यात्कज्जलगात्रकं॥१६॥सूक्ष्मं रजतपत्राभ
मंगंकृष्णासिपत्रिका॥कुटीरकःसमाख्यातस्तत्क्षमेश्वपथु
र्भभवेत्॥१७॥केतकीपत्रसदृशमंगंयस्यप्रतीयते॥विंद्या
त्केतकिवज्रंतुवारांलोहंप्रचक्षते॥१८॥निरंगंरोप्यपत्राभमीष
न्नीलनिभंचयत्॥ दुर्लभंतन्महामूल्यंकांतिलोहंप्रचक्षते॥१९
॥अंगंदमनपत्राभमंगेयस्मिन्प्रतीयते॥विद्याद्दमनवक्रंतु
तीक्ष्णधारंमहागुणं॥२०॥कृष्णाभूमिसुवर्णाभमीषद्रूक्षांग
संगतं॥डाहुनीवज्रकेविंद्यात्कालसंज्ञमथापरे॥२१॥ऊर्ध्वगं
कपिलाभासमंगंयस्मिन्प्रतीयते॥ नकुलांगंतुतंविद्यात्सर्श
स्तस्याहिनाशनं॥२२॥ आसीकामालिकायस्यक्षुद्रांगंकुंड
लीकृतं॥ क्षुद्रवज्रकनामानंप्राहनागार्जुनोमुनिः॥२३॥खड्ग
कोशस्य॥अंतर्गाढंचिन्हहीनंविशालंमध्येस्थूलंस्थूलधारा
तितीक्ष्णं॥रक्षोवक्षःछेदनार्थंमहांतंकृत्वाखड्गंदेवराजोतिहृ
ष्टः॥२४॥ वामनाख्यंमहांतंतुयेनतंतुर्नजायते॥छेदेगाढंचि
न्हहीनंप्राहुःखड्गंविचक्षणाः॥ २५॥ एरंडबीजप्रतिममंगंय

स्मिन्वनीयते॥महिष्याख्यःसवैखड्गोनीलमेघसमच्छविः॥२६॥पृष्ठेयस्मिन्भवेत्खड्गेशरीरंप्रतिबिबितं॥अंगपत्राभिधंखड्गंप्राहुखड्गंविचक्षणाः॥२७॥यस्यांगेस्थूलरेखाघनमसृणरुचिःसर्वतोव्याप्यतिष्ठेत्धारातीक्ष्णातिसूक्ष्माप्रविशतिरुधिरस्पर्शमात्रेणखड्गः॥यस्यांभःपीयमानंशमयतिनिखिलंव्याधिमाधिंसमग्रंवैरिश्रेणींविशंतांप्रवदतिगिरिशोवज्रमेतद्गजादि॥२८॥यंप्राप्यक्षितिपःसमग्रधरणींशास्तिप्रशांतद्विषत्सार्थःसार्थःकृतार्थीकृतनिखिलकुलःसंपदावर्धमानः॥यस्मिंल्लक्ष्मीःस्थिरात्मावसतिरतिपतिंसर्वलोकाधिनाथंहत्वातस्मात्प्रयत्नादयमतुलगुणःपूजनीयोनरेंद्रैः॥२९॥लोहरत्नाकरस्येते॥गुणदोषाश्चखड्गानांवक्ष्यंतेक्रमशोमया॥यान्विज्ञायबुधःकुर्यात्खड्गजालविवेचनं॥३०॥अविज्ञातोधृतःखड्गःशुभसंपत्तिनाशकः॥विज्ञातःसकलैश्वर्यदायकोभवतिप्रभोः॥३१॥तस्मात्तेषांगुणान्वक्ष्येयथोक्तंमुनिपुंगवैः॥समेते॥॥अथगुणाः॥यस्ययस्यतुयच्चिन्हंनच्चेत्सर्वांगसुंदरं॥तंखड्गमुत्तमंप्राहुःसर्वसंपत्तिकारकं॥३३॥अर्धचंद्राकृतिर्यस्मिन्खड्गेस्वाभाविकीभवेत्॥अपिदोषसहस्राणिहंतिचंद्रस्तमोयथा॥३४॥गदाचक्रंतथाशूलंडमरुर्मंडलंतथा॥यत्रस्वाभाविकंखड्गेसखड्गोनृपदुर्लभः॥३५॥एकवर्णोभवेद्यस्तुएकलक्षणलक्षितः॥सखड्गराजोनृपतेर्विज्ञेयःशुभकारकः॥३६॥पीतंनीलंतथाकृष्णंसक्तुबीजाकृतिंतथा॥यच्चदाडिमबीजाभंतद्वज्रप्रवरंविदुः॥३७॥निंबकल्कोभवेद्यत्रदिवारात्रंविलेपिनः॥मधुरोवधुवर्णाभःसखड्गोदेवदुर्लभः॥३८॥आहतेयत्रमधुरोध्वनिःसमुपजायते॥पूज्यःसखड्गोनृपतेःशत्रुसंचयनाशनः॥३९॥कांस्यस्वनइवाभातियस्मिन्खड्गेहतेध्वनिः॥खड्गोत्तमंतंवदतिगिरीशाःशुभवर्धनं॥४०॥यस्मिन्खड्गेशरीरंप्रतिफलतियथाखड्गराजोभिवंद्योवंद्योयं

दैवहृंदैरपियदिसंभवेदर्धचंद्रोपपन्नः॥नानावर्णैर्युतश्चेत्संभव
तिनृपतेःशत्रुनाशैकहेतुः— सेतुर्लक्ष्मीप्रवाहेनिखिलरिपुकुल
ध्वंसनेधूमकेतुः॥४१॥लोहरत्नाकरस्य॥नव्यंनीतिमिरद्युतिंकृ
तवतीप्रत्यर्थिचक्रव्यथामेषाभार्गवतावकीविजयतेनिस्त्रिंश
धारानिशा॥युद्धक्रुद्धविपक्षपक्षविदलत्कुंभींद्रकुंभस्थलभ्र
श्यन्मौक्तिककैतवेनपरितस्तारावलींवर्षति॥४२॥धरणिधरनि
जामशाहयुष्मत्करकरवालकरालकालसर्पः॥द्विषदसुपवनं
निपीयपीनोदिशिदिशिमुंचतिकंचुकंयशस्ते॥४३॥सिक्तायां
वीरकंठस्थलवहलगलद्रक्तधाराबुवर्षैर्मोद्यन्मातंगकुंभोद्द
लनविलुलितैर्मौक्तिकैःपुष्पितायाः॥संग्रामोद्यानभूमौतुरग
खुरपुटोत्खानकृष्टस्थलायांजातंतेखड्गवल्ल्याःफलमतुलर
सास्वादलभ्यंजयश्रीः॥४४॥हस्तांभोजालिमालानखशशिरुचि
रश्यामलच्छायवीचिस्तेजोग्निर्धूमधाराःवितरणकरिणोगंड
दानप्रणाली॥वीरश्रीवेणिदंडोलवणिमसरसीबालशैवालव
ल्लीवेल्लत्त्वंभोधरश्रीरकवरधरणीपालपाणौकृपाणी॥४५॥स
पींवेषाकृपाणीतवभुजभुजगासंगतःसंगरादौसद्यःकृत्तारि
खंडच्युतरुधिररजोयोगमभ्यावहंती॥हप्यद्दानांबुपूरोत्क
टकरिघटनागंडशैलेषुलानासूतेसद्यःकिलांडान्यतिविमल
गलद्भूरिमुक्ताच्छलेन॥४६॥वंगालिंदासमवतःशुभनामवर्णाः
पंचेषुपंचविशिखंनिनितंबिनीषु॥आणंतिबंधुषुविरोधिषुपां
डवंतिदेवद्रुमंतिकविपंडितमंडलीषु॥४७॥नपक्षवृत्तिर्नसप
क्षवृत्तिर्विपक्षवृत्तिःकरवालधूमः॥तथापितेभूमिपतेजगत्सां
भतापवन्हिप्रमितिंकरोति॥४८॥कुरंगास्यावेणींसुभगविपरी
तेरतिविधावधिस्कंधंहस्ताकिमपिनिपतंतीमरिभटः॥अधिग्री
वंयुष्मत्सबलकरवालव्यतिकरंस्मरन्नेवत्रस्तव्योविरमतिपरी
रंभरभसात्॥४९॥पर्यंकोराजलक्ष्म्याहरितमणिमयःपौरुषा
ब्धेस्तरंगःसंग्रामत्रासताम्यन्मुरलपतियशोहंसनीलांबुवाहः

॥भगनप्रत्यर्थिवंशोल्वणविजयकरिस्नानदानांबुपट्टःखड्गःक्ष्मासौविदल्लःसमितिविजयतेमालवाखंडलस्य॥ ५०॥ राजन्वीरविपक्षलक्ष्मसुवधूवैधव्यदीक्षागुरुःसंग्रामाध्वरकर्ममर्मकुशलःप्रत्यर्थिपृथ्वीभुजां॥प्राणानर्घ्यमणेर्मयाःप्रहरणंनाकारि किंतुप्रभोभ्रूभंगेनतचेतिदिव्यमभतत्कोशंसखड्गःपरः॥५१॥ ७॥

अथखड्गदोषाः

खड्गेषुलक्षणंयद्यद्येषुयेषुप्रकाशितं॥तच्चुष्टंप्रभुसंपत्त्यैमिश्रितंशत्रुसंपदे॥१॥ यस्याधोदृश्यतेचिन्हंमध्येयेनप्रकाशते॥स्वहितार्थेनगृण्हंतितंखड्गंनरपुंगवाः॥२॥ यस्याग्रेदृश्यतेचिन्हंमध्येनाधोपिदृश्यते॥खड्गंमध्यगुणंप्राहुःखड्गशास्त्रविशारदाः॥३॥अर्धार्धेलक्षणंयस्यपरार्धेनैवदृश्यते॥अधमःसभवेत्खड्गःक्षितीशानांभयावहः॥४॥ऊर्ध्वार्धेलक्षणंयस्यनाधोर्धेलक्षणंभवेत्॥तंखड्गंमध्यमंप्राहुःप्रवीणमतयोबुधाः॥५॥तिर्यग्यस्यभवेच्चिन्हमपिसर्वांगगोचरं॥खड्गाधमंतंनृपतिर्दूरादेवविवर्जयेत्॥६॥तिर्यक्चिन्हमधोर्धेस्यादुपर्यर्धेनवाभवेत्॥ नापकृष्टंनप्रकृष्टंतंप्राहुःखड्गकोविदाः॥७॥अर्धार्धेवर्णएकःस्यादूर्ध्वार्धेभिन्नवर्णकः॥ वर्णसंकरवान्खड्गोनृपाणांभयवर्धनः॥८॥आहतेयत्रखड्गेस्याद्ध्वनिःकाकस्वरोपमः॥अंआकारध्वनिर्वास्यात्सवर्ज्योनरपुंगवैः॥९॥ इतिनिखिलमुदारमर्थसार्थंप्रणिहितमेकमिहैवखड्गशास्त्रे॥गिरिशममिदंनिषेव्यचक्रेक्षितिपतिमंत्रिसमूहवर्ती॥१०॥ इतिदोषाः॥

अथखड्गप्रशंसा

अतःपरंप्रवक्ष्यामिखड्गलक्षणमुत्तमं॥प्रधानदेहसंभूतैर्दैत्यास्थिभिररिंदम॥१॥लोहंप्रधानंखड्गार्थंप्रशस्तंतद्विशेषतः॥खटिखट्टररीषिकवंशमूर्पारकेषुच॥२॥विदेहेषुतथांगेषुमध्यमग्रामवेदिषु॥सहग्रामेषुनीचेषुतथाकालंजरेषुच॥३॥ लोहप्रधानंतंज्ञानेखड्गानांशृणुलक्षणं॥खटीखट्टरजातायेदर्शनीयास्तुतेमताः

॥४॥ कायच्छिदःस्वार्षिकार्थेमर्मज्ञागुरवस्तथा॥तीक्ष्णाछेदसहावंगादृढाःसूर्पारकोद्भवाः॥५॥ असहाश्चैवविज्ञेयाःप्रभावेताविदेहजाः॥अंगदेशोद्भवास्तीक्ष्णाःसहस्ताःस्कदृढास्तथा॥ ॥६॥ लघवश्चतथातीक्ष्णामध्यमग्रामसंभवाः॥ असारालघवस्तीक्ष्णावेदिदेशसमुद्भवाः॥७॥ सहग्रामोद्भवाःखड्गाःसुतीक्ष्णालघवस्तथा॥निर्व्रणानिर्मलास्तीक्ष्णाश्चीनदेशसमुद्भवाः ॥८॥ कालिंजराःकालमहास्तेषांवक्ष्यामिलक्षणं॥शतार्धमंगुलानांतुखड्गंश्रेष्ठंप्रकीर्तितं॥९॥ तदर्धमध्यमंज्ञेयंततोहीनंनकारयेत्॥प्रमाणाभ्यधिकंचैवठत्रवेशान्तथैवच॥१०॥ दीर्घःसुमधुरःशब्दोयस्यखड्गस्यभार्गवे॥किंकिणीसदृशस्तस्यधारणंश्रेष्ठमुच्यते॥११॥ खड्गःपद्मपलाशाभोमंडलाग्रश्चशस्यते॥करवीरपलाशाग्र्यःसदृशश्चविशेषतः॥१२॥ महीघृतसुगंधाश्चपद्मोत्पलसुगंधिनः॥ वर्णतश्चोत्पलाकाराःसवर्णागगनस्यच॥१३॥ समांगुलस्थाःशस्यंतेव्रणाखड्गेषुभार्गव॥श्रीवृक्षपर्वताकारालिंगपद्मनिभाश्चये॥१४॥ मंगल्यानांतथान्येषांसदृशायेचभार्गव॥काकोलूकसवर्णाभाविषमांगुलिसंस्थिताः॥१५॥ वंशानुगाःप्रशस्ताश्चनशस्तास्तेकदाचन॥खड्गेनपश्येद्वदनंवृथाविवृणुयान्नच॥१६॥ नचास्यकथयेन्मूल्यंजातिदेशंकथंचन॥उच्छिष्टोनस्पृशेत्खड्गंनिशिकुर्यान्नशीर्षके॥१७॥ दिवाचपूजयेदेनंगंधमाल्यादिसंपदा॥खड्गंप्रशस्तंमणिहेमयुक्तंकोशेसदाचंदनचूर्णयुक्तं॥संस्थापयेद्भूमिपतिःप्रयत्नाद्रक्षेत्तथैनंस्वशरीरवच्च॥१८॥ श्रीविष्णुधर्मोत्तरभाषितानिचिह्नानिखड्गस्यशुभाशुभानि॥विज्ञायभूमीपतयःसदैवसंधारयेयुःसमुदेक्षपाणं ॥१९॥ इतिश्रीबृ·शा॰ खड्गप्रशंसापरिच्छेदः

अथधनुर्वेदः

ईश्वरोक्ताद्धनुर्वेदाद्व्यासस्यापिसुभाषितात्॥पद्यान्याकृष्यरचितोग्रंथःसंक्षेपतोमया॥१॥ विनाशार्ङ्गधरादन्योधनुर्वेदा

र्थतत्त्ववित्॥यतःस्वप्नेनिशिप्राप्ताशिवातत्त्वविचारणात्॥२॥ अतःसंदेहदोलायांदोलनीयंनमानसं॥ग्रंथेस्मिंश्चापचतुरैर्वीरचिंतामणौक्वचित्॥३॥ यस्याभ्यासप्रसादेननिष्पद्यंतेधनुर्धराः॥ जेतारःपरसैन्यानांतस्याभ्यासोविधीयतां॥४॥ एकोपियत्रनगरेप्रसिद्धःस्याद्धनुर्धरः॥ ततोयांत्यरयोदूरान्मृगाःसिंहगृहादिव॥५॥ ॥इतिधनुर्धरप्रशंसा॥ ७॥ ७ ॥ ७॥ ७॥

अथधनुर्दानविधिः

आचार्येणधनुर्देयंब्राह्मणेसुपरीक्षिते॥लुब्धेधूर्तेकृतघ्नेचमंदबुद्धौनदापयेत्॥१॥ ब्राह्मणायधनुर्देयंखड्गंवैक्षत्रियायच॥वैश्यायदापयेत्कुंतंगदांशूद्रायदापयेत्॥२॥धनुश्चक्रंचकुंतंचखड्गंचक्षुरिकांगदा॥सप्तमंबाहुयुद्धंस्यादेवंयुद्धानिसप्तधा॥३॥समैते॥

अथाचार्यलक्षणं

आचार्यःसप्तयुद्धःस्याच्चतुर्भिर्भार्गवःस्मृतः॥ द्वाभ्यांचैवभवेद्योद्धाएकेनगणकोभवेत्॥१॥ हस्तःपुनर्वसुःपुष्योरोहिणीचोत्तरात्रयं॥ अनूराधाश्विनीचैवरेवतीदशमीतथा॥२॥ जन्मस्थेचतृतीयेचषष्ठेवैसप्तमेतथा॥दशमेकादशेचंद्रेसर्वकार्याणिकारयेत्॥३॥तृतीयापंचमीचैवसप्तमीदशमीतथा॥त्रयोदशीद्वादशीचतिथयस्तुशुभामताः॥४॥सूर्यवारःशुक्रवारोगुरुवारस्तथैवच॥एतद्वारत्रयंधन्यंप्रारंभेशस्त्रकर्मणां॥५॥एभिर्दिनैस्तुशिष्यायगुरुःशस्त्राणिदापयेत्॥ संतर्प्यदानहोमाभ्यांसुरान्स्वाहाविधानतः॥६॥ब्राह्मणान्भोजयेत्तत्रकुमारीश्चाप्यनेकशः॥ तापसानर्चयेद्भक्त्यायेचान्येशिवयोगिनः॥७॥ अन्नपानादिभिश्चैववस्त्रालंकारभूषणैः॥गंधमाल्यैर्विचित्रैश्चगुरुंतत्रप्रपूजयेत्॥८॥कृतोपवासःशिष्यस्तुधृताजिनपरिग्रहः॥ बद्धांजलिपुटस्तत्रयाचयेद्गुरुतोधनुः॥९॥ अंगन्यासंततःकार्यंशिवोक्तंसिद्धिमिच्छता॥आचार्येणचशिष्यस्यपापघ्नंविघ्ननाशनं॥१०॥शिखास्थानेन्यसेदीशंबाहुयुग्मेचकेशवं॥ब्रह्माणंनाभिमध्येतुजंघयोश्चगणाधिपं

॥११॥ प्रतिमंत्रं॥ ॐह्रौंशिखास्थानेशंकरायनमः॥ ॐह्रौंला
ह्रोःकेशवायनमः॥ ॐह्रौंनाभिमध्येब्रह्मणेनमः॥ ॐह्रौंजं
घयोर्गणपतयेनमः॥ ॥ईदृशंकारयेन्न्यासंयेनस्त्रेयोअविध्य
ति॥ अन्येपिदुष्टामंत्रेणनहिंसंतिकदाचन॥१२॥ शिष्यायमा
तुषंचापंधनुर्मंत्राभिमंत्रितं॥ कांडात्कांडास्त्रमंत्रेणदद्याद्वेद
विधानतः॥१३॥ प्रथमंपुष्पवेशंचफलहीनंनपत्रिणा॥ ततःफ
लयुतेनैवमत्स्यवेधंचकारयेत्॥१४॥ मासवेधंततःकुर्यादेवं
वेधोभवेत्त्रिधा॥ एतैर्वेधैःकृतैःपुंसांशराःस्युःसर्वसाधकाः॥१५
॥वेधनेचैवमांसस्यशरपातोयदाभवेत्॥ पूर्वदिग्भागमाश्रि
त्यतदास्याद्विजयीसुखी॥१६॥ दक्षिणेकलहोघोरोविदिश
गमनंपुनः॥ पश्चिमेधनधान्यंचसर्वेचैवोत्तरंशुभं॥१७॥ ईशा
न्यांपतनंदुष्टंविदिशोन्याश्चशोभनाः॥ हर्षपुष्टिकराश्चैवसु
सिद्धिःसर्वकर्मणि॥१८॥ एवंवेधत्रयंकुर्याच्छंखदुंदुभिनि
स्वनैः॥ ततःप्रणम्यगुरवेधनुर्बाणान्निवेदयेत्॥१९॥ इतिध॰विधिः

अथचापप्रमाणं

प्रथमंयौगिकंचापंयुद्धचापंद्वितीयकं॥ निजबाहुबलोन्माना
त्किंचिदूनंशुभंधनुः॥१॥ वरंप्राणाधिकोधन्वीनतुप्राणाधिकं
धनुः॥ धनुषापीड्यमानस्तुधन्वीलक्ष्यंनपश्यति॥२॥ अतो
निजबलोन्मानंचापंस्याच्छुभकारकं॥ देवानामुत्तमंचापंत
तोन्यूनंचमानवं॥३॥ अर्धपंचसहस्रंतुश्रेष्ठंचापंप्रकीर्तितं॥
तद्विज्ञेयोधनुर्दिव्यंशंकरेणधृतंपुरा॥४॥ तस्मात्परशुरामेण
ततोद्रोणेनधारितं॥ द्रोणाद्गृहीतंपार्थेनततःसात्यकिनाधृतं
॥५॥ कृतयुगेमहादेवस्त्रेतायांचापिराघवः॥ द्वापरेद्रोणवि
प्रश्चदैवंचापमधारयत्॥६॥ चतुर्विंशांगुलोहस्तश्चतुर्हस्तं
धनुःस्मृतं॥ तद्भवेन्मानवंचापंसर्वलक्षणसंयुतं॥७॥ त्रिपर्वंपं
चपर्वंवासप्तपर्वंप्रकीर्तितं॥ नवपर्वंचकोदंडंचतुर्धाशुभकार
कं॥८॥ चतुष्पर्वंचषट्पर्वंअष्टपर्वंविवर्जयेत्॥ केषांचिच्चभवे

च्चापोवितस्तिनवसंमितः॥९॥ अतिजीर्णंचपक्वंचज्ञातिघृष्टंतथैवच॥दग्धंछिद्रंनकर्तव्यंबाह्याभ्यंतरहस्तकं॥१०॥गुणहीनेगुणाक्रांतंकांडदोषसमन्वितं॥गलग्रंथिनकर्तव्यंतलमध्येतथैवच॥११॥ अपक्वंभंगमायातिअतिजीर्णंतुकर्कशं॥ज्ञातिघृष्टंतुसोद्वेगंकलहोबांधवैःसह॥१२॥दग्धेनदह्यतेवेश्मछिद्रंयुद्धविनाशनं॥बाह्येलक्ष्यंनलभ्येततथैवाभ्यंतरेपिच॥१३॥हीनेतुसंधितेबाणेसंग्रामेभंगकारकं॥आक्रांतेतुपुनःक्वापिनलक्ष्यंप्राप्यतेदृढं १४॥ गलग्रंथितलग्रंथिधनहानिकंधनुः॥एभिर्दोषैर्विनिर्मुक्तंसर्वकार्यकरंस्मृतं॥१५॥ शार्ङ्गंपुनर्धनुर्दिव्यंविष्णोःपरममायुधं॥वितस्तिसप्तमंमानंनिर्मितंविश्वकर्मणा॥१६॥ नस्वर्गेनचपातालेनभूमौकस्यचित्करे॥ तद्धनुर्वशमायातिसत्वैकंपुरुषोत्तमं॥१७॥पौरुषेयंतुयच्छार्ङ्गंबहुवत्सरशोभितं॥वितस्तिभिःसार्धषड्भिर्निर्मितंधनुसाधनं ॥१८ प्रायोयोज्यंधनुःशार्ङ्गंगजारोहाश्वसादिनां॥रथिनांचपदातीनांवांशंचापंप्रकीर्तितं॥१९॥ इतिधनुःप्रमाणं॥ ❀॥ ❀॥

अथगुणलक्षणानि

गुणानांलक्षणंवक्ष्येयादृशंकारयेद्गुणं॥पट्टसूत्रोगुणःकार्यःकनिष्ठामानसंमितः॥१॥ धनुःप्रमाणोनिःसंधिःसुदृढैस्त्रिगुणतंतुभिः॥वर्तितःस्याद्गुणःश्लक्ष्णःसर्वकर्मसहोयुधि॥२॥ अभावेपट्टसूत्रस्यहारिणीस्नायुरिष्यते॥गुणार्थमपिवाग्राह्यास्नायुर्गोमहिषीगवां॥३॥ तत्कालहतगोकर्णश्चर्मणाच्छागलेनवा॥निर्लोमतंतुसूत्रेणकुर्याद्वागुणमुत्तमं॥४॥ पक्ववंशत्वचःकार्योगुणास्तस्याद्वरोदृढः॥पट्टसूत्रेणसन्नद्धःसर्वकर्ममहोयुधि॥५॥ प्राप्तेभाद्रपदेमासेत्वगर्कस्यप्रशस्यते॥तस्मात्तत्रगुणःकार्यःपवित्रःस्याद्वरोदृढः॥६॥ वृत्तार्कसूत्रतंतूनांहस्तात्वष्टादशःस्मृताः॥ तद्वृत्तंत्रिगुणंकार्यंप्रमाणेयंगुणोस्मृतः॥७॥ ॥इतिगुणलक्षणं॥७॥

अथशरलक्षणानि

अतःपरंप्रवक्ष्यामिशराणांलक्षणंशुभं॥स्थूलंनचातिसूक्ष्मंच नपक्कंनकुभूमिजं॥१॥हीनंग्रंथिसुपक्कंचपांडुरंसमयाहृतं॥ ॥हीनग्रंथिविदीर्णंचवर्जयेदीदृशंशरं॥२॥कठिनंवर्तुलंकांडंगृण्हीयात्सुप्रदेशजं॥द्वौहस्तौमुष्टिनाहीनौदैर्घ्यस्थौल्येकनिष्ठिका॥३॥विधेयाशरमानेषुयंत्रेष्वाकर्षयेत्ततः॥काकहंसशशादीनांमत्स्यादक्रौंचकेकिनां॥४॥गृध्राणांकुरराणांचपक्षाएतेसुशोभनाः॥एकैकस्यशरस्यैवचतुःपक्षाणियोजयेत् ॥५॥षडंगुलिप्रमाणेनपक्षछेदंचकारयेत्॥ दशांगुलमितंपक्षंशार्ङ्गचापस्यमार्गणे॥६॥ योज्याहृढाश्चतुःसंख्याःसन्नद्धास्नायुतंतुभिः॥शराश्चत्रिविधाज्ञेयाःस्त्रीपुमांश्चनपुंसकाः ॥७॥अग्रेस्थूलाभवेन्नारीपश्चात्स्थूलोभवेत्पुमान्॥समंनपुंसकंज्ञेयंतल्लक्षार्थंनियोजयेत्॥८॥दूरंपातंसुवत्यांचपुरुषोभेदयेद्दृढं॥ ॥इतिशरलक्षणानि॥ छ ॥ छ ॥ ❀ ॥

अथफललक्षणानि

फलंतुशुद्धलोहस्यसुधारंतीक्ष्णमक्षतं॥योजयेद्वज्रलेपेनशरेपक्षानुमानतः॥१॥ आरामुखंक्षुरप्रंचगोपुच्छंचार्द्धपुच्छकं ॥सूचीमुखंचभल्लंचवत्सदंतद्विभल्लकं॥२॥ कर्णिकंकाकतुंडंचतथान्यान्यप्यनेकशः॥फलानिदेशदेशेषुभवंतिबहुरूपतः॥३॥आरामुखेनकवचंत्वर्धचंद्रेणमस्तके॥आरामुखेनवैचर्मक्षुरप्रेक्षणकार्मुकं॥४॥भल्लेनत्हृदयंवेध्यंद्विभल्लेनगुणःशराः॥लोहंचकाकतुंडेनविद्धित्र्यंगुलसंमितं॥५॥ अन्यज्ञोपुच्छकंज्ञेयंशुद्धकोष्ठविनिर्मितं॥मुखेचलोहकंठेनविद्धमंगुलसंमितं॥६॥ ॥इतिफललक्षणं॥ छ ॥ छ ॥ छ॥ ❀ ॥

अथफलपायनं

फलस्यपायनंवक्ष्येदिव्योषधिविलेपनैः॥ येनदुर्भेद्यवर्माणिभेदयेत्तरुपर्णवत्॥१॥पिप्पलीसैंधवीकुष्ठंगोमूत्रेणतुपेषयेत्॥अ

तिशीतमनाविद्धंपीतंनष्टंतथौषधं॥ २॥ अनेनलेपयेच्छस्त्रं लिप्तंचाग्नौप्रतापयेत्॥ ततोनिर्वापितंतैलेलोहंतत्रविशिष्यते॥ ३॥ पंचभिर्लवणैःपिष्टंमधुसिक्तैःससर्षपैः॥ एभिःप्रलेपयेच्छस्त्रंलिप्तंचाग्नौप्रतापयेत्॥ ४॥ शिखिग्रीवानुवर्णाभंतप्तपीतंतथौषधं॥ ततस्तुविमलंतोयंपाययेच्छस्त्रमुत्तमं॥ ५

अथनाराचनालीकौ

सर्वलोहास्तुयेबाणानाराचास्तेप्रकीर्तिताः। पंचभिःपृथुलैःपक्षैर्युक्ताःसिध्यंतिकस्यचित्॥ १॥ नालीकलघवोबाणानलयंत्रेणनोदिताः॥ अत्युच्चदूरपातेषुदुर्गयुद्धेषुतेमताः॥ २॥ इ॰

अथस्थानमुष्ट्याकर्षणलक्षणानि

स्थानान्यष्टौविधेयानियोजनेभिन्नकर्मणां॥ मुष्टयःपंचसमाख्याताःव्यायाःपंचप्रकीर्तिताः॥ १॥ अग्रतोवामपादंचदक्षिणंचानुकुंचितं॥ आलीढंतुप्रकर्त्तव्यंहस्तद्वयसविस्तरं॥ २॥ प्रत्यालीढंप्रकर्तव्यंसव्यंचैवानुकुंचितं॥ दक्षिणेतुपुरस्तद्वतद्दूरपातेविशिष्यते॥ ३॥ पादौसविस्तरौकार्यौसमौहस्तप्रमाणतः विशाखस्थानकंज्ञेयंकूटलक्ष्यस्यवेधने॥ ४॥ समपादेसमौपादौनिष्कंपौचसुसंगतौ॥ असमेचपुरोवामेहस्तमात्रेणतवपुः॥ ५॥ आकुंचितोदृढौयत्रजानुभ्यांधरणींगतौ॥ दर्दुरक्रममित्याहुःस्थानकंदृढभेदने॥ ६॥ सव्यंजानुगतंभूमौदक्षिणंचसकुंचितं॥ अग्रतोयत्रसतव्यंतविद्याद्गरुडक्रमं॥ ७॥ पद्मासनंप्रसिद्धंस्यादुपविश्ययथाक्रमं॥ धन्विनांतत्त्वविज्ञेयंस्थानकंशुभलक्षणं॥ ८॥ इतिस्थानमुष्टिआकर्षणलक्षणानि॥ ४ ॥

अथगुणमुष्टयः

पताकावज्रमुष्टिश्चसिंहकर्णस्तथैवच॥ मच्छरीकाकतुंडीचयोजनीयायथाक्रमं॥ १॥ दीर्घातुतर्जनीयत्रआश्रितांगुष्ठमूलकं॥ पताकासाचविज्ञेयानलिकादूरमोक्षणे॥ २॥ तर्जनीमध्यमामध्यमंगुष्ठोविशतेयदि॥ वज्रमुष्टिस्तुसाज्ञेयास्थूलनाराचमोक्षणे

॥३॥ अंगुष्ठनखमूलेतुतर्जन्यग्रंसुसंस्थितं॥ मुत्सरीसाचविज्ञेयाचित्रलक्ष्यस्यवेधने॥४॥अंगुष्ठाग्रेतुतर्जन्यामुखंयत्रनिवेशितं॥काकतुंडीचसाज्ञेयासूक्ष्मलक्ष्येषुयोजिता॥५॥इतिमु·

अथधनुर्मुष्टिसंधानं

संधानंत्रिविधंप्रोक्तमधऊर्ध्वंसमंसदा॥योजयेत्त्रिःप्रकारंहिकार्येष्वपियथाक्रमं॥१॥अधश्चदूरपातित्वंसमेलक्ष्यंसुनिश्चलं॥दृढास्फोटंप्रकुर्वीतऊर्ध्वसंधानयोगतः॥२॥इतिध·मु·सं·

अथव्यायाः

कौशिकःकेशमूलेवैशरःशृंगेचसात्विकः॥श्रवणेवत्सकर्णश्चग्रीवायांभरतोभवेत्॥१॥ अंशकेस्कंधनामाचव्यायाःपंचप्रकीर्तिताः॥कैशिकश्चित्रयुद्धेषुअधोलक्ष्येषुसात्विकः॥२॥—वत्सकर्णःसविज्ञेयोभरतोदृढभेदने॥दृढभेदेचदूरेचस्कंधनामानमुद्दिशेत्॥३॥ ॥इतिव्यायाः॥ ॥ ❀ ॥ ❀ ॥ ❀ ॥

अथलक्ष्यं

लक्ष्यंचतुर्विधंज्ञेयंस्थिरंचैवचलंतथा॥चलाचलंद्वयचलंवेधनीयंक्रमेणतु॥१॥आत्मानंसुस्थिरंकृत्वालक्ष्यंचैवस्थिरंबुधः॥वेधयेत्त्रिःप्रकारंतुस्थिरवेधीसउच्यते॥२॥चलंयेवेधयेद्यस्तुआत्मनास्थिरसंस्थितः॥चलंलक्ष्यंतुतत्प्रोक्तमाचार्येणसुधीमता॥३॥धन्वीतुचलतेयत्रस्थिरलक्ष्येसमंततः॥चलाचलंभवेत्तत्रअप्रमेयमचिंतितं॥४॥उभावेवचलौयत्रलक्ष्यंचापिधनुर्धरः॥तद्धिज्ञेयंद्वयचलंश्रमेणबहुसाध्यते॥५॥श्रमेणास्खलितंलक्ष्यंदूरंचबहुभेदनं॥श्रमेणास्खलिताकृष्टिःशीघ्रसंधानकल्प्यते॥६॥श्रमेणचित्रयोधित्वंप्राप्यतेश्रमतोजयः॥तस्माद्गुरुसमक्षंहिश्रमःकार्योविजानता॥७॥प्रथमंवामहस्तेनयःश्रमंकुरुतेनरः॥तस्यचापक्रियासिद्धिरचिरादेवजायते॥८॥वामहस्तेतुसंसिद्धेपश्चाद्दक्षिणमारभेत्॥उभाभ्यांचश्रमंकुर्यात्नाराचैश्चशरैस्तथा॥९॥वामेनैवश्रमं

कुर्यात्तत्सिद्धेदक्षिणेकरे॥विशेषेनासमेनैवतयाव्यायेचकौशि
के॥१०॥उदितेभास्करेलक्ष्यंपश्चिमायांनिवेशयेत्॥ अपराह्णे
चकर्त्तव्यंलक्ष्यंपूर्वदिगाश्रितं॥११॥उत्तरेणसदाकार्यमवश्यम
वरोधकं॥संग्रामेणविनालक्ष्यंनकार्यंदक्षिणामुखं॥१२॥षष्टिध
न्वंतरेलक्ष्यंज्येष्ठंलक्ष्यंप्रकीर्तितं॥चत्वारिंशन्मध्यमंचविंशतिः
श्चकनिष्ठकं॥१३॥शराणांकथितंह्येतन्नाराचानामथोच्यते॥
चत्वारिंशत्तथात्रिंशत्षोडशैवभवेततः॥१४॥चतुःशतैश्चकांडा
नांयोहिलक्ष्यंविसर्जयेत्॥सूर्योदयेचास्तमयेसज्येष्ठोधन्विनां
भवेत्॥१५॥त्रिशतैर्मध्यमोबाणैर्द्विशताभ्यांकनिष्ठकः॥लक्ष्यं
चपुरुषान्मानंकुर्याच्चंद्रकसंयुतं॥१६॥ऊर्ध्ववेधीभवेज्ज्येष्ठो
नाभिवेधीचमध्यमः॥यःपादवेधीलक्ष्यस्यसकनिष्ठःस्मृतो
मया॥१७॥ ॥इतिलक्ष्यं॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥

अथानध्यायः

अष्टमीचअमावास्यावर्जनीयाचतुर्दशी॥पूर्णिमार्धदिनंयाव
न्निषिद्धास्सर्वकर्मसु॥१॥अकालेगर्जितेदेवेदुर्दिनंवाथवाभ
वेत्॥पूर्वकांडहतंलक्ष्यमनध्यायंप्रचक्षते॥२॥श्रमंचकुर्वतः
स्तत्रभुजंगोयदिदृश्यते॥अथवाभजतेचापोयदैवंश्रमकर्मणि
॥३॥त्रुट्यतेवागुणोयत्रप्रथमेबाणमोक्षणे॥श्रमंतत्रनकुर्वी
तशास्त्रेमतिमतांवर॥४॥ ॥इत्यनध्यायः॥ ❀ ॥ ❀ ॥

अथश्रमक्रियाः

क्रियाकलापान्वक्ष्यामिश्रमसाध्यान्तुविस्मिते॥येषांविज्ञानमा
त्रेणसिद्धिर्भवतिनान्यथा॥१॥प्रथमंचापमारोप्यचूलिकांबंधये
त्ततः॥स्थानकंतुततःकृत्वासंधानंचततःपरं॥२॥सलक्षाकृष्ट
चापेनभूमिवेधंनकारयेत्॥नमस्कुर्याच्छिवंविघ्नराजंगुरुंधनुः
शरान्॥३॥तुलनंधनुषश्चैवकर्तव्यंवामपाणिना॥ आदानंच
ततःकृत्वासंधानंचततःपरं॥४॥याचितव्यागुरोराज्ञाबाण
स्याकर्षणंप्रति॥प्राणवायुंप्रयत्नेनप्राणेनसहपूरयेत्॥ ५॥

कुंभकेणस्थिरंकृत्वाहुंकारेणविसर्जयेत्॥इत्यभ्यासक्रियाकार्याधन्विनासिद्धिमिच्छता॥६॥षण्मासात्सिध्यतेमुष्टिःशराःसंवत्सरेणतु॥नाराचास्तस्यसिध्यंतियस्यतुष्टोमहेश्वरः॥॥७॥पुष्पवद्धारयेद्बाणंसर्पवत्पीडयेद्धनुः॥धनवच्चिंतयेल्लक्ष्यंयदीछेत्सिद्धिमात्मनः॥८॥क्रियामिच्छंतिआचार्यादूरमिच्छंतिभार्गवाः॥राजानोदृढमिच्छंतिलक्ष्यमिच्छंतिचेतराः॥९॥जनानांरंजनंयेनलक्ष्यापातात्प्रजायते॥हीनेनापीषुणातस्मात्प्रशस्तंलक्ष्यवेधनं॥१०॥ ॥इतिश्रमक्रिया॥ ७ ॥ ७ ॥

अथलक्ष्यास्खलनविधिः

विशाखस्थानकेस्थित्वासमसंधानमाचरेत्॥गोपुच्छमुखवाभेनसिंहकर्णव्यमुष्टिना॥१॥ आकर्षेत्कौशिकव्यापेनशिखांश्चालयेत्ततः॥पूर्वापरौसमंकार्यौसमांशौनिश्चलौकरौ॥२॥चक्षुषीस्पंदयेन्नैवदृष्टिंलक्ष्येनियोजयेत्॥मुष्टिनाच्छादितंलक्ष्यंशरस्याग्रेनियोजयेत्॥३॥मनोदृष्टिगतंज्ञात्वाततोबाणंविसर्जयेत्॥स्खलत्येवंकदाचिन्नलक्ष्ययोधःकृतःश्रमः॥४॥इति॰

अथशीघ्रसंधानं

आल्हानंचैवतूणीरात्संधानंकर्षणंतथा॥क्षेपणंचत्वरायुक्तोबाणस्यकुरुतेतुयः॥१॥नित्याभ्यासवशात्तस्यशीघ्रसंधानताभवेत्॥इतिशीघ्रसंधानं॥ अथदूरपातित्वं॥मुष्ट्यापातकमावाणंस्त्रीचिन्हंदूरपातनं॥२॥ इतिदूरपातित्वं॥ ७ ॥ ७ ॥७॥

अथदृढभेदिता

प्रत्यालीढकृतेस्थानेअधःसंधानमाचरेत्॥दर्दुरस्थानमास्थायऊर्ध्वधारणमाचरेत्॥१॥स्कंधव्यायेनवज्रस्यमुष्ट्यापुंमार्गेणनच॥अत्यंतसौष्टवाद्धाक्षौर्जायतेदृढवेधिता॥२॥इति॰

अथहीनगतयः

सूचीमुखामीनपुच्छाभ्रमरीचतृतीयकः॥शराणांतिययस्तिस्रःप्रशस्ताःकथिताबुधैः॥१॥ कर्करोनतुचापेनयःकृष्टोहीन

मुष्टिना॥ मीनपुच्छागतिस्तस्यसायकस्यप्रकीर्त्तिता॥२॥सूचीमुखगतिस्तस्यसायकस्यप्रजायते॥ पश्चेविलोक्यतेयस्यअथवाहीनपक्षकं॥३॥भ्रमरीकथितात्वेषासद्भिस्तुभ्रमकर्मणि॥ऋजुत्वेनसमायातिक्षेप्यमानस्तुसायकः॥४॥इतिहीनगतयः

अथबाणानांलक्ष्यस्खलनगतयः

वामगादक्षिणाचैवऊर्ध्वगाऽधोगमातथा॥चतस्रोगतयःप्रोक्ताबाणस्खलनहेतवः॥१॥कंपतेगुणमुष्टिश्चमार्गणस्यहिपृष्ठतः॥संमुखीस्याद्धनुर्मुष्टिस्तदावामेगतिर्भवेत्॥२॥ग्रहणंशिथिलंयस्यऋजुत्वेनविवर्जितं॥पार्श्वेनुदक्षिणंयातिसायकस्यनसंशयः॥३॥मोक्षणेचैवबाणस्यचापमुष्टिरधोभवेत्॥गुणमुष्टिर्भवेदूर्ध्वंतदाधोगामिनीगतिः॥४॥इतिबाणानांलक्ष्यस्खलनविधिः

अथशुद्धगतयः

लक्ष्यबाणाग्रदृष्टीनांसंगतिस्त्वैक्यदाभवेत्॥तदानींमुष्टितोबाणोलक्ष्यान्नस्खलतिध्रुवं॥१॥निर्दोषःशब्दहीनश्चसममुष्टिर्द्वयोज्झितः॥भिनत्तिदृढवेधानिसायकोनास्तिसंशयः॥२॥स्थाकैष्टस्तेजितोयश्चसुमुष्टीगाढमुष्टितः॥नरनागाश्वकायेषुनसंतिष्ठतिमार्गणः॥३॥यस्यतृणसमाबाणायस्येंधनसमंधनुः॥यस्यप्राणसमामौर्वीसधन्वाधन्विनांवरः॥४॥ इतिशुद्धगतयः॥छ॥

अथदृढचतुष्कं

अयश्चवर्मगतिश्चैवमृत्पिंडंचचतुष्टयं॥योभिनत्तिहितस्येषुर्वज्रेणापिनधार्यते॥१॥साष्टांगुलिप्रमाणानिलोहपात्राणिकारयेत्॥तानिभित्वैकबाणेनदृढघातीभवेन्नरः॥२॥चतुर्विंशतिचर्माणियोभिनत्याशुगेनना॥तस्यबाणोगजेंद्रस्यकायंनिर्भिद्यगच्छति॥३॥भ्राम्यज्जलेघटोवेध्यश्चक्रेमृत्पिंडकंतथा॥भ्रमंतंवेधयेद्योहिदृढवेधीसउच्यते॥४॥ अयस्तुकाकतुंडेनचर्मधारामुखेनहि॥मृत्पिंडंचघटश्चैवविध्येत्सूचीमुखेनहि॥५॥

अथचित्रविधिः

बाणभंगंकृतावर्तंकाष्ठछेदनमेवच॥बिंदुकंगोलकयुगंयोवेत्ति
सयुगीभवेत्॥१॥लक्ष्यस्थानेधृतेकांडंसंमुखंछेदयेत्ततः॥
किंचिन्मुष्टिंविधायस्वांतिर्यग्हिफलकेषुणा॥२॥संमुखंवास
मायातितिर्यग्बाणनसंचरेत्॥शरंशरेणयःछिंद्याद्बाणछेदी
सजायते॥३॥इतिबाणभंगः॥ ॥अथवराटिकावर्तः॥काष्ठेस्व
केशंसंयम्यतत्रबध्वावराटिकां॥हस्तेनभ्राम्यमाणांचयोहंति
सधनुर्धरः॥४॥इतिवराटिकावर्तः॥अथकाष्ठछेदनं॥लक्ष्य
स्थानेन्यसेत्काष्ठंसार्द्रंगोपुच्छसन्निभं॥यःछिंद्यात्तंक्षुरप्रेण
काष्ठछेदीसजायते॥५॥इतिकाष्ठछेदनं॥लक्ष्येबिंदुंन्यसे
च्छुभ्रंशुभ्रबंधूकपुष्पवत्॥हंतितंबिंदुकंयस्तुचित्रयोधीस
जायते॥६॥इतिकाष्ठबिंदुकच्छेदनं॥अथगोलकयुगप्रभृति
चित्रविधिः॥काष्ठगोलयुगंक्षिप्तंदूरमूर्द्ध्वंपुरःस्थितैः॥असंप्रा
प्तंशरंपृष्ठेत्तन्नोपुच्छमुखेनहि॥७॥योहंतिशरयुग्मेनशीघ्रसं
धानयोगतः॥सस्याद्धनुर्भृतांश्रेष्ठःपूजितःसर्वपार्थिवैः॥८॥इ
गोलकयुगं॥अथधावल्लक्षणं॥रथस्थेनगजस्थेनहयस्थेनच
पत्तिना॥धावतावैश्रमःकार्योलक्षंहंतुंसुनिश्चितं॥९॥इतिधा

अथशब्दवेधित्वं

लक्ष्यस्थानेन्यसेत्कांस्यपात्रंहस्तद्वयांतरे॥ताडयेच्छर्कराभि
स्तेशब्दःसंजायतेततः॥१॥यत्रैवोत्पद्यतेशब्दःसम्यक्तत्र
विचिंतयेत्॥कर्णेंद्रियमनोयोगाल्लक्ष्यंनिश्चयतांनयेत्॥२॥
पुनःशर्करयातच्चताडयेच्छब्दहेतवे॥पुनर्निश्चयतांनेयंश
ब्दस्थानानुसारतः॥३॥ततःकिंचित्कृतंदूरेनित्यंनित्यंविधा
नतः॥लक्ष्यंसमभ्यसेद्धातेशब्दव्यधनहेतवे॥४॥ततोबाणे
नहन्यात्तदवधानेनतीक्ष्णधीः॥एतच्चदुष्करंकर्मभाग्यांक
स्यापिसिद्ध्यति॥५॥इतिशब्दवेधित्वं॥ ७ ॥ ७ ॥ ७ ॥

अथास्त्रविधिः

एवंश्रमविधिंकुर्याद्यावत्सिद्धिःप्रजायते॥श्रमेसिद्धेचवर्षासु

नैवग्राह्यंधनुःकरे॥१॥पूर्वाभ्यासस्यशस्त्राणामविस्मरणहेत
वे॥मासद्वयंश्रमंकुर्यात्प्रतिवर्षंशरदृतौ॥२॥ जातेचाश्वयुजे
मासेनवमीदेवतादिने॥पूजयेदीश्वरींचंडींगुरुंशस्त्राणिवाजि
नः॥३॥विप्रेभ्योदक्षिणांदत्वाकुमारीभोजयेत्ततः॥देव्यैपशु
बलिंदद्याद्धृष्टोवादित्रमंगलैः॥४॥ ततस्तुसाधयेन्मंत्रान्वेदो
क्तान्वागमोदितान्॥अस्त्राणांकर्मसिद्ध्यर्थंजपहोमविधानतः
॥५॥ब्राह्मंनारायणंशैवमैंद्रंवायव्यवारुणेः॥आग्नेयंचापशस्त्रा
णिगुरुदत्तानिसाधयेत्॥६॥मनोवाक्कर्मभिर्भाव्यंलब्धाःस्त्रेण
सुविश्वता॥अपात्रमसमर्थंचदद्यादस्त्राणिपूरुषं॥७॥प्रयोगं
चोपसंहारंयोवेत्तिसधनुर्धरः॥सामान्येकर्मणिप्रज्ञोनैवास्त्रा
णिप्रयोजयेत्॥८॥ इत्यस्त्रविधिः॥ छ ॥ छ ॥ छ ॥ छ ॥

अथशस्त्रनिवारणं

हस्तार्केलांगलीकंदोगृहीतस्तस्यकंदनः॥शूरस्यापिरणेपुंसो
दर्पंहरतिकातरः॥१॥गृहीतंयोगनक्षत्रेरपामार्गस्यमूलकं॥
लेपमात्रेणवाराणांसर्वशस्त्रनिवारणं॥२॥ अधःपुष्पीशंखपु
ष्पीलज्जालुर्गिरिकर्णिका॥नलिनीसहदेवीचपुत्रमार्जारिका
तथा॥३॥विष्णुक्रांताचसर्वासांजटाग्राह्यारवेर्दिने॥बध्वाभु
जेविलेपाद्वाकायेशस्त्रौघवारकाः॥४॥ सर्पव्याघ्रादिसत्वादि
भूतादीनांनजायते॥भीतिस्तस्यास्थितायस्यमातरोष्टोशरीर
गाः॥५॥गृहीतंहस्तनक्षत्रेपत्रंछुछुंदरीभवं॥तत्प्रभावाद्गजः
पुंसांसंमुखोनैतिनिश्चितं॥६॥ छुछुंदरीश्रीफलपुष्पचूर्णैरालि
प्तगात्रस्यनरस्यदूरात्॥आघ्रायगंधंद्विरदोतिमत्तोमदंत्यजे
त्केसरिणोयथोग्रं॥७॥ श्वेताद्रिकर्णिकामूलंपाणिस्थंवाहयेद्ग
जं॥श्वेतकंदारिकामूलंव्याघ्रादीनांभयंहरेत्॥८॥ पुष्यार्कोत्पा
टितेमूलेपाठायामुखसंस्थिते॥देहेस्फुटतिनोतीक्ष्णंमंडलाग्र
रणेनृणां॥९॥गांधार्याउत्तरंमूलंमुखसंस्थंमुखागतं॥शस्त्रौ
घंवारयेत्तत्रपुष्यार्केविधिनोद्धृतं॥१०॥विधिरुपवासः॥पुष्यायाः

शरपुंखापाःजटानीलीजटाथवा॥भुजेशिरसि वक्त्रे वा स्थिता शस्त्रनिवारिका॥११॥भूयाहिभूतचोरघ्नीगृहीतापुष्पभास्करे

अथसंग्रामविधिः

प्रथमंक्रियतेस्नानंशुक्लवस्त्रारत्तोभवेत्॥मांगल्यगीतसंयुक्तोदेवविप्रांश्चपूजयेत्॥१॥क्षेत्रपालस्यनाम्नाचबलिंदद्याद्दिशोदश॥शस्त्राणिचापिसंपूज्यरक्षामंत्रंस्मरेत्ततः॥२॥ ॥अथमंत्रः॥ ॥ॐशूलेनपाहिनोदेविपाहिखड्गेनचांबिके॥घंटास्वनेननःपाहिचापज्यानिस्वनेनच॥३॥प्राच्यांरक्षप्रतीच्यांचचंडिकेरक्षदक्षिणे॥भ्रामणेनात्मशूलस्यउत्तरस्यांतथेश्वरि॥सौम्यानियानिरूपाणित्रैलोक्येविचरंतिते॥यानिचात्यंतघोराणितैरक्ष्यास्मांस्तथाभुवि॥५॥खड्गशूलगदादीनियानिचास्त्राणितेंबिके॥करपल्लवसंगीनितैरस्मान्रक्षसर्वतः६॥इतिरक्षामंत्रः॥दिव्यौषधीनांलेपंचरक्षाबंधंचकारयेत्॥किंचिद्भुक्त्वाचपीत्वाचततःसंग्राममाचरेत्॥७॥सेनापतिंगजारोहांस्तांस्तांश्चसुभटांस्तथा॥मुख्याननन्यानपिधनैर्वस्त्रैश्चपरिधारयेत्॥८॥पूर्वंसारथिमारोप्यरथेसज्जेत्ततःस्वयं॥योजयेद्वाजिनःशुद्धान्सुसंतुष्टाञ्जितश्रमान्॥९॥रथेचधारयेद्ध्वजंकार्मुकाणांचतुष्टयं॥चतुःशतानिबाणानांतूणीरेचप्रपूरयेत्॥१०॥खड्गंचर्मगदांशक्तिंपरिघंमुद्गरंतथा॥नाराचान्परशुंकुंतंपट्टिशादींश्चधारयेत्॥११॥नरथानगजायस्य सोश्वमेवसमारुहेत्॥कटिबद्धैकतूणीरःखड्गशक्तिधनुर्युतः॥१२॥ततोर्जुनस्यनामानिविष्णुस्मरणपूर्वकं॥जपेत्ततःप्रतिष्ठेतचतुरंगबलैर्युतः॥१३॥लाभस्तेषांजयस्तेषांकुतस्तेषांपराजयः॥येषामिंदीवरश्यामोहृदयस्थोजनार्दनः॥१४॥अर्जुनःफाल्गुनःपार्थःकिरीटीश्वेतवाहनः॥बीभत्सुर्विजयीकृष्णःसव्यसाचीधनंजयः॥१५॥इतिकृष्णार्जुनस्मरणं॥इतिसंग्रामविधिः

॥अथौषधं॥नृपसहशिखिजारीसस्नुगोरक्तकन्याद्विजलक्षण

विभीतामोहिनींद्राजद्रोहीं॥कुरुचतुरचतुष्कंदेहजंपंचयुक्तं भवतिभवसमानंसर्वकर्मप्रसिद्धं॥१६॥ छ ॥ छ ॥ ॥

अथाक्षौहिणीसंख्या

खद्वयंस्वरवस्वेंदुनैत्रैरक्षौहिणीमता॥२१८७००अक्षोहिण्यांप्रदिष्टानांरथानांधर्मचारिणां॥१॥संख्यागणिततत्त्वज्ञैः सहस्राण्येकविंशतिः॥उपर्यष्टौशतान्याहुस्तथाभूयश्चसप्ततिः॥२॥गजानांतुपरीमाणमेतदेवविनिर्दिशेत्॥ज्ञेयंलक्ष्यंपदातीनांसहस्राणितथानव॥३॥शतानित्रीणिपंचाशच्छूराणांशस्त्रधारिणां॥पंचषष्टिसहस्राणितथाश्वानांशतानिच॥४॥दशोत्तराणियत्प्राहुःसंख्यातत्त्वविदोजनाः॥इत्यक्षौहिणीसंख्या

अथमहाक्षौहिणीसंख्या

खद्वयंनिधिवेदाक्षिचंद्राश्व्याग्निहिमांशुभिः॥महाक्षौहिणिकाप्रोक्तासंख्यागणितकोविदैः॥१॥१३२१२४९००कोट्यस्त्रयोदशप्रोक्तालक्षाणामेकविंशतिः॥चतुर्विंशत्सहस्राणितथानवशतानिच॥२॥महाक्षौहिणिकांप्राहुरिमांतत्त्वविदोजनाः॥महाक्षौहिणिकायांतुरथाःकोटिमिताःस्मृताः॥३॥अश्वाश्चतुःकोटिमितालक्षाण्येकादशैवच॥सप्तविंशत्सहस्राणितथानवशतानिच॥४॥महाक्षौहिणिकांप्राहुरिमांतत्त्वविदोजनाः॥महाक्षौहिणिकायांतुरथाःकोटिमिताःस्मृताः॥५॥सप्तत्रिंशच्चलक्षाणिगीयंतेतत्त्ववेदिभिः॥द्वादशैवसहस्राणिचत्वार्येवशतानिच॥६॥प्रोक्तानिनवतिस्तद्वदेवमेवगजामताः॥अश्वाश्चतुःकोटिमितालक्षाण्येकादशैवच॥७॥सप्तत्रिंशत्सहस्राणितथाशतचतुष्टयं॥सप्ततिश्चैवसंख्याताप्रोच्यंतेपत्तयस्ततः॥८॥षट्कोट्योशीतिलक्षाणिपंचाधिकमितानिच॥द्विषष्टिश्चसहस्राणितथाशतचतुष्टयं॥ पंचाशदितिसंख्यातान्महाक्षौहिणिकाबुधैः॥९॥ इतिमहाक्षौहिणीसंख्या॥॥

अथव्यूहविधिः

मुखेरथागजाःपृष्टेनत्पृष्टेचपदातयः॥पार्श्वयोश्चहयाःकार्या
व्यूहस्यायंविधिःस्मृतः॥१॥अर्धचंद्रंचचक्रंचशाकटंमकरंतथा
॥कमलंश्रेणिकागुल्मंव्यूहान्येतानिकल्पयेत्॥२॥इ॰व्यूहवि॰

अथयुद्धविधिः

येराजपुत्राःसामंताआप्ताःसेवकजातयः॥तान्सर्वानात्मनःपा
र्श्वेरक्षायैस्थापयेन्नृपः॥१॥यस्मिन्कुलेयःपुरुषःप्रधानःसस
र्वयत्नेनहिरक्षणीयः॥तस्मिन्विनष्टेकिलसारभूतेननाभि
भंगेअरकावहंति॥२॥क्षत्रंसारभूतंशूरंशस्त्रज्ञमनुरागिचे
त्॥अपिस्वल्पंश्रियेसैन्यंवृथैयंमुंडमंडली॥३॥अपिपंच
शतंशूरामृद्गंतिमहतींचमूं॥अथवापंचषट्सप्तविजयंतेऽ
निवर्तिनः॥४॥धनुःसंगतिसंशुद्धावाजिनोमुखदुर्बलाः॥आ
कर्णपतितायोधाःसंग्रामेजयवादिनः॥५॥परस्परानुसंरक्ता
योधाःशार्ङ्गधनुर्धराः॥युद्धज्ञास्तुरगारूढास्तेजयंतेरणेरि
पून्॥६॥एकःकापुरुषोदीर्णोधारयेन्महतींचमूं॥तंदीर्णम
नुदीर्यंतेयोधाःशूरतमाअपि॥७॥दुर्निवारतराचैवप्रभग्ना
महतीचमूः॥अपामिवमहावेगस्त्रस्तामृगगणाइव॥८॥
यस्तुभग्नेषुसैन्येषुविद्रुतेषुनिवर्तते॥पदेपदेश्वमेधस्यलभ
तेफलमक्षयं॥९॥द्वाविमौपुरुषौलोकेसूर्यमंडलभेदिनौ॥परि
व्राड्योगयुक्तश्चरणेचाभिमुखेहतः॥१०॥यत्रयत्रहतःशूरः
शत्रुभिःपरिवेष्टितः॥अक्षयंलभतेलोकंयदिक्लीवंनभाषते॥११
मूर्छितंनैवविकलंनाशस्त्रंनान्ययोधिनं॥पलायमानंशरणं
गतंचैवनहिंसयेत्॥१२॥भीरुःपलायमानोपिनान्वेष्टव्योबली
यसा॥कदाचिच्छूरतांयातिमरणेकृतनिश्चयः॥१३॥संभृत्य
महतींसेनांचतुरंगांमहीपतिः॥व्यूहयित्वाग्रतःशूरान्स्थापयेज्ज
यलिप्सया॥१४॥अल्पायांवामहत्यांवासेनायामितिनिश्चयः
॥हर्षोयोधगणस्यैकोजयलक्षणउच्यते॥१५॥पृष्ठेनवायवोऽ
वांतिपृष्ठेवासुर्वयांसिच॥अनुप्लुवंतेमेघाश्चयस्यतस्यरणेजयः॥

॥१६॥ अपूर्णेनैवमर्तव्यंसंपूर्णेनैवजीवते॥ तस्माद्धैर्यंविधातव्यं
हंतव्यापरवाहिनी॥१७॥ जितेलक्ष्मीर्मृतेस्वर्गःकीर्त्तिश्च
धरणीतले॥ तस्मात्स्थैर्यंविधातव्यंहंतव्यापरवाहिनी॥१८॥१
॥इतियुद्धविः॥ इतिश्रीवृ·शा०प०धनुर्वेदवर्णनंपरिच्छेदः॥

अथगांधर्वशास्त्रं

प्रणम्यसर्वदेवेशंशिवंब्रह्मादिकांस्ततः॥ गांधर्वशास्त्रसंक्षेपः
सारतोयंमयोच्यते॥१॥ यदुक्तंब्रह्मणस्थानंब्रह्मगंतश्चयो
मतः॥ तन्मध्येसंस्थितःप्राणःप्राणाद्वह्निसमुद्भवः॥२॥ वह्निमा
रुतसंयोगान्नादःसमुपजायते॥ ननादेनविनागीतंननादेनवि
नास्वरः॥३॥ ननादेनविनानृत्यंतस्मान्नादात्मकंजगत्॥ पव
नाज्जायतेनादोनादतःस्वरसंभवः॥४॥ स्वरात्संजायतेरागः
सरागोजनरंजकः॥ पदस्थस्वरसंघातस्तालेनसुमितस्तथा
॥५॥ प्रयुक्तश्चावधानेनगांधर्वमभिधीयते॥ तदेतन्नारदादि
भ्योदत्तमादौस्वयंभुवा॥६॥ विधिवन्नारदेनादःपृथिव्यामव
धारितं॥ मृगोवेत्तिशिशुर्वेत्तिवेत्तिगीतरसंफणी॥७॥ यतोगी
तेविलीनास्युःसर्वथाचित्तवृत्तिभिः॥ अपिब्रह्मपरानंदादिदम
प्यधिकंध्रुवं॥८।जहारनारदादीनांचित्तानिकथमन्यथा॥९॥
इतिसंगीतप्रशंसा॥ अथसुगीतलक्षणानि॥ सुस्वरंसरसंचैव
सरागंमधुराक्षरं॥ सालंकारप्रमाणंचषड्विधंगीतलक्षणं॥१
॥९॥ स्वरेणपदसंयुक्तंछंदसाचसुसंयुतं॥ सुमारुतंसुतालंच
सुगीतंतद्धिभण्यते॥१०॥ इतिसुगीतलक्षणम्॥ छ॥ छ॥

अथावागोपकारलक्षणानि

वाङ्मातुरुच्यतेगेयंधातुरित्यभिधीयते॥ वाचाचगेयंकुरुतेयः
सवागोपकारकः॥१॥ शब्दानुशासनज्ञानमभिधानप्रवीणता
॥गणछंदोरुवेदित्वमलंकारेषुकौशलं॥२॥ तौर्यत्रिलयचातुर्यं हृद्य
शारीरपालितं॥ लयतानकलाज्ञानंविवेकोनेककाकुषु॥३॥ दे
शीरागेषुविज्ञप्तिर्वाक्पटुत्वंसभाजयः॥ इतिवागोपकारस्यगु

णाःसर्वेनिरूपिताः॥४॥ अधमोमातुकारश्च धातुकारश्चम
ध्यमः॥ धातुमातुक्रियाकारउत्तमःपरिकीर्तितः॥५॥ इतिवा
गोपकारलक्षणानि॥ अथशिष्यकारः॥ त्वरितःशिष्यकोय
स्तुस्फकंठोमधुरस्वनः॥ रागतालसमोपेतःशिष्यकारःसउ
च्यते॥६॥ इतिशिष्यकारः॥ अथगायनलक्षणानि॥ प्रबंध
गात्रनिष्णातोविविधाचोपकारकः॥ रागरागांगभाषांगक्रि
यागेयांगकोविदः॥७॥ गायतोगीतशास्त्रज्ञैर्भण्यतेसर्वसंम
तः॥८॥ इतिगायनलक्षणानि॥ अथगायनदोषाः॥ कंपितं
भीतमुद्घुष्टमव्यक्तमनुनासिकं॥ काकस्वरंशिरस्यंचतथा
स्थानविवर्जितं॥९॥ विस्वरंविरसंचैवविश्लिष्टंविषमाहतं
॥व्याकुलंतालहीनंचगातुर्दोषाश्चतुर्दश॥१०॥ इतिगायनदोषाः

अथसालगसूडः

हिमवत्कन्यकाप्रीत्यैदेवदेवेनशंभुना॥ सुद्धरागाद्धिनिःपीड्य
मरसंसालगंकृतं॥१॥ शुद्धरागसमुत्पन्नंछायालगमनोह
रं॥ बालगोपालवनिताक्षितिपालैःसुगीयते॥२॥ आद्योध्रुवः
स्ततोमंठःप्रतिमंठोनिसारुकः॥ अड्डतालस्ततोरासएकता
लीचसंमताः॥३॥ अथैतेषुपूर्वंध्रुवकलक्षणानि॥ नवि
वेकंविनाज्ञानंध्यानंनात्मरसंविना॥ श्रद्धयानविनादानंज्ञा
नंनध्रुवकंविना॥४॥ उत्तमःषट्पदःप्रोक्तोमध्यमःपंचभि
स्तथा॥ कनिष्ठस्तुचतुर्थःस्यादेवंस्युर्ध्रुवकास्त्रिधा॥५॥
एकधातुर्द्विखंडःस्याद्यत्रोद्ग्राहस्ततःपरं॥ तृतीयंकिंचिदु
च्चंस्यात्खंडंगमकशोभनं॥६॥ ततोद्विखंडआभोगस्तृती
यस्तस्यखंडकं॥ उच्चंगमकयुक्तंवानवास्वाम्यंकितंचतत्॥७
उद्ग्राहस्याद्यखंडेचन्यासःसध्रुवकोमतः॥ एवंहिषट्पदंप्रो
क्तमुत्तमोध्रुवकोबुधैः॥८॥ पंचपादस्यतूद्ग्राहेपदयुग्मंप्र
शस्यते॥ तृतीयंचोच्चखंडंस्याद्विरभ्यस्तमिदंत्रयं॥९॥ आभोग
श्चैकखंडःस्याद्वितीयंचोच्चखंडकं॥ तुल्यनामांकितंचैतदिति

मध्यमलक्षणं॥१०॥चतुःपादस्यतत्राहेपदैकंस्यात्ततःपदं॥
किंचिदुच्चंद्वितीयंस्याद्विरभ्यस्तमिदंद्वयं॥११॥ अभोगेत्वपदै
कंस्यात्किंचिदुच्चंद्वितीयकं॥प्रभुनामांकितंचैतत्कनिष्ठस्थे
तिलक्षणं॥१२॥षण्णांपदानांवावर्णनियमोवाद्वयोर्भवेत्॥प
दयोर्वर्णनियमोध्रुवाणांहिद्विधागतिः॥१३॥पदद्वयेयदावर
र्णनियमःक्रियतेबुधैः॥तदापदानिचान्यानिभवंतिनियमंविना
॥१४॥एकादशाक्षरात्पादेएकैकाक्षरवर्धितैः॥ खंडैर्ध्रुवःषो
डशास्यःषड्विंशत्याक्षरावधि॥१५॥रसतालादिवर्णैश्चध्रुवा
णांलक्षणंशुभं॥प्रोक्तंरागार्णवेसर्वंसंक्षेपादिहकथ्यते॥१६॥

अथषोडशध्रुवाणांलक्षणानि

जयंतःशेखरोत्साहोततोमधुरनिर्मलौ॥कुंतलःकमलश्चारोनंद
नश्चंद्रशेखरः॥१॥कामदोविजयाख्यश्चकंदर्पजयमंगलौ॥
तिलकोललितश्चेतिध्रुवाःषोडशकीर्तिताः॥२॥ आदितालोज
यंत्स्याच्छृंगाररससंयुत॥ः॥रुद्रसंख्याक्षरपदैरायुर्वृद्धि
करःपरः॥३॥एकएवलघुर्यत्रआदितालःसकथ्यते॥सयथा॥द्वादशा
क्षरपादोन्योभोगैकफलकृत्प्रभोः॥४॥हंसकेचरसेवीरेगीयतेशे
खराव्हयः॥लघुर्गुरुर्लघुर्यत्रसतालोहंसकःस्मृतः॥५॥सयथा॥
उत्साहःस्याद्रसेहास्येतालेकंदुकसंज्ञके॥वंशाभिवृद्धिकृत्पादस्त्र
योदशमिताक्षरः॥६॥लघुद्वयंविरामांतंतालेकंदुकसंज्ञके॥सय
था॥गार्ग्यतालेनगीयेतकारुण्येमधुरोध्रुवः॥७॥अंघ्रिर्द्विसप्त
भिर्वर्णैरानंदःफलदःसदा॥चतुर्द्रुतोविरामांतस्तालोयंगार्ग्यसंज्ञकः
॥८॥सयथा॥०००० क्रीडातालेध्रुवःसस्यात्सप्तक्षैर्वर्ण्यंघ्रिनिर्मलः
॥शृंगाररससंयुक्तःश्रोतुस्तेजोविवर्धनः॥९॥एकएवद्रुतोयस्मि
न्क्रीडातालःसकथ्यते॥सयथा॥ वर्णैःषोडशभिःपादःकुंतलो
लघुशेखरे॥१०॥ इष्टार्थदःशौर्यदःस्यादद्भुताख्यरसान्वितः॥ ल
घुर्गुरुर्भवेद्यत्रसभवेल्लघुशेखरः॥११॥सयथा॥वर्णैश्चसप्तदश
भिरंघ्रिःशृंगारकेरसे॥कमलोमलयाख्येवैस्यादायुर्वृद्धिकरःपरः॥१२

मलयाख्येभवेत्तालेलघुर्गुरुरथोगुरुः॥सयथा॥वीरोष्टादशवर्णाघ्रिर्यशोहर्षप्रदोध्रुवः॥फणिभाषायुतोवीरेरसे कंदुकतालुके॥ लघुद्वयंविरामांतंतालेकंदुकसंज्ञके॥१४॥नंदद्वयेद्रुवर्णाघ्रिनंदनःसर्वसिद्धिदः॥पूर्णश्रृंगारवीराभ्यां ----कंदुकेचविधीयते॥१५॥लघुद्वयंविरामाभ्यांतालेकंदुकसंज्ञके॥सयथा॥एकविंशति वर्णाघ्रिर्भवेच्छृंगारकेरसे॥१६॥कामदोभीष्टदःपुंसांतालेतुरगलीलके॥सयथा॥कल्याणदोभवेद्धीरोध्रुवकस्त्वेद्रुशेखरः॥१७॥द्विदिग्वर्णपदंयत्रत्रिपुटेतिविधीयते॥१८॥द्रुतंद्वयंलघुर्द्वंद्वंतालेत्रिपुटसंज्ञके॥सयथा००॥विजयाख्योध्रुवःसस्याद्वाविंशत्यक्षरंघ्रिकः॥१९॥सन्निपातेनसंयुक्तःश्रृंगारेभीष्टदोरसे॥एकएवगुरुर्यत्रसन्निपातःसकथ्यते॥२०॥सयथा॥त्रयोविंशतिवर्णाघ्रिर्ध्रुवःकंदर्पसंज्ञकः॥वीरेवाकरुणेवास्यात्खंडतालोविधीयते॥२१॥द्रुतमेकंभवेद्यत्रतालोयंखंडसंज्ञितः॥सयथा॥द्विनिघ्नादशवर्णाघ्रिस्तालेवाखंडकेभवेत्॥२१॥वीरश्रृंगाररसयोर्ज्ञेयश्चजयमंगलः॥द्रुतद्वयंविरामांतंलघुनैकेनरूपकः॥२२॥सयथा००॥पंचविंशाक्षरैःपादोयस्यासौललिताव्हयः॥तालेचसंपुटेज्ञेयोवीरेवाप्यद्भुतेपिवा॥२३॥तालेवाचपुटेज्ञेयंगुरुर्लघुयुगंगुरुः॥सयथा॥ऽऽ।ऽ यःषड्विंशतिवर्णांघ्रिस्स्यात्सर्वार्थसिद्धिदः॥२४॥ललितश्चपुटाख्येचताले ऽऽ।ः श्रृंगारपोषकः॥तालेचचपुटेज्ञेयंगुरुद्वंद्वंलघुप्लुते॥२५॥सयथा॥इतिषोडशध्रुवाः

अथमंठलक्षणानि

उद्ग्राहोध्रुव पदश्चास्यादाभोगस्तदनंतरं॥नियमस्त्रिविधोज्ञेयोमंठकस्यविचक्षणैः॥१॥जयप्रियकलापश्चकमलःसुंदरस्तथा॥वल्लभोमंगलश्चेतिषडेतेमंठकामताः॥२॥लघुर्गुरुर्लघुर्यत्रसतालोहंसकःस्मृतः॥तालश्चायंरसेवीरेकर्त्तव्योजयमंठके॥३॥हंसतालः॥रंगतालेषुविज्ञेयोलघुश्चैकंगुरुद्वयं॥कपालोमंठकस्तेनरसेरौद्राभिधानके॥४॥रंगतालःऽऽ॥लघुद्वयंगु

रुश्चैकस्तालोऽयंदर्पणःस्मृतः॥अस्मिंस्तालेरसेशांतेकमलोमंठ
कोभवेत्॥५॥ दर्पणतालःऽ॥गुरुद्वयंलघुद्वंद्वंतालेत्रिपुटसंज्ञ
के॥सुंदरोगीयतेतेनवीरेवाप्यद्भुतेरसे॥६॥त्रिपुटतालःऽऽ
मलयाक्षेभवेत्तालेगुरुर्लघुरतोगुरुः॥वल्लभोमंठकोज्ञेयस्ता
लेस्मिन्करुणेरसे॥७॥मलयतालःऽ।ऽगुरुर्लघुद्वयंयत्रभृंगता
लःसकथ्यते॥मंगलोमंठकोज्ञेयोरसेचाद्भुतसंज्ञके॥८॥भृंग
तालःऽ॥इतिषण्मंठकः॥ अथप्रतिमंठकलक्षणानि॥ तालश्चा
प्यमरश्चैवविचारःकुंदसंज्ञकः॥चत्वारःकथिताश्चैतेप्रतिमंठा
स्तुशंभुना॥९॥विरामांतंद्रुतंद्वंद्वंगुरुश्चैकस्ततःपरं॥सुरंगता
लेगातव्यस्तालश्चप्रतिमंठकः॥१०॥सुरंगतालः००ऽगुरुरेको
भवेद्यत्रसन्निपातःसकथ्यते॥अमरप्रतिमंठोसौविद्वद्भिस्तेनगी
यते॥११॥सन्निपातः॥लघुद्वंद्वंविरामांतंतालेकंदुकसंज्ञके॥वि
रागोगीयतेतेनविलंबश्चलयोभवेत्॥१२॥द्रुतमेकंभवेद्यत्रस
तालःखंडसंज्ञकः॥द्रुतलयेनगातव्यःकुंदश्चप्रतिमंठकः॥१३
॥खंडतालः॥ इतिप्रतिमंठकाश्चत्वारः॥ ॥ ॥ ॥

अथनिःसारुकलक्षणानि

कांतारःसमराक्षश्चवैकुंठोवांछितस्तथा॥विशालश्चतथानंद
घोढानिस्सारकोभवेत्॥१॥लघुद्वयंविरामांतंतालेकंदुकसंज्ञ
के॥द्रुतंलयेनगातव्यःकांतारोभवतिस्फुटः॥२॥ कंदुकः॥ल
घुद्वयंविरामांतंतालेकंदुकसंज्ञके॥ समरोगीयतेनेनमध्यम
श्चलयोभवेत्॥३॥कंदुकः॥द्रुतद्वंद्वंगुरुद्वंद्वंभवेत्तालेमुकुंद
के॥अनेनगेयोवैकुंठोहृद्योनिःसारुकःसदा॥ ४॥मुकुंदः००ऽऽ
लघुत्रयंद्रुतंद्वंद्वंतालेसरभलीलके॥अयंनिःसारुकोज्ञेयोवांछि
तोवांछितप्रदः॥५॥ सरभलीलः ००॥ लघुद्वयंविरामांतंतालेद्वि
तयसंज्ञिके॥अनेनैवहितालेनविशालश्चनिसारुकः॥६॥ द्वि
तीयः॥द्रुतमेकंभवेद्यत्रक्रीडातालःसकथ्यते॥अनेनगीयतेनंदो
नित्यंनिस्सारकोत्तमः॥७॥क्रीडातालः॥इतिषट्निःसारुकाः॥

अथद्रुतषट्ताललक्षणानि

शकःकीलश्च विजयश्चाशेनिःशंकएवच।।मकरंदःपरोज्ञेयस्त्वडुतालश्चषड्विधः।।१।।लघुर्गुरूश्च भवतिलघुशेखरतालके।।शंकोजमरतालश्चगीयतेतेनकोविदैः।।२।।लघुशेखरः।।द्रुतद्वयंविरामांतंलघुनैकेनसंयुतं।।झंपतालोभवेत्तेनगेयःशांतोबुधोत्तमैः।।३।।झंपतालः००।।द्रुतद्वयंविरामांतंतालेतुरगलीलके।।विजयोगीयतेतेनगीतनृत्यविशारदैः।।४।।तुरगतालः ००।।उमातिलकतालेतुद्रुतौलघुगुरूस्मृतौ।।नाराक्षस्त्वडुतालःस्याद्विद्रूद्भिस्तेनकथ्यते।।५।।उमातिलकः००।।प्लुतमेकंद्रुतौद्वौचवनमालिनितालके।।निःसंगस्त्वडुतालःस्याद्विद्रूद्भिस्तेनकथ्यते।।६।।उमातिलकः००।।प्लुतमेकंद्रुतौद्वौचवनमालिनितालके।।निःसंगस्त्वडुतालःस्यात्बुधैस्तेनैवगीयते।।७।।वनमालीऽ००।।राजतालाभिधानेतुलघुद्रुतौलघुस्ततः।।अनेनतुसमायुक्तोमकरंदोडतालकः।।८।।गजतालः०ऽ।।इतिषट्द्रुततालः।।छ।।छ।।

अथरासकलक्षणानि

चतुर्धारासकःप्रोक्तोगीतवाद्यविशारदैः।।विनोदोवरदोनंदःकंबुजश्चेतिकीर्त्तिताः।।१।।एकएवलघुर्यत्रआदितालःसकथ्यते।।विनोदोरासकस्तेनगातृश्रोत्रसुखावहः।।२।।आदितालः।।लघुद्रुतौगुरुर्यत्रतालोयंगजलीलकः।।वरदोरासकोज्ञेयःश्रोतृणांसुखदायकः।।३।।गजलीलः००ऽ।।प्लुतश्चगुरुरेकत्रतालोविद्याधरःस्मृतः।।यत्रासौरासकोनंदोगीयतेभ्युदयेशुभः।।४।।विद्याधरःऽऽ।।राजविनोदेतालेस्याद्रुरुद्वंद्वमथस्तुतः।।रासकःकंबुजस्तेनगीयतेगीतकोविदैः।।५।।राजविनोदःऽऽऽ।।इ·रासकाश्चत्वारः

अथएकतालीलक्षणानि

एकतालीत्रिधाप्रोक्तागीतवाद्यविशारदैः।।रामाचचंद्रिकातद्वद्विपुलेस्यथलक्षणं।।१।।द्रुतमेकंभवेद्यत्रतालोयंखंडसंज्ञितः।।रामातेनैकतालीतुगीयतेगायकोत्तमैः।।२।।खंडतालः।।गुरुद्वयं

भवेद्यत्रतालोललितसंज्ञकः॥ चंद्रिकाचैकतालीस्यात्तेनसौभाग्यदायिनी॥३॥ ललितः॥ ॥॥ कोकिलाप्रियनालेवेद्रुतत्रयमुलहृतं॥ विपुलाचैकतालीस्यात्तेनगीतज्ञसंमता॥४॥ कोकिलाप्रियः ०००॥ इतिएकतालस्य स्तिस्त्रः॥ अथाष्टौध्रुवाः॥ जयंतश्चततोलाहोनंदनश्चंद्रशेखरः॥ कामदोविजयाख्यश्चकंदर्पजयमंगलौ॥५॥ अष्टौध्रुवाःसमाख्याताराजयोग्यास्तदाबुधैः॥ इतितालगरुडः॥ अथसुद्धसूडगीतनामानि॥ एलाकरणडेकीभिर्वर्तिन्याडसमेनच॥ रंभरासैकतालीभिःसुद्धसूडोष्टभिःस्मृतः॥६॥ सुद्धसूडोन्यदेशेषुगीयतेविरलैःक्वचित्॥ अतोनविस्तरोलोकेदक्षिणेषुचगीयते॥७ इतिसुद्धसूडनामानि॥ अथरूपकं॥ उद्ग्राहश्चान्यधातुःस्याद्ध्रुवकश्चान्यधातुकः॥ मेलापकोन्यधातुःस्यादाभोगश्चान्यधातुकः॥८॥ चतुर्धातुकमेतद्धिरूपकंकीर्त्यतेबुधैः॥ इतिरूपकं॥ अथगमकोनिरूप्यते॥ स्फुरितंकंपितंलीनंस्तिमितांदोलितावपि॥ आहतंत्रिकभिन्नंचगमकंसतथास्मृतं॥९॥ इतिगमकं॥ अथमत्यक्षरं॥ उद्दिष्टवस्तुरागादौकिंचिदाधिक्यचिंतितं॥ तद्धातुमातुनिष्पन्नंपद्यंलरमितीरितं॥१०॥ पूर्वरूपकसंसिद्धंछायासंस्थानरूपकं॥ तत्स्थानप्रोच्चनीचंचरवलोनारंभकीर्तितं॥११॥ इतिमत्स्यंतरं॥ छ॥ छ॥ छ॥

अथस्वरादिकथनं

सामवेदात्स्वराजाताःस्वरेभ्योग्रामसंभवः॥ ग्रामेभ्योजातयोजाताजातिभ्योरागसंभवः॥१॥ देशीरागाश्चएवैतेविख्यातादेशरूढितः॥ ग्रामरागोद्भवाभाषाभाषाभ्यश्चविभाषिकाः॥२॥ विभाषाभ्योपिसंजातास्तथैवांतरभाषिकाः॥ सप्तस्वरास्त्रयोग्रामामूर्छनाश्चैकविंशतिः॥३॥ द्वाविंशतिश्चश्रुतयोएतेभ्योरागसंभवः षड्जर्षभकगांधारमध्यपंचमधैवताः॥४॥ निषादश्चेत्यमीसप्ततंत्रीकंठोत्थिताःस्वराः॥ षड्जादयःस्वराःसप्तग्रामोचषड्जमध्यमौ॥५॥ केचिद्गांधारमप्याहुःसतुनेहास्तिभूतले॥ चतुर्दशैवश्रु

तयस्तावन्मानाश्चमूर्च्छनाः॥६॥गीयंतेमानवैर्भूमावन्यास्तुत्रि
दशालये॥स्वयंयोराजतेनादःसस्वरःपरिकीर्तितः॥७॥स्वरै
श्चनिखिलैर्व्याप्तंतद्विज्ञेयंपृथक्पृथक्॥ उच्चैर्निषादगांधारौ
नीचैर्ऋषभधैवतौ॥८॥शेषास्तुस्वरिताज्ञेयाःषड्जमध्यमधैवताः
॥षड्जंवदेन्मयूरोहिऋषभंचातकोवदेत्॥अजावदतिगांधारं
क्रौंचोवदतिमध्यमं॥पुष्पसाधारणेकालेकोकिलःपंचमंवदेत्।
दर्दुरोधैवतंचैवनिषादंचवदेद्गजः॥हास्यशृंगारयोःकार्यौस्व
रौपंचममध्यमौ॥११॥षड्जर्षभौतथाज्ञेयौवीररौद्राद्भुतेरसे॥गां
धारश्चनिषादश्चकर्तव्यौकरुणारसे॥१२॥धैवतश्चतथाका
र्योवीभत्सेचभयानके॥चतुःश्रुतिस्त्रिश्रुतिश्चद्विश्रुतिश्चेतिते
स्वराः॥१३॥इतिस्वरादयः॥अथषड्विंशत्प्रवर्तकरागाउच्यंते
॥भैरवःपंचमोनाटोमल्हारोगौडमालवः॥देशापश्चेतिषड्रागाः
प्रोच्यंतेलोकविश्रुताः॥१४॥वंगपालोगुणकरीमध्यमादिर्व
संतकः॥धन्याश्रीश्चेतिपंचैतेरागाभैरवसंश्रयाः॥१५॥ललि
तोगुर्जरीदेशीवराटीरामकृत्तथा॥मता रागार्णवेरागाःपंचै
तेपंचमाश्रयाः॥१६॥ नटनारायणःपूर्वगांधारःसालगस्त
था॥ततःकेदारकर्णाटौपंचैतेनाटसंश्रियाः॥१७॥मेघमल्हा
रिकामालकौशिकःप्रतिमंजरी॥आसावरीपंचचैतेरागाम
ल्हारसंश्रयाः॥१८॥हिंदोलस्त्रिगुणाधालीगौडीकोलाहल
स्तथा॥पंचैतेगौडनामानंरागमाश्रित्यसंस्थिताः॥१९॥भौपा
लीहरिपालश्चकामोदीधोरणिस्तथा॥वेलावलीचपंचैतेरा
गादेशापसंश्रयाः॥२०॥ अन्येपिबहवोरागाजातादेशविशे
षतः॥मारूप्रभृतयोलोकेतेचभद्रेप्सिकाःस्मृताः॥२१॥नरा
गानांनतालानामेतःकुत्रापिविद्यते॥संतोषायशिवस्यैतेज्ञेया
बुधजनैःसदा॥२२॥ तथानयतिकैलासंनगंगानसरस्वती॥ य
थानयतिरागास्तेनरंगायनकोविदं॥२३॥ इपाठांतरमुत्तरार्धः॥ इति
रागाः

अथगुणाः

म्यरस्तजभ्नगैर्लांतै रेभिर्दशभिरक्षरैः॥समस्तंवाङ्मयंव्याप्तंत्रैलोक्यमिवविष्णुना॥१॥सानुस्वारोविसर्गांतोदीर्घोयुक्तपरश्च यः॥वापादांतस्त्वसौवक्रोज्ञेयोन्योमात्रिकोलघुः॥२॥मस्त्रिगुरुस्त्रिलघुश्चमकारोभादिगुरुःपुनरादिलघुर्यः॥योगुरुमध्यगतोरलमध्यःसोंत्यगुरुःकथितोंसलघुस्तः॥३॥मस्त्रिगःपूर्वलोमस्यामध्यलोरोंत्यगस्तु यः॥तोंतलोमध्यगोजस्याज्ञादिर्भःस्त्रिलघुस्ततः॥४॥मोभूमिःश्रियमातनोतियजलंवृद्धिंरवह्निर्मृतिंसोवायुःपरदेश दूरगमनंतव्योमशून्यंफलं॥यःसूर्योरुजमादधातिविपुलंभेंदुर्यशोनिर्मलंनोनाकश्चिरमायुरष्टकमिदंप्राहुर्गणानांफलं॥५॥मोभूमिस्त्रिगुरुःश्रियंचयगणोब्दिर्जलंचादिलोरोमध्येलघुरग्निरंतिमनिलोदेशाटनंसोंगतः॥तोव्योमांतलघुर्धनापहरणंजोर्कोरुजंमध्यगोभश्चंद्रोयशउज्ज्वलंमुखगुरुर्नोनाकमायुस्त्रिलः॥६॥ इतिगणाः॥ ७॥ ७॥

अथवर्णप्रस्तारः

पादेसर्वगुरावाद्याल्लघुर्न्यस्यगुरोरधः॥यथापरितथाशेषंभूयःकुर्यादमुंविधिं॥१॥ऊनेदद्याद्गुरूनेवयावत्सर्वलघुर्भवेत्॥प्रस्तारोयंसमाख्यातश्छंदोविधिनिवेदिभिः॥२॥इतिप्रस्तारः॥अथलघुगुरुप्लुतद्रुतलक्षणानि॥लघुःशुद्धोगुरुर्वक्रउभाभ्यांचप्लुतोभवेत्॥द्रुतस्तुबिंदुरूपस्यादितिसर्वत्रनिश्चयः॥३॥एकमात्रोलघुःप्रोक्तोद्विमात्रश्चगुरुर्भवेत्॥प्लुतस्त्रिमात्रकोज्ञेयोद्रुतस्यादर्धमात्रिकः॥४॥लघोर्गुरोःप्लुतस्यापिभवेत्तालःपृथक्पृथक्॥मिलितानामपिभवेत्प्रस्तारस्तस्यकथ्यते॥५॥इतिलघुगुरुप्लुतद्रुतलक्षणानि॥अथतालप्रस्तारः॥तालेपादस्थितेमात्रागणयेल्लघुरूपिकाः॥तावतीभिस्तुमात्राभिःप्रस्तारोनिखिलोभवेत्॥६॥सचमध्याद्भवोज्ञेयस्तत्पृष्ठेचरथोपरि॥मध्यमिश्रितैःसोर्धमात्राभिर्गणयेद्बुधः॥७॥मध्यस्याग्रेचविलिखेन्मात्रापूरणहेतवे॥पूरणार्थविधिस्त्वेषःपूर्वस्थूलास्ततःकृशाः॥८॥बहुमा

त्रोभवेत्स्थूलस्ततोहीनःकृशोभवेत्॥द्रुतस्तुनभवेन्मूलमन्येमूंलाव्हयामताः॥९॥एवंपुनःपुनःकुर्याद्यावत्सर्वद्रुतोभवेत्॥इतितालप्रस्तारः॥गीतेवाद्येचनृत्येचशक्तिःसाधारणागुणः॥१०॥साचेदेतत्किमन्येनदूषणेनगुणेनच॥अथगायनार्थमौषधानि॥गुडूच्यपामार्गविडंगशंखिनीबचाभयाकुष्ठशतावरीसमा॥घृतेनलीढाप्रकरोतिमानवंत्रिभिर्दिनैःश्लोकसहस्रधारणं॥११॥देवदालीदलोद्भूतरसोमधुघृतान्वितः॥पीतःपथ्याशिनःकुर्याद्गीतेसुस्वरतांभृशं॥१२॥वासाब्राह्मीबचाकुष्ठंपिप्पलीमधुसंयुता॥सप्तरात्रिप्रयोगेणकिंनरैःसहगीयते॥१३॥इन्द्रादारुकबीजंहियोलिह्येन्मधुसर्पिषा॥सप्ताहंक्षीरपूषाशीकिंनरैःसहगीयते॥१४॥बीजपूरदलंजातीपत्रंजंबीरजंतथा॥एलाधान्यकलाजाश्चपिप्पल्यासहचूर्णयेत्॥१५॥मधुनाचावलीढंतुकंठस्यस्वरंतांनयेत्॥एतेरागार्णवच्छंदशास्त्रेभ्यःआयुर्वेदाच्चकथिताः॥इतिश्रीवृहच्छार्ङ्गधरविरचितायांपद्धत्यांगंधर्वशास्त्रपरिच्छेदः॥

अथोपवनविनोदः

पुंसांसर्वसुखैकसाधनफलाःसौंदर्यगर्वोत्पुरक्रीडालोलविलासिनीजनमनस्फीतप्रमोदावहाः॥गुंजद्भृंगविनिद्रपंकजभरस्फारोल्लसद्दीर्घिकायुक्ताःसंतिगृहेषुयस्यविपुलारामाःसपृथ्वीपतिः॥१॥नवंवयोहारिवपुर्वरांगनाःसखीकलावित्कलवल्लकीस्वनः॥धनंहिसर्वंविफलंसुखैषिणोविनाविहारोपवनानिभूपतेः॥२॥शास्त्राणितावदवलोक्यमयामुनीनामर्थःसएवगदितःपरमार्थयुक्त्या॥एवंविलोक्यनिखिलंचविवादयंतःसंतस्स्वमसमलांमुदमाप्नुवंति॥३॥ अथतरुमहिमा ॥बहुभिर्वतकिंजातैःपुत्रैर्धर्मार्थवर्जितैः॥वरमेकःपथितरुर्यत्रविश्रमतेजनः॥४॥दशकूपसमावापीदशवापीसमोह्रदः॥दशह्रदसमःपुत्रोदशपुत्रसमोद्रुमः॥५॥क्रीडारामंप्रयत्नेकुर्याद्द्रुमफलसंकुलं॥सगच्छेच्छंकरपुरंवसेत्तत्रयुगेयुगे॥६॥एतत्सर्वंपरिज्ञायवृक्षारामंसमाचरेत्

धर्मार्थकाममोक्षाणां द्रुमेभ्यःसाधनंयतः॥७॥ यावद्दिनानितुल
सीरोपितायगृहेवसेत्॥तावद्वर्षसहस्राणिवैकुंठेसमहीयते॥
॥८॥यस्तुसंरोपयेद्बिल्वंशंकरप्रीतिकारकं॥तत्कुलेहिसदालक्ष्मीः
संतिष्ठेत्सुत्रपौत्रिके॥९॥एवमेवहियोश्वत्थंरोपयेद्विधिनानरः॥
यत्रकुत्रापिचापन्नोसगच्छेद्भवनंहरेः॥१०॥तेनेष्टाबहवोयज्ञा
स्तेनदत्तावसुंधरा॥ससदाब्रह्मचारीस्याद्येनधात्रीप्ररोपिता॥११॥
वटवृक्षद्वयंय स्संरोपयेच्चयथाविधि॥शिवलोकेवसेत्सोपिसे
वितस्त्वप्सरोगणैः॥१२॥निंबत्रयंसमारोप्यनरोधर्मविचक्षणः
॥सूर्यलोकेसमासाद्यवसेदब्दायुतत्रयं॥१३॥चतुर्णांप्लक्षवृक्षा
णांरोपणान्नात्रसंशयः॥राजसूयस्ययज्ञस्यफलमाप्नोतिमानवः
॥१४॥पंचाम्रान्रोपयेद्यस्तुमार्गेषूपवनेषुच॥भूतान्भविष्यान्पु
रुषांस्तारयेत्सचतुर्दश॥१५॥शिरीषशाखिनांषण्णांयःकुर्यात्स
स्थिरोपणं॥गारुडंलोकमास्थायमोदतेदेववत्सदा॥१६॥पला
शशाखिनःपंचरोपयेदेकमेववा॥ब्रह्मलोकमवाप्नोतिपूज्यतेसोमरैः
सदा॥१७॥उदुंबरद्रुमानष्टौरोपयेत्स्वयमेवयः॥प्रेरयेद्रोपणाया
पिचंद्रलोकेसमोदते॥१८॥पार्वतीतोषितातेनसभवेच्चनिराम
यः॥पूजितादेवताःसर्वामधूकोयेनरोपितः॥१९॥क्षीरिकाकद
लीद्राक्षापिप्परूःपनसान्वितान्॥तरून्संरोप्यनोदुःखीजायते
सप्तजन्मसु॥२०॥अज्ञानाज्ज्ञानतोवापिजंबूर्येनप्ररोपिता॥गृहे
पिसवसेन्नित्यंयतिधर्मेण युज्यते॥२१॥अन्यान्यपितरून्रो
प्यफलपुष्पोपयोगिनः॥रत्नधेनुसहस्रस्यफलंप्राप्नोतिमानवः॥
॥२२॥ अश्वत्थमेकंपिचुमंदमेकंन्यग्रोधमेकंदशचिंचिणीच॥क
पित्थबिल्वामलकत्रयंचपंचाम्रवापीनरकंनपश्येत्॥२३॥इतितरुमहिमा

अथगृहाश्रमतरुशुभाशुभलक्षणानि

गृहस्यपूर्वदिग्भागेन्यग्रोधःसर्वकामदः॥उदंबरस्तथायाम्यांवारु
ण्यांपिप्पलःस्मृतः॥१॥प्लक्षश्चोत्तरतोधन्योवैपरीत्यंविवर्जयेत्
॥वर्जयेत्पूर्वतोश्वत्थंप्लक्षंदक्षिणतोगृहात्॥२॥न्यग्रोधःपश्चिमे

वर्ज्यस्तथोदुंबरउत्तरे॥देवदानवगंधर्वाःकिन्नरोरगराक्षसाः॥३॥पशुपक्षिमनुष्याश्चसंश्रयंतिमहानरून्॥सर्वासांवृक्षजातीनांछायावर्ज्यागृहेसदा॥४॥अपिसौवर्णिकंवृक्षंगृहद्वारिनरोपयेत्॥वदरीकदलीचैवदाडिमीवीजपूरकं॥५॥यस्यगेहेप्ररोहंतिसगृहीनप्ररोहति॥पलाशाःकांचनारश्चतथाश्लेष्मांतरकार्जुनाः। करंजपंचमावृक्षानारोप्याःस्फरिवनागृहे॥आसन्नाकंटकिनोरिपुभयदाःक्षीरिणोर्थनाशाय॥७॥फलिनःप्रजाक्षयकरादारूण्यपिवर्जयेत्तेषां॥नीलींहरिद्रांचनरःसदोषाःसुत्रैर्धनैःसंक्षयमभ्युपेयात्॥एतास्तुसर्वाःस्वयमेवजाताश्छिंद्यादृषीणांवचनाद्विधिज्ञः॥८॥नकुर्याद्ग्राम्यनैर्ऋत्याग्नेयेष्वपिहिवाटिकां॥अन्यथाकलहोद्वेगौकष्टंवालभतेभृशं॥९॥तस्माद्राक्षांहिसुभदंपुत्रपौत्रादिवर्धनं॥पश्चिमोत्तरपूर्वेषुभवेदुपवनंकृतं॥१०॥इतिगृहाश्रमेतरूणांशुभाशुभलक्षणानि॥५॥

अथभूमिनिरूपणं

जांगलारूपसामान्यस्वभावापिचमेदिनी॥भेदैःसाभिद्यतेषड्विवर्णतोरसतस्तथा॥१॥असितविपांडुश्यामललोहितश्वेतपीतरोचिषःक्रमशः॥मधुराम्ललवणतिक्तकटुकषायभुवोरसतः॥॥२॥विषपाषाणवाल्मीकबिलदुष्टानथोषरा॥दूरोदकाशर्करिलातरूभ्योनहितामही॥३॥इंद्रनीलशुकपक्षकोमलाशांखकुंदकुमुदेंदुसन्निभाँतप्तकांचनविकासिचंपकस्पर्धिनीवसुमतीप्रशस्यते॥४॥श्यामासमासन्नजलाहरिणातरूणांकुरा॥तस्यांसर्वेपितरवःप्ररोहंतिनसंशयः॥५॥पनसलकुचताडीवंशजंबीरजंबूतिलकवटकदंबाम्रातखर्जूरपूगाः॥कदलितिंनिसमृद्वीकेतकीनालिकेरप्रभृतयइतिचान्येप्रायशोरूपजाःस्युः॥६॥सौभांजनश्रीफलसप्तवर्णाःशेफालिकाशोकशमीकरीराः॥कर्कंधुराकेसरनिंबशोका वृद्धिंलभंतेभुविजांगलायां॥७॥बीजपूरकपुन्नागचंपकाम्रातमुक्तकाः॥प्रियंगुदाडिमाद्याश्चसाधारण

समुद्भवाः॥८॥निधिर्देवमहीपानांप्रभावाच्चापियत्नतः॥असात्म्यभूमिसंपन्नाअपिसिद्ध्यंतिपादपाः॥९॥इतिभूमिनिरूपणं

अथपादपविवक्षा

वनस्पतिद्रुमलतागुल्माःपादपजातयः॥बीजात्कांडात्तथाकंदात्तज्जन्मत्रिविधंविदुः॥१॥तेवनस्पतयःप्रोक्ताविनापुष्पैःफलंतिये॥द्रुमाश्चान्येनिगदिताःपुष्पैःसहफलंतिये॥२॥प्रसरंतिप्रतानैर्यास्तालताःपरिकीर्तिताः॥बहुस्तंवाविटपिनोयेतेगुल्माःप्रकीर्तिताः॥३॥जंबूचंपकपुन्नागनागकेसरचिंचिणी॥कपित्थबदरीबिल्वकुंभकारीप्रियंगवः॥४॥पनसाम्रमधूकाद्याःकरमर्दाश्चबीजजाः॥तांबूलीसिंधुवारश्चतगराद्याश्चकांडजाः॥५॥पाटलादाडिमीप्लक्षकरवीरवटादयः॥मल्लिकोदुंबरःकुंदोबीजकांडोद्भवामताः॥६॥कुंकुमार्द्ररसोनालूकदकंदसमुद्भवाः॥एलापद्मोत्पलादीनिबीजकंदोद्भवानिहि॥७

अथबीजोप्तिविधिः

सम्यक्कृष्टेसमेक्षेत्रेमाषान्मुद्गांस्तिलांस्तथा॥फलनिष्पन्नात्समुद्धृत्यतत्रबीजोप्तिरिष्यते॥१॥अत्नुपक्वंफलतोविशोषितान्विशुष्यबीजंपयसाभिषिच्य॥विशोषतंपंचदिनानिसर्पिषाविडंगमिश्रेणचधूपयेत्ततः॥२॥क्षीरनिषिक्तंबीजंबृहतीतिलभस्मसर्पिषालिप्तं॥गोमयमृदितमथोप्तंसद्योजायेतधूपितंवसया॥३॥पयसिनिषिक्तंबीजंगोमयपरिमर्दितंविशोष्यततः॥माक्षिकविडंगचूर्णैर्बहुशोमृदितंप्रजायेत॥४॥जंबूपनसचूतानांसरलस्यकुचस्यच॥क्षीरसिक्तंवपेद्बीजंघृतगोविड्विडंगवत्॥५॥शुचिःस्नातोविभ्रद्वसनममलंपूजितसुरोगुरुंनत्वादत्वावस्त्रवसुमतीवागुणवते॥स्वयंबीजान्यादौवपतिकतिचिद्धास्तकपुरुषंनमस्यंतःकृत्वातदनुपरितान्यपरिजनः॥६॥बीजधानींतृणास्तीर्णांकृत्वासिंचेत्पयोंबुना॥जातांकुरांचसलिलैर्निस्तृणांशोषमानयेत्॥७॥ इतिबीजोप्तिविधिः॥७॥

अथरोपणविधानं

अयथाविहितानांयन्मनोज्ञतासंपदोन्यस्तः॥कथयाम्यतस्त
रूणांरोपविधानंयथोद्दिष्टं॥१॥ध्रुवमृदुमूलविशाखाशुरुभं
श्रवणास्तथाश्विनीहस्तः॥उक्तानिदिव्यदृग्भिःपादपसंरोपणे
भानि॥२॥हस्तप्रमाणान्विटपाक्रसिक्तासंक्रामयेन्मूलवतः
समृत्कान्॥सर्पिर्मधूशीरविडंगलिप्तान्विलेनिदिध्याच्चकरीष
युक्ते॥३॥अ ¯ वालुकाश्लक्ष्णमृदापूरितंगर्तशोधनं॥कोदंडा
र्द्धमितेखातेजलसिक्तेवपेत्तरून्॥४॥कदलीक्षीरिणोरोप्यौ
मूलेदत्वातुगोमयं॥रंभायाःस्रुपरिणतैःफलैर्विलिप्तांसंशुष्कां
भुविनिहितांपल्लालरज्जुं॥शुष्कायासुपरितचगानशुत्तामासिं
चेद्बहुजलैर्बहून्यह्नानि॥५॥सारज्जुस्तदनुतमालनीलभा
सोविश्राणामरुणरुचोंकुरान्प्रसूते॥भूयस्तानुपरितपत्रकां
डमूलामारोप्यप्रथमविधानतोभिषिंचेत्॥६॥आषाढेश्राव
णमासेबीजवापनरोपणे॥ग्रीष्मादन्यत्रवल्लीनांकेचिदिच्छं
तिरोपणं॥७॥मंडपनिंद्यावर्तस्वस्तिकचतुरश्रसर्वतोभद्रैः॥
वीथीनिकुंजकपुंजकविन्यासैःपादपारोप्याः॥८॥दशविंशति
षोडशभिरधरोत्तरमध्यमतात्तरकान्॥द्विचतुस्त्रिभिरंतरिताः
क्रमशस्तृणपादपगुल्मवृत्तीश्चवपेत्॥९॥सांद्ररोपणमवृद्धि
कारणंवातभीतिरतिदूररोपणात्॥भिन्नवर्गरचनाल्पपिंडना
नैवयुक्तिरियमेवशस्यते॥१०॥कुसुमंफलमप्युपभोगसहंफ
लिनोहिनयस्यदलंतिशिखाः॥कुसुमेनविनैवफलंतिचयेनभ
वंतिशुभास्तइहापनसाः॥११॥मातुलिंगरजनीशकंटकाकिं
शुकश्चगिरिकर्णिकामता॥तिंतिडीकविफलाम्रमालिकाको
विदारइतिभीतिदोगणाः॥१२॥फलिन्यशोकपुन्नागशिरीषा
निंबचंपकाः॥मांगल्याःप्रथमारोप्याःभल्लातकगदापहः॥
१३॥पूर्वस्यांकरमर्दवंशविटपाःपारावतेदक्षिणेकोबेर्यांबद
रीकपित्थतरवोधात्रीचपश्चात्स्थिता॥१४॥अन्येचोत्तममध्य

माधमशिफारोप्याःस्ववर्गैःसह कृत्वाचांतरकं--- यथायथमीपत्रांबुपर्यास्पृशः॥१५॥इतिरोपणविधिः॥ ७ ॥ ७ ॥ ७॥

अथनिषेचनविधिः

सर्वस्यापिनवोप्तस्यसायंप्रातर्निषेचनं॥शीतातपसमीरेभ्योरक्षेच्चस्कविधानता॥१॥हेमंतेशिशिरेदेयंजलंचैकांतरेह्नि॥वसंतेप्रत्यहंग्रीष्मेसायंप्रातर्निषेचनं॥२॥वर्षासुचशरत्कालेषदावृष्टिर्नेदृश्यते॥तदादेयंजलंतत्र·आलवालेमहीरुहः॥३॥वारिणायाचतायस्यमूलेसौहित्यमिष्यते॥तावत्तस्यतरोर्देयंकिंघटार्थविवक्षया॥४॥आलबालस्थितंतोयंशोषंनभजतेयदा॥अजीर्णंतद्विजानीयान्नदेयंतादृशंजलं॥५॥समीपजातंयत्नेनतृणगुल्मलतादिकं॥स्फोटनीयंविधिज्ञेनद्रुमाणांवृद्धिमिच्छता॥६॥इतिनिषेचनविधिः॥ अथद्रुमरक्षा॥ ॥

नीहाराच्चंडवाताच्च धूमाद्वैश्वानरादपि॥जालकारास्चयत्नेनरक्षणीयाःक्षमारुहाः॥१॥पंक्तिमध्येस्कपुष्पासुफलबाह्येततोपरे॥वृक्षाःकार्या युताद्वृत्यासाचापिपरिखावृता॥२॥विद्युदहतवृक्षस्यभूतिमादायसर्वतः॥रक्षार्थंविकरेदेषांतयानहिमबाधनं॥३॥दीप्तोप्यग्निःशमंयातिवज्रदग्धद्रुमस्यना॥शितशाल्योदनंदध्नासैंधवेनयुतंचन ॥४॥क्षेपणीयंचपरितोगाराणंवृष्टिवारणं॥शलभाखुपतंगानांपिप्पल्यादेर्भयेसति॥५॥अष्टोत्तरशतंजप्त्वामंत्रंपत्रेतरोर्लिखेत्॥ मंत्रंयथा ॥स्वस्तिकिकिंधास्थितप्रकटपराक्रमांतर्हितार्कमंडलोपजीवितस्यश्रीहनुमानाज्ञापयति॥मूषकपतंगपिपीलिकाशलभकरभान्वककीटगंधिकाविविहैनव्यामाज्ञापयति॥क्रममाणस्यशरीरनिगनःसमावर्तयतितस्यवानरसिंहस्यक्रममाणस्यसागरं॥कक्षांतरगतोवायुजीमूतइवनर्दति॥हुंफट्नमइति॥पत्रेमन्त्रसमालिख्यजप्त्वातन्निखनेद्भुवि॥क्षेत्रेकीटपतंगाखुपिप्पलादिर्विनश्यति॥ ॥

॥इतिमंत्रः॥ इतिवृक्षरक्षा॥ ७ ॥ ७ ॥ ७ ॥ ७॥

अथोपवनक्रिया

घनप्रवालस्थगितातपानिविकीर्णपुष्पाणिसमीरणेन॥गृहाणिकुर्याद्तिमुक्तकानांलताभिरालोलमधुव्रताभिः॥१॥स्थानेष्वपरेषुतथापादपयुगलेषुमिथुनसंबाह्या॥शाखावलंबनीभिर्दोलाःकार्यालताभिश्च॥२॥तरुविटिपलतानिकुंजरम्याविरचितकंदरसानुगंडशैला॥विविधमणिगुहाविचित्रधातुःक्वचिदपिपार्वणिकाविकारहेतुः॥३॥केकानिनादस्कभगाःसदासन्नाहिताहयः॥तांडवेनतदुद्देशान्मंडयंतिशिखंडिनः॥४॥बिलंबितोयत्रतटद्रुमावपुर्विलोकयंतिप्रसवेक्षणेरिव॥समंदिशांतःकलहंसभूषणाक्वचिद्भवेत्पुष्करिणीमनोरमा॥५॥निर्यातःसलिलांसुखावतरणांतीरेषुपुष्पिद्रुमांकूजद्दक्षविहंगमांसतरुणीमत्स्यायतांदीर्घिकां॥कुर्यात्तत्रसमुल्लसत्कमलिनीपत्रांकुरश्यामलांश्यामालोचनमल्लिकांविदधतींनीलोत्पलानिक्वचित्॥६॥उपवनमिववारिमध्यलग्नंविमलतयाप्रतिबिंबितंदधानाः॥शीशिकरनिकरेणभूषितेवक्वचिदमलवनेयथासुखायवापी॥७॥मध्येतस्मिन्शिशिरशिखिरस्पर्धिवेश्मप्रवातंगूढोपांतंसुरभिकुसुमैःशाखिभिर्नम्रशाखैः॥स्थानेस्थानेस्फटिकधवलांमंडपानर्धमंडांकुर्यात्कस्मिन्नपिचकदलीमंदिरंमंदवायुः॥८॥क्वचिदपिकूपंकुर्यादुपवनदेशेषुमिष्टसलिलभरं।संसिक्तसकलविटपंबद्धंपाषाणसंचयैःपरितः॥९॥अंजनमुस्तोशीरैःसनागकेशांतकामलचूर्णैः॥कनकफलेनचयुक्तैर्योगःकूपेप्रदातव्यः॥१०॥कटुकंकलुषंविरसंलवणंसलिलंयदिवाशुभगंधिभवेत्॥तदनेनभवत्यमलंसुरसंसुसगंधिगुणैरपरैश्चयुतं॥११॥इतिसुपवनकूपविधिः

अथकूपार्थभूमिपरीक्षा

पातालादूर्ध्वगमाःशिराःप्रसर्पंतिसर्वतोदिक्षु॥नीरस्यभूमिमध्येज्ञात्वाताःकल्पयेत्कूपं॥१॥यदिवेतसोंबुरहितेदेशेहस्तैस्त्रिभिस्ततःपश्चात्॥पुरुषेसार्धेतोयंवहिःशिराःपश्चिमातत्र॥२॥चिन्ह

मपिचार्धपुरुषेमंडूकःपांडुरोहिमृत्पीता॥पुटभेदकश्चतस्मि
न्पाषाणेभवतिबहुतोयः॥३॥जंबूवृक्षस्यप्राग्वल्मीकोयदिभ
वेत्समीपस्थः॥तस्माद्दक्षिणपार्श्वेसलिलंपुरुषद्वयेसाधु॥४॥
अर्धपुरुषेचमत्स्यःपारावतसन्निभश्चपाषाणः॥मृद्भवतितत्र
नीलादीर्घकालंचबहुतोयं॥५॥वल्मीकोपमितायांनिर्गुंड्यां
दक्षिणेकरत्रयोन्माने॥पुरुषद्वयेनपादेभवतिजलंस्वादुचाशो
ष्यं॥६॥रोहितमत्स्योर्धनरेमृत्कपिलापांडुराततःपरतः॥सिक
ताश्वसशर्कराःक्रमेणपरतोभवत्यंभः॥७॥पूर्वेणयदिबदर्याव
ल्मीकोदृश्यतेजलंपश्चात्॥पुरुषैस्त्रिभिरादेश्याश्वेतागृहगो
धिकार्द्धनरे॥८॥सफलावाबदरीचेदृश्यत्परस्यांजलंततोभव
ति॥पुरुषत्रयेसपादेभवतिपरंदुंदुभेश्चिन्हं॥९॥काकोदुंबरिका
यांवल्मीकोदृश्यतेशिरातस्मिन्॥पुरुषत्रयेसपादेपश्चिमदि
क्स्थावसावहति॥१०॥अपांडुरीवमृत्स्नागोरसवर्णश्चभवति
पाषाणः॥पुरुषार्धेकुमुदनिभोदृष्टिपथंमूषकोयाति॥११॥आस
न्नोवल्मीकोदक्षिणपार्श्वेविभीतकस्ययदि॥अध्यर्धेतस्यशिरा
पुरुषेज्ञेयादिशिप्राच्यां॥१२॥तस्यैवपश्चिमायांदिशिवल्मीको
यदाभवेत्स्थस्ते॥तत्रोदग्भवतिशिराचतुर्भिरर्धाधिकैःपुरुषैः॥१३॥
श्वेतोविश्वंभर- कःप्रथमेपुरुषेतुकुंकुमाभोग्या॥अपरस्यांदि
शिचशिरानश्यतिवर्षत्रयेतीते॥१४॥सकुशःसितपेसिन्यांव
ल्मीकोयत्रकोविदारस्य॥मध्येतयोर्नरैरर्धपंचमतस्तोयमक्षो
भ्यं॥१५॥प्रथमपुरुषेभुजंगःकमलोदरसन्निभामहीरक्ता॥कु
रुविंदकपाषाणश्चिन्हान्येतानिवाच्यानि॥१६॥सर्वेषांवृक्षाणा
मधःस्थितंदर्दुरंयदापश्येत्॥तस्माद्धस्तेतोयंचतुर्भिरर्धाधिकैः
पुरुषः॥१७॥उत्तरतश्चमधूकादहिनिलयःपश्चिमोत्तरेतोयं॥
परिहृत्यपंचहस्तानर्धाष्टमैपौरुषंवाच्यं॥१८॥अहिराजःपुरुषे
स्मिन्धूम्राधात्रीकुलत्थवर्णोश्मा॥माहेन्द्रीभवतिशिराभवतिस
फेनंसदातोयं॥१९॥सर्पावासःपश्चाद्यदाकदंबस्यपश्चिमेनजलं॥

पुरुतोहस्तत्रितयात्षड्भिःपुरुषैस्तुरीयेनैः॥२०॥ वल्मीकसंवृतो
यदितालोवाभवतिनालिकेरीवा॥ पश्चात्षड्भिर्हस्तैर्नरैश्चतुर्भिः
शिरायाम्या॥२१॥ आश्मातकस्यवामेबदरीवादृश्यतेहिनिल
योवा॥ षड्भिरुदग्गाशाकरैःसार्धपुरुषत्रयेतोयं॥२२॥ कूर्मःप्रथ
मेपुरुषेपाषाणोधूसरससिकतामृत्॥ आदौशिराचयाम्यापू
र्वोत्तरतोद्वितीयाच॥२३॥ जलरहितेयदिदेशेचिन्हान्यानूपजा
निदृश्यंते॥ वीरणदूर्वारहितायत्रहि तस्मिन्जलंपुरुषे॥२४॥॰
तिलकाम्रातकवरुणकभल्लातकबिल्वतिंदुकांकोल्लाः॥पिंडीर
शिरीषांजनकूषकावंजुलातिवलाः॥२५॥ एतेयदिसस्निग्धैर्व॰
ल्मीकैःपरिवृतास्ततस्तोयं॥ हस्तैस्त्रिभिरुत्तरतश्चतुर्भिरर्धेनच
नरस्य॥२६॥ अतृणेसतृणायस्मिन्सतृणेतृणवर्जितामही॰
यत्र॥ तस्मिञ्छिराप्रदिष्टावक्तव्यंवाधनंतत्र॥२७॥ कंटक्यकंट
कानांव्यत्यासेंभःकरैस्त्रिभिःपश्चात्॥ ज्ञात्वापुरुषत्रितयंत्रि॰
भागयुक्तंधनंवास्यात्॥२८॥ वृक्षस्यैकाशाखायदिविनताभवं
तिपांडुरावास्यात्॥ विज्ञातव्यंशाखाग्रतलेनजलंत्रिपुरुषंतु॥
॥२९॥ फलकुसुमविकारोयत्रतस्यपूर्वेशिरात्रिभिर्हस्तैः॥भवति
पुरुषैश्चतुर्भिःपाषाणोधःक्षितिःपीता॥३०॥ यदिकंटकहीनस्या
न्निर्दिग्धिकासुभ्रपुष्पसंयुक्ता॥ मृत्स्नातलेंबुवाच्यंत्रिभिर्नरैर
र्धपुरुषेण॥३१॥ खर्जूरेद्विशिरस्कायत्रभवेज्जलविवर्जितेदेशे॥
तस्याःपश्चिमभागेनिर्देश्यंत्रिपुरुषैर्वारि॥३२॥ यदिभवतिकर्णि
कारःसितकुसुमःस्यात्पलाशवृक्षोवा॥ सव्येनतत्रहस्तद्वयेंबु
पुरुषत्रयेभवति॥३३॥ ऊष्मायस्यांधात्र्यांधूमोवातत्रवारिनर॰
युगले॥ निर्देष्टव्याचशिरामहतावारिप्रवाहेन॥३४॥ यस्मिंक्षे
त्रेदेशेजातंसस्यंविनाशमुपयाति॥ स्निग्धमपिपांडुरंवामहाशि
रानरयुगेतत्र॥३५॥ मरुदेशेभवतिशिरायथायथातःपरंप्रवक्ष्या
मि॥ ग्रीवाकरभाणामिवभूतलसंस्थाशिरायाति॥३६॥ पूर्वोत्तरे
पापीलोर्यदिवल्मीकोजलंभवतिपश्चात्॥ उत्तरगमनाचशिरा॰

विज्ञेयापंचभिःपुरुषैः॥३६॥चिन्हंदर्दुरआदौ मृत्कपिलातत्परंभ
वेद्धरितं॥भवतिचपुरुषेचोष्मातस्यतलेवारिनिर्देश्यं॥३८॥ब
दरीरोहितवृक्षौसंपृक्तौचेद्विनापि वल्मीकं॥हस्तत्रयेंबुपश्चा
त्साड्ढशधिर्मानवैर्भवति॥३९॥स्फुरसंजलमादौदक्षिणाशिराव
हतिचोत्तरेणान्या॥पिष्टनिभःपाषाणोमृच्छेतावृश्चिकोर्धनरे॥
॥४०॥सकरीराचेद्बदरीत्रिभिःकरैःपश्चिमेनतत्रांभः॥अष्टादश
भिःपुरुषैरीशानेबहुजलाचशिरा॥४१॥ककुभकरीरावेत्रकसं
युतौककुभबिल्वौच॥हस्तत्रयेंबुपश्चान्नरैर्भव---त्येकविंश
त्या॥४२॥ग्रंथिप्रचुरायस्मिन्समीभवेदुत्तरेणवल्मीकः॥पश्चा
त्पंचकरांतेशतार्धसंख्यैर्नरैःसलिलं॥४३॥जंबूत्रिवृताश्यामा
शिशुमारीवाशिवादूर्वा॥वीरुधयोवाराहीज्योतिष्मतिगरुडवेगा
श्च॥४४॥शूकरिकामाषलताव्याघ्रपदाचेतियद्यहेर्निलये॥व
ल्मीकादुत्तरतस्त्रिभिःकरैस्त्रिपुरुषागतंतोयं॥४५॥एतदनूपे
वाच्यंजंगलभूमौचपंचभिःपुंभिः॥एतैरेवनिमित्तैर्मरुभूमावष्ट
भिःकथयेत्॥४६॥एकनिभायत्रमहीतृणतरुवल्मीकगुल्मप
रिहीना॥तस्यांयत्रविकारोभवतिधरित्र्यांजलंतत्र॥४७॥हस्तो
मघानुराधापुष्यधनिष्ठोत्तराश्चरोहिण्यः॥शतभिषगित्यारंभेकू
पानांशस्यतेभगणः॥४८॥आग्नेयेयदिकोणेग्रामस्यपुरस्यवा
कूपः॥नित्यंसकरोतिभयंदाहंचसमानुषप्रायः४९नैर्ऋतकोणेबाल
क्षयंचवनिताभयंचवायव्ये॥दिश्यैशान्यांभीतिःशेषास्तुशुभावहाः
कूपाः॥५०॥सामेदिनीकाशकुशैश्चयुक्तानीलाचमृद्यत्रसशर्करा
च॥तस्यांप्रणीतंस्फुरसंचतोयंकृष्णाथवायत्रचतिक्तमृत्स्यात्
॥५१॥सशर्कराताम्रमहीकषायंक्षारंधरित्रीकपिलाकरोति॥अ
पांडुतापांसमलिनेप्रदिष्टंमिष्टंपयोनीलवसुंधरायां॥५२॥इ·भूमिपरीक्षा

अथपोषणविधिः

फलकुसुमसंपद्विनारोपणतोभवतिकेवलान्नयतः॥पोषणवि
धिमथसंमतमनोकुहानामतोवक्ष्ये॥१॥खर्जूरबिल्वलकुचाः

सितसर्षपेणपिण्याकृतश्चतुषवारिवशेनचाम्राः॥ऐरावतानि
चुलयन्त्रजलोक्षि तेनसव्रीहिमांससलिलेनचयांतिवृद्धिं॥२॥
प्राचीनामलकतराःप्रयाहिमापःक्षीरांभोहितमिहवालतिंदुका
नां॥श्रीयेतेयवरजसाचनालिकेराःसर्वेषांभवतिरुचिर्हिनिम्नभू
मौ॥३॥कुरंगकटिसारंगसृगालश्वादिमेदसा॥कथितेनसदु
ग्धेनपंचपल्लववारिणा॥४॥कृतसेकोभवेदाम्रसहकारोतिसौ
रभः॥५॥घृतकुणपवचावराहविष्ठासलिलमतीवसुखायदाडिमा
नां॥क्वथितमथकुलत्थचूर्णकंवानिजमपिवृद्धिकरंसदाफला
द्याः॥६॥यस्त्रिफलाशफरीघृतलिप्तोधूपितआज्यफलत्रयधू
पैः॥आम्रफलैरिहदाडिमशाखीतालफलानिविडंबयतीव॥
॥७॥दधिमस्तुकांजिकसुराबदरीतिलमेथिकाकुणपसीधुपयः॥
फलिनीकदंबकरिकेसरिकान्कुरुतेसुगंधबहुपुष्पयुतान्॥८॥
प्रियंगुगुंजाफलनिंबपिप्पलीवचाहरिद्रातिलसार्षपैःसमैः॥
घृताश्वकर्णांबुविलोड्यपातयेत्सचंपकेनागतरौसवृद्धिदं॥९
॥सिक्तांभोभिःपललरुषयोःकुक्कुटानांपुरीषंमूलेदत्वासुकुसुमफ
लागोस्तनीवृद्धिमेति॥स्कंधन्यस्तैःपनसतरवोप्याशुपालालभा
रैर्मूलाद्ग्रंदधतिचवचावारिसिक्ताफलानि॥१०॥सर्पिर्गुडक्षी
रमधूपचारंदत्वानिषिक्तौचकपित्थबिल्वौ॥पीयूषकल्पान्यति
मांसलानिफलान्यनस्थीनिसदादधाते॥११॥कोशातकीदल
शिफाक्वथितांभिषांभःसंसेवनाच्चसुकणारजसाचयुक्तः॥ल
ब्धोपचारमथधूपजलाभिषिक्तःशोभांविभर्तिनितरांमधुरोम
धूकः॥१२॥तिलयष्टीमधुभिर्मिश्रितजलसेकतर्पिताबदरी॥कु
णपैरुपचितमूलाफलतिफलंशर्करामधुरं—— ॥१३॥अजैडका
शूकरविड्विडंगकृतोपचारेणचबीजपूरः॥भूयोश्वमूत्राविल
वारिसिक्तःफलानिधत्तेसुबहूनिशाश्वत्॥१४॥वृश्चिककंटक
विद्धाःसुरभीकृतधूपितानिखिललताः॥मूषककोलवसाभिःसे
सिक्ताःस्युःफलैर्नम्राः॥१५॥सुरभिजलनिषेकतोनिदाघेकुणप

जलेनचकेतकीनिषिक्ता॥जलधरसमयेसुगंधिसूचीचयनिचितानिबिभर्तिपल्लवानि॥१६॥यस्यकस्यापिपुष्पस्यसौरभेणाधिवासितान्॥मृत्तिकाशकलान्मूलेवृक्षाणांबहुलान्क्षिपेत्॥कुष्टपत्रसुरामुस्ततगरोशीरचूर्णकैः॥मिश्रितेनांभसासेकान्मासंसौरभसंभवः॥१८॥कुल्माषदंतिदंतानांचूर्णगुडंपकसंभवा॥मत्स्यहंपुष्पिताभोजमंडितापद्मिनीभवेत्॥१९॥सिद्धार्थैःकदलीदलानिशफरीविट्कोलमार्जारयोरेतेषांसमभागमाज्यसहितंचूर्णंतरुभ्योहितं॥दत्तंधूपविलेपनोपचरणेराप्यायनंरोगहृत्शाखापल्लवयत्परमधुकरव्यालोलपुष्पकृद्दः॥२०॥धूपोघृतस्यसमुदोयववारिसेकोनिसंचदुग्धसलिलैःकुणपांबुभिर्वा॥लेपोविडंगतिलकल्ककृतःशिशूनांवृद्धिंकरोतिपरमांखलुभूरुहाणां॥२१॥अंकोल्हक्वाथतोयेनमिश्रितंघृतमाक्षिकं॥वसाकिटिकुरंगाणामेतैःसिक्तामहीरुहाः॥२२॥सिद्धार्थकफलोपेताःसर्वदाफलशोभिताः॥जायंतेपत्रपुष्पाढ्याःसच्छायारोगवर्जिताः॥२३॥षष्टीमधुकपुष्पाणिसिताकुष्टंसमाक्षिकं॥निष्पीड्यगुटिकांकृत्वामूलेसर्वत्रनिक्षिपेत्॥२४॥दुग्धमेकंचवृक्षस्ययस्यकुर्याद्विचक्षणः॥फलंसुनिश्चितंतस्यमधुरंजायतेभृशं॥२५॥इ॰

अथकुणपजलं

कुरंगकिटिमत्स्यानांमेषच्छागलखड्गिनां॥मांसंग्राह्यंयथालाभंमेदोमज्जावसास्तथा॥१॥तान्सर्वानेकतःकृत्वावन्हौनीरेणपाचयेत्॥सम्यक्पक्त्वाक्षिपेद्भांडेतत्रदुग्धंविनिःक्षिपेत्॥२॥चूर्णीकृत्यखलिंदद्यात्तिलानांमाक्षिकंतथा॥खिन्नांश्चसरसान्माषांस्तत्रदद्याद्घृतंतथा॥३॥उष्णाजलंक्षिपेत्तत्रमात्रानास्तीहकस्यचित्॥पक्षैकंस्थापितेभांडेकोष्णस्थानेमनीषिणा॥४॥कुणपस्तुभवेदेवंतरूणांपुष्टिकारकः॥५॥इतिकुणपजलं॥ ७ ॥ ७ ॥ ७ ॥

अथतरुचिकित्सा

नराणामिववृक्षाणांवातपित्तकफाद्गदाः॥संभवंतिनिरूप्यातःकु

र्यत्तद्दोषनाशनं॥१॥ कीटजग्धेग्निसंलुष्टेवातभग्नेशनिक्षते॥वृ
क्षेच्छेदेपचारादिपीडितेषुपृथक्क्रिया॥२॥ कृशोदीर्घोलघूरूक्षो
निद्राहीनोल्पचेतनः॥नधत्तेफलपुष्पाणिवातप्रकृतिकस्तरुः
॥३॥ आतपासहनःपांडुःशाखाहीनोमुहुर्यदि॥अकालफलपा
कीस्याच्छाखीपित्तात्मकःकृशः॥४॥ स्निग्धशाखाद्रुःशा
खीसम्यक्पुष्पफलोज्वलः॥लतापरीतभागश्चकफवान्परि
मंडनः॥५॥ कटुतिक्तकषायरसैःपवनःपित्तंकटूष्णलवणाम्लैः॥
स्निग्धमधुराम्ललवणैःश्लेष्माकोपंप्रयातितरोः॥६॥ सुस्निग्धैः
पिशितरसैःप्रयातिवातःसुस्निग्धैर्मधुरजलैश्चयातिपित्तं॥कटु
म्लैरहिमजलैःकषायरूक्षैःश्लेष्मापिक्रमविहितैःप्रयातिनाशं॥
॥७॥रौक्ष्यंग्रंथिकुटिकावातावृक्षस्यजायतेगोविड्भिः॥लोध्रवसा
कुणपजलैःसदत्तस्तज्ज्वरोपिभवेत्॥८॥ दोषैर्यस्यविनाप्रबाल
कुसुमाम्लायंतिरूढंवपुर्मूलेतस्यतरोर्भवंतिकृमयोयत्नाच्चता
नुद्धरेत्॥ गोमूत्राज्यविडंगसर्षपतिलैर्लिप्तापनष्टेस्ततःसिक्तः
क्षीरजलैरुदेतिसहसाधूपैश्चधूपायितः॥९॥ करंजारग्वधारिष्ट
सप्तपर्णत्वचाकृतः॥उपचारःकृमिहरोमूत्रमुस्तविडंगवान्॥१०
कुणपजलपयोनुषिक्तमूलःसरसिजदधिलिप्तसर्वगात्रः॥तरुर
निलहतोबिभर्त्तिभूयोमरकतकांतिनिभानिपल्लवानि॥११॥प्ल
क्षार्कोदुंबराल्वकृघृतमधुमधुरोच्छिष्टदुग्धैर्विलिप्तस्तंभैरुत्तंभ
रज्वापरिकलितवपुःपूरितःप्लक्षमृद्भिः॥सिक्तःक्षीरेणभूयोज
लभरिततलश्चंडवातादिभग्नःस्वस्थोभूत्वांघ्रिपापीकुसुमफल
भरैर्व्याततनोतिप्रकामं॥१२॥ वृक्षस्याशनिदग्धस्यजीवनंशृणुभे
षजं॥घनोशीरमधूकैश्चमुद्गमाषयवास्तिलाः॥१३॥ पिष्टक्षीरां
बुसंसिक्तैःसेवयेत्तमभीक्ष्णशः॥ससेकाप्यायितःशीघ्रंप्रकृति
स्थोभवेत्तरुः॥१४॥जनयत्वाफलकुसुमेयःपुनरुपयातिवंध्य
तांशाखी॥ सक्षीरैःकुणपजलैर्भूयःसिक्तःफलत्येव॥१५॥ असे
कतोत्यंतनिषेकतश्चशाखाविशोष्यंफलितोविरूप्याः॥सप्ताह

मात्रंसृतमत्रसर्पिर्विडंगदुग्धंविनिषेचनीयं॥१६॥तन्मूलमू
लंपरुषुमहारैर्विश्रावितंदोषशांतंनिहन्यात्॥क्षौद्राज्यजंतुघ्न
तिलौघसिक्तंमृत्पूरितंदुग्धजलैर्निषिंचेत्॥१७॥उन्निद्रताम
त्स्यसुगंधिताचप्रवालहानिःसपिपीलकत्वं॥ त्वग्भ्रंशितावारि
कृताद्जीर्णात्तरोर्भवेत्तत्रचिकित्सनीयं॥१८॥शर्करातिलगोक्षी
रवारिसेकात्तथातरोः॥शोषःशाम्यतिवृक्षस्यलेपाद्धूपोविचारतः
॥१९॥प्रियंगुवतकर्कंधुचेतसार्जुनवल्कलैः॥क्षीरसिद्धैर्विलि
प्तानांस्रावःशाम्यतिशाखिनां॥२०॥ इतितरुचिकित्सा॥ ❀॥

अथविचित्रकरणं

वृक्षायुर्वेदफलंमनोहरंशास्त्रतःसिद्धं॥नानाविधानचित्रं
वृक्षाणांचित्रीकरणंप्रवक्ष्यामि॥१॥सुरभिसुमनोलब्धामोदं
निधायचमृत्तिकां॥धवखदिरयोःक्वाप्यांभोभिःसुगंधिभिरक्ष
णात्॥मलयजरजोलेपाद्धूपाद्धतस्यचभूरुहां॥व्रजतिकुसु
मंनिर्गंधानामतीवसुगंधितां॥३॥यवतिलनिशापलाशैरूप
चितमूलातदंबुसिक्ताच॥ज्वलदनलोपममसत्कृत्स र्पासीतू
लकंसूते॥४॥शाल्मलीत्वङ्निशानीलीत्रिफलाकुष्टसीधुभिः॥
सहल्लोपोपचारेणशुकपक्षनिभंभवेत्॥५॥मंजिष्ठातिलयव
पीतसारसारैर्जीवंतीदलसहितैर्मनःशिलाज्यैः॥गोजाविप्रचु
रपयःश्रितैर्विलिप्तात्कार्पासात्प्रभवतितूलकंरवलीनां॥६॥संप
केसुरसविदारिकंदविलिप्तमूलभागस्य॥सिक्तस्येक्षुरसेनच
तरोरकालेभवेत्कुसुमं॥७॥तिलखलविडंगगोमयविलोडिते
क्षरससेचितस्यतरोः॥फलकुसुममकालभवंमनोहरंफलति
लोकस्य॥८॥मधुयष्टिसिताकुष्टमधुपुष्पविनिर्मितैः॥मोदकैः
छादितेमूलेनिरस्थिस्यात्फलंतरोः॥९॥ मधुककुसुमगुंजाश
केरोदुंबराज्यंसमधुनिहितमंभःकांडमुत्कीर्यबद्धा॥उपरिचप
रिलिप्तंवत्सविड्भिस्तरूणांजनयतिफलमेतत्स्वादुसेकादनस्थि
॥१०॥तत्कालनिहतस्योच्चैःछागस्यस्कंधचर्मणा॥बद्धायांवृक्षशा

खायांफलपाकोनजायते॥११॥करिमदमृदितवलीमुखनलिकैर्मूलेषुकीलितस्यतरोः॥संवत्सरंनयावत्फलितस्यफलानिपच्यंते॥१२॥बल्काच्चर्मतृणाभ्यांविडंगमधुदुग्धलेपतोल्लिख्य॥शृगरवापयोंबुसेकात्च्चिरमपिपक्वंफलंधत्ते॥१३॥मीनकोलवसामांसदुग्धसेकेनधूपितः॥सर्वबीजानिसाश्चर्यमुत्तिष्ठंतिफलंतिच॥१४॥अंकोल्हतैलभूकरशिशुमारवसासुभावितंबीजं॥सद्योरोहतिनिहितंभूमौकरकांभसासिक्तं॥१५॥बीजमाम्रादिवृक्षाणांपक्वंमीनफलांबुनि॥अंकोल्हतैलदुग्धाज्येनिहितंवृद्धिंभवेत्॥१६॥भस्मन्यामेलितंशुष्कमुप्तमुद्भिद्यतेसह॥फलेनाशेषलोकस्यकृतकौतुकमंजसा॥१७॥एकविंशतिवारेणकुक्कुटस्यासृजोक्षितं॥तत्क्षणाद्दाडिमीबीजंवर्द्धतेफलतिध्रुवं॥१८॥मच्छकोलवसामांसंचणकक्षारभावितंयस्यकस्यापिवाबीजंद्रुतंपुष्पफलंलभेत्॥१९॥स्कंधतःसप्तमंततःभूकरास्थिभिसदृढं॥कीलितोनचसंशयंनाशमेतेस्यनोकहः॥२०॥कुलत्थक्वाथतोयेनतरुःपुष्पंफलंत्यजेत्॥किंशुकार्जुनतर्करीलवणांबुक्षणेनवा॥२१॥नानावर्णघटितंकंदंकुमुदस्यमूत्रस्रंघटितं॥घृतमधुविलिप्तमुप्तंयांतेकुसुमंतथावर्णं॥२२॥माहिषकरीषमूत्रैर्मृदितं शुष्कंदिनानियत्सप्त॥कुमुदफलबीजमुप्तंजनयतिकरवीरविटपंतत्॥२३॥कूष्मांडवृंताकपटोलकादिबीजंवसाभावितमुप्तसिक्तं॥विशोधितायांभुविसर्वकालंफलान्यनस्थीनिमहांतिधत्ते॥२४॥वृंताकबीजंघृतमाक्षिकाक्तंविशोषितंगोमयलिप्तरंध्रे॥बालस्यकूष्मांडफलस्यतप्तंपक्वंगृहीतंफलितंमहत्स्यात्॥२५॥मेदाखुमरंध्रेयाकौष्मांडीनिर्गतालता॥मृद्गोमयमृतेतस्मिन्सिक्तेफलतिसातदा॥२६॥भूकरासृग्वसासिक्तमंकोल्हतैलभावितं॥एरंडबीजंकारल्लीफलंसूतेतिकौतुकं॥२७॥खरतुरगविड्भिर्वेशितनापितपाशलाकयामूले॥तिर्यग्विद्धाकदलीफलतिफलंकरिकरा

कारं॥२८॥कौलशोणितमेदाभ्यामंकोलक्कथितेन वा॥सिंचिताकदलीसूतेदाडिमीफलमुत्तमं॥२९॥ नरमांसवसारक्तदतिदंतविचूर्णितैः॥मिश्रितेनांभसासिक्तारंभाचूतफलाभवेत्॥३०॥अंकोल्हक्कथितंस्विन्नंनृमांसंछागदुग्धयुक्॥पिण्याकसहितंमूलेसहकारस्यनिक्षिपेत्॥३१॥द्राक्षावल्लीसमाकारःसहकारःसदाफलः॥जायतेनिश्चितंधत्तेसर्वेषामद्भुतंयदि॥॥३२॥शशकूर्मोसृगमेध्येबहुभावितमाम्रजंबीजं॥रूढंसिक्तंदुग्धैःफलतिफलंसर्वकालेषु॥३३॥क्रिमिरिपुयवयष्टीमधुगुडदुवि ग्धविलेपतोँलिरव्य तरुः॥भवतिजलदुग्ध सिक्तःस्वभावतिक्तोपिमधुरफलः॥३४॥बीजंनरपलांकोल्हतैलभिन्नंशुभंसप्त॥उद्गच्छतिमृदापूर्णमंभसिक्तंकरेक्षणात्॥३५॥अंकोल्हतैलभावितमुषितंगोशकृतिकुमुदकंदमले।करकांबुकपर्दमभृतेतलशोकुसुमंसमुद्भवति॥३६॥गोकोलास्थिकरीषैस्तुदग्धेगर्तेविशोधिते॥उप्तेचवालुकापूर्णेमूलकंगर्तेवड्ढवेत्॥३७॥दृष्टकवितेसमंतात्पुरुषनिरवातेवटीतरुर्जातः॥वामनएवहिधत्तेफलंकुसुमंसर्वकालीनं॥ ॥३८॥ इतितरुचित्रीकरणं॥

अथान्नादिनिष्पत्तिज्ञानं

फलकुसुमपत्रवृद्धिंवनस्पतीनांविलोक्यविज्ञेयं॥सुलभत्वंद्रव्याणांनिष्पत्तिश्चापिसस्यानां॥१॥न्यग्रोधेनतुयवकास्तिंदुकवृद्ध्यापिषष्टिकोभवति॥अश्वत्थेनज्ञेयानिष्पत्तिःसर्वसस्यानां॥२॥जंबूभिस्थूलमाषाःशिरीषवृद्ध्याचमुद्गनिष्पत्तिः॥गोधूमाश्चमधूकैर्यववृद्धिःसप्तपर्णेन॥३॥करिणश्चहस्तिकिरणेनिर्देश्यावाजिनोश्वकर्णेन॥गावश्चपाटलाभिःकदलीभिरजाविकंभवति॥॥४॥ आम्रैःक्षेमंभल्लातकैर्भयंपीलुभिस्तथारोग्यं॥ खदिरशमीभ्यांदुर्भिक्षमर्जुनेनशोभनावृष्टिः॥५॥पिचुमंदनागकुसुमैःसुभिक्षमथमारुतःकपित्थेन॥निचुलेनावृष्टिभयंव्याधिभयंभवतिकुटजेन॥६॥ एवंनानावृक्षायुर्वेदशास्त्रेभ्यः॥ इतिश्रीवृहच्छा

ङ्गधरविरचितायांपद्धत्यांउपवनविनोदपरिच्छेदः॥ ❀ ॥ ❀॥

अथशकुनज्ञानं

दृष्ट्वाशास्त्रसमुदायमनुभवसिद्धिंचलोकतःकृत्वा॥ प्रारभ्यतेमयेदंशकुनज्ञानंसतामर्थे॥१॥ येजन्मादिषुशुभाशुभंविवृणुतेकालावधिप्राणिनांयैर्व्याप्तंनिखिलंजगत्त्रयमिदंयेभ्योविनाकिंचन॥ ज्ञानंभूतभविष्यभावविषयंविज्ञायतेनस्फुटंविश्वोन्मेषकराजयंतिशकुनाअभ्यासभास्वत्प्रभाः॥२॥ लाभंहानिविदधतिमुदंदुःखमेकांतरौद्रमायुर्दीर्घंमरणमथवासर्वकामार्थसिद्धिं॥ येसंग्रामेविजयमतुलंभंगदायेचवक्तुंतेषांभावंकइहशकुनानांप्रगल्भोस्तिमर्त्यः॥३॥ इतिशकुनप्रशंसा॥ ❀ ॥ ❀॥ ॥

अथशकुनविवृत्तिः

त्रिविधमिहभवतिशकुनंक्षैत्रिकमागंतुजंप्रैकंचान्यत्॥ कृत्वाऽधिवासमाद्यंयदीक्ष्यतेक्षैत्रिकंतत्स्यात्॥१॥ प्रस्थानस्थानानांशकुनंयदिकस्माद्दिग्विभागतोभवति॥ शांतप्रदीप्तभेदाद्व्यक्तफलंप्रथितमागंतु॥ २॥ सव्यापसव्यसन्मुखपृष्ठेषुग्राम्यवन्यसत्वानां॥ शकुनंस्वरगतिचेष्टाभावैःपथिकांप्रैकंनाम॥३॥ पोतकीपिंगलाकाकोजंबूकीभषणस्तथा॥ पंचैतान्युत्तमान्याहुःशकुनानिमुनीश्वराः॥४॥ चत्वारिप्राक्तनान्याहुर्दुर्विज्ञेयानितत्वतः॥ सुबोधोभषणस्तेषुतेनपूर्वंसकथ्यते॥५॥ पृच्छाशकुनंवच्मिश्वानमुक्त्वात्रनान्यसत्वस्य॥ प्रकटंसुलभंचयतोनैवंविधमस्तिकिंचिदपि॥६॥ इतिशकुनविवृत्तिः॥ ❀ ॥ ❀ ॥ ❀॥ ❀॥

अथक्षैत्रिकशकुनं

अथोच्यतेश्वानरुतस्यसारंसारंसमस्तेष्वपिशाकुनेषु॥ विस्पष्टचेष्टंशुभलक्षणीयंशुभाशुभंप्राक्तनकर्मपाकं॥१॥ विमर्षकःशाकुनशास्त्रदक्षोविशुद्धबुद्धिःसतताभियुक्तः॥ यथार्थवादीशुचिरिंगितज्ञोभवेदिहाचार्यवदाधिकारी॥२॥ श्वानभल्लूकभषणाःकौलेयककपिलजांगरूकाश्च॥ मंडलकुक्कुटपक्षाः

शुनकःसरमासुतस्याज्ञाः॥३॥ श्वेताद्विजाःक्षत्रियकाश्चरक्ताः
पीताश्चवैश्याअसिताश्चशुद्राः॥ विमिश्रवर्णाःशुनकास्तथेह
भवंतिनानाविधकारसंज्ञाः॥४॥स्वस्ववजातेस्तुपृच्छायांपृष्ट
व्याइतिकेचन॥ सत्यंब्रूतेतथाकृष्णास्तस्थान्येनमुनेर्मतं॥५॥
आचार्यमानीयशुभेन्हिकार्यपोक्ष्यंश्वयुग्मंशुचिरर्चयित्वा॥क्षीरे
णभोज्यंभषणस्यतुष्ट्यैदद्यात्कुमारीशिशुबांधवेभ्यः॥६॥सर्वा
गकृष्णःपरिपूर्णकायःशांतोविरोगस्तरुणोबलिष्ठः॥ अवाम
भागानतपुच्छचेष्टोबिभर्तिशूद्रोनखविंशतिंयः॥७॥ तंसारमेयं
पुरुषोधिवास्यविश्वस्य‾‾धृत्वास्तनपयेह्निनांते॥शुक्लांबरस्तार
जनींव्रतीस्यात्प्रयत्नेनकुर्यात्सकलंसमंत्रं॥८॥अथाधिवासमंत्रः
॥ॐशुनकोत्तममयाःस्मिन्कर्मण्यधिवासितोसिसत्यंब्रूहिस्वा
हा॥ इत्यात्महस्तंशुनकस्यशिरसिदत्वाभिमंत्रयेत्॥ततःप्रभा
तेनवगोमयेनत्रिहस्तमात्रंचतुरस्रकंच॥शुचौमनोज्ञेविजनेवि
दध्यात्स्थरातलेमंडलकंविशुद्धं॥९॥ गौरइंद्रो‾कृष्णोवन्हिर्यमः
कृष्णाश्चमेचकौ॥शुभ्रःपाशीचहरितोवायुश्चित्रोधनेश्वरः॥१०
विशदःशंभुरित्येतेकार्याअष्टदलांबुजे॥पिष्टातकमयाःसर्वेनि
जकाष्ठासमाश्रिताः॥११॥पृष्ट्वाचार्यस्तुतत्पूजांकुर्याद्ध्यानादिभि
स्तदा॥प्रणवाद्यैर्नमोंतैश्चमंत्रैस्तन्नामनिर्मितैः॥१२॥यक्षोर्चनीयो
विधिनात्रमध्येपैष्टंचयुग्मंचततःकुमार्याः॥पक्केनदेयश्चरणोप
हारोघृतप्लुतोऽभ्यर्चितदेवताभ्यः॥१३॥ हविःसमुद्धृत्यचरोस्तथा
न्यत्कुर्याच्चपिंडंशुनकार्थमत्र॥ततस्तुपूजांविदधीतमध्येयक्ष
स्यमंत्रैर्निखिलैरमीभिः॥१४॥ मंत्रः॥ॐमंडलायस्वाहाइतिचं
दनं॥ ॐप्रफुल्लायस्वाहेतिपुष्पं॥ ॐकपिलायस्वाहेत्यक्षतां॥ॐ
यक्षायस्वाहेतिधूपं॥ॐविनतेस्वाहेतिदीपं॥ॐऋतुकालाभि
गामिनेस्वाहेतिफलं॥ ॐबलिभोजनायस्वाहेतिनैवेद्यं॥ॐस्वा
मिभक्तायस्वाहेत्यर्घ्यं॥मध्येमंडलस्ययक्षपूजा॥ततआनीयशु
नकंस्वच्छंकृत्वानिजंकरं॥निधायमस्तकेतस्यमंत्रमेनंततोजपेत्

मंत्रोयथा॥ ॐकृतज्ञएह्येहिरात्रिजागरएह्येहि॥ ॐदिव्यज्ञानिन्एह्येहि॥ ॐप्रत्यक्षवचनएह्येहि॥ ॐजिह्वायसएह्येहि॥ ॐस्वल्पप्रियएह्येहि॥ ॐदिव्यज्ञानिन्ने ह्येहि॥ ॐशुनकोत्तमएह्येहिसत्यंब्रूहिगृह्णस्वाहा॥ इतिशुनकाभिमंत्रणं॥ ततोनरोनिजंकार्यंनिधायहृदयेखिलं॥ हविःपिंडंसमादाय मंत्रंजप्त्वावनौन्यसेत्॥१६॥ मंत्रोयथा॥ ॐनमोभगवतेशुनकोत्तमायमहाशकुनगंभीरशब्दायप्रजापतये ऋतुकालाभिगामिनेशीघ्रमेह्येहिबलिंगृहाणममचिंतितंसत्यंकार्यंब्रूहिब्रूहि॥ ॐहुंफट्स्वाहा॥ इतिबलिनिवेदनमंत्रः॥ अब्दायनर्तुसुत्तमाससमस्तपक्षदिनानिकार्येष्ववधौविदध्यात्॥ हीनावधिर्येनभवत्यसमस्तःसर्वेपिलोकेशकुनोगृहीतः॥१७॥ एवंविधेभाविनिचिन्नचिंत्येवश्येचकार्येभषणंविमुंचेत्॥ सभक्ष्यपिंडान्स्थिरतांगतस्यचेष्टादिकंतस्यनिरूपणीयं॥१८॥ इतिशुनकबलिदानं

अथभूपतित्वप्रश्नचेष्टा

कंडूयमानःखलुदक्षिणेनहस्तेनमालंभषणोददातिप्रभावनम्रीकृतराजचक्रंराज्याभिषेकेवरपट्टबंधं॥१॥ करेणकंडूयतिदक्षिणेनयक्षोयदावामकरंतदानीं॥ प्रभूतमातंगघटासमृद्धंभूतेसमंतात्पृथिवीपतित्वं॥२॥ उद्घाटयेद्दक्षिणमक्षियक्षोहस्तेनमुद्रायथदक्षिणेन॥ तस्याभिषेकःसभवेत्स्वशक्त्यासितीशालसेक्षितपादपद्मः॥३॥ कौलेयकोदक्षिणकर्णदेशंकरेणकंडूयतिदक्षिणेन॥ यदातदाजल्पतिगीतवाद्यविनोदयुक्तंपृथिवीपतित्वं॥४ कंडूयतेदक्षिणपाणिनाचेत्ससारमेयोवदनंतदानीं॥ भक्तैःप्रभूतैःसहभूमिपालैर्भोज्यानिभक्ष्याणिचिरंभवंति॥५॥ वक्षोयकंडूयतिदक्षिणेनस्वंसारमेयःस्वकरांघ्रिजैस्तु॥ तुरंगमातंगमहिष्यजादिवादित्रसंपत्सहितंनृपत्वं॥६॥ यदिदक्षिणपादस्यनखैर्लिखतिमंडलः॥ जाठरस्त्वंतदातस्यलाभस्तत्किंमहत्तरं॥७॥ पश्यतिजिघ्रतिविलिखतिकंडूयतिपार्ष्णिमुपलेढि॥ ——

दक्षिणतोथचलित्वादक्षिणमंगंशुभंख्यातं॥८॥दक्षिणकटे
नशेतेदक्षिणचरणेनमूत्रयस्यथवा॥उपविशतिदक्षिणेनचपा
र्श्वेनस्वाशिवंशंसन्॥९॥मेहतिशुभप्रदेशेअथतेषांतांदिशंप्रदे
शंच॥अधिरोहतिशय्यायामासनवेदिप्रासादहर्म्याणि॥१०॥
दक्षिणंचेष्टितंतस्यज्ञेयंसर्वंसुखावहं॥वामागतिर्वामचेष्टास्सर्वा
नर्थायकेवलं॥११॥जृंभनवमनप्रलापनचिंतानिद्रांगभंगतनुकं
पौ॥मूर्धश्रवणविधूननतनुचर्वणकासहिक्काश्च॥१२॥भस्मो
द्धूलनलोटनखननाक्रंदानिभक्ष्यपरिहारः॥रोदननेत्रनिमीलन
दृषदाग्रहभास्करालोकाः॥१३॥दीप्तदिगाश्रयभीतिविश्रामो
क्षादिकंचयद्दीप्तं॥निंद्यंशांतप्रश्नेदीप्तंप्रश्नेभयंहंति॥१४॥दिक्चे
ष्टितस्थानगतिःस्वराख्याःपंचेहदीप्ताःखलुपंचशांताः॥अन्ये
प्यपीमेशकुनेषुभूम्नानिमित्तविद्भिःपरिभावनीयाः॥१५॥भवेत्स
वामायदिवामतश्चचेष्टासमासन्नगुणोनदोषः॥कौलेयकोया
स्त्वधिकाःकरोतिफलंतदुत्थंप्रतिपादनीयं॥१६॥महोदयंपंच
विधेनपुंसांशांतेनराज्यंवितरत्यवश्यं॥पंचप्रकारेणपुनस्तदेव
दीप्तेनचित्तंहरतिप्रसह्य॥१७॥इतिभूपतित्वप्रश्नः॥ छ॥ छ॥

अथकन्यार्थेवरप्रश्नः

वरस्यकन्यावरणोद्यतस्यकुमारिकायापतिमर्थयंत्याः॥आख्या
यतेन्योन्यपरीक्षणायक्रमेणचेष्टासरमासुतस्य॥१॥कौलेयके
दक्षिणचेष्टितेस्यात्कन्याविवाहोनतुवामचेष्टे॥शून्यासमंकेलिर
तेसुखेनतयोऽपासार्धमह्नानियांति॥२॥श्वाचेद्दूरस्याभिमुखं
समेतितदानकन्याखलुसाविवाह्या॥यक्षःस्समाजिघ्रतियःस्व
शून्यायोनिंसकन्यांक्षतयोनिमाह॥३॥इतिकन्यार्थेवरप्रश्नः॥

अथवरार्थेकन्याप्रश्नः

प्रश्नेवरार्थेविहितेकुमार्यास्याद्वामचेष्टःशुभदोनचान्यः॥मूत्रंच
शून्यामुपरिप्रकुर्वन्ब्रूतेसपत्नींभषणोभवित्रीं॥१॥मूलंनिजंले
ढिदिशंचवामाप्रयातितस्यांदयितानुरागी॥संमार्जयन्वामक

रेणजिह्वांब्रवीतिभोगप्रियतांवरस्य॥२॥इतिवरार्थकन्याप्रश्नः

अथवर्षाप्रश्नः

वर्षानिमित्तंशुनकोत्तमस्यचेष्टाविशिष्टाविधिनोपदिष्टाः॥याःशाकुनज्ञानविशारदैस्ताःशृण्वंतुशिष्टाःपरमार्थप्रष्टाः॥१॥वर्षानिमित्तंशुनकोत्तमस्यचेष्टाःप्रशस्ताःखलुदक्षिणायाः॥शांताश्चयादीप्ततरानशस्तानवामचेष्टाःशुनकस्यनूनं॥२॥उद्घाट्यचेद्दक्षिणमक्षिलीढेन्नाभिस्वकीयामपिवाधिरूढः॥शेतेगृहस्योपरिजागरूकस्तदांबुदोंबुक्षिपतिप्रभूतं॥३॥जृंभांप्रकुर्वन्गगनंविलोक्ययोजागरूकःकुरुतेश्रुपातं॥सजल्पतिप्रावृषमंबुपूरप्लुतावनिंसर्वसमृद्धसस्यां॥४॥निर्गत्यतोयादधिरुह्यपालींकौलेयकश्चेद्विधुनोतिकायं॥तन्निश्चितंप्रावृष——मब्दकालेकृषीवलप्रीतिकरींकरोति॥५॥उच्चंप्रदेशंभषणोधिरुह्यभषत्यभीक्ष्णंरविमीक्षमाणः॥यदातदानीमचिरेणवृष्टिरंभोदमुक्ताभवतिप्रभूता॥६॥ इतिवर्षाप्रश्नः॥७॥ ७॥ ७॥

अथराज्ञोःशुनकयुगेनजयप्रश्नः

युद्धोद्यतयोराज्ञोःशुनकाभ्यांजयपराजयप्रश्नः॥कर्तव्योविद्वद्भिश्चेष्टास्तत्रापिकथ्यंते॥१॥युद्धार्थिनोर्नामयुगेनराज्ञोःपृथक्पृथक्श्वयुगंप्रकल्प्य॥मुंचेत्ततोयोबलिमत्तिजित्वामध्यात्तयोस्तस्यजयोनृपस्य॥२॥यद्यह् दातेच्चबलिंमिलित्वास्नेहान्वितौभक्षयतोयदोभौ॥जयार्थिनोःस्यान्नृपयोस्तदानीमन्योन्यसंधानविधानबुद्धिः॥३॥यन्नामकःश्वाप्रपलायतेचेज्ज्ञेयःसंमन्नासइतींगितज्ञैः॥यन्नामधेयःपुनरस्तशंकोननस्यराज्ञोभयमस्तिचित्ते॥४॥मुंचतोघुर्घरारवंयदावांछतेपिखलुश्वापितुंबली॥मंडलीकृतनिजास्यदाश्रयोवैरमेवनतदाभवेद्रणः॥५॥श्वानावुभावप्यभिभूयसाक्षाद्यदापरोश्नातिबलाद्बलिंचेत्॥ध्रुवंतदान्योनृपतिर्वलिष्टस्तौभूपतीजेतुमुपैतितूर्णं॥६॥मध्याद्द्वयोरेकतरेणयेनशुनागृहीतोबलिरात्मशक्त्या॥आछिद्यभुङ्क्ते

भषणस्तृतीयस्तस्यापरस्तत्रभवत्यराप्तिः॥७॥ मध्यात्तयोर्मंडल
योस्कयेननैवद्यमेकेनगृहीतभुक्तं॥भुंक्तेतृतीयःप्रणयेनतस्य
मिलत्यकस्माद्युषितत्रमित्रं॥८॥एकेनमध्यादुभयोर्गृहीतंगृ
ण्हातिभस्यंप्रणयात्तृतीयः॥ यक्षोयदिह्वावपितौनिहंतिजयस्य
रातिंसतदासमित्रं॥९॥ समश्रुतोयद्यधिकारभावात्समंतृतीये
नमुनातदन्नं॥श्वानौतदानींसमुपैत्यवश्यंराज्ञोस्तयोःसंधिवि
धायिमित्रं॥ इतिशुनकयुगेप्रश्नः॥ अथैकेनशुनकेनराज्ञोःसं
ग्रामप्रश्नः ॥ध्रुवंरणोस्तीतियदातुपृष्टंराज्ञोर्द्वयोर्बुद्धिमताथ
तद्वत्॥श्वानस्तुचेष्टांप्रकरोतिशांतांयुद्धंभवेत्तन्नृपयोरवश्यं
॥१॥दिक्स्थानचेष्टानिनदैःप्रशांतैःयथोत्तरंसंगरवृद्धिकारी॥च
तुर्भिरेतैर्यदिशांतदीप्तैस्तदानसंधिर्नचसांपरायाः॥२॥यक्षोभ
षन्नेवरमीक्षमाणःकर्णौधुनोत्युत्पततिप्रधावन्॥ योवापस
र्पत्यग्रसव्यगत्याससांपरायप्रशमायराज्ञोः॥३॥प्रदक्षिणादु
त्तरमप्रदक्षिणंयदातदासंधिरणंरणांतरात्॥करोतियक्षोय
दितुष्यतेक्रमात्तदानुसंधिःप्रथमंरणंततः॥४॥ इतिसंग्रामप्रश्नः

अथसंग्रामप्रश्नः

राज्ञोरणंनैवभविष्यतीतिप्रश्नेकृतेयद्यशुभंशुभंभवेत्॥चेष्टः
समस्ताःस्वरमासुतस्यभवेत्तदानींसमरोतिघोरः॥१॥शुनानि
मित्तंद्वितयंविरुद्धंशांतंचदीप्तंचकृतंयदिस्यात्॥ मध्यात्तयो
र्निःफलमादिभूतंफलान्वितंपश्चिममामनंति॥२॥इतिसंग्रामप्र०

अथैकेनशुनाएकस्यैवराज्ञोजयप्र०

जयाययस्सःकृतशांतचेष्टःप्रदीप्तचेष्टस्तुपराजयाय॥लोका
न्ध्रुवंलोकयतेनरेशंसवाहनामात्यपदातिदेशं॥१॥ अथसं
धिप्रश्नः ॥प्रशस्तचित्तेशुभशांतचेष्टेसंधिर्भवेद्युद्धसमुद्य
तस्य॥पराङ्मुखेचाथपलायमानेभंगोभवेन्नैवभवेत्तुसंधिः॥१
॥ अथयुद्धप्रश्नः॥दिक्स्थानचेष्टानिनदैःप्रदीप्तोजयाययुद्धे
नियमेनयोद्धुः॥सएवशांतःसमरेकरोतिबंधंवधंतस्यपराजयंच॥

॥ ॥अथविविधप्रश्नः॥ ॥शुभस्वरोयःशुभचेष्टितःश्वाकरोतिमूत्रंचशुभप्रदेशे॥ददात्यसात्रानुगामिनांत्वदिस्थंनिःसंशयंधान्यधनादिलाभं॥१॥ उपस्थितःप्राकृतपुण्यपाकात्पुरस्थितोदक्षिणपाणिनाश्वा॥शिरःस्पृशेद्दक्षिणचेष्टितोवायोमंडलोमंडललाभदोसौ॥२॥उल्लासहिक्काशयनांगभंगविष्ठावमिःश्वासविजृंभणानि॥ वक्रुंशुनोर्धोन्मिषितांचदृष्टिंगतेप्रशंसंतिचवामचेष्टां॥३॥ संमूत्र्यपंथारमणीयदेशेचेष्टामवामोललितांप्रकुर्वन्॥स्याद्गर्भवत्याःसुत जन्महेतुश्चेष्टात्रकन्याजननायवामा॥४॥विष्टावमिःश्वासविजृंभणानिप्रलापकासांगविमोडनानि॥यद्याचरत्याशुतदाकरोतिश्वागर्भवत्याःखलुगर्भपातं॥५॥दिक्स्थानचेष्टानिनदैःप्रशांतैःप्रश्नेषुसौम्येषुशुभार्थकारी॥चतुर्भिरेतैस्तुभवेत्प्रदीप्तैःप्रश्नेषुतीव्रेषुशुभाययस्तः॥६॥इ·वि·प्र·

अथरोगिप्रश्नः

प्रश्नेनिमित्तेश्रवणौविधूयसंकोच्यगात्राण्यखिलानिशेते॥ कौलेयकश्चेत्तदुपैतिरोगीपरेतनाथावसथंक्षणेन॥१॥ अवामभागेननदावमित्वाश्वापृष्ठकंडूतिमपाकरोति॥ तदन्हितत्रैवकृतांतगेहेरोगाभिभूतोनियतंप्रयाति॥२॥पुनःपुनर्दक्षिणमूरुभागंलिहन्दिनैःपंचभिराहमृत्युं॥यमक्षयेतक्षणमेवयज्ञःक्षिपत्यसव्यंजठरावलेहात्॥३॥ वामांगेवामचेष्टाश्वरोगिप्रश्नेशुभावहाः॥उच्चस्थानाश्रयोहर्षोमूत्रश्रावःशुभःस्मृतः॥४॥ इति॥

अथागंतुकशाकुनं

स्थानस्थानस्यतत्रप्राक्शुनकस्तस्यशुभचेष्टानिकथ्यंतेस्थानस्थितस्यसप्रश्ना॥देहंयस्यजिघ्रतिलाभदःक्रयाणकेमूत्रयतेभषणोलाभदायकः॥१॥दक्षिणेनाङ्घ्रिणाकर्णौविलिखन्वृद्धिसूचकः॥भषणोविलिखंश्चक्षुःप्रतिभूपतिसंगमे॥२॥उच्छीर्षपदकंकृत्वायदिशेतेशुनस्तदा॥ आगच्छदुर्लभंवक्तितद्देश्यन्यचिरादपि॥३॥ द्वारप्रदेशेजघनंविघर्षन्भूजाहेपांथागमनाय

यस्सः॥करोतितत्रोपविशंश्चनूनंसंगंजनेनाभिमतेवसुंसां॥४॥
लिप्तपूरितचतुष्कविशेषेप्रांगणेश्वनिवहोरममाणः॥संपदंप्रवि
तरत्यतिवल्गीततवनन्सुनरनर्थकरोसौ॥५॥संमार्जनींचकर्प
संसणकंसूर्पकंतथा॥गृहीत्वासंमुखोभ्येतितद्गृहंपूर्यतेधनैः॥
॥६॥वसुंधरायाःकमपिप्रदेशंमूर्ध्नास्पृशत्यद्यवलोकतेश्वा॥ध्रु
वंतदातत्रमहानिधानमस्तीतिसिद्धैःकथितंरहस्यं॥७॥विवाह
र्थेशुभःशून्याविधत्तेप्रश्नवंयदि॥तदाविवाहिताकन्यासुभासौ
ख्यार्थभाग्भवेत्॥८॥दक्षिणांगंयदापक्षःस्पृशेद्दक्षिणपाणि
ना॥तदाऋद्धिंविवाहार्थेविधत्तेचिंतिताधिकां॥९॥ हृष्टास्यंभष
पंवीक्ष्यक्रीडंतंकांतयासह॥विवाह्यतेकुमारीयासासौख्यंल
भतेतरां॥१०॥चंद्रार्कौप्रेक्ष्यवर्षासुरौत्यूर्ध्ववदनोयदि॥सप्तरा
त्राद्वारिपूरंपतिष्यतिवदत्यदः॥११॥नीरतीर्थेतटस्थश्चेदंगके
पयतेशुनः॥तत्रदेशेघनोमेघवृष्टिंवदतिभाविनीं॥१२॥इति॥

अथशुनकस्यशुभाशुभचेष्टितानि

गच्छतांदक्षिणपक्षोवामःप्रविशतांभवेत्॥कार्षुकाणांसआ॰
ख्यातिकृषिकर्मविदुत्तमः॥१॥दिनकराभिमुखोदिवसात्यये
कृतरवःखलुकर्षुकभीतये॥पवनदिग्वदनस्तुनिशात्ययेभवति
चौरसमीरणभीतिदः॥२॥उदङ्मुखोवक्तिभषन्निशीथेहिजोप
पीडांमरणंगवांच॥कुमारिकादूषणगर्भपातंप्रवीन्निशांतेशिव
दिङ्मुखःस्यात्॥३॥प्रातर्दिनेशाभिमुखोग्निदिङ्मुखोभषन्वि
धत्तेनलचौरभीतिं॥दिनस्यमध्येनलमृत्युभीतिंसरक्तपातंकल
हंदिनांते॥४॥भषन्दिनेशाभिमुखःप्रभातेग्रामस्यमध्येनृपना
शनाय॥वक्त्रोविमुंचन्यदिदृश्यतेश्वासिद्धेपिकार्येतदुपद्रवस्या
त्॥५॥ऊर्ध्वाननोभास्करसंमुखोनःश्वानोरुदंतोमहतेभयाय
॥एवंहिसंध्यासमयेवदातुर्निर्वासकास्युर्नगरस्यतस्य॥६॥
मत्ताःशरद्दतौश्वानोरुदंतिकलितेनिशां॥तदानभूषणंतेषाम
न्यदातुनशोभनाः॥७॥ग्रामेनिशायांखरसारमेयाःशून्यंवि

धात्तुंसहितारुदंति॥ग्रामेभपित्वाभषिणाःश्मशानेरुदंतिनाशायचमुख्यपुंसः॥८॥निःकारणंयःभपलायतेश्वाविरौतिवावारिणियोवतीर्य॥मृतांगरज्ज्वस्थिमुखोरुगार्त्तगेहेविशेद्यःसचमृत्युमाह॥९॥खनत्यगारंयदिसारमेयःकुड्येतदास्यात्खलुसंधिवातः॥ गोष्ठप्रदेशेयदिगौविहारोधान्यस्यभूमिंयदिधान्यलाभः॥१०॥यदिश्वानिजपुंश्चिन्हंप्राणिग्रहणकर्मणि॥लेढिगौरीसमाप्नूढाकलंकयतिसाकुलं॥११॥कृत्वाशिरोद्वारिवपुर्बहिःश्वेच्छूरौतिदीर्घंगृहिणींप्रपश्यन्॥ तद्रोगदोवक्तिचबंधकीनांबहिर्मुखोभ्यंतरकायभागः॥१२॥गृहेप्रविश्यपनेदन्नंविक्षिपेत्कश्चयस्यदः॥गृहिणीतेदत्तास्पर्थंजारस्यैतद्विचारय॥१३॥खनित्वोपरिगेहस्यपुरीषंकुरुतेयदि॥जारस्यगमनंवक्तिपश्चाद्दूनिकयोषितः॥१४॥ तूलिकाशीर्षकेनित्यंयदिसेवतिमंडलः॥जारप्रवेशस्तद्गेहेजायतेनिशिसर्वदा॥१५॥मुशलोलूखलौशूर्पंसनंखट्वांचकुक्कुटः॥दत्वोच्छीर्षश्वपतिचेज्जारमाख्यातितद्गृहे॥१६॥जृंभांदत्त्वानभःप्रेक्ष्यमुंचत्यश्रूणिरौतिच॥स्थानेतस्मिन्निदंज्ञेयंविद्युत्पातोभविष्यति॥१७॥ यदिश्वापललंकृत्वामुखेनीरविगाहते॥संग्रामोवन्हिनासर्वंदह्यतेकथयत्यदः॥१८॥गृहीत्वागोमयंगेहेविशन्गोहरणायसः॥ आत्मानंदशनैःस्वादन्भून्यंस्थानंकरोतिवै॥१९॥सूर्योयदेगृहोर्ध्वेचवन्हिभीत्यैरुवन्भवेत्॥सखोर्विवादायभवेद्रासनादौपुरीषकृत्॥२०॥भुजङ्गयंजिघ्रतिसारमेयःपुंसोभवेत्तस्करवैरियोगः॥ मांसास्थिभस्मानिचभस्ममध्येस्याज्ञोपयन्नग्निभयंप्रभूतं॥२१॥भषन्नभीक्ष्णंभवनस्थितानामावेष्टनंतंकुरुतेकदाचित्॥ कौलेयकोवश्यमुपस्थितंतज्ज्ञेयंभयंबंधनसंप्रवृत्तं॥२२॥यस्यप्रातःस्वास्थितस्यहूयंवावहवोयवा॥कुर्वंतिस्रुहमीशानेतस्यसहैरिभिस्सह॥२३चतुष्पथेराजमार्गेगोवत्सीकामयेच्छुनीः॥ तत्रभीतिंसमाख्यातिसप्तमेमासिवैरिणां॥२४॥विशन्नस्थिमुखेगेहेस्वामिपुत्रादि

मृत्यवे॥क्रीडंतिशयनेतस्यसोर्ध्वंसौख्यंप्रयच्छति॥२४॥इति॰

अथशिवारुतं

अष्टदिशोरवियोगाज्ज्वलिताधूमान्विताछाया॥ सजलाकर्दमधा
व्योभस्मितदग्धेतिपरिज्ञेया॥१॥प्रत्येकमेवंसततंसुमेरोःप्रद
क्षिणाभ्यागमनेक्रमेण॥दिवारजन्योःप्रहराष्टकेनप्रतापयत्सु
ष्णकरोदिशोष्टौ॥२॥नशिवायशिवारटंतीभास्वद्दग्धासुति
सृषुकाष्ठासु॥पंचसुशांतासुसुभेष्वेवंशास्त्राद्दतःपथाः॥३॥
दिशिज्वलंत्यांमरणंप्रदिष्टंसंधुक्षितायांसकलार्थनाशः॥छाया
जलाकर्दमितासुदिक्षुजयोधरित्र्यांकथितोर्थलाभः॥४॥व
स्याद्भस्मितायांनभयंनहानिरंगारितायांस्वजनःक्षयःस्यात्॥श
त्रौशिवायास्वरजःप्रभावोयथाभवेदन्यपितद्विधःस्यात्॥५॥
अतीवसौख्यशुभदायाम्यांनिशिभवेच्छिवा॥पूर्वस्यांतत्सुरा
ध्यक्षमन्यंकुर्याद्दहत्सुखे॥६॥अस्तेशिवापश्चिमायांपरचक्रभ
यायसा॥सुभाकुवेरदिश्यस्तेग्रामांतःशून्यकारिणी॥७॥अ
श्वमध्येकतरवाशिवासुहृत्प्रपंचहृत्॥शिवासप्तस्वराथाह्याव
हुशस्ताश्चनिःफला॥८॥धनंमित्रंप्रियंभोगंसुखंराज्यंजयंक्र
मात्॥एकादौसप्तपर्यंतेशब्देशांतिदिशांतरा॥९॥रुजंशोकं
भयंहानिंचौर्यंवह्निमृत्तिक्रमात्॥कुर्वंत्येकादिसप्तांतादीप्तदि
क्षुशिवारवाः॥१०॥दिनानित्रीणिवापंचसप्तवाकुरुतेस्वनं॥
यद्ग्रामनिकटेदीप्ताशिवातन्नाशयत्यपि॥११॥दिस्वारटंतीस
कलासुरौद्रंभ्राम्यत्सरिभ्राःपरितःपुरंचेत्॥शृगालजायास्व
लुतद्रुवीतियुद्धंमहत्तत्रमहाभिघातं॥१२॥फेफेहूहूभुभुश्चैव
हाउहाउहहस्तथा॥एतान्पंचस्वरान्ब्रूतेसर्वदिक्षुसंगताशिवा
॥१३॥फेफेनगरनाशायहूहूसर्वसुखप्रदा॥भुभुश्चविड्वरंब्रूते
हाउहाउमहाभयं॥१४॥हहश्चनृपनाशायमिश्रेमिश्रफलंभवे
त्॥पुरासन्नेस्वरेशीघ्रंफलंदूरेचिरेणच॥१५॥इतिशिवारुतं

अथफेरुशब्दः

उच्चाटितेयथाग्रामेगच्छतांदक्षिणस्वरः॥मृगलांस्तंपुनस्थानंकथयंतिकरस्थितं॥१॥स्थानस्थानांचतुर्दिक्षुसमकालविराविणः॥दुष्टभीतिंसमाख्यातिसर्वथाचाशुभादिने॥२॥सर्वासुदिक्षुफेरूणांशिवारुतवदादिशेत्॥एकोरवःसदानिंद्यःसोपिभीतस्यशांतिदः॥३॥बंधायधावतांशब्दोयुध्यतांकंदनायच॥शुभायत्हष्टफेरूणांदिक्षुशांतासुवारवः॥४॥इतिफेरुशब्दः

अथकौशिकः

राज्ञोगृहस्योपरिभाषमाणोदुःखायकाकःसचमृत्यवेच॥गृहस्थनाशायचसप्तरात्रान्नाशायराज्ञोहिगुणानुबंधी॥१॥व्यहंगृहद्वारिरुवत्यकस्मात्कोहरंतिचौराद्रविणंप्रसह्यतस्मिन्नदेशेनिशिमांसयुक्तस्तद्दोषनाशायबलिप्रदेयः॥२॥संध्याकालेरुवन्भूमौप्रवेशेवेश्मनोथवा॥दृष्टोरोगप्रदोघूकःसोप्यार्तानांभयापहः॥३॥घूघूशब्दःसदाशांतोगुरुलुगुरुलुतादृशः॥अन्येशब्दास्तुघूकानांनिंदिताःसर्वदास्मृताः॥४॥शांतायांदिशिवृक्षेषुग्रामदूरेषुशब्दतः॥घूकःस्यात्सर्वलोकानांसुसमृद्धिसुखार्थकृत्॥५॥ इतिकौशिकः॥ अथपिंगला ॥

गृहोपरिगृहद्वारेपिंगलायस्यरौतिच॥म्रियतेतस्यगेहस्थानशुभातेनसास्मृता॥१॥शांतायांदिशुवृक्षेषुशुभेषुयदिपिंगला॥रौतिभूव्यंतितत्राभ्यांनदातत्रशुभंवदेत्॥२॥पृथिव्याःकीचिकीचीतिचीलिचीलिजलोद्भवं॥शब्दितंशुभकृज्ज्ञेयंपिंगलायानचापरे॥३॥इतिपिंगला॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ॥

अथकाकशुभचेष्टितं

पृष्ठेपुरो—वानवगोमयस्थोवदादिषुक्षीरतरुष्वपीहस्थितोरुवन्भोजनपानमिष्टंविष्टंचकुर्वन्वितरस्यवश्यं॥१॥अन्नादिवर्जःफलपुष्पमांसमत्स्यादिभिःपूर्णसुखःसदैव॥स्याद्दृष्टमार्गोभिमतार्थसिद्धौमिष्टान्नभोज्यायमुदेचकाकः॥२॥गोपृष्ठदर्पीतरुगोमयेषुतुंडंविघर्षन्नवलोकितोये॥आहारमन्यस्य

सुखेदद्यानोददाति भोज्यंबलिभुग्विचित्रं ॥३॥ धान्यंपयोवा
दधिवाप्यवाप्यविरौतिपश्यन्निधिलाभकारी॥ करोतिलाभंपुर
तःसहर्षंयस्यास्तिवक्रेतृणमप्यशुष्कं॥४॥ शांतामैंद्रीकु
भंगाप्यरुवन्वायसःकुरुते॥ हेम्नःस्फुटदृश्याप्तिंशाल्यन्नंगुड
शनाप्तिंच॥५॥ आग्नेय्यामनिलाजीविकयुवतिमवर्धातुला
भश्च॥ याम्येमाषकुलत्थंभोग्येगांधर्विकैर्योगः॥६॥ नैर्ऋत्यांदू
ताश्वापकरणदधिपललितैलभोज्याप्तिः॥ वारुण्यांमांससुरा
सर्वधान्यसमुद्ररत्नाप्तिः॥७॥ मारुत्यांशस्त्रसरोजवस्त्रवल्ली
फलासनाप्तिश्च॥ कौबेर्यांपरमान्नाशनंतुरंगांवरप्राप्तिः॥८॥
ईशान्यांसंप्राप्ति धृतचूर्णानांभवेदनडुहश्च॥ एवंफलंगृहप
तेर्गृहपृष्ठसमाश्रितेभवति॥९॥ क्रांक्रामितिक्षेमविधौविरावः
क्रिंक्रीमितीष्टाशनयानहेतुः॥ कारोतिक्रूंक्रूमितिचार्थलाभंक्वं
कंध्वनिःस्यादनिलोम्यभीत्यै॥१०॥ यत्काइतित्रिस्तदनुहूरेत
च्छब्दंनृपत्स्यान्महतेफलाय॥ कामित्ययंवाहनमासनंवद
दातिहर्षंकुरुकुर्वितीदं॥११ ॥इतिशुभचेष्टितानि॥ ७ ॥ ७॥ ॥

अथाशुभचेष्टितानि

ऐंद्र्यादिदिगवलोकीसूर्याभिमुखोगृहेगृहिणः॥ राजभयंचौ
रभयंबंधुकलहपशुभयंस्याच्च॥१॥ गोपुच्छवल्मीककूलास
दृश्वकाकोभवेत्सर्पभयस्यहेतुः॥ स्यान्मृत्यवेगांरचितास्थि
संस्थःकाकःप्रकुर्वन्कचलंघनंच॥२॥ वल्लीवरत्राकचशुष्क
काष्ठचर्मास्थिजीर्णांबरवल्कलानि॥ अंगाररक्तोल्मुककर्प
राणिदष्ट्वावदेत्कालमुखेभयाय॥३॥ अत्रस्तानिजपक्षैस्कंड
विघातेर्जननाभिभवेतः॥ कुर्वंतिशत्रुवृद्धिंनिशिविरुवंतोज
नविनाशं॥४॥ शीर्षेनरस्योपविष्टःकाकोऽत्यायनर्थदः॥ स्थि
तोजनापवादंवाशोकंचकुरुतेस्त्रियः॥५॥ दीप्तोहिंस्नोविटपे
विकुट्टयत्यन्हिरुहीधुतपक्षः॥ भंजनस्थितबंधायदिविरुव
त्यस्तिभंगाय॥६॥ विज्ञोमयेन्यस्यतियस्यमूर्ध्नितस्यानलत्रा

सरुजोभवेतां॥यस्यास्थिखंडंविसृजत्यसौतुभयातितूर्णंनगरीयमस्य॥७॥मध्यंदिनेवेश्मनियस्यकाकोविरौतिरोद्रंविधिनोतिचांगं॥हरंतिचौराद्रविणानितस्यध्रुवंतथान्योभवतिप्रसादः॥८॥छायासुलाभंभुविभूमिलाभंविघ्नंजलेयावनिकार्यनाशं॥करोतिकाकोविरुवन्नरस्य‾ ‾ ‾प्रस्थायिनःस्यानगतस्यचापि॥९॥क्रींक्रीमितीष्टार्थविनाशनायज्वलज्वलेत्सग्निभयायशब्दः॥किंकीतिकोकाविति यःकथंचिन्मुहुर्मुहुःस्यात्समतोविधाय॥१०॥आह्वारदोषायचकन्नकदीतिस्याह्व्कुटानिध्वनितंरणाय॥केकेध्वनिष्टाक्कुर्वंतिचिकाचत्रयंत्विद्स्यात्सुरदूषणाय॥११॥स्यात्कलिःकरकध्वनौनृणांजायतेकनकनोघनौज्वरः॥आव्रजेत्कुलकुलध्वनौप्रियःसोदनंकटकटध्वनौदधिः॥१२॥इदंत्विहोत्पातयुगंपृथिव्यांमहाभयंशाकुनिकावदंति॥यद्वायसौमैथुनसन्निविष्टौदृश्येतयद्वाधवलःकदाचित्॥१३॥निःकारणंसंमिलितारुवंतोग्रामेतुनाशायभ वंतिकाकाः॥रोधंचचक्राकृतयोवदंतिसव्यापसव्यभ्रमणाद्भयंच॥१४॥यःस्नातिधूल्यांबुविलोक्यरौतिवृष्टिंसमाशंसतिवायसोयं॥जलस्थलस्थाणुविपर्ययेणवर्षासुवृष्टिंभयमन्यदातु॥१५॥वैशाखेनिरुपहितेपक्षेनीडःसुभिक्ष‾फलदायी॥निंदितकंटकसुष्केष्वपक्वभिरक्षभयाभिनदेशे॥१६॥काकस्यवृष्टिहेतोनीडंदिक्षुप्रशस्यतेतिसृषु॥दुर्भिक्षमरणहेतुर्भव तिसयाम्येषुकोणेषु॥१७॥मूर्ध्नितरोर्बहुवर्षतिमध्येमध्यंनवर्षतिस्कंधे॥जातेकाककुलायेशुष्कतरौवर्षतिनजातु॥१८॥भूमौलग्नमहीरुहवल्मीकंश्वाभ्रकोटरतटेषु॥काकोलस्यकुलायांजातंदेशस्यनाशाय॥१९ द्वित्रिचतुःशावत्वंसुभिक्षदंपंचभिर्नृपान्यत्वं॥अंडावकिरणमेषांततःप्रसूतिश्वनशिवाय॥ २०॥ इतिकाकः॥ छ ॥छ॥

अथकपोतकी

स्थानस्थितानांसूर्यास्तेप्राच्यांकुर्यात्द्रुमेध्वनिं॥नृपप्रसादं
कुरुतेशांतेतिथ्यागमायच॥१॥दीप्तेतुध्वनिनादुर्गासाकिंचि
द्वित्तहानये॥उदयेस्तेदक्षिणस्यांग्रामात्तासेमलाभदा॥२॥
शुभासदैवकौबेर्यामध्रुवान्स्थापयत्यलं॥सेवाग्नेयेसदाभी
त्यैवायव्यांदुःखिनःशुभा॥३॥स्फखिनश्चाशुभाकिंचित्तांड
वीध्वनितासती॥ब्रह्मस्थानेचमध्यान्हेकलिघातग्रहादिः
कृत्॥४॥गेहांतर्ध्वनिनाभीत्यैपट्टेतुस्वामिमृत्यवे॥शय्यायां
महिमाकष्टंदुर्गायाःकुरुतेरवः॥५॥पालनैबालकष्टायगृहमध्ये
विजायते॥शून्यकुड्यवनद्वारेसमस्यंध्वनितातदा॥६॥यत्र
तत्रस्थिताप्येषात्रासाच्छब्दपरायणा॥शुभाशुभावाविफ
लाफलदासास्वभावजा॥७॥नियोगिनःक्षत्रियस्यदुर्गाचे
न्मस्तकेविशेत्॥पदप्रतिष्ठावश्यंस्याद्भूमिलाभःकुटुंबिनः॥८॥
करोतिनीडंभुविचेद्वाराहीसमान्यपत्यानिविजायतेवा॥समु
द्रवद्वानुमयूथवन्हौजाज्वल्यतेतोजगतीसमस्ता॥९॥द्वा
रादिदेशेऽगृहेषुयस्यप्रत्यक्षरूपाकुरुतेकुलाय॥अंभोधरावर्ष
तिचेत्तस्थापितच्छून्यतायातिचभिद्यतेच॥१०॥गर्तेसरिद्रोधः
सिवावराहीशावानयुग्मान्यदिचेत्प्रसूते॥नांभोधरामुंचति
तावदंभोयावत्समुड्डीयनतेव्रजंति॥११॥प्रासादशैलद्रुमको
टरेषुतुंगेषुचान्येषुविधायनीडं॥प्रसूयतेयद्यसमैरपत्यैःश्या
मातदांभोभवतिप्रसूतं॥१२॥इतिपोत्तकी॥ छ ॥ छ ॥ छ॥

अथतित्तिरखरसर्पाः

ग्रामेपुरेवादिशिदीपितासांस्थानस्थितानामरुणोदयेच॥उ
द्वेगदाईनिशिसर्वदिक्षुकरोतिशून्यंध्वनिराशुगम्यां॥१॥वारु
ण्यांध्वनितास्तेतुतित्तिरश्चौरभीतिस्त्रसमयेभीतिहंताचध्रु
वंमध्यंदिनेध्वनिः॥२॥धाटीभयंसईशानेसर्वदिक्षुनशोभनः
॥स्थानस्थितस्यैककालंसर्वथासर्वथासंजेत्॥३॥कृष्यारंभदिनेक्षे
त्रेप्रविष्टस्याथतित्तिरेः॥प्राच्यांरुतंसर्वेभीत्यैप्रतीच्यामीतिसंभवः॥४

उदीच्यांसस्यनिष्पत्तिर्याम्यांनिष्पत्तिनाशकृत्॥गृहान्निर्ग ९
च्छतांवामेशुभंक्षेत्रेचदक्षिणे॥५॥स्थानस्थस्यप्रयातुर्वातित्ति
रिध्वनिरुत्तमः॥खरस्वारटितंग्राम्येचेष्टावास्यशुभाहिता॥६॥के
दारपाल्यांगेहेवाशशकाद्दृश्यतेयदि॥महासुभिक्षंजानीयाद्भी
तानांचापिनिर्भयं॥७॥ आषाढेशशकाद्दृष्टाःस्थानेस्थानेसुभि
क्षदाः॥चतुःपादादिनाशेचतल्लब्ध्यै शशदर्शनं॥८॥केदारगा
हसमयेकृष्णसर्पोविलोक्यते॥चेत्पलाशद्रुमारूढःसुभि
क्षंप्रवदेत्तदा॥९॥ इतितित्तिरिरुतं॥ अथलट्वा ॥पूर्वस्मिन्
दिवसेदृष्टालट्वाक्षेत्रेफलानना॥क्षेत्रेप्रविष्टाकुरुतेफलदाप्रचु
रांकृषिं॥१०॥सैवक्षेत्राद्बहिर्यातामूषकोपद्रवायसा॥इष्टामू
षकशंकायैलट्वाकृषिप्रयोजने॥११॥ इतिलट्वा॥ ७ ॥ ७ ॥

अथकारायिका

समार्घताविक्रयोवाप्रकुहुलुहुलध्वनिः॥नियोगितांसदापिस्या
ल्लाभःकरकरारवात्॥१॥निर्वेदायनृपद्वारंगंतुर्हुलुहुलारवः॥
कर्षुकाणांपतांसस्यसिद्ध्यैकरकरारवः॥२॥निरुपद्रवनिष्प
न्नेक्षेत्रमध्येसदैवहि॥दुर्भिक्षायचतत्रैवभवेत्कुलकुलारवः
॥३॥धान्यस्यराशौनिष्पत्तेःसाचेद्घुलुघुलायते॥ तद्धान्यंनि
निकौनैवगृण्हातिपरकीयवत्॥४॥ संगृहेतृणकाष्ठानांसाचे
द्घुलुघुलायते॥ तत्रग्राह्यंगृह्यतेचेन्नपापीनभयायतं॥ ५॥
भीतानांपरचक्रेपिप्रवृत्तेवाभवेद्यदि॥तस्माद्घुलुघुलारावस्त
दानिस्तारयेध्रुवं॥६॥ इतिकारायिका॥ अथपल्ली ॥पल्ली
भुजेपसव्येश्चमस्तकेस्वामिनोदरं॥पतंतीकुरुतेवामेलाभेहा
निकराकरे॥१॥ करेतुदक्षिणेव्याधिंहृदिक्षेत्रादिलाभदा॥पृ
ष्ठेचोपद्रवंहंत्युदरेमिष्टान्नभोगदा॥२॥ नाभौपुत्रफलंदत्तेकटौ
गुह्येचरोगकृत्॥ जानुयुग्मेसुखस्सूतेपादयोश्चमहाभयं॥३॥
अंगंदक्षिणमारुह्यवामेनोत्तरतिस्फुटं॥ तदाहानिकराज्ञेयाव्य
त्ययेनतुलाभदा॥४॥चरणादूर्ध्वगीभूययद्यारोहतिमस्तकं॥ -

राज्याद्राज्यंतदादत्तेपल्ली श्वेताविशेषतः॥५॥चिंतिताभ्यधि
कंलाभंस्थिताभोजनभाजने॥सर्वमेतत्फलंधत्तेबहूंतीनाद्वि
काश्रिता॥६॥स्त्रीलाभंरतिलाभाद्यकंदंयुद्धात्समागमं॥भक्ष्या
ल्लाभक्षिगदतिपल्लीछ्छीश्वनागोष्टा॥७॥पतितामस्तकेयस्य
चिरंतिष्ठतिपल्लिका॥मरणंतस्यकथितमत्रोत्तीर्णापिकष्टदा॥
॥८॥पल्लिकायागृहद्वारिस्वरेतिथिसमागमं॥कुरुतेस्वस्यवि
त्तस्यपृष्ठेचौरभयंस्वरः॥९॥दुग्धस्याल्पुपरिस्यायिरोधिका
चतुष्पदस्यनाशाय॥सर्वासुदिक्षुशब्दस्तासांलोकस्यनाशा॰
य॥१०॥ इतिपल्ली॥ अथवृश्चिकः॥ दीपोत्सवेदैववशाद्यदि
विध्यतिवृश्चिकः॥तद्वर्षेतस्यसोद्वेगंधनमानादिहानिदं॥१॥
वृश्चिकोवस्त्रमध्योवाकुर्वतांक्रयविक्रये॥महार्घेतांतदातस्य
वस्त्रनःकथयत्यदः॥२॥ इतिवृश्चिकः॥ अथांगस्फुरणं॥
दक्षिणमंगंपुंसांस्त्रियाश्ववामंशुभावहंस्फुरणं॥नीचोच्चमध्य
मात्रफलतिवगात्रोचितस्पंदः॥१॥धनवृद्धिरंतःकरणेनाभिस्पंदः
स्वदेशनाशाय॥पृष्ठेपराजयायस्फुरणंहृदयस्यविजयाय॥२॥
प्रियसंगमायबाह्वोःकंपात्हृत्कमलसंभवोभीत्यै॥मूर्ध्निस्फुरि
तेराज्यंरमतेसीमंतिनीमक्ष्णोः॥३॥नेत्रस्योर्ध्वेहरतिसकलंमा
नसंदुःखजालंनेत्रोपांतेहरतिचधनंनासिकांतेचमृत्युः॥नेत्र
स्याधःस्फुरणमसकृत्संगरेभंगहेतुर्वामेचैतत्फलमविकलंद
क्षिणेवैपरीत्यं॥४॥वामस्याधःस्फुरणमसकृत्संगरेभंगहेतु
स्तस्यैवार्द्धेहरतिनितरांमानसंदुःखजालं॥नेत्रोपांतेहरतिच
धनंनेत्रकोणेत्रबंधुंसव्येचैतत्फमविकलंव्यत्ययंचापसव्ये॥५॥इ॰

अथसंकीर्णशकुनानि

नीरैरवरोहंस्तारायांतःप्रदक्षिणावर्ताः॥घ्नंतिभयंभीतानांकु॰
ल्याःसर्पाश्चमार्जाराः॥१॥पूर्णाननाःसमृध्यैमार्जारभुजंगादयो
पियेक्रूराः॥किंपुनरपरेशकुनाःशस्तंचेष्टादिकंयेषां॥२॥गर्भेग
हेशय्यादौदेहल्यामाज्यकुंभेषु॥चुल्लीगृहमूर्धादिषुनशुभा॰

निंद्यप्रदेशेवा॥३॥नेष्टोगृहोपविष्टःछन्नादिवाहवनसंस्थोवा॥नेष्टःशिरसिविसृंचन्वर्षःपांडुःकपोतस्तु॥४॥पिंगलापेरुजंबूक्योवृकोघूकोन्हिशब्दिताः॥निशि तित्तिरशब्दश्चजगदुल्लासहेतवः॥५॥परस्परयोनिंगच्छेतोनृपरावपहायदेशभंगाय॥सर्वस्यापिहिजगतःप्रकृतिस्थाहिकृतिरुत्पाताः॥६॥उल्लासयितुंवेश्मनिसरघाःकुर्वंतियन्मधुछत्रं॥दुर्गकरोतिनीव्रंकुर्युर्वल्मीकमुपनीकाः॥७॥ग्रामोह्यापनहेतोग्रामेनगरेलत्सतिविधाय॥प्रविशंतिसिंहभल्लूकगोमायुतरक्षमुख्यास्तु॥८॥देशोद्यायप्रतिमाप्रभावावनौषधीनामधिकाफलर्धिः॥निष्कामवर्षित्वमथांबुदानांधर्मप्रवृत्तिश्चसुराज्यताच॥९॥ इतिसंकीर्णशकुनानि॥छ॥

अथप्रस्थितानांजांधिकशकुनं

अस्विनीमैत्ररेवत्योमृगमूलपुनर्वसू॥पुष्योज्येष्ठातथाहस्तप्रयाणेश्रेष्ठउच्यते॥१॥ इतिप्रस्थाननक्षत्राणि॥ शीतोवदान्यवेषःकृतमंगल्यःप्रणम्यगुरुदेवान्॥अप्रतिरथंजपित्वाशुभेमुहूर्तेप्रतिष्टेत॥२॥ अर्जुनःफाल्गुनःपार्थःकिरीटीश्वेतवाहनः॥बीभत्सुर्विजयीकृष्णःसव्यसाचीधनंजयः॥३॥इत्यर्जुननामानी॥यावहतितत्समयेनाडीपादंतमग्रतःकृत्वा॥अंतःप्राणोप्रविशतियायाहूनायिकवेषेण॥४॥ योजनशेषेनगरग्रामात्क्रोशांतरेपथित्याज्यं॥कल्याणंवांछद्भिःपथिकैर्गीतंचहास्यंच॥५॥ मुंडनवमनविकर्तनतैलाभ्यंगास्रुमोक्षमुख्यानि॥मैथुनमद्य दुरोदरकलहानपिवर्जयेत्तदहः॥६॥ संताड्यकमपिपुरुषंविप्रानवमान्यबालमाहत्य॥निर्भर्त्स्ययोषितोवाप्रयातिमायातियःपुनस्तत्र॥७॥ अतःसुस्थितचित्तेनप्रस्थातव्यंशुभेदिने॥स्मृत्वाक्षेमकरींदेवींपश्यतान्शकुनान्शुभान्॥८॥ दधिदूर्वाक्षतपल्लवशंखश्रीखंडरत्नकुसुमानि॥ आदर्शामिषमृत्स्नागोरमयगोरोचनायुधमधूनि॥९॥ अंभःकुंभांभोरुहचामरभृंगार—हेमरौप्याणि॥फलतांबूलवरांबरमदिरामीनेष्ट भोज्यानि॥१०

आशीर्वादमुखास्त्रीमंत्रमुखोब्राह्मणःप्रियवाक्॥कुशलंपृष्ठ
न्नतिथिःप्रियस्सुहृदानंदपरिपूर्णः॥११॥शांतःस्वरभिर्विरजाः
प्रदक्षिणंमारुतःशनैःसर्पन्॥एतेप्रयाणकालेचित्ताभीष्टंपरंकु
र्युः॥१२॥ चतुर्भिःकलापः॥सिध्यैयासुरंविघ्नंश्रुतिपथयाताःप्र
याणसमकाले॥नांदीमंगलतुर्यःप्रस्थानिकेशंखनिर्घोषः॥१३॥
आरूढःस्वामिकोश्वःस्याच्चित्तचिंतितसिद्धये॥सर्वेषांसुरत॥
क्रीडाहृष्टादौभोगसिद्धये॥१४॥सद्यःप्रसूतास्वरभिःसवत्सा
कामधेनवः॥रश्मिबद्धोवृषःश्रेष्ठोहृष्टौचेदत्यंततःशुभौ॥१५॥
दृष्टःश्रुतोवाभूपालोश्वाप ‾ केकीकरीवृषः॥प्रस्थानेवाप्रवे
शेवासर्वसिद्धिकराःस्मृताः॥१६॥वामेरोदनमाहुःशस्तंयदिरो
दयितानहृष्टःस्यात्॥शंसंतिहृष्याणांतोरणरुदितंचसंसिध्यै
॥१७॥सिध्यैकेनचिदुक्तंपृष्ठेगच्छेतिपुरतएहीति॥मागाःक्वा
सिपृष्ठेस्येवंरूपंनिषेधाय॥८॥दृष्टःशवप्रवासेरोदनबंधःप्रियाणि
साधयति॥धत्तेसत्तुप्रवेशेदीर्घरुजंदीर्घनिद्रांवा॥९॥दीनक्षप
णकोन्मत्तप्रव्राजविकृतवेषहीनांगाः॥नस्युभाशुभास्तुसर्वेयतयो‾
‾भिक्षोल्लसत्यात्राः॥१०॥पिष्टान्नमशुभंसर्वंभ्रष्टंधान्यंनसिद्ध
ये॥सिद्धमन्नंसर्वसिद्ध्यैकथितंकष्टहेतवे॥११॥आर्तद्रुतखरज
र्ज्जरविहीनदीनप्रभिन्नलघुरौद्राः॥निंद्याशुभा स्तुशब्दाप्रमुदि
तपरिपूर्णदृढशांताः॥१२॥संहार बीजबहुलाकेनचिदुक्ताःप्रशस्यते
नाशीः॥गमनेपहस्तात्साक्षात्स्वपक्षःस्वपयंतिविपक्षंते॥१३॥उत्पात
यचकाव्येदुरुपस्कृतिरनिनपापनाढ्यानां॥स्वस्थानामपियद्ध्व
स्ताधाराधरित्रीच॥१४॥मार्जारमहिषपशुद्वंद्वस्तनितंगृहदाहबंधु
कलहश्च॥विकृतस्नातादुर्दिनमयात्रिकेसूतकेहेचा॥१५॥प्रतिसू
र्यदर्शनोल्काप्रपातकेतुबोधनिर्घाताः॥वृष्टिरकालेकरकापातो
भूसांप्रस्थानविघ्नाय॥१६॥क्षोभपलायनभंगःस्खलनविपर्यः
सवेगभंगादि॥मन्युरव्यवाहनानांतदपिनिषेधायगमनस्य॥
१७॥निंद्यानिकोहम्यांबलभस्मेंधनरज्जुरिक्तभांडानि॥कार्पासकेश·

विष्टास्थीनिगुडश्चर्मलवणानि॥१८॥ तक्रवसातृणकर्परपिण्याकांगारभुजगमार्जाराः॥निंद्यामुंडामलिनातैलंरिपुमहिषगर्दभारूढाः॥१९॥ इतिप्रस्थानशुभाशुभनिमित्तानि॥ ७॥ ८॥

अथशकुनविचारः

स्थानंगतिस्तथाचेष्टास्वरोदिग्गितिपंचधा॥विचार्याःशकुनास्तत्रबलवंतोयथोत्तरे॥१॥ क्रोशादंतर्बलीयस्मादूर्ध्वमूर्ध्वफलस्मृतः॥नजातःसर्वथायस्तुसुगुणःस्यात्समृत्यवे॥२॥ शकुनःशकुनंदृत्वादीक्षांयदिदिशंव्रजेत्॥तदातस्यैवपंचत्वंतत्फलंपथिकस्यन॥३॥ आसन्नेफलमासन्नंदूरगेदूरगंफलं॥मिश्रंतुमिश्रेशकुनेफलमाहुर्विचक्षणाः॥४॥ गृहभित्तिवप्रकूटाद्यंतरेशकुनंभवेत्॥दृश्यतेचेदर्धफलमदृष्टमफलंविदुः॥५॥ रोगार्त्तःक्षुधितोभीतोवनक्रीडादिसंगवान्॥नग्राह्यःशकुनःसीमाशैलाद्यंतरितःशुभः॥६॥ प्राणायामाष्टकंकुर्यादाद्येद्विगुणितंद्वये॥तृतीयेशकुनेदुष्टेत्वरितेगमनंत्यजेत्॥७॥ स्पष्टचेष्टःपटुस्थानोनिर्भीकोनिकटस्थितः॥सर्वथासिद्धयेग्राह्यःशकुनःस्पष्टदर्शनः॥८॥ शुभःप्रागशुभःपश्चादशुभःप्राक्शुभस्वनः॥पश्चात्स्यःफलदोवश्यंकृतःसर्वेषुकर्मसु॥९॥ समकालमजातीयावामदक्षिणराविणः॥शकुनास्तोरणासंज्ञाःसिद्धिंकुर्युर्गमागमे॥१०॥ नरस्यासंतिकेकार्येजातेदुःशकुनेभवेत्॥यदातदाजपेत्तत्रमंत्रंसशकुनाप्तये॥११॥ मंत्रः॥ ॐभगवत्याभद्रकाल्याभद्रपुत्रस्त्वंकुर्कुटः॥सिद्धःप्रसादितःकाश्यांसमेस्याच्छकुनेनरः॥१२॥ ॐअस्त्रमंत्रमितिसप्तजप्त्वास्थानेतस्मिन्विशेक्षणंयावत्॥मंत्रप्रभावजातंसशकुनमालोक्यवैगच्छेत्॥१३

अथयात्रिकशकुनेषुपूर्वंभषणशुभचेष्टितानि

वामोदिशंदक्षिणभूमिभागाद्गच्छन्प्रयाणेभषणःप्रशस्तः॥वामप्रदेशात्सपुनःप्रवेशेप्रशस्यतेदक्षिणभागगामी॥१॥ यानेप्रवेशेभवतिप्रशस्ताशून्यागतिश्वानविपर्ययेण॥नचेष्टितंप्रतुभ॰

योर्विशेषः शुनीशुनोरत्रचपाश्विदस्ति॥२॥मूत्रेविधायाभिमुखं
प्रयातियोजागरूकःशुभदःसपुंसां॥कार्येषुसर्वेष्वपिसर्वकालं
नमूत्रयंत्रीशुनकीप्रशस्ता॥३॥गजाश्वशालासनशाद्वलेषु
त्रद्रुमोलूखलसध्वजेषु॥कुंभेष्टकासंचरमावरेषुपर्णमृत्स
ष्पफलादिकेषु॥४॥व्रजेत्पुरस्ताद्यदिमूत्रयित्वासदैवतत्सि-
ध्यतिकार्यमिष्टं॥मिष्टान्नभोज्यंनवगोमयेस्यान्मूत्रेचशुष्के
पिचशुष्कभोज्यं॥५॥युग्मं॥आयातिहृष्टोभिमुखोयदिस्वा-
क्रीडांप्रकुर्वन्विलुठन्नयाग्रे॥शीघ्रंतदानींध्रुवमध्वगानांभ
वेत्प्रभूतोधनधान्यलाभः॥६॥नृणांप्रयाणेभवनागमेवाश्वाने
रमंतेयदिसप्रमोदाः॥तदेष्टकार्येपिभवेत्प्रमोदःसमागमःस्व-
स्वजनैःसमंस्यात्॥७॥स्थितोन्नतेश्वायदितुप्रवेशेपादेनकंडू
यतिदक्षिणेन॥शिरःप्रदेशंनियतंनरस्यतद्वित्तलाभंविदधाति
सद्यः॥८॥उच्चात्प्रदेशादवतीर्यनिम्नंपोयातिवामोप्यसुखप्रदो
सौ॥अनुच्चदेशात्तुनरुच्चदेशंयश्वोव्रजन्दक्षिणगोपिशस्तः॥९
अन्नादिविष्टानवगोमयानिनवानिविभ्रहृदनेसदैव॥वामोप्य
सव्येनविलोकयमानोमनोरथान्पूरयतेध्रुवंश्वा॥१०॥मानवाव
यवपूरिताननोवीक्षितोभवतिभूमिलाभकृत्॥स्यात्तुनःस्वरस
नाप्रचालनान्मंडलोविपुलभूतिलाभदः॥११॥गवासहक्रीडति
चेत्तदानींप्रयोजनंसिध्यतियद्यदिष्टं॥ग्रामप्रदेशेपुरतोवमूत्र्य
भवसभीष्टासनलब्धयेश्वा॥१२॥यश्वःपुरस्ताद्वनिंविलिख्य
यातुर्मुखंपश्यतिचेत्तदानीं॥तत्रैवदेशेद्रविणस्यलाभंब्रवीति
कार्येनहिसंशयोत्र॥१३॥वामेनगच्छन्पथिकेनसार्धंवदाति
रम्यांरमणींधनेन॥व्रजंस्तुमार्गेसहदक्षिणेनकौलेयकस्तस्क
रभीतिमाह॥१४॥आदायपत्रंहसितेयदिश्वादूर्वांनवांवानवगो
मयंवा॥प्रयातियातुःपुरतस्तदानींराजप्रसादंनियतंब्रवीति॥
॥१५॥यश्वोहरिद्रामिषगोरिकाद्यैःपूर्णाननोवक्तिसुवर्णलाभं॥
हृष्टःपुनःपुष्पफलांकुरेषुचिरंददातोनिधिलाभकारी॥१६॥

फलंगृहीत्वासहसानिवासंयक्षोविशन्जल्पतिपुत्रलाभं॥योभ्ये॰
तिदृष्टोभिमुखःप्रयातुशीघ्रंसकुर्याद्धनधान्यलाभं॥१७॥यःपल्ल॰
वैःक्रीडतिवृक्षमूलंतथेक्षसेयःसददातिसौख्यं॥रक्ताक्तवक्त्रोभिमु
खोभ्युपेतियोमंडलःसोनिधिलाभमाह॥१८॥शुद्धंविधातुंवलि
तस्यमध्यात्सैन्यद्वयस्यानुपदस्ययत्र॥कौलेयकोमूत्रयतेध्व
जालावसंशयंतस्यभवेज्जयश्रीः॥१९॥योद्धव्यमद्यैवमपैतिया
तुःप्रावेशिकंस्याच्छुभदंनिमित्तं॥दिनांतरेयस्तुनरोयुयुत्सुःक्षे
मंकरंस्यात्रिकमेवतस्य॥२०॥रोगार्दितेभेषजसंप्रयोगेयुद्धोद्यमे
नष्टविलोकनेवा॥दुर्गप्रवेशेचशुनःप्रशस्तास्तारागतिःसंनिहितेभ
येच॥२१॥तिष्ठतांप्रचलतांचनराणांमंदिरेप्रविशतांचसमस्तं॥
दक्षिणंभषणचेष्टितमिष्टंवामकंपुनरुशंतिविदुष्टं॥२२॥स्वाद
तिकिंचनदृष्टिगतश्चेद्यच्छतिनद्विविधंबहुभोज्यं॥धूतशिराउत
नामितपुच्छोयोभषणःसनिषेधतिभोज्यं॥२३॥इतिशुनकशुभं॰

अथाशुभचेष्टितानि

बलेनवामोयदिनीयतेश्वाकष्टात्तदल्पंविदधातिलाभं॥खनद्धरि
त्रीमसुखावहःस्यादेतत्पुनःस्यादनिवृत्तिहेतुः॥१॥स्थानांतरंवि
भ्रदुपानहौचेत्सयातितद्द्रव्यहरस्तदास्यात्॥आस्तेपुरस्तात्स
हयातिवाश्वाद्यात्तुयानद्धदनस्तदार्थं॥२॥आर्द्रकीकसमुखः
पुरतश्चेदृश्यतेभवतितच्छुभदःश्वा॥चर्मशुष्कमथवास्थिवि
शुष्कंबिभ्रदेशमरणंविदधाति॥३॥केशाश्मभस्मोल्मुकजीर्ण
वस्त्राण्यंगारसज्जिंधनकर्पराणि॥वक्त्रेसमादायभवेद्यदातुदृ
गोचरोभूतिभयावहःश्वा॥४॥दीर्घपादःपथिस्थित्वारोदितिश्वा
प्रवासिनः॥तत्कुटुंबंरोदयतेमार्गेलिखतिवित्तदः॥५॥निविशत्स
र्धमार्गेचेत्तदायामांतरेस्थितिः॥भवतिश्वालुठतिचेन्मार्गाग्रेक
ष्टदेहदः॥६॥दक्षिणेनिजपक्षघ्नोवामेस्त्रीपक्षहानिकृत्॥पृष्ठेच
गृहदुःखायजायतेलुठनंशुनः॥७॥अत्यंतकंडूतिपरोनराणांवि
रोधकारीशुनकःसदैव॥स्यादूर्ध्वपादःशुनकःशयानःसिद्धिप्रदः

कार्यविधौविदुष्टे॥८॥प्रस्थातुरग्रेयदिसारमेयःकार्यंसपुच्छंप्रवणंधुनोति॥ध्रुवंतदातत्रदृढप्रहारोहरंतिचौराद्रविणंक्षणेन॥९॥अंगारमूलाश्मपलालकेशविस्तीर्णविट्चर्ममृतेषुदुष्टः॥श्वामूत्रयन्यच्छतिकार्यनाशंदारिद्रमृत्युप्रमुखाननर्थान्॥१०॥विण्मांसभस्थ्यादिकपूर्णवक्त्रोभयार्दितःश्वायदिकंपमानः॥पराङ्मुखोयातितदाध्वगानांनश्यंतिसिद्धान्यपिवांछितानि॥११॥विजृंभतेलेढिचनासिकाग्रंयस्यांगभंगंभषणःकरोति॥सलाभहानिंप्रकरोतिपुंसोमृत्युप्रदःस्वांतरलंघनेन॥१२॥वामकेयदिदक्षिणमंगंदक्षिणेनभषणोयदिवामं॥संस्पृशत्यभिमतोनकदाचित्तत्प्रयोजनविधौक्वचनापि॥१३॥विधूतकर्णेशुनिचेतसुरस्तात्स्वांयोविशेद्वेश्मतदासमस्तं॥प्रत्यागतोर्थंसमुपार्जयायसुराजकीयाःपुरुषाहरंति॥१४॥दक्षिणगःप्रथमंतदनुस्याद्वामगतिर्व्रजतामशितुंश्वा॥वेश्मनियत्रनरैस्तकृतत्तदन्नंदूरतरंविषवत्यजनीयं॥१५॥इतिभषणं॥ ७ ॥ ७ ॥ ७ ॥ ७॥

अथशिवा

प्रायःप्रयाणमेतौवामरवासंप्रदिष्टावागंतुः॥नेष्टादक्षिणशब्दास्तत्रविशेषस्तुदिग्जनितः॥१॥भानुयुक्तादिशोनिंद्यास्तिस्रोदीप्ताःशिवारुते॥दग्धाप्रज्वलिनाधूम्राशेषाःपंचशुभामताः॥२॥बंधंबंधरुजंब्रूतेशिवादीप्तेदिशित्रये॥लाभंक्षेमंप्रजयंसौख्यंराज्यंदिक्ष्वंचकेसुभे॥३॥वामेपसव्येपुरतोपिपृष्ठेपुंसःशिवाजल्पतियत्रयत्र॥आयांतिचौराःप्रथमेविरावेद्वयोर्भवेत्तस्करदर्शनंच॥४॥नृपातिरोषागमनंतृतीयेतुर्येक्षतिःपंचमकेर्थलाभः॥वणिज्यसेवादिफलायषष्ठेभीःसप्तमेस्याद्विफलोष्टमेषु॥५॥यात्रास्वपिवामरवाःशिवाशिवाःशांतदिक्षुनान्यासु॥दक्षिणरवापिशांतेशस्ताशास्त्रप्रमाणेन॥६॥वामप्रदीप्तेककुभःप्रदेशेलाभंतदाहीनमुपाददाति॥शिवारटंतीपथिदक्षिणेनक्षिपत्यनर्थान्बहुसंकटेषु॥७॥अध्यस्यशांताककुभःसृगालीनरस्यवामायदि

शारटीति॥ तदर्थलाभंवितरत्यवश्यमर्थक्षयंदक्षिणतोरटंती॥८॥ दक्षिणतःप्रथमंयदिपश्चाद्वामगतापथिकस्यसृगाली॥ फेकुरुतेकुरुतेतदवश्यंक्षेमधनाप्तिगृहागमनानि॥९॥ कार्यांतरेष्वप्यनुगम्यमानाश्रेयःप्रदाशांतिदिशिप्रदिष्टा॥ शिवाप्रदीप्तेतुदिशःप्रदेशेसमारटंतीमहतेभयाय॥१०॥ भयोद्यमेदीप्तदिशिप्रदीप्तैर्नादैर्नृणांहंतिमहांतिदेवी॥ भयानिसर्वाण्यपिशांतनादाशांतस्थितासैवभयायभूम्ने॥११॥ यदाचनद्युत्तरणेनराणांशब्दंसृगालीकुरुतेकदाचित्॥ तदहूयेतत्परिरक्षणीयंभयंमहज्ञालिजलेचरेभ्यः॥१२॥ इतिशिवा॥ छ ॥ छ ॥

अथफेरवाः

यात्रायांगच्छतांवामाध्वनिताःफेरवाःशुभाः॥ निषेधयंतितेयात्रांशृगालाद्दक्षिणारवाः॥१॥ शांतासुदिक्षुफेरूणांत्हष्टःशब्दःप्रशस्यते॥ एकोरवःसदानिंद्यःसोप्यातींनांभयावहः॥२॥ गतिर्वामाप्रयाणेतुप्रवेशेदक्षिणाशुभाः॥ तत्रस्थोनविलंबेतशस्तःसर्वत्रजंबुकः॥३॥ अथोलूकपिंगले॥ अथोलूकस्वरोवामेयात्रायांगच्छतःशुभः॥ दक्षिणेम्रियतेकिंचदुष्टदर्शनमस्यहि४ कौशिकोदक्षिणोभूत्वापश्चाद्वामस्वरोयदि॥ कष्टंविधायमृत्यप्रुतंनिर्वाणेकार्यसाधकः॥५॥ करोतिहुंहुंकगितिध्वनिर्योनिष्टोनदुष्टैःसपतोरनर्थान्॥ चलंचलःस्यात्कलहायशब्दःकिकीतिदीप्तोगुरुलुग्लुशब्दः॥६॥ पृष्ठेचवामोविदधातिशब्दःसमीहितंपांथजनस्यरात्रौ॥ विशेषतोवायसवैरिशब्दोदुष्टःप्रदिष्टोहनिसर्वदिक्षु॥७॥ पिंगलावामनिनदाप्रयाणेशांतदिक्स्थिता॥ प्रशस्ताविपरीताचकष्टोद्वेगौददातिसा॥८॥ पूर्वंदक्षिणशब्दास्यात्ततोवामस्वरायदि॥ अतीवकष्टंदत्वासानिर्वाणेकार्यसाधिका॥९॥ इतिकौशिकफेरवं॥ अथकाकः॥ आगंतोजांधिकेचैवसर्वेकाकाःसमाःस्मृताः॥ क्षेत्रजेशकुनेग्राह्यःकाकोलस्तेषुसर्वदा॥१॥ कार्यकालेषुकाकोलःप्रशस्तःस्याद्यथाकिल॰

नतथावायसोज्ञेयोग्राह्यस्तुतद्भावतः॥२॥दक्षिणदेशेषुशब्दंकुर्वन्नाच्छंश्चदक्षिणेनैव॥काकःशुभःप्रयाणेशुभःप्रवेशेतुविपरीतः॥३॥वामेनगत्वाविनिवृत्यमार्गेकाकोयदादक्षिणमार्गगःस्यात्॥यातुःकरोतीहितकार्यसिद्धिंक्षेमंचशीघ्रंपुनरागमं च॥४॥कृत्वारवंयःपुरुषःप्रयातिपुरःस्थितोयोमृदमादधाति॥कंडूयतेयश्चशिरोंघ्रिनासांनृणांतदाभीष्टफलंददाति॥५॥स्तंभेगजानांनियतांगजाप्तिंगजाधिरूढःपृथिवीपतित्वं॥तुरंगसंवाहनभूमिलाभंकरोतिकाकोविजयंध्वजेच॥६॥प्रशांतनादःशिखरेतरूणांस्त्रीसंगमाख्यंकरतोभिधत्ते॥धान्यादिकूटेषुतथान्नलाभंगोष्ठेचगोगोंचतिगोधनाप्तिं॥७॥अन्नादिविष्टादिविवादिभिर्यःपूर्वाननोभीष्टफलप्रदोसौ॥मंत्रादिसिद्धौवणिजादिलाभेशस्तेविवाहादिविधौचकाकः॥८॥चिन्हध्वजास्त्रकृताधिरोहासमुद्यतंशत्रुबलंप्रपश्यन्॥आजौजयंजलतिभूमिपानांकृतध्वनिःक्षीरतरौचकाकः॥९॥केंक्केमितिकीमितियोषिदाख्येयोगायकोंकोमितिशब्दितंस्यात्॥अपत्यलाभःकिंकिइत्यनेनगंतुःफलंकेकइतीत्यनेन॥१०॥क्रोंक्रोंमितीदंशुभलाभकारिकुंकुंनिनादप्रियसंगमाय॥मित्राप्तयेस्यात्कइतीदृशंचकरोतिकाकोवदतिस्वतुष्ट्या॥११॥क्षेमंविधत्तेकरभस्यपृष्ठेकोष्टस्थितश्चोरभयंचबंधंक्रोडस्यपृष्ठेधनमर्थलाभंतस्यैवपृष्ठेघनपंकलिप्ते॥१२॥सद्योज्वरंसौरिभपृष्ठसंस्थोमृतांगसंस्थोमरणंकरोति॥कार्यक्षति रिक्तघटस्यसंस्थःकाकःकलिंकाकविनष्टदृष्टः॥१३॥प्रयातिवामेयदिपृष्ठदेशेकृत्वारवःस्तु रुधिरःक्षतिःस्यात्॥वल्लीवरत्रादिचयंगृहीत्वाप्रयातिवामेसहसार्पनिस्ते॥॥१४॥नदीतटेवा थरटन्नटव्यांखरस्वरव्याघ्रभयायगंतुः॥नैवातुरःक्वापिमनोहितायनहृष्टपुष्टाःक्वचिदेवपुष्टाः॥१५॥तुंडेनपुच्छंविलिखन् नूखरेणस्वरेणयोरौतिनिरीक्ष्यसूर्यं॥एकेनपादेनतदोपविष्टोब्रूतेसबंधंपुरुतोजनस्य॥॥१६॥यात्रो

द्यमेसैन्यवधायकाकोहृष्टोरथेभास्वनमस्तकेषु॥आयातियस्याभिमुखोबलस्यसुह्योद्यमेतस्यपराजयःस्यात्॥१७॥ काकाइतिकोरितिचद्विरुक्तंकूंकूमितिकोकुकुहूरितीदं॥कृतंप्रदिष्टंमरणायपुंसांगन्तुर्विनाशंकुरुतेकमस्सः॥१८॥ कींकीमितिकोमितिचत्रयोमीकांकामितिह्योचरणौरणाय॥ काकाइतीदंचविघातकारीस्यात्का इतीदंविफलंसदैव॥१९॥ इतिकाकः॥ ७॥ ॥

अथकपोतकी

ग्रामाद्बहिर्व्रजति स्तोकांतरमार्गमध्यास्य।उच्चार्यस्वस्त्ययनंविष्णुंतार्क्ष्यंचसंस्मृत्य॥१॥ तत्रावलोक्यमुच्चार्यकिरीटिनोभिधानानि॥नामानिकृष्णिकायाःप्रोक्तंनत्वाचतांपश्येत्॥२॥ अर्ज्जुनःफाल्गुनःपार्थइत्यर्ज्जुननामानि॥ अथदुर्गानामानि॥ श्यामाकृष्णाशकुनिःशितपक्षापोतकीकुमारीत्वं॥दुर्गादेवीचटकीधनुर्धरापांडवीवाराहीत्वं॥३॥ पार्थजननीतथोमाब्रह्मसुताशकुनदेवतात्वमसि॥प्रत्यक्षाभवभगवतिनमोस्तुतेदेहिमेसिद्धिं॥४॥इति॰

अथपोतकीशकुनविचारः

दिक्कालस्वरचेष्टाभगवतिस्वरकार्यसंप्रश्नात्॥योवेत्तिशांतदीप्तंस्तस्यास्तेशकुनविज्ञानं॥१॥ अस्मिन्दग्धज्वलितालिंगतधूमान्वितान्विमुच्यपंचैव॥शेषादिशःप्रशांताःकाकोविष्टादिनिर्मुक्तः॥२॥ शांतौभौमाश्चरवौदहनानिलगगनगाःस्वरादीप्ताः॥चेष्टाशुभाःप्रदीप्ताभावःशोकादिनिर्मुक्तः॥३॥ वक्रादिदोषरहिताऋन्वीतारागतिःप्रशस्तास्यात्॥तन्तुतेरणादिशांतंस्थानंदीप्तंकपालादि॥४॥कार्यंचशांतदीप्तंज्ञात्वाच्छिद्रंविचारयेत्सर्वं॥शांतेशांतंग्राह्यंदीप्तेदीप्तंचगृण्हीयात्॥५॥ चिलिश्चूलरवौभौमेचिकुरितिकूचीतिस्वबलनेवायौ॥फाकुरितितैजसःस्यात्स्वलितानादश्चयेकेचित्॥६॥ चीचीतिमारुतःस्याच्चिलिकुनिनादश्चनादृशःकथितः॥ ओवरमाहुःस्वरितरिचीकुरितामेवविद्वांसः॥७॥ ९
लाभदश्चिलिचिलीतिनिनादःचूलिनिनदोपितथैव॥कूचिकू

चिड्डुनिवापिजलार्थोव्याहृतौचिकुरितिस्वरउक्तः॥८॥कीतुकी
तुरितियोमधुरोसौकामदस्तकनिनदाःस्वलितास्याः॥स्याङ्गपाः
ह्यनियमेनचचीतिनिःस्वनाश्चिलिकुनादइहापि॥९॥कष्टदश्चि
रचिरीविरावश्चीकुचीकुइतिदैन्यविधायि॥एवमीदृशफलादृश
नादाःप्रस्फुटानिगदिताभगवत्याः॥१०॥दर्शनचेष्टास्वरगतिभ
क्ष्यग्रहणंसमधिकंस्यात्॥क्रमशोबलमेतेषांसमुदायसकलभ
यहेतुः॥११॥वामाद्दक्षिणगमनायासारातीनिगद्यतेपुरतः॥द
क्षिणतोवामायांदिशियाताकीर्त्यतेवामा॥१२॥वामोविभागोनि
जपक्षनामाविपक्षनामांकितदक्षिणःस्यात्॥यस्यांशुभंपूर्वमुदी
क्षितायांयद्दक्षिणेहेतिविलोकिनामा॥१३॥वामाविरामोस्थिरः
प्रशस्तागतातारा॥दक्षिणरवापिपक्षेस्थितानृशस्तागतावामा॥
१४॥सुखदुःखहर्षशोकप्रभृतियदादैवतःशकुनिः॥सावस्थापक्षे
स्वाज्ञेयान्यत्रशत्रूणां॥१५॥त्वरितंयातीत्वरितंचूर्णंचसमीहितं
फलंजनयेत्॥मध्यफलासविलंबाहीनफलंकचिरगमनात्तु॥१६

अथकपोतकीदर्शनं

अविकृतमविकृतभौमरवासस्यान्नसासुचेष्टितावामे॥यात्रासुदृढ॰
मात्रामाताद्दुर्गाणितारयति॥१॥दृष्टाप्रागुपविष्टाशांतरवाणांग
तातारा॥सुचिरस्थानकृतस्थितिरभिमतफलदायिनीदुर्गा॥
॥२॥उन्मत्तदक्षिणपक्षाभस्यमुखीविहितपार्थिवनिनादा॥तार
तनुमधिगच्छतितध्वनिवांछिताद्धिकं॥३॥अग्रेसतीकुमारी
तत्स्पृष्टोगोमयोयदा – लारः॥सिद्धिस्तदोत्तमास्याहृष्टाप्यादौच
रादुर्गा॥४॥एकापिपंचशांतानारावाञ्छाप्तयेशुभासिन्यः॥त
स्यामुर्वीसेवंयोलाभोराज्यकामस्त्त॥५॥नीचैर्यातिनीचफल
मद्यवाचिरणवाफलंदिशति॥मध्यममात्रंमध्येतूर्णंपूर्णशिरासी
स्त्रि॥६॥आदौदर्शयतीनतिंयातीसमुन्नतिंधत्ते॥अनुकूला
पिवराहीचिरेणतुच्छंफलंदत्ते॥७॥उच्चैरुड्डीयमानानतिमंतेवह
तियानुगच्छंती॥यंचिरलभ्यमथाल्पंतत्सावहुपक्षातित्वरितं॥८॥

वामेविधायशब्दंयांत्यनुकूलंकरोतिचिविरावं॥वामाननेतिभूत्वा
रौतितदाबहुफलादेवी॥९॥वामेविहितविरावातारा भूत्वाक
रोतिशब्दंया॥सातिनिहंत्यगतेःफलमाद्यरवोत्थंफलंधत्ते॥१०॥
यायातिमौनिनीवाप्रदक्षिणंहत्यवामशब्दावा॥राज्ञांशुभाय
गमनेवामाग्रामप्रवेशेच॥११॥यद्येकादक्षिणगावामान्यातद्ध
यमुपेस्याथ॥अन्यागवेषणीयामिश्रत्वेफलतिमिश्रत्वं॥१२॥पृ
ष्ठाभिमुखीपृष्ठेकार्यनास्तीतिसंमुखंधत्ते॥तारालाभायपुरःपृष्ठे
नष्टार्थलाभाय॥१३॥वामस्वरासमृद्धिंदक्षिणशब्दोनिषेधमा
चरति॥संमुखशब्दोनर्थंपृष्ठरवावदंतिपृष्ठेर्थं॥१४॥उड्डीयोर्ध्व
गमनेवचनावधोमुखीशकुनिः॥वामेयातुर्निधनंदिशतिवि
पक्षेविपक्षस्य॥१५॥पक्षेभक्षग्रहणंलाभायविपक्षसंभवंहान्यै॥पंचाना
मपिमुख्याभक्ष्याप्तिर्दर्शनादीनां॥१६॥संमुखमायांतीवापृष्ठ
रवावातिरोभवति॥अस्येतदुष्टचेष्टायावामायावारयेद्गमनं॥१७॥चा
पच्युतेवशुल्किन्नाविचयतिजवाघातिदूरदेशंया॥तारागणायगंतु
र्वामाश्यामातुमरणाय॥१८॥युगपन्मृगसंगच्छन्मार्गेमार्गेवि
मार्जयेद्दुर्गा॥वामरवांतारांवागृण्हीतमृगेष्वहष्टेषु॥१९॥स्या
नीकृतेषुयदिवाहगोचरमागतेषुमध्येषु॥प्रवेशिकेनयाया॰
व्याधकुलेनधाटियस्तद्दृत्॥२०॥इति पोतकीदर्शनं॥७॥॥

अथहंसचारः

एकत्रसार्थेव्रजतांबहूनामल्पेपिजातेशकुनेफलानि॥तत्तीव्र
कारणिभवंतियेनतंहंसचारंप्रविचारयामः॥१॥शशांकना
ड्यामथवार्कनाड्यांमतःशरीरेप्रविशत्युशांति॥यशःसमृद्धिं
कुशलंजयंचनिर्गच्छतःस्यात्फलवैपरीत्यं॥२॥अथहंसमुभ
चारः॥ ऐंद्रीवहतिनाडिकायदास्वेच्छयाप्रविशतिप्रभंजनः॥
पोतकीव्रजतिदक्षिणातयास्यात्तथासकलमीप्सितंफलं॥३॥
सयदिवामाश्यामावामुरिदंविशतिचेत्तदातत्र॥प्राक्तनशाकु
नोक्तिंसिन्न्यूनंभद्रंभवेन्नियतं॥४॥मारुतेविशतिदक्षिणनाडीं

दक्षिणायदिगतिर्भगवत्याः॥ ईप्सितंफलमुशंतितदार्धंनिश्च
योत्रमुनिभिःकथितोयं॥५॥निःसरत्युदरतोयदीदुयामारुतो
भगवतीचदक्षिणा॥अल्पकंशुभफलंभवेत्तदानात्रकिंचिदवि
चारगोचरं॥६॥ अथाशुभहंसचारः॥नाडिकावहतिनाप नी
यदानिःसरत्युदरतःसमीरणः॥अप्रदक्षिणगतिर्धनुर्धरीस्याद
निष्टफलमक्षयंतदा॥७॥वायुर्दक्षिणनाड्याःनिःसरतिस्याच्च
दक्षिणश्यामा॥प्राक्तनशकुनादूनंकिंचिदनिष्टंभवेत्तत्र॥८॥य
दिवहतिवामनाडीपवनोवहिरेतिपोतकीवामा॥अर्धमनिष्टंभ
वतिप्रस्थितकार्यैतदानित्यं॥९॥ दक्षिणनाडीपूर्णापवनोगति
र्यदिचवामास्यात्॥ अल्पकमशुभंभवतिध्रुवमिहनैवास्तिसं
देहः॥१०॥नारायांतीसोमनाड्यावहिस्तात्तूशस्ताश्यामाशोभ
नेकार्यभागे॥संत्रासादौशस्यतेवैपरित्यासंमिश्रत्वेस्यात्फलं
मिश्रमेव॥११॥तेनैकस्मिन्नेवजातेनिमित्तेयादृग्वेषंप्राणवारोभ्यु
पैति॥तादृक्तेषांस्यात्फलंमानवानांनैकाकारोहंसचारःक्वचिच्च॥१२

अथतित्तिरः

यात्रायांतित्तिरिर्वामस्वरःक्षेमायशस्यते॥सएवकन्यकाकार्ये
लक्षितोवरलब्धये॥१॥वामःपूर्वंदक्षिणःस्यात्ततोयःपश्चाद्भूम
श्चिंतितार्थप्रदाता॥स्थैर्यारंभेलाभकृत्स्यंप्रवेशेनष्टान्वेषेदक्षिणः
श्रेष्ठकारी॥२॥कृष्णातित्तिरिरितीहपतंतीवृद्धितित्तिरितिप्रस्थि
तोयः॥चातकःखररवोदधिमल्लोगोरतित्तिरिसमाःशकुनेषु॥
॥३॥ इतितित्तिरादयः॥ अथलट्वा ॥लट्वादक्षिणगमनायात्रा
योवामप्रवेशेच॥संमुखमायांत्यग्रेनतस्यसौख्यादिदात्रीसा॥१
॥पृष्ठादागच्छंतीपृष्ठेसौख्यंकरोत्युभयभागे॥यदिशुष्यतितः
कर्मविवाहयात्रेतदानिष्टे॥२॥त्रासितापक्षिणान्येनत्रासमाख्या
तिसानरे॥दृश्यतेनसुखेतस्यवस्तुतद्धस्तवृद्धिकृत्॥३॥इतिलट्वा

अथकारायिका

ग्रामादौगच्छतांवामेशुभःकरकरारवः॥ दक्षिणेकारायिकायाः

श्रेष्ठोगुरुहुलारवः॥१॥प्रवेशेस्याद्दक्षिणत :श्रियैकरकरारवः॥वामेहुलुहुलारावोवैपरीत्येनशस्यते॥२॥प्रवेशेनिर्गमेचैवदक्षिणेचगतिःशुभाः॥उभयत्रापिवामातुशुदास्याद्धवबांधवाः॥३॥शब्दंकृत्वोड्डीयतेयोगत्वावाकुरुतेध्वनिं॥शब्दायनेतरावापिवामापिव्रजतोशुभा॥४॥प्रवेशेल्पफलासैवग्रामेहुलुहुलासदा॥बहूस्यासुक्तयेसद्योमूढाघुलुघुलापिच॥५॥बहूस्यधक्रवनिर्गस्यैतस्याःकरकरारवः॥वाणिज्यार्थंगच्छतांतुलाभदायीसएवहि॥६॥ इतिकारायिका॥ ७ ॥ ७ ॥ ७ ॥

अथवृश्चिकः

यात्रायाशुच्चर न्वामश्चोरभीतिकरोवृकः॥दक्षिणेकृष्टकृत्स्नार्थेस्त्रीयदिस्यात्तद्दर्तये॥१॥ वरस्यपरिणीतस्यसवधूकस्यगच्छतः॥यद्युत्तरेतिचरकानिकटेपितृवेश्मनः॥२॥पितृमातृविनाशायसमीपेश्वशुरौकसः॥ वधूःश्वस्त्रोःपुत्रपौत्रोरेकवासंनिवारकाः॥३॥क्षेत्रेजाताकर्षकस्यविनावृष्टिंतुयेवृकाः॥क्षेत्रमध्येलुठंतश्चदुर्भिक्षानर्थसूचकाः॥४॥पूर्वंगृहीत्वाव्यापारंग्रामंवागच्छतोवृकः॥प्रवाणपदवींवामंप्रापयंत्सुत्तरंभृशं॥५॥चौरस्यान्यस्यवापुंसःपरार्थग्रहणायचेत्॥गच्छतोवापुरुत्तीर्णःफलदाताभवेद्वृकः॥६॥भवेद्वृकानांशकुनोदीप्तेकार्येसुशोभनः॥सर्वकार्याणिभस्यास्यासाधयंत्येवसर्वतः७

अथहरिणः

विषमा हरिणागौरायद्यायांतिमदक्षिणं॥प्रस्थानेनशुभावामासकृष्णास्तेनशोभनाः॥१॥ उत्तीर्यदक्षिणेपूर्वंपश्चाद्वामाभिनिंदिताः॥ केश्चित्कृष्णोमृगश्चैकःकैश्चित्सर्वेपिनादृताः॥२नेत्ररोगापयद्येको — वामगोमृगमध्यतः॥लाभदःसस्वपक्षेचेदुत्तीर्यप्रविशेत्तुयः॥३॥खनत्युत्तीर्यभूमिंचेन्निधानक्षितिलब्धये॥स्वपक्षेपरपक्षेतुशस्त्रपातादिचिंतयेत्॥४॥उत्तीर्यपृष्ठतोयातिचेष्टनंवाकरोतिचेत्॥स्वस्यस्यचेष्टनप्राप्तिंसभयस्यभ

यंहरेत्॥५॥ कृत्तःशृंगौविषाणाभ्यांउद्वेगःस्यात्प्रवासिनः॥ खेलतःस्फुरतंवापिकुर्वतःकार्यसिद्धये॥६॥यदुत्तरंतदास्यंतेतदाकार्यस्यनाशकाः॥शुभकार्येषुदीर्घेषुकार्यंतेशोभनंस्मृताः॥७॥ इतिहरिणः॥ अथनकुलः॥ नकुलानामपिधन्यंविषमाणोरक्षिणंगतिंयातु॥ लोमशिकापि—श्रेष्ठादर्शनगत्तारगश्चाषः॥८॥ इतिनकुललोमशिकाकाकाः॥ ७॥ ७॥

अथमिश्रशकुनानि

सर्वत्रहंसचारःसचकोरहारीतचक्रमिथुनानि॥धन्यानिनिदर्शमरुतैःखंजनदात्यूहभासाश्च॥१॥मालसरटेकालगोधाविषधरमार्जारकौशिकानशुभाः॥मार्गंविलंघ्ययातादीसेकार्येचतेशुभदाः॥२॥व्याधिबधबंधशुक्लग्रहणेष्वन्वेषणेचनष्टस्य॥प्रस्थानाद्विपरीतःशकुनःशस्तःप्रवेशेच॥३॥आयतनेयोद्व्येशकुनोविजयायशांतिकविरुद्धः॥दिवसांतरितेषुहेक्षेमःप्रास्थानिकःशकुनः॥४॥ अथक्षुतं ॥लाभकारिभवेद्दैत्यामाग्नेय्यांहानिकृत्तथा॥यमालयेमरणकृन्नैर्ऋत्यांदुःखकृत्क्षुतं॥५॥पश्चिमायांभवेल्लक्ष्मीःशुभवातोमरुद्दिशि॥कौबेर्यांधनलाभःस्यादैशान्यांविजयोभवेत्॥६॥ब्रह्मस्थानेक्षुतेजातेराज्यंनिःसंशयंभवेत्॥ वामविभागेसफलंनदक्षिणेपृष्ठतःशुभंतच्च॥७॥क्षुतमग्रेनिपतंददातिकष्टंतथामरणं॥पीनंपुनिकंव्यर्थंहठहास्यभयादिभिर्विडालस्य।नश्वानस्यचमृत्युकरंपशुक्षुतंकष्टदंनियतं॥ ९॥ वस्तुविक्रयकर्तव्येक्षुतंविक्रयकारकं॥लाभदंवस्तुनोग्राहेतच्चस्याद्ववसायिनां॥१०॥तत्त्वान्वेषेगच्छतांतुतच्चनष्टाप्तयेभवेत्॥नव्येपरिवृतेवस्त्रेक्षुतंचेद्वस्त्रलाभदं॥११॥होमपूजासमक्षेसंधर्मातेचेद्भवेत्क्षुतं॥सविशेषंतथाकार्येपुनराहृत्यजायते॥१२॥क्षुतेमृतक्रियांतेचपुनःप्रेतक्रियापरं॥बलिनंरिपुमारव्यातिःक्षुतंरिपुविनिग्रहे॥१३॥वैद्यस्यगच्छतोरोगंक्षुतोहंतिक्षणादपि

॥वैद्याव्हानायदूतस्यगच्छतोरोगिमृत्यकृत्॥१४॥कर्षणान्वेषणेयातुःस्रुतेजलदद्वरये॥ हेमादिभूषणेनव्येविभ्रतेभूषणाप्तये॥१५॥शुभादनंतरश्रेष्ठमशुभानंतरंक्षतं॥अशुभंसर्वकार्येषुनहिचार्यविचक्षणैः॥१६॥ इतिजांधिकशाकुनानि॥७॥

अथदिशांस्वभावकथनं

उत्पात्तौमूलाख्यावुत्तर याम्यौध्रुवनिवासना मानौ॥नैर्ऋतवायव्यौचप्रमाणश्वरकाख्यौतेषां॥१॥रूढेचैवभवेत्तामैशानोग्नेयकोणयोरभिधे॥सहजंरविंगतिजनितंचैषांद्वेधाप्रशांतदीप्तत्वं॥२॥प्राच्यांमूलंदीप्तंस्वभावतस्तच्छकार्येच॥रवियोगत्प्रकृतेरपिदीप्तिरस्यादिगैशानी॥३॥एकांतरशांतमेकंमन्यंतेमानवानिवासाख्यं॥उपवेश्यचशांतस्यविनाशकरंशाकर्येषुगमस्य॥४॥प्रमाणंनिःप्रमाणानांप्रमाणंकुरुतेतरां॥पदस्थस्यपदावाप्तिंनाशकृत्वरितंचयत्॥५॥प्राप्यप्रमाणकोणंचप्यश्वस्यजायतेशाकुनः॥ तस्याकस्मात्किंचित्सत्वरसुत्पद्यतेकार्यं॥६॥नप्रारब्धंसिद्ध्यतिप्रस्थानेनप्रमाणपति॥शकुनेप्रमाणजातेविघटेतसमागमेसंधिं॥७॥विद्यतिमर्थंघटयतिसंशयितंवस्तुसाधयत्यचिरात्॥प्रस्थानयतिचनीतंप्रमाणकोणा दिशःशकुनः॥८॥प्रसूहोपहतानांदिङ्मूढानांमतिभ्रेमान्तानां ॥प्रायःप्रमाणशकुनः साधीयान्कांदिशीकानां॥९॥पश्चिममूलंशांतंस्वभावतस्त्वरितकार्यकृद्धीरं॥सुस्थिरकर्मकरंरवेर्दीप्तंस्याद्रवेर्योगात्॥१०॥रिक्तंकरोतिपूर्णंपूर्णंरिक्तंकरोतिनियमेन॥प्रायःस्वरूपदीप्तःशकुनश्चरकमवेशोस्य॥११॥उत्साहोजितमनसांराज्ञांपरिमोषिणां।जिगीषूणां॥निरुपायोहिग्लानांसाधुखरःसदाशकुनः॥१२॥चौर्यावस्कंदाहतपरसंचयसंभृतप्रदेशानां॥सद्योरिक्तीकरणंखरकेशकुनंसमुद्भूतं॥१३॥भूमिंगतोपिजीवतिनिगडैरपिसंयतोविमुच्येत॥सुद्धृतैसन्नहाःक्रोधात्तोदायुधायोधाः॥१४॥

ध्रुवोद्भवंतुशकुनंशुभस्योर्ध्वंशुभाययत्॥ अशुभोर्ध्वेनभंद्रस्यात्सर्वत्रैषाविचारणा॥१५॥शाकटारोपितभांडोप्युच्चलतिनैवजातुकामोपि॥ ध्रुवदेशोत्थेशकुनेकिंत्वेकःप्रवसतिस्वस्थः॥१६॥ यस्योटजेपिवसतोध्रुवंससमासाद्यजायतेशकुनः॥ पसार्धमस्यनचिरात्सुसःसौधानिसाधयति॥ राग्रारामासरगृहपरिवाताप्रदिशाश्चनारंभात्॥ सिद्धिर्ध्रुवोत्थशकुनोनपतिसुरवोह्हस्तुरव्यांश्च॥१८॥ इशानोत्थेशकुनेचौराग्रामंप्रविश्यनचलेत॥ नवरोगातोंजीवतिस्वस्थोप्यस्वास्थ्यमाप्नोति॥१९॥ ईशानोत्थैःशकुनैःविशेषतःसूरमंडलाक्रांतैः॥ रिपुचेष्टितद्रवदूरंतत्कास्थानंपलायेत॥२०॥ पश्चिममूलेशांताःशकुनाःशुभावहाःसयः॥ प्राचीमूलेनतथाशांताःपरिणामसौख्यकराः॥२१॥ यस्मिन्देशेयथायेषांप्रसिद्धंशकुनंकिल॥ तस्मिन्देशेतथातेषांफलंदंनान्यथाक्वचित्॥२२॥ इतिदिशांस्वभावकथनं॥ ७॥ ७॥

अथस्वरोदयः

मर्त्यप्राप्तेनपुण्यस्यपापस्यचफलप्रदं॥ स्वरोदयंप्रवक्ष्यामियंज्ञात्वानावसीदति॥१॥ स्वरोदयेशुभेजातेशकुनैःकिंप्रयोजनं॥ तस्मिंश्चाप्यशुभेजातेशकुनैःकिंप्रयोजनं२ इडासोमस्यनाडीस्यात्पिंगलासूर्यनाडिका॥ इडासौम्याभवेद्वामापिंगलायाम्याचदक्षिणा॥३॥ हंसाभिधानःपवनोनाभिमूलात्समुत्थितः॥ नाडीमार्गेणजंतूनांप्रकरोतिगतागतं॥४॥ इडायांसंचरन्वायुःसौम्येकार्येशुभःस्मृतः॥ पिंगलायांतथादीप्तेहृयोःक्वापिनशोभनः॥५॥ अध्ययनमित्रसंगमप्रवेशयात्राविवाहदानेषु॥ शुभकार्येष्वपरेष्वपिशस्तःसोमाध्वगःपवनः॥६॥ युद्धवादरणवस्तुविक्रयद्यूतभोजनभयोग्रकर्मसु॥ सूर्यमार्गगमनःसमीरणस्तत्त्वदर्शिभिरतीव शस्यते॥७॥ शुभःस्यात्सौशान्तमारुतोनतुनिःसरन्॥ सौम्येवादीप्तकार्येवासर्वत्रैषाविचारणा॥८॥ यस्यांप्रवहतिवायुर्नाडीनांजीवसंयुतागदि

यस्यांनैवप्रवहतिनिर्जीवासासमाख्याता॥९॥दीप्तेकार्येनाडीपरिदिशतिनिर्जीवितांसदाकुर्यात्॥शांतेचजीवसहितांसिद्ध्यंतिचसर्वकार्याणि॥१०॥ इतिस्वरोदयः॥ ७ ॥ ७ ॥ ७ ॥

अथपंचतत्वानि

अंभस्तत्वंभूमितत्वंचवायोस्तत्वंतेजस्तत्वमाकाशतत्वं॥पंचैतानिप्राणवायुंमिलित्वानाडीयुग्मेप्राणिनांसंचरंति॥१॥नाभिंयावद्भवेन्मानोवारिणःषोडशांगुलः॥धारायाश्चभवेत्तद्वत्प्रमाणेद्वादशांगुलः॥२॥काष्टांगुलस्यकथितोवायोर्मानोविचक्षणैः॥चतुरंगुलमानेच तेजस्तत्वंनिगद्यते॥३॥द्व्यंगुलोन्मानमाकाशंकथितंतत्त्वदर्शिभिः॥एतानिपंचतत्वानिनाडीयुग्मेविचारयेत्॥४॥नीरस्याधोभूमेऋज्वीवायोश्चतिर्यक्स्यात्॥ऊर्ध्वंतेजःप्रभवाच्छून्यागगनस्यगतिरुक्ता॥५॥नीरंवर्तुलमुर्वी चतुरस्रोवायुरर्धचंद्रःस्यात्॥तेजस्त्रिकोणमंबरमाकृत्याशून्यमुद्दिष्टं॥६॥जलवसुधातत्वाभ्यामुदिताभ्यांसौम्यकार्यमतुलंस्यात्॥मारुततेजोभ्यांचप्रारब्धंदीप्तमेतिसंसिद्धिं७ शून्यंगमनंनिःफलमखिलेष्वपिशांतदीप्तेषु॥कार्येषुनिर्दितंतत्कथितमिदंपूर्वसूरिभिःसम्यं॥८॥तत्रापिचिंतनीयंसोमदिनाधीशनाडिकावेगात्॥फलमेतेषामखिलंमिश्रंसंजायतेयस्मात्॥९॥इडायांयातिभूम्यंबुतत्वेप्रवहतिस्तदा॥स्थिरसौम्यादिकार्याणामारंभःसिद्धिकृद्भवेत्॥१०॥पिंगलायायदातत्त्वंवायोर्वातेजसोभवेत्॥उग्रकर्मणिसर्वाणितदासिद्ध्यंतिनिश्चितं॥११॥यदेडायांमरुत्तत्वंकार्यसिद्धिर्भवेद्ध्रुतकार्याणांसौम्यदीप्तानांसदास्यान्मिश्रितंफलं॥१२॥पिंगलायांधरानीरतत्त्वेप्रवहतोयदा॥तदोग्रसौम्यकार्याणांभवेत्फलविमिश्रता॥१३॥पिंगलायामिडायांवाव्योमतत्वंनशस्यते॥कर्मणांशांतदीप्तानामारंभेनाशकंयतः॥१४॥तत्ववलान्नाडीवलमधिकंप्रोक्तंमहर्षिभिर्निपत॥ज्ञात्वैवस्वरसारंनरोभवेत्कार्यनि

सुणमतिः॥१५॥शार्ङ्गधरस्य॥ इतिस्वरोदयः॥एतेनानाशकुनशास्त्रेभ्यः केचिन्ममैव॥इतिबृ॰शा॰वि॰प॰शकुनज्ञानपरि॰

अथपशूनांलक्षणानितच्चिकित्साचतेषुपूर्वंछागः

भूपानांधनिनांवागेहेषुवसंतिसंततंपशवः॥ ग्राह्याःशुभलक्षणास्तेकुलक्षणादूरतस्त्याज्याः॥१॥ छागशुभाशुभलक्षणमभिधास्येनवदशाष्टदंतास्ते॥धन्यास्थाप्यावेश्मनिसंत्याज्याःसप्तदंताये॥२॥ स्तनद्वयवच्चगलेलंबतियःछागलानांमणिःसविज्ञेयः॥एकमणिःशुभफलकृद्धीनफलाहित्रिमणयोये॥३॥मुंडाः सर्वेशुभदाःसर्वसिताःकृष्णदेहाश्च॥श्वेतार्धाःसितदेहाधन्याःकपिलार्धकृष्णाश्च॥४॥सपृषतः कंठशिरावान्नीलपृष्ठनिभश्चतम्रहकृशस्तः॥ कृष्णचरणःसितोवाकृष्णोवाश्वेतचरणोयः॥॥५॥यःकृष्णांडःश्वेतोमध्येकृष्णोनभवतिपादेन॥योवाचरतिशब्दंमंदंचशस्तोनसच्छागः॥६॥कृष्णशिरोरुहपाल्येयोवाम्राकृपांडुरोपारलीलः॥ भवतिशुभकृच्छागःसोपिशुभोवामनोयश्च॥७॥ अथाप्रशस्ताः॥खतुल्यनागाःप्रदीप्तपुच्छाःकुनखाविवर्णाः॥निकृत्तकर्णविहिपमस्तकाश्चभवंतियेचापिनतालुजिह्वाः॥८॥ इतिछागः॥ अथशुनकः॥ पादाःपंचनखास्त्रयस्तुचरणाः षड्भिर्नखैर्दक्षिणास्ताम्रोष्ठाग्रनखोमृगेश्वरगतिर्जिघ्रन्भुवंयातिच॥ लांगूलंससटंचऋक्षसदृशीकर्णौचलंबौमृदूयस्यस्यात्सकरोतिपोकुरचिताःपुंसांश्रियंश्वागृहे॥९॥पादेपादेपंचपंचाग्रपादेवामेयस्याःषण्णखामल्लिकाक्षी॥ वक्रंपुच्छंपिंगलालाभौचकर्णौयासाराष्ट्रंकुक्कुरीयातिपुष्टा॥१०॥

अथगवांलक्षणानिकथ्यंते

अस्राविलरूक्षाक्षोमूषकनयनाश्चशुभदागावः॥प्रचलच्चिपिटविषाणाःकरटाःखरसदृशवर्णाश्च॥१॥श्यामातिदीर्घजिह्वागुल्फैरतितनुभिरतिमहद्भिर्वा॥अतिककुदाकृशदेहानेष्टाहीनाधिकांगाश्च॥२॥दशसप्तचतुर्दंत्यःप्रलंबमुंडाननाविततपृ

घाश्च॥ ह्रस्वास्थूलग्रीवायवमध्यादारितखुराश्च॥३॥ मार्ज्जाराक्षःकपिलःकरटोभानशुभदोद्विजस्यवृषः॥ कृष्णोष्ठतालुजिह्वः श्वसनोयूथस्यनाशकःकरटः४॥ स्थूलसकृन्मणिशृंगःसितोदरःसारवर्णश्च गृहजातोपित्याज्यो पृथग्विनाशावहोवृषभः॥५॥ श्यामकपुष्पचितांगोभस्मारुणसन्निभोविडालाक्षः॥ विप्राणामप्यशुभंकरोतिवृषभःपरिगृहीतः॥६॥ मृदुसंहतताम्रोष्ठाग्रजनुस्फिज्ञलाधतुलजिह्वश्च। ह्रस्वोच्चश्रवणःसकुष्टमस्पष्टजंघाश्च॥७॥ तनुभूस्पृग्व लधयोरक्तांतविलोचनामहोच्छ्रायाः॥ सिंहस्कंधाः तत्वकंबलाः पूजिताःशुभंगताः॥८॥ वामावर्तैर्वामेदक्षिणपार्श्वेचदक्षिणावर्तैः॥ शुभदाभवंत्य नडुहोजंघाभिश्चैडकानिभाभिः॥९॥ लंबैर्वृषणैर्मेषोदरश्चसंक्षिप्तवंक्षणक्रोडः॥ ज्ञेयोभाराध्वसहोजवेश्वतुल्यश्चसप्तसप्तसद्वफलः॥१०॥ सितवर्णःपिंगलाक्षस्ताम्रविषाणेक्षणोमहावक्रः॥ हंसोनामशुभफलोयूथस्यविवर्धनःप्रोक्तः॥११॥ भूस्पृग्वालधिराताम्रविषाणोहृतककुद्मांश्च॥ कल्माषश्चस्वामिनमचिरात्कुरुतेपतिंलक्ष्म्याः॥१२॥ इतिग·ल०

अथगवादीनांचिकित्सा

चूर्णीकृतेषुपुंस्वापालवणाघनपिंडकान्॥ वारिस्फोटाविनश्यतिद्रुतेचेतरवाजिनां॥१॥ ताम्रःकुमारिकापत्रपिंडोलवणसंयुतः॥ हंतिकंडूंदशाहेनगजवेसरवाजिनां॥२॥ कुष्टसैंधवसंयुक्तमधुलिसांगवालुके॥ हेष्योपिकुरुतेभीतिंवाजिनीप्रस्नवान्विता॥३॥ तेंडुलीयवमूलानितथाबिल्वकपित्थयोः॥ गोघृतेनसमालोड्यसर्पदष्टंतुपाययेत्॥४॥ चंदनागुरुकाष्ठैश्चलोध्रमार्गफलिस्तुषैः॥ दंशलेपोविषंहंतिजंगमंस्थावरंपुनः॥५॥ मूलंहिशालपर्णाश्चनिवारेनिमं त्रितंरवेर्दिवसे॥ नीतंविधिनाबद्धंकंठेगंडायचींहरति॥६॥ चर्वित्वालक्ष्मणामूलंप्रेरितंसुरभ्यवासुना॥ योनिमध्यस्थितंगर्भंग्राहयेन्महिषीगवां॥७॥

शाल्मली---तलनिर्यातदर्भखंडस्यचंदनात्॥मृंगानस्त्रास्य
सृजंत्याजरामुद्वेगकारिणी॥८॥मधुजीरकगोरंभानक्कलेपप्रभा
वतः॥वत्संस्निह्यतिगौःक्षीरंबहुलंचप्रयच्छति॥९॥विलिसंवि
धिनाचित्रंपाषाणंपुरतःस्थितं॥लिहंतीमृतवत्सापिप्रस्नौतिः
सुरभिद्रुतं॥१०॥ब्रह्मदंडीशिफालिकादिकेठबद्धानुमूलिका॥
मंथस्तंभेवधारक्षात्रिक्षणस्यकरोतिसा॥११॥आंगारैःशाकवृ
क्षस्यचूर्णितःसघृतैस्त्र्यहं॥ दत्तैर्नश्यतितीसारस्त्र्यहंपानीय
वारणात्॥१२॥ वरुणस्यफलाद्धस्तपीडिताज्ञलितोरसः॥स
व्रणेपूरितेशोपंकृमिजालंनिपातयेत्॥१३॥ अवल्गुवृक्षपत्रा
णांलेपोगोमुखरोगहृत्॥ गोनाससंभवंक्षीरोहंतिपुष्पंवि
राड्भयं॥१४॥ज्वरदोषेसमुत्पन्नेपशूनांत्रिकुटाकृति॥ललाटे
लांछनंकृत्वास्वल्पंलोहशलाकया॥१५॥जालाकुष्ठेमुखेमां
सोगोमयंतगरंघृतं॥मयूरोगोमहिष्यादिगोष्ठधूपोज्वरापहः
॥१६॥मत्तदोषेसमुत्पन्नेगवांकंठेतिबंधयेत्॥ घंटांतत्रलिखे
न्मंत्रंयावकेनाघापहं॥१७॥ मंत्रः॥ घंटाकर्णोचपेटेशोषणः
प्रोक्तोमहाबलः॥मारीनिर्नाशनकरासगोपातुजगत्पतिः॥१८
इतियूथरक्षा॥ अथपशुवशीकरणं अंगुष्ठतर्जनीभ्यांगानघ्रा
णोशागृहमानयेत्॥मंत्रेणानेननश्याःस्युःपशवोश्वादयस्त
था॥१९॥ अथमंत्रः॥ॐनमोभगवतेविष्णवेपशूनांपतयेन
मः॥ इतिमंत्रः॥चित्रोत्तरावैष्णवरोहिणीषुचतुर्दशीदर्शदि
नाष्टमीषु॥स्थानप्रवेशंगमनंपशूनांधीमान्विदध्यान्नकदा
चिदेव॥२०॥एतेनानाशास्त्रेभ्यः॥ ॥इतिश्रीबृहच्छार्ङ्गधरवि
रचितायांपद्धत्यांपशूनांलक्षणादिपरिच्छेदः॥ ७॥ ७॥

अथस्थावरजंगमविषापहरणं

स्थावरंजंगमंचेतिद्विविधंविषमुच्यते॥स्थावरंकालकूटादिजं
गमंभुजगादिकं॥१॥चिकित्साकथ्यतेतेषांमंत्रपूर्वंसविस्तरात्
॥यांज्ञात्वासर्वजंतूनांनरस्याद्उपकारकृत्॥२॥कालकूटादयोभेदा

विषस्यनवसंतिये॥चिकित्साकथ्यतेतेषांमंत्रपूर्वंसविस्तरं॥३॥
मरिचंसैंधवंसर्पिर्मधुनिंबफलानिच॥समभागानिपिष्टानिपा
ययेद्विषमूर्छितं॥४॥ततोस्यच्छर्दिरेकोचभवतस्तत्क्षणादपि
॥तस्मिन्निवृत्तेस्वस्थःस्यात्कालकूटादिमोहितः॥५॥कर्कोटि
कार्कयोर्मूलंघूर्णयित्वाचसर्षपान्॥सर्पिषापाययेन्मंत्रीस्थावर
क्ष्वेडशांतये॥६॥वंध्याकर्कोटिकामूलंगोमूत्रेणघृतेनवा॥तं
डुलोदनपीतंवानिहंतिनिखिलंविषं॥७॥स्थावरंजंगमंचैवत
थादुष्टविषंचयत्॥श्रीफलस्यजटासूक्ष्माचूर्णीकृत्यनिधाप
येत्॥८॥घ्राणद्वयमितंचूर्णंकांजिकेनतुपाययेत्॥स्थावरंजं
गमंक्ष्वेडंतथादूषिविषंचयत्॥९॥तत्सर्वंनाशयत्येवनात्रका
र्याविचारणा॥वामेनानामिकयाजलपूर्णंसप्तवेलमभिमंत्र्य
॥१०॥दक्षिणकरस्थपात्रंतस्मात्सप्तैवचुलकानि॥पातुंयस्यचव॰
द्यात्सनिर्विषोभवतितत्क्षणादेव॥११॥मंत्रश्चसावरोयमुच्य
तेविषहरःपरमः॥शिवःशबररूपेणयदापार्थमबोधयत्॥
तदायोवाचयान्मंत्रास्तेमंत्राःशाबराःस्मृताः॥१२॥मंत्रोयथा॥
ॐगुरुकेपापशरणउवचीवचीचारभारविष्णुमाटी॥इतिमहावि
षाः

अथोपविषाणि

हरिद्रांदुग्धसहितामश्वमारविषार्दितः॥पिबेत्सशर्करांवापित
त्क्षणान्निर्विषोनरः॥१॥तंडुलीकागुडूचीवाधत्तूरस्यविशोषये
त्॥तथाकर्पासपंचांगतत्पंचांगविषापहं॥२॥वाकूकालातस्त
चापिष्टंजलेनकृतपिंडकां॥बद्धाकर्मविषस्थानेभवेद्विषविना
शिनी॥३॥छागदुग्धेनसंपिष्टाहरिद्रातिलदूर्विकाः॥नाशयंति
चवेगेनविषमर्कसमुत्थितं॥४॥प्रणश्यतिविषंपीत्वाकूष्मांड
रससंयुतं॥सशर्करंवागोदुग्धंकोद्रवास्वर्णयोर्मदः॥५॥चुक्र
कैर्जलपानेनजिह्वाकर्षणतोपिवा॥पूगीफलमदोयातिलवणस्या
शनेनच॥६॥घृतोद्वर्त्तनतोयातिकंडूतिःकपिकच्छुका॥याति
लूतासमंशीघ्रंइंगुदीत्वग्विलेपनात्॥७॥शतधौतेनवनीतंभ

ह्लातजविषहरंलेपात्॥ ईदृग्विधंसमस्तंशामयतिनीलीतथा
लोघ्रं॥८॥ गुंजाफलानिविंशतिरंभायात्रितयंगुडंचपलमात्रं
॥कृत्वैकत्रचगुटिकाःकुर्याच्छाणोन्मिताःसकलाः॥९॥ गुटिका
त्रितयंभुक्त्वापीत्वाचोष्णोदकंविरेकःस्यात्॥ योगोयंदूषीवि
षहर्तापथ्ये दधिभक्तं॥१०॥ कुष्टैलेमलयभगैरिकेशलोध्रपि
प्पल्यौमधुकसुवर्चकेवमांसी॥ एषांयत्नमधुनतोयदंदचूर्णं
तेदूषीविषमहरंतिमधुलीढं॥११॥इतिस्थावराणि॥ ७ ॥ ७ ॥

अथजंगमानि

तेषुपूर्वंभुजंगाः॥शेषवासुकितक्षाख्यकर्कोटकमहांबुजाः॥शं
खपालश्चकुलिकोनागाअष्टौपुराभवन्॥१॥ आद्यंतौचतदा
तौतदाद्यंतौचमध्यमौ॥वन्हींदुवासुवरुणंपुत्रौपितृसमप्रभौ
॥२॥दशाष्टपंचत्रिगुणासप्तमूर्धान्वितौक्रमात्॥विप्रौनृपौवि
शौशूद्रौद्वौहीनौप्रकीर्तितौ॥३॥ नागानांजज्ञिरेतेषांसुताःपं
चशतंपृथक्॥अजरामरणाघोरा—स्तेसर्वेकामरूपिणः
॥४॥तदन्वयोद्भवाःसर्पाअसंख्येयास्ततोभवन्॥स्वर्गेवाव
धिपातालभूतलेषुवसंतिते॥५॥ ॥फणिमंडलराजी
लावातपित्तकफात्मकाः॥क्रमाद्भौमाःस्मृताःसर्पाःव्यंतरेदो
षमिश्रताः॥६॥दर्वीकरास्तुसफणाघोणशोमंडलांचिताः
॥राजिलाराजिभिश्चित्राव्यंतरामिषलक्षिताः॥७॥दर्वीकरा
स्यदंशःस्याद्रूक्षःसुश्लक्ष्णःसितेतरः॥उष्णसर्पोफणांवश्चदंशो
मंडलिनःपृथुः॥८॥शोफवान्स्निग्धशीतश्चदंशोराजीलिकाः
स्मृतः॥व्यंतरादिकृतोदंष्ट्राविज्ञेयोमिश्रलक्षणः॥९॥दंशो
स्थित्वाहिपंचाशन्मात्रासवर्धतेविषं॥ मात्रालघ्व्यक्षरोन्मा
नामेषान्मानानिकापिवा॥१०॥दंशाद्यातिगरलंभालंनेत्रं
ततोमुखं॥अस्याच्चधमनीस्ताभ्योधातून्वाप्नोत्यपिक्रमा
त्॥११॥धातोर्धात्वंतरप्राप्तौविषवेगोभवेन्महान्॥ततोद
ष्टाश्चजायंतेचेष्टावेगेषुसप्तसु॥१२॥वेगोरोमांचमाद्योरव

यतिविषजःश्वेतवक्त्रोपशोफौतस्यार्धस्तत्परोह्यौवपुषिजनयतोवर्णभेदप्रवेपौ॥ योवेगःपंचमोसौनयनविषशलाकंपभंगंचहिक्काषष्ठोनिश्वाससमोह्यौवितरतिचमृतिंसप्तमोदच्छकस्य॥१३॥ यस्यांगानांजडत्वंश्वपथुरवयवोहृग्गदाह्यौप्रवेपौविड्भेदःकेशतुच्छसुकरमरुणलापांगयोर्भातिरक्ष्णोः॥ तृष्णासृक्कंपमूलोहृदिचविघटनादंनदंतच्छदानांश्यावंचश्लेष्मपिन्नोद्गमनमसृगरेरोधकूपादिषुस्यात्१४॥ लालाक्षतिःसितनिभंपरिवेषमास्येनासाश्रयाणिवच्चनानिच्छसंधिभेदः॥ पूर्वाधिकाविकृतयोविविधाभवेयुर्यस्यप्रतीक्षणमसौखलुकालदष्टः॥१५॥ कृत्तिकाभरणीस्वातीमूलंपूर्वात्रयंशिवा॥ विशाखार्द्रामघाश्लेषाचित्राश्रवणरोहिणी॥१६॥ तारास्ताःसर्पदष्टस्यत्यजेन्मंदकुजौतथा॥ पंचमीचाष्टमीषष्ठीअमावस्याचतुर्दशी॥१७॥ संध्याचतुष्टयेदष्टंदग्धयोगाश्चराशयः॥१८॥ इतिजेगमानि॥ ७ ॥ ७ ॥ ७॥

अथदूतपरीक्षा

आकारणायमात्रकमागतदूतस्यवचनमादाय॥ कृत्वाप्रमाणमादावभिमंत्र्यचतत्रमंत्रेण॥१॥ सप्तत्रिगुणितवारंततःप्रमाणंपुनःकुर्यात्॥ वृद्धौसमतायांवाजीवतिदष्टोनमानहीनत्वे॥२॥ अवशेषेशून्येवाजीवतिनोजीवितान्वेद्वेयं॥ इतिदूतप॰

अथसर्पदष्टस्यतत्क्षणाच्चिकित्सा

देशकाहिदशेत्सद्योदष्टकाष्ठशिलादितः॥ विषशोषेदहंदंशंज्वालोल्काकनकादिना॥१॥ अथवोमल्लेनवास्याङ्घ्रिलिपेत्संबूकयेच्चतं॥ दष्टांगंछेदयेद्दंशोपरिष्टाद्बंधयेदृढं॥२॥ सर्वदष्टप्रवेशेषुस्वयमेवविचक्षणः॥ मूत्रयेल्लवणादेवनिर्विषत्वमवाप्नुयात्॥३॥ सद्योभुजंगदंशोरविसुतमरुपूरितेकदाचिदपि॥ व्रजतिनधातुषुगरलंसत्यंपाषाणरेखेव॥४॥ सघृतमरिचंपेयंजीवोवाजीवलक्षणः॥ रोमठेस्वाकुपंचांगपूर्णंवाणस्यनोहितं॥५॥

अथदर्वीकरचिकित्सा

शिरीषबीजपुष्पार्कक्षीरबीजकटुत्रयं॥विषंविनाशयेत्पानलेप
नाभ्यंजनादिना॥१॥शिरीषपुष्पंस्वरसेनभावितंत्रिःसप्तकृत्वो
मरिचंसितान्हयं॥प्रयोजयेदंजनपानभावनैर्विमोहितानामपि
सर्पदंशिनां॥२॥नतोषणंनिशादारुकरंजोर्कःशिलामधु॥यष्टी
शिरीषंकृष्णाचगणोयंविषनाशकः॥३॥पंचांगकृष्णपंचम्यां
शिरीषस्ययथाविना॥गृहीत्वामूत्रपिष्टैस्तैविषघ्नोगुटिका
कृता॥४॥छायाशुष्कारक्तिमात्रासर्वकर्मसुयोजयेत॥जातवत्स
शकृद्भस्मन्मूत्रवर्तिर्विषंहरेत्॥५॥हिंगूग्रलसुनंव्योषधान्याम्लगुटि
कातया॥मांसीचंदनसिंधूत्थकृष्णापमुशलोत्पलैः॥६॥समूत्रै
रंजनंसद्योविषसुप्तप्रबोधनं॥अर्ककार्पासयोर्मूलेजलपीतं
जयेद्विषं॥७॥पटोलमूलनश्येनकाकदष्टोपिजीवति॥मूलं
सुवर्णजात्यामूलेशेफकनकयोर्वापि॥८॥दत्तंनश्येस्यानेवैकेन
गरलनाशकंवदता॥वैरोचनाफलमज्जानिंबुकरसभावितव
स्तुवहुवारं॥९॥लालाघृष्टेनिहितोनेत्रयुगेहरतिकालविषं॥
पाठामूलं —विनिःपिष्यगोघृतेनपिबेत्तुयः॥१०॥सभवेद्विषनि
र्मुक्तोनात्रकार्याविचारणा॥एकविंशतिसंजप्तंजलंमंत्रेणपाय
येत्॥११॥यदावांतिस्तदामृत्युर्नवांतिर्जीवतिध्रुवं॥१२॥मंत्रः॥
ॐनमोनीलकंठविशुद्धाक्षः॥ अथमंडलीचिकित्सा ॥
त्रिवृन्निशायष्टिलन्नपीतुसीरान्वितेगव्यचतुष्कयुक्ते॥ब्रा
ह्मीरसेसाधितबीजमुच्चैर्विनाशनंमंडलिनांविषार्त्तेः॥१॥
----चूर्णंतत्रभवस्नुहीतनुशिफापद्मकंकदल्याफलंतुं
बीहिंगुमुनिः—शिरोशिवजलेनीलीप्रांशुफांशिवा॥चूर्णंनाग
लतादलौर्दधिनृपो लोडुम्यपिंड त्रयंयोगानामिदमस्तु
मंडलविषंलेपेननिर्मूलयेत्॥३॥काकमांसीतथाकुष्ठंगोत
क्रेणैवपाचयेत्॥नाशयेन्मंडलीक्ष्वेडमेगदोयंसुनिश्चितं॥४

अथराजिलचिकित्सा

अथराजिलदष्टेनपेयाकृष्णाससैंधवा॥सकृष्णाखंडदुग्धाद्यं

पातव्यंवापिमाक्षिकं॥१॥सकुष्ठारेणुकव्योषक्षत्रातिविषमा
क्षिकाः॥ कटुकागृहधूमाद्याघ्नंतिराजीविषंमतं॥२॥शिखिपि
त्तवद्राहिंगुलशुनीनकुलास्थिभिः॥ मरीचतुल्यैर्धूपःस्याद्वि
षहास्त्वहि वन्हिजं॥३॥ जिघ्रेद्वानाशयेदूर्वारोचनासिकतांशु
ली॥पिवेद्यांगुलिकानांतुव्योषंसवकुलर्धिका॥४॥ इतिराजि०

अथव्यंतरचिकित्सा

आंगदैःसर्वसामान्यैर्व्यंतराणांविषंहरेत्॥ ॥धूपोदेवीमहा
पिच्छखंडनैस्तद्विषापहः॥१॥ व्योषपिच्छविडालास्तिनकुलां
गरुहैः समैः॥ चूर्णितैर्मेषदुग्धाक्तैः धूपःसर्वविषापहः॥२॥
मंत्रेणानेनसलिलमभिमंत्र्यैकविंशतिं॥पाययेत्सर्पदष्टस्यनि
र्विषोजायतेक्षणात्॥३॥व्यंतरगोनशाल्हूनागर्दभविस्फोट॰
उन्मादंडाः॥ मूषककीटविषाणिस्थावरमपिनाशमायांति
॥४॥ दष्टमौलौसुधांध्यात्वावर्षंतिमेघमालिकाः॥दर्भैर्मयूर
पिछैर्वामार्जयेन्मांत्रिकस्ततः॥५॥ ध्यानेनजलपानेनमार्ज
नेनाखिलंविषं॥ प्राणिनांतस्यनिक्षिप्तंमेघमालाप्रभावतः॥
६॥ मंत्रः॥ ॐ शालेमालेहरविषवेगंहा ह्राह्रीह्रीसपरिघंवेलं
॥अंबेगह्नि॥ॐनागेंद्रुमेरुद्रअर्घटमः व्यूलेसहठःठः॥इति०

अथसर्पसामान्यचिकित्सा

दधिमधुनवनीतंपिप्पलेशृंगवेरंमरिचमपिचकुष्ठंचाष्टमंसैं
धवंच॥ यदिदशतिसरोषस्तक्षकोनागराजो अगदमपिचकु
र्यान्निर्विषंतत्क्षणेन॥१॥ अलाबुबीजंत्रपुसस्यबीजंतस्यैव
तोयेनचतन्निषिक्तं॥आलेपनाद्यैर्विधिवत्प्रयुक्तंहन्याद्विषंतक्ष
कसंभवंच॥२॥ श्वेतवचाघृतमरिचंगुंजांचपिवेद्भुतंगसंदष्टः
॥छर्दिविरेकौभवतःस्वतःसुखीस्याद्विषैर्मुक्तः॥३॥ आलिदि
व्यौषधिःप्रोक्तासूक्ष्मकंटकसंवृता॥विमुच्यतेविषैःप्राणीपी
त्वातोयेनतज्जटां॥४॥ इतिसर्पसामान्यचिकित्सा॥ ❀॥

अथघोनसविद्या

सप्ताभिमंत्रितंनीरंसर्पदष्टस्ययोजयेत्॥दर्भैर्मयूरपक्षैर्वामार्जयेदेकविंशतिं॥१॥स्थावरजंगमगरलंभूतग्रहशाकिनीप्रभृतिवत्॥गर्भोद्भवंचमूलेदृष्टिविषंस्फोटयेल्लूताः॥२॥नाशयतिघोणाश्चयंविद्यामंत्रेणपूर्वसिद्धेन॥लाभःसहस्रमात्रेमंत्रस्यशतंचहोमःस्यात्॥३॥ मंत्रः॥ॐ आंह्रींनमःश्रीघोनसमहेश्वरेश्वांचलचललोलांरासांरासांक्षेंक्षंक्षींक्षींहूंभगवति श्रीघोनसेश्वपसः ५ हर५ वः५ ठः५ वःमः५ वरदिहंगमानुजेलक्ष्मींक्ष्मींक्ष्मींक्ष्मूंक्ष्मौंक्ष्मःररोसयठःश्रीघोणसेक्षींस्वाहा॥ इतिघोणसविद्या॥अथलहरीसमुत्थापनविषमंत्रः ॥ह्रींह्रीं आस्तिकायलक्ष्मींक्लींविषविनाशाय ॐ ठः२ ॐ यः ॐ हरः॥कर्णेजयःदृष्टःसमुत्तिष्ठति॥ इतिलहरीसमुत्थापनमंत्रः॥४॥

अथसर्पोच्चाटनं

सप्ताभिमंत्रितान्यत्रकर्करान्येकविंशतिं॥क्षिपेत्ततःपलायंतेसर्पास्त्रासपरायणाः॥१॥ मंत्रः॥ॐ ह्रींह्रींह्रींह्रींहूंह्रौंह्रैंह्रंह्रः अथास्तीकमंत्रः॥ ॐ सर्पापसर्पभद्रंतेदूरंगच्छमहाविष॥जन्मेजयस्ययज्ञांतेआस्तीकवचनंस्मर॥२॥ आस्तीकवचनं श्रुत्वायःसर्पोननिवर्तते॥शतधाभिद्यतेमूर्ध्निशिंशवृक्षफलंयथा॥३॥ अनेनत्रिवेलपठितेनसर्पाःस्थानंत्यक्त्वायांति॥ ॥अथौषधं॥ रसोनरससंलिप्तःकार्पासास्थिविनिक्षिपेत्॥बिलद्वारेततःसर्पाःप्रणश्यंतिविशेषतः॥४॥इतिसर्पोच्चाटनं॥

अथसर्परक्षा

वस्त्रेग्रंथीन्दद्यान्मंत्रीसप्तवेलंजपेन्मनुं॥देहेग्रंथियुतंवासोप
—वत्तावन्नसर्पभीः॥१॥ अथमंत्रः॥ॐ दृष्टकरअदृष्टकालिंगनागहरनागसर्पदुंडीविसुदाढबंधन शिवगुरुप्रसादात्॥ लज्जामूलमधःपस्यामूलंवद्धंयर्पाकरे॥तद्दातस्यनसर्पेभ्योभयंकुत्रापिविद्यते॥२ सितवर्षाभूमूलंपुष्यार्कगृहीतमितिश्रुतिविधानात्॥तंडुलजलेनपिबतःसप्तदिनंसर्पभीर्नास्ति॥३

आषाढस्तुकृपक्षेभानोर्दिवसेशिरीषस्य।।मूलंजलेनपिष्टापिवेत्तुयस्तस्यसर्पोत्थाव्यथानाशः।।४।।आवत्सरमहे भीतिर्नस्यात्तस्यप्रभावेन।।शुकनासांचपिवेद्योभुजपाठंतस्यभीर्नास्ति।।

अथवृश्चिकचिकित्सा

पलाशबीजमर्कस्यदुग्धेपिष्टंहरेत्क्षणात्।।विषंवृश्चिकसंभूतंदंशस्यानेविलेपनात्।।१।।वृद्धकर्पासमूलंचमेषशृंगीचवारुणी।।एकैकस्यप्रयोगेणवृश्चिकोवतरेद्लं।।२।।घृताक्तदुग्धलेपेनमधूकस्वेदतोथवा।।सैंधवोष्णाज्यपानेनवृश्चिकस्यविषंव्रजेत्।।३।।अथमंत्रमिमंकर्णेजपेदंसंस्पृशेत्तथा।।एकविंशतिवारंचवृश्चिकक्ष्वेडशांतये।।४।।मंत्रः।।ॐआदित्यरथवेगेनविष्णुबाहुबलेनच।।गरुडपक्षपातेनभूम्यांगच्छमहाविष।।५।।ॐपक्षियोगयदाज्ञाश्रीशिवेचोत्तमप्रभुपादाज्ञा।।अथद्वितीयमंत्रंपूर्वोक्तनिषेधेनजपेत्।।मंत्रः।।हिमवंतउत्तरेपार्श्वेकपिलोनामवृश्चिकः।।तेनाहंप्रेषितोदूतोगच्छगच्छमहाविष।।किलिकिलिस्वाहाडडिकिनीस्वाहाफट्रेवःविषः।। अथापरविषाणि।। खर्जूरीलीढमंगंयत्तस्मिन्नंगंविनिक्षिपेत्।।दीपतैलंततस्तीव्रंविषंनश्यतिदेहिनां।।१।।हरेच्छिरीषपंचांगंव्योषंशतपदाविषं।।शंबुकक्षीरशिरीषाभिर्हरेद्दर्दुरजंविषं।।२।।शिलातालुककुष्ठानिसावचोत्तुलसीरसैः।।यातितसानतःशीघ्रंविषमूषकसंभवं।।३।।आखुनाभक्षितस्याथनामोच्चार्यसमुद्धरेत्।।मार्गधूलिंक्षिपेद्दूरंतस्यशीघ्रंसुखंभवेत्।।४।।कस्तूरीचनिशायुग्मंशिरीषकुंकुमैःसह।।कांतापुष्पंपिबेन्मूत्रेसमस्ताखुविषापहं।।५।।कर्णिकारसनोवीरद्युम्नात्रिकटुमाधवी।।षष्ठीधान्यगुडक्षीरंदष्टोमत्तशुनापिबेत्।।६।।अंकुल्हपत्रधूपेनयद्वाकेशसमन्वितैः।।शंकुभिःकटुतैलाक्तैर्यातिमत्स्यविषंक्षिपेत्।।७।।शृंगीमत्स्यविषेस्वेदोघृतचिक्कसपिंडिकाः।।केसरंतगरंशुंठीमरी

चंहंतिलेपतः॥८॥मक्षिकाया विषंपद्मा घृतसैंधवलेपतः॥तमायस्वेदतोभृंग्यावराद्यश्चविघर्षणात्॥९॥वृकव्याघ्रतरक्षर्क्षसृगालद्वीपवाजिनां॥भविरंश्रावयेद्दंशाद्दहेल्लोहशलाकया॥१०॥ श्यामासुरभिजिव्हाचनिःशेषप्राणिसंभवं॥नखदंतविषंहंतिमधुनासहलेपतः॥११॥ वटनिंबशमीकत्वक्कषायोहंतिलेपतः॥निःशेषजीवजातानांनखदंतविषंद्रुतं॥१२॥ पाठामूलंहिसंलिप्तंदंशस्थानेजलेनसंपिष्टं॥सर्वेषामपिकीटानांविषमपहरतितत्क्षणादेव॥१३॥ इतिजंगमविषाणि॥इतिश्रीवृहच्छार्ङ्गधरविरचितायांपद्धत्यांविषापहरणपरिच्छेदः

अथभूतविद्या

तत्रदेवासुरनागत्रिदोषादिस्वस्थमुपविष्टचित्तस्योन्मादनचिकित्साःकथ्यंते॥ राजीकरंजनव्यासशिरीषार्कनिशादूर्वा॥प्रियंगुत्रिफलादारुहिंगुव्योषंकुचंदनं॥१॥ कृष्णाकसेरुखर्जूरबदरीमधुकेबरी॥शर्करामधुसर्पिश्चेत्सर्पोन्मादःपिबेदिदं॥२॥निंबपत्रवचाराजिहिंगुगोमेषरोमभिः॥हिंगुशावन्हिलसकैर्धूपःस्यात्सग्रहापहः॥३॥ पाठापथ्यावचाशिग्रूसिंधुव्योषैःपृथक्कुजलैः॥ अजाक्षीराःठकेपक्वंसर्पिःसर्वग्रहान्हरेत्॥४॥विद्याचंडासिधारेयंग्रहघ्नीकर्णजापकः॥एकविंशतिसप्तैश्चसर्षपैस्ताडयेन्मुखे॥५॥ मंत्रः॥ ॐनमोरत्नत्रयनमश्चंडवज्रपाणयेमहासत्वसेनापतयेनमश्चंडवज्रशृंखलायपिदाह्वानवक्राप्रदीप्तायप्रज्वलितहस्तायप्रज्वलितार्चितदीप्तकेशायनीलकंठायवित्तांतरूपायलंबोदरायमहाज्ञानवक्रायभृकुटीमुखायचतुर्दंष्ट्रायकरालायमहाविरूपायवज्रगर्भायएह्येहिकायमनुप्रविश्यरसिगृण्ह२कंपय२भ्रामयमनुष्यस्यचक्षुषीचालय२हिरि२भिरि२किंचिरायसिदेवदानवगंधर्वयक्षभूतराक्षसप्रेतपिशाचानामश्वासप्रवेशयकंपयसमयमनुस्मरदहयवामयविध्वंसयचंडासि

धाराभिमतमभिराज्ञापयतिहुंफट्ठःठः॥इतिचंडासिधारा॥ बलिर्मद्येनमांसेनमत्स्यैस्तैलेनसाक्तुभिः॥माषपूपैःसकुल्माषैरैशान्यांबलिमाहरेत्॥६॥अथबलिनिवेदनमंत्रः॥भूतानियानीहवसंतितानिबलिंगृहीत्वाविधिवत्प्रयुक्तं॥अन्यत्रवासंपरिकल्पयंतुरक्षंतुतान्यद्यनमोनमस्ते॥७॥एतेनानासंहिताभ्यः॥इतिश्रीबृहच्छार्ङ्गधरविरचितायांप॰भूतविद्यापरि॰

अथबालग्रहोपशमनं

जन्मदिनादारभ्याष्टादशवर्षपर्यंतंदेवीग्रहामनुष्यंगृण्हंति॥तासांनामानि॥पापिणीभीषणीचैवघंटालीचतथैवच॥हंसाविकाकाकटीचचोर्ध्वकेशीतथैवच॥१॥श्रीदंडीमहिषीरोहिणीपूतनामुकुटातथा॥गोमुखीपिंगलाचैवनंदिनीपंकजातथा॥२॥शीतलायमुनाकुंभकर्णिकातापसीतथा॥राक्षसीचपलाचैवपातनारोदिनीतथा॥३॥चटकाचंचलाधावनीजानवेदाह्यपीतथा॥कालिनीकलहंसीचदेवदूतीतथैवच॥४बलिकाचयवतीचमंडकावानरीतथा॥वंधकीचकुमारीच॰प्रभृतीपरिकीर्त्तिताः॥५॥नखदंतविकारीस्यान्निद्राहीनाथवाभयोद्वेगी॥दुर्गंधोबहुचेष्टोबालोबालग्रहाविष्टः॥६॥दूर्वासतिक्ताविषमच्छदत्वक्प्रोद्वर्तनाद्धंतिशिशुग्रहार्त्तिं॥सप्तच्छदाश्वत्थमधूकसेलुप्लक्षक्वथोभस्तपनाच्चशीतात्॥७॥वंशत्वक्सहसंयुतंमलसुणंसारिष्टपत्रंघृतं निर्माल्यंनरकेसरास्थिभुरगत्वग्गोरराजीयुतं॥ ॥सिद्धार्थजतुनिंबपत्रसहितंवंशत्वगाज्यान्वितं धूपानांचयमेतदाशुसकलान्बालग्रहान्नाशयेत्॥९॥सर्वबालग्रहेषुःस्यान्मंत्रोयंसर्वकामिकः॥बालेरक्षाविधानेचतथादर्भादिभाजने॥१०॥मंत्रः ॐनमःसर्वमातृणांहृदयंमोटयमोटयभंगय२काटयकाटयस्फोटयस्फोटयस्फुट२तुंड२गृण्ह२आकट्ट२विकट्ट२त्रोटय२एवंसिद्धमाज्ञापयतिहर२हरनिर्दोषंकुरु२बालिका

वालोवास्त्रीपुरुषोवासर्वग्रहाणामुपक्रम्यतु ॐचामुंडे॰
नमोदिव्यःहूंःह्रींःह्रींअपसरंतुदुष्टग्रहाः हुंहुंहुं तद्यथागच्छं
तुग्रहकाः अन्यत्रस्थाने ॐरुद्रोज्ञापयति ठःठः॥एतेना
नाआगमशास्त्रेभ्यः॥इतिश्रीबृ॰शा॰प॰विषग्रहबालग्रहोपश
मनंप॰

अथकौतुकानि

भूपानांरसिकानांधनिनांवाकौतुकेषुसक्तानां॥ग्रंथानालो॰
च्यमयाक्रियतेकिंचिद्विनोदार्थं॥१॥ रथ्याकूपतरुच्छायाप्रेत
भूदेवगेहजाः॥वल्मीकसंभवावन्हिदग्धाःपानीयपीडिताः॥
॥२॥हिमाख्यकृमिभिर्मुक्तामृदुकाकालसंभवाः॥ ओषध्यो
विधिमानीतानकार्यंसाधयंतिताः॥३॥ अतःप्रवेशेनक्षत्रेशुभे
वारेसुनिष्पता॥अप्ययंविधिवज्ज्ञाह्यंस्मृत्वादेवींचसुप्रभां
॥४॥मंत्रः॥ॐसुप्रभायैनमः॥पुष्यार्कमूलहस्तार्केचोत्तरा॰
र्कदिवसेषु॥ग्राह्यंप्रातर्द्दिव्यंनिमंत्रितंभानुसुतदिवसे॥५॥पु
ष्येपराजितार्केनसमुत्थृतंसर्पिषाप्लुतं॥पीतंवाकंधराबद्धंगंड
मालाविनाशनं॥६॥चित्रोदीतंगलेबद्धंकुंदमूलंनिहंतितां॥
कंठेबध्वारज्जुंमृतस्यपुंसस्तरज्जुमादाय॥७॥ तस्याःखंडं
कंठेबध्वंगंडस्त्रवंहरति॥बब्बूलवंदकंबद्धंतथाअर्शोविका
रनुत्॥८॥तथाशेफालिकायास्कवायुपीडाहरंस्मृतं॥काक
जंघासदानिद्रांकुरुतेमस्तकेस्थिता॥९॥पुष्योधृतंपुनःप॰
क्षःमयस्यरघुमज्जनात्॥निर्गुंड्यासहदेव्याश्चकटौबद्धं॰
जटाद्वयं॥१०॥प्रातरादित्यवारेचसर्वज्वरविनाशकृत्॥कंन्या
कर्तितसूत्रेणबद्धायामार्गमूलिका॥११॥ एकाहिकंज्वरंहं॰
तिशिरसायामतिवेगतः॥ ॥ कर्णेबध्वारवौश्वेततुरंगरिपुमूलि
का॥१२॥ सर्वज्वरहराश्वेतमंदारस्यचमूलिका॥काकमा
चीशिफाकर्णेक्षिप्तावाधिर्यनाशनः॥१३॥ पाणिस्थंवृक्षवंदा
कंद्यूतेवितनुतेजयं॥काकजंघारसःकर्णेक्षिप्तोवाधीर्यनाश
नः॥१४॥ हंतिकर्णजटाबद्धातस्यानेत्रामयंध्रुवं॥गृहीतं

रेवतीऋक्षेपिप्पलस्यचकंदकं॥१५॥ महिलानांकरेबद्धंपरमं
गर्भधारणं॥धत्तूरमूलिकापुष्येगृहीताकटिसंस्थिता॥१६॥
गर्भनिवारयत्येवरंडावेश्यादियोषितां॥राजिकांतिलतैलंचपि
ष्ट्वानारीऋतौपिबेत्॥१७॥त्रिदिवंतेनगर्भस्यसंभवोनैवजाय
ते॥१८॥पिबतिप्रसूतसमयेकांजिकयुक्तंजयाभवंचूर्णं॥नबि
भर्त्तिसाप्रसूतिधृतेपितस्यानगर्भस्यात्॥१९॥बब्बूलवृक्ष
पुष्पाणिगोदुग्धेनपिबेदृतौ॥ यानारीगर्भसंभूतिंपुनस्तस्यांन
जायते॥२०॥ ज्ञात्वातुगर्भंगर्भिण्याःसार्धमासद्वयोन्मितं॥
तदैकवर्णगोक्षीरंपिबेद्गर्भस्यमंजरी॥२१॥पिष्टांगृहीत्वाचर
वेर्ह्निनेध्रुत्विविधानतः॥भवंतिपुत्रिकायस्यास्तस्याःपुत्रोभ
वेद्ध्रुवं॥२२॥ युग्मं॥ ऋतुस्नातापिबेन्नारीश्वेतकंटारिकाज
टां॥पयसापुत्रसंभूतिस्तस्यांसंजायतेध्रुवं॥२३॥ भूनागल
ज्जानुकयोःकल्कसंलिप्तशेफसा॥यानारीरमतेसास्याद
न्येषांपुंस्त्वनाशिनी॥२४॥द्विपदशनःपुटदुग्धःसाजक्षीरो
रसांजनोपेतं॥दिनसप्तकप्रलेपात्स्खलतेरोमसंघातं॥२५
॥कर्चूरभल्लातकशंखचूर्णंक्षारोयवानांमनसःशिलाच॥तै
लेपिपक्कंहरितालमिश्रंनिर्मूललोमानिकरोतिसद्यः॥२६॥
अंकोल्लबीजमज्जानांसूक्ष्मंचूर्णंविधीयते॥तिलतैलेनत
च्चूर्णंसम्यक्कृत्वाचभावयेत्॥२७॥मर्दयित्वोष्णतैलेनगृ
ह्णीयात्तैलमुत्तमं॥नानाकर्माणिसिद्ध्यंतितैलेनानेनयोगिनां
॥२८॥युग्मं॥ अपक्कमपिचूतस्यफलंद्रवतिवेगतः॥गुडशुं
ठीप्रलेपनविधृतंवत्सरात्यपि॥२९॥निझल्लिदारितंराजीचू
र्णंगुग्गुलमर्दितं॥अपक्कमपिचूतस्यफलंसुस्वादुजायते॥
॥३०॥केतकीपत्रकुष्ठैलादलंकेसरचूर्णतः॥दिव्यगंधंभवेद्धा
रिमोहितालवकंदकं॥३१॥ चंदनैलादरोशीरंतगरैर्वासिते
जले॥पीतेसंजायतेतेनगंधोवपुषियोगिनां॥३२॥पालाशप
त्रकैर्मिश्रजलचंदनशिग्रुभिः॥केतकीपत्रसंवादीगंधोभवतिनिश्चि

तं॥३३॥शिग्रुजटारसभावितचूर्णैःसर्षपशालिरिहरात्रावुषितः॥चंपकगंधसमंशुचिगंधंकुरुतेस्नानविधौविनियुक्तः॥३४॥अतिपक्वकपित्थेनलिप्तपात्रेसुयामितं॥गतमृत्स्णंजलाधौतपात्ररूपंभवेद्दधि॥३५॥शालिमंडेनसंलिप्तसुष्कसुश्वेतवाससा॥च्छादितेवेणुपात्रेस्याद्दुग्धंसंयामितंदधि॥३६॥फलान्यनेकवृक्षाणांमधुनामदनेनच॥लिप्तवृंतानितिष्ठंतिक्षतहीनानिवैचिरं॥३७॥ककुभस्यफलंपुष्पंलाक्षाश्रीवासगुग्गुलं॥श्वेतापराजितामूलंविडंगदिनसर्षपाः॥३८॥धूपःसर्जरसोपेतःप्रसरन्गेहमध्यतः॥सर्पाखुमत्कुणायूकासंप्रविश्यंतिंधतः॥३९॥ अथक्षेत्ररक्षा ॥कुंभेविद्यांसमभ्यर्च्यमंत्रितातलविद्यया॥काकोलुकाश्वेतसिद्धार्थाक्षेत्रमध्येविनिःक्षिपेत्॥१॥ सलभासारसाकीरावराहामृगमूषकाः॥शशकाश्चततोयांतिवलविद्याप्रभावतः॥२॥सुगमं॥ मंत्रः॥ ॐनमःसुरेभ्योबल२जः२विर२मिलि२स्वाहा॥ अथसीमारक्षा॥रेखायाःकुंडलंकुर्यान्निजसार्थेसमंततः॥मातृकोधनुषःकोद्याजपन्मंत्रंसुशाबरं॥१॥मंत्रः॥ नंद्धायणुपुत्तसार्परउपहिहातुंमोरीरक्षाकुरुजिमपुंछींदुल्लावइ॥उरहींइपुछिपरइहसुहिजाहरेजाह आढसंकालाकरिउरवंधउवाच्चवाघिणिकउसुंअबंधउ॥कलिआषिणीदुहाइमहादेवकीपूजापाइटालहिज इआगिलिविषदेहि॥ बोललाइतिशब्देनमोच्चैरुक्तेनमंत्रिणा॥यावद्दूरंश्रुतःशब्दस्तावत्सिंहःपलायते

अथसिंहरक्षा

पिसुनातस्करात्सैंहादपमृत्योस्तथाशरात्॥रक्षांकरोतियेमंत्रोपठितःशंबरस्त्रिया॥१॥रज्वाकुर्वीतजेन्यादिघष्टास्तपिबुद्धिमान्॥ अथवानिःक्षिपेद्दिक्षुकर्करानभिमंत्रितान्॥२॥
ॐ आटूचूडूवाडीकूडीवोरुवाद्वीःकाल्हूकाडूंवाघस्वाहा॥

अथविद्युन्निवारणं

जैमिनिश्चसुमंतुश्चवैशंपायनएवच॥पुलस्त्यःपुलहोविष्णुः
षडेतेवज्रवारणाः॥१॥ मुनेःकल्याणमित्रस्यजैमिनेश्चापि
कीर्तनात्॥विद्युदग्निभयंनास्तिलिखितायङ्गृहोदरे॥२॥क
देववृक्षसारस्कविद्युत्पातनिवारणः॥विद्युत्पातस्यभीतिर्नि
देवराजस्यकीर्तनात्॥३॥रामरक्षांपठेद्यस्तुरात्रौवायदिवादिवा
॥नतस्यदुष्टचित्तेभ्योभयंतस्यनविद्यते॥४॥एतेनानासंहि
ताभ्यः॥इतिश्रीवृहच्छार्ङ्गधरवि॰प॰कौतुकनिर्णयःपरिच्छेदः

अथकेशकल्पः

षड्विंशाद्वर्षदेशीयःपुमान्कुर्याद्रसायनं॥पंचाशद्वर्षिकोवापि
कृत्वातन्नावसीदति॥१॥रुदंतीनामविख्याताजराव्याधिवि
नाशिनी॥चणपत्रोपमैःपत्रैर्युक्तांभोविदुवर्षिणी॥२॥चतु
र्विधातुसाज्ञेयारक्तापीतासितासिता॥ तामोषधींसमादाय
शुक्लपक्षेशुभेदिने॥३॥ छायाशुष्कांचतांकृत्वाभक्षयेन्नियतें
द्रियः॥ विरेकवमनंकृत्वाविडालपदमात्रया॥४॥भक्षये
न्मधुसर्पिभ्यांमासमेकंमहौषधीं॥जीर्णायांभोजनंकार्यंदुग्ध
भक्तेनरोजयी॥५॥ दृढकायोतितेजस्वीसर्वरोगविवर्जितः॥
वलीपलितनिर्मुक्तःपरमायुस्ततोभवेत्॥६॥इतिरुदंतीकल्पः
हरीतक्यास्त्रयोभागाश्चिवाह्यादशभागिका॥षड्भागाश्चबि॰
भीतस्यत्रिफलेतिप्रकीर्तिता॥७॥खदिरस्यांभसासप्तरात्रंभृं
गरसेनवा॥विडंगपयसासप्तसप्तब्रह्मरसेनवा॥८॥त्रिफ
लांभावयित्वेत्थंभक्षयेच्छर्करासमं॥ वलीपलितनिर्मुक्तःस
र्वरोगैःप्रमुच्यते॥९॥ इतित्रिफलाकल्पः॥समूलपत्रमुत्पाट्य
भृंगराजंशुभेदिने॥शुष्कंचचूर्णितंपुष्येविडालपदमात्रया॥
॥१०॥कांजिकेनसमायुक्तंभक्षयेत्प्रातरन्वहं॥षण्मासयोग
नोहंतिपलितंवलिभिःसह॥दुग्धान्नभोजनासक्तश्चिरंजी॰
वीभवेन्नरः॥११॥ इतिभृंगराजकल्पः॥ विडंगसमधात्री
णांचूर्णं——नोघृतं॥तैलान्वितंनरोलीढ्वाजरसानाभिभूय

ते॥१२॥इतिविडंगादिकल्पः॥ अभिमंत्र्यशुचिर्विधानादाज्याढ्यां हस्तिकर्णजं॥ चूर्णंपोष्यातिसहितततः स्याद्यथेष्टचेष्टोपिदीर्घायुः॥ मंत्रः॥ॐ नमोविनायकायस्वाहा॥ अमतंरक्षरक्षममसिद्धिंदेहिरुद्रस्यवचनेस्वाहा॥ इतिहस्तिकर्णकल्पः॥ भल्लातकंसमादायक्षीरेणसहपाचयेत्॥ तत्क्षीरंमधुमर्पिर्भ्यांपिबेन्मासत्रयावधि॥ वलीपलितनिर्मुक्तोजीवेद्वर्षशतंसुखी॥१३॥ इतिभल्लातककल्पः॥ चूर्णीकृत्यपलानिपंचनितरांगंधाश्मनोयत्नतस्तच्चूर्णंत्रिगुणेनमार्कवरसेछायाविशुष्कीकृतं॥ पथ्याचूर्णमथोतथामधुघृतंप्रत्येकमेषांपलं वृद्धोयौवनमेतिमासयुगलंखादन्नरःप्रत्यहं॥१४॥ इतिगंधककल्पः॥ अश्वगंधापलंत्रिंशच्चूर्णयित्वाविचक्षणः॥ वृद्धदारुकचूर्णेनसमभागंचकारयेत्॥१५॥ स्थापयित्वाघटेदिव्येसर्पिषापरिभाविते॥ कर्षमेकंसमश्नीयात्चूर्णस्यपयसासह॥१६॥ नचात्रपरिहारोस्तिशुक्रवृद्धिःप्रजायते॥ भवत्येवचतुर्मासाद्वलीपलितवर्जितः॥१७॥ इत्यश्वगंधाकल्पः॥ पुनर्नवाजटाचूर्णपलार्धपयसासह॥ मासैकंक्षीरभोजीयःसवृद्धस्तरुणायते॥१८॥ इतिपुनर्नवाकल्पः॥ नसंपत्तिक्रियायस्यभेषजंनचविद्यते॥ सर्वरोगविनाशायनिशांतेसपयःपिबेत्॥१९॥ अंभसःप्रसृतीनष्टौरवावनुदिनेपिबेत्॥ वातपित्तकफान्हत्वाजीवेद्वर्षशतंसुखी॥२०॥ प्रसृतियुगलमात्रंप्रातरुत्थायनित्यंपिबतिखलुनरोयोनासरंध्रेणवारि॥ सभवतिमतिपूर्णश्चक्षुषाताक्ष्यतुल्योवलिपलितविहीनःसर्वरोगैर्विमुक्तः॥२१॥ इतिपानीयकल्पः॥

अथधातुमारणं

नागेनरुक्मंशिलयाचनागंतालेनवंगंदरदेनतीक्ष्णं॥ गंधाश्मनाचैवनिहंतिशुल्वंतारंचमाक्षीकवरेणहन्यात्॥१॥ मुंडंहेमम्लस्यापभीकृतंवावारंवारंसूतगंधानुलिप्तं॥ तीव्रेवन्हौ

कांचनारेर्हनिन्याज्वालामुख्याः संपुटैर्भस्मकुर्यात्॥२॥इतिधातुमारणं॥ अथभस्मसूतकः॥ तारिकासैंधवंचैवपारदंसमभागतः॥ निंबकद्रवसंघृष्टान्नष्टपिष्टांस्तुकारयेत्॥३॥ ततस्तत्पिठरेमध्येधृत्वामुद्रांचदापयेत्॥ अधःज्वालयेद्वन्हिंपिठर्यास्तुशनैःशनैः आस्यामुपरिदद्याच्चपानीयस्यविचक्षणः॥४॥ एवंमासद्वयंकुर्यात्तरुत्वाशोनदापयेत्॥ बन्हिंखरतरंकुर्याद्याममेकंनिरंतरं॥ गत्वोपरिरसस्तत्रम्रियतेस्फटिकप्रभः॥ भस्मसूतकएवंस्यात्ततःकार्येषुयोजयेत्॥६॥इति भस्मसूतकः॥ एतेरसशास्त्रेभ्यः॥ इतिश्रीबृहच्छार्ङ्गधरविरचितायांपद्धत्यांकल्पस्थानपरिच्छेदः॥७॥७॥

अथकेशरंजनानि

त्रिफलायास्तुषड्भागाजटादाडिमजाद्वयं॥ भागत्रयंविशानांस्यात्सर्वमेकत्रचूर्णयेत्॥१॥ भागंषष्टिकमंडस्यकुर्यादेकंचबुद्धिमान्॥ भृंगराजरसंतत्रभागान्दद्याच्चविंशतिः॥२॥ सर्वमेकत्रकृत्वातुलोहभांडेविनिक्षिपेत्॥ तस्योपरिततोदद्याल्लोहस्यैवपिधानिका॥३॥ भूमौचाश्वशकृन्मध्येमासमात्रंनिधापयेत्॥ तस्यलेपेनतोमौलौचूर्णंदुग्धेनदापयेत्॥४॥ रात्रावेरंडपत्रैश्चवेष्टयित्वास्वपेत्ततः॥ प्रातःस्नानंततःकुर्यात्केशाःस्युर्भ्रमरोपमाः॥५॥ एवंलेपत्रयंकुर्यात्सप्तमेसप्तमेहनि॥ ततोजन्मावधिकचाः कृष्णास्युर्भ्रमरप्रभाः॥६॥ तिलान्वितमहाकालबीजतैलस्यनश्यतः॥ दुग्धाहारस्यपुंसस्तुपलितंनश्यतिध्रुवं॥७॥ बिभीतनिंबकुंभारीशिवाशेलुश्चकाकिनी॥ एकैकतैललेपेनपलितंनश्यतिध्रुवं॥८॥ श्यामातगरकर्च्चूरनिशागंधकलेपतः॥ वेगतःपांडुराःकेशाःकृष्णास्युर्गुडधूपिताः॥९॥ काकिन्याःपत्रमूलंसहचरसहितंकेतकीनांचकंदंछायाशुष्कंसभृंगंत्रिफलजलयुतंतैलमध्येनिधाय॥ लोहेपात्रेप्रनीतंधरणितलगतंमासमात्रस्थितंतत्केशाःका

शमकाशाल्मलिकुल्लसहशाः संभवंत्स स्यलेपात्॥१०॥नागपत्राणिचणकक्षारलिप्तानिवेष्टयेत्॥वस्त्रेणभाजनेलोहेस्थापयेन्मुद्रितेसुधीः॥११॥करीषमध्येनिहितंतत्सर्वंपंचमासकं॥द्रवीभूतंततःसर्वमुद्धरेत्तेनलेपयेत्॥१२॥शिरःशुद्धंचवक्त्रांतस्तंदुलानिविनिःक्षिपेत्॥यदाकृष्णानितानिस्युस्तदास्नानंविधीयते॥१३॥केशाःकालालिसंकाशाजायंतेदशवत्सरं॥घृष्टंचराजतंचूर्णंताम्रनागंचचूर्णितं॥१४॥त्रिफलानागवल्लीचकासीसंगंधकस्तथा॥भृंगराजरसोनीलीलेध्रंपलमितंपृथक्॥१५॥एतच्चतुर्गुणंतैलंतैलाच्चापिचतुर्गुणं॥कांजिकंप्रक्षिपेद्धीमान् ततस्तैलंविपाचयेत्॥१७॥क्षिप्त्वाशिरसितत्तैलंपत्रैरेरंडसंभवैः॥वेष्टयित्वास्वपेद्रात्रौप्रातःस्नानंविधीयते॥१८॥भवेयुःश्यामलाःकेशाःपक्षंयावन्ननान्यथा॥यंत्राकृष्टकलंजानांतैलंस्थाप्यंसुरक्षितं॥१९॥उन्मूल्यसितकेशंतुमूलेमूलेविनिक्षिपेत्॥ततःकेशाःप्रजायंतेकृष्णाःकौतुककारिणः॥२०॥युक्त्यापूर्वोक्तयायुंज्यान्मेषशृंगीपयःसुधीः॥२१॥एतेनानासंहिताभ्यः॥ इतिश्रीवृद्धशार्ङ्गधरविरचितायांपद्धत्यांकेशरंजनपरिच्छेदः॥७॥

अथशृंगारनिर्देशः॥

शृंगारवीरकरुणाद्भुतहास्यभयानकाः॥बीभत्सरौद्रशांताश्चनवधाकीर्तितारसाः॥१॥यतोयंसर्वजंतूनांप्रियःशृंगारकोरसः॥ अतोरसानांसर्वेषांमयापूर्वमिहोच्यते॥२॥चतुर्विधःसचाप्युक्तःसामान्योविप्रलंभकः॥संयोगोमिश्रकःश्चैवरसिकानांसुखाप्तये॥३॥अथसामान्यशृंगारेमनसिजप्रशंसा॥अनंगेनाबलासंगाज्जितायेनजगत्त्रयी॥सचित्रचरितःकामःसर्वकामप्रदोस्तुवः॥४॥क्षेमेंद्रस्य॥ कुलगुरुरबलानांकेलिदीक्षाप्रबंधेपरमसुहृदनंगोरोहिणीवल्लभस्य॥अपिकुसुमपृषत्कैर्देवदेवस्यजेताजयतिसुरतलीलानाटिकासू

त्रधारः॥५॥ कस्यापि॥ शंभुस्वयंभुहरयोहरिणेक्षणानां ये
नाऽक्रियंतसततंगृहकर्मदासाः॥ वाचामगोचरचरित्रविचि
त्रितायतस्मैनमोभगवतेकुसुमाऽऽयुधाय॥६॥ नूनमाज्ञा
करस्तस्याःसुभ्रुवोमकरध्वजः॥ यतस्तन्नेत्रसंचारसूचिते
षुप्रवर्तते॥७॥ नगम्योमंत्राणांनचभवतिभैषज्यविषयोनचाऽ
पिप्रध्वंसंव्रजतिविविधैःशांतिकशतैः॥ भ्रमाऽऽवेशादंगेकिम
पिविदधद्भंगमसमंस्मराऽपस्मारोऽयंभ्रमयतिदृशंघूर्णयऽ
तिच॥८॥ अद्यापिनूनंहरकोपवन्हिस्त्वयिज्वलत्यौर्वइवांऽ
बुराशौ॥ त्वमन्यथामन्मथमद्विधानांभस्माऽवशेषःकथमेवमु
ष्णः॥ ९॥ तववकुसुमशरत्वंशीतरश्मित्वमिंदोर्द्वयमिदमयथाऽ
र्थंदृश्यतेमद्विधेषु॥ विसृजतिहिमगर्भैरग्निमिंदुर्मयूखैस्त्वम
पिकुसुमबाणान्वज्रसारीकरोषि॥१०॥ स्तोकाऽस्त्रसाधनव
ताभवतामनोजस्वैरंजगज्जितमनंगतयाऽपिसर्वं॥ स्याच्चेदङ्ग
वान्बहुशरःप्रतिलब्धगात्रःकुर्यास्ततोयदपिकर्मकियन्नऽ
जाने॥११॥ एकंवस्तुद्विधाकर्तुंबहवःसंतिधन्विनः॥ धन्वी
स्मारएवैकोद्वयोरैक्यंकरोतियः॥१२॥ नकठोरंनवातीक्ष्ण
मायुधंपुष्पधन्विनः॥ तथाऽपिजितमेवाऽऽसीदमुनाभुवनत्र
यं॥१३॥ त्वद्दयतृणकुटीरेदीप्यमानेस्मराऽग्नावुचितमनुचि
तंवावेत्तिनोपंडितोऽपि॥ किमुकुवलयनेत्राःसंतिनोनाकना
र्यस्त्रिदशपतिरहल्यांतापसींयःसिषेवे॥१४॥ शिवशिवहिशि
वेनपुष्पधन्वाप्रलयनटेनकिमित्यकारिभस्म॥ सहिपुनरुदि
तश्छलायलोकेसतुमणिमंत्रमहौषधैरसाध्यः॥१५॥ इतिम॰

अथकामातुरः

असुलभासकलेंदुमुखीचसाकिमपिचेदमनंगविचेष्टितं
॥ अभिमुखीष्विववांछितसिद्धिषुव्रजतिनिर्वृत्तिमेकपदेमनः
॥१॥ अपराधीनूनमहंप्रसीदरंभोरुविरमसंरंभात्॥ सेव्योज
नश्चकुपितःकथंनुदासोनिरपराधः॥२॥ कदाकांताऽगारेपऽ

रिमलमिलत्पुष्पशयनेशयानःश्यामायाःकुचयुगमहंवससिवहन्।अयेस्निग्धेमुग्धेचपलनयनेचंद्रवदनेप्रसीदेत्याक्रोशन्निमिषमिवनेष्यामिदिवसान्॥३॥ इतिकामातुरः॥ ७॥॥

अथविरहिजनोक्तिः

चंद्रश्चंडकरायतेमृदुगतिर्वातोऽपिवज्रायते माल्यंसूचिकुलायतेमलयजाऽऽलेपःस्फुलिंगायते॥ रात्रिःकल्पशतायते विधिवशात्प्राणोऽपिभारायते हाहंतप्रमदावियोगसमयःसंहारकालायते॥१॥ तारापतेकुमुदिनीमनुकूलकांतांपादेनपीडयसिकंपयसिद्विजातीन्॥विद्वेषमाचरसिकिंचवियोगिलोकेनक्तंचरस्यभवतःकरुणाकुतःस्यात्॥२॥ भोरोहिणितमसिरात्रिचरस्यभार्यास्वनंनिवारयपतिंसखिदुर्निवारं॥जालांतरेणममसद्मनिसन्निविष्टःश्रोणीतटंस्पृशतिकिंकुलधर्मएषः॥३॥जटानेयंवेणीकृतकचकलापोनगरलंगलेकस्तूरीयंशिरसिशशिरेखानकुसुमं॥ इयंभूतिर्नांऽगेप्रियविरहजन्माधवलिमापुरारातिभ्रांत्याकुसुमशरकिंमांव्यथयसि॥४॥रेरेनिर्दयदुर्निवारमदनप्रोत्फुल्लपंकेरुहेबाणंसंहृणुसंहृणुत्यजधनुःकिंपौरुषंमांप्रति॥ कांतासंगवियोगदुःखदहनज्वालावलीढंवपुःशूराणांमृतमारणेनहिपुराधर्मःप्रयुक्तोबुधैः॥५॥आस्वाद्यतिविशेषंविरहिवधूनांमृदूनिमांसानि॥ करकामिषेणमन्येनिष्ठीवतिनीरदोऽस्थीनि॥६॥ परिम्लानंपीनस्तनजघनसंगादुभयतस्तनोर्मध्यस्यांऽतःपरिमिलनमप्राप्यहरितं॥ इदंव्यस्तन्यासंप्रशिथिलभुजाऽऽक्षेपचलनैःकृशांग्याःसंतापंवदतिनलिनीपत्रशयनं॥७॥ आदातुंसकृदीक्षितेऽपिकुसुमेहस्ताऽग्रमालोहितंलाक्षारंजनवार्तयाऽपिसहसारक्तंतलंपादयोः॥ अंगानामनुलेपनस्मरणमप्यत्यंतखेदाऽऽवहंहेताऽधीरदृशःकिमन्यदलकाऽऽमोदोऽपिभारायते॥८॥ अयंरेवाकुंजःकुसुमशरसेवासमुचितःसमीरोऽयंवेलानवविदलदेलापरिमलः॥ इयंप्राव

तृधन्यानवजलदविन्यासचतुरापराधीनंचेतः सखिकिमपि
कर्तुंमृगयते॥९॥ अंगाऽऽसंगिमृणालकांडमयतेभृंगाऽऽव
लीनांरुचंनासामौक्तिकमिंदूनीलसरणिंश्वासाऽनिलाज्जाहते
॥स्निग्धासाहिमवालुकापिकुचयोर्धत्तेक्षणंदीपतांनमायःपति
तांऽबुवत्करतलेधाराऽबुसंलीयते॥१०॥ यत्वन्नेत्रसमानकां
तिसलिलेमग्नेतदिंदीवरंमेघैरंतरितःप्रियेतवमुखच्छायाऽ
नुकारीशशी॥येऽपित्वद्गमनाऽनुसारिगतयस्तेराजहंसाग
तास्त्वत्सादृश्यविनोदमात्रमपिमेदैवेननक्षम्यते॥११॥वकु
लमालिकयाऽपिमयानसातनुरभूषितदंतरभीरुणा॥तद
धुनाविधिनाकथमावयोर्गिरिदरीनगरीशतमंतरं॥१२॥ य
स्यकांताऽस्तिदूरस्थानवापीनपयोधरा॥तस्यतापस्यशां
त्यर्थंनवापीनपयोधराः॥१३॥प्रस्थानंवलयैःकृतंप्रियसऽ
खैरस्रैरजस्रंगतंधृत्यानक्षणमासितंव्यवसितंचित्तेनगंतुं
पुरः॥ यातुंनिश्चितचेतसिप्रियतमेसर्वेसमंप्रस्थितागंतव्ये
सतिजीवितप्रियसुहृत्सार्थःकिमुत्सृज्यते॥१४॥त्वयममाऽ
ततदुःखोयःसहुनोतिनविस्मयः॥ त्वंस्मरत्रासदाहोऽपिदहृ
सीतिकिमुच्यते॥१५॥ हारोनाऽऽरोपितःकंठेमयाविश्लेषभीरु
णा॥ इदानीमंतरेजाताःपर्वताःसरितोद्रुमाः॥१६॥विरमत
विरमतसख्योनलिनीदलतालवृंतपवनेन॥हृदयगतोयंव
न्हिर्झटितिकदाचिज्ज्वलत्येव॥१७॥ बिभेमिसखिसंवीक्ष्य
भ्रमरीभूतकीटकं॥ यत्ध्यानादागतेपुंस्त्वेतेनसार्धंरतिःकथं
॥१८॥ याःपश्यंतिप्रियंस्वप्नेधन्यास्ताःसखियोषितः॥अस्मा
कंतुगतेकांतेगतानिद्राऽपिवैरिणी॥१९॥ यदिप्रियावियोगेऽ
पिरुद्यतेदीनहीनके॥ तदिदंदग्धमरणमुपयोगंकृपास्यति॥२०
दिव्यचक्षुरहंजातःसरागेणाऽपिचक्षुषा॥ इहस्थोयेनपश्या
मिदेशांतरगतांप्रियां॥२१॥ नूनमयंमेपापःकांताविरहोरसा
यनीभूतः॥वर्षसहस्राऽप्यधिकान्यामिकथमन्यथादिवसान्॥२१

केशैःकेसरमालिकामपिचिरंयाबिभ्रतीखिद्यते–यागाङ्गेषु
घनंविलेपनमपिन्यस्तंनसोढुंसमा॥दीपस्याऽपिशिखांन
वास्वभवनेशक्नोतियावीक्षितुंतापंसाविर–हाऽनलस्यमहतः
सोढुंकथंशक्ष्यति॥२३॥अपसरतिनचक्षुषोमृगाक्षीरजनिरि
यंचनयातिनैतिनिद्रा॥प्रहरतिमदनोऽपिदुःखितानांबतब
हुशोऽभिमुखीभवंत्यपायाः॥२४॥हृदिविलसितोहारोनाऽयं
भुजंगमनायकःकुवलयदलश्रेणीकंठेनसागरलद्युतिः॥म
लयजरजोनेदंभस्मप्रियारहितेमयिप्रहरनहरभ्रांत्याऽनंगक्रु
धाकिमुधावसि॥२५॥पाणौमाकुरुचूतसायकममुंमाचाप
मारोपयक्रीडानिर्जितविश्वमूर्छितजनाऽऽघातेनकिंपौरुषं॥
तस्याएवमृगीदृशोमनसिजप्रेंखत्कटाक्षाऽनलश्रेणीजर्जरि
तंमनागपिमनोनाऽद्याऽपिसंधुक्षते॥२६॥पादांऽगुष्ठेनभूमिंकि
सलयरुचिनासाऽपदेशांलिखंतीभूयोभूयःक्षिपंतीमपिसित
शबलेलोचनेलोलतारे॥वक्त्रंह्रीनम्रमीशत्स्फुरदधरपुटंवा
क्यगर्भंदधानायन्मांनोवाचकिंचित्स्थितमपिपुरतोमानसं
तद्दुनोति॥२७॥व्रीडायोगान्नतमुखतयासन्निधानेगुरूणां
बद्धोत्कंपस्तनकलशयोर्मन्युमंतर्निगृह्य॥तिष्ठेत्युक्तंकिमिव
नतयायात्समुत्सृज्यबाष्पंमय्यासक्तश्चकितहरिणीहारिने
त्रत्रिभागः॥२८॥निद्राऽर्धमीलितदृशोमदमंथराणिनाऽप्य
र्थवंतिनचनामनिरर्थकानि॥अद्याऽपिमेमृगदृशोमधुराणि
तस्यान्यस्ताक्षराणिहृदयेकिमपिध्वनंति॥२९॥मुखंतस्याः
स्मितस्मेरंकिंचिदंचलसंवृतं॥मदाऽलोकनलोलाक्षंस्मृतो
मन्येसुधांसुधा॥३०॥इदमशिशिरैरंतस्तापाद्विवर्णमणीकृ
निशि· तंनिशिभुजन्यस्ताऽपांगप्रवार्तिभिरश्रुभिः॥अनतिलुलितज्या
घातांऽकंमुहुर्मणिबंधनात्कनकवलयंस्रस्तंस्रस्तंपुनःप्रतिसार्यते
॥३१॥तपतितनुगात्रिमदनस्त्वामनिशंमांपुनर्दहत्येव॥ग्ल
पयतियथाशशांकंनतथाहिकुमुद्वतींदिवसः॥३२॥त्वंदूरम

पिगच्छंतीहृदयंनजहासिमे॥दिनाऽवसानेछायेवपुरोमूलं
वनस्पतेः॥ ३३॥ सखिपतिविरहहुताशः किमितिप्रशमंनया
तिनयनोदैः॥ शृणुकारणंनितंविनिर्मुंचसिनयनोदकंतुस॰
स्नेहं॥३४॥ काचिद्विलोलनयनारमणेस्वकीयेदूरंगतेसतिम
नोभववाणखिन्ना॥ त्यक्तुंशरीरमचिरान्मलयाद्रिवायुंसौर॰
भ्यघ्राणलिनमहोपिवतिस्मचित्रं॥३५॥ उपनिषदःपरिपीता
गीताःपिचहंतमतिपथंनीता॥ तदपिनहाविधुवदनामानस
सदनाद्धृहियाति॥ ३६॥ गुरुमध्येहरिणाक्षीमार्तिकशकलै
र्निहंतुकामंमाम्॥ रदयंत्रितरसनाग्रंतरलितनयनंनिवारयां
चक्रे॥३७॥ अंगानिमेकांतवियोगवन्हिःसंरक्षतुप्रियतमोह
द्विवर्ततेऽसौ॥ इत्याशयाशशिमुखीगलदश्रुवारि-धाराभि
रुष्णमभिषिंचतिहृत्प्रदेशं॥३८॥ वसंतकुसुमाकरंनदतुपू
र्णचंद्रोदयंनिदानमविचारयन्दिशतुहंतमारोभिषक्॥ त्व
दीयविरहज्वरोमयिविजृंभतेसांप्रतंतवाऽधररसायनंतरु
णिदेहिदिव्यौषधं॥३९॥ वियोगवन्हिकुंडेऽस्मिन्हृदयेते
वियोगिनि॥प्रियसंगसुखायैवमुक्ताहारस्तपस्यति॥४०॥अ
हमिहस्थितवत्यपितावकीत्वमपितत्रवसन्नपिमामकः॥
नतनुसंगमएवस्तुसंगमो हृदयसंगमएवसुसंगमः॥४१॥
इहनगरेप्रतिरथ्यंभुजंगसंबाधरुद्धसंचारे॥ शृणुसखिसाध
नमेकंनकुलप्रतिपालनंश्रेयः॥४२॥ स्वच्छंसज्जनचित्तवल्ल
घुतरंदीनाऽर्तिवच्छीतलंपुत्राऽलिंगनवत्तथैवमधुरंबाल
स्यसंजल्पवत्॥ एलोशीरलवंगचंदनलसत्कर्पूरकस्तूरि
कापाटल्युत्पलकेतकीसुरभितंपानीयमानीयतां॥४३॥ व
क्त्रांभोजेसरस्वत्यभिवसतिसदाशोणएवाऽधरस्तेपाणिःका
कुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणस्तेसमुद्रः॥ वाहिन्यःपा॰
र्श्वमेताःकथमपिभवतोनैवमुंचत्यभीक्ष्णंस्वच्छेंतर्मान
सेऽस्मिन्कथयनरपतेतेंऽबुपानाऽभिलाषः॥ ४४॥ प्राणेशावि

ज्ञप्तिरियं मदीया तत्रैव नेया दिवसाः कियंतः ॥ संप्रत्ययो
ग्यास्थितिरेषदेशः कराहिमांशोरपितापयंति ॥४५॥ कराहि
मांशोरपितापयंतीत्येतत्प्रिये चेतसि नैव शंक्यं ॥ वियोगतप्तं
त्हृदयं मदीयं तत्र स्थितां त्वां समुपैति तापं ॥४६॥ कांतां दृष्ट्वा च
रणयुगलक्षालनाय प्रवृत्तामस्मिन् राष्ट्रे श्रियमिति वचः पाप
ठीति प्रयत्नात् ॥ देवस्य त्वेति च पुनरसौ वीटिकायाः प्रदाने जा
माता ते जडमतिरयं छांदसः किं करोमि ॥४७॥ क्व प्रस्थिताः सि
करभोरु घने निशीथे प्राणाःधिपो वसति यत्र निजः प्रियो मे ॥ ए
काकिनी वद कथं न बिभेषि बाले नन्वस्ति पुंखितशरो मदनः स
हायः ॥४८॥ निःशेषच्युतचंदनं स्तनतटं निर्मृष्टरागोऽधरो नेत्रे
दूरमनंजने पुलकिता तन्वी तवेयं तनुः ॥ मिथ्यावादिनि दूति
बांधवजनस्याः ज्ञातपीडाः गमा वापीं स्नातुमितो गताःसि
न पुनस्तस्याः धमस्याःतिकं ॥४९॥ कथमपि सखि क्रीडाको
पाद्व्रजेति मयोदिते कठिनत्हृदयस्त्यक्त्वा शय्यां बलाद्गत एव
सः ॥ इति सरभसध्वस्तप्रेम्णि व्यपेतघृणे स्पृहां पुनरपि हत
व्रीडं चेतः करोति करोमि किं ॥५०॥ पुराभूदस्माकं प्रथमम
विभिन्ना तनुरियं ततोनु त्वं प्रेयानहमपि हताशा प्रियतमा ॥
इदानीं नाथस्त्वं वयमपि कलत्रं किमपरं मयाःप्तं प्राणानां कु
लिशकठिनानां फलमिदं ॥५१॥ स्मर्तव्याः हं त्वया कांत न
स्मरिष्याम्यहं तव ॥ स्मरणे चेतसो धर्मस्तच्चेतो भवता हृतं ॥
५२॥ स्मर्तव्या वयमिंदुसुंदरमुखि प्रस्तावतोःपि प्रियाः सत्यं
नाथ यदि प्रदास्यति विधिर्जातिस्मरत्वं मम ॥ एकस्मिन्नपि ज
न्मनि प्रियतमे जातिस्मरत्वं कथं प्राणाः प्रोथसमं त्वयैव चलि
ताः काःद्याःपि जन्मैकता ॥५३॥ गच्छ गच्छसि चेत्कांत पं
थानः संतु ते शिवाः ॥ ममाःपि जन्म तत्रैव भूयाद्यत्र गतो भवा
न् ॥५४॥ सहिष्ये विरहं नाथ देह्यदृश्यांजनं मम ॥ यदक्तने
त्रं कंदर्पः प्रहर्तुं मां न शक्ष्यति ॥५५॥ अनलस्तंभनविद्यासु भ

गभवान्नियतमेवजानाति॥मन्मथशराग्नितप्तेत्हृदिमेकथमन्यथावससि॥५६॥मुग्धाकांतस्ययाञ्चोक्तिश्रवणादेवमूर्छिता॥बुध्वावक्तिप्रियंदृष्ट्वाकिंचिरेणाऽऽगतोभवान्॥५७॥आस्तांतावद्वचनरचनाभाजनत्वंविदूरेदूरेचास्तांतववतनुपरीरंभसंभावनापि॥भूयोभूयःप्रणतिभिरहंकिंतुयाचेविधेयास्मारंस्मारंस्वजनगणनेकापिरेखाममापि॥५८॥माकंदाक्षिपमामरंदनिकरंमूकोभवत्वंशुकस्फारंकोकिलकोमलंकलरवंभ्रातःक्षणंसंहर॥सौगंध्यंवहगंधवाहनमनाक्सर्वैःक्षणंक्षम्यतांजानीध्वंरघुनायकस्ययदयंकालःकरालोमहान्॥५९॥वनीमुनीनांतटिनीतरूणांदरीगिरीणांचगवेषितेव॥अतःपरंलक्ष्मणपश्यलाक्षींप्राणावहिर्भूयगवेषयंतु॥६०॥पुनरपिमिलनंयदाकदाचित्प्रियतमयाकृपयाभवेद्विधातुः॥हरिरिवकरवैंत्हृदिप्रतिष्ठांइहरमणींतनवेतनोरभिन्नां॥६१॥वारंवारंतिरयतिदृशोरुद्गमंवाष्पपूरस्तत्संकल्पोपहितजडिमस्तंभमभ्येतिगात्रं॥सद्यःस्विद्यन्नयमविरतोत्कंपलोलांगुलीकःपाणिर्लेखाविधिषुनितरांवर्ततेकिंकरोमि॥६२॥श्वासाएवमृगीदृशोनगणिताःकेनामझंझानिलास्तीर्णावाष्पपरंपरैवसरितांवृंदेमुकःसंभ्रमः॥सोढाकातरदृष्टिरेवकियतीवज्राभिघातव्यथाप्रेमैवाद्यमुपेक्षितायदितत्प्राणेषुकोनुग्रहः॥६३॥साबालावयमप्रगल्भवचसःसास्त्रीवयंकातराःसापीनोन्नतिमत्पयोधरयुगंधत्तेसखेदावयं॥साक्रांताजघनस्थलेनगुरुणागंतुंनशक्तावयंदोषैरन्यजनाश्रयैरपटवोजातास्मइत्यद्भुतं॥६४॥प्रेमार्द्राःप्रणयस्पृशःपरिचयादुद्गाढरागोदयास्तास्तामुग्धदृशोनिसर्गमधुराश्चेष्टाभवेयुर्मयि॥यास्त्वंतःकरणस्यबाह्यकरणव्यापाररोधीक्षणादाशंसापरिकल्पितास्वपिभवत्यानंदसांद्रोलयः॥६५॥स्निग्धमालपसुरूक्षमेववात्वत्कथैवसखिमेरसायनं॥शीतलंस

लिलक्षुण्णमेववापावकंहिशमयेदसंशयं॥६६॥धन्यस्तन्वि
सस्पृहपांडिमवरश्मश्रुंवत्कपोलस्थलंधन्यंतन्वितदेवकार्श्यमपि
हयस्त्वामेकमालिंगति॥धन्योयंविरहानलस्तवमनोयस्या॰
नुवृत्तेःपदंदूरेहंततयातुयातकितयामादृक्जनःसीदति॥६७
चलापांगांदृष्टिंस्पृशसिबहुशोवेपथुमतींरहस्याख्यायीवः
स्वनसिमृदुकर्णांतिकचरः॥करौव्याधुन्वंत्याःपिबसिरतिस
र्वस्वमधरंवयंतत्वान्वेषान्मधुकरहतास्त्वंखलुकृती॥६८॥
यदिंदोर्लक्ष्मीस्तेवदनकमलेवासमकरोत्तमःसोमस्थेमातव
तरुणिधम्मिल्लमभजत्॥अनुप्राप्ताहारावलिमपिचतारावलि
रुचिःशरण्यायाःकस्तेममशरणदानेपरिभवः॥६९॥कटा
क्षेणापीषत्क्षणमपिनिरीक्षेतयदिसातदानंदःसांद्रःस्फुरति
निहताशेषविषयः॥सरोमांचोदंचत्कुचकलशनिर्भिन्नवस
नःपरीरंभारंभःकइवभवितांभोरुहदृशः॥७०॥भवत्याविश्ले
गुरुहृदयखेदेनतनुतांतनुर्नित्यंधत्तेसदृशमितिमत्तेभगम
ने॥इदंतावच्चित्रंकमलमुखिसर्वैरवयवैःसुरूपात्वंलोकेनि॰
यतमसुरूपाभवसिनः॥७१॥पुरस्ताद्गच्छंतीसहसहचरी॰
भिःप्रियतमामयालापंकृत्वासचकितपरावृत्तवदना॥किम
ग्रेव्यासंगादहमहहयामीतिविनयप्रणालीमालीनांयदक॰
ततदंतर्व्यथयति॥७२॥स्कमध्येवाक्भंगैर्वचनविधिमंगीकु
रुनवास्मितज्योत्स्नाकांतंकुरुवदनमेतन्मयिनवा॥त्रिलोकी
मूर्द्धन्यायदिविविधपुण्याधिकतयामयादृष्टासित्वंतदिह
सफलंमेऽजनिजनुः॥७३॥त्वदीयमुखपंकजंयदिविधोरलं
वानेमातवाधरसुधायदाभवतिकिंसुधानोमुधा॥त्वदंगपरिरं
भणंभणकृतंसुधागाहनैस्त्वदीयदृगनुग्रहस्तदपिधिग्वि
धेंद्रपदं॥७४॥दृगंतव्यापारप्रबलनिगडेनस्फुरदुरस्तटी॰
कारागारेनवसमुचितंबंधनमिदं॥अरेचेतस्त्यक्त्वायदिहज
नमाजन्मसुलभंक्षणप्राप्तामेतामधरमधुलोभेनभजसे॥७५

स्खलदंशुकमव्यवस्थतारंस्मितकांतिस्नपिनाधरप्रवालं॥ अस्समात्यनकारमात्यशोभंहरिणांकंहरिणीदृशस्स्मरामः॥७६॥ यदिप्राणाएवप्रणयपरिणाहःकथमयंविभिन्नातेभ्यश्चेत्कथमियमभेदव्यवसितिः॥ नभिन्नानाभिन्नायदिभवसिकिंनामतदसित्वमेकासित्वंमेकुवलयदलश्रेणिनयने॥७६॥ त्वामालिंग्यप्रणयकुपितांधातुरागैःशिलायामात्मानंतेचरणपतितं — यावदिच्छामिकर्त्तुं॥ अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यतेमेक्रूरस्तस्मिन्नपिनसहतेसंगमंनौकृतांतः७७ समुत्कीर्णेतन्व्यानिशितनयनांतेनमृदितेस्तनद्वंद्वस्पंदेस्मितलवसुधाभिःप्लुतिमति॥ मदंतःकेदारेमदनकृषिकारेणजनिताचिरादाशावल्लीकिमितिनफलंहंतलभते॥७८॥ विपत्तिंध्रुवंध्रुवंविगलितजलंनेत्रयुगलंसशोकंभूलोकंभुवनवलयंखेदनिलयं॥ अनंगंनीरंगंविघटितवनंकोशभवनंविधातुंकिंधातस्तवत्हृदिनलज्जाप्रभवति॥७९॥ धन्यःसकोपिसमयःसमतीतएवयस्मिन्विलोलनयनांचलमायताक्षी॥ अंतःप्रमोदपरिफुल्लकपोलपालिमंदस्मितंनमितमौलिजगाद्किंचित्॥८०॥ यदेकःकासारंरचयतितथाकूपमथवातदाकांक्षांदेवोवितरतितरांश्रीपतिरपि॥ मयातुत्वद्धेतोःकमलमुखिसांद्राश्रुसलिलैःकृताःपारावारास्तदपिगणपातेनत्हृदये॥८१॥ संगमविरहवितर्केवरमिहविरहोनसंगमस्तस्याः॥ संगेसैवतथैकात्रिभुवनमपितन्मयंविरहे॥८२॥ हारोनारोपितःकंठेमयाविश्लेषभीरुणा॥ इदानीमंतरेजातागिरयःसरितोद्रुमाः॥८३॥ दिव्यचक्षुरहंजातःसरागेणापिचक्षुषा॥ इहस्थोयेनपश्यामिदेशांतरगतांप्रियां॥८४॥ हत्वालोचनविशिखैर्गत्वाकतिपयपदानिचमृगाक्षी॥ जीवतिनवायुवाकिंशिवशिवभूयोविलोकयति॥८५॥ किमकारिमंदमतिनारतिपतिनाकामतंत्रनिपुणेन॥ सूतासि

हरिणनयनेहंतत्हृदिस्नेहतंतुनाननतनौ।।८६।।समानकुल
शीलयोःसुवयसोःपरायत्तयोःपरस्परविलोकनाकुलितचेत
सोःप्रेयसोः।।ननुत्वमनुविंदतोर्बहुविधिंव्यथांविंदतोरशक्य
विनिवेदनाविरहवेदनावर्धते।।८७।।त्वयिकुसुमशरत्वंशी
तरश्मित्वमिंदौद्वयमिदमयथार्थंदृश्यतेमद्विधेषु।।विसृजति
हिमगर्भैरग्निमिंदुर्मयूखैस्त्वमपिकुसुमबाणान्वज्रसारीक
रोषि।।८८।।असारंसंसारंपरिमुषितरत्नंत्रिभुवनंनिरालोकं
लोकंमरणशरणंबांधवजनं।।अदर्पंकंदर्पंजननयननिर्माण
मफलंजगज्जीर्णारण्यंकथमसिविधातुंव्यवसितः।।८९।।त
वविरहेविधुवदनामदनाधिककानसीदंति।।सीदसिविरहेय
स्याःसाधुतपस्याफलंतस्याः।।९०।।अकस्मादागारेरहसिमि
लितापिप्रियतमासमाश्लिष्टानागंतुकपिशुनभीतेनमनसा।।
अथैषामामज्ञंनिपुणमथसावज्ञमथवानजानेकिंमेनेप्रतिप
दमतस्तन्म्यतिमनः।।९१।।तदुक्तंपद्ममण्यारसवदितिसम
स्वाद्यतेयत्सजग्धौसावीटीयासलीलंत्वदयदर्पितयादंतद
ष्टावशिष्टा।।सश्रीगंधानुलेपोयुवतिदृढकुचालिंगनासादि
तोयःसानिद्रायारतांतेसुखयतिसुमुखीबाहुयंत्रांतराले।।
।।९२।।अद्यापिसुंदरि तवाननचंद्रबिंबवंदीकृतांबुजयुग
परिचुंब्यचेतः।।त्वत्संगमोद्भवसुखंतनुतेतथापिवैरंकरोति
करुणाविकलोविवेकः।।९३।।धन्यासागृहदेहलीस्पृशति
यात्वत्पादपद्मप्रभोजातासासरसीरसाद्विशतिसायस्यां
विहारेच्छया।।वंद्यःकोपिसएववयःखलुतयानेत्रेणसंभाव्य
तेधिग्धिग्वेधसमेषुमोयद नयनन्नैकंकथंचित्कथं।।९४।।
कृष्णातेकचसंहतिरंबुजनयनेतवाधरःशोणः।।त्वंस्मरतरं
गिणीकथमभितस्तापेननतेवियोगःस्यात्।।९५।।इतिविरहिजनो
क्तिः।।

अथानभिज्ञः

उक्तंवक्त्रनरंवचस्तनतटाभोगोमयादर्शितोदोर्मूलस्यचचाल

नाविरचितामुक्ताःकटाक्षच्छटाः॥एतेनापिनचेदपाङ्गनमनास्तत्किंनविज्ञोभवान्किंवाकामकलासुनास्मिकुशलाजीवीनवामन्मथः॥१॥ श्रुत्वाकूतस्त्वस्यांसततमितरस्यांप्रणयवान्प्रियस्तेमाश्लेषानभजतिविशेषात्परिभवं॥परंतुप्रेयांसंसमुपहसतिप्राकृतजनोप्यतोहेतोश्चेतोदलतिदलदिंदीवरदृशः॥२॥ शून्येसद्मनियोजितावहुविधानंगीवनंनिजेनपुष्पव्याजमुपेत्यनिर्गतमसःस्फारीकृताहृदयः॥ तांबूलाहरणच्छलेनविहितौव्यक्तौचवक्षोरुहावेतेनापिन चेतिदूतिक्रियतायत्नेनसज्ञास्यति॥३॥ इतिअनभिज्ञः॥ ७॥॥

अथउपालंभः

तथाभूदस्माकंप्रथममविभक्तातनुरियंततोनुत्वंप्रेयानहमपिहताशाप्रियतमा॥ इदानींनाथस्त्वंवयमपिकलत्रंकिमपरंमयाप्तं प्राणानांकुलिशकठिनानांफलमिदं॥१॥ कोपोयत्रभ्रुकुटिरचनानिग्रहोयत्रमौनंयत्रान्योन्यंस्मितमनुनयोदृष्टिपातःप्रसादः॥तस्यप्रेम्ण स्तदिदमधुनावैशसंपश्यजातंत्वंपादांतेलुठसिनचमेमन्युमोक्षःखलायाः॥२॥ चतुरिमकलाकंठच्छेदोमनोभववंचनंदृषदिमधुनोलिप्तालोकेविडंबनमात्मनः॥उपरिपरितःसंकल्पानांशिलाशतपातनंसहचरिपरीतापस्थानंजडेत्हृदयार्पणं॥३॥गतेप्रेमावंधेप्रणयवहुमानेविगलितेनिवृत्तेसद्भावेजनइवजनेगच्छतिपुरः॥ तदुत्प्रेक्ष्योत्प्रेक्ष्यप्रियसखिगतांस्तांश्चदिवसान्नजानेकोहेतुर्दलतिशतधायन्नहृदयं॥४॥ अहसंभाविअमयोग्गोमुहअत्तुएजेवररणिण्णिगूढो॥एण्हिंहहिअएअपोरवाआइतोअस्स॥५॥संभावणेहमईएरत्तेरज्जेजिज्जज्जइतिजत्तमिणं॥अस्महिअसउणहिअअंजंदिज्जईतंजणीहसई॥६॥ अच्छच्छत्ताजणवाऊंहिअअंविअअत्तणोत्तुहपमाणं॥ नहतंसिमंदणेहोअहणुउवालंभजोगोसि॥७॥ इतिउपालंभः॥ ७ ॥

दृष्टंस्पृष्टंस्मृतमपिनृणांल्हाद्जननंनररत्नंस्त्रीभ्योन्यत्क्वा
चिद्पिकृतंलोकपतिना॥तदर्थंधर्मार्थौविभववरसौख्यानि
चततोगृहेलक्ष्म्योमान्याःसततम बलामानविभवैः॥१०॥
केषामप्येते॥ अमृतस्येवकुंडानिरत्नानामिवराशयः॥रतेरि
वनिधानानिनिर्मिताःकेनयोषितः॥११॥ प्राणानांचप्रियाप्रा
श्चमूढाःसादृश्यकारिणः॥प्रियाकंठगतारत्वैप्राणामरणहे
तवः॥१२॥ अकृत्रिमप्रेमरसाविलासालसगामिनी॥असारे
दग्धसंसारेसारंसारंगलोचना॥१३॥ केषामप्येते॥इतिश्रीबृ
हच्छार्ङ्गधरविरचितायांपद्धत्यांसामान्यशृंगारेस्त्रीप्रशंसाप॰

अथस्त्रीपुरुषजातिभेदः

देवीमप्सरसोयक्षकांताराक्षसकामिनी॥ कृत्यामितिजगुर्ना
रींयुक्तांतैरेवलक्षणैः॥१॥चंद्रमुखीमृगनयनामदनधनुर्भ्रूः
शशांकशिशिरायाः॥समशिखरसदृशदशनासुखपरिलीनम
धुपालिः॥२॥पुंस्कोकिलमधुरोक्तिर्बिंबोष्ठीकंबुकंठकृतशो
भा॥कोमलमृणालबाहूरक्तोत्पलसदृशकरचरणा॥३॥श्री
फलसमवक्षोजामध्येक्षीणागभीरनाभिश्च॥त्रिभुवनजये
खाद्वयस्यास्त्रिवलीलताभाति॥४॥पृथुतरनितंबबिंबाह
रिणीस्मरसममंदिरोद्देशा॥कामतरोरंकुरइववयस्यारोमाव
लीविभास्युदरे ॥५॥रंभोरुहंसगतिःकनकरुचिर्नीलनीरजा
भापाः॥सुरभक्तापतिभक्तालज्जालुःसुरभिरतनीरा॥६॥सि
तवसनकुसुमनिरतालघ्वाहारातिकृष्णघनकबरी॥सुचि
रकलितपतिरमणादेवीसापद्मिनीश्यामा॥७॥गीतनृत्यप्रि
याकेकावाणीचित्रांबरैषिणी॥सुगंधवक्त्रेभगतिःसुंदरीम
धुरप्रिया॥८॥मधुगंधरतद्रावाकोष्णांगीकठिनस्तनी॥गौरा
श्यामशरीरावासुविशालकटीतटा॥९॥अजालघुःस्मरा
वासाबाह्यसंभोगरागिणी॥नारीयाचित्रिणीचिन्हासाप्रा
जातिरुच्यते॥१०॥स्थूलांगीचातितन्वीगौरीश्यामापिदीर्घकर

चरणा॥ वडवापृथुमदनगृहारक्तांबररागिणीकुटिला॥११
॥विपुलकुचापृथुजघनासौष्णांगीक्षारगंधिरक्तसलिला॥
याशंखिनीसमानाहंसरवायक्षिणीसास्यात्॥१२॥दीर्घास्य
दंतनासास्थूलोष्ठीस्थूलहस्तचरणाच॥ कपिलकचागतल
ज्जावारणकुंभोभवक्षोजा॥१३॥ करिमद्गंधरतजलारोमश
जंघाकषायकटुरसना॥स्थूलपृथुःस्मरगेहाश्रीतोष्णांगीच
खरवचना॥१४॥अरुणांगीश्यामावापतिवर्गद्वेषिणीकुटि
लचित्ता॥याहस्तिनीसमानासाज्ञेयाराक्षसीनारी॥१५॥कल
हप्रियातिदीर्घाखर्वावाश्यामपीतहरितावा॥ लंबोष्ठीलघु
नासालंबशिथिलस्तनविभागाच॥१६॥शुष्ककटिःपृथुज
ठराविगंधिकायाचकरभिकायोनिः॥पद्मस्मराशिवोक्तिःसा॰
ज्ञेयाकुर्मठाकृत्या॥१७॥अन्योन्यलक्षणैर्युक्तांनारींसंकीर्णकां
विदुः॥यानिजैरेवसंयुक्ताचिन्हैस्तांकेवलांविदुः॥१८॥इतिस्त्रीजा॰

अथपुरुषजातिभेदः

देवगंधर्वयक्षाणांयेराक्षसपिशाचयोः॥ लक्षणैःसंयुतास्ते
स्युर्नरास्तैरेवनामभिः॥१॥दातासत्यवचःशूरोज्ञानीसत्वर
तःशुचिः॥सुवर्णकांतिःश्यामोवामहाकायोघनध्वनिः॥२
॥आजानुलंबितौबाहूकंबुग्रीवोवलीचतुर्दंष्ट्रः॥भाग्यनि
धिःपृथुवक्षालघुमधुराक्षरोचपद्मास्यः॥३॥मलयजगंधश
रीरःकामक्रोधंनिषेवतेस्थाने॥मृगलिंगसुरपुरुषोभक्तोवि
प्रेषुविज्ञेयः॥४॥ सत्वरजोभ्यांयुक्तःश्यामोवाचंपकाभोवा
॥रूपस्वीशुचिवेशोमधुरामूरुचिर्वदान्यश्च॥५॥संगीतर
तःप्रमदासुसक्तोदुःखासहोदुंदुभिधीरघोषः॥मध्यप्रमा॰
णोंबुजगंधिकायोगंधर्वजातिःकथितोजलिंगः॥६॥पृथुज
ठरललाटःपीनकंठोवलीयान्विपुलनिविडकायोरोमशः
कुड्मलाक्षः॥अचलमतिरमर्षीसिंहघोषोधनाढ्योनवघृत
समगंधःकांतरक्तांतनेत्रः॥७॥दीनेषुदाताम्लरसालभोजी

रजस्तमोभ्यांजनितानुषंगः॥ यत्किंचिदाश्रयामतनुमदिष्टःसप
क्षजातिर्वृषलिंगलिंगः॥८॥ कृष्णोरुणोवाविकृतास्यदंष्ट्रोप्र
चंडकायोबलवान्पलाशी॥ उग्रःस्वरःकोपनिधिःसुरापः
स्तमोमयोवारणदानगंधिः॥९॥ विडालाक्षःसुरान्द्वेष्टिनित्य
मूर्द्धशिरोरुहः॥ रक्षोजातिर्नरोज्ञेयोहयलिंगाभमेहनः॥१०॥
आसवरतिर्बहुभुक्कद्रूक्षाशीचकर्मठःपिसुनः॥ स्थूलःकृ
शोनिदीर्घःखर्वोवाकृष्णपीतोवा॥११॥ अतितामसोजगंधिः
काकरवोह्रस्वकूर्चकःपापः॥ भीरुःकुधीःपिशाचोरासभलिंग
स्तुविज्ञेयः॥१२॥ परस्परगुणान्कांश्चिद्योबिभर्तिसमिश्रकः
॥ यःस्वैरेवगुणैर्युक्तःसस्वरूपोनिगद्यते॥१३॥ इतिश्रीवृहच्छा
र्ङ्गधरविचितायांपद्धत्यांस्त्रीपुरुषजातिविवृत्तिपरिच्छेदः॥

अथस्त्रीपुरुषसंयोगविवृत्तिः

हरिणीच्छागीवडवाकरिणीकरभीतिपंचधानार्यः॥ मृगकु
क्कुटवृषतुरगरासभसंज्ञानराःपंच॥१॥ ऋतुलोकपालपंक्ति
र्द्वादशभुवनांगुलोन्मितैर्गुह्यैः॥ अनुपूर्वतस्तउक्ताहरिणी
हरिणादयोज्ञेयाः॥२॥ हरिणीमृगयोरजाजयोस्तुरगीवृषयो
रिभाश्वयोश्च॥ करभीखरयोर्भवेत्तुयोगःसममेवरतंबुधा
स्तदाहुः॥३॥ हरिणीच्छागयोःछागीवृषयोर्वडवाश्वयोः॥
करिणीखरयोरुच्चंरतमाहुर्मनीषिणः॥४॥ छागीहरिणंवड
वाछागंकरिणीवृषभंतुरंगकरभी॥ यदिलभतेकथमपिरत
समयोनीचरतंकिलतदिदंप्राहुः॥५॥ मृगीवृषभजावाहंव
डवारासभंयदि॥ लभतेसुरतस्यानेतदास्युच्चरतंविदुः॥६
हयावृषभजाच्छागंकरभीवृषभंयदि॥ लभतेसुरतेप्राहुरति
नीचंरतंबुधाः॥७॥ हरिणीहययोछागलाखरयोरत्युच्चरत
मिहगदितं॥ हरिणोहरिणींछागलःकरभीमतिनीचरतंयदि
संयुक्तः॥८॥ मृगीखरंयदायाताकरभीचमृगंयदि॥ तदारत
समंप्राहुरसमंचबुधाजगुः॥९॥ पंचविंशतिभेदेनप्रोक्तमेतद

तंबुधैः॥तत्रोच्चैवसमेप्रीतिर्योषितांनान्यतःसुखं॥१०॥ द्वींचतुर्थयामेदिनरात्र्योश्चरोगणांप्रथमे॥यक्षींतृतीययामेद्वितीयकेराक्षसींरमयेत्॥११॥निखिलेष्वपिवाकृत्यांनोवाकृत्यासदाभवेद्रम्या॥करभीचिन्हाकृत्यारवरःपिशाचस्तयोर्युक्तं॥१२॥इति श्रीवृहच्छार्ङ्गधरविरचितायांपद्धत्यांस्त्रीपुरुषसंयोगविवृत्तिप॰

अथस्त्रीसेवाप्रकारः

सेवनंयोषितांकुर्याद्बुधोबुध्वायथाक्रमं॥बालायोग्याभिरूढानामृतुरागविभावनात्॥१॥ बालेतिगीयतेनारीयावद्वर्षाणिषोडश॥ ततःपरंचतरुणीयावत्त्रिंशतिर्भवेत्॥२॥तदूर्ध्वंप्रतिरूढास्याद्यावत्पंचाशतंभवेत्॥ वृद्धातत्परतोज्ञेयासुरतोत्सववर्जिता॥३॥ निदाघशरदोर्बालापथ्याविषयिणोभवेत्॥हेमंतशिशिरेयोग्याप्रौढावर्षावसंतयोः॥४॥ नित्यंवासेव्यमानापिबालावर्द्धयतेबलं॥क्षयंनयत्ययोग्यस्त्रीप्रौढाजनयतेजरां॥५॥ महेश्वरस्तुविशेषमाह॥ अलोमशाःसतिलकानित्यंसेव्याहियोनयः॥अलोमशंतुकस्तायांसुखंसंजायतेतिलः॥६॥ आसनेलालयेद्बालांतरुणींशयनेतथा॥उत्थितेप्यतिरूढांचलालनंत्रिविधंस्मृतं॥७॥नारभेतरतंतावद्यावन्नोत्कंठिताप्रिया॥अन्यथानसुखोत्पत्तिरितिकामानुशासनात्॥८॥एतेपञ्चस्त्रियः॥पंकजासनलयेनपद्मिनींनागरेणरमयेतचित्रिणीं॥वेणुदारितपदेनशंखिनींस्कंधपादयुगलेनहस्तिनीं॥९॥व्रजतिरतिसुखार्थेचित्रिणीमग्रयामेभजतिदिनरजन्योर्हस्तिनीचद्वितीये॥रमयतिचतृतीयेशंखिनीमार्द्रभावंरमयतिरमणीयांपद्मिनींतुर्ययामे॥१०॥एतौकोकात्॥ इतिश्रीवृहच्छार्ङ्गधरविरचितायांपद्धत्यांस्त्रीसेवापरिच्छेदः॥११॥ छ ॥ छ ॥ छ॥

अथसंकेतास्थानभावहावविवृत्तिः

तेषुपूर्वंसंकेतः॥आद्येयामेतुशंखस्यान्महाशंखोद्वितीयके

॥पक्षस्तृतीयकेयामेमहापक्षश्चतुर्थके॥१॥ रामस्तुपंचमेख्यातोविरामश्चेतिषष्ठमः॥प्रवरःसप्तमेज्ञेयःप्रत्यूषश्चाष्टमेस्मृतः॥२॥ दाडिमंतुद्विजेज्ञेयंपनसंक्षत्रियेस्मृतं॥कदलीफलकंवैश्येतथाम्रंशूद्रकेस्मृतं॥३॥ राजपुत्रोद्वितीयेंदुःसंपूर्णेंदुश्चभूपतौ॥मध्यान्हेशून्यपक्षंतुबाल्येपक्षंचवृद्धके॥४॥ ब्राह्मण्यांकुंदपुष्पंस्याद्राजपुत्र्यांतुमालती॥मल्लिकावैश्यपुत्र्यांतुशूद्रपुत्र्यांचकैरवं॥५॥ कामुकेभ्रमरःप्रोक्तःकामिन्यांचूतमंजरी॥तथाव्हानेकुशश्चापिप्राकारोवारणेस्मृतः॥६॥ देहार्पणेरक्तसूत्रंजीवोजीवसमर्पणे॥भल्लातकफलंभीताभयोभावेहरीतकी॥७॥ छिन्नवस्त्रंतुविच्छेदेसदशग्रंथिसंगमे॥एकस्नेहेतथाचैवकंद्वयोःस्नेहेतुतद्द्वयं॥८॥ एतेपद्मश्रियः॥इतिसंकेतकप्रणं॥

अथभावाः

शुद्धःशुद्धश्चसंकीर्णस्त्रिधाभावःप्रकीर्त्तितः॥शुद्धोपित्रिविधोमंदस्तीक्ष्णातीक्ष्णतरःस्मृतः॥१॥ ईषत्प्रकटितोमंदस्तीक्ष्णस्तुपुलकादिभिः॥सतुतीक्ष्णरतश्चासशोषितावयवेत्रयः॥२॥ अथशुद्धोद्भटोग्राम्यनर्त्तकस्येवयोभवेत्॥कैतवस्नेहमापन्नोभावःसंकीर्णउच्यते॥३॥ इतिभावः॥ छ॥ छ॥

अथहावाः

हेलाविच्छित्तिविब्बोककिलकिंचितविभ्रमाः॥लीलाविलासोहावश्चविक्षेपोविल्हतंमदः॥१॥ मोट्टायितंकुट्टमितंमौग्ध्यंचतपनंतथा॥ललितंचेत्यमीहावाश्चेष्टाशृंगारभावजाः॥२॥ प्रौढेवयोभिरूढानांनारीणांसुरतोत्सवे॥शृंगारशास्त्रतत्वज्ञैःसाहेलापरिकीर्तिता॥३॥ यथा॥ आसज्यस्वयमेवचुंबनविधिंयाश्रांविनालिंगनंतल्पांतेजघनेनवेपशुमतापर्यार्पिपंजानुनी॥ क्रोधोत्कर्षममर्षयत्यनुनयत्यस्याःस्मरक्रीडया प्रौढेकाभिरतिःप्रियस्यत्हृदयंदेहाहलाकर्षति॥४॥ प्रसाधनानांदयितापराधाद्दीर्घ्ययानादरतःसखीनां॥प्रयत्नतो

धारणमंगनाया विच्छित्तिरेषा कथिता कवीन्द्रैः ॥ ५ ॥ यथा ॥ सखि
प्रेयान्नत्वास्खलितमकरोत्त्वं तु सुश्चितं विधत्स्वालंकारं नहि नहि
बलाद्दर्पयसि चेत् ॥ अपि श्रेयश्चिंसं सततमबलाभिः प्रणयि-
नास्पृहामासीत्त्विप्रतनुमपि विच्छित्तिविषयं ॥ ६ ॥ अभिमत
वस्तूपलब्धावपि गुरुरुगर्वादनादरस्तन्व्याः ॥ स्खलिते प्रियस्य
पञ्जांताडनमित्येष विब्बोकः ॥ ७ ॥ यथा ॥ अनास्थावस्तूनाम
भिमतगुणानामुपलब्धौ पयोगर्वस्तन्व्या रुचिरविहिताडंबर
विधिः ॥ प्रहारः पादाभ्यां यमनमपि कांत्या चरणयोः प्रियायाः
विंबोष्ठस्तदिदमति धन्योनुभवति ॥ ८ ॥ सौख्येषु हसितरु-
दितं त्रासक्रोधश्रमाभिलाषाणां ॥ संकर्षप्रियदर्शनहर्षात्कि-
लकिंचितं ज्ञेयं ॥ ९ ॥ यथा ॥ केलिस्थवाक्यमभयेभयमातनोति
क्रोधं मनाग्भजति तत्क्षणमेव हास्यं ॥ आलंब्य हर्षमबला-
किल——किंचितास्ते ह्यावं विभावयति पुण्यवतोति कस्तां ॥
॥ १० ॥ क्रोधः स्मितं च कुसुमाभरणादियज्ञातहर्षणं च सहसै
व विडंबनं च ॥ आसिप्यकांतवचनेल्पमनं सखीभिर्निष्कारणं
स्थितगतिश्च स विभ्रमः स्यात् ॥ ११ ॥ यथा ॥ आस्ते माद्य भवेसु
प्रेमसखिलतान्यस्तात्त्वया माधवीकांतैतन्मम संप्रयच्छकुसु
मं किं वामुनामेफलं ॥ नान्ये निर्मलया मिको तु कमिदं व्यस्त
त्वयाद्दत्स्व तामिस्पं विभ्रमसंभ्रमो मद्ग— तिप्रेयांसमेणीदृशः
॥ १२ ॥ अप्राप्तवल्लभसमागमनायिकायाः सख्याः पुरोत्र निज
चित्तविनोदबुध्या ॥ आलापवेषगतिहास्यविकत्थनाद्यैः प्राणे
श्वरानुकृतिमाकलयंति लीलां ॥ १३ ॥ यथा ॥ वेणीबंधकपर्दि
नीसिततनुः श्रीखंडपांशूत्करैः केतक्येकदलेंदुभृद्विलसता
व्यालोपवीतिन्यपि ॥ प्राक्पाणिग्रहणाद्विमीवरभसात्सख्याः
पुरोलीलयाकुर्वाणानुकृतीं हरस्य दिशतु श्रेयांसि वः पार्वती ॥
॥ १४ ॥ यो वल्लभायामनसो विकारो गत्यासनस्थानविलोकना
द्यैः ॥ वृथास्मितक्रोधचमत्कृतिश्च विकूजनं चास्यकृतो विलासः ॥ १५

॥यथा॥स्खलितवहलःपादन्यासोविलोकितमन्यतोरुचिर
विषयेवक्त्रांभोजंप्रयातिविकूजनं।स्मितमपिमुहुर्व्यर्थःक्रोधोर
शैवचमत्कृतिर्दयितमगच्छंत्यास्तन्व्याविलासरसोदयः॥१६॥
सवाच्यगद्गदालापःश्रमितापांगवीक्षितं॥प्रेमदाक्षिण्यवृत्ति
श्च — कारुण्याहावउच्यते॥१७॥यथा॥प्राप्तेषुशृंगाररसाश्र
येषुहावेषुकामांकुरचिन्हभूतः॥उत्पद्यतेयंस्मितवीक्षितोत्क
मुन्मीलितंबालतयासहावः॥१८॥विसंस्थुलावेशमयोविका
रोविविधस्त्रियः॥तमामनंतिविक्षेपंमुनयःकपिलादयः॥१९
॥यथा॥धम्मिल्लंबहुमुक्तंतिलकमसकलंन्यस्तवृत्तंचधत्ते
दृष्ट्वावेकत्रकालांजनमुरसिरणत्किंकिणीरत्नकांचीं॥अंसो
त्क्षिप्तार्धहाराक्रमुकफलरसारंजितैकाधरांताकांताविक्षेप
भावादपहरतिमनःस्रस्तरुध्योरुवासाः॥२०॥प्राच्यानांच
पदार्थानांज्ञानेपियद्भाषणं॥नायकेषुमृगाक्षीणांविहृतंत
त्सकीर्तितं॥२१॥यथा॥कंठेकएषतववल्लभनूपुरोयंतत्पाद
भूषणमयंमलयस्तदानीं॥इत्यादिवाच्यमविभाव्यवचोमृ
गाक्ष्याज्ञानेपितद्विहितमुत्ककनांतनोति॥२२॥मधुपानमधु
प्रायस्तरुण्यातिशयोद्भवः॥विकारोयोवरस्त्रीणांतहूदंतिम
दंबुधाः॥२३॥यथा॥आलापस्मितकौमुदीसहचरादृष्टिःप्र
हर्षोल्लताभ्रूनित्याध्वरदीस्मिताचरणयोन्यासःसमेभंगुरः॥
वेषेषुक्षणिकस्पृहामदविधेर्वह्नोनदावाश्रयस्तन्व्यानैकवि
कारविभ्रममदप्रायोमदःस्फूर्जति॥२४॥यदितस्यकथारंभे
सोगभंगविजृंभणं॥कर्णकंडूयनंस्त्रीणांमोट्टायितमुदीरितं
॥२५॥यथा॥यस्यांघ्रिद्वितयंनमंतिविबुधाःसत्वेककःसर्ववि
त्तंमृत्युंजयमामनंतिमुनयःसोद्यापियातिव्रताः॥इत्याकर्ण्य
कथांरहस्यपिययापार्श्वेविवाहात्पुरासत्वांगानिविजृंभितंगिरि
भुवोमोट्टायितंपातुवः॥२६॥केशस्तनादिग्रहणेहर्ष्यादिभ्रमि
तेसुखे॥दुःखाविष्करणंतस्यायत्तत्कुट्टमितंमतं॥२७॥यथा॥

किंकांतनिर्दयतरंभुजकंदलीभ्यांगाढंनिपीडयसिमांनसहि॰
ष्णुरस्मि॥ वामभ्रुवामतिसुखेष्वपिदुःखभाजांधन्यःशृणोति
यदिकुट्टमिताक्षराणि॥२८॥ मुक्ताफलंतरोःकस्येत्यादियत्कृ
त्रिमंवचः॥वल्लभानांपुरःप्रोक्तंमौग्ध्यंतत्कधियोविदुः॥२९॥
यथा॥ केद्रुमास्तेक्वचाग्रामेसंतिकेनप्ररोपिताः॥नाथमद्भूषणे
न्यस्तंयेषांमुक्ताफलंफलं॥३०॥नागच्छतिप्रियतमेप्रहरार्ध॰
मात्रमुद्वेगजंविविधचेष्टितमंगनायाः॥सख्याःपुरस्त्वसतु
नोदनमात्मभाग्यंनिंदादिकंकविवरास्तवनंवदंति॥३१॥
यथा॥ नायातेप्रहरार्धमेवदयितेभक्त्यानितंबेमिथःसंसक्तां
गुलिजालमोटमधुनासख्यःकृतार्थाइति॥ व्याहारःस्वपनं
मुहुःपुनरिदंगौर्याविनाभ्यर्चनंतन्वंग्याःस्तपनंतनोतिकृति
नःप्रेयां समुच्चैस्तरां॥३२॥ भ्रूनेत्रादिकृपाशालीसुकुमारवि
धानतः॥ हस्तपादांगविन्यासस्तन्व्यंग्याललितंविदुः॥३३॥
यथा॥स्कंधार्पितैकमणिकुंडलमुन्नतैकभ्रूवल्लिसाचिविनि
वेशितदृष्टिपातं॥चेतोनकस्यललितेहरतिप्रियायाहासोत्थितं
सकररुद्धमुखेंदुकांतं॥३४॥ इतिहावाः॥अथस्त्रीपुरुषवशी
करणं॥ नाभिहृत्कंठदेशेषुददन्श्वासंशनैःशनैः॥ कामंसं
साधयेत्कामीगायत्रींसप्तधापठेत्॥१॥ अथकामगायत्री
॥ॐ नमोभवायविद्महेपुष्पबाणायधीमहि॥तन्नोकामःप्रचो
दयात्॥ व्याजेनचुंबनादीनामुल्लासंपादयेत्प्रियां॥तेनसाव
शमायातिनतुतस्याःस्वयंपिबेत्॥॥२॥ अंगुष्ठेपदगुल्फजानु
जघनेनाभौचवक्षस्तनेकक्षाकंठकपोलदंतवदनेनेत्रालके॰
मूर्द्धनि॥शुक्लाशुक्लविभागतोमृगदृशामंगेष्वनंगस्थितीरू॰
र्ध्वाधोगमनेनवामपदगाःपक्षद्वयेलक्षयेत्॥३॥केगृण्हति
कृष्वान्ललाटनयनेचुंबतिदंतच्छदंदंतोष्ठेननिपीडयंतितर
साचुंबतिगंडस्थली॥कक्षाकंठनदंलिखंतिनखैर्गृण्हंति
गाढंस्तनौमुष्ट्यावक्षसिताडयंतिदंतेनाभौचपेटांशनैः॥४॥

कुर्वंतिस्मरमंदिरेकरिकरक्रीडांस्त्रियोजानुनीगुल्फांगुष्ठपद्मानिचप्रतिमुहुर्निघ्नंतितैरात्मनः॥ इत्येवंकलयंतियेशशिकलामालिंग्यमज्जंतितेशीतांशूपलपुत्रिकांशशिकरस्पृशामिवप्रेयसीं॥५॥ ज्ञात्वानंगस्थितिंकामीतंस्थानंसंस्पृशेद्रुते॥तेनकांतावशंयातिद्रुतंद्रवतिनिश्चितं॥६॥एकारैकारसुक्ताहरिहरजहराःपंचबाणःस्मरस्यरम्यातालासण्यमीपांहृदयकुचदृशोमूर्ध्निगुह्यक्रमेण॥स्थानेष्वेतेषुभूयोनिजनयनधनुःप्रेरितैस्तैःपतद्भिःस्पंदंतेसुंदरीणांज्वलदनलनिभैर्विद्रवःकामचाराः॥७॥सरसिजमरुणंहृदयेकुचयोश्चूतंदृशोरशोकंच॥शिरसिशिरीषंयोनावुत्पलमेतानिपंचबाणाःस्युः॥८॥रोचनामीनपित्ताभ्यांसव्यहस्तकनिष्ठया॥कृतोविशेषकोयुक्त्यात्रैलोक्यस्यापिमोहनः॥९॥कनकस्यतुपंचांगंकर्पूरंकेतुकीरजः॥आत्मशुक्रेणसंयुक्तंवश्यकृद्भक्षितंस्त्रिया॥१०॥शिलागोरचनापत्रंकुंकुमस्यविशेषकात्॥अंगलेपनतोनारीनरेंद्रस्यप्रियाभवेत्॥११॥चूर्णंदत्तंचवशकृत्चूर्णकीटस्यकाकजंघायाः॥मुनिदलरससिक्तोवाटकणकस्यांगमलमिलितः॥१२॥क्षौमीलिख्यावर्तिगद्दलतालीसतगरकैस्तैलं॥सिद्धार्थस्यगृहीत्वानृकपालेचांजनंविहितं॥१३॥नयनगतंयुवतीनामपिमुनिचेतांसिमोहयति॥यदिसहदेवीमूलंग्रहणेसंगृह्यरोचनापिष्टं॥१४॥तत्कृततिलकानारीगुरुकुलमपिवश्यतांनयति॥सितदूर्वासितबृहतीसितगिरिकर्णीसमूलपुष्पाच॥१५॥तांबूलेनवितीर्णास्त्रीपुरुषंवश्यतांनयति॥निजबीजेनरक्तांतेवामहस्तांगुष्ठंदत्तिवामपादंयः॥१६॥ अथवालिंपतिहृदयंसएवतस्याःपरोदयितः॥वचासौवर्चलकुष्ठंरजन्यौमरिचानिच॥एषांलेपप्रभावेनवशीकरणमुत्तमं॥१७॥कर्पूरंचंदनंकुष्ठंतुलसीसर्जसंभवं॥मुस्ताशिलारसंचैवधत्तूरमगरुस्तथा॥१८॥शेफालीशतपुष्पाचसर्षपास्तगरंगुडः॥तथारुद्रजटाःसर्वमेतदेकत्रकारयेत्॥१९॥अनेनयो

गराजेनभूषितांवरभूषणः॥धूपितांगस्त्रिभुवनंमनुजःक्रियतेवश्यं॥२०॥ इतिवशीकरणं॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀॥

अथद्रावणं

यदिवामधुगुडचिंचासहितंकठिनांगनावरांगेषु॥क्षेपाजध्वजलेपाद्दनौश्रोतःप्रवर्तयति॥१॥ कर्प्पूरमिश्रेणचकंटकारीबीजोद्भवेनैवरसेनलिप्तं॥लिंगंरतेद्रावकरंवधूनांसंजायतेऽस्यंतसुखावहंच॥२॥चूर्णितैष्टंकणोपेतैर्महाराष्ट्रीफलछदैः॥मधुनालिंगलेपेनद्रवोभवतियोषितां॥३॥रक्तकपिलिंगमुड्डुपतिकांचनमधुसूतसहितंवा॥ हयलालामंजिष्ठासितसर्षपजातिकुसुमंवा॥४॥ मधुसैंधवकलरवमिलितंवाजिलिंगलेपेन॥द्रावयतिकामिनीनांरतिसमयेकाममंदिरंनियतं॥५॥ इतिद्रावणं॥ ❀ ॥ ❀ ॥

अथवाजीकरणं

गोक्षूरकंकूरकांशतमूलीवानरिनागबलातिबलानां॥चूर्णमिदंपयसानिशिसेव्यंयस्यगृहेप्रमदाशतमस्ति॥१॥गोक्षुरविदारिकाभवंचूर्णवाशर्करासहितं॥स्वरसेनभावितंवाधात्रीचूर्णसिताज्यमधुलीढं॥२॥लीढ्वानुपीतदुग्धंनतृप्यतिस्त्रीसहस्रेण॥॥३॥पिप्पलीमाषशालीनांयवगोधूमयोस्तथा॥चूर्णभागान्समंकृत्वाघृतेनापूपिकांपचेत्॥४॥ तांभक्षयित्वा पीत्वाचशर्करामधुरंपयः॥ नरश्चटकवत्तिष्ठेन्मैथुनेतरुणीर्दश॥५॥घृतमधुसहदेवीन्वितसरोजकिंजल्कनाभेर्वा॥रममाणस्यनतृप्यतिमनःशतेनापितरुणीनां॥६॥एतेयोगरत्नावल्यः॥इतिवाजीकरणं

अथबीजस्तंभः

भृंगरसःकन्याभ्यांविष्णुक्रांतासराजिकेमिलिते॥मुखगतगुटिकाविधिनाबीजस्तंभंरतेकुरुते॥१॥वानरंचपलंध्यायेद्वृक्षशाखावलंबिनं॥सुरतेतेनबीजस्यस्तंभोभवतिनिश्चितं॥२॥कपिकछूकमूलेनमदविह्वलछागमूत्रपिष्टेन॥मलनंस्तब्धीकरणंमूलेनदुरात्मनाभाया॥३॥ इतिबीजस्तंभः॥ ❀ ॥ ❀ ॥ ❀ ॥

अथलिंगवृद्धिः

मधुतगरगौरसर्षपबृहतीखरमंजरीकणाःसतिलाः॥यवकुष्ठमरिचसैंधवहयगंधामाषसंयुक्ताः॥१॥स्तनयुगलकर्णपालीध्वजभुजशिखरोपचयमेताः॥ध्रुवमुद्वर्तनविधिनासतताभ्यासेनकुर्वंति॥२॥युग्मं॥कपिकच्छुकमूलेननिजचरणाविलेपनाद्भवति॥बीजस्तंभःपुंसोबहुशोदृष्टःप्रयोगोयं॥३॥सितशरपुंखामूलंपारदरससहितमाननेनिहितं॥एकंकरंजबीजांतरगंबीजंविधारयति॥४॥स्नुह्याजदुग्धपिष्टलज्जालोमूर्लमंघ्रिलेपनतःध्वजलेपाद्जमूत्रात्पिष्टंवावानरीमूलं॥५॥महिषघृतसहदेवीसितकमलकेसरैस्तुल्यैः॥गृहचटकेनलेपितनाभिःस्तब्धेंद्रियःस्त्रीशतंरमते॥६॥भल्लातकबृहतीफलदाडिमफलवल्कलसाधितंकुरुते॥लिंगमर्द्दनविधिनाकटुतैलाद्वाजिलिंगाभं॥७॥पुटदुग्धपद्मिनीदलभल्लातककृष्णालवणानां॥भूपःपरिणतबृहतीफलरससंपिष्टयामृदितं॥८॥माहिषीमलमिलितमग्रेलिंगंपश्चाच्छनैर्भवंति॥मुसलमिवमदविह्वलयुवतीजनदर्पमर्द्दनं॥९॥कनकरसमसृणवर्तितहयगंधामूलमिश्रपर्युषितं॥माहिषमिहनवनीतंगतबीजेकनकफलमध्ये॥१०॥गोमयगाढावर्तितपूर्वपश्चादनेकशःसंलिप्तं॥भवतिहयलिंगसदृशंलिंगंकठिनांगनादयितं॥११॥युग्मं॥करिकृष्णाश्वगंधाचनवनीतंचमाहिषं॥एतेषांमर्द्दनाल्लिंगवृद्धिःसंजायतेपरा॥१२॥कर्पूरमिश्रसेहुंडदुग्धलेपनजायते॥शेफसोमहतीवृद्धिःकठिनस्त्रीसुखावहा॥१३॥शर्करासैंधवंसर्पिष्ठागोक्षीरविपाचितं॥युक्त्यातुमर्द्दयेल्लिंगंभवेत्करिकरोपमं॥१४॥एतेकोकात्॥ अथकुसुमजननं॥ पीतेचतिलकषायेत्रिकुटहिजयाष्टिमूलसंयुक्ते॥अपहरतिरक्तगुल्मंकुसुमनिरोधंचतरुणीनां॥१॥कार्पासबीजमज्जानांचूर्णंतैलेनपाचयेत्॥तेनसंजायतेपुष्पंयुवतीनांचिरादृतं॥२॥तुंबीबीजजवक्षारोदंतीबीजकणागुडः॥पंचबाणबलंवर्तिर्वज्रीक्षीरे

णनिर्मिता॥३॥ योनिमध्यस्थितापुष्पंजनयत्येवयोषितां॥ ॥ अथगर्भजननं॥ नागकेसरपुष्पाणांचूर्णंगोसर्पिषासह॥पीतस्त्रीलभतेगर्भमृतौदुग्धान्नभोजनात्॥४॥ लक्ष्मणाशिखिमूलावादुग्धपीतादिनत्रयं॥ऋतौजातेस्त्रियोगर्भंग्राहयेन्नरसंगमे॥५॥ अथगर्भपातरक्षा ॥लज्जालुर्धातकीपुष्पमुत्पलंमधुलोध्रकं॥जलस्थयास्त्रियापीतंगर्भपातंनिवारयेत्॥१॥गर्भिण्यागर्भतोरक्तंस्तंभयेन्नपतध्रुवं॥पारावतमलंपीतंत्र्यहंतंडुलवारिणा॥२॥ अथसुखप्रसूतिः ॥कृत्वाचसप्तखंडंगुंजामूलंनिबद्धंकटिदेशे॥ सूत्रैःसप्तभिरुचिरात्सुखसूतंभामिनीलभते॥३॥ हिंगुसैंधवसंयुक्तसप्तकांजिकपानतः॥प्रसूतेस्त्रीकटौबद्धेमूलेवामातुलिंगजे॥४॥ जरायुतंमृतंगर्भमपतंतीजरामये॥ योषितांपादयत्येवपादस्योत्तरणीशिफा॥

अथबालरक्षा

मयूरचूलिकामूलंग्रहणादोसमुत्थनं॥ बालकस्यगलेबद्धंसर्वदोषनिवारणं॥१॥ एकावादुग्धिकातुंबीशंखपुष्पजटाधृता॥कंठेदंतोद्भवोद्भूतवेदनांहरतेक्षणात्॥२॥ अथयौवनरक्षा॥ मुंडीचूर्णकषायेनयुतंतैलंविपाचयेत्॥ पतितंयौवनंनस्यासानादुत्तिष्ठतिध्रुवं॥३॥ माकंदमूलसंयुक्तमधुकर्पूरपूरिता॥गतेपियौवनेस्त्रीणांयोनिर्गाढत्तिजायते॥४॥एतेयोगरत्नावल्याः

अथमुखवासजलवासौ

जातीफलकस्तूरीकर्पूरंचूतवारिसंसृष्टं॥धूपितमगरुकसिल्हकमधुगुडधूपैश्चमुखवासः॥१॥ सूक्ष्मैलाकस्तूरीकुष्ठत्वक्पत्रचंदनैः सुतनु॥मलयानिलजलवासंरचयमहीपालतिलकानां॥२॥त्वक्पत्राभ्यांजातीपत्रैलाभ्यांचचंपकोभवति॥त्वङ्मरिचाभ्यांनीरःकुष्ठशिवाभ्यांचपाटलावासः॥३॥अथांगवासः॥ चूर्णंकुष्ठमुरानागकेसराणांघृतान्वितं॥मधुपीतंकरोत्यंगसौरभंसततंनृणां॥४॥प्रातःकुष्ठस्ययच्चूर्णंलिहेन्मधुघृतान्वितं॥

काठिन्यंसौरभंतस्यदेहेस्याच्चिरजीविता॥५॥ श्रीकंठशंभोः॥

॥अथधूपाः॥दलंमलयजंमांसीसितागुरुजलंमधु॥समांशैर्मेलितोधूपोधत्तेकुंकुमसौरभं॥६॥चंदनागुरुकुष्ठानिशिवासर्ज्जनखौसिता॥मलयानिलनामायंधूपोमीभिःसुरप्रियः॥७॥एतौयोगरत्नावल्यां॥सूरणहूपदानाभ्यांशिलयागौरसर्षपैः॥कुंकुमागुरुरंभाभिश्चंद्रचंदनकौशिकैः॥८॥दशांगोयंमहाधूपोनाम्नासंमोहनाभिधः॥त्रैलोक्यंमोहयत्येवकामबाणसमःस्मृतः॥९॥शार्ङ्ग·धरस्य॥शशिनखगिरिमद्मांसीजलभागौमलयलोध्रयोर्भागौ॥मिलितैर्गुडपरिमृदितैर्वस्त्रगृहादीनिधूपयेच्चतुरः॥१०॥गंधधूपदीपिकायाः॥ अथधूपवर्तिः॥ नखागरुसिल्हकबालककुंदुरुशैलेयंचंदनश्यामाः॥क्रमवृद्धभागरचितावर्तिःक्षितिनाथकांतेयं॥११॥ पद्मश्रियः॥

मार्ज्जारीहिमवालुकापिशुनकंगोशीर्षकंशिल्पिनंवन्हेःशीतकरंतथांबुपिशितास्यात्कौशिकोजांगिकं॥कल्कंभागविवर्धितंगुडसितासंमूर्छितंसर्पिषायुक्तंमन्मथवर्तिरित्यभिहितास्याद्भोगिनांसर्वदा॥१२॥श्रीगोविंदराजदेवानां॥ अथदीपवर्तिः॥स्फुरदारुमरुवमस्तकलाक्षागुरुशालचूर्णिकर्पूरं॥नृपवासदेहगेहयोग्यामनोहरादीपवर्तिरियं॥१३॥गंधरसागुरुकुंदुरुगुग्गुलसर्ज्जरसपूतिकर्पूरं॥श्रीवाससिल्हचंदनमित्यपरादीपवर्तिरियं॥१४॥एतेपद्मश्रियः॥ इतिश्रीबृहच्छार्ङ्ग·धरविरचितायांपद्धत्यांसामान्यशृंगारेसंकेताख्यानभावहावादिपरिच्छेदः

अथबालावर्णनं

अभ्यासःकर्मणांसम्यगुत्पादयतिकौशलं॥विधिनातावदभ्यस्तंयावत्सृष्टामृगेक्षणा॥१॥दग्धोविधिर्विधत्तेनसर्वगुणसुंदरंजनंकमपि॥इत्यपवादनयादिवमुग्धाक्षीनिर्मिताविधिना॥२॥ लावण्यामृतदीर्घिकाकुलगृहंसौंदर्यसौभाग्ययोस्त्रैलोक्याकररत्नकंदलिरियंजीयात्सहस्रंसमाः॥ रूपालोकन

कौतुकेनबहुनाशिल्पिश्रमेणादरादन्येषांविधिनाविधायविहितंसृष्टेर्ध्वजारोहणं॥३॥एकांतसुंदरविधानकरःक्वधातासर्वांगकांतिचतुरंक्वचरूपमस्याः॥मन्येमहेश्वरभयान्मकरध्वजेनप्राणार्थिनायुवतिरूपमिदंगृहीतं॥४॥केषामप्येते॥अस्याःसर्गविधौप्रजापतिरभूच्चंद्रोनुकांतद्युतिःशृंगारैकरसःस्वयंनुमदनोमासोनुपुष्पाकरः॥वेदाभ्यासजडःकथंनुविषयव्यावृत्तकौतूहलेनिर्म्मातुंप्रभवेन्मनोहरमिदंरूपंपुराणोमुनिः॥५॥कालिदासस्य॥किंकौमुदीशशिकलाःसकलाविचूर्ण्यसंयोन्यचामृतरसेनपुनःप्रयत्नात्॥कामस्यघोरहरहुंकृतिदग्धमूर्तेःसंजीवनोषधिरियंविहिताविधात्रा॥६॥कस्यापि॥नदेवकन्यकानाऽपिगंधर्वकुलसंभवा॥तथाऽप्येषातपोभंगंविधातुंवेधसोऽप्यलं॥७॥भ्रूचातुर्याऽऽकुंचिताक्षाःकटाक्षाःस्निग्धावाचोलज्जिताश्चैवहासाः॥लीलामंदंप्रस्थितंचस्थितंचस्त्रीणामेतद्भूषणंचाऽऽयुधंच॥८॥अधरेमधुरासरस्वतीननुकर्णेमणिकर्णिकाप्रवाहः॥शिरसिप्रतिभातिचारुवेणीकथमेणीनयनानतीर्थराजः॥९॥बाहूहौचमृणालमास्यकमलंलावण्यलीलाजलंश्रोणीतीर्थशिलाचनेत्रशफरीधम्मिल्लशैवालकं॥कांतायास्तनचक्रवाकयुगलंकंदर्पबाणानलैर्दग्धानामवगाहनायविधिनारम्यंसरोनिर्मितं॥१०॥स्मितेनभावेनचलज्जयाभियापराङ्मुखैरर्धकटाक्षवीक्षणैः॥वचोभिरीर्ष्याकलहेनलीलयासमस्तभावैःखलुबंधनंस्त्रियः॥११॥लीलावतीनांसहजाविलासास्तएवमूढस्यहृदिस्फुरंति॥रागोनलिन्यांहिनिसर्गसिद्धस्तत्रभ्रमत्येवमुधाषडंघ्रिः॥१२॥कुंकुमपंकेनाऽकितदेहागौरपयोधरकंपितहारा॥नूपुरहंसरणत्पदपद्माकंनवशीकुरुतेभुविरामा॥१३॥द्रष्टव्येषुकिमुत्तमंमृगदृशांप्रेमप्रसन्नंमुखंघ्रातव्येष्वपिकिंनदास्यपवनःश्राव्येषुकिंतद्वचः॥किंस्वाद्येषुतदोष्ठपल्लवरसःस्पृश्येषुकिंतत्तनुर्ध्येयं

किंनवयौवनंसहृदयैःसर्वत्रतद्विभ्रमः॥१४॥ इयंसुस्तनीयस्त
कन्यस्तकुंभाकुसुंभाऽरुणंचारुवासोवसाना॥समस्तस्यलो
कस्यचेतःप्रवृत्तिंगृहीत्वाघटेन्यस्यपातीवभाति॥१५॥नेदं
मुखंमृगवियुक्तशशांकबिंबंनेमौस्तनावमृतपूरितहेमकुंभौ
॥नैवालकावलिरियंमदनास्त्रशालानेवेदमक्षियुगलंनिग
डंहियूनां॥१६॥ वक्त्रंचंद्रविकासिपंकजपरीहासक्षमेलोच
नेवर्णःस्वर्णमपाकरिष्णुरलिनांजिष्णुःकचानांचयः॥वक्षोजा
विभकुंभविभ्रमहरौगुर्वीनितंबस्थलीवाचांहारिचमार्दवंयुव
तिषुस्वाभाविकंमंडनं॥१७॥गुरुणास्तनभारेणमुखचंद्रेणभा
स्वता॥शनैश्चराभ्यांपादाभ्यांरेजेग्रहमयीवसा१८॥मुखेनचं
द्रकांतेनमहानीलैःशिरोरुहैः॥पाणिभ्यांपद्मरागाभ्यांरेजेरत्न
मयीवसा॥१९॥नूनंहितेकविवराविपरीतबोधायेनित्यमाहुर
बलाइतिकामिनीस्ताः॥याभिर्विलोलतरनारकदृष्टिपातैःशक्रा
दयोऽपिविजितास्त्वबलाःकथंताः॥२०॥सौधेस्थितासरभसंनिज
मुत्तरीयंधर्तुंपुनस्तनतटात्पतितंप्रवृत्ता॥ वाचंनिशम्यनयनंन
यनंममेतिकिंचित्तदैवमकरोत्स्मितमायताक्षी॥२१॥ इदंपरम
सुंदरंतनुपुरंकुरंगीदृशांनिवार्यखलुशैशवंस्वयमनेननीतंबला
त्॥ तदागमनशंकयामकरकेतुनाकिंकृतंपयोधरधराधरौत्रि
वलिवाहिनीदुस्तरौ॥२२॥ इयंसुरतरंगिणीनपुनरत्रनौसंगमो
भवेत्तरणिमज्जनंपथिकनैवपांथाऽऽगमः॥ निधायत्वदृदयेसदा
विपुलचारुकुंभद्वयंसरवेघनघनाऽऽगमेघनरसस्यपारंव्रज॥२३
मीनवतीनयनाभ्यांचरणाभ्यांप्रफुल्लकमलवती॥शैवालिनी
चकेशैःसुरसेयंसुंदरीसरसी॥२४॥अस्याश्चेद्गतिसौकुमार्यम
धुनाहंसस्यगर्वैरलंसंलापोयदिधार्यतांपरभृतैर्वाचंयमत्वव्र
तं॥अंगानामकठोरतायदिदृषत्पापेवसामालतीकांतिश्चेत्कम
लाकिमत्रबहुनाकाषायमालंब्यतां॥२५॥ अपांगतरलेदृशौ
तरलवक्रवर्णागिरोविलासभरमंथरागतिरतीवकांतंमुखं॥

इतिस्फुरितमंगकेमृगदृशांस्वतोलीलयातदत्रनमदोदयःकृतपदोऽपिसंलक्ष्यते॥२६॥निर्मित्सुःसुदतीमजोविरचितेवक्त्रेशशिभ्रांतितःक्रोडीभूतनिजांऽबुजासनमधिष्ठातुंनशक्तोविधिः॥मध्यंविस्मृतवान्कुचौचकठिनौपीनौनितंबौकचान्वक्रान्निर्मितवान्मतिःस्फुरतिहिस्वस्थेनृणांचेतसि॥२७॥अधरेनववीटिकाऽनुरागोनयनेकज्जलमुज्ज्वलंदुकूलं॥इदमाभरणंनितंबिनीनामितरद्भूषणमंगदूषणाय॥२८॥आस्यंसहास्यंनयनंसलास्यंसिंदूरबिंदूदयशोभिभालं॥नवाचवेणीहरिणीदृशश्चेदन्यैरगण्यैरपिभूषणैःकिं॥२९॥इतिश्रीवृ॰शा॰बालावर्णनपरि॰

अथवयोवर्णनं

यथायथाविशत्यस्याहृदयेहृदयेश्वरः॥तथातथाबहिर्यातौशंकेसंकोचतःकुचौ॥१॥कस्यापि॥अनाघ्रातंपुष्पंकिशलयमलूनंकररुहैरनाविद्धंरत्नंमधु नवमनास्वादितरसं॥अखंडंपुण्यानांभवतिहिचतद्रूपमनघंनजानेभोक्तारंकमिहसमुपस्थास्यतिविधिः॥२॥कालिदासस्य॥अयमंकुरभावएवतावत्कुचयोःकर्षतिलोकलोचनानि॥इतरेतरपीडनीमवस्थांगतयोःश्रीरनयोःकथंभवित्री॥३॥दृग्यदृशांसहस्रैर्मनसामयुतैर्विभावनीयंच॥सुकृतशतकोटिभोग्यंकिमपिवयःसुभ्रुवःस्वदते॥४॥भुवोकाचिल्लीलापरिणतिरपूर्वानयनयोःस्तनाभोगोव्यक्तस्तरुणिमसमारंभसमये॥इदानींबालायाःकिममृतमयःकिंविषमयःकिमानंदःसाक्षाद्ध्वनितमधुरःपंचमरवः॥५॥केषामप्येते॥परिहरतिवयोयथायथास्याःस्फुरदुरुकुंडलशोभिबालभावं॥दृढयतिधनुषस्तथातथाज्यांस्पृशतिशरानपिसज्जयन्मनोभूः॥॥६॥समंविलासोंकुरितस्तनाभ्यांत्रपाविलासेनसहावतीर्णा॥अवर्तनान्यस्त्रपये वलोकेकांतप्रकारोवचसांकृशांग्याः॥॥७॥जयतुंगोदयात्॥मुखेविकसितंस्मितंवसितवक्रसुप्रेक्षितंसमुच्छलितविभ्रमागतिरपास्यसंस्थामतिः॥उरोमुकुलि

तस्तनंजघनमंसबल्लोप्युरंवर्ततेतुवदनातन्नौतरुणमासमुज्जृंभते॥८॥कस्यापि॥दोलायांजघनस्थले नचलतालोलेक्षणालज्जतेसाशंकंतनुकंठकसतभियाक्रीडावनेक्रीडति॥धत्तेदिक्षुनिरीक्षणंस्मितसुखीपारावतानांरुतैःसज्जंमौग्ध्यविसर्जनायसुतनोःशृंगारमित्रंवयः॥९॥बिल्हणस्य॥अनाकूतैरेवप्रियसहचरीणांशिशुतयावचोभिःपांचालीमिथुनमधुनासंगमयितुं॥उपादत्तेनोवाविरमतिनवाकेवलमियंकपोलौकल्याणीपुलकमुकुलैर्हृंतुरयति॥१०॥मुरारेः॥वक्षस्यावरणादरस्तनयुगोद्भेदंविनाप्यंगुलीमुद्रासूचितहास्यमास्यमधिकंनोपुत्रिकादोरसः॥तिर्यग्लोचनवीक्षितानिवचसांछेदोक्तिसंक्रांतयस्तस्याःसीदतिशैशवेसमभवल्लोप्येषनव्यक्रमः॥११॥प्रगल्भानामंतःप्रविशतिशृणोतिप्रियकथांस्वयंतत्त्वेष्टाशतमभिनयैर्व्यंजयतिच॥स्पृहामंतःकांतेवहतिनसमभ्येतिनिकटंयथैवेयंबालाहरतिहितथाचित्तमधिकं॥१२॥पश्चान्मुक्तास्तरलगतयःसंश्रितालोचनाभ्यांश्रोणीबंधस्त्यजतितनुतांसेवतेमध्यभागः॥धत्तेवक्षःकुचसचिवतामद्वितीयत्वमास्यंतद्गात्राणांगुणविनियमःकल्पितोयौवनेन॥१३॥क्षोभंधत्तेवदतिबहवःस्निग्धलावण्यपूरःप्रत्यंगंयत्तटमनुसरंचूर्णयोविभ्रमाणं॥उन्मार्गेयत्स्फुरतिचमनाक्कुंभयोर्हृद्यमेतत्तन्मन्येस्याःस्मरगजयुवागाहतेत्हत्तडागं॥१४॥लावण्यामृतनिर्झरेणसुदृशःसिक्ताखिलांगस्थलीजातस्तत्रनवीनयौवनकलालीलालतामंडपः॥तस्मिन्नेषविशेषशीतलतरुच्छायासुसुप्तोत्थितःकंदर्पस्त्रिजगज्जयोद्यमपरोप्यद्यापिनिद्रालसः॥१५॥यथायथास्याःकुचयोःसमुन्नतिस्तथातथालोचनमेतिवक्रतां॥अहोसहंतेवतनोपरोन्नतिंनिःसर्गतांतमिलितातुसाधवः॥१६॥केषामप्येते॥मंदंमंदंश्रवणपुटकोपांतगंतादृगंतःकिंचित्किंचित्विरमतिमनोधूलिके

ल्लीरसेभ्यः॥ आविर्भावस्तनमुकुलयोःकाऽपिकांतिःसमंतादृध
द्धोवाक्कुसुमधनुषोयौवराज्याऽभिषेकः।१७। स्मितंकिंचिद्वक्त्रे
सरलतरलोदृष्टिविभवःपरिस्पंदोवाचामभिनवविलासोक्ति
सरसः॥ गतीनामारंभःकिसलयितलीलापरिकरःस्पृशंत्यास्ता
रुण्यंकिमिहनहिरम्यंमृगदृशः॥१८॥ श्रोणीबंधस्त्यजतितनुतां
सेवतेमध्यभागःपद्भ्यांमुक्तास्तरलगतयःसंश्रितालोचनाभ्यां
॥धत्तेवक्षःकुचसचिवतामद्वितीयंतुवक्त्रंत्वद्गात्राणांगुणवि
निमयःकल्पितोयौवनेन।१९॥ बिंबोष्ठएवरागस्तेतन्विपूर्वम
दृश्यत॥ अधुनाहृदयेप्येषमृगशावाक्षिदृश्यते॥२०॥ न्यंच
तिवयसिप्रथमेसमुदंचतितरुणिमनिसुदृशः॥ दधतिस्ममधु
रिमाणंवाचोगतयश्चविभ्रमाश्चभृशं॥२१॥ यदवधिविलास
भवनंयौवनमुदियायचंद्रवदनायाः॥ दहनंविनैवतदवधि
यूनांहृदयानिदह्यंते।२२॥ अधरःकिसलयरागःकोमलविटपा
ऽनुकारिणौबाहू॥ कुसुममिवविलोभनीयंयौवनमंगेषुसन्न
द्धं॥२३॥ अल्पुन्नतस्तनमुरोनयनेसुदीर्घेवक्रेभ्रुवावतितरां
वचनंततोऽपि॥ मध्योऽधिकंतनुरनूनगुरुर्नितंबोमंदागतिः
किमपिचाऽद्भुतयौवनायाः॥२४॥ मृदुलंवलिललितमध्यंपृथु
लकुचंचारुविपुलभूजघनं॥ पुन्नागस्पृहणीयंस्फुरतिवनंयौ
वनंचनारीणां॥२५॥ बाल्येगेहपतौनिमीलतिवयःसंधिविधा
यस्त्यरश्चौरश्चांतरंविवेशनिभृतंबालाशरीरालयं॥ चांचल्यं
चरणेपृथुत्वमुदरेनिर्लज्जतांचेतसिक्षामत्वंहृदयेदृशोःसर
लतांसर्वस्वमस्याहरत्॥२६॥ एतस्यांरतिवल्लभक्षितिपतेःक्री
डासरस्यांशनैःसंशोषंनयतीवशैशवजलेतारुण्यतिग्मद्युतिः
अंतस्याचपथ्यायथाविकसतिप्रायःकुचोच्चस्थलीस्थौल्यंहंत
तथातथाविततनुतेदृक्पीनमीनावली॥२७॥ रेखाकाचनकज्जल
स्यनयनांभोजेमिथःकौशलात्सुभ्रूभिःसरलीकृतापिकुटि
लीभावंसमालंबते॥ रुस्यावक्षसिपाणिपद्मविषमस्पर्शोद

पादुन्नतिर्जानीमोवयमेणशावनयनेवाल्यंनपाल्यंतव॥२८॥
सन्नद्धोयंनवतरुणिमाकाममास्कंदुकामोनैनांमुंचत्यहहसह
साकौतुकीवालभावः॥तद्वैराज्यंवरतरतनुस्वर्णभूमौप्रवृत्तंभा
यस्त्वस्माद्नुदिनमयंक्षीयतेमध्यदेशः॥२९॥संभिन्नयोरमु
ष्यावयसोःपयसोरिवांगेषु॥अनयोरस्तह्विभेदंमानसजन्माप
रंवेद॥३०॥मध्यस्यप्रथिमानमेतिजघनंवक्षोजयोर्मंदतादूरं
पात्युदरंचरोमलतिकानेत्रार्जवंधावति॥कंदर्पंपरिवीक्ष्यनू
तनमनोराज्याभिषिक्तंक्षणादंगानीवपरस्परंविदधतेनिर्लुंठ
नंसुभ्रुवः॥३१॥दृष्टिःशैशवमेङ्गनाप्रतिकलंलावण्यमभ्यस्य
तेपूर्वाकारमुरस्तथापिकुचयोःशोभांनवामीहते॥संप्राप्तागुरु·
तांतथाप्युपचिताभोगानितंबस्थलीतन्व्याःस्वीकृतमन्मथंविज
यतेतन्नैकपेयंवयः॥३२॥तत्तस्याःकमनीयकांतिविजितत्रैलो
क्यनारीवपुःशृंगारस्यनिकेतनंसमभवत्संसारसारंवयः॥यस्मि
न्विस्मृतपक्ष्मपालिचलनाःकामालसादृष्टयोनोयूनांपुनरु
सतंतिपतिताःपत्रेशकुंताइव॥३३॥नदंतुरमुरस्थलंवचसि·
नाश्रिताचातुरीविकारिनविलोकितंभ्रुविनवक्रिमोपक्रमः॥
तथापिहरिणीदृशोवपुषिकापिकोतिच्छटापटावृतमहाम·
णिद्युतिरिवात्रसंलस्यते॥३४॥केलीकौतुकमादराद्गुणवयो
रालीभिराश्राव्यतेवालाभिस्तुपुरःपुरेवरजसिक्रीडार्थमाहूय
ते॥चेतोयातिनवाततस्तदुभयोरेणीदृशःसांप्रतंमध्येचुंव
कयोरयःशकलवन्निःपस्पपातंमनः॥३५॥ इतिश्रीवृह·
च्छार्ङ्ग·धरविरचितायांपद्धत्यांसामान्यशृंगारेवयःसंधिवर्णनंप·

अथतरुणीपृथग्वर्णनं॥तत्रप्रथमंकेशपाशः

अस्यामनोहराकार — कबरीभारनिर्जिताः॥लज्जयेववने
वासंचक्रुश्चामरबर्हिणः॥१॥ वररुचेः॥भातिविन्यस्तकल्हा
रंस्कंकेयस्याःकेशसंचयः॥शोणितार्द्रैःशरैःपूर्णंतूणीरमिवमन्मथं
॥२॥कस्यापि॥विकचकचकलापःकिंचिदाकुंचितोयंकुचकल

शनिवेशीशोभतेश्यामलास्याः॥मधुरसपरितोषात्किंचिदु·
त्फुल्लकोशेकमलइवनिलीनःपेटकःषट्पदानां॥३॥पुष्पस्य
॥स्नानार्द्रमुक्तेष्वनुधूपवासंविन्यस्तसायंतनमल्लिकेषा॥कामो
वसंतात्ययमंद्वीर्यःकेशेषुलेभेबलमंगनानां॥४॥कालिदा
सस्य॥चलत्कामिमनोमानमादातुंचिंतयन्मनः॥गलयष्टिरिवा
भातिबालावेणीगुणोज्वला॥५॥कस्यापि॥आभुग्नांगुलिपल्ल
वोकचभरव्यापारयंतीकरोबद्धोत्कर्षनिबंध‾मानसतयाभ्रू
न्मोंद्धानादृशां॥बाहूत्क्षेपसमुन्नतेकुचतटेपर्यस्तनीलांशुका·
क्लीसंकोचितबाहुमूलसुभगंबध्नातिजूटांवधूः॥६॥सिंगापिधेः
॥चिकुरप्रकराजयंतितेविदुषीमूर्धनियान्बिभर्तिसा॥पशुना
ऽप्यपुरस्कृतेनतत्तुलनामिच्छतिचामरेणकः॥७॥एणीदृशः
पाणिपुटेनिरुद्धावेणीविरेजेशयनोत्थितायाः॥सरोजकोशा
द्विनिष्पतंतीश्रेणीघनीभूयमधुव्रतानां॥८॥मलिनाअपिसं
यमनात्कुटिलाअपिस्कमनसांसमागमतः॥बालाअपिमुक्ता
नामनुषंगान्निर्जरत्वमुपयांति॥९॥स्तनाःऽभोगेपतन्भातिक
पोलात्कुटिलोऽलकः॥शशांकबिंबतोमेरौलंबमानइवोरगः
॥१०॥उन्मीलद्वदनेंदुकांतिविसरैर्दूरात्समुत्सारितंभग्नंपीन
कुचस्थलस्यचरुचाहस्तप्रभाभिर्हतं॥एतस्याःकलविंकक
ठकदलीकल्पंमिलत्कौतुकाद्दग्धासांगमुखं‾रुषेवसहसा
केशेषुलग्नंतमः॥११॥एणीदृशोविजयतेवेणीपृष्ठावलंबि
नी॥कशेवपंचबाणस्यसुवतर्जनहेतवे॥१२॥श्यामामिलिं
दमालाबालायावदनपद्ममकरंदं॥आस्वादितुमिवमिलि
ताललितावेणीमिषादेषा॥१३॥लसन्मौक्तिकश्रेणिगंगात
रंगास्वयंनंदिनीभास्वतोनीलवर्णा॥ससीमंतसिंदूरसार
स्वताभातिवेणीयमेणीदृशोमौलिवेणी॥१४॥इतिकेशपा·

अथसीमंतरचनं

जानुस्थापितदर्पणंपरिणमद्ग्रीवंसमुद्यद्भुजंन्यंचत्कूर्परमुन्न

मज्जुजलसत्कक्षांतरोद्गत्कुचं॥पाणिभ्यांप्रविभज्यकेशनिच
यंसीमंतकर्मोद्यताचेतःकस्यवशीकरोतिनबलाद्बालाविलोले
क्षणा॥१॥केशान्वामकराऽवलंबितशिखान्भूयोरणत्कंकणं
व्याधूयाऽथकनिष्ठिकानखमुखेनाऽकुंचिताऽन्यांगुलि॥सीमं
तंविरचय्यतस्यकरभेणोन्मृज्यपार्श्वद्वयंतान्पश्चाद्युगपत्प
णीयकरयोर्युग्मेनबध्नात्यसौ॥२॥आभुग्नांऽगुलिपल्लवौक
चभरेव्यापारयंतीकरौबंधोत्कर्षनिबद्धमानसतयाभून्यांद
धानाहशं॥बाहूत्क्षेपसमुन्नतेकुचतटेपर्यस्तचोलांऽशुकाऽ
ह्रीसंकोचितबाहुमूलसुभगंबध्नातिजूटींवधूः॥३॥यथाय
थायोवलतेभुजोऽस्याउदंचितःसंयमनेकचानां॥तथातथा
वल्गातिकाममेकःसएववक्षोरुहवत्सलास्याः॥४॥स्नेह
संवर्धितान्बालान्दृढंबध्नातिसुंदरी॥करुणाहरिणाक्षीणां
कुतःकठिनचेतसां॥५॥संप्राप्तचिकुरभावःकचनिचयोवायुवाक
रेलमः॥स्त्रीभिर्दृढंनिबध्योनोचेत्परकलत्रमनुसरति॥६॥इति॰

अथ अभ्यंगारंभः

वक्षोजौनिबिडंनिरुध्यसिचयेनाऽकुंच्यमध्यंशनैःफुल्लाचंप
कतैलसेकमबलासंपीड्यमंदंशिरः॥पाणिभ्यांचलकंकणो
द्यतझणत्कारोत्तराभ्यांकरोत्यभ्यंगंपरिपश्यतःसकुतुकंदे
रंतरंप्रेयसः॥१॥जानुभ्यामुपविश्यपार्ष्णिनिहितश्रोणीभराप्रे
न्नमद्दोर्वल्लीनमदुन्नमत्कुचतटीदिव्यंनखांऽकावलिः॥पा
णिभ्यामवधूयकंकणझणत्कारावतारोत्तरंबालानह्यतिकिं
निजालकभरंकिंवामदीयंमनः॥२॥अश्रांतंदृढयंत्रणेनकुच
योरत्यक्तकाठिन्ययोराबद्धस्फुटमंडलोन्नतिमितश्चोलंवि
मुच्योरसः॥नीवीविच्छुरितंविधायतमिमंवामस्तनालंबि
नींवेणींपाणिनखांऽचलैःशिथिलयत्याक्रम्यपीठंपदा॥३॥ऽ
आवर्त्यकंठंसिचयेनसम्यगाबध्यवक्षोरुहकुंभयुग्मं॥का
ऽसौकराऽलंबिततैलपात्रामंदंसमासीदतिसुंदरीतां॥४॥ऽ

अस्याःपीठोपविष्टाया अभ्यंगं वितनोत्यसौ॥ ललच्चेष्टाणि चलद्वेणि नटद्गुरुपयोधरं॥५॥ इतिअभ्यंगारंभः॥ ७॥ ॥

अथललाटः

अस्याललाटेरचितासखीभिर्विभाव्यतेचंदनपत्ररेखा।आपांडुरक्षामकपोलभित्तावनंगबाणव्रणपट्टिकेव॥१॥भासस्य॥बालेललामरेखेयंभालेभल्लीवराजते॥भ्रूलताचापमाकृष्य नविघ्नःकेहनिष्यसि॥२॥ कस्यापि॥कस्तूरितिलकंभालेबालेमाकुरुमाकुरु॥अद्यसाम्यंभजामीतिभृंजतेशशलांछनः॥३॥ कस्यापि॥विराजतेस्यास्तिलकोयमंचितोविकुंचितभ्रूलतिकाद्वयांतरे॥विजित्यलोकंहूतयंदिवंप्रतिस्मरेणवाणोधनुषीवयोजिनः॥४॥कस्यापि॥श्यामलेनांऽकितंभालेबालेकेनाऽपिलक्ष्मणा॥मुखंतवांऽतरासुप्तभृंगफुल्लांबुजायते॥५॥ लोचनफुल्लांभोजद्वयलोभांऽऽदोलितेकमनाः॥कस्तूरीतिलकमिषाद्यमलिकेऽलिःसमुल्लसति॥६॥इतिललाटः॥

अथभ्रुवौ

तस्याःशालाकांजननिर्म्मितेवकांतिर्भ्रुवोरायतलेखयोर्या॥तांवीक्ष्यलीलाचतुरामनंगःस्वचापसौंदर्यमदंमुमोच॥१॥कालिदासस्य॥भ्रूरेखायुगलंभातितस्याश्चटुलचक्षुषः॥यन्नंऽहूपेवहरितानाशावंशविनिर्गता॥२॥बिल्हणस्य॥स्मरकल्पद्रुमोबालेतवभालेद्विपत्रकः॥पत्रयोरनयोश्छायाभ्रुवोऽर्व्याजादुदंचति॥३॥वचोवीचीलानंस्फुरदधरपानंविविनयंऽकृशीभूतेमानेमयिमृगयमानेमृगदृशः॥बभूवभ्रूभंगःसनयनतरंगःसपदियःप्रभुत्वंन्यातेनेजगदुपरितेनेहमदनः॥४॥इ०

अथनेत्रे

नूनमाज्ञाकरस्तस्याःसुभ्रुवोमकरध्वजः॥यतस्तत्रैवसंचारसूचितेषुःप्रवर्तते॥१॥कस्यापि॥यासांकटाक्षविशिखैःस्मरचौरेणताडिताः॥हृतचैतन्यसर्वस्वामोत्यंतेमुग्धकामुकाः॥२॥

शार्ङ्गधरस्य॥ सन्मार्गेतावदास्तेप्रभवतिपुरुषस्तावदेवेंद्रि·
याणांलज्जांतावद्विधत्तेविनयमपिसमालंबतेतावदेव॥भ्रू
चापाकृष्टमुक्ताःश्रवणपथजुषोनीलपक्ष्माणएतेयावल्लीला
वतीनांन्हदिनधृतिमुषोदृष्टिबाणाःपतंति॥३॥बाणभट्टस्य॥
नलिनंमलिनंविवृण्वतीस्पृशतीमस्पृशतीतदीक्षणे॥अपि
खंजनमंजनांचितेविदधातेरुचिगर्वदुर्विधं॥४॥श्रीहर्षस्य॥
भ्रमयतिशरीरमधिकं------भ्रमयतिचेतःकरोतिसंतापं॥
मोहंचमुहुःकुरुतेविषविषमंवीक्षणंतस्याः॥५॥कस्यापि॥शि
लासंघातेनोज्वलधवलधारापरिसरानिमानेतःश्यामाद्विषविष
मबाणस्यवि शिखान्॥दृढप्रज्ञावर्माण्यपित्हृदयमर्माणिरु·
जतःकटाक्षानेणाक्ष्यासुनिरपिरसोढुंप्रभवति॥६॥कस्यापि॥
लोचनेहरिणगर्वमोचनेमाविदूषयनतांगिकज्जलैः॥सायकः
सपदिजीवहारकःकिंपुनर्हिगरलेनलेपितः॥७॥कामिनीनय
नकज्जलपंकादुत्थितोमदनमत्तवराहः॥कामिमानसवनां
तरचारीमूलमुत्खनतिमानलतायाः॥८।निःशीमशोभासौभा
ग्यंनतांग्यानयनद्वयं॥अन्योऽन्याऽऽलोकनाऽऽनंदविरहादिव
चंचलं॥९॥रामाविलोलनयनेकिमुमीनबाणौनीलोत्पलेकि
मथवाकिमुखंजरीटौ॥किंवाजगत्त्रयजयायकृतिर्नजानेकं
दर्पभूपरचितानवकार्मणस्य॥१०॥ असांप्रतमतीवाक्ष्णो
र्यत्पुरःपरिसर्पणं॥सहयातंमनस्तत्रत्यक्त्वाभूयोनिवर्तनं
॥११॥श्रुतिलंघनमीहमानयोर्मलिनाभ्यंतरयोरधीरयोः॥
स्मृतितापकरत्वमेतयोरुचितंलोचनयोर्मृगीदृशः॥१२॥
अर्जुनःकृष्णसंयुक्तःकर्णंयत्रानुधावति॥तन्नेत्रंतुकुरुक्षे
त्रमितिमुग्धेमृशामहे॥१३॥उत्तरंगयकुरंगलोचनेलोचने
हरिणगर्वमोचने॥अस्तुसुंदरिकलिंदनंदिनीवीचिडंबरग
भीरमंबरं॥१४॥एकमेवाक्षिवामाक्षिरंजयांजनलेखया॥जाय
तामैंदवेबिंबेखंजनांबुजसंगमः॥१५॥मुखविधुपरिवृत्तोत्तान

ताटंकपाशावधिचकितचकोरीकांतिचौरंनदृक्सि।।त्रिभुवनयुव
चेतोबंधसंकेतहेतोःसहचरमिवकर्तुंपाशमाशंकयाति।।१६।।
अतिपूजिततारेयंदृष्टिःश्रुतिलंघनक्षमासुतनु।।जिनसिद्धांत
स्थितिरिवसवासनाकंनमोहयति।।१७।। इतिनेत्रे।। छ।। ।।

अथकटाक्षः

यत्रयत्रवलतेशनैःशनैःसुभ्रुवोनयनकोणविभ्रमः।।तत्रतत्रश
तपत्रथोरणीतोरणीभवतिपुष्पधन्वनः।।१।। यासांकटाक्षविशि
खैःस्मरचौरेणताडिताः।।हृतचैतन्यसर्वस्वामुग्धामुह्यंतिका
मुकाः।।२।। सन्मार्गेतावदास्तेप्रभवतिपुरुषस्तावदेवेंद्रियाणां
लज्जांतावद्विधत्तेविनयमपिसमालंबतेतावदेव।।भ्रूचापाऽकृ
ष्टमुक्ताःश्रवणपथजुषोनीलपक्ष्माणएतेयावल्लीलावतीनांहृ
दिनधृतिमुषोदृष्टिबाणाःपतंति।।३।।तावदेवकृतिनामपिस्फु
रत्येषनिर्मलविवेकदीपकः।।यावदेवनकुरंगचक्षुषांताड्यते
चपललोचनांचलैः।।४।। प्रभवतिमनसिविवेकोविदुषामपि
शास्त्रसंभवस्तावत्।।निपतंतिनेत्रविशिखायावन्नेंदीवराक्षी
णां।।५।। हत्वालोचनविशिखैर्गत्वाकतिचित्पदानिपद्माक्षी।।
जीवतियुवानवाकिंभूयोभूयोविलोकयति।।६।। यांतीगुरुजनैः
सार्धंस्मयमानमुखांबुजा।।तिर्यग्ग्रीवंयदद्राक्षीत्तन्निष्पत्राक
रोज्जगत्।।७।। क्वचित्कृष्णार्जुनगुणा क्वचित्कर्णांतगामिनी।।
अपांगश्रीस्तवाऽऽभातिसुभ्रूर्भारतगीरिव।।८।।रेरेघरट्टमारो
दीःकंकंनभ्रामयंस्यमूः।।कटाक्षवीक्षणादेवकराऽऽकृष्टस्य
काकथा।।९।।दिनांतेस्नातीनांकनककलशाकारकुचयोरुप
र्यस्यंतीनांकमलकलिकाकोमलकरौ।।समुद्यत्कालिंदीतर
लतरकल्लोलकुटिलःकटाक्षःकांतानांकमिहकमितारंनकु
रुते।।१०।।विशालाक्षीकटाक्षस्यसाक्षीत्र्यक्षोमहेश्वरः।।ना
द्यापिप्रकृतिंयातियेनविद्धोदिगंबरः।।२।।योस्यामुहुर्वलितकं
धरमाननंतदावृत्तवृंतशातपत्रनिभंवहंत्या।।दिग्धोमृतेनच

विषेणचपक्ष्मलास्यागाढंनिखातइवमेहृदयेकटाक्षः॥१२॥इति·

अथनासा

पुरायाबाणत्यागायनूतनास्त्रकुतूहलात्॥ तन्नासाभातिका
मेनतूणीबाधोमुखीकृता॥१॥बिल्हणस्य॥क्षधामयोविष
परोगशांत्यैनासाग्रमुक्ताफलकच्छलेन॥ अनंगसंजीवनदृ
ष्टिशक्तिर्मुखामृतंतेपिबतीवचंद्रः॥२॥वैद्यनाथस्य॥दंतालिदा
डिमीबीजभक्षणोत्कंठचेतसः॥ मन्येमारशुकस्येयंनासाचं
चूर्विराजते॥३॥ इतिनासा॥छ॥छ॥छ॥छ॥छ॥

अथनासाभूषणं

नासामौक्तिकमबलेकिमधरबिंबेनविद्रुमंकुरुषे॥ दृष्ट्यागुंजा
बीजंशिवशिवभूयस्तदेवहसितेन॥१॥ हरस्यातिदुरापमस्ति
भुवनेहेनासिकाभूषणत्वत्सौभाग्यमितिभ्रमतीहिवनितावक्त्रेंदु
कांतिप्रदा॥यत्कांतातनुसंगमायसहतेसोंतर्विभेदव्यथांसा
नासापुटभेदनादपिभवत्संगंयतोवांछति॥२॥इतिनासाभूषणं

अथकर्णपाशौ

सौंदर्यपात्रेवक्त्रेंदौकुरंगीसंगभीतया॥सूचितौश्रोत्रपाशाभ्यां
पाशाविवमृगीदृशः॥१॥ तालीदलंकांचनकर्णपाशेप्रसारयं
तीसुतनुःकराभ्यां॥रराजकर्णांतनिषण्णदृष्टिःशाणेदधानेव
कटाक्षबाणान्॥२॥बिल्हणस्यैतौ॥ताटंकमस्यास्तरलेक्षणा
यामुक्ताफलैश्चारुरुचंविधत्ते॥मुखश्रियाचंद्रमिवाभिभूयबं
दीकृतंतारकचक्रवालं॥ ३॥ कस्यापि॥ इतिकर्णपाशौ॥छ॥

अथकपोलौ

आबध्नत्परिवेषमंडलमलंवक्त्रेंदुबिंबाद्बहिःकुर्वच्चंपकजंभ
माणकलिकाकर्णावतंसश्रियं॥नन्वंग्याःपरिनृत्यतीवहसती
वोत्सर्पतीवोल्वणंलावण्यंललतीवकांचनशिलाकांतेकपो
लस्थले॥१॥त्रिविक्रमभट्टस्य॥ कपोलपालींतववतन्विमन्येला
वण्यधन्येदिशमुत्तराख्यां॥विभातियस्यांललिताऽलकायां

मनोहरावैश्रवणस्यलक्ष्मीः॥२॥द्विधाविधायशीतांशुंकपोलौकृतवान्विधिः॥तन्व्यास्तद्रसनिष्यंदबिंदवोरदनावलिः॥३॥

अथाधरः

तावेषविद्रुमच्छायोमरुमार्गइवाधरः॥करोतिकस्यनोमुग्धेपिपासाकुलितंमनः॥१॥कस्यापि॥अल्पेनापिसुरक्तेनसाधितेनप्रयोजनं॥ओष्ठद्वयसहायेनकांतास्येनजगज्जितं॥२॥कस्यापि॥रसवदमृतंकःसंदेहोमधून्यपिनान्यथामधुरधिकंद्राक्षायाश्चप्रसन्नतरंफलं॥सकृदपिपुनर्मध्यस्थःसन्रसांतरविज्जनोवदतुयदिहान्यत्स्वादुस्यात्प्रियादशनच्छदात्॥३॥केषामपि॥अयिमृगाक्षितवाधरपल्लवेदयितदंतपदंनभवत्यदः॥भुवनमोहनमंत्रपदांकितंकिमुतयंत्रमिदंस्मरयंत्रिणः॥४॥सर्वस्यैवबहिरत्नस्यवर्णोर्घःपरिहीयते॥दयिताधररत्नंतुसव्रणंयात्यनर्घतां॥५॥कयोरप्येतौ॥त्वंपीयूषदिवोऽपिभूषणमसिद्राक्षेपरीक्षेतकोमाधुर्यंतवविश्वतोऽपिविदितंमाध्वीकमाध्वीकता॥एतत्किंतुमनागरुंतुदमिवब्रूमोनचेत्कुप्यसियःकांताधरपल्लवेमधुरिमानाऽन्यत्रकुत्राऽपिसः॥६॥चित्रंकनकलतायापल्लवएवामृतंस्रूते॥कुसुमसमुद्गमसमयेनोजानेकिंपरंभावि॥७॥आच्छादयसिकिंमुग्धेवस्त्रेणाधरपल्लवं॥खंडिताएवशोभंतेवीराश्चाधरपल्लवाः॥८॥अधरोपमधीरास्याबंधुजीवप्रभाहरः॥अन्यजीवप्रभांहंतहरतीतिकिमद्भुतं॥९॥अभिलषंतितवाधरमाधुरीतदिहकिंहरिणासिसुधाबुधाः॥सुरसुधामधरीकुरुतेयतस्त्वदधरोऽधरतामगमत्ततः॥१०॥ इतिअधरः॥छ ॥ छ ॥ छ ॥ छ ॥

अथदंतकपोलौ

यावद्यावत्कुवलयदृशांमृज्यतेदंतपालिस्तावत्तावद्द्विगुणमधरच्छाययाशोणशोचिः॥काचित्तस्याःपरिमलकलादूतमत्तालिकांत्यावक्त्रश्वासेप्रसरतिमुहुःश्यामिकाप्याविरासीत्॥१॥इ

अथस्मितं

स्मयमानमायताक्ष्याःकिंचिदभिव्यक्तदशनशोभिमुखं॥असमग्रलक्ष्यकेसरसमुच्छ्वसदिवपंकजंदृष्टं॥१॥पुष्पंप्रवालोपहितंयदिस्यान्मुक्ताफलंवास्फुटविद्रुमस्थं॥ततोनुकुर्याद्विशदस्यतस्यास्ताम्रौष्ठपर्यस्तरुचःस्मितस्य॥२॥एतौकालिदासस्य॥ ॥ कामबाणप्रहारेणमूर्च्छितानिपदेपदे॥ जीवंतियुवचेतांसियुवतीनांस्मितामृतैः॥ ३॥ इतिस्मितं॥ छ ॥ छ ॥ छ॥छ॥

अथमुखं

यदमरशतैःसिंधोरंतःकथंचिदुपार्जितंसकलमपितत्स्रष्ट्राकांतामुखेननिवेशितं॥सुरससुमनसःश्वासामोदेशशीचकपोलयोरमृतमधरोतिर्यग्भूतेविषंचविलोकने॥१॥ तस्यामुखस्यातिमनोहरस्यकर्तुंनशक्तःसदृशंप्रियायाः॥अद्यापिशीतद्युतिरात्मबिंबंनिर्मायनिर्मायपुनर्भिनत्ति॥२॥ अनेनरंभोरुतवाननेनपीयूषभानोस्तुलयाधृतस्य॥ नतस्यनूनंपरिपूरणायताराःस्फुरंतिप्रतिमानखंडाः॥३॥ कयोरप्येते॥ कोशःस्फीततरःस्थितानिपरितःपत्राणितुंगंजलंमैत्रैर्मंडलमुज्वलंचिरमधोनीतास्तथाकंटकाः॥ इत्याकृष्टशिलीमुखेनरचनांकृत्वापद्मस्यद्रुतंयातिद्रोनजिगीषुणापिनजितंमुग्धंत्वदीयंमुखं॥४॥ विज्जकायाः॥ धिक्तस्यमंदमनसःकुकवेःकवित्वंयःस्त्रीमुखंचशशिनंचसमीकरोति॥ भ्रूभंगविभ्रमकटाक्षनिरीक्षणानिकोपप्रसादहसितानिकुतःशशांके॥५॥श्रीधनदेवानां॥अनाकाशेचंद्रःसरसिजदलद्वंद्वसहितोगृहीतःपश्चार्द्धेकुटिलकुटिलैःसोपितिमिरैः॥ सुधांमुचत्स्वैरनिशमयसंमोहजननीकिमुत्यातालीयंवदतजगतःकर्तुमुदिताः॥६॥कस्यापि॥ आरब्धेदयितामुखप्रतिसमेनिर्मातुमस्मिन्नपिव्यक्तंजन्मसमानमेतिमिलितामंशच्छटांवर्षति॥ आत्मद्रोहिणिरोहिणीपरिवृढेपर्यंकपंकेरुहःसंकोचाटयहुत्थि तस्यनविधेस्तच्छीलमुन्मीलितं॥७॥

मुरारेः॥जितेंदुपद्मलावण्यंकः कांतावदनंजयेत्॥भुक्त्वातदेव
सुरतश्रमजिह्मितलोचनं॥८॥कस्यापि॥प्रविशझटितिगेहंमा
बहिस्तिष्ठकांतेग्रहणसमयवेलावर्ततेशीतरश्मेः॥तवमुख
मकलंकंवीक्ष्यराहुःसनूनंग्रसतितवमुखेंदुंचंद्रबिंबंविहाय॥
॥९॥वासोंःचलाःच्छादितमर्धभागंसौधस्थराधावदनंसमी
क्ष्य॥सर्वैःपिवृंदावनवासिनस्तेचक्रुश्चतुर्थीव्रतपारणानि॥
॥१०॥विश्वामित्रपराशरप्रभृतयोवातांःबुपर्णाशनास्तेःपिस्त्री
मुखपंकजंसुललितंदृष्ट्वैवमोहंगताः॥शाल्यन्नंसघृतंपयोद
धियुतंभुंजंतियेमानवास्तेषामिंद्रियनिग्रहोयदिभवेद्विंध्यस्त
रेत्सागरं॥११॥अबलेसलिलेतपस्यतामुखभावोगमितोनपं
कजेन॥कथमादिमवर्णताःस्यजस्यद्विजराजेनकृतोऽनिग्रह
स्य॥१२॥चलदृंगमिवांभोजमधीरनयनंमुखं॥तदीयंयदि
दृश्येतकामःकुस्थोःस्तुकिंततः॥१३॥ननुनीलांचलसंवृतमा
ननमाभातिहरिणनयनायाः॥प्रतिबिंबितइवयमुनागभीर
नीरांतरेणांकः॥१४॥आसायंसलिलभरेष्ववितारमुपास्यसाद
रंतपसा॥अधुनाःब्जेनमनाकृतवमानिनितुलनामुखस्याः
सा॥१५॥विलसत्याननंतस्यानासाःग्रस्थितमौक्तिकं॥आल
क्षितबुधाःश्लेषंराकेंदोरिवमंडलं॥१६॥सुविरलमौक्तिकना
रेधवलांःशुकचंद्रिकाचमत्कारे॥वदनपरिपूर्णचंद्रेसुंदरिरा
काःस्मिनाःत्रसंदेहः॥१७॥सुधाबद्धग्रासैरुपवनचकोरैरनु
सृतःकिरन्ज्योत्स्नामच्छांनवलवलिपाकप्रणयिनी॥उपप्रा
काराग्रंप्रहिणुनयनेतर्कयमनागनाकाशेकोयंगलितहरिणःशी
तकिरणः॥१८॥विनासायंकोयंसमुदयतिसौरभ्यसुभगःकिरन्ज्यो
त्स्नाधारामधिधरणितारापरिवृढः॥धनुर्धत्तेस्मारंतिरयतिवि
हारंनतमसांनिशांतेकःपंकेरुहयुगलमंकेनदयति॥१९॥लोके
केलेकमपहातुमयंशशांकोजातोपतस्तवमुखंतरलायताक्षि
॥तत्रापिकल्पयसितन्विकलंकलेखांनार्यःसमाश्रितजनंहिकलं

कुर्वंति॥२०॥तानिप्रांचिदिनानियत्ररजनीस्तेहेतमिस्राप्रदेसास्तुष्टिर्विरामयत्रभवतिज्योत्स्नामयोनाऽतपः॥अद्यान्यःसमयस्तयाहितिथयोप्यस्यामुखस्योदयेहस्ताहस्तिकयाहरंतिपरितोराकावराकीयशः॥२१॥अंबुजमंबुनिमग्नंत्रासाद्राकाऽग्रामाश्रितश्चंद्रः॥संप्रतिकःपरिपंथीयंप्रतिकोपारुणंवदनं॥२२॥पुंसांदर्शयसुंदरिमुखेंदुमीषत्त्रपामपाकृत्य॥जायाजितइतिरूढाजनश्रुतिर्मेयशोभवतु॥२३॥उचितंगोपनमनयोः-- --स्तनयोःकनकाद्रिकांतितस्करयोः॥अवधीरितविधुमंडलमुखमंडलगोपनेकिमिति॥२४॥स्मितज्योत्स्नागंगातपनतनयाश्यामलरुचिःसरस्वत्योष्ठाभारुणकिरणसौंदर्यजयिनी॥इमास्तिस्रस्तीर्थाधिपइवमुखेसम्यङ्मिलितास्तवेदंसेवन्कोनलभतइहानंदलहरीं॥२५॥ इतिमुखं॥ * ॥ * ॥ * ॥

अथकंठः

कंठस्यविदधेकांतिंमुक्ताभरणतायथा॥नास्याःस्वभावरम्यस्यमुक्ताभरणतातथा॥१॥शाकटहंदेः॥मातंगकुंभसंसर्गजातपातकशंकया॥स्नातीवमुक्ताहारोस्याःस्फुरत्कांतिजलेगले॥२॥श्रीवैद्यभानुपंडितस्य॥कंठस्यतस्याःस्तनबंधुरस्यमुक्ताकलापस्यचनिस्तलस्य॥ अन्योन्यशोभाजननाद्बभूवसाधारणोभूषणभूष्यभावः॥३॥कालिदासस्य॥इतिकंठः

अथवाणी

अमृतद्रवमाधुरीधुरीणांगिरमाकर्ण्यकुरंगलोचनायाः॥मुहुरभ्यसनंकषायकंठीकलकंठीकुरुतेकुहूरुतेन॥१॥इति०।

अथबाहू

दयिताबाहुपाशस्यकुतोयमपरोविधिः॥जीवयत्यर्पितःकंठेमारयत्यपवर्जितः॥१॥भासस्य॥शब्दवद्भिरलंकारैरुपेतमभिकोमलं॥सुवृत्तकाव्यवद्भेजेतद्बाहूलतिकाद्वयं॥२॥इतिबाहू॥

अथकरौ

मुग्धेप्रसारयसिकिंकुसुमानिहर्तुर्भर्त्तावशोकविटपस्यकुतूहलेन॥अस्यैवतन्विनवपल्लवडंबरेषुत्वंहारयिष्यसिननुस्वयमेवपाणी॥१॥कस्यापि॥न्यस्तानिदंतवलयानिकरेकयाचित्तानींदुखंडघटितानिममैषतर्कः॥अस्यानिसर्गमृदुपाणिसरोजमेषामामोचनेझटितियन्मुकुलीबभूव॥२॥कस्यापि॥इति०

अथांगुल्यः

अंगुलीषुकुरंगाक्ष्याःशोभतेमुद्रिकावलिः॥प्रोतेवबाणैःपुष्पेषोःसूक्ष्मलक्ष्यपरंपरा॥१॥बिल्हणस्य॥सुदीर्घारागशालिन्योबहुपर्वमनोहराः॥तस्याविरेजुरंगुल्यःकामिनांसंकथाइव॥२॥

अथस्तनौ

नयननीरजकिंभवताकृतंमुखशशीयदयंरिपुराश्रितः॥इतिवचोवितरीतुमिवोन्मुखंवरतनोस्तनवक्रयुगंबभौ॥१॥कस्यापि॥पुष्पेषोरभिषेकहेमकलशौहारप्रभावाहिनीचक्राह्वौमदनोन्मदद्विपपदेकुंभौरतेःकंदुकौ॥कंदौबाहुमृणालिकायुगलयोर्लीलालनासत्फलेनव्यौरत्नसमुद्गकौवहतिसालावण्यपूर्णौस्तनौ॥२॥शुकीचंचूत्ववातछविफलयुगंयौवनतरोरयःशंकुक्षुण्णंमदनकरिणःकुंभयुगलं॥समुद्रंभोगायामृतकलशयुग्मंसुकृतिनःकुचद्वंद्वंतन्व्यानवनखपदांकंविजयते॥३॥क्रयोरप्यैतौ॥मृदंगिकठिनौतन्विपीनौसुमुखिदुर्मुखौ॥अतस्ववबहिर्यातौत्हृदयात्तेपयोधरौ॥४॥तन्वंग्यास्तनयुग्मेनमुखंनप्रकटीकृतं॥हारायगुणिनेस्थानंनदत्तमितिलज्जया॥५॥काठिन्यमंगैरखिलैर्निरस्तंकुचौयुवत्याःशरणंजगाम॥अधःपतिष्यावइतीवभीत्यानशक्नुवस्तावपिहातुमेतत्॥६॥यन्नभातितदंगेषुलावण्यमतिसंभृतं॥पिंडीकृतमुरोदेशेतत्पयोधरतांगतं---- ॥७॥एकावलीकलितमौक्तिककैतवेनतन्व्याःसमुन्नतपयोधरयुग्मसेवां॥चक्रुर्मनांसियमिनामतिनिर्मलानिकंदर्पमुक्तशरपातरुतांतराणि॥८॥कस्या०

अथकंचुकी

उपरिपीनपयोधरपातितापरकुटीवमनोभवभूपतेः॥विजयि
नस्त्रिपुरारिजिगीषयातवविराजतिभामिनिकंचुकी॥१॥इतिकं

अथहारः

मणिहारलताविभातितन्व्याःस्तनसिंहासनसीम्निनस्थिवांसं
॥अभिषेक्तुमनंगदेवराजंगलशंखवाङ्कलितेवदुग्धधारा॥१॥

अथमध्यदेशः

वपुःप्रकर्षादुपचीयमानस्तनद्वयस्योद्वहनश्रमेण॥अत्यंतका
र्श्यंवनजायताक्ष्यामध्येजगामेतिममैषतर्कः॥१॥कुमारदास
स्य॥कांचीगुणैर्विरचिताजघनेषुलक्ष्मीर्लब्ध्वास्थितिःस्तन
तटेषुचरत्नहारैः॥नोभूषितावयमतीवनितंविनीनांकार्श्यंनि
रर्गलमधार्यतमध्यभागैः॥२॥रत्नाकरस्य॥स्फुटमसद्व
लग्नंतन्विनिश्चिन्वतेतेतदनुपलभमानास्तर्कयंतोऽपिलोकाः
॥कुचगिरिवरयुग्मंयद्विनाधारमास्तेतदिहमकरकेतोरिंद्रजा
लंप्रतीमः॥३॥स्मरमानसिकसमस्यात्स्यास्तनिमानिरवधि
र्मध्यः॥श्रीरेवपूरयतियांनगिरांदेवीनचापिगुरुरस्याः॥४॥

अथवलित्रयं

मध्यत्रिवलीत्रिपथेपीवरकुचचत्वरेषुधवलदृशां॥छलयति
मदनपिशाचःपुरुषंहिमनागपिस्खलितं॥१॥एकमेवबलिं
बध्वाजगामहरिरुन्नतिं॥तन्व्यास्त्रिवलिबंधेपिसैवमध्यस्य
नम्रता॥२॥कयोरप्येतौ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७॥

अथरोमावली

गंभीरनाभिह्रदसन्निवेशेरराजतन्वीनवरोमराजिः॥सुरेवंदुभी
तस्तनचक्रवाकद्वंद्वोज्झिताशैवलमंजरीव॥१॥लक्ष्मीधरस्य
॥अमुष्मिन्लावण्यामृतसरसिनूनंमृगदृशःस्मरःसर्वप्लुष्टः
पृथुजघनभागेनिपतितः॥यदंगांगाराणांप्रशममपिशुनानाभिकु
हरेशिखाधूमस्येयंपरिणमतिरोमावलिमिषात्॥२॥कस्यापि॥

दृत्तंमयापद्मिदंनवयौवनाय त्वंसत्वरंकुचनशैशवसाधये
ति॥कामस्यहस्तलिखिताःक्षरमालिकेव रोमावलीविजय
तेजलजेक्षणायाः॥३॥पयोधरस्तावदयंसमुन्नतोरसस्यवृ
ष्टिःसविधेभविष्यति॥ अतःसमुद्गच्छतिनाभिरंध्रतोविसारिरोमा
लिपिपीलिकाऽऽवलिः॥४॥उत्तुंगस्तनपर्वतादवतरद्गंगेवहारा
वलीरोमालीनवनीलनीरजरुचिःसेयंकलिंदात्मजा॥जातं
तीर्थमिदंसुपुण्यजनकंयत्राऽनयोःसंगमश्चंद्रोमज्जतिलांछ
नाऽपहृतयेनूनंनखांकच्छलात्॥५॥समुदितकुचकुंभमंगना
यात्हृदयमनंगमनंगजोधिशेते॥ तदविलपद्वंधनायरोमा
वलिरिहशृंखलिकाविलोक्यतेयत्॥६॥उद्वृत्तस्तनभारएषतर
लेनेत्रेतथाभ्रूलतेरागाधिष्ठितमोष्ठपल्लवमिदंकुर्वंतुनामव्य
थां॥सौभाग्याक्षरपंक्तिकेवलिखितापुष्पायुधेनस्वयंमध्य
स्यापिकरोतितापमधिकंरोमावलीकेनसा॥७॥स्वर्णावदा
तद्युतिकायकांडेसंपूर्णपीयूषमयूखसुरव्यः॥ एणीदृशःपृ
ष्ठविलंबिवेणीबिंबःपुरोराजतिरोमराजी॥ इतिरोमावली॥

॥अथनाभिः॥

मन्येसमानलावण्यसारगर्भेमृगीदृशां॥ अपूरयित्वेवगतोना
भिरंध्रचतुर्मुखं॥१॥कुचकुंभौसमालंब्यतरीतुंकांतिनिम्नगां॥प्र
माद्दस्ततोभ्रष्टादृष्टिर्नाभौनिमज्जति॥२॥कयोरप्येतौ॥ इतिना·

अथनितंबः

तांनितंबस्यनिंदंतिदृष्टिंपरजनांगनाः॥कांचीनवनवग्रंथिप्रथ
मेनकदर्थिता॥१॥बिल्हणस्य॥सकथंनस्पृहणीयोविषयरतैः
स्मिन्नितंबविन्यासः॥ध्यातात्मनापिविहितोविश्वसृजागौरवंयत्र
॥२॥

अथजघनं

वपुरनुपमंनाभेरूर्ध्वंविधायमृगीदृशोललिततलितैरंगन्यासैः

पुरारभसायदिवं॥ तदनुसहसाखिन्नेनेवप्रजापतिनाभृशंपृथुलपृथुलास्थूलस्थूलाकृताजघनस्थली॥१॥जघनस्थलीघटकस्य॥ नस्यापद्मपलाशाक्ष्यास्तन्व्यास्तज्जघनंघनं॥दृष्ट्वंसखीभिर्याभिःस्ताःपुंभावंमनसाप्युः॥२॥वाल्मीकेः॥अथोरुः॥ पश्यन्हतोमन्मथबाणपातैःशक्तोविधातुंननिमील्यचक्षुः॥उरूविधात्राहिकथंकृतौतौविन्यासतस्याःसुमतेर्वितर्कः॥३॥ कुमारदासस्य॥मन्येतदूरूसंभाव्यहस्तसर्वस्वहारिणौ॥वहेतःपृष्यतोहोतामतंगत्वेमतंगजाः॥४॥बिल्हणस्य॥इति॰

अथजंघे

जंघेतदीयेसंतापंयज्ञानस्यानुरागिणः॥जनयांचक्रतुस्तीव्रंतत्रहेतुर्विलोमता॥१॥ शाकवृद्धेः॥ हेममंजीरमालाभ्यांभातिजंघालताद्वयं॥ लावण्यायकृतास्थानंकुंकुमेनेवसुभ्रुवं॥२॥ इति॰

अथचरणयुगलं

अमूल्यस्यममस्वर्णतुलाकोटिद्वयंकियत्॥इतिकोपादिवाताम्रंपादयुग्मंमृगीदृशः॥१॥ जाग्रतःकमलालक्ष्मींयज्जग्राहतदद्भुतं॥पादद्वयस्यमत्तेभगतिस्तेयेनुकास्तुतिः॥२॥बिल्हणस

अथनखश्रेणिः

तस्याःपादनखश्रेणीशोभतेनतसुभ्रुवः॥रत्नावलीवलावण्यरत्नाकरसमुद्गताः॥१॥बिल्हणस्य॥ त्वद्वक्त्रेनेत्रपद्मप्रकटितमसकृत्स्पर्धितंयन्मयैतज्जातंतस्मात्सकृत्वंग्रहणमविततंजाड्यमेतःकलंकः॥ तत्सर्वंक्षम्यतांमेपुनरपिनकरोम्येवमुक्त्वानुतस्यागाढंलग्नःशशांकस्त्वरणनखमणिच्छद्मनापादयुग्मं॥२॥कस्यापि॥इतिनखश्रेणिः॥ छ ॥ छ ॥ छ ॥

अथगमनं

सलीलमिवमायातीकामिनीगजगामिनी॥उन्नतांघ्रिनखज्योतिःपुष्पैर्भुवमिवार्चति॥१॥मारयंत्याजनंसर्वंनिरागमनसंख्यया॥मातंगानांगतिर्याहकृताहगासीदसंशयं॥२॥इतिग॰

अथकांतिः

सुंदरीसातवत्येषविवेकःकेनजायते॥प्रभामात्राहितरलंहष्यतेतत्रनाश्रयः॥१॥ दंडिनः॥अवयवेषुपरस्परबिंबितेष्वतुलकांतिषुराजतितत्तयोः॥अयमयंप्रविभागइतिस्फुटंजगतिनिश्चिनुतेचतुरोपिकः॥२॥भीमसिंहपंडितस्य॥ इतिश्रीशार्ङ्गधरविरचितायांपद्धत्यांसामान्यशृंगारेतरुणीपृथगवयववर्णनं.

अथसमग्रस्त्रीस्वरूपवर्णनं

सादृष्टायैववादृष्टाहृषिताःसममेवते॥हृदयंहृतमेकेषामन्येषांचक्षुषोःफलं॥१॥प्रभाकरदेवस्य॥ अवलोकनमपिसुखयतिकुवलयदलंचारुनयनायाः॥किंपुनरमृतसमानंसरभ°समालिंगनंतस्याः॥२॥ कस्यापि॥स्तनयुगमतीवतुंगंनिम्नोमध्यःसमुन्नतंजघनं॥इतिविषमेवहरिणाक्ष्यावपुषितवेकइवनस्खलति॥३॥मुखेनचंद्रकांतेनमहानीलैःशिरोरुहैः॥पादाभ्यांपद्मरागाभ्यांरेजेरत्नमयीवसा॥४॥सन्यस्तभूषापिनवैवनित्यंविनापिहारंहसतीवकांत्या॥मदंविनापि°स्खलितीवभावैर्वाचंविनाव्याहरतीवदृष्टा॥५॥व्यासस्य॥तद्वक्त्रंयदिमुद्रिताशशिकथातच्चेत्स्मितंकासुधातच्चक्षुर्य°दिहारितंकुवलयैस्ताच्चेद्गिरोधिङ्मधु॥धिक्कंदर्पधनुर्भ्रुवौयदिचतेकिंवाबहुब्रूमहे यत्सत्यंपुनरुक्तवस्तुविमुखःस्वर्गक्रमोवेधसः॥६॥सौरभ्यंमृगलांछनेयदिभवेदिंदीवरेवक्रतामाधुर्ययदिविद्रुमेतरलताकंदर्पचापेयदि॥रंभायांयदिविप्रतीपगमनंप्राप्तोपमानंतदातद्वक्त्रंतदुदीक्षणंतदधर°स्तद्भ्रूस्तदूरुयुगं॥७॥यतोयतोंगादपयातिकंचुकंततस्ततःस्वर्णमरीचिवीचयः॥यतोयतोस्यानिपतंतिदृष्टयस्ततस्ततःश्यामसरोजवृष्टयः॥८॥अकृतंनितंबभागेक्षामंमध्येसमुन्नतंकुचयोः॥अत्यायतंनयनयोर्ममजीवितमेतदायाति॥॥९॥अव्याजंसुंदरींतांविज्ञानेनाद्भुतेनयोजयता॥उपक

ल्पिता विधात्रा बाणाः कामस्य विषदृग्बंधाः॥१०॥ वेणी विडंबयति मत्तमधुव्रतालीमंगीकरोति गुणमैंदवमास्यमस्याः॥ बाहू मृणाललतिकाश्रियमाश्रयेते पुंखानपुंखवयदि कामशरात्कटाक्षः॥११॥ कालिदासस्यैते॥ तदा तदंगस्य बिभर्त्ति विभ्रमं विलेपनामादमुचः स्फुरद्रुचः॥ दरस्फुरत्कांचनकेतकीदलात्सुवर्णमभ्यस्यति सौरभं यदि॥१२॥ ——·——— गार्ग्यगोत्रासन्नमहादेवतनूजशार्ङ्गधरपंडितस्य॥ आलोक्य चिकुरनिकरं सततं सुमनोधिवासयोग्यं ते॥ कामोनिलं निसंगं परिवृत्य परामृशति साशंकः॥१३॥ कामराजस्य॥ भ्रूयुग्मसुचैर्धनुरुज्झितज्याबाणः कटाक्षाः कुटिला नितांतं॥ तथापि यूनां हृदयं भिनत्ती कोयं विलासो वनिताजनस्य॥१४॥ भ्रूपल्लवं धनुरपांगतरंगितानि बाणा गुणः श्रवणपालिरिति स्मरेण॥ तस्यामनंगजयजंगमदेवतायामस्त्राणि निर्जितजगंति किमर्पितानि॥१५॥ जयदेवस्य॥ वेणी वेल्लणसंगणं किमु वलन्नेणीदृशो मध्यमं संख्यानं किमिदं विवृत्ति विषमा ह्रासः स्तनाछूंसते॥ नृत्यंतीव किमंतिके वलितयोः स्निग्धा दृशो कांतयः साकूतस्मितगर्भितं किमु सुरसं वक्तुं सखीं वांछति॥१६॥ शार्ङ्गधरस्य॥ इति श्रीबृहच्छार्ङ्गधरविरचितायां पद्धत्यां सामान्यशृंगारेसमस्तस्त्रीस्वरूपवर्णनं परिच्छेदः॥ ७ ॥ ७ ॥ ७ ॥७॥

अथ विप्रलंभशृंगारे प्रियप्रस्थानावस्थाकथनं॥

मनसि निविशते सकोपि नायः प्रणयिनि बाहुलतांतरस्थितेपि॥ सरसिजमकरंदगंधबंधुर्वहति यदैव शनैः शनैः समीरः॥१॥ आयाते श्रुतिगोचरं प्रियतमप्रस्थानकाले जनात्तस्यां तस्थितपातदाननमलेंहप्राचिरं मुग्धया॥ सोच्छ्वासं हृढमन्युनिर्भरगलद्वाष्पांबुधौतं तया स्वं वक्त्रं विनिवेश्यभर्तृहृदये निःशब्दकं रुद्यते॥२॥ कस्यापि॥ गंतुर्विवलदुदयेत्हृदयेश्वरस्य भस्त्रूपपत्सि निनदश्रमजातकंपा॥ निर्झंजलैरशिशिरैर्नयनाब्जजातैः

कांतानदंसशिखरेपतितैर्जहार॥३॥सूक्तिसहस्रात्॥कांतेकं॰
थंचिद्गदितंप्रयाणेक्षणंविनम्राविरहार्दितांगी॥ ततस्तमालोक्य
कृत्वागतोसीत्यालिंग्यमुग्धामुदमाससाद॥४॥ लज्जांविहाय
रुदितंविधृतःपटांतेमागास्त्वमित्युदितमश्रुलवोश्रुरेतस्ताः
॥स्थित्वापुरःपतितमेवनिवर्तनायप्राणेश्वरेव्रजतिकिंनकृ
तंकृशांग्याः॥५॥दृष्टःकातरनेत्रयाचिरतरंबद्धांजलिं याचि॰
तःपश्चादंशुकपल्लवेनविधृतोनिर्व्याजमालिंगितः॥इत्याक्षि॰
प्यसमस्तमर्थमघृणोगंतुंप्रवृत्तःशठःपूर्वंप्राणपरिग्रहोदयित
यामुक्तस्ततोवल्लभः॥६॥अमरुकस्य॥ यामीतिप्रियपृष्टायाः
प्रियायाःकंठवर्त्मनि॥ वचोजीवितयोरासीत्पुरोनिःसरणेरणः॥
॥७॥लग्नानांशुकपल्लवेभुजलतानद्वारदेशेर्पितानोवापादयुगे
तयानिपतितंतिष्ठेतिनोक्तंवचः॥कालेकेवलमंबुदालिमलिते
गंतुंप्रवृत्तशठस्तन्व्याबाष्पजलौघपूरितनदीपूरेणरुद्धःप्रियः
॥८॥अमरुकस्य॥प्रहरविरतौमध्येवाह्नस्ततोपिपरेणवाकिं
मुतसकलेजातेप्यह्निप्रियत्वमिहैष्यसि॥इतिदिनशतप्राप्यं
देशंप्रियस्यपिपासतोहरतिगमनंबालालापैःसबाष्पगलज्ज
लैः॥९॥भुलज्जलवासुदेवस्य॥ दूरंसंदरिनिर्गतासिनगरादे
षद्रुमःसीरवानस्माद्देवनिवर्त्स्यतामितिशनैरुक्ताध्ववेगेनप्रि
यां॥गाढालिंगनवक्रितस्तनतटाभोगस्फुटत्कंचुकंवीस्यो
रस्यलमश्रुपूरितदृशःप्रस्थानभंगःकृतः॥१०॥कस्यापि॥इ
तिश्रीवृ॰शा॰वि॰पद्धत्यांविप्रलंभशृंगारेप्रियप्रस्थानावस्थाक थनं॰

अथनायिकांप्रतिनायकवचनादिकथनं

स्मर्तव्योहंत्वयाकांतेनस्मरिष्याम्यहंतव॥स्मरणंचेतसोधर्म
स्तच्चेतोभवताहृतं॥१॥स्मर्तव्यावयमिंदुसुंदरमुखिप्रस्ता॰
वतोपित्वयासत्यंनाथयदिप्रसाद्यतिविधिर्जातिस्मरत्वंमम॥
एकस्मिन्नपिजन्मनिप्रियतमेजातिस्मरत्वंकथंप्राणाःपौं॰
यसमंत्वयैवचलिताःकाद्यापिजन्मैकता॥२॥कस्यापि॥इ॰

अथनायकंप्रतिनायिकोक्तिः

गच्छगच्छसिचेत्कांतपंथानःसंतुतेशिवाः॥ममापिजन्मतत्रैव
भूयाद्यत्रगतोभवान्॥१॥सहिष्येविरहंनाथदेह्यदृश्यांजनंमम
॥यदक्तनेत्रंकंदर्पःप्रहर्तुमांनपश्यति॥२॥एतौदंडिनः॥लोलै
र्लोचनवारिभिःसशपथैःपादप्रणामैःप्रियैरन्यास्ताविनिवारयं
तिकृपणःप्राणेश्वरंप्रस्थितं॥पुण्याहंव्रजमंगलंसुदिवसःप्रातः
प्रयातस्यतेयत्स्नेहोचितमीहितंप्रियमयातंनिर्गतःश्रोष्यसि॥३॥

अथनायकंप्रतिसखीवाक्यं

याबिंबोष्ठरुचिक्वचिद्द्रुममणिःस्वप्नेपितांलब्धवान्हासश्रीःसह
शैस्तयोभिरपिकिंमुक्ताफलैर्भूपते॥तत्कांतिःशतशोपिवन्हि
तपनैर्हेम्नःकृतःसेत्स्यतिस्यत्कारत्नमयींप्रयासिदयितांकस्मै
धनायाध्वगाः॥१॥शिवस्वामिनः॥उद्यद्बर्हिषिदर्दुरारवसुधि
प्रक्षीणपांथासुषिश्च्योतद्विमुषिचंद्रमुषिसखेहंसद्विषिप्रावृ
षि॥मामामुंचकुचाग्रसंततपतद्बाष्पाकुलांबालिकांकाले
कालकरालनीलजलदव्यालुप्तभास्वत्त्विषि॥२॥बाणभट्टः॥मु
ग्धेमुग्धतयैवनेतुमखिलःकालःकिमारभ्यतेमानंधत्स्वधृतिं
बधानऋजुतांदूरेकुरुप्रेयसि॥सख्यैवंप्रतिबोधिताप्रतिवचस्त
माहभीताननानीचैःशंसहृदिस्थितोहिननुमेप्राणेश्वरःश्रो
ष्यति॥३॥इतिश्रीवृहच्छार्ङ्ग·धरविरचितायांपद्धत्यांविप्रलंभ
शृंगारेनायकंप्रतिनायिकावचनादिकथनपरिच्छेदः॥७॥७॥

अथविरहिण्यवस्थावर्णनं

शशभृन्नवपल्लवेशशांकेमकरंदस्रुतिवारुणीसरोजे॥अपिचा
स्यमरुद्गणास्त्रसूतेतिलकुसुमस्फुटचंपकोच्चदाम्नि॥१॥कस्या
पि॥विश्रम्यविश्रम्यनवद्रुमाणांछायासुतन्वीविचचारकाचि
त्॥तन्नूत्तरीयेणकरोत्थृतेननिवारयंतीशशिनोमयूखान्॥२॥
कस्यापि॥अस्तामितविषयसंगामुकुलितनयनोत्पलासुदुःश्व
सिता॥ध्यायतिकिमप्यलक्ष्यंनित्यंयोगाधियुक्तेव॥३॥कस्यापि

परिम्लानं पीनस्तनजघनसंगादुभयतस्तनोर्मध्यस्यांतः परि
मलनमप्राप्य हरितं॥ इदं व्यस्तन्यस्तं श्लथभुजलताक्षेपवल
नैः कृशांग्याः संतापं वदति बिसिनीपत्रशयनं॥४॥ श्रीहर्षस्य
॥ दह्यमानोपि हृदये मृगाक्ष्या मन्मथाग्निना॥ स्नेहस्तथैव व॰
यत्तस्यौतदाश्चर्यमिवाभवत्॥५॥ शकवृद्धेः॥ लिखति न ग
णयति लेखा निर्भरबाष्पांबुधौतगंडस्तला॥ अवधिदिवसाव
सानं मा भूदिति शंकिता बाला॥६॥ मोरिकायाः॥ प्रयातेस्तं भा
नौ श्रितशकुनिनीडेषु तरुषु स्फुरत्संध्यारागे शशिनि शनकै
रुल्लसति च॥ प्रियप्रत्याख्यानाद्द्विगुणविरहोत्कंठितदृशा तदा
ख्यं तन्व्या मरणमपि यत्रोत्सवपदं॥७॥ भल्लाटस्य॥ सातोर
णांतिकमुपेत्य दिशोवलोक्य निःश्वस्य दीर्घमुपधाय करं क
पोले॥ मत्वा च तं पुरतएव ससंभ्रमादज्ञात्वा सनेत्रलिखिते
व न किं किमासीत्॥८॥ पृथ्वीधरस्य॥ भ्रातः पांथ पथि त्वया न
पथिकः कश्चित्समासादितो बालेनेकशतानि कीदृश इति सं
ख्यायतां वल्लभः॥ यं दृष्ट्वा प्रमदाजनस्य भवतः स्फारे मुदा लो
चने सज्जे यो दयितो ममेति पथिका यावेद्य मोहं गता॥९॥ रथ्या
रजोरुणितधूसरितांगयष्टे कश्चित्पितुः स्मरसि पुत्रक निर्घृण
स्य॥ मुक्तैवमंकगतमायतमायतास्या पांथस्त्रिया प्ररुदितं क
रुणं दिनांते॥१०॥ कयोरप्येतौ॥ तन्वंग्या गुरुसन्निधौ नयनजं
यद्वारि संस्तंभितं तेनांतर्गलितेन मन्मथशिखी सिक्तो वियोगोद्भ
वः॥ मन्ये तस्य निरस्यमानकिरणस्यैषा मुखेनोद्गता श्वासा सा
ससमालिखंति सरणिव्याजेन धूमावली॥११॥ कस्यापि॥ मु॰
ग्धाः श्वाससमागते प्रियतमे तत्पाणिसंस्पर्शनं रोमांचांचित
याशरीरलतया संभाव्य कोपात्किल॥ मा मा वल्लभ संस्पृशेति
सहसा शून्यं वदंती मुहुः सख्या तो हसिता सचिंतमसकृत्सं
शोषितामल्पुतः॥१२॥ रुद्रस्य॥ एतानि निःसहतनोरसमंजसा
नि शून्यं मनः पिशुनयाति गतागतानि॥ एते च तीरतरवः प्रथ

यंतितापमालंबितोजिततरुग्लपिनैःप्रवालैः॥१३॥कालिदा
सस्य॥शीघ्रंभूमिगृहेगृहाणवसतिंप्राणैःकिमुत्क्रीडसिप्रास्तं
पश्यसिकिंनदैवहतिकंज्योत्स्नांगवाक्षोदरे॥इत्थंमन्मथती
व्रसंज्वरजुषांगेहेषुवामभ्रुवामुज्ञच्छंतिकुरंगलांछनभया
ह्रीनासखीनांगिरः॥१४॥बिल्हणस्य॥शय्यापुष्पमपीपराग
मयतांगंगार्पणाद्स्तुतेताम्यत्यंतिकतालवृंतनलिनीपत्राणि
दाहोष्मणा॥न्यस्तंचस्तनमंडलेमलयजंशीर्णांतरंदृश्यतेक्वा
थाद्वाम्बुभवंतिकानिलसुखाभूषामृणालांकुराः॥१५॥मदनद
हनशुष्यत्कांतकांताकुचांतर्नवमलयजपंकेगाढबद्धाखिलां
घ्रिः॥उपरिविततपक्षोलसतेलिर्निमग्नःशरइवकुसुमेषोरेष
पुंखावशेषः॥१६॥ननीतमुपनासिकंपरिमलव्यपाशंकयान
हंतविनिवेशितंविरहवन्हिकुंडेहृदि॥दृशोर्बहिरितिश्रुतौन
निहितंप्रियप्रेषितंकरेकमलमर्पितंमृगदृशादृशापीयते॥१७
मुहुर्व्यजनवीजनैःसरसचंदनासेचनैःसरोजदलवेष्टनैरपि
नचेष्टतेसुंदरी॥तथापितवनामनिप्रियसखीभिरावेदितेनिवे
दयतिजीवितंश्रवणसीम्निरोमोद्गमः॥१८॥सोन्मेषोनसखी
जनःपरिजनःप्रागल्भ्यभूमिर्नवावात्सल्याद्पिभावितस्फु
टवयोवस्थाविशेषोगुरुः॥आयातानवमल्लिकापरिमलक्रू
राःशरद्वासराःकस्याख्यातुनितंबिनीपितृगृहावस्थानदुस्थं
जनु॥१९॥वयोनव्यंस्वांतंविषयतरलंहंतससतंप्रियोदूरेदेशेज
नकनगरंदुर्लभतरं॥जनश्चायंदुष्टोभृशमिदमनर्थायसत
तंकथंकारंपारंकथयसखियामोऽस्यवयसः॥२०॥ज्योत्स्ना
मौक्तिकदामचंदनरसःशीतांशुकांतद्रवःकर्पूरंकदलीमृणाल
वलयान्यंभोजिनीपल्लवाः॥अंतर्मानसमास्त्वयाप्रभवतात
स्याःस्फुलिंगोत्करव्यापा-रायभवंतिहंतकिमनेनोक्तेनब्रू
महे॥२१॥अछिन्नंनयनांबुबंधुषुकृतंतापःसखीष्वाहितोन्य
स्तंदैन्यमशेषतःपरिजनेचिंतागुरुभ्योर्पिता॥अद्यश्वःखलु

निर्वृत्तिंव्रजतिसाश्वासैःपरंखिद्यतेविश्रब्धोभवविप्रयोगजनितंदुःखंविभक्तंतया॥२२॥कार्श्यंचेत्प्रतिपत्कलाहिमरुचःस्थूलैवचेत्सांडिमालीनाश्चवमृणालिकाय – द्विगुनबोध्यःकियानंबुधिः॥संतापोयदिशीतलोहुतवहस्तस्याःकियद्वर्ण्यतांकिंतुत्वत्स्मृतिमात्रमेवशरणंलावण्यशेषंवपुः॥२३॥उन्मीलंतिनखैर्लुनीहिवहतिक्षौमांचलेनावृणुक्रीडाकाननमाविशंतिवलयक्वाणैःसमुत्त्रासय॥इत्थंमंजुलदक्षिणानिलकुहूकंठीषुसांकेतिकव्याहाराःसुभगत्वदीयभवनेतस्याःसखीनांमिथः॥२४॥वीणामंकेकथमपिसखीप्रार्थनाभिर्विधायस्वैरंरत्यांस्मरसिजदृशागानुमारब्धमेव॥तंत्रीबुध्याकिमपिविरहक्षीणदीनांगवल्लीमेनामेवस्पृशतिबहुशोमूर्छनाचित्रमेतत्॥२५॥लतामूलेलीनोहरिणपरिहीनोहिमकरःस्खलन्मुक्ताकारागलतिजलधाराकुवलयात्॥धुनीतेबंधूकंतिलकुसुमजन्माहिपवनोगृहद्वारेपुण्यंपरिणमतिकस्यापिकृतिनः॥२६॥मरालश्रेणीभिर्निपतमुपनीतंसफलतांगतिस्पर्धावैरंमृदुकलरवैरंबुजदृशः॥यदेतान्शृण्वंत्याःप्रियविरहवत्याःकृशतनोरगादस्यास्तंभादहहगतिसंभावनमपि॥२७॥अधिदेहलिहंतहेमवल्लीशरदिंदुःसरसीरुहेशयालुः॥अधिखंजनचंचुमौक्तिकालीफलितंकस्यसुजन्मनस्तपोभिः॥२८॥अनुदिनमधिकंतेकंपतेकायवल्लीशिवशिवनयनांतेनाश्रुधाराजहाति॥कथयकथयकोयंयत्कृतेकोमलांगीत्यजतिनपरिणद्धंपांडिमानंकपोलः॥२९॥सहचरिशपथाःशतंमदीयावद्विरहालयितांनिजामवस्थां॥सहचरिपरिपृच्छभानुकन्यानवदलिनीनलिनीनिकुंजशय्याः॥३०॥किंगतेनयदिसानजीवतिप्राणितिप्रियतमातथापिकिं॥इङ्गुदीस्यनवमेघमालिकांनप्रयातिपथिकःस्वमंदिरं॥॥३१॥नलिनीदलतालवीजनंसखितन्व्याविनिवारितंमया॥

तन्नुवल्लिविभूतिशंकयाविनिवार्यः श्वसितानिलः कथं॥ ३२॥
प्राणेशातव विरहिणी हिमकरकिरणेषु हर्म्यमिलितेषु॥ सं
तापनिःसहांगी मुंचति निचयं चकोराणां॥ ३३॥ हारावशेष
नन्नु कंठनालात्वन्नामशेषा रसना त्वदीया॥ लावण्यशेषात
नुगात्रयष्टिस्त्वद्यानशेषं परमं तद्वायुः॥ ३३॥ दाक्षिण्यं मलया
निलस्य विदितं शैत्यं सुधादीधितेर्वाचामेव न गोचरो मलयज
स्यापि स्फुटं सौष्ठवं॥ विश्लेषे तव केन मे परिचिताः प्राणेश त
त्तत्कया विस्फारेषु नरप्रमाणयति मामव्याहतेयं तनुः॥ ३५॥
पावद्यावद्भवति कलया पूर्णकायः शशांकस्तावत्तावत्
द्युतिमयवपुः क्षीयते सा मृगाक्षी॥ मन्ये धाता घटयति विधुं
सारमादाय तस्यास्तस्माद्यावन्न भवति सखे पूर्णिमा तावदेहि
॥ ३६॥ अजनि प्रतिदिनमेषा कर्दमशोषा मदंगसंगेन॥ प्रतिनि
शमपूरि यया दक्षिणसंपातिभिः सलिलैः॥ ३७॥ पंचत्वं तनुरेतु
भूतनिवहः स्वंस्वं विशत्वालयं याचे त्वां द्रुहिण प्रणम्य शिर
सा भूयोपि बध्वांजलिं॥ तद्वापीषु पयस्तदीयमुकुरे ज्योतिस्त
दीयालय व्योम्नि व्योम तदीयवर्त्मनि धरा तत्तालवृत्ते निलः॥ ३८
पिकाली वाचाली भवति बहुधालीकवचने मृणाली व्याली
व व्यथयति तरामंगमनिशं॥ विषज्वालाजालं सखि किरति
पीयूषकिरणो जगत्प्राणः प्राणानपहरति केयं परिणतिः॥ ३९॥
नायं मुंचति सुभ्रु वामपि तन्नुत्यागे वियोगज्वरस्तेनाहं विहितां
जलिर्यदुपते पृच्छामि सख्यं वद॥ तांबूलं कुसुमं पटीरमुदकं
यद्बंधुभिर्दीयते स्यात्तत्रैव परत्र तत्किमु विषज्वालावलीदुःस
हं॥ ४०॥ दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोत्युत्सुकं गाढं
प्रेमनवं वयोतिकठिनाः प्राणाः कुलं निर्मलं॥ स्त्रीत्वं धैर्यविरो
धि मन्मथसुहृत्कालः कृतांतोक्षमी नो सख्यश्चतुराः कथं नु
विरहः सोढव्य एषो मया॥ ४१॥ सर्वत्तत्वविबोधधवलकुसुमवसी
पूषवन्मिश्रव यान्यासन्भजति प्रिये मृगदृशोथप्रस्थिते तत्क्षणा
त्॥

गेहंतन्मुकुरंतदेवबलयंतत्चंदनंसानिशाकारावत्करवाल
वत्क्रकचवल्लीलालवकालवत्॥४२॥ घनीयंचेदंचेदुपरिवि
किरन्चंदनरसानुद्दारान्नैहारीसरिदुरसिहारीभवतिवा॥ स
मंतान्मार्णोलीचिरसुपवनालीमिलतिवातदप्यस्यास्तापोहरि
विरहजः किंविरमति॥४३॥ केशैःकोमलमालिकामपिचिरंया
बिभ्रतीखिद्यतेयागात्रेषुघनंविलेपितमपिन्यस्तंनवोढुंसमा
॥दीपस्यापिशिखांनचापिभवनेस्वन्येपियावीक्षितंतापंसावि
रहानलस्यमहतःसोढुंकथंशिक्षति॥४४॥ उद्धूयेततनूलते
तिविसिनीपत्रेणनोवीज्यतेस्फोटःस्यादितिनागकेमलयज॰
क्षोदांभसासिच्यते॥स्यादस्यातिभरात्सराभवद्गतित्रासान्न
वापल्लवारोपोवक्षसितत्कथंबरतनोराधिःसमाधीयतां॥४५॥
श्वासान्मुंचतिभूतलेविलुठतित्वन्मार्गमालोकतेदीर्घरोदिति
विक्षिपत्यविरतंक्षामांभुजावल्लरीं॥ किंचप्राणसमानकांक्षि
तवतीस्वप्नेपितेसंगमंनिद्रांवांछतिनप्रयच्छतिपुनर्दग्धोवि
धिस्तामपि॥४६॥ हेतालिसंतापनिवृत्तयेस्याःकिंतालवृंतंत
दलीकरोषि॥ उत्तापएषोंतरदाहहेतुर्नतभ्रुवोनव्यजनायनो
द्यः॥४७॥ अपसारयघनसारंकुरुहारंदूरएवकिंकमलैः॥अ
लमलमालिमृणालैरितिवदतिदिवानिशंबाला॥४८॥ अंगा
निमेदहतुकांतवियोगवन्हिःसंरक्ष्यतांप्रियतमोत्हृदिवर्त
तेयः॥ इत्याद्यापाशशिमुखीगलदश्रुवारिधाराभिरुष्णमभि
षिंचतित्हृत्प्रदेशं॥४९॥ स्निग्धेयत्परुषासियत्प्रणमतिस्तब्धा
सियद्रागिणिद्वेषस्यासियदुन्मुखेविमुखतांयातासितस्मिन्
प्रिये॥ तद्युक्तंविपरीतकारिणितवश्रीखंडचर्चाविषंशीतांशुस्त
पनोहिमंहुतवहःक्रीडानुदोयातनाः॥५०॥ गृहीतंतांबूलंप
रिजनवचोभिःकथमपिस्मरत्यंतःशून्यासुभगतवमूर्तिंप्रति
दिनं॥ तथैवास्तेहस्तःकलितफणिवल्लीकिसलयस्तथैवासी
तस्याःक्रमुकफलतालीपरिगतं॥५१॥ अपिमरणमुपैतिसा

मृगांकेविलसतिकैवकस्यारसांतरस्य॥ अपिकथमधुनादधा
तुशांतिंविषमशरज्वरतीव्रदेहदाहः॥५२॥ कोदंडोविशिखोमनो
निवसतिःकामस्यतस्याअपिभ्रूवल्लीनयनांचलंमनसितेवासः
समुन्मीलति॥ इत्थंसाम्यविधौतयोःप्रभवतिस्वामिन्तथास्ति
त्यवांतन्वानातनुतांक्रमाद्तनुतांनैषायथागच्छति॥५३॥
विरहविषमःकामःकामंतनुंकुरुतेतनुंदिवसगणनादक्षश्चा
यंव्यपेतघृणोयमः॥ त्वमपिवशगोमानव्याधेर्विचिंतयनाथ
हेकिसलयमृदुर्जीवत्येवंकथंप्रमदाजनः॥५४॥ अयंविपा
कोवदकस्ययूनःकल्याणिकल्याणपरंपराणां॥ यदक्षिको
णस्रवदच्छधाराहारावतारोगुणमंतरेण॥५५॥ आहारेवि
रतिःसमस्तविषयग्रामेनिवृत्तिःपरानासाग्रेनयनंतदेतदपरं
यच्चैकतानंमनः॥ मौनंचेदमिदंचशून्यमखिलंयद्विश्वमा
भातितेतद्ब्रूयाःसखियोगिनीकिमसिभोःकिंवावियोगिन्यसि
॥५६॥ अनयनयथेप्रियेनव्यपायपथाहृश्यएवदुःप्रायो॥मू
नैवकेवलंनिशितपनशिलावासरेज्वलति॥५७॥ सासर्व
थैवरक्तारागंगुंजेवनमुखेनवहति॥ वचनपटोस्तवरागः
केवलमास्येशुकस्येव॥५८॥ नसवर्णोनचरूपंनसंस्क्रि
यानैवसाप्रकृतिः॥ बालात्वहिरहापद्जातापभ्रंशाभावेव
५९॥ साविरहदहनदूनामृत्वामृत्वापि — जीवतिवराकी॥ सारीव
कितवभवतानुकूलितापातिताक्षेण॥६०॥ दुल्लहजणाणुरा
ओलज्जागुरुईपरवसोअप्पा॥ पिअसहिविसमंपेम्मंमरणं
सरणंणवरमेक्कं॥६१॥ राकासुधाकरकरैर्नलिनीदलैश्चनी
हारहारघनसारभरैःकिमेतैः॥ किंवाभयेनहरिचंदनपंकसे
कैर्नत्वांविनामृगदृशःपरितापशांतिः॥६२॥ केकाभिःकलयं
तुकेकिनिवहाःसंभूयकर्णज्वरंविद्युद्भिःसहभीषयंतुपरि
तःपायोधराणांघटाः॥ पंचेषुर्वधिरीकरोतुककुभःसर्वाःशराणां
रवैर्नाहंदग्धदुरंतजीवनकृतेकस्यापिवश्यासखि॥६३॥ ॥

आयाता जलदावली सरभसं विद्युत्समालिंगिता शैलानां परितः सशब्दमहिभुक्श्रेणी नरीनृत्यति ॥ एवं सत्यपि हंत संप्रति पतिर्देशांतरं प्रस्थितस्तद्दुःखं विनिवेद्यतां सखि कथं केस्याधुनाग्रे मया ॥ ६४ ॥ गुंजंति प्रतिकुंजमंबुजदलद्रोणीषु भृंगांगनाः फुल्लत्पुष्परसालवीथिशिखरे कूजंति माद्यत्पिकाः ॥ कामः काममयं करोति विशिखैर्हंतुं मुहुर्दुर्दिनका सा तन्मलयानिलस्य सखि मे भीतिस्त्वयोद्भाव्यते ॥ ६५ ॥ शोकोत्पत्तिरशोकतः सुमनसोय हि मनस्योदयो वैरस्यं च रसालतो विकलता तावत्कलानां निधेः ॥ किं चान्यज्जलदो भवत्यनलदो निर्णीतमुन्नीयते वामः केवलमेक एव न भवानस्यामशेषं जगत् ॥ ६६ ॥ अगारेस्मिन् कांते गिरिशप्रनिशानाथशकलं भुजंगानुत्तुंगान् सकलमपि वानायन पश्ये ॥ निकुंजेषु श्येनानधिगृहशिरो राहुवलये लिखंत्या नीयंते शिव शिव तया हंत दिवसाः ॥ ६७ ॥ आलीभिः सह भाषितं किमपि तद्भूर्मापि संवीक्षितं पंचेषुः कुसुमैरपूजि कयमप्याधाय चित्तं मनाक् ॥ नेनापि प्रियचेत्तथामपि कृपाकार्पण्यमालंबसे प्राणेश प्रबलं तदत्र निखिलं तत्प्रातिकूल्यं विधेः ॥ ६८ ॥ अकस्मादेकस्मिन्पथि सखि मया सुवनतटं व्रजंत्या दृष्टो यो नवजलधरश्यामलतनुः ॥ स दृग्भंग्या किं वाकुरुत न हि जाने तत इदं मनो मेव्यालोलं क्वचन गृहकृत्ये न वलते ॥ ६९ ॥ हंत कांतमपि तं दिदृक्षते मानसं मम न साधु यत्यते ॥ इंदुरिंदुमुखि मंदमारुतश्चंदनं च वितनोति वेदनां ॥ ७० ॥ तुष्यंतु मच्छिद्रमवाप्य शत्रवः करोतु मे शास्तिमरं गृहेश्वरः ॥ मणिस्तकवक्षोरुहमध्यभूषणं ममास्तु सौंदर्यनिकेतनं प्रियः ॥ ७१ ॥ स्वामी क्रुप्यति कुप्यतां परिजना निंदंतु मामन्यवत्किं तावत्प्रथतामयं तु जगति प्रौढो ममोपद्रवः ॥ आशास्यं पुनरेतदेव यदिदं चक्षुश्चिरं वर्धतां येनेदं परिचीयते मुररिपोः सौंदर्यसारं वपुः ॥ ७२ ॥ त्वामंजनीयति कलासु विलोकयंती त्वां शृण्वती कुवलयीयति कर्णपूरं ॥ त्वां पूर्णिमाविधुमु-

खीत्वद्विभावयंतीवक्षोनिलीननवनीलमणीकरोति ॥७३॥
गायतिगीतेसतिवावंशीवादयतिसाविपंचीषु ॥ पाठयतिपंजर
शुकंतवसंदेशाक्षरंरामा ॥७४॥ निःस्नेहंपतिरुज्झिताकरुणाय
श्वश्रूरजस्रंवृथावाग्बाणैर्हृदयंभिनत्तिकलहोत्तालाःपुनर्यात
रः ॥ नित्यंनिंदतिनैवनंदतिकदाप्येषाननांदापितन्मातःकंशर
णंव्रजामितरुणीदीनाहमेकाकिनी ॥७५॥ कांतःकृतांतचरितः
कुटिलातदंबावज्रोपमानिवचनानिचदुर्जनानां ॥ प्रत्यंगमंत
रतनोःप्रहरंतिबाणाःप्राणाःपुनःसखिवहिर्नखलुप्रयांति ॥
७६॥ आलिवालिशतंयावलिरस्मैदीयतांवलिभुजेनकदा
पि ॥ केवलंहिकलकंठशिशूनामेषएवकुशलेषुनिदानं ॥७७
नहारंनाहारंकलयतिविहारंविषमिवस्मरंतीसारामासुभग
भवतश्चागमदिनं। परंक्षीणादीनापरमसुखहीनासुवदना
कुहूपक्षग्लौवच्चपलनयनांगीकृतगतिः ॥७८॥ इतिश्रीवृह°
शार्ङ्गे·७२विरचितायांपद्धत्यांविप्रलंभशृंगारेविरहिण्यवस्थाव
र्णनं

अथसखीकर्तृकमानापनोदः

मुग्धेमानंनतेकर्तुंयुक्तंप्राणाधिकेप्रिये ॥ धत्तेमत्सीकियत्का
लंजीवितंजीवनंविना ॥१॥ सखेवाऽन्यगृहेगृहेयुवतयस्ताःपृ
च्छगत्वाऽधुनाप्रेयांसःप्रणमंतिकिंतवपुनर्दासोयथावर्तते
॥ आत्मद्रोहिणिदुर्जनप्रलपितंकर्णेऽनिशंमाकृथाश्छिन्नस्ने
हरसाभवंतिपुरुषादुःखाऽनुवृत्त्यापुनः ॥२॥ इतिसखीकर्तृ°

अथप्रियनर्मोक्तयः

अपूर्वंचौर्यमभ्यस्तंत्वयाचंचललोचने ॥ दिवैवजाग्रतांपुंसांचे
तोहरसिदूरतः ॥१॥ उचितंगोपनमनयोःकुचयोःकनकाऽद्रि
कांतितस्करयोः ॥ अवधीरितविधुमंडलमुखमंडलगोपनं
किमिति ॥२॥ केशाःसंयमिनःश्रुतेरपिपरंपारंगतेलोचनेत्वं
तर्वक्त्रमपिस्वभावशुचिभिःकीर्णंद्विजानांगणैः ॥ मुक्तानांस
ततंनिवासरुचिरंवक्षोजकुंभद्वयमित्थंतन्विवपुःप्रशांतमपि

तेरागंकरोत्येवनः॥३॥बालेतवाऽधरसुधारसपानकालेचेतोमदीयमभिवांछतिशेषभावं॥आलिंगनेतवविरोचनपीनभावमाखंडलत्वमपिवस्तांऽगनिरीक्षणेते॥४॥कमलाक्षिविलंब्यतांक्षणंकमनीयेकचभारबंधने॥दृढलग्नमिदंदृशोर्युगंशनकैरथसमुद्धराम्यहं॥५॥कुतःकुवलयंकर्णेकरोषिकलभाषिणि॥किमपांगमपर्याप्तमस्मिन्कर्मणिमन्यसे॥६॥इति·

अथनायककर्तृकमानाऽपनोदः

इंदीवरेणनयनंमुखमंबुजेनकुंदेनदंतमधरंनवपल्लवेन॥अंगानिचंपकदलैःसविधायवेधाःकांतेकथंघटितवानुपलेनचेतः॥१॥आक्षिपसिकर्णमक्ष्णाबलिरपिबद्धस्त्वयात्रिधामध्ये॥इतिजितसकलवदान्येतनुदानेलज्जसेसुतनु॥२॥मोहान्मयासुतनुपूर्वमुपेक्षितस्तेयोबाष्पबिंदुरधरंपरिबाधमानः॥तंतावदाकुटिलपक्ष्मविलग्नमद्यकांतेप्रमृज्यविगताऽनुशयोभवामि॥३॥इतिनायककर्तृकमानाऽपनोदः॥छ॥

अथनायिकांप्रतिसखीवचनं॥

पक्ष्माग्रग्रथिताश्रुबिंबनिकरैर्मुक्ताफलस्पर्धिभिःकुर्वंत्याहरहासहारित्वदपेहारावलीभूषणं॥बालेबालमृणालनालवलयालंकारकांतेकरेविन्यस्याननमायताक्षिसुकृतीकोयंत्वयास्मर्यते॥१॥कस्यापि॥आसन्नामवलंब्यकेसरलतामेकेनपुष्पोज्वलंसव्यंनिःसहयानितंबफलकेकृत्वाकरांभोरुहं॥आमीलंनयनावनान्तसलिलंम्लाघ्यस्यनिद्रस्यवाकस्येदंहृढसौत्वदंप्रतिदिनंदीनंत्वयास्मर्यते॥२॥अलसचलितैःप्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैःक्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः॥त्वद्धृदयनिहितंभावाकूतंवमद्भिरिवेक्षणैःकथयसुकृतीकोयंमुग्धेत्वयाऽद्यविलोक्यते॥३॥अमरुकस्य

उज्जृंभाननमुल्लसत्कुचतटंलोलद्भ्रमद्भ्रूलतंस्वेदांभःस्नपितांगयष्टिविगलद्व्रीडंसरोमांचया॥धन्यःकोपियुवासयस्य

वदनेव्यापारिताःसांप्रतंमुग्धेदुग्धमहाब्धिफेनपटलप्रख्याःकटाक्षच्छटाः॥४॥धनिकस्य॥आमिविमद्नःश्रीमानेषत्वपारद्दिलस्यतेकिमपिसुमुखीव्यग्रासीतिव्रजामिनिजालयं॥यदपिमकरोद्धस्तात्सौध्यंकरेचशरासनंतदपिपरितोहृष्टिर्दैयाजनःसखिनागरः॥५॥हनूमतः॥मुग्धेदोलैतिकोनिधायनकृतोह्रीपरोधस्त्वयालग्नानोनुदतोगतासिरभसातस्योत्तरीयांशुके॥कालेस्मिन्कुसुमाकरेद्विगुणितप्रेमोत्सवेरागिणांगच्छन्नग्रतएवमूढहृदयेमुक्तस्त्वयावल्लभः॥६॥दोलैतिकाभीमस्य॥विश्रांतोदिवसस्तटीमयमटत्यस्ताचलास्यांप्रभानूसंप्रत्यंकुरितांधकारपटलैर्लेबालकाद्यौरभूत्॥एत्यंतर्विशावेश्मनःशशिमुखीद्वारस्थलीतोरणस्तंभालंबितबाहुवल्लिनुदतीकिंत्वंपथःपश्यसि॥७॥रुदितपंडितस्य॥गोपायंतीविरहजनितंदुःखमग्रेगुरूणांकिंत्वंमुग्धेनयनविधृतंबाष्पपूरंरुणत्सि॥नक्तंनक्तंनयनपटलैरेषआर्द्रीकृतस्तेशय्येकांतःकथयतिदशामातपेशोष्यमाणा॥८॥मुखंपांडुच्छायंनयनयुगलंबाष्पतरलंतनुःक्षामक्षामागतमविशदंधैर्यविगमः॥क्रियंमुक्तामूढकथयसिनमेसारवचनान्यवस्थायेनेवंतवसखिमुहूर्तेनपनिताः॥९॥आहारेविरतिःसमग्रविषयग्रामेनिवृत्तिःपरानासाग्रेनयनंयदेतदपरंयच्चैकनिष्ठंमनः॥मौनंचेदमिदंचशून्यमखिलंयद्विश्वमाभातितेतद्ब्रूयाःसखियोगिनीकिमसिभोःकिंवावियोगिन्यसि॥१०॥राजशेखरस्य॥इतिश्रीवृहच्छार्ङ्गधरविरचितायांपद्धत्यांविप्रलंभशृंगारेनायिकांप्रतिसखीवचनपरिच्छेदः॥४॥

अथवियोगिनीप्रलापः

प्रस्थानंवलयैःकृतंप्रियसखैरस्त्रैरजस्त्रंगतंधृत्यानक्षणमासितंव्यवसितंचित्तेनगंतुंपुरः॥यातुंनिश्चितचेतसिप्रियतमेसर्वेसमंप्रस्थितागंतव्येसतिजीवितप्रियसुहृत्सार्थःकिमुत्सृज्यते॥१॥अमरुकस्य॥स्वयमप्रासदुःखोयःसदुनोतिनविस्मयः॥त्वंस्मरप्रासद

ह्योपिदहसीतिकिमुच्यते॥२॥कस्यापि॥वरमसौदिवसोनपु
नर्निशानतुनिशैववरंनपुनर्दिनं॥उभयमेवसखिव्रजतुक्षयं
प्रियतमेननयत्रसमागमः॥३॥कस्यापि॥अरतिरियमुपैतिमां
ननिद्रागणयतितस्यगुणान्ननोनदोषान्॥विगलतिरजनीन
संगमाशाव्रजतितनुस्तनुतांनचानुरागः॥४॥विल्हणस्य॥पं
चत्वंतनुरेतुभूतनिवहःस्वंस्वंविशांतालयंयाचेत्वांद्रुहिणप्रण
म्यशिरसाभूयोपिबध्वांजलिं॥तद्वापीषुपयस्तदीयमुकुरेज्यो
तिस्तदीयालयव्योम्निव्योमतदीयवर्त्मनिधरातत्तालवृंतेनि
लः॥५॥आकाशपोलेः॥हारोनारोपितःकंठेस्पर्शसंरोधभीरु
णा॥इदानीमंतरेजाताःसरित्सागरपर्वताः॥६॥वाल्मीकमुनेः
॥मुग्धस्यतेवदविधुंतुदकिंवदामिकिंमुक्तवानसिमुखेपतितं
शशांकं॥अस्यार्धबिंबगलितेनसुधारसेनसंधानमेतिनवकिं
नरजत्कबंधः॥७॥बिल्हणस्य॥रिपुपुरिस्तखीसंवासोयंशि॰
खीवहिमानिलोविषमिवसुधारश्मिर्यस्मिन्नुनोतिमनोगते॥
हृदयमदयेतस्मिन्नेवंपुनर्बलमेवलात्कुवलयदृशांवामः॰
कामोनिकामनिरंकुशः॥८॥जयदेवस्य॥विरमतविरमतसख्यो
नलिनीदलतालवृंतपवनेन॥हृदयगतोयंवन्हिर्झटितिकदा
चिज्ज्वलत्येव॥९॥कस्यापि॥विभेमिसखिसंवीक्ष्यभ्रमरीभू
तकीटकं॥तद्ध्यानाद्रागतेपुंस्त्वेतेनसार्धंरतिःकथं॥१०॥कस्या
पि॥याःपश्यंतिप्रियंस्वप्नेधन्यास्ताःसखियोषितः॥अस्माकं
तुगतेकांतेगतानिद्रापिवैरिणी॥११॥कस्यापि॥यास्यामीति
समुद्यतस्यवचनंविश्रब्धमाकर्णितंगच्छन्दूरमुपेक्षितोमुहु
रसौव्यावृत्यतिष्ठन्नपि॥तच्छून्येपुनरागतास्मिभवनेप्राणास्त
एवस्थिताःसख्यस्तिष्ठतिजीवितव्यसनिनीदंभादहंरोदि॰
मि॥१२॥कस्यापि॥इदानींतीव्राभिर्दहनइवभाभिःपरिवृता
ममाश्चर्यंसूर्यःकिमुसखिरजन्यामुदयते॥अयंमुग्धेचंद्रःकि
मितिमयितापंप्रकटयस्यनाथानांबालेकिमितिविपरीतंनभवति

॥१३॥ पुष्टिकस्य॥ यात्रामंगलसंविधानरचनाव्यग्रे सखीनां ग
णे वाच्यां भापिहिते जने गुरुजने तद्वस्तुत्तन्मंडले॥ प्राणेशस्य
मदीक्षणार्पितदृशः कृच्छ्राद्गतिक्रामतः किंव्रीडाहतया मया भुज
लतापाशो न कंठेर्पितः॥१५॥ कस्यापि॥ इतिश्रीबृहच्छार्ङ्गधरवि
चितायां पद्धत्यां वियोगिनीप्रलापपरिच्छेदः॥ ७॥ ७॥ ७॥

अथनायकंप्रतिदूतीप्रेषणं

अपूजितैर्वा खलु गिरींद्रकन्याकिंपक्षपातेन मनोभवस्य॥ यद्य
स्ति दूतीसरसोक्तिदक्षा दासः पतिः पादतले वधूनां॥१॥ बिल्हण
स्य॥ दूती त्वं तरुणीयुवा स चपलः श्यामास्तमोभिर्दिशः संदेशः स
रहस्य एव विपिनं संकेतकावासकः॥ भूयो भूय इमे वसंतमरुतः
श्वेतो नयंत्यन्यथा गच्छ क्षेमसमागमाय निपुणं रक्षंतु ते देवताः॥२
॥कस्यापि॥ ननु संदिशेति सुदृशोदितया त्रपया न किंचन किल
भिदधे॥ निजमैक्षि मंदमनिशं निशितैः कृशितं शिरीषशरीरशरैः
॥३॥ माघकवेः॥ प्राणेश विज्ञप्तिरियं मदीया तत्रैव नेया दिवसाः कि
यंतः॥ संप्रत्ययोग्यस्थितिरेष देशः केलायदिंदोरपि तापयंति॥
॥४॥ वल्लभस्य॥ जीवामीति वियोगिनी यदि वदेत्तेनैव वृत्ता कथा
अद्यश्वोथ मरिष्यतीति मरणे कालात्ययः किंकृतः॥ आगंतव्यमि
हेति संप्रति सर्वसंभावना निःफला भ्रातः संप्रति या हि नास्ति लि
खितं तद्धि यत्ते क्षमं॥५॥ लोहितकस्य॥ अनलस्तंभनविद्यां
सुभगवन्नियतमेव जानासि॥ मन्मथशराग्नितप्ते हृदि मे कथ
मन्यथा वसति॥६॥ कस्यापि॥ उल्लंघ्यापि सखीवचः समुचिता
मुत्सृज्य लज्जामलं भीत्वा भीतिभरं निरस्य च निजं सौभाग्यगर्वं
मनाक्॥ आं ज्ञां केवलमेव मन्मथगुरोरादाय नूनं मया त्वं निःशे
षविलासिगर्वगणनाचूडामणिः संभृतः॥७॥ इतिश्रीबृहच्छा
र्ङ्गधरविरचितायां पद्धत्यां नायकं प्रति दूतीप्रेषणपरिच्छेदः॥

अथवियोग्यवस्थावर्णनप्रलापाख्याने

दैवैरंतरितः शतैश्च सरितामुर्वीरुहां काननैर्यत्नेनापि न याति लो

चनपर्यंकांतेतिजातन्नपि॥उद्ग्रीवश्चरणार्धरुद्धवसुधःशोन्मृज्यसास्रेदृशौतामाशांपथिकस्तथापिकिमपिध्यायन्मुहुर्वीक्षते॥१॥कस्यापि॥सातन्वीतिघनस्तनीतिविकसन्नीलाब्जनेत्रेतिचस्वैरंसंचरतीतिवक्तिमधुरांवाचंविचित्रामपि॥इत्थंविद्रुमपाटलाधरपुटांसीमंतिनींध्यायतोरोमांचोनुदितंस्मितंप्रलपितंपांथस्यसंजायते॥२॥कस्यापि॥प्रियाविरहितस्यास्यहृदिचिंतासमागता॥इतिमत्वागतानिद्राकेकृतघ्नमुपासते॥३॥शीलाभट्टारिकायाः॥कर्पूरांबुनिषेकभाजिस्मरसंरंभोजिनीनांदलैरास्तीर्णोपिविवर्तमानवपुषःस्वस्तस्रसीसंस्तरे॥मंदोन्मेषदृशःकिमन्यद्भवत्साकाव्यवस्थातदायस्याचंदनचंद्रचंपकदलश्रोण्यादिवह्नीयते॥४॥त्रिविक्रमस्य॥इति०॥

अथवियोगिनीप्रलापाः

यदिप्रियावियोगेपिरुध्यतेदीनदीनकं॥तदिदंदग्धमरणमुपयोगंक्वयास्यति॥१॥दग्धमरणस्य॥दिव्यचक्षुरहंजातःसरागेणापिचक्षुषा॥इहस्थोयेनपश्यामिदेशांतरगतांप्रियां॥२॥दौर्यमित्रस्य॥नपुंसकमितिज्ञात्वाप्रियायैप्रेषितंमनः॥तत्तुतत्रैवरमतेहताःपाणिनिनावयं॥३॥कस्यापि॥नूनमयंमेपापःकांताविरहोरसायनोभूतः॥वर्षसहस्राभ्यधिकान्नयामिकथमन्यथादिवसान्॥४॥भ्रमयजलदानंभोगर्भांस्त्वमोचयचातकान्कलयशिखिनःकेकोत्कंठान्कठोररयकेतकान्॥विरहिणिजनेमूर्छांलब्ध्वाविनोदयतिव्यथामकरुणपुनःसंज्ञाव्याधिविधांवकिमोहसे॥५॥भवभूतेः॥जानेकोपपराङ्मुखीप्रियतमास्वप्नेपिदृष्टामयामामांसंस्पृशपाणिनेतिरुदतीगंतुंप्रवृत्तातः॥नोयावत्परिरभ्यचाटुवचनैराश्वासयामिक्षणंभ्रातस्तावदहंशठेनविधिनानिद्रादरिद्रीकृता॥६॥निद्रादरिद्रस्य॥तप्तेमहाविरहवह्निशिखावलीभिरापांडुरस्तनघनेहृदयेप्रियायाः॥मन्मार्गवीक्षणनिवेशितदीनदृष्टेर्नूनंछुमिच्छुमिति

वाष्पकणाःपतंति ॥७॥ कमच्छमिकाररत्नस्य ॥ नमेदुःखंप्रि
यादूरेनमेदुःखंहृतेतिसा ॥ इतिनिश्विस्यशोचामिवयस्तस्यातिव
र्तते ॥८॥ वाल्मीकमुनेः ॥ इतोविद्युत्पुंजस्फुरितमसकृज्ज्ञापयति
मामितः केकानेकाहरतिह्रदयंनिर्दयमिदं ॥ इतःकामोवाणः
प्रहरतिमुहुःपुंखितशरोगतासित्वंदूरेचपलनयनेप्रेयसियतः
॥९॥ श्रीगोविंददेवानां ॥ केशोकेशरमालिकामपिचिरंयाबिभ्र
तीखिद्यतेयागात्रेषुघनंविलेपनमपिस्तन्यँनसोढुंक्षमा ॥ दी
पस्याशिखिनांनवासभवनेशक्नोतियावीक्षितुंतापंसाविरह
नलस्यमहतःसोढुंकथंशक्ष्यते ॥१०॥ कस्यापि ॥ अपसरतिनच
क्षुषीमृगाक्षीरजनिरियंनचयातिनैतिनिद्रा ॥ प्रहरतिमदनोतिदुः
खितानांगतबहुशोविमुखीभवंत्युपायाः ॥११॥ त्रिविक्रमस्य ॥
ह्रदिबिशलताहारोनायंभुजंगमनायकःकुवलयदलश्रेणीकंठे
नसागरलद्युतिः ॥ मलयजरजोनेदंभस्मप्रियाविरहितेमयिप्र
हरनहरभ्रांत्यानंगक्रुधावससि ॥१२॥ पाणौमाकुरुचूतसायकम
मुंमाचापमारोपयक्रीडानिर्जितविश्वमूर्छितजनाघातेनकिंपौ
रुषं ॥ तस्याएवमृगीदृशोमनसिजप्रेंखत्कटाक्षाशुगश्रेणीज
र्जरितंमनागपिमनोनाद्यापिसंधुक्षते ॥१३॥ जयदेवस्यैतौ ॥ य
दिस्मरामितांतन्वींजीविताशाकुतोमम ॥ अथविस्मृत्यजीवा
मिजीवितव्यसनेनकिं ॥१४॥ कस्यापि ॥ पादांगुष्ठेनभूमिंकिश
लयरुचिनासापदेशंलिखंतीभूयोभूयःक्षिपंतीमपिसितशब
लैर्लोचनैर्लोलतारे ॥ वक्त्रंह्रीनम्रमीषत्स्फुरदधरपुटंवाक्यगर्भं
दधानायन्मांनोवाचकिंचित्स्थितमपिपुरतोमानसंतंदुनोति ॥
॥१५॥ कस्यापि ॥ व्रीडायोगान्नतवदनयासन्निधानेगुरूणांबद्धो
त्कंपस्तनकलशयोर्मन्युमंतर्निगृह्य ॥ तिष्ठेत्युक्तंकिमपिनतया
यत्समुत्सृज्यबाष्पंमय्यासक्तश्चकितहरिणीहारिनेत्रत्रिभागः
॥१६॥ नेत्रत्रिभागब्रह्मयशास्विनः ॥ याताःकिन्नमिलंतिसुंदरिपु
नश्चिंतामयामत्कृतेनोकार्यासुतरांकृशासिकथयत्येवंसबा

ध्येमपि॥ लज्जामंथरतारकेण निपतत्पीताश्रुणा चक्षुषा दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः॥१७॥ कांतामुखं सुरतकेलिविमर्दखेदसंजातघर्मकणविच्छुरितं रतांते॥ आपांडुरं विलसदूर्ध्वनिमीलिताक्ष्यं संस्मृत्य रे हृदय किं शतधा न यासि॥१८॥ अद्यापि तस्य चलकुंडलघृष्टगंडं वक्त्रं स्मरामि विपरीतरताभियोगे॥ आंदोलनश्रमजलस्फुटसांद्रबिंदुमुक्ताफलप्रकरविच्छुरितं प्रियायाः॥१९॥ अमरुकस्य॥ निद्रार्धमीलितदृशो मदमंथराणि नाप्यर्थवंति न च नाम निरर्थकाणि॥ अद्यापि मे मृगदृशो मधुराणि तस्यास्तान्यक्षराणि हृदये किमपि ध्वनंति॥२०॥ अद्यापि तां कनकचंपकदामगौरीं फुल्लारविंदवदनां तनुरोमराजीं॥ सुप्तोत्थितां मदनविह्वललालसांगीं विद्यां प्रमादगलितामिव चिंतयामि॥२१॥ अद्यापि सा मनसि संप्रति वर्तते मे रात्रौ मयाक्षुतवति क्षितिपालपुत्र्या॥ जीवेति मंगलवचः परिहृत्य कोपात्कर्णे कृतं कनकपत्रमनालपत्या॥२२॥ बिल्हणस्यैते॥ आसन्नमार्गमतिलंघ्य न तेन मूर्ध्ना पश्चात्प्रसंगवलितेन मुखेन यांत्या॥ आरोपिताः कति पयेमपि पंकजास्याः साकूतहासमनतिप्रकटाः कटाक्षाः॥२३॥ कस्यापि॥ मुखं तस्याः स्मितस्मेरं किंचिदंचलसंवृतं॥ मंदालोकनलोलाक्षं स्मृत्वा मन्ये सुधां बुधाः॥२४॥ शार्ङ्गधरस्य॥ इति श्रीबृहच्छार्ङ्गधरविरचितायां पद्धत्यां वियोग्यवस्थावर्णनपरिच्छेदः॥ ७॥ ॥

अथ नायकस्याग्रे दूत्युक्तिः॥

सा सुंदर तव विरहे सुतनुरियन्मात्रलोचना सपदि॥ एतावतीमवस्थां याता दिवसैः कियन्मात्रैः॥१॥ रुद्रस्य॥ अंगेनंगज्वरहुतवहश्चक्षुषि ध्यानमुद्रा कंठे जीवः करकिशलये दीर्घलोलः कपोलः॥ अंसे वेणी कुचपरिसरे चंदनं वाचि मौनं तस्याः सर्वं स्थितमपि तनु त्वां विना क्वापि चेतः॥२॥ क्षेमेंद्रस्य॥ गृहीतं तांबूलं परिजनवचोभिः कथमपि स्मरस्यांतःशून्या सुभग विगता या

मपिनिशि॥ तथैवास्ते हस्तः कलितफणिवल्लीकिशलयस्तथैवास्यं तस्याः क्रमुकफलफालीपरिचितं॥३॥ बिल्हणस्य॥ कुसुमशयने प्यंगं नाम्यस्यनंगविवर्तनैर्वदनपवनैः श्यामच्छायो बभूव सखीजनः॥ हृदयनिहितः शीतोलेपः स्वामीतिरवं करोत्यहह कठिनावस्था तस्यास्त्वयैवमुपेक्षते॥४॥ कस्यापि॥ गलत्येका मूर्छा भवति पुनरस्यापदनयो किमप्यासीन्मध्ये सुभगसकलायामपिनिशि॥ लिखंत्यास्तत्तस्याः कुसुमशरलेखां तव कृते समाप्तः स्वस्तीति प्रथमपदभागोपि न गतः॥५॥ कस्यापि॥ गेहाद्गणमंगणाद्पि बहिर्बाह्याश्च पृथ्वीतलं तामार्तिर्यदि वेत्ति सैव सुमुखी किं वान्यदाचक्ष्महे॥ पर्यंकोपि तवांगसंगसुभगः स्वेदांभसा निर्भरैर्धारामंडपनामनीयत तया तस्मिन्लुठंत्या मुहुः॥६॥ कस्यापि॥ तस्यां महाविरहवह्निशिखाकलापतप्ते लितोसित्हृदयेसततं प्रियायाः॥ प्रालेपशीकरसमेत्वहृदि साकृपालो बालाक्षणं वसति नैव खलु त्वदीये॥७॥ कस्यापि॥ दृष्टे चंद्रमसि प्रलून तमसि व्योमांगणे स्वेच्छया सिस्फूर्जन्निर्मलतेजसि त्वयि गते दूरं निजप्रेयसि॥ श्वासः कैरवकोरकीयति मुखं तस्याः सरोजीयति क्षीरोदीयति मन्मथो मृगदृशो दृक्चंद्रकांतीयति॥८॥ भल्लाटस्य॥ आवासो विपिनायते प्रियसखीमालापि जालायते तापो निःश्वसितेन दावदहनज्वालाकरालायते॥ सापि त्वद्विरहेण हंत हरिणीरूपायते हा कथं कंदर्पोपि यमायते विरचयन् शार्दूलविक्रीडितं॥९॥ क्षणमपि विरहः पुरा न सेहे नयननिमीलनखिन्नया नयाते॥ वसति कथमसौ रसालशाखां चिरविरहेण विलोक्य पुष्पितायां॥१०॥ जयदेवस्यैतौ॥ अंगानि मेद्रहतु कांतवियोगवह्निः संरक्ष तां प्रियतमो हृदि वर्तते यः॥ इत्याशया शशिमुखी गलदश्रुवारिधाराभिरुष्णमभिषिंचति हृत्प्रदेशं॥११॥ कस्यापि॥ सखीभिस्सां याचे त्ववनतशिरस्त्वामिदमहं न चेदस्ति प्रीतिः कुरु तदपि कारुण्यकणिकां॥ अवस्थामातस्याःसु

कृतमयमस्यांकिमपरंप्रमोह्योविश्रामस्त्वमथमरणंवामतिकृ
तिः॥१२॥गौडाभिनंदस्य॥अछिन्नंनयनांबुबंधुषुकृतंतापः
सखीष्वाहितोदैन्यंन्यस्तमशेषतःपरिजनेचिंतागुरुभ्योर्पि
ता॥अद्यश्वःकिलनिर्वृतिंव्रजतिसाश्वासैःपरंखिद्यतेविस्र
ब्धोभवतिप्रयोगजनितंदुःखंविभक्तंतया॥१३॥अमरुकस्य
त्वंचिंतापरिकल्पितंसुभगसासंभाव्यरोमांचिताशून्यालिंग
नसंचलद्भुजयुगेनात्मानमालिंगति॥किंचान्यद्विरहव्यथा
प्रशमनींसंप्राप्यमूर्छांचिरात्प्रत्युज्जीवतिकर्णमूलपठितैस्त्वन्ना
ममंत्राक्षरैः॥१४॥कस्यापि॥नीरागामृगलांछनेमुखमपिस्वं
नेक्षतेदर्पणेत्रस्ताकोकिलकूजितादपिगिरंनोन्मुद्रयत्यात्मनः
॥चित्रंदुःसहदाहदायिनिधृतद्वेषापिपुष्पायुधेसाबालासुभ
गंप्रतिप्रतिपदंप्रेमाधिकंपुष्यति॥१५॥कस्यापि॥उन्मीलंतिन
खैर्लुनीहिवहतिक्ष्मोमांचलेनावृणुक्रीडाकाननमाश्रयंतिव
लयक्वाणैःसमुत्त्रासय॥इत्थंवंजुलदक्षिणानिलकुहूकंठेषु
सांकेतिकव्यापाराःसुभगत्वदीयविरहेतस्याःसखीनांमिथः
॥१६॥सल्कविमिश्रस्य॥वर्षंतिस्तनयित्नवोनसरलेधारागृहे
वर्ततेगर्जंतिप्रतिकूलवादिनिनतेद्वारस्थितादंतिनः॥इत्थं
गमितोघनव्यतिकरःसाराजपुत्रीपुनःसर्वाधूतकदंबपुष्पसु
रभौकेनप्रतार्यते॥१७॥उमापतिधरस्य॥संप्राप्तेविधिवा
सरेक्षणमसुंत्वद्वर्त्मवातायनंवारंवारमुपेत्यनिःकृपतयानि
श्चित्यकिंचिच्चिरं॥संप्रत्येवनिषेधकेलिकुररीःसास्त्रंसखीभ्यः
शिशोर्माधव्याःकलहारकेनकरुणाःपाणिग्रहोनिर्मितः॥१८॥
॥कस्यापि॥विमुंचंत्याःप्राणांश्चिरविरहदुःखासहतयातथा
संदिष्टस्तेकठिनहृदयापश्चिममिमं॥अपत्यंबालैकाममवि
धिहतायाःसलिलदायथानेयंसेवाव्यसनरुचयेदीयतइति
॥१९॥कस्यापि॥किंपृष्टेनद्रुततरमितोगम्यतांसाप्रियात्तेदृष्टा
मार्गे.दिवसमखिलंसाश्रमेकामयेवं॥दृष्टेदृष्टेत्वमितिरभसोत्थी

वमालोकयंतीपृष्ठेपृष्ठेनभवतिभवानित्युदस्तुर्वलंती॥२०॥ कस्यापि॥ चित्रोत्कीर्णादपिविषधराङ्गीतिभाजोनिशायांकिंतद्रूमस्त्वदभिसरणेसाहसंनाथतस्याः॥ ध्वांतेयोत्पादयतिनिभृतंचालयत्सप्रकाशाश्वासात्माणिःपथिफणिफणारत्नरोचिर्व्यधायि॥२१॥ हरिहरस्य॥ संकेतकुंजभुविसाशयनोपधानंव्यालंकृतंसुभगकुंडलिनंनवेद॥ तत्कंठलग्नघनचंदनगंधलुब्धस्तत्रैवनिश्चलसुवासचिरायसोपि॥२२॥ कस्यापि॥ मागच्छप्रमदाप्रियप्रियशतैरभ्यार्थितस्त्वंमयाबालाप्रांगणमागतेनभवताप्राप्तोत्सवच्छापरं॥ किंवास्याःकुचभारनिःसहतरैरंगैरनंगाकुलैस्तुद्यत्कंचुकजालकैरनुदिनंनिःसूत्रमस्यःकृतं॥२३॥ मोरिकायाः॥ इतिश्रीवृ॰शा॰पद्धत्यांदूत्युक्तिपरिच्छेदः॥ ७॥

अथनायिकांप्रतिनायकावस्थावर्णनसंदेशास्याने

पदशब्दलीनहृदयोरूपालंकारभावनानिपुणः॥ कविरिववंचितनिद्रस्तरुणितवार्थेपरंसमुद्या॥१॥ कस्यापि॥ विकिरतिमुहुःश्वासांनाशाःपुरोमुहुरीक्षतेप्रविशतिमुहुःकुंजान्मुहुर्बहुताम्यति॥ रचयतिमुहुःशय्यांपर्याकुलंमुहुरीक्षतेमदनकदनक्लांतःकांतेप्रियस्तववर्तते॥२॥ सामांद्रक्ष्यतिवक्ष्यतिस्मरकथांप्रत्यंगमालिंगनैःप्रीतिंयास्यतिरंस्यतेसखिसमागत्येतिचिंताकुलः॥ मार्गंपश्यतिवेपतेपुलकयत्यानंदतिस्विद्यतिप्रत्युद्गच्छतिमूर्छतिप्रियतमःकुंतेनिकुंजप्रियः॥३॥ पूर्वंयत्रसमंत्वयारतिपतेरासादिताःसिद्धयस्तस्मिन्नेववनिकुंजमन्मथमहातीर्थेपुनर्वल्लभाः॥ ध्यायंस्त्वामनिशंजयंनपितवैवालापमंत्रावलीभूयस्त्वत्कुचकुंभनिर्भरपरीरंभामृतंवांछति॥४॥ जयदेवस्यैते॥

अथनायिकांप्रतिनायकसंदेशः॥

त्वद्रूपामृतपानदुर्ललितयाहदृष्ट्याक्वविश्राम्यतांत्वद्वाक्यश्रवणाभियोगपरयोःश्राव्यंकुतःश्रोत्रयोः॥ संभिस्त्वत्परिरंभनिर्भररसैरंगैःकथंस्थीयतांकष्टंत्वद्विरहेणसंप्रतिवयंकष्टा मवस्थां

गताः॥५॥कस्यापि॥भ्रूचापेनिहितःकटाक्षविशिखोनिर्मातुमर्मव्यथांश्यामात्माकुटिलंकरोतिकबरीभारोपिभारोद्यमं॥मोहंतावदयंचतन्वितनुतांबिंबाधरोरागवान्सद्वृत्तस्तनमंडलस्तवकथंप्राणैर्ममक्रीडति॥६॥जयदेवस्य॥त्वामालिख्यप्रणयिकुपितांधातुरागैःशिलायामात्मानंतेचरणपतितंयावदिच्छामिकर्तुं॥अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यतेमेक्रूरस्तस्मिन्नपिनहसतेसंगमंनौकृतांतः॥७॥कालिदासस्य॥स्थानान्निर्गत्यदूरंव्रजतिमयिचिरंमुक्तकंठंरुदित्वापश्चादुन्मृज्यनेत्रेप्रणतिमुपगतावेपमानांगयष्टिः॥कांतेयन्मामवोचःप्रलयपवनघटाटोपबद्धांधकारेकालेकापालिकोपिप्रवसतिनगृहात्तन्मनोमेदुनोति॥८॥कस्यापि॥इतिश्रीबृहच्छार्ङ्गधरविरचितायांपद्धत्यांनायिकाप्रतिनायिकावस्थावर्णनसंदेशाख्यानपरिच्छेदः

अथदूत्युपहासप्रश्नो

पार्श्वाभ्यांसप्रहाराभ्यामधरेव्रणखंडिते॥दूतीसंग्रामयोग्यासिनयोग्यादूतकर्मणि॥१॥कस्यापि॥बहुनात्रकिमुक्तेनदूतिमत्कार्यसिद्धये॥स्वमांसान्यपिदत्तानिवस्तुष्वन्येषुकाकथा॥२॥वररुचेरेतौ॥श्वासःकिंत्वरितागतापुलकिताकस्मात्प्रसादःकृतःस्रस्तावेण्यपिपादयोर्निपतनान्नीवीगम्मदागमात्॥स्वेदार्द्रंमुखमातपेनगलितंक्षामाकिमत्रोक्तिभिर्दूतिम्लानसरोरुहाकृतिधरस्योष्ठस्यकिंवक्ष्यसि॥३॥शीलाभट्टारिकायाः॥निःशेषच्युतचंदनंस्तनतटंनिर्मृष्टरागोधरोनेत्रेदूरमनंजनेपुलकितातन्वीतवेदंवपुः॥मिथ्यावादिनिदूतिबांधवजनस्याज्ञातपीडागमावापींस्नातुमितोगतासिनपुनस्तस्याधमस्यांतिकं॥४॥कस्यापि॥रजन्यांतस्यांत्वंसुरतपरिवर्तावनुचितंमदीयंयद्वासःकथमपिहृतंतेनसुहृदा॥त्वयाप्रत्यानीतंनिजवसनदानात्पुनरिदंकुतस्त्वादृग्दूतिस्खलितशमनोपायनिपुणा॥५॥बीजाकरस्य॥किंत्वंनिगूहसेदूतिस्तनौवक्त्रंचपाणिना॥खं

ष्ठिताएवशोभंतेभूराधरपयोधराः॥६॥कस्यापि॥इतिदूत्युप०

अथदूतींप्रतिनायिकाप्रश्नः

उल्लेपयंत्यादयितस्यदूतींबह्वानिवेशंचविभूषयंत्या॥प्रसन्नताकापिमुखस्यजज्ञेवेषश्रियातुप्रियवार्तयातु॥१॥शिवस्वामिनः॥कथयनिपुणेकस्मिन्दृष्टःकथंनुकियच्चिरंकिमभिलषितंकिंतेनोक्तंकदासइहेष्यति॥इतिबहुविधप्रेमालापप्रपंचितविस्तराप्रियतमकथाःस्वल्पेप्यर्थेप्रयांतिननष्टतां॥२॥कस्यापि॥अलमलमघृणस्यतस्यनाम्नापुनरपिसैवकथागतःसकालः॥कथयकथयवातथापिदूतिप्रतिवचनंद्विषतोपिमाननीयं॥३॥वासुदेवस्य॥इतिश्रीवृहच्छा०वि०प०दूत्युपहासप्रश्नपरिच्छेदः॥

अथसंयोगशृंगारेनायिकावलोकननायकदर्शने

प्रियादर्शनमेवास्तुकिमन्यैर्दर्शनांतरैः॥प्राप्यतेयेननिर्वाणंसरागेणापिचक्षुषा॥१॥कस्यापि॥क्षीरसागरकल्लोललोललोचनपानया॥असारोपिहिसंसारःसारवानिवलक्ष्यते॥२॥आकाशपोलेः॥उपप्राकाराग्रंप्रहितनयनेतर्कयमनागनाकाशेकोयंगलितहरिणःशीतकिरणः॥सुधाबद्धग्रासैरुपवनचकोरैरनुसृतांकिरन्ज्योत्स्नामच्छालवलिफलपाकप्रणयिनीं॥३॥कस्यापि॥पुरस्थित्वाकिंचिद्वलितमुखमालोकयसखेसखेदाःस्यास्यंति ध्रुवमिदमदृष्ट्वातवदृशः॥इतश्चंचत्कांचीरणितमुखरात्सौधशिखरादराकायांकेयंकवलयतितीव्रेणमहसा॥४॥कस्यापि॥अयेकेयंलीलाधवलगृहवातायनतलेतुलाकोटिक्वाणैःकुसुमधनुषंजागरयति॥नचत्वंजानीषेत्रिदशतटिनीतीरनिकटेकपालंयस्यास्तेप्रियसहचरीतस्यकृतिनः॥५॥अमृतममृतंचंद्रःस्तथांबुजमंबुजंरतिरपिरतिःकामःकामोवधून्यपि॥इतिनभजतेवस्तुप्रायःपरस्परशांकरंतदियमबलाधत्तेलक्ष्मींकुतःसकलात्मिका॥६॥विनैवांभोवाहंबहुलरुचिलिप्तांबरलतातडिल्लेखाहेमद्युतिविततिरस्याविलसति॥विनैवस्वर्गंगानभः

सिरभसाव्यग्रशफरीपरीवर्तैःसार्धस्फुरतिविकचेंदीवरवनं॥
॥७॥नमःस्तोमःपूर्वंतदनुसकलःशीतकिरणस्ततःकोकद्वंद्वंत
दनुनचकिंचित्पुनरभूत्॥अलंभस्मावर्त्तैतदनुकदलीकांडयु
गलंतवोवीचौपद्मौकिमिदमतिचित्रैवरचना॥८॥वेदबोधेः॥

अथनायकदर्शनं

नजानेसंमुखायातेप्रियाणिवदतिप्रिये॥सर्वाण्यंगानिमेयांतुने
त्रतामुतकर्णतां॥१॥कस्यापि॥काचिन्निवारितबहिर्गमनाजः
नन्याद्रष्टुंप्रियंभवनजालकमाससाद॥तस्याविलोचनमदृश्यत
दाशदत्तपत्रोपरूढशफरोपमितंक्षणेन॥कृच्छ्रेणकापिगुरुणैवजने
नरोधमुल्लंघ्यनायकसमीपमुवंमतस्थे॥हाहंतशीघ्रगमन
प्रतिरोधहेतुस्तस्याःपुनस्तनभरोपिगुरुर्बभूव॥३॥यांयांप्रि
यःप्रैक्षतकातराक्षींसासाह्रियानम्रमुखीबभूव॥निःशंकमन्याः
ससमाहितव्यास्तत्रांतरेजघ्नुरमुंकटाक्षैः॥४॥एतेमाघकवेः
इतिश्रीबृ॰शार्ङ्गधरवि॰प॰संयोगशृंगारेनायिकावलोकननायक
दर्शनप॰

अथनायिकातिथ्यनायिकाप्रश्नौ॥

सज्जितसकलशरीराक्षणेक्षणेमनसिकिमपिगणयंती॥उत्स
वमिवतंदिवसंमनुतेमुग्धाप्रियागमने॥१॥शार्ङ्गधरस्य॥आ
गच्छत्सूचितोयेनयेनानीतोगृहंप्रति॥प्रथमंसरविकःपूज्यः
किंकाकःकिंक्रमेलकः॥२॥सोमकवेः॥आयातेदयितेमरुस्थ
लभुवामुत्प्रेक्ष्यदुर्लंघ्यतांगेहिन्यापरितोष्यदत्तसलिलामासा
न्यदृष्टिंमुखे॥दत्त्वापीलुशमीकरीरकवलांस्वेनांचलेनादरा
दुन्मृष्टंकरभस्यकेसरसटाभारायलग्नंरजः॥३॥अद्भुतपु
ण्यस्य॥बालाचंदनमालिकाकिशलयग्रंथीनधःकुर्वतःस्मु
त्वावल्लभवाहनस्यरटितंदासेरकस्यांगणे॥आकंठंपुलके
वनाद्गुरुजनंनासाग्रसंगादसूत्कातस्त्रीविधपातकात्स्मरम
सत्कीर्तैःपरावर्तयत्॥४॥केचित्कंपितपाणिकंकणरवैःपृष्ठं
तनुस्वागतंव्रीडानम्रमुखाब्जयाचरणयोर्न्यस्तेचनेत्रोत्पले॥

संत्येवात्रगृहेरहोयुवतयस्ताः पृच्छगत्वाधुनाप्रेयांसःप्रणमं
तिकिंतवपुनर्दासोयथावर्तते॥आत्मद्रोहिणिदुर्जनप्रलपितं
कर्णेकृथामाकृथाश्छिन्नस्नेहरसाभवंतिपुरुषादुःखानुवृत्त्या
यतः॥१५॥ आयातःकुमुदेश्वरोविजयतेसर्वेश्वरोमारुतोभृं
गःस्फूर्जतिभैरवोननिकटंप्राणेश्वरोमुंचति॥एतेसिद्धरसाः
प्रसूनविशिखोवैद्योनवद्योत्सवोमानव्याधिरयंकृशोदरि
कथंत्वच्चेतसिस्थास्यति॥१६॥ लिखन्नास्तेभूमिंबहिरवन
तःप्राणदयितोनिराहाराःसख्यःसततरुदितोच्छूननयनाः
॥परित्यक्तंसर्वंहसितपठितंपंजरशुकैस्तवावस्थाचेयंविसृ
जकठिनेमानमधुना॥१७॥पयःपीठंदत्तेत्वरितमभिधत्तेनव
वचःसमाज्ञामाधत्तेशिरसिनविधत्तेचमिलनं॥ इतिस्वांतेगो
पायितनिविडकोपाप्रतिपदंकृशोदर्याश्चर्याप्रियमहहपर्या
कुलयति॥१८॥कृतोदूरादेवस्मितमधुरमभ्युद्गमविधिंशि
रस्याज्ञान्यस्ताप्रतिवचनवत्यानतिमति॥ नदृष्टःशैथिल्यंमि
लितइतिचेतोदहतिमेनिगूढांतःकोपात्कठिनहृदयेसंवृति
रियं॥१९॥मानंमानिनिमुंचमानसभुवःसाम्राज्यमुज्जृंभ
तेहाहागच्छतियामिनीनसमयोयातःपुनःप्राप्यते॥अस्मि
न्नागसिकल्पिताधिकभयेकांतेपदांतानते कोयंकोकिलवा
सिकेलिसमयेकोपस्त्वयालंबितः॥२०॥ इतिश्रीवृहच्छार्ङ्ग
धरविरचितायांपद्धत्यांसंयोगशृंगारेमानिनीमानाख्यानपरि०

अथकलहांतरिताप्रलापसख्युक्तयो

अद्यारभ्ययदिप्रियेपुनरहंमानस्यवान्यस्यवागृण्हीयांविष
रूपिणःशठमतेर्नामापिसंक्षोभिणः॥तत्तेनैवविनाशशांककिर
णस्पृष्टाट्टहासानिशाएकोवादिवसःपयोदमलिनोभूयान्मम
प्रावृषि॥१॥कस्यापि।मानव्याधिनिपीडिताहमधुनाशक्नोमि
तस्यांतिकंनोगंतुंनसखीजनोपिचतुरोयोमांबलान्नेष्यति॥
मानीसापिजनोनलाघवभयादभ्येतिमानःस्वयंकालोयाति

बलंचजीवितमिदंक्षुद्रंमनश्छिन्नया॥२॥निःश्वासावदनंदहतिहृदयंनिर्मूलमुन्मूल्यतेनिद्रानैतिनदृश्यतेप्रियमुखंनक्तंदिवंरुद्यते॥अंगंशोषमुपैतिपादपतितःप्रेयांस्तथोपेक्षितोसख्यःकंगुणमानकल्प्यदयितेमानंवयंकारिताः॥३॥कस्यापि॥इदंकृष्णंकृत्स्नंप्रियतममनुश्वेतमथकिंगमिष्यामोयामोभगवतुगमेनाथभवतु॥पुरायेनैवंमेचिरमनुसृताचित्तपदवीसएवान्योजातःसखिपरिचिताःकस्यपुरुषाः॥४॥गतेप्रेमाबंधेप्रणयबहुमानेविगलितेनिवृत्तेसद्भावेजनइवजनेगच्छतिपुरः॥तदुत्प्रेक्ष्योत्प्रेक्ष्यप्रियसखिगतांस्तांश्चदिवसान्नजानेकोहेतुर्दलतिशतधायन्नहृदयं॥५॥कथमपिसखिक्रीडाकोपाद्व्रजेतिमयोदितेकठिनहृदयस्त्यक्त्वाशय्यांबलाद्गतएवसः॥इतिसरभसध्वस्तप्रेम्णिव्यपेतघृणेस्पृहांपुनरपिहतव्रीडंचेतःकरोतिकरोमिकिं॥६॥अमरुकस्यैते॥मानोनतेस्यहसनेस्यतिमंडितेतिमश्चेवधिकृतिरनेकमुखीसखीनां॥दाक्षिण्यमत्रमसृणेनविचेष्टितेनधूर्तस्यतस्यहिगुणाननुपवर्णयंति॥७॥पुरोदिगनुरागिणीतदपिनाऽनुरागोदयःकृशोदरिनिशाकृशातदपितेनमानःकृशः॥प्रसन्नमिदमंबरंतदपिनप्रसन्नंमनोननादचरणायुधस्तदपिमौनमालंबसे॥८॥आविर्भूतेशशिनितमसामुच्यमानेवरात्रिर्नैशस्यार्चिर्हुतभुजइवच्छिन्नभूयिष्ठधूमा॥मोहेनांतर्वरतनुरियंलक्ष्यतेमुक्तकल्पागंगारोधःपतनकलुषागृण्हतीवप्रसादं॥९॥अनालोच्यप्रेम्णःपरिणतिमनादृत्यसुहृदस्त्वयाकांडेमानःकिमितिसरलेसंप्रतिकृतः॥समाकृष्टाह्येतेप्रलयदहनोद्भासुरशिखाःस्वहस्तेनांगारास्तदलमधुनारण्यरुदितैः॥१०॥मनुर्यस्मकृतेगुरुर्लघुरभून्नोष्ठीकनिष्ठीकृताधैर्यंकोषधनंगतंसहचरीनीतिःकृताद्दूरतः॥निर्मुक्तात्तृणवत्त्रपापरिचितास्रोतस्विनीबिंदुवत्सक्रोधादवधीरितोहतधियामातर्व

लीयान्विधिः॥११॥ यत्संकेरुहलक्ष्मपाणिकमलं भाग्यालयेयद्गुरुर्न्यस्तं वा मम यल्ललाटफलके भाग्याक्षरं वेधसा॥ तत्सर्वं सखि योयथार्थमकरोत्तस्मिन्न कोपः कृतो धिङ्मां धिङ्मम जीवितं धिगतनुं धिक्चेष्टितं धिग्वयः॥१२॥ उपचारानुनयास्ते किं तवस्योपेक्षिताः सखीवचसा॥ अधुना निष्ठुरमपि यदि स वदति कलिकैतवायासि॥१३॥ इति कलहांतरिताप्रलापः॥

अथ सख्यनुनयः

स्निग्धे यत्परुषाभि यत्प्रणमति स्तब्धासि यद्रागिणि द्वेषस्थासि यदुन्मुखे विमुखतां यातास्मितस्मिन्प्रिये॥ तन्मुग्धे विपरीतकारिणि तव श्रीखंडचर्चाविधौ शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदा यातनाः॥१॥ सभयचकितं विन्यस्यंती दृशं तिमिरे पथि प्रतितनु मुहुः स्थित्वा मंदं पदानि वितन्वती॥ कथमपि रहः प्राप्तानंगैरनंगतरंगिभिः सुमुखि सुभगः सत्वां पश्यन्नुपैतु कृतार्थतां॥२॥ त्वां चित्तेन सहावहन्नयमतिश्रांतो भृशं तापितः कंदर्पेण सपातुमिच्छति सुधासंवादिबिंबाधरं॥ अस्यांगं तदलंकुरु क्षणमिह भ्रूक्षेपलक्ष्मीलवक्रीते दासजनेपि सेवितिपदांभोजे कुतः संभ्रमः॥३॥ जयदेवस्यैते॥ लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो निराहाराः सख्यः सततरुदितोच्छूननयनाः॥ परित्यक्तं सर्वं हसितपठितं पंजरशुकैस्तवावस्था चेयं विसज कठिने मानमधुना॥४॥ अमरुकस्य॥ रागंरागिणि मुंच मय्यवनते दृष्टे प्रसीदाधुना सद्यस्त्वद्विरहे भवंति सुभगे सर्वा ममांधा दिशः॥ यत्रार्कायितमिंदुना सरसिजैरंगारपुंजार्पितं कुल्यायमपि नाथ ते कदलिकाकांडैरलातापितं॥५॥ असद्वृत्तो नायं न च खलु गुणैरेव रहितः प्रियो मुक्ताहारस्तव चरणमूले निपतितः॥ गृहाणैनं मुग्धे व्रजतु तव कंठप्रणयितामुपायो नास्त्वन्यस्तव हृदयदाहोपशमने॥ कस्यापि॥ मुग्धे किं न खरैः क्षिपस्यविरतं नेत्रांबु मानोन्नते पश्यैनं चरणाग्रनम्रशिरसं स्वं कांतमत्तांजलिं॥ अम

ह्ने तवचेतसिप्रणयिनिप्राप्तेपिनिर्विण्णतामन्यासक्तमनस्तुपे
क्षितगताभूत्कुत्यरोदिष्यति।।७।।सुतनुजहिहिमौनंमुंचवाचो
जडत्वंप्रणयिनिमयिकोपंकिंकरेकिंकरोषि।।अथयदितववचि
त्तेस्मापराधोस्मिबालेनिजभुजयुगवल्याबंधनंमांविधेहि।।८।।
कृशोदरिनिशाकृशातदपितेनमानंकृशोपुरोदिगनुरागिणीत
दपितेनरागोदयः।।प्रसन्नमिदमंबरंतदपिनप्रसन्नंमनोननाः
दचरणाग्रुधस्तदपिमौनमालंबसे।।९।।विराममेदानलस्यातिः
तोषात्तथापिरोषारुणितेवदृष्टिः।।निशापतिःक्लिष्यतिपश्चिमा
शामयेकिमाशाविफलीकरोषि।।१०।।अयेऽस्तमयतेशशीन
हिकृशीभवत्याग्रहोविनश्यतितमोहृतंकिमणुमप्यपास्तेम
नः।।सखिप्रकटितोरुणोनकरुणोदयस्तेमनाकृप्रयातिखलु
यामिनीनविमनीकृथानायकं।।११।।इंदीवरेणनयनंमुखमं
बुजेनकुंदेनदंतमधरेनवपल्लवेन।।अंगानिचंपकदलैःसवि
धायवेधाःकांतकथंघटितवानुपलेनचेतः।।१२।।गतप्राया
रात्रिःशशिमुखिशशीशीर्यतइवप्रदीपोयंनिद्रावशमुपगतोघू
र्णितइव।।प्रणामांतंमानंत्यजसिनकथंचारुनयनेकुचप्रत्या
सत्यात्हृदयमपितेचंडिकठिनं।।१३।।इतिश्रीबृहच्छार्ङ्गधर
विरचितायांपद्धत्यासंयोगशृंगारेकलहांतरिताप्रलापसख्यनुन
यप॰

अथनायिकानायकयोरुक्तिप्रत्युक्ती

बालेनाथविमुंचमानिनिरुषंरोषान्मयाकिंकृतंखेदोस्मासुन
मेपराध्यतिभवान्सर्वेपराधामयि।।तत्किंरोदिषिगद्गदेनवच
साकस्याग्रतोरुद्यतेनन्वेतन्ममकांतवास्मिदयितानास्मीत्य
तोरुद्यते।।१।।कुमारदासस्य।।नयननिपातेकुरुतःपल्लवितो
वचसिपुष्पितोहसिते।।फलतुकृशांगितवांगस्पर्शेनमनोरथो
स्माकं।।२।।कस्यापि।।सुभ्रुत्वंकुपितेत्यपास्तशमनंत्यक्ताःक
थायोषितांदूरादेवमयोज्झितासुरभयःस्रग्गंधधूपादयः।।
रागंरागिणिमुंचमय्यवनतेदृष्टेप्रसीदाधुनासत्यस्त्वद्विरहे

भवंतिसुभगेसर्वाममांधादिशः॥३॥ विद्यापतेः॥उत्तरंगयतु
रंगलोचनेलोचनेकमलगर्वमोचने॥ अस्तुसुंदरिकलिंदनंदि
नीवीचिडंबरगभीरमंबरं॥४॥ कस्यापि॥ यदाभूदस्माकंप्रथ
ममविभक्तातनुरियंततोनुत्वंप्रेयानहमपिहताशाप्रियतमा॥
इदानींनाथस्त्वंवयमपिकलत्रंकिमपरंमयाप्तंप्राणानांकुलि
शकठिनानांफलमिदं॥५॥ अमरुकस्य॥ व्यावृत्तंखलुसर्व
तोविषयतस्त्वय्येवलीनंमनोनित्यंचत्वदधीनमेवनियतंम
ज्जीवनंमानिनि॥मत्वेवंमपिनूनमन्यविषयाशंकात्वयास
ज्यतांकिंवान्यत्रनिशाकरोभिरमतेमुक्त्वाक्षणंकौमुदी॥६॥
कस्यापि॥ कृतककृतकैर्मायाशाठ्यैस्त्वयाप्यनिवर्तितंनिभृ
तनिभृतैःकार्यालापैर्मयाप्युपलक्षितं॥ भवतुविदितंनेष्टाते
हंरथापरिखिद्यसेअहमहसनात्वंनिःस्नेहःसनेनसमंगतं
॥७॥कस्यापि। यद्गम्यंगुरुगौरवस्यसुहृदोयस्मिंल्लभंतेतरां
यद्दाक्षिण्यवशात्प्रसत्यसहितेनमौपचारानपि॥ यल्लज्जानि
रुणद्धियत्रशपथैरुत्पाद्यतेप्रत्ययस्तत्किंप्रेमसउच्यतेपरिच
यस्तत्रापिकोपेनकिं॥८॥कोपोयत्रभृकुटिरचनानिग्रहोयत्र
मौनंयत्रान्योन्यस्मितमनुनयोदृष्टिपातप्रसादः॥तस्यप्रेम्ण
स्तदिदमधुनावैशसंपश्यजातंत्वंपादांतेलुठसिनचमेमन्यु
मोक्षःखलायाः॥९॥वामनस्य॥सार्धमनोरथशतैस्तववधूर्त
कांतस्यैवस्थितामनसिकृत्रिमभावरम्या॥ अस्माकमस्ति
नकथंचिदिहावकाशस्तस्मात्कृतंचरणपातविडंबनाभिः
॥१०॥कस्यापि॥यदात्वंचंद्रोभूःशशिरकरसंपर्करुचिरस्तदा
हंजाताद्राक्शशधरमणीनांप्रतिकृतिः॥ इदानीमर्कस्त्वं
खररुचिसमुत्सारितरसःकिरंतीकोपाग्नीनहमपितथाग्ना
वघटिता॥११॥ अचलस्य॥प्रसादेवर्तस्वप्रकटयमुदंसंत्यजं
रुषंप्रियेशुष्यंत्यंगान्यमृतमिवतोसिंचतुवचः॥निधानंसौख्या
नांक्षणमभिमुखंस्थापयमुखंनमुग्धेप्रत्येतुंप्रभवतिगतःका

लहरिणः॥१२॥चंद्रस्य॥ इतिश्रीबृहच्छार्ङ्गधरविरचितायां पद्धत्यांसंयोगशृंगारेनायिकानायकयोरुक्तिप्रत्युक्तिपरिच्छे॰

अथनायकशिक्षानायिकानुनयौ

अंगुलीकिशलयाग्रतर्ज्जनंभ्रूविभंगकुटिलंचवीक्षितं॥मेखलाभिरसकृच्चबंधनंवंचयत्प्रणयिनीरवायसः॥१॥कालिदासस्य॥ कोपात्किंचदुपानतोतिरभसादाकृष्यकेशेष्वलंनीत्वामोहनमंदिरंदयितयाहारेणबध्वादृढं॥भूयोपास्यसितत्कृहानितिमुहुःकंठार्धरुत्याक्षरंजल्पंत्याश्रवणोत्पलेनसुकृतीकश्चिद्रहस्ताड्यते॥२॥ साबाढंभवतेक्षितेतिनिविडंसंयम्यबाह्वोःस्रजाभूयोद्रक्ष्यसितांशठेतिनितरांसंभर्त्स्यसंतर्ज्यच॥आलीनांपुरएवनिह्नुतिपरःकोपाद्रणंनूपुरंमानिन्याचरणप्रहारविधिनाप्रेयानशोकीकृतः॥३॥रुद्रस्येतौ॥ पादेमूर्द्धनितान्नतामुपगतेकर्णोत्पलेचूर्णितेछिन्नेहारलतागुणेकरतलेसंपातजातव्रणे॥अप्राप्तप्रियताडनव्यतिकराद्धेतुंपुनःकोपितावांछंतीमुहुरेणशावनयनापर्याकुलारोदति॥४॥कस्यापि॥ अधिरजनिजगामधामतस्याःप्रियतमयेतिरुपास्रजावबद्धः॥पदमपिचलितंयुवानसेहेकिमिवशक्तिहरंससाध्वसानां॥५॥माघकवेः॥ इतिनायकशिक्षानायिकानुनयौ॥ छ ॥ छ

अथनायकानुनयः

त्वंतावद्बहुवल्लभोनवयुवाकांतःसुखीनिर्घृणोनोजानासिपरव्यथांशठमतेनैवासिदुःखीयतः॥किंत्वन्याःपरिपृच्छमन्मथशरैःपीडामसह्यामिमांत्रातानोभवयेनसज्जनजनैःकापालिकोनोच्यते॥१॥कस्यापि॥ विरहविषमःकामोवामःकरोतितनुंतनुंदिवसगणनादक्षश्चासौव्यपेतघृणोजनः॥त्वमपिवशगोमानव्याधेर्विचिंतयनाथहेकिशलयमृदुर्जीवेदेवंकथंप्रमदाजनः॥२॥शीलाभट्टारिकायाः॥ घनघनमपिदृष्टंव्योमसर्वंगुरुत्वाच्छिखिकुलकलवाचांश्रोत्रमासांनिवासः॥असुशमन

मृताहंयद्वियोगेपिजातेतवघनपरिरंभप्रार्थनाशावशेन॥३॥हरिगणस्य॥मुक्तोमानपरिग्रहःसहसखीसार्थेनतन्मंत्रिणाशक्तात्वच्चरणप्रसाद्हरितानाहंक्षणंप्राणिनां॥पश्यत्वंहशकंशरीरकमिदंयांयामवस्थांगतंसैषाहंतवपादयोर्निपतितानाथप्रसीदाधुना॥४॥कस्यापि॥इतिश्रीबृहच्छार्ङ्गधरविरचितायांपद्धत्यांसंयोगशृंगारेनायकशिक्षानायिकानुनयः॥

अथपरस्परप्रसादः

दृष्ट्वैकासनसंस्थितेप्रियतमेपश्चादुपेत्यादरादेकस्यानयनेनिमील्यविहितक्रीडानुबंधच्छलः॥तिर्यक्वर्तितकंधरःसपुलकांप्रेमोल्लसन्मानसामंतर्हासलसत्कपोलफलकांधूर्तोपरांचुंबति॥१॥अमरुकस्य॥आगत्यप्रणिपातसांत्वितसखीदत्तांतरेसागसिस्वैरंकुर्वतितल्पपार्श्वनिभृतेधूर्तांगसंवाहने॥ज्ञात्वास्पर्शवशात्तयाकिलसखीभ्रांत्यास्वमंशंशनैःखिन्नासीत्यभिधायमीलितदृशासानंदमारोपितः॥२॥कस्यापि॥सुतनुजहिहिमानंपश्यपादानतंमांनखलुतवकदाचित्कोपएवंविधोभूत्॥इतिनिगदतिनाथेतिर्यगामीलिताक्ष्यानयनजलमनल्पंमुक्तमुक्तंनकिंचित्॥३॥कस्यापि॥सत्यंदुर्लभएषवल्लभजनोरागोममास्मिन्नुनःकोपोस्यातिगुरुर्नचातिनिपुणाःसख्योपिसंबोधने॥संचिंत्येतिमृगीदृशाप्रियतमेदृष्टेश्लथांमेखलांबध्नंत्यानगतंस्थितंनचलसद्धासोथवासंभृतं॥४॥वाचोवाग्मिनिकिंतवाद्यपरुषाःसुभ्रुभ्रुवोविभ्रमोप्युज्झांत्यःकृतएषलोलनयनेकिंलोहितेलोचने॥नास्त्यागोमयिकिंमुधैवकुपितेत्युक्तेपुरःप्रेयसामानिन्याजलबिंदुदंतरपुटादृष्टिःसखीष्वाहिता॥रुद्र्॥रुद्रस्यैतौ॥सायावेतिपदान्यलीकवचनैरालीजनैःपालितानावेत्येवकृतागमोद्गततरेसंरुध्यपत्युःपुरः॥प्रारंभेपुरतोयथामनसिजस्येच्छायथावर्तितुंभोम्णोमौग्ध्यविभूषणस्यसहनःकोप्येषकांतःक्रमः॥६॥भट्टेंदुराजस्य॥दृष्टेलोचनवन्मनाग्मुकिलितंपार्श्व

स्थितेवक्रवत्युद्गतंबहिराश्रितंपुलकवत्स्पर्शंसमातन्वती॥
नीवीबंधनतागतांशिथिलतांसंभाषमाणेक्षणान्मानेनापिस्मृतं
ह्रियेवसुदृशःपादस्पृशिप्रेयसि॥७॥ कस्यापि॥ इहस्फुटंति
ष्ठतिनाथकंटकःशनैःशनैःकर्षनखाग्रलीलया॥ इतिछलात्का
चिद्भग्नकंटकंपदंतदुत्संगतलेन्यवेशयत्॥८॥ इतिश्रीवृ
हच्छार्ङ्गधरविरचितायांपद्धत्यांसंयोगशृंगारेपरस्परप्रसादाख्या
नप०

अथसूर्यास्तमानवर्णनचक्रवाकावस्थाख्याने

पृथुगगनकबंधस्कंधचक्रंकिमेतत्किमुरुधिरकपालंकालिका
पालकस्य॥ कललभरितमंतःकिंतुनास्यांडखंडंप्रजनयति
वितर्कंसांध्यमर्कस्यबिंबं॥१ कस्यापि॥ अस्तावलंबिरविबिं
बतयोदयाद्रिचूडोन्मिषत्सकलचंद्रतयावसायं॥ संध्याप्रनृ
त्यहरहस्तगृहीतकांस्यतालद्वयेवसमलक्ष्यतनाकलक्ष्मीः
॥२॥ रत्नाकरस्य॥ अनुरागवंतमपिलोचनयोर्दधतंवपुःसुख
मतापकरं॥ निरकासयद्रविमपेतवसुंवियदालयादपरदिग्ग
णिका॥३॥ माघकवेः॥ विलोक्यसंगमेरागंपश्चिमायाविवस्व
तः॥ कृतंकृष्णंमुखंप्राच्यानहिनार्योविनेर्ष्यया॥४॥ सांध्यरा
गरुधिरारुणभारान्निःपपातरविमंडलमब्धौ॥ क्रूरकालकर
बालविलूनंवासरस्यसहसैवशिरोनु॥५॥ भट्टोपन्योः॥ परि
पततिपयोनिधौपतंगःसरसिरुहामुदरेषुमत्तभृंगः॥ उपव
नतरुकोटरेविहंगस्तरुणजनेषुशनैःशनैरनंगः॥६॥ कस्या
पि॥ कृतोपकारंप्रियबंधुमर्कमाद्रास्यहीनांशुमधःपतंतं॥ इ
तीवमत्वानलिनीवधूभिर्निमीलितान्यंबुरुहेक्षणानि॥७॥
भोजनरेंद्रस्य॥ नोरविर्नचतमोनतमीशोनद्युतिर्ग्रहगणोन
चसंध्या॥ यादृशंप्रथमतःकिलसृष्टेस्तादृगेवभुवनंप्रियमूहे
॥८॥ कस्यापि॥ सैरंध्रीकररुष्टपट्टकशरानारध्वनिःसंचरद्दूती
सूत्रितसंधिविग्रहविधिःसोल्लासलीलाविधिः॥ वारस्त्रीजन
सज्जमानशयनःसंनद्धपुष्पायुधःश्रीखंडद्रवधौतसौधशिख

रोरम्यःक्षणोवर्तते॥९॥कस्यापि॥विश्लेषाकुलचक्रवाकमिथुनेरुत्यक्षमाक्रंदितेकारुण्यादिवमीलितासुनलिनीष्वस्तंचमित्रेगते॥शोकेनेवदिवांगनाभिरभितःश्यामायमानैर्मुखैर्निःश्वासानिलधूमवर्तयइवोत्कीर्णास्तमोराजयः॥१०॥कस्यापि॥शुचिरितिपरितःप्रसिद्धभाजिप्रकटिततेजसिदुर्जयेकृशानौ॥निजवसुनिकुरंबमस्तवेलाव्यतिकरवान्निदधेसरोजबंधुः॥११॥बिल्हणस्य॥महद्भिरोषैस्तमसामभिद्रुतेभयेप्यसंमूढमतिभ्रमन्क्षितौ॥प्रदीपवेषेणगृहेगृहेस्थितोविखंड्यदेहंबहुदेहभास्करः॥१२॥क्षेमेंद्रस्य॥अस्तंगतवतिसवितरिभर्तरिमधुपंनिवेश्यकोशांते॥कमलिन्योऽपिरमंतेकिमत्रचित्रंमृगाक्षीणां॥१३॥अध्वानंनैकचक्रःप्रभवतिभुवनभ्रांतिदीर्घंविलंघ्यप्रातःप्राप्तुंरथोमेपुनरितिमनसिन्यस्तचिंताऽतिभारः॥संध्यामृष्टावशिष्टस्वकरपरिकरस्पष्टहेमारपंक्तिव्याकृष्याऽवस्थितोऽस्तक्षितिभृतिनयतीवैषदिक्चक्रमर्कः॥१४॥यातोऽस्मिपद्मनयनेसमयोममैषसुप्तामयैवभवतीप्रतिबोधनीया॥प्रस्यापनामयमितीवसरोरुहिण्याःसूर्योऽस्तमस्तकनिविष्टकरःकरोति॥१५॥उदयतटांतरितमियंप्राचीसूचयतिदिङ्निशानाथं॥परिपांडुनामुखेनप्रियमिवहृदयस्थितंरमणी॥१६॥

अथचक्रवाकावस्थाख्यानं

चक्राख्योविरहीहतोपिहृदयेबाणेननत्यक्तवान्कोमेप्राणसमासमागमसुखध्यानैकतानश्चिरं॥स्वांछायामवलोक्यवारिणिगलत्क्षामवेक्ष्यप्रियांभ्रांतस्तद्व्रणवेदनापरिगतःकष्टंमृतंसांप्रतं॥१॥कस्यापि॥एकेनाक्ष्णाप्रविततरुषावीक्षतेऽलंबमानंभानोर्बिंबंजलविलुलितेनापरेणस्वकांतं॥अह्नश्छेदेदयितविरहाशंकिनीचक्रवाकीद्वौसंकीर्णौरचयतिरसोनर्तकीवप्रगल्भा॥२॥चंद्रकस्य॥तीरात्तीरमुपैतिरौति—करुणंचिंतासमालंबतेकिंचिद्ध्यायतिनिश्चलेनमनसायोगीवयुक्तेक्षणः

॥स्वांछायामवलोक्यकूजितपुनःकांतेतिमुग्धःखगोधन्यास्ते
भुवियेनिवृत्तमदनाधिग्दुःखिताःकामिनः॥३॥आयातियाति
पुनरेवजलंप्रयातिपद्मांकुरंचविचिनोतिधुनोतिपक्षं॥उन्मत्त
वद्भ्रमतिकूजतिमुक्तकंठःकांतावियोगविधुरोनिशिचक्रवाकः
॥४॥भुक्ताभोक्तुंनभुंक्तेकुटिलविशलतांकोटिमिंदोर्वितर्का॰
ताराकारास्तृषार्तःपिबतिनपयसांविप्रुषःपत्रसंस्थाः॥छाया
मंभोरुहाणामलिकुलशबलांवेत्तिसंध्यामसंध्यांकांताविश्ले
षभीरुर्दिनमपिरजनींमन्यतेचक्रवाकः॥५॥मित्रेक्वापिगतेस
रोरुहवनेबद्धाननेक्लाम्यतिक्रंदत्सुभ्रमरेषुवीक्ष्यदयिताम्क्लि
ष्टंपुनःसारसं॥चक्रांगेनवियोगिनाबिसलतानास्वादितानोज्झि
ताचक्रेकेवलमर्गलेवनिहिताजीवस्यनिर्गच्छतः॥६॥वापीतो
येतटरुहवनंपद्मिनीपत्रशय्यांचंद्रालोकोविकचकुमुदामो
दहृद्यःसमीरः॥यत्रैतेतेप्रियविरहिणोदाहिनश्चक्रनाम्नस्त
त्रोपायःकइवभवतुप्राणसंधारणेयः॥७॥केषामप्येते॥इति
श्रीवृ॰शा॰वि॰प॰संयोगशृंगारेसूर्यास्तमानचक्रवाकावस्थाख्या
नप॰

अथतमोवर्णनं

पिदधतितिमिरेसमस्तलोकंप्रलयमहाब्धिनिभेभृतोच्चनिम्ने
॥व्यरुचयदुडुगणोवलक्षरोचिर्बहुविधफेनसमूहतुल्यरूपः॥१
शार्ङ्गधरस्य॥काकोलःकलकंठिकाकुवलयंकादंबिनीकर्द
मंकंसारिःकबरीकृपाणलतिकाकस्तूरिकाकज्जलं॥कालिंदी
कृषपट्टकंकरिघटामाकारिकंठस्थलीयस्यैतेकरदाभवंतिस॰
खितद्दूह्रोविनिद्रंतमः॥२॥कस्यापि॥लुंपतीवतमोंगानिवर्ष
तीवांजनंनभः॥असत्पुरुषसेवेवदृष्टिर्निःफलतांगता॥३॥
॥त्रिविक्रमादित्यमेंठयोः॥अविज्ञातविशेषस्यसर्वतेजोपहा
रिणः॥स्वामिनोनिर्विवेकस्यतमसश्चकिमंतरे॥४॥अवित्तिव
र्मणः॥इदंनभसिभीषणभ्रमदुकूलकोलाहलैर्निशाचरवि
लासिनीनिवहदत्तनेत्रोत्सवं॥परिस्फुरतिनिर्मलप्रचुरपंकः

मग्नोल्लसद्दूराहकुलमांसलप्रवलबद्धमंधंतमः।५। सर्वज्ञवासुदेवस्य॥ किंभूमौपरितःस्फुरंतिकिरणःकस्तूरिकायारसैःसिक्ताः किंनिखिलादिशःकिमखिलंक्षिप्तंसखीभिर्नभः॥ किंव्यासंभुवनंसमस्तमपिचश्रीकंठकंठत्विषाकालिंदीजलकांतिभाजिनिविडौजातेंधकारेधुना॥६॥ कस्यापि॥ सद्यःसांद्रमुखीविलुप्तककुभःस्निग्धेंद्रनीलेंद्रवव्यामीलन्नभसानिरंतरमिलन्नीलीरसश्च्योतितः॥ एतेकोकिलकायकालिमहृतोलुंपंतिदृत्तिंदृशोरुन्निद्रांजनपुंजमेचकरुचोभीमास्तमःप्रक्रमाः॥७॥ चिन्वन्वोरश्चिकीर्षितानिघट्टयन्तोष्ठीसुखंकामिनीतन्वानंसचसाधनोत्सवरसंनिर्व्याजवीरात्मनां॥ कुर्वन्कामकृशानुतप्तमनसांगुप्तांगनासंगमंहृष्यत्कोकिलकाककंठमलिनंध्वांतंसमुज्जृंभते॥८॥ कस्यापि॥ काश्मीरगौरवपुषामभिसारिकाणामाबद्धरेखमभितोरुचिमंजरीभिः॥ एतत्तमालदलनीलतमंतमिश्रंतत्प्रेमहेमनिकषोपलतांतनोति॥९॥ जयदेवस्य॥ विरमतिमिरसाहसादमुष्माद्यदिरविरस्तमितःस्वतस्ततःकिं॥ कलयसिनपुरोमहामहोभिर्द्युतिनिधिरभ्युदयस्ययंशशांकः॥१०॥ नाकाशंनदिशोनभूधरकुलंनांभोदपोनक्षितिर्नद्यौर्नांबुधरानतीव्रकिरणोनेंदुर्नतारागणः॥ एतैःषट्पदकायकांतिपटलीपांडित्यवैतंडिकैःकल्लोलैस्तमसामसांप्रतमयंविश्वव्ययःकल्प्यते॥११॥ इतिश्रीवृहच्छार्ङ्गधरविरचितायांपद्धत्यांसंयोगश्रृंगारेतमोवर्णनपरिच्छेदः॥ ७ ॥ ९ ॥

अथाभिसारिकासंचारकथनं॥

कथस्थितासिकरभोरुघनेनिशीथेप्राणप्रियोवसतियत्रमनःप्रियोमे॥ एकाकिनीवदकथंनबिभेषिबालेनन्वस्तिपुंखितशरोमदनःसहायः॥१॥ गोविंदस्वामिनो विकटनितंबायाश्च॥ वातोद्धूतसुखीप्रनष्टतिलकातोपाच्चनीलांशुकामेघानांनिनदेनभीतहृदयागत्वाप्रियस्यालयं॥ द्वारंनेच्छतिलज्जयामलपि

तुंदेहीतिहर्षाहतापादौनूपुरकर्दमप्रतिहतौसासंशयंतीस्थि
ता॥२॥कस्यापि॥प्राणेशमभिसरंतीपथिस्खलंतीसुपिछलं
मुग्धा॥अवलंबनायवारांधारासुकरंप्रसारयति॥३॥उरसि
निहितस्तारोहारःकृताजघनेघनेकलकलवतीकांचीपादौर
णन्मणिनूपुरौ॥प्रियमभिसरस्येवमुग्धेत्वमाहितडिंडिमापदि
किमपरंत्रासोत्कंपादिशःसमुदीक्षसे॥४॥अर्गटस्य॥मार्गेपंक
लितेघनांधतमसेनिःशब्दसंचारमागंतव्याद्यमयाप्रियस्यवस
तिंमुग्धेतिकृत्वामतिं॥आजानूद्धृतनूपुराकरतलेनाछाद्य
नेत्रेभृशंकृच्छ्रेणाप्तपदस्थितिःस्वभवनेपंथानमभ्यस्यति॥
॥५॥अंभोजाक्ष्याःपुरवनलताधाम्निसंकेतभाजश्चेतोनाथेचि
रयतिभृशंमोहनिक्लांगतायाः॥स्वच्छंदंनाभीह्रदवलयितंकांतर
त्रांसुजालंतोयंश्रांतासापिबतिहरिणीविस्मयंचप्रयाति॥६॥क
स्यापि॥ज्ञातंज्ञातिजनैःप्रघुष्टमयशोदूरंगताधीरतात्यक्ता
ह्रीःप्रतिपादितोपिविनयःसाध्वीपदंमोज्झितं॥लुप्ताचोभयलो
कसाधुपदवीदंतःकलंकःकुलेभूयोदूतिकिमन्यदस्तियदसा
वद्यापिनागच्छति॥७॥नायातःसखिनिर्दयोयदिशठस्त्वंदूति
किंदूयसेस्वछंदंवहुवल्लभःसरमतेकिंतत्रतेदूषणं॥पश्याद्य
प्रियसंगमायदयितस्याकृष्यमाणंगुणैरुत्कंठार्त्तिभरादिव
स्फुटदिदंचेतःस्वयंयास्यति॥८॥जयदेवस्य॥जनोदुर्वर्ज्यो
संकुलममलिनंवर्त्मविषमंपतिश्छिद्रान्वेषीप्रणयवचनंदुःप
रिहरं॥अतःकाचित्तन्वीरतिविहितसंकेतगतयेगृहाद्वारंवा
रंनिरगमदथप्राविशदथ॥९॥छिद्रान्वेषणतत्परःप्रियसखी
प्रायेणलोकोधुनारात्रिश्चापिघनांधकारवहलागंतुंनतेयुज्य
ते॥मामेवंसखिवल्लभःप्रियतमस्तस्योत्सुकादर्शनेयुक्तायुक्त
विचारणायदिभवेत्स्नेहापरत्वंजलं॥१०॥मंदंनिधेहिचरणौ
परिधेहिवासोनीलंपिधेहिवलयावलिमंचलेन॥माजल्पसा
हसिनिशारदचंद्रकांतदंतांशवस्तवतमांसिसमापयंति॥११॥

केषामप्येते॥ इतिश्रीबृहच्छा॰संयोगशृंगारेऽभिसारिकासंचारकथनप॰

अथचंद्रोदयवर्णनं

उदयतटांतरितामियं प्राचीसूचयतिदिग्दिशानाथं॥परिपांडुतामुखेनप्रियमिवत्हृदयस्थितंरमणं॥१॥ श्रीहर्षस्य॥ अथमन्मथवाहिनीपरागःकिमपिज्योतिरुदेत्यदःपुरस्तात्॥तिमिरस्यजराचकोरकूरंकुलटाकेलिवनांतवानलार्चिः॥२॥कस्यापि॥अथपथिकवधूदहनःशनकैरुद्भून्निशाकरोलोकः॥कुमुदप्रबोधदत्तोव्यसनरुचिश्चक्रवाकीनां॥३॥क्षेमेंद्रस्य॥ततःकुमुदनाथेनकामिनीगंडपांडुना॥नेत्रानंदेनचंद्रेणमाहेंद्रीदिगलंकृता॥४॥भगवतोव्यासस्य॥हंसोयथाराजतिपंकजस्थःसिंहोयथामंदरकंदरस्थः॥वीरोयथादर्पतिकुंजरस्थःचंद्रोपिबभ्राजतथांबरस्थः॥५॥ वाल्मीकीकवेः॥पश्योदेतिवियोगिनांदिनमणिःशृंगारचूडामणिस्तारामौक्तिकहारनायकमणिश्चंडीशचूडामणिः॥प्रौढानंगभुजंगमस्तकमणिःकंदर्पसीमंतिनीकांचीमध्यमणिश्चकोरपरिषच्चिंतामणिश्चंद्रमाः॥६॥कस्यापि॥मृगांकोयंधत्तेगगनजलधेःफेनमतुलंसितच्छत्राकारंमदननृपतेर्विश्वजयिनः॥त्रियामारामायामलयजविशेषप्रतिकृतिंजगद्धात्रीदेव्यामणिमुकुरलक्ष्मींचविमलां॥७॥शार्ङ्गधरस्य॥आकाशवापीसितपांडुरीकंशाणोपलंमन्मथसायकानां॥पश्योदितंसादरमुत्पलाक्षीसंध्यांगनाकंदुकमिंदुबिंबं॥८॥कस्यापि॥ॐकारोमदनद्विजस्यगगनक्रोडेकदंष्ट्रांकुरस्तारामौक्तिकसुक्तिरंधतमसस्तंबेरमस्यांकुशः॥शृंगारार्गलकुंचिकाविरहिणीमर्मच्छिदाकर्तरीसंध्यावारवधूनखक्षितिरियंचांद्रीकलोज्जृंभते॥९॥कस्यापि॥त्रिनयनजटावल्लीपुष्पंनिशावदनस्मितंग्रहकिशलयंसंध्यानारीनितंबनखक्षतं॥तिमिरभिदुरंव्योम्नःशृंगंमनोभवकार्मुकंप्रतिपदिनवस्येंदोर्बिंबंसुखोदयमस्तुनः॥१०॥फल्गुहस्तिन्याः॥स्वैरंकैरवकोरकान्विद

लयन्यूनांमनोदोलयन्नंभोजानिनिमीलयन्मृगदृशांमानंसमुन्मीलयन्॥ज्योत्स्नाकंदलयन्दिशोधवलयन्नंभोधिमुद्वेलयन्कोकानाकुलयंस्तमःकवलयन्निंदुःसमुज्जृंभते॥११कस्यापि॥एषस्वर्गतरंगिणीजलमिलद्दिग्दंतिदंतद्युतिभ्रश्यद्राजतकुंभविभ्रमधरःशीतांशुरभ्युद्यतः॥हंसीयत्यमलांबुजीयतिलसड्डिंडीरपिंडीयतिस्फारस्फाटिककुंडलीयतिदिशामानंदकंदीयति।१२।शंखधरस्य॥पुरंदरहरिद्दरीकुहरगर्तसुप्तोत्थितस्तुषारकरकेसरीगगनकांननंगाहते॥मयूखनखरत्रुटत्तिमिरकुंभिकुंभस्थलोच्छलत्तरलतारकाकपटकीर्णमुक्तागणः॥१३॥कस्यापि॥उपोढरागेणविलोलतारकंतथागृहीतंशशिनानिशामुखं॥यथासमस्तंतिमिरांशुकंतयापुरोविरागाद्गलितंनलक्षितं॥१४॥पाणिनेः॥अंधकारगरलंजगत्सतेर्मोहकारिभृशमत्तिनित्यशः॥उज्ज्वलंजठरमोषधीपतेरंजनासममभवत्कुतःप्रिये॥१५॥कस्यापि॥अद्यापिस्तनशैलदुर्गविषमेकिंमानिनीनांहृदिस्थातुंवांछतिमानएषधुगितिक्रोधादिवालोहितः॥उद्यद्दूरतरप्रसाधितकरःकर्षत्यसौतत्क्षणात्फुल्लत्कैरवकोशनिःसरदलिश्रेणीकृपाणंशशी॥१६॥कस्यापि॥इंदोरेककलायारुद्रेणोद्धृत्यमूर्धनिधृतायाः॥स्थानमिवतुच्छमेतत्कलंकरूपेणपरिणमति॥१७॥सद्यःपाटितकेतकोदरद्दलश्रेणीश्रियंबिभ्रतीयेयंमौक्तिकदामगुंफनविधौयोग्याच्छविःप्रागभूत्॥उन्मेयाकलशीभिरंजलिपुटैर्ग्राह्यामृणालांकुरैःपातव्याचशशिन्यमुग्धविभवेसावर्ततेचंद्रिका॥१८॥एतत्तर्क्कयकैरवक्लमहरेशृंगारदीक्षागुरोदिक्कांतामुकुरेचकोरसुहृदिप्रौढेधुरागत्त्विषि॥कर्पूरैःकिमपूरिकिंमलयजैरालेपिकिंपारदैरक्षालिस्फटिकोपलैःकिमघटिद्यावापृथिव्योर्वपुः॥१९॥कपालेमार्जारीपयइतिकरान्लेढिशशिनस्तनुच्छिद्रप्रोतान्बिसमितिकरान्संकलयति॥रतांतेतल्पस्थान्हरतिवनिता

ष्यंशुकमितिप्रभामत्तश्चंद्रोजगदिदमहोविप्लवयति ॥२०॥
भासस्य ॥ कैलासायितमद्रिभिर्विटपिभिः श्वेतातपत्रायितंभूर्लो
केनदधीयितंजलनिधौदुग्धायितंवारिभिः ॥ मुक्ताहारलतायि
तंव्रततिभिःशंखायितंश्रीफलैःश्वेतद्वीपजनायितंजनपदैर्जाते
शशांकोदये ॥२१॥ त्रिविक्रमभट्टस्य ॥ मल्लिकामालभारिण्यःस
र्वांगेणार्द्रचंदनाः ॥ क्षौमवत्योनलक्ष्यंतेज्योत्स्नायामभिसारि
काः ॥२२॥ दंडिकवेः ॥ कुमुदेष्वधिकंभांतिपतिताश्चंद्ररश्मयः
॥ अतिप्रकृष्टशीलेषुकुलेष्विवसमृद्धयः ॥२३॥ ख्यातावयंसम
धुपामधुकोशवत्यश्चंद्रप्रसारितकरोद्विजराजएषः ॥ अस्मत्स
मागमकृतोस्यपुनर्द्वितीयोमाभूत्कलंकइतिसंकुचितानलिन्यः
॥२४॥ लक्ष्मीक्रीडातडागंरतिधवलगृहंदर्पणोदिक्वधूनांपु
ष्पंश्यामालतायास्त्रिभुवनजयिनोमन्मथस्यातपत्रं ॥ पिंडी
भूतंहरस्यस्मितममृतसरित्पुंडरीकंमृगांकोज्योत्स्नापीयूष
वापीजयतिसितवृषस्तारकागोकुलस्य ॥२५॥ कालिदासस्य ॥
मानिनीजनविलोचनपातानुष्णबाष्पकलुषान्प्रतिगृण्हन् ॥
मंदमंदमुदितःप्रययौखंभीतभीतइवशीतमयूखः ॥२६॥ भार
वेः ॥ उद्गर्भहूणतरुणीरमणोपमर्दभुग्नोन्नतस्तननिवेशनिभं
हिमांशोः ॥ बिंबंकठोरबिसकांडकडारमेतदंमापदंप्रथममग्र
करैर्व्यनक्ति ॥२७॥ प्राणेयामोपदेष्टासरसिरुहभुवेयौवनोन्माद
लीलागोष्ठीनांपीठमर्दस्त्रिभुवनवनितानेत्रयोःप्रातराशः ॥
कामायुष्टोमयज्वाशमितकुमुदिनीमौनमुद्रानुरागःशृंगारा
द्वैतवादीप्रभवतिभगवानेषपीयूषभानुः ॥२८॥ पीयूषाश्रयि
पंजगत्त्रयदृशामालानलेखालवोविश्वोन्मायहुताशनस्य
ककुभामुद्घाटिनीकुंचिका ॥ कीरेषुप्रथमानपुष्पधनुषोरेखा
मृगाक्षीमुखश्रीणांचप्रतिराजबीजमधिकानंदीनवश्चंद्रमाः ॥
॥२९॥ गगनविपिनसिंहःकामभूपातपत्रंनिखिलदिगवलानां
कंदुकंक्रीडनाय ॥ मणिरिवरतिभर्तुःकार्मणःपार्वणोयंजय

तिकुमुदवंधुर्बंधुरश्चंद्रबिंबः॥३०॥ ताराक्षतान्प्रविकिरन्क
लकंठनादान्मंत्राक्षराणिनिगदन्कुसुमेषुरेषः॥ लाभायवास
रमणेर्मुषितस्यसायंसंचारयत्यमृतदीधितिकांस्यपात्रं॥३१॥
दिग्बालाकरकंदुकःस्मरवधूसीमंतमुक्तामणिःकामक्षोणिप
तेर्विहारवलभीनिर्व्यूहपारावतः॥ दृष्टव्योम्निविकीर्णतारकमणिः
श्यामावणिक्स्तुभ्रुवःस्फारःस्फाटिकसंपुटःकुमुदिनीकांतोय
मुन्मीलति॥३२॥ प्रसारणपरैःकरैःप्रकटितानुरागोदयेसुधाकि
रणकामुकेत्वरितमंबरालंबिनि॥ तदाविगलितोल्लसत्तिमिरजा
लनाशांशुकापुरंदरदिगंगनापुलकितेवतारागणैः॥३३॥ अथसकलं
कश्चंद्रः॥ अयंपुरःपार्वणशर्वरीशःकिंदर्पणोयंरजनीरमण्याः॥ य
नस्तदीयंप्रतिबिंबमस्मिन्संलक्ष्यतेलांछनकेतवेन॥३४॥ प्र
दोषमातंगमनंगदेवस्तुंगंसमारुह्यसमागतोयं॥ सिंदूरितेत
स्यसुधांशुकुंभेकिमंकुशोलक्ष्ममिषेणदत्तः॥३५॥ ममप्रियांकै
रविणींकरेणसंतापयामासदिनाधिनाथः॥ इतीवदुःखैर्वि
कलःकलावान्पपौविषंलक्ष्ममिषेणसद्यः॥३६॥ कलाधिना
थानयनायसायंकुमुद्वतीप्रेषितएषभृंगः॥ किमिंदुनालिंग्यस
रागमंकेकृतःकलंकभ्रममातनोति॥३७॥ अत्रांतरेचकुलटाकु
लवर्त्मयानसंजातपातकइवस्फुटलांछनश्रीः॥ वृंदावनांतर
मलिंपयदंशुजालैर्दिक्सुंदरीवदनचंदनबिंदुरिंदुः॥३८॥
इतिश्रीवृहच्छार्ङ्ग॰पद्धत्यांसंयोगशृंगारेचंद्रोदयवर्णनंपरि॰

अथपानगोष्ठीवर्णनं

दृश्यतेपानगोष्ठीषुकांतेवक्त्रागतंमधु॥ स्मरस्सहायमासाद्यय
स्तोराहुरिवेंदुना॥१॥ क्षेमेंद्रस्य॥ पीतस्तुषारकिरणोमधुनैवसा
र्द्धमंतःप्रविश्यचषकप्रतिबिंबवर्ती॥ मानांधकारमपिमानवती
जनस्यनूनंबिभेदयदसौप्रससादसद्यः॥२॥ रत्नाकरस्य॥ प्राप्यने
गुणवतापिगुणानांव्यक्तमाश्रयवशेनविशेषः॥ तत्तथाहिदयिता
ननदत्तंव्यानशेमधुरसातिशयेन॥३॥ भारवेः॥ सागसिप्रियतमे

कृतकोपात्त्वंग्रिशुग्मपतितेपिनतुष्टा॥सैवमद्यपरिलुप्तविवेका
त्तंतथैवपरितोषयतिस्म॥४॥नग्नजितः॥पिपिप्रियममस्वपंसु
सुमुखासवंदेहिमेततत्यजद्दुद्रुतंभजकांचनंभाजनं॥इति
स्खलितजल्पितंमदवशात्कुरंगीदृशः पुरोहसितहेतवेसहच
रीभिरध्यापितः॥५॥कस्यापि॥हावहारिहसितंवचनानांकौश
लंदृशिविकारविशेषाः॥चक्रिरेभृशमृजोरपिवध्वाःकामितेव
तरुणेनमदेन॥६॥माघकवेः॥मूर्तिमंतमिवरागरसौधंतेसम
र्पितपरस्परवक्त्रैः॥अंगनासवमिषेणतदानीमाक्षिपंतिस्महृदये
युयुवानः॥७॥जयमाधवस्य॥इतिश्रीबृहच्छार्ङ्गधरविरचिता
यांपद्धत्यांसंयोगशृंगारेपानगोष्ठीवर्णनपरिच्छेदः॥ छ ॥ छ॥

अथप्रियचाटुद्यूतक्रीडासुरतप्रशंसा

मुग्धेधानुष्कताकेयमपूर्वातवदृश्यते॥ययाविध्यतिचेतांसिगु
णैरेवनसायकैः॥१॥कस्यापि॥कृष्णार्जुनानुरक्तापिदृष्टिःकर्ण
विलंबिनी॥यातिनिःश्वसिनीयंतुकस्यतेकलभाषिणि॥२॥दंडि
कवेः॥स्मितपुष्पोद्गमोयंतेदृश्यतेधरपल्लवे॥फलंतुजातंपुष्पा
सिचक्षुषोर्ममपश्यतः॥३॥श्रीहर्षस्य॥दीप्तेकृतागसिभवेद्रुति
तःप्रभूणांपादप्रहारइवसुंदरिनास्मित्हृदये॥उद्यत्कठोरपुलकां
चितकंटकाग्रैर्यत्विद्यतेतवपदंननुसाव्यथामे॥४॥कस्यापि॥
बंधूकद्युतिबांधवोयमधरःस्निग्धामधूकच्छविर्गंडेचंडिचकालि
नीलनलिनश्रीमोचनंलोचनं॥नासांतेनितिलप्रसूनपदवीकुंद
भदंतिप्रियेप्रायस्त्वन्मुखसेवयाविजयतेविश्वंसपुष्पायुधः॥५॥
तरंगयदृशोंगणेरचयबंधमिंदीवरस्रणांवपुरपावृणुस्पृशतुकां
चनंकालिमा॥स्फुटीकुरुरदच्छदंव्रजतुविद्रुमःश्वेततामुदंचय
मुखंमनाग्भवतुलज्जितश्चंद्रमाः॥६॥राजशेखरस्य॥यत्त्वद्गम
देस्तुतवाननीयांकुरंगलक्ष्म्याचमृगाक्षिलक्ष्मीं॥एकार्थलिप्सा
कृतएवमन्येशशांकपंकेरुहयोर्निरोधः॥७॥हर्षस्य॥ छ ॥

अथद्यूतक्रीडा

आश्लेषचुंबनरतोत्सवभूषणानिक्रीडादुरोदरपणःप्रतिभूरनंगः॥भोगःसयद्यपिजयेचपराजयेचयूनोर्मनस्तदपिवांछतिजेतुमेव॥ १॥ मुरारेः॥अद्यद्यूतजिताधरग्रहविधावीशोस्मितत्वंडनादाधिक्येवदकोभवानितिमृषाकोपांचितभ्रूलता॥सद्यःखिन्नकरांतकुंतलपरायत्तीकृताःपश्यतेमुग्धाक्षीप्रतिकृत्यतत्कृतवतीद्यूतेऽपियत्नार्जितं॥२॥गोपादित्यस्य॥गाढालिंगनपूर्वमेकमनयाद्यूतेजितंचुंबनंतत्किंचित्परिरभ्यदत्तमधुनाप्रत्यर्पितंचानया॥नैतत्त्वादृगिदंनतादृशमितिप्रत्यर्पणप्रक्रमैर्यूनोश्चुंबनमेकमेवबहुधारात्रिर्गतातन्वते॥३॥उड्डीयकवेः॥आश्लेषप्रथमंक्रमेणविजितेहृद्येधरस्यार्पणेनमैद्यूतविधौपणंप्रियतमेकांतांपुनःपृच्छति॥अंतर्हास्यनिरोधसंभृतरसोद्भेदस्फुरद्गंडयास्वैरंसारिविसारणायनिहितःस्वेदांबुगर्वोत्करः॥४॥

अथसुरतप्रशंसा

सुरतेचसमाधौचमायायत्रनलीयते॥ध्यानेनापिहिकिंतेनकिंतेनस्मरतेनवा॥१॥ यत्रनमदनविकारःसद्भावसमर्पणंचगात्राणां॥तस्मिन्नुद्धूतभावेपशुकर्मणिपशवएववरज्यंते॥२॥प्रतिक्षणसमुल्लसन्नवकलाकलापान्वितःऽक्षपाकरविलोकनेयदितवास्तिकौतूहलं॥विलोकयतहासखेसुरतसंगरालोकनप्रस्तुहृष्टहृषितासुरंवनिविडकंचुकोत्तारणे॥३॥भट्टसोमेश्वरस्य॥संदृष्टाधरपल्लवासचकितंहस्ताग्रमाधुन्वतीमामामुंचशठेतिकोपवचनैरानर्त्तितभ्रूलता॥सीत्कारांचितलोचनासपुलकायैश्चुंबितामानिनीप्राप्तंतैरमृतंश्रमायमथितोमूढैःसुरैःसागरः॥४॥अमरुकस्य॥नरैर्विफलजन्मभिर्गिरिदरीनकिंसेव्यतेनयच्छ्रवणगोचरीभवतिजातुचिज्जन्मनि॥कपोतरवमाधुरीविरचनानुकारादरीरतासहकृशोदरीवचनकाकुरीतिध्वनिः॥५॥किंचेतैर्गुरुसेवनैःकिमपरव्योमार्चनैःकिंफलंकिंस्वाद्ध्ययनेनमेसुरपदप्राप्त्याथकिंवाफलं॥एतस्याःकुचकुंभ

संभ्रमपरीरंभप्रवाह्नोद्गमस्वेदांभोभिरनंगवन्हिरधुनानिर्वापितोनोयदि॥६॥इतिश्रीवृहच्छार्ङ्गधरविरचितायांपद्धत्यांसंयोगशृंगारेप्रियचाटुद्यूतक्रीडासुरतप्रशंसापरिच्छेदः॥ ७ ॥७॥

अथनववधूसंगमेसखीवाक्यनववधूसुरतारंभक्रीडा

रस्यमालिकयाबालेबद्धयाकिंप्रयोजनं॥अवश्यंभाविनावेतौकुचग्रहकचग्रहौ॥१॥कस्यापि॥ नीरंध्रंपरिरभ्यतेप्रियतमोभूयस्तरांचुंब्यतेतद्गाढंक्रियतेपदस्यरुचिरस्वादूत्कैःस्तूयते॥सख्यामुग्धवधूरसौरसविधौयत्नेनसाशिक्षितानिर्भ्रांतंगुरुणापुनःशतगुणंपंचेषुणाकारिता॥२॥रुद्रस्य॥तन्वीबालामृदुतनुरियंलज्यतामत्रशंकाहृष्टाकापिभ्रमरभरतोमंजरीभज्यमाना॥तस्मादेषारहसिभवतानिर्दयंपीडनीयामंदाक्रांताविसृजतिरसंनेक्षुयष्टिःसमग्रं॥३॥मंदाक्रांताछंदः॥ विकटनितंबायाः॥७॥

अथनववधूसुरतारंभक्रीडा

दृष्टाहृष्टिमधोददातिकुरुतेनालापमाभाषिताशय्यांचापरिवृत्यतिष्ठतिबलादालिंगितावेपते॥निर्यांतीषुसखीषुवासभवनान्निर्गंतुमेवेहतेबालावामतयाप्रियस्यनितरांप्रीत्यैववोढाभवत्॥ ॥१॥श्रीहर्षस्य॥पटालग्नेपत्यौनमयतिमुखंजातविनयाहवाश्लेषंवांछत्यपहरतिगात्राणिनिभृतं॥नशक्नोत्याख्यातुंस्मितमुखसखीदत्तनयनाह्रियाताम्यत्यंतःप्रथमपरिहासेनववधूः॥ ॥२॥अमरुकस्य॥अंसात्कृष्टदुकूलयासरभसंगूढौभुजाभ्यांस्तनावाकृष्टेजघनांशुकेकृतमधःसंसक्तमूरुद्वयं॥नाभीमूलनिबद्धचक्षुषितयाव्रीडानतांग्याप्रियेदीपःफूत्कृतिवातवेपितशिखःकर्णोत्पलेनाहतः॥३॥ कर्णोत्पलस्य॥विरमनाथविमुंचममांचलंशमयदीपमिमंसमयासखि॥इतिनवोढवधूवचनैर्युवामुदमगादधिकंसुरतादपि॥ ४॥ रुद्रस्य॥चुंबनेषुपरिवर्तिताधरंहस्तरोधिरसनाविघट्टने॥विघ्नितेच्छमपितस्यसर्वतोमन्मथेंधनमभूद्वधूरतं॥५॥कालिदासस्य॥समाकृष्टंवासः

कथमपिहठात्पश्यतितदाक्रमादूरुद्वंद्वंजठरशरगौरंमृगदृशः
॥तयादृष्टिंदत्वामहतिमणिदीपेनिपुणयानिरुद्धंहस्ताभ्यांझटि
तिनिजनेत्रोत्पलयुगं॥६॥कस्यापि॥बलान्नीतापार्श्वंमुखम
भिमुखंनैवकुरुतेधुनानामूर्धानंहरतिबहुशश्चुंबनविधौ॥दृ
ढन्यस्तंहस्तंक्षिपतिगमनारोपितमनानवोढावोढारंरमयति
चसंतापयतिच॥७॥कस्यापि॥प्रासादीयतिवैणवादिगहनं
दीपीयतिद्राक्तमःपर्यंकीयतिभूतलंदृषदपिश्लक्ष्णोपधानी
यति॥कस्तूरीयतिकर्दमःकिमपरंयूनोरसाविष्टयोर्येनालो
कितयोःसवंद्यमहिमादेवोनमस्यःस्मरः॥८॥ब्रह्मानंदमतु
रंकिमपीदंनेतिरतिषुवचनेन॥श्रुतिसीमसंगताक्षीमुग्धेसारं
ममादिशसि॥९॥असंमुखालोकनमाभिमुख्यंनिषेधएवानु
मतेःप्रकारः॥प्रत्युत्तरंमुद्रणमेववाचोनवांगनानांनवएवपं
थाः॥१०॥अभिनवपुलकालीमंडितागंडपालीनिगदतिविनि
गूढानंदहिंदोलिचेतः॥सुदतिवदतिपुण्यैःकस्यधन्यैर्मनो
जप्रसरमसरुद्देतच्चापलंलोचनस्य॥११॥नवतन्वितरुणपु
ण्याद्वरमणिमकरसंक्रमोजातः॥अधिवेणिभवतिनियमः
फलमविलंबेनभाविकामस्य॥१२॥सिंदूरंरविमिंदुमाननम
सौधमिल्लराहुस्त्वयंपद्गाढंग्रसतीवतत्प्रियतमेनिर्णीतमौत्सा
तिकं॥चोलेचंचलताभविष्यतिमुहुःस्यात्कुंतलेकर्षणंनीवीस्था
स्यतिनस्थिरासमुदयेदंगेमहान्संगरः॥१३॥दुकूलंदोर्मूला
त्पणयिनिपरीरंभरसिकेहरत्यंभोजाक्षीनिभृतनिभृतंनम्रवद
ना॥प्रियाश्लेषद्वेषिण्यपसरतुलज्जास्फुटमितिस्मितक्षीरे
णैवस्तनकलशाशंभुंस्नपयति॥१४॥उग्रस्तूपंकुचद्वंद्वंहारगं
गाधरंतव॥चंद्रचूडंकरिष्यामिकुरुतावद्दिगंबरं॥१५॥अ
विदितसुखदुःखंनिर्मलंब्रह्मकिंचित्जडमतिरिहकश्चि
न्मोक्षइत्याचचक्षे॥ममतुमतमनंगस्मेरतारुण्यघूर्णन्मदक
लमदिराक्षीनीविमोक्षोहिमोक्षः॥१६॥कांतेकंचुलिकावलो

क्विनिकलावत्यानमंत्यास्थितंतस्मिन्कोमलकाकुभाषिणितया
स्पंदीनिरुद्धोधरः॥उत्थायायकरस्पृशिप्रियतमेयूनोर्नवेसंगमे
कांचीकूजितकैतवेनमदनोद्यैःशांतिमभ्यस्यति॥१७॥इति
श्रीबृहच्छा॰पद्धत्यांसंयोगशृंगारेनववधूसंगमेसखीवाक्यनव
वधूस्फुरतारंभक्रीडापरिच्छेदः॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥

अथसुरतकेलिकथनं

आस्तांदूरेणविश्लेषःप्रियमालिंगतोमम॥स्वेदःकिन्नसरिन्ना
थोरोमांचःकिंनपर्वतः॥१॥कस्यापि॥आयातेदयितेमनोर
थशतैर्नीतेकथंचिद्दिनेवैदग्ध्यापगमाज्जडेपरिजनेदीर्घांक
थांकुर्वति॥दष्टास्मीत्यभिधायसत्वरतरंव्याधूयचीनांशुकंत
न्वंग्यारतिकातरेणरभसानीतःप्रदीपःशमं॥२॥अद्भुतपुण्य
स्य॥भजंत्यास्तल्पांतंकृतकपटकंडूतिपिहितंस्मितंयातेगेहा
द्बहिरविहितालीपरिजने॥प्रियास्यंपश्यंत्याःस्मरशरसमा
कूतसुभगंसलज्जालज्जापिव्यगमदिवदूरेमृगदृशः॥३॥जय
देवस्य॥चिरविरहिणार्तिश्लथीकृतगात्रयोर्नवमिवजगज्जा
तंभूयश्चिराद्भिनंदतोः॥कथमपिदिनेदीर्घेयातेनिशामधिरू
ढयोःप्रसरतिकथाबह्वीयूनोर्यथानतथारतिः॥४॥गाढालिं
गनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमासांद्रस्नेहरसातिरेकवि
गलत्कांचीप्रदेशांबरा॥मामामानदमातिमामलमितिक्षामाक्ष
रोल्लापिनीसुप्ताकिंनुमृतानुकिंमनसिमेलीनाविलीनानुकिं॥८
॥५॥अमरुकस्यैतौ॥दशासपदिमीलितंदशनरोचिषानिर्गतं
करेणपरिवेपितंवलयमालयाक्रंदितं॥प्रियेणहरिणीदृशां
दशनखंड्यमानेधरेपरव्यसनकातराःकिमुनकुर्वतेसाधवः
॥६॥कस्यापि॥धम्मिल्लोभंगमेतुप्रविशतुतिलकःकेशपाशां
धकारंयत्रालीगंडपालीत्यजतुचविचरंकर्णयोर्गंतुकामा॥
वामायाःकांतदंतक्षततिसहनेत्वेकएवाधरोसौवीरःकामाह
वेस्मिन्नितिवदतिचलन्नूपुरक्काणभंग्या॥७॥भानुपंडितस्य॥

द्दोर्भ्यांसंयमितःपयोधरभरेणापीडितःपाणिजैराविद्धोदशनैःक्षताधरपुटःश्रोणीतटेनाहतः॥हस्तेनानमितःकरेधरसुधास्यंदेनसंमोहितःकांताकामपितृप्तिमापतदहोकामस्यवामागतिः॥८॥ईषन्मीलितदृष्टिमुग्धहसितंसीत्कारधारावशादव्यक्ताकुलकेलिकाकुविकसद्दंतांशुधौताधरं॥श्वासोत्कंपपयोधरोपरिपरिष्वक्तंकुरंगीदृशोहर्षोत्कर्षविमुक्तनिःसहतनोर्धन्योधयत्याननं॥९॥जयदेवस्यैतौ॥रतरभसनितांतश्रांतकांताकुचांतस्खलदमलकराग्रानाभिदेशेष्वधोपि॥स्मितमधुरमुखीनांह्रीणनेत्रोत्पलानामधरमधुवधूनांभाग्यवंतःपिबंति॥१०॥चारुनूपुरझणत्कृतंरतकामिनांहरतिमानसंयथा॥नोतथामधुरगीतवादितंकेकिचातकपिकस्वनाअपि॥११॥शार्ङ्गधरस्यैतौ॥नैषावेगंमृदुतरतनुस्तावकीनंक्षिसोढुंसक्तामौनंचपलुनितरांस्वेदयेंदीवराक्षी॥इत्यभ्यासंविदधतइतिप्राणनाथस्यगत्वाकर्णोपांतेनिभृतनिभृतंनूपुरंशंसतीव॥१२॥मूर्तस्य॥स्वामिन्प्रभोप्रियगृहाणपरिष्वजस्वकिंकिंशठोस्यकरुणोसिसुखोत्थितोसि॥हादुःखयस्यलमलंविरमेतिवाचःस्त्रीणांभवंतिसुरतेप्रणयानुकूलाः॥१३॥कुमारभट्टस्य॥खिन्नंमंडलमैंदवंविगलितंस्रग्भारनद्धंतमःप्रागेवप्रथमानकेतकशिखाद्वातापितंचस्थितं॥शांतंकुंडलताडवंकुवलयद्वंद्वंतिरोमीलितंवीतंविद्रुमसीत्कृतंनहिततोजानेकिमासीदिति॥१४॥कस्यापि॥मत्तेभकुंभपरिणाहनिकुंकुमार्द्रेकांतापयोधरयुगेरतिखेदखिन्नः॥वक्षोनिधायभुजपंजरमध्यवर्तीधन्यःक्षपांक्षपयतिक्षणलब्धनिद्रः॥१५॥भर्तृहरेः॥गाढाश्लेषनिपीडनान्निपतितामालोक्यहारावलींस्यात्तुहंतभियाक्षणंनिविडयानीव्यापिनव्यापृतं॥विश्लेषज्वरवेदनासहनयोःकारुण्यकीर्णात्मनाक्कापिप्रापितयोःसमागमसुखंयूनोर्मनोजन्मना॥१६॥हारस्त्रुट्यतिकं

कणंनिपततिस्रक्कौमुदीक्लिश्यतिध्वांतंधावतिसीत्करोतिर
जनीजानिर्वलीभज्यति॥कांचीक्षुभ्यतिकांचनक्षितिधरेकिं
चक्षतंचंचतिप्रारंभेमदनाहवस्यविजयीदेवोमनोभूरभूत्
॥१७॥आघ्रातंकमलंप्रियेणसुदृशास्मित्वाःपनीतंमुखंदत्तं
विभ्रमकंदुकेनखपदंगुढौकराभ्यांस्तनौ॥न्यस्तावेपक्ष्मालि
कोरसिमुद्रापर्यस्तरोमांचयामीलल्लोचनयास्थितंप्रणयिनोदू
रेपिपूर्णंरतं॥१८॥पत्युःप्रवृत्तस्यरतोजिगीषावचोनिशम्याथ
नकिंचिदूचे॥कलावतीकिंतुविहस्यतस्यकपोलयोःस्वेदमपा
चकार॥१९॥गाढालिंगनपूर्वमेकमनयाद्यूतेर्जितंचुंबनंतत्किं
चित्परिरभ्यदत्तममुनाप्रत्यर्पितंचानया॥नैतत्तादृगिदंनता
दृशमितिप्रत्यर्पणव्यग्रयोर्यूनोश्चुंबनमेवमेवबहुधारात्रिर्गला
तन्वतोः॥२०॥मुग्धेमानिनिकोपरीतिरियतीयुक्तानतथ्यांति
दंकांतेकिंत्वदुपेक्षितामम तनुःशोभेतनेहाद्भुतं॥अन्यायोभव
तिच्छलस्यकरणेदक्षेजनेन्यादृशंकाहेतिमतिरुद्धवागकरवं
वाक्स्तंभनंचुंबनैः॥२१॥ इतिश्रीवृहच्छार्ङ्गधरविरचितायां
पद्धत्यांसंयोगशृंगारेसुरतकेलिकथनपरिच्छेदः॥७॥ ७॥

अथविपरीतरतक्रीडा

तन्नास्तिकारयतियन्नमनोभवस्यसाशक्तिरप्रतिहताभुवनेत
याहि।उद्वास्यपीवरपयोधरमंडलाग्रंवल्गंतिपत्युरुपरिप्रम
दाअपीह॥१॥शशिवर्धनस्य॥पतत्तुतवोरसिसततंदयिता
धम्मिल्लमल्लिकानिकरः॥रतरसरभसकचग्रहलुलितालकव
ल्लरीगलितः॥२॥बाणभट्टस्य॥प्रशांतेनूपुरारावेश्रूयतेमेख
लाध्वनिः॥कांतेनूनंरतश्रांतेकामिनीपुरुषायते॥३॥कस्या
पि॥प्रारब्धेरतिकेलिसंकुलरणारंभेतयासाहसप्रायंकांतजया
यकिंचिदुपरिप्रारंभियत्संभ्रमात्॥खिन्नायेनकटीतटीशिथि
लतादोर्वल्लिरुत्कंपितंवक्षोमीलितमक्षिपौरुषरसःस्त्रीणांकु
तःसिध्यति॥४॥जयदेवस्य॥बलात्कुचंव्याकुलकेशपाशांस्ति

व्यन्मुखं स्वीकृतमंदहासं॥पुण्यातिरेकात्सुरुषाल्लभंते पुंभावमंभोरुहलोचनानां॥५॥मुग्धे तवास्मिन्दयिता पुरुषो भवत्वमित्युक्तया न हि न हीति शिरो विधूय॥स्वस्मात्करात्प्रियकरे वलयं क्षिपंत्या वाचं विनाभ्युपगमः कथितो मृगाक्ष्याः॥६॥क्वचित्तांबूलाक्तः क्वचिदगुरुपंकांकमलिनः क्वचिच्चूर्णोद्गारी क्वचिदपि च सालक्तकपटः॥ वलीभंगाभोगैरलकपतितैः कीर्णकुसुमोस्त्रियः सर्वावस्थां कथयति रतं प्रच्छदपटः॥७॥कस्यापि॥ईषत्कंपपयोधरं गुरुकटीघोद्धप्रहाराङ्कुतं स्विद्यद्भालमनेकहास्यसरसं संरंभमंदव्यथं॥वारंवारमुरःप्रहारसुभगं संदृश्यमानाधरं किंचिद्दूत्तनि तंबदेशनखरं धन्यो रतं सेवते॥८॥श्रीशिवदासदेवानां॥ आलोलामलकावलीं सकुसुमां बिभ्रच्चलत्कुंडलं किंचिन्मृष्टविशेषकं तनुतरैः स्वेदांभसः शीकरैः॥तन्व्या यत्सुरतांततांतनयनं वक्त्रं रतिव्यत्यये तत्त्वां पातु चिराय किं हरिहरब्रह्मादिभिर्दुर्लभं॥९॥ अमरुकस्य॥ विपरीतमविपरीतं यद्भूतमन्यत्तदेव विपरीतं॥तरुमारोहति लतिका नारोहति लतिकां तरुः क्वापि॥१०॥ विहायसि विहारिणी भवतु नाम सौदामिनी सुमेरुशिखरादधः पततु नाम मंदाकिनी॥ परं तदिदमद्भुतं यदयमेत्य भूमीतलं नमन्नमृतदीधितिः कमलसारमाकर्षति॥११॥तमःस्तोमं सोमं गिलति वमती वोडुनिकरं रथांगद्वंद्वेस्मिन्नमरतटिनी खेलति मुहुः॥लतायामुत्कंपो मदनवसती कांचनगिरिर्विपर्येति प्रायो रतिपतिमते सर्वमधुना॥१२॥ प्रारब्धे विपरीतनाम्नि रते सर्वं तदाभूत्क्षणात्समांग्यां विपरीतमेव कुटिला मुक्ताः सुवृत्ता अपि॥मुक्ता निःपतिता भवंति तरलास्तौ च्याचलौ चेलतुः सीदंति श्रुतिपारगाः सुमनसः कांतानुकांतायते॥१३॥मधुपानसमुल्लसत्त्व‾ वालं चलहेमाचलकांतिमिजेटालं॥ विधुनिःपतदंधकारजालं स्मुभकालं क्व पुनर्विलोकयामः॥१४॥ साक्षाद्भूतस्वयंभूरयमुक्तास्तिमिरनिकरभाराः॥ग्रप

नामशीतरोचिस्तवपाठंमेखलाविदधे॥१५॥इतिश्रीबृहच्छार्ङ्गःधरविरचितायांपद्धत्यांसंयोगशृंगारेविपरीतरतक्रीडापरि०

अथसुरतविवृत्तिः

शांतेमन्मथसंगरेरणभृतांसत्कारमातन्वतीवासोदाज्जघनस्यपीनकुचयोर्हारंश्रुतौकुंडले॥बिंबोष्ठस्यचवीटिकांसुनयनापद्भ्यांरणन्नूपुरौपृष्ठालेविनिकेशपाशनिचयेयुक्तोहिबंधक्रमः॥१॥कस्यापि॥व्यालोलःकेशपाशस्तरलितमलकैःस्वेदलोलौकपोलौक्लिष्टाबिंबाधरश्रीःकुचकलशरुचाहारिनाहारयष्टिः॥कांचीकांचिद्गताशांस्तनजघनपदंपाणिनाच्छादयंतीभूषाहीनापिकाचित्प्रियस्यहृदयमहोप्रीणयत्येवमुग्धा॥२॥जयदेवस्य॥नेपथ्यादपिराजतेहिनितरांव्यालुप्तभूषातनुःसंभोगश्रममीलितंविजयतेचक्षुःकटाक्षादपि॥गाढालिंगनकौतुकादपिनवंदोर्वल्लिविस्त्रंसनंप्रीत्यालापरसादपिप्रियतमेमौनंकुरंगीदृशः॥३॥हरिकरस्य॥करकिशलयंधूत्वाधूत्वाविमार्गतिवाससीक्षिपतिसुमनोमालांरोषंप्रदीपशिखांप्रति॥स्थगयतिमुहुःपत्युर्नेत्रेविहस्यसमाकुलासुरतविरतौरम्यातन्वीमुहुर्मुहुरीक्षते॥४॥सुरतविरतौव्रीडावेशश्रमश्लथहस्तयारहसिगलितंतन्व्याप्राप्तुंनधारितुमंशुकं॥रतिरसजडैरंगैरंगविधातुमशक्तयाप्रियतमतनौसर्वांगीणंप्रविष्टमधिष्ठया॥५॥अमरुकस्येतौ॥प्रियकृतपटस्तेयव्रीडाविडंबनविह्वलांकिमपिकृपणालापांबालांविलोक्यसंभ्रमः॥अपिविचलितस्कंधाचारेगतेसुरताहवेत्रिभुवनमहाधन्वीन्यूनंन्यवर्ततमन्मथः॥६॥कस्यापि॥निर्वृत्तेसुरतोत्सवेबहुविधेजातेधिकेंगक्लमेतल्पेस्वेदजलार्द्रचंदनमयेकिंचिद्गृहीतेंबरे॥सांद्रस्वेदवशाद्विशेषविषयव्यासंगजिह्मात्मनोदंपत्योःस्मरयत्स्मरातुरतयाभूयोपिजातास्पृहा॥७॥कस्यापि॥पपातमेरोःसुरसिंधुधाराववर्षतारागणमंधकारः॥बभूवभृंगावलिरप्यकंपाश

शामश्रीं फालतिकाविलासः ॥८॥ पपात गंगा हरमौलिसंगाबं
धं तमो भूतमपेतबंधं ॥ तडिल्लता चंचलता महासीदस्यंदमासी
दरविंदयुग्मं ॥९॥ रविन्नमंडलमैंदवं विगलितं स्त्रकुंभारनद्धं
तमः प्रागेव प्रथमानकेतकशिखावीरायितं चस्थितं ॥ शांतं कुं
डलतांडवं कुवलयद्वंद्वं तिरोमीलितं निष्कंपस्तवकापि चंपकल
तासाभून्नजानेथ किं ॥१०॥ मूक्ताभूषणमिंदुबिंबमजनि व्या
कीर्णतारं नभः स्मारं चापमपेतचापलमभूदिंदीवरे मुद्रिते ॥
व्यालीनं कलकंठकंठनिनदैर्मंदानिलैर्मंदितं निष्कंपस्तवका
पि चंपकलता साभून्नजानेथ किं ॥११॥ नीव्या संयमनं कचे नि
यमनं श्रोणीतले चासनं विश्वासाभ्यसनं मुखे समभवत्प्रत्या
हृतिर्भूषणे ॥ ध्यानं प्रेममणिधारणास्तनतटे तन्व्याः समाधिः प्रि
ये निर्वेदादिव किं रतांतसुलभात्सर्वांगयोगोत्सवः ॥१२॥ निर्ले
पौ कुचकुड्मलौ कचभरस्तत्याज बंधं पयो कांची निर्गुणतां नि
रंजनं दशा दृग्भ्यां समासादिता ॥ नीरागोधरपल्लवश्च गुरुणा के
नापि गौरांगि ते शंके शंवरशासनोपनिषदां तत्त्वावबोधः कृतः ॥
॥१३॥ सुतनु श्रुतिसेवनतो मन्येनयनं जनं जातं ॥ मुग्धास्नेहा
तक वरी सुक्तां मुक्तिं कथं प्राप ॥१४॥ तंद्रालुं दिलशोणलोचन
युगं दंतांकदंतच्छदं पर्यस्तालकवल्लि घर्मपटलप्रोद्भिन्नपत्रा
वलि ॥ जृंभोज्जृंभितसीधुसौरभमिलद्भृंगीभिरंगीकृतस्तोत्रं
शंसति वृत्तमेव रजनीवृत्तांतमेणीदृशः ॥१५॥ संवरणाय वधू
टी वहु परिपाटीं करोतु किं तेन ॥ संप्रति रजनिरहस्यं नयनालस्यं
निवेदयति ॥१६॥ क्वचित्तांबूलाक्तः क्वचिदगुरुपंकांकमलिनः
क्वचिच्चूर्णोद्गारी क्वचिदपि च सालक्तकपदः ॥ वलीभंगाभोगैर
लकपतितैः शीर्णकुसुमैः स्त्रियाः सर्वावस्थं कथयति रतं प्रच्छ
दपटः ॥१७॥ कामसंगरविधौ मृगीदृशः प्रौढपौरुषधरे पयोध
रे ॥ स्वेदराजिरुदियाय सर्वतः पुष्पवृष्टिरिव पुष्पधन्वनः ॥१८
सुखं जृंभारंभिप्रसरति मदामोदलहरीदृशोस्तंद्राभारः स्फुर

त्तिविगलत्यंगलतिका॥त्वमेतादृक्कांतिःकमलमुखिधन्ये
वनितरामसौधन्योयस्तेसकलरजनीजागरयिता॥१९॥इ
तिश्रीवृहच्छा॰वि॰प॰संयोगशृंगारेसुरतविवृत्तिपरिच्छेदः॥

अथमध्यरात्रिक्रीडानायिकानुनयो

शमितनिखिलदीपेसुप्तनिद्रालुलोकेतरपरवशचित्तामध्यरा
त्रेविबुद्धा॥प्रथमसुरतखिन्नांमुग्धिकांबोधयंतोबहुदृढप
रिरंभैःकामुकाःखेदयंति॥१॥शार्ङ्गधरस्य॥वदनशशिनःस
र्वेशीतादिवागतवेपथुःस्तनयुगलतेभ्रांत्यानंगोनिविष्टइवक्ष
मात्॥ज्वलितमदनागारेतन्व्यास्ततोजघनस्थलेसपुलकज
लःपसुःपाणिर्विनीतइवाभवत्॥२॥कस्यापि॥रतिक्लृतिगतेमाया
निद्रांविवर्त्तितचुंबनापुलकपयसातलंमत्वासुखादृत्तानना॥
कृतकशयनोनिर्यास्यासीत्युदीर्यकलंवधूर्वेणिनमधरंकृता
दंतैरपूरयतस्पृहां॥३॥कस्यापि॥ छ ॥ छ ॥ छ ॥ छ॥

अथप्रणयकलहेनायिकानुनयः

गतःप्रायारात्रिःशशिमुखिशशीशीर्यतइवप्रदीपोयंनिद्रावश
मुपगतोघूर्णितइव॥प्रणामांतोमानस्तदपिनजहासिक्रुधम
होकुचप्रत्यासत्यात्हृदयमपितेचंडिकठिनं॥१॥क्षीणांसुःश
शलांछनःशशिमुखीक्षीणोनकोपस्तवस्मेरंपद्मवनंमनागपि
नतेस्मेरंमुखांभोरुहं॥पीतंश्रोत्रपुटेनयद्यदुरुतंपीतंनतेज
ल्पितंरक्ताशक्रदिगंगनारविकरैर्नाद्यापिरिक्तासिकिं॥२॥
एकस्मिन्शयनेपराङ्मुखतयावासोंतरंताम्यतोरन्योन्यं
हृदयस्थितेप्यनुनयेसंरक्षतोगौरवं॥दंपत्योःशनकैरपांग
वलनान्मिश्रीभवच्चक्षुषोभग्नोमानकलिःसहासरभसंकंठग्र
होनुष्ठितः॥३॥अमरुकस्य॥कृत्वाविग्रहमश्रुपातकलुषंप्र
त्यासनादुत्थिताक्रोधाच्चापिविचाल्यगर्भभवनाद्द्वारंरुषाप्र
स्थिता॥दृष्ट्वाचंद्रमसंप्रभाविरहितंप्रत्यूषवाताहताहारात्रि
स्त्वरितागतेतिपतिताकांताप्रियस्योरसि॥४॥कस्यापि॥इ

तिश्रीबृहच्छा०वि०प०संयोगशृंगारेमध्यरात्रिक्रीडानायिकानुनयफ

अथवायुः

धुन्वानाश्चंदनालींबकुलमुकुलजांधूलिमुद्धूलंयतश्चुंबंतश्चूतयष्टीःपरिमलवहलान्चंपकान्कंपयंतः॥आरादारामसीमातटघटितघटीयंत्रनिर्मुक्तवारांधारामाधारयंतःश्रमशमपटवोयांत्यमीगंधवाहाः॥१॥कुप्यल्लकेशबाहुप्रकरनियमिताशेषलेखांबुजाक्षीशापक्षीणाःक्षरंतःक्षणपरिकलिताःकेकिनांकामिनीभिः॥कार्णाटीनामकांडेमृगमदमसृणंकेशपाशंस्पृशंतःपंपासंपातसंपामलयजमरुतोजातकंपाःपतंति॥२॥कृत्वाकार्णाटिकांताकुचकनकगिरिप्रांतसंचारलीलांपंपामासाद्यपंपापयसिवनभुविक्षिप्तमल्लीरजस्काः॥आकर्षतःपुरस्तान्निगडमिवकलध्वानपुष्पंधयालींधावंत्येतेमदांधामदननरपतेःसिंधुरागंधवाहाः॥३॥एतेपाटीरवाटीनवविटपनटीलास्यशिक्षातिदक्षादोलाखेलत्सुरंध्रीश्रमजलकणिकाजालुपातिप्रतानाः॥सौरभ्यादापतद्भिर्मधुकरपटलैःपृष्ठतोनुप्रयाताःकामाग्नेःस्फारधाय्याःपथिककुलवधूवद्धवैराःसमीराः॥४॥उत्सार्यकुंतलमपास्यदुकूलकूलमुन्माच्यबाहुलतिकामलसास्तरुण्यः॥स्वेदांबुसिक्ततनवःस्पृहयंतियस्मैतस्मैनमःसुकृतिनेमलयानिलाय॥५॥अमीतटसमीपनिर्झरतरंगरिंगत्सरोजडीकृतपटीरभूरुहकुटीरसंचारिणः॥मनोविधुरयंतिमेमलयमेखलामेदुरादुरासदवनप्रियप्रियतमारुतामारुताः॥६॥लतांपुष्पवतींस्पृष्ट्वास्नातोविमलवारिणा॥पुनःसंपर्कशंकीवमंदंचरतिमारुतः॥७॥अपहायशनैःपटीरवाटीरिहलाटीजनमानलुंठनाय॥समुदेतिमनोजराजधाटीपरिपाटीपटुरेषगंधवाहः॥८॥चोलांगनाकुचनिचोलतलानुलीनोद्राकूकेरलीविरलकुंतलकंपलोलः॥लाटीललाटतटशोषणमानसोयंफुल्लारविंदघनबंधुरुपैति।

वायुः॥९॥ लताकुंजेगुंजन्मद्वद्लिपुंजंचपलयन्समालिंग
न्नंगंद्रुततरमनंगंप्रबलयन्॥ मरुन्मंदंमंदंदलितमरविंदंत
रलयन्रजोवृंदंविंदन्किरतिमकरंदंदिशिदिशि॥१०॥ कावे
रीतीरभूमीरुहभुजगवधूभुक्तमुक्तावशिष्टःकार्णाटीचीनपी
नस्तनवसनदशांदोलनस्पंदमंदः॥ लीलालाटीललाटालक
लुलितलतालास्यलीलाविलोलःकष्टंभोदाक्षिणात्यःप्रसर
तिपवनःपांथकांताकृतांतः॥११॥ अनन्यक्षुण्णश्रीर्मलयवन
जन्मायमनिलोनिपीयस्वैरांबुस्मरमकरंदंभुक्तविभवं॥ वि
दर्भाणांभूरिप्रियतमपरिरंभरभसप्रसंगादंगानिद्विगुणपुलका
संजितनुते॥१२॥ वृथाधूलीधाराःपरिकिरसिवात्याःप्रथयसे
नवावेगःकोयंपवनतवहानन्वसमये॥ रतांतःश्रांताभिःस्तिमि
तनयनांताभिरनिशंस्मृ—तोयत्कांताभिर्नसुलभतरःको
पिचभवान्॥१३॥ वारंवारंधुतकुसुमितारण्यरेवातटेवासेवा
पुण्यंपरिणतमिदंतावकंतर्कयामि॥ यत्वांमत्वांतिकमुपगतं
कामवामाभिरामारामाःस्वैरंकुचकलशतोवस्त्रमुत्सारयंति॥

अथहर्म्ये

यत्रालसाहरिणशावदृशोविहारपर्यस्तहारमणिमेदुरकेलित
ल्पाः॥ तारासुसौधशिखरांचलचुंबिनीषुमुक्ताभ्रमेणकरपल्ल
वमर्पयंति॥१॥ भित्तौभित्तौप्रतिफलगतंभालसिंदूरपूरंदृ
ष्ट्वाकमलनयनाकेलिदीपभ्रमेण॥ कांतेचोलंहरतिहरितंलोल
मालोकयंतीयत्रप्रच्छादयतिसहसापाणिपंकेरुहेण॥२॥ यदी
यसौधस्फुरदिंद्रनीलगवाक्षकुक्षिंप्रविशन्हिमांशुः॥ उत्कंधरा
णामनिशंनराणामिंदुःपरागभ्रममातनोति॥३॥ अथधृष्टो
नायकः॥ सतस्यारहसिवक्षसिसरसिजपत्रेणताडितस्यापि
॥दयितस्यवीक्ष्यहसितंप्रियसखिहसितंममाप्यासीत्॥४॥

अथधूर्तः

धुन्वंत्याःकरपल्लवंमृगदृशोजातागसःप्रेयसोवक्त्रांभोरुहिहे

मकंकणमणिस्पर्शेसमुन्मीलति॥ चक्षुर्व्यर्थितमित्युदीर्यसहसाधूतेनतच्चेष्टितंतस्यौयेनचिरायसैवशिरसानम्रेणशान्तोदरी ॥१॥

अथशिशुः

अनवाप्तवयसिरहसिप्रेयसिपर्यंकमागतेजयति॥ मदचपलनयनायामूकस्वप्नायतेभावः॥१॥ प्रियतममजातयौवनमतः परिचिंत्यचमृगाक्षी॥ अंगानिभूषयंतीमालीमालीढयौवनाहसन्ति॥२॥

अथदेशांतरोपगतः

दिदृक्षमाणःक्षणमायताक्ष्यामुखांबुजंमंजुलमध्वनीनः॥ मुहूर्त्तमात्रंसुमुहूर्त्तकालंसवर्षकालंकलयांचकार॥१॥ निशम्यकेलीभवनोपकंठेमंजीरमंजुध्वनिमध्वनीनः॥ यथातथाबद्धकथावशेषंसमापयामाससमंसुहृद्भिः॥२॥ सुखंप्रियायाःसमुदीक्ष्यमाणःकांतादिनस्यांतमपेक्षमाणः॥ मुहुर्मुहुर्व्योमनितिग्मभानौनिवेशयामासविलोचनानि॥३॥ इतिदेशांतरोपगतः

अथजलधरः

शीतलादिवसंत्रस्तंप्रावृषेण्यान्नभस्वतः॥ नभोवभारनीरंध्रंजीमूतकुलकंबलं॥१॥ चलद्बलाकादशनाभिरामःपरिस्रवद्वारिमदांबुधारः॥ आहन्यमानस्तडिदंकुशेनस्मरस्यदध्वानघनद्विपेंद्रः॥२॥ इतिजलधरः॥ छ ॥ छ ॥ छ ॥ छ ॥

अथघनदुर्दिनं

घनतरघनवृंदच्छादितेव्योम्निलोकेसवितुरथसुधांशोःसंकथैवव्यरंसीत्॥ रजनिदिवसभेदंमंदवाताःशशंसुःकुमुदकमलगंधानाहरंतःक्रमेण॥१॥ विरहमनुभवंतीसंगमंचापिभर्त्तोरजनिदिवसभेदंचक्रवाकीशशंस॥ पूर्वार्द्धंघनतरेति॥ उत्तरार्द्धमंभष्टस्य॥ घनोद्यमेगाढतमेंधकारेनकोपिनिर्णेतुमहःशशाक॥ स्पृशन्मुहुःकिंतुकरेणनाभीसरोजमाभीरकुलाधिनाथः॥३॥ इतिघनदुर्दिनं॥ छ ॥ छ ॥ छ ॥ छ ॥

अथघनगर्जितं

या कामिनीसायदिमानिनीस्यात्स्मरस्यराज्ञोप्यपराधिनी स्यात्॥ इतीवचंडैः किमु ताड्यते सौ कादंबिनी कामनृपस्य ढक्का॥१॥ चंद्रबिंबरविबिंबतारकामंडलानि घनमेघडंबरैः॥ भक्षितानि जलदोदरेषु तद्रोदनध्वनिरिवैषगर्जितं॥२॥ निद्रितस्य वत शंबरद्विषो जागराय किमवारिवाहकः॥ ऊर्जितं दधदतीवगर्जितं संभ्रमन्नभसि संभ्रमाद्ययौ॥३॥ इति घनगर्जि॰

अथप्रभातवर्णनं

अभूत्प्राचीपिंगारसपतिरिवप्राश्यकनकंगतच्छायश्चंद्रोबुधजनइवग्राम्यसदसि॥ क्षणंक्षीणास्तारानृपतयइवानुद्यमपरानदीपाराजंते द्रविणरहितानामिवगुणाः॥१॥ विरलविरलीभूतास्ताराकलौसुजनाइवव्यपसरतिचध्वांतंचित्तात्सतामिवदुर्जनः॥ मनइवमुनेःसर्वत्रापिप्रसन्नमभून्नभोविगलतिनिशाक्षिप्रंलक्ष्मीरनुद्यमिनामिव॥२॥ इतीभोजराजसेवककविवर्गस्य॥ व्रजत्यपरवारिधिंरजतपिंडपांडुःशशीनमंतिजलबुद्बुदद्युतिसपंक्तयस्तारकाः॥ कुरंडकविपांडुरंदधतिधामदीपांकुराश्चकोरनयनारुणाभवतिदिक्चसौत्रामणी॥३॥ दिशिदिशिमृगयंतेवल्लवाग्यासमेतंमुहुरपगतनिद्राःसप्रमोदेक्षितेन॥ अयमपिचसरोषैःकामिभिःस्तूयमानोनदतिमधुरतारंताम्रचूडोविहंगः॥४॥ कस्यापि॥ यःसैन्येस्मरपार्थिवस्यविरहिप्रत्यर्थिनामग्रणीर्ज्योत्स्नानिर्भरमुज्झतिस्मजगतांयस्तापनिर्वापणं॥ सोयंतारकनायकःकिमपरंशृंगाररसंजीवनंजातःपुष्परागपांडुरजरत्कूष्मांडपिंडाकृतिः॥५॥ निद्रानोमानिनीमांप्रतिपुरुषभयंहर्म्यपारावतेभ्योवाचालत्वंददानःकविनृपुरुवित्ताप्रातिभंसंदधानः॥ प्रातस्तत्तूर्यनादःस्थगयतिगगनंमांसलःपांशुतल्पादस्वल्पादुत्थितानांनरवरकरिणांशृंखलासिंजितेन॥६॥ कस्यापि॥ अविरतमविरामारामिणांसर्वरात्रंनवनिधुवनलीलाःकौतुकेनाभिवीक्ष्य॥ इदमुदवसितानाम

स्फुटालोकसंपन्नयनमिवसनिद्रंघूर्णतेदीपमर्चिः॥७॥कुमुदवनमुपश्री श्रीमदंभोजखंडंत्यजतिमदमुलूकः प्रीतिमांश्चक्रवाकः॥उदयमहिमरोचिर्यातिशीतांशुरस्तंहतविधिललितानांहाविचित्रोविपाकः॥८॥ लुलितनयनताराःक्षामवक्त्रेंदुबिंबा रजनयइव निद्राक्रांतनीलोत्पलास्यः॥ तिमिरमिवदधानाःस्रंशिनःकेशपाशानवनिपतिगृहेभ्योयांत्यमूर्वारवध्वः॥९॥माघकवेः॥ येकुंचीकृतवल्लभः प्रणतयःशास्त्रैरनंगस्ययेनप्राप्ताश्चनिशीथिनीपरिकरैःशैथिल्यवीथीमपि॥ तेनिःशंकविटंकतालुतुमुलप्रेतप्लवप्लावितैःछिन्नाकुक्कुटकूजितैर्मृगदृशांमानग्रहग्रंथयः॥१०॥ बिल्हणस्य॥ आदेजग्मुषिताम्रचूडरचितेश्रोत्रंप्रभुग्नाजवात्किंचिद्धासवदिङ्मुखंप्रविकसद्दृष्ट्वागवाक्षाधुना॥संप्राप्तेनसमीरिताप्रियतमप्रेम्णाविरुह्याशनैरुत्थानोपनिवेशनानिकुरुतेतल्पेमुहुःपांसुले॥११॥कस्यापि॥निर्यात्यारतिवेश्मनःपरिणतप्रायांविलोक्यक्षपांगाढालिंगनचुंबनानि बहुशःकृत्वाथसंतुष्टया॥ एकंभूमितलेनिधायचरणंतल्पेप्रकल्प्यापरंतन्वंग्यापरिवर्तितांगलतयाप्रेयांश्चिरंचुंबितः॥१२॥कस्यापि॥पुरुहूतदिगंगनाप्रसूतारविमुद्रामसुतंऽचिरादुपेतं॥ अलिनोनलिनीदलाद्विमुक्ताःप्रियबाहुद्वयबंधनान्नवोढाः॥१३॥ दिशिदिशिमृगयंतेपल्लवग्रासमेतेमुहुरपगतनिद्राःसप्तयोहेषितेन॥अयमपिचसरोषैःकामिभिःऽश्रूयमाणोनदतिमधुरतारंताम्रचूडोविहंगः॥१४॥ पद्मिन्याःसकलांविधायविकलांताराऽधिपःसंपदंतस्मेयस्युदयोन्मुखेसतिरवावुद्विग्नतामाश्रितः॥ ताराःस्वस्यकरैर्विकृष्यसहसाऽगच्छन्नितोऽस्ताचलंलग्नाःकाश्चनताःप्रभाकरकरेपश्यन्पऽरिम्लायति॥१५॥ संश्लिष्टासाऽनुरागंस्वकरपरिचयप्राप्तभूरिऽप्रसादायापूर्वभुक्तपूर्वारविकरकलितांतामुदीस्याऽमृतांशुः॥ निस्तेजाःपश्चिमाऽब्धौप्रविशतिहिसतांदुःसहोमानभंगःकिंव

क्रव्यंसितांशोःसतुसकलसतांमंडलस्याऽपिनेता॥१६॥उत्सिक्तः कुसुमासवैः कुमुदिनीराजप्रियांपुष्पिणीमालिंगन्निशिनिर्भयंपरिचयंकुर्वन्मुनः पल्लवैः॥ यावत्पंकजसौरभस्वमखिलं गृण्हन्नलघुप्रस्थितस्तावत्कल्पउपस्थितेमरुदयंविष्वग्भयाद्द्रावति॥१७॥ आश्लेषशेषारतिरंगनाभ्रमो दशेषाकुचकुंकुमश्रीः॥ तूणीरशेषः कुसुमायुधोपिप्रभातशेषारजनीबभूव॥१८॥ इतः सुक्ताचंद्रद्युतिभिरिहरक्तारुणकणैस्तमिस्रैरप्यंतस्खलितगतिभिर्मेचकरुचिः॥ प्रभातश्रीरेषाविलसतिपुरः स्यासुहृतिनामिमंस्तूणांजन्तुद्युमणिविधिजासंगमइव॥१९॥ प्राचीदिगंबरमणौदयितेविभातेप्रांतेंबरंस्पृशतिवासकसज्जिकेयं॥ धीराजगादरमणस्यनदूषणानिरोषारुणास्यजतितारकभूषणानि॥२०॥ दरफुल्लकमलकाननसौरभसंभारमंथरःपवनः॥ दयितोरसिशयितामपिदयितासंतापयांचक्रे॥२१॥ इतिश्रीवृ॰ शार्ङ्गधर॰ प॰ संयोगशृंगारेप्रभातवर्णनपरिच्छेदः॥७॥

अथप्रभातवायुसूर्योदयवर्णनं

विकचकमलगंधैरंधयन्भृंगमालाः सुरभितमकरंदंमंदमावातिवातः॥ समदमदनमाद्यद्यौवनोद्दामरामारमणरभसखेदस्वेदविच्छेददक्षः॥१॥ माघकवेः॥ स्तनपरिसरभागेदूरमावर्तमानाः स्फुरतिनिधनमध्येकिंचिदेवस्खलंतो॥ वपुरलघुनितंबाभोगरुद्धावधूनांनिधुवनरसखेदच्छेदिनः शीतवाताः॥२॥ कस्यापि प्रातःसीमंतिनीनांनिधुवनललितान्संश्रयन्केशपाशानुन्मीलत्पंकजांभः परिमलसुरभिः स्फारयन्कामलीलाः॥ स्वच्छायस्यावबिंदून्दिशिदिशि विकिरन्स्थूलमुक्ताफलाभान्धूलीभिः केतकीनांधवलितमदनोवातिमंदंनभस्वान्॥३॥ रामाणांरमणीयवक्रशशिनः स्वेदोदबिंदुप्लुतान्व्यालोलालकमंजरीः प्रचलयन्धुन्वन्नितंबांशुकं॥ प्रातर्वातिनवातिरुष्णविकसद्राजीवराजीकरः पुंजामोदमनोहरोरतिरसग्लानिंहरन्मारुतः॥४

अथसूर्योदयवर्णनं

ततःकोकवधूबंधुर्बंधूककुसुमप्रभः॥उदयाद्रिशिरोरत्नमुद
यौतेजसांनिधिः॥५॥शार्ङ्गधरस्य॥निजांशुकरैतांप्राचींचुंब
यत्यतिरागिणीं॥लज्जयेवययौक्वापिश्यामामीलितलोचना॥६
॥रघोकविदर्पणस्य॥ आगत्यसंप्रतिवियोगविसंस्थुलांगीमं
भोजिनींक्वचिदपिक्षपितत्रियामः॥एतांप्रसादयतिपश्यशनैः
प्रभातेतन्वंगिपादपतनेनसहस्ररश्मिः॥७॥कस्यापि॥उन्नि
द्रकोकनदरेणुपिशंगितांगागायंतिदीर्घमपियागृहदीर्घिकासु
॥एतच्चकास्तिचरवेर्नवबंधुजीवपुष्पच्छदाभमुदयाचलचुंबि
बिंबं॥८॥उदयतिविततोर्ध्वरश्मिरज्जावहिमरुचौहिमधाम्नि
यातिचास्तं॥वहतिगिरिरयंविलंबिघंटाद्वयपरिवारितवार
णेंद्रलीलां॥९॥माघकवेः॥अयमुदयतिमुद्राभंजनःपद्मिनी
नामुदयतिगिरि नालीबालमंदारपुष्पं॥विरहविधुरकोकद्वंद्व
बंधुर्विभिंदन्कुपितकपिकपोलक्रोडताम्रस्तमांसि॥१०॥की
लालःकुंकुमानांसकलमपिजगज्जालमेतन्निषिंचंसुक्ताश्वो
न्मत्तभृंगाविघटितकमलक्रोडकारामृतेभ्यः॥उत्स्रष्टंगोस
हस्रंकिमुतकलकलःश्रूयतेचद्विजानांभाग्यैर्वृंदारकाणांह
रिहयहरितासूयतेपुत्ररात्रं॥११॥एतत्तर्कयचक्रवाकयुगला
श्वासापतारागणत्रासायस्फुरदिंदुमंडलपरीहासायभासां
निधिः॥दिक्कां——ताकुचकुंभकुंकुमरसन्यासायपंकेरुहोल्लासा
यस्फुटवैरकैरववनत्रासायविद्योतते॥१२॥मीलत्कैरवलोच
नांप्रविगलत्ताराच्छहारावलींग्लायच्चंद्रमुखांविसृंखलतमः
केशांसघोषांवरां॥प्रातःसत्वर——मित्वरीमिववलादुद्गाढ
रागैःकरैराकर्षन्निवयामिनीमनुपतत्यंभोजिनीवल्लभः॥१३
॥अयंखलुमृणालिनीनवविलासवैहासिकास्त्विषांविलपतेरितः
सपदिदृश्यमानानिजाः॥स्तनौपुलकयंतिचोत्पलदृशांप्रियोरः
स्थलेविपर्यतितरंतयोघुसृणपंककपत्रांकुराः॥१४॥इतिश्री२०

अथसंभोगाविष्करणं

चंदनंस्तनतटेधरबिंबेपावकंघनतरंचसपत्न्याः॥ प्रातरीक्ष्यकुपितापिमृगाक्षीसागसिप्रियतमेपरितुष्टा॥१॥लक्ष्यालक्ष्यललाटपट्टफलकेकेयूरमुद्रांगलेवक्त्रेकज्जलकालिमानयनयोस्तांबूलरागोधरे॥दृष्ट्वाकोपविधायिमंडनमिदंप्रातश्चिरंप्रेयसोलीलांतामरसोदरेमृगदृशः श्वासाः समाप्तिंगताः॥२॥यद्रात्रौरहसिव्यपेतविनयंवृत्तंरसात्कामिनोरन्योन्यंशयनीयमोहितरसावाप्तिंप्रवृत्तस्यहं॥ तत्सानंदमिलदृशोःकथमपिस्मृत्वागुरूणांपुरोहासोद्भेदनिरोधमंथरमिलत्तारंकथंचित्स्थिता॥३॥अमरुकस्यैतौ॥ बहुजगदपुरस्तात्तस्यमत्ताकिलाहंचकरचकितबाहून्प्रौढयोषिहूदस्य॥ विदितमितिसखिभ्योरात्रिवृत्तंविचिंत्यव्यपगतमनयाह्रीव्रीडितंमुग्धवध्वा॥४॥माघकवेः॥ दर्पणेषुपरिभोगदर्शिनीपृष्ठतःप्रणयिनोनिषेदुषः॥प्रेक्ष्यबिंबमनुबिंबमात्मनःकानिकानिनचकारलज्जया॥५॥दंपत्योर्निशिजल्पतोर्गृहशुकेनाकर्णितंयद्वचस्तत्प्रातर्गुरुसन्निधौनिगदतस्तस्यातिमात्रंवधूः॥कर्णालंबितपद्मरागशकलंविन्यस्यचंच्वोःपुटेव्रीडार्ताप्रकरोतिदाडिमफलव्याजेनवाग्बंधनं॥६॥कस्यापि॥धन्यासियाकथयसिप्रियसंगमेपिनर्मोक्तिचाटुकशतानिरतांतरेषु॥नीवींप्रतिप्रणहितेस्वकरेप्रियेणसख्यःशपामियदिकिंचिदपिस्मरामि॥७॥विज्जकायाः॥रतिखिन्नामनुप्रातर्लज्जानम्रमुखींवधूं॥स्मरंतींरात्रिचरितंदृष्ट्वाप्नोतिनकोमुदं॥८॥ शार्ङ्गधरस्य॥कांतेतल्पमुपागतेविगलितानीवीस्वयंबंधनाद्वासःप्रश्लथमेखलंगुणधृतंकिंचिन्नितंबेस्थितं॥एतावत्सखिवेद्मिकेवलमहंतस्यांगसंगेपुनःकोयंकावयमत्रकिंतुसुरतंस्वल्पापिमेनस्मृतिः॥९॥अमरुकस्य॥किमपिकातभुजांतरवर्तिनीकृतवतीयदियंकलभाषिणी॥तदनुकस्यगिरागुरुसन्निधौह्रिय

मनीयतसारिकयावधूः॥१०॥ ॥इतिश्रीबृहच्छार्ङ्गधरविरचितायांपद्धत्यांसंयोगशृंगारेसंभोगाविष्करणं परिच्छेदः॥ * ॥ * ॥ * ॥ * ॥ * ॥ * ॥ * ॥ * ॥

अथमध्यान्हः

स्वेस्वेकर्मणिसंनियोज्यसुहृदोभूमीसुरान्मंत्रिणश्चक्रेनिर्भयमारच्चय्यभगवान्संधासरागोदयः॥स्वाःलोकक्षणकांदिशीकमधुनोल्लवातुंविचिन्वन्निवध्वांतंक्वापिनिलीनमंबरमणिर्व्योमाऽग्रमारोहति॥१॥ छायासंश्रयतेतलंविटपिनांश्रांतेवपांथैःसमंसूलंयातिसरोजलस्यजडताग्लानेवमीनैःसह॥आचामत्यहिमांशुदीधितिरपस्तप्तेवलोकैःसमंनिद्रागर्भगृहंसह्मविशतिक्लांतेवकांताजनैः॥२॥ उष्णालुःशिशिरेनिषीदतितरोर्मूलाःलवालेशिखीनिर्भिद्योपरिकर्णिकारकुसुमान्याशेरतेषट्पदाः॥ नक्षेवारिविहायतीरनलिनींकारंडवःसेवतेक्रीडावेश्मनिवेशिपंजरशुकःक्लांतोजलंयाचते॥३॥ पत्रच्छायासुहंसामुकुलितनयनादीर्घिकापद्मिनीनांसौधान्यत्यर्थतापाद्वलभिपरिचयद्वेषिपारावतानि॥ बिंदूत्क्षेपान्पिपासुःपरिसरतिशिखीभ्रांतिमद्वारियंत्रंसर्वैरुस्त्रैःसमग्रस्त्वमिवनृपगुणैर्दीप्यतेसप्तसप्तिः॥४॥ स्कंधान्सिंधुरयूथगंडकषणव्यासक्तदानोदकान्सेवंतेमधुपामहीरुहशिरःपुष्पाणिहित्वाभृशं॥ लीयंतेवलभीकुलायकुहरेनिष्पंदमेतेखगाजिह्वालीढवधूमुखोमृगगणश्छायासुविश्राम्यति॥५॥ उद्दामद्युमणिद्युतिव्यतिकरप्रक्रीडदर्कोपलज्वालाजालजटालजांगलतटीःनिष्कूजकोयष्टयः॥ भौमोष्मात्यवमानसूरकिरणाःक्रूरप्रकाशाद्दृशोराशुष्कर्मसमापयंतिधिगभूर्मध्यान्हशून्यादिशः॥६॥ छायावियोगिवनितेवगताकृशत्वंतसंपयःपिशुनमानसवद्बभूव॥ केनाधुनावतमनागवलोकनीयःक्रुद्धोत्तमर्णमुखमंडलवत्पतंगः॥७॥ इतिमध्यान्हवर्णनं॥ * ॥ * ॥

अथसतीवर्णनकुलवधूवृत्ते

निर्व्याजं दयितेनतान्दृषुनताश्वश्रूषुभक्ताभवत्स्निग्धाबंधुषुवत्सलापरिजनेस्मेरासपत्नीष्वपि॥भर्तुर्मित्रजनेसमर्थवचनाखिन्नाचतद्वैरिषुप्रायःसंवननंनतभ्रुतदिदंवीतौषधंभर्तृषु॥१॥राजशेखरस्य॥स्नानोभोबहुसाधितारसवतीदेवाग्निकार्योचितासंभारोरचितोविशुद्धवसनेकालोचितेयोजिते॥स्नानंनाथविधीयतामतिथयःसीदंतिनान्याशयाधन्यंबोधयतेशनैरितियतिंमध्यान्हसुप्तंसती॥२॥दीपकस्य॥नातःपरंकुलमतःपरतोनशीलंनातःपरंचकरुणासदनंमृगस्याः॥यद्वाष्पबिंदुरपराधवतोपिपत्युरुत्संगितेनचरणेनतयापनिन्ये॥३॥कस्यापि॥दुर्वाराःस्मरमार्गणाप्रियतमोदूरेमनोप्युत्सुकंगाढंप्रेमनवंवयोतिकठिनाःप्राणाःकुलंनिर्मलं॥स्त्रीत्वंधैर्यविरोधिमन्मथसुहृत्कालःकृतांतोक्षमीसोढव्याःसखिसांप्रतंकथममीसर्वेग्नयोदुःसहाः॥४॥मयूरस्वनोःशकुनस्य॥अस्माकंसखिवाससीनरुचिरेग्रैवेयकंनोज्वलंनोवक्रागतिरुद्धतंनहसितंनैवास्तिकश्चिन्मदः॥किंत्वन्येपिजनावदंतिसुभगोप्यस्याःपतिर्नान्यतोदृष्टिंनिःक्षिपतीतिविश्वमियतामन्यामहेदुःस्थितं॥५॥रुद्रस्य॥बहिर्नलोलादृगपांगमूलादुपैतिकूलादिवसागरोर्मिः॥नवासतीनामभिलाषबंधंव्यनक्तिगंधंकलिकेवचेतः॥६॥संचारोरतिमंदिरावधिसखीकर्णावधिव्याहृतंचेतःकांतसमीहितावधिमहामानोपिमौनावधि॥हास्यंचाधरपल्लवावधिपदन्यासावधिप्रेक्षितंसर्वंसावधिनावधिःकुलभुवांप्रेम्णःपरंकेवलं॥७॥आलोलैरुपगम्यतेमधुकरैःकेशेषुमाल्यग्रहःकांतिःकापिकपोलयोःप्रथमतेतांबूलमंतर्गतं॥अंगानामनुलेपनंपरिमलैरालेपनप्रक्रियावेशःकोपिसरोजसुंदरदृशःसूतेसुखंचक्षुषोः॥८॥ इतिसतीवर्णनं

॥ * ॥ * ॥ * ॥

अथकुलवधूवृत्तं

जीवनिजीवतिनाथेम्रियतेचमृतेमुदायितामुदिते।।सहजस्नेहरसालाःकुलवनिताकेनतुल्यास्यात्।।१।।शार्ङ्ग·धरस्य।।भक्तिःप्रेयसिसन्नतेषुकरुणाश्वश्रूषुनम्रःशिरःप्रीतिर्ज्ञातिषुगौरवंगुरुजनेक्षांतिःकृतागस्यपि।।अम्लानाकुलयोषितांव्रतविधिःसोयंविधेयःपुनर्भर्तुर्दयिताइतिप्रियसखीबुद्धिःसपत्नीष्वपि।।२।।विल्हणस्य।।अभ्युत्थानमुपागतेगृहपतौतद्भाषणेनम्रतातत्पादार्पितदृष्टिरासनविधिस्तस्योपचर्यास्वयं।।सुप्तेतत्रशयीततत्प्रथमतोजह्याच्चशय्यामितिप्राच्यैःपुत्रिनिवेदितःकुलवधूःसिद्धांतधर्माश्रमः।।३।।राजशेखरस्य।।चतुर्थेन्हिस्नातांत्रिदिनविरहापांडुवदनांरजोमुक्तांतन्वींचपलनयनांकामललितां।।हिमक्लिण्मार्जारीमलयभवगंधप्रणयिनीसधन्यःकोभुंक्तेच्युतकुसुमशेषामिवलतां ४।।कस्यापि।।लज्जावशावनतमंथरदृष्टिपातंयैश्चुंवितंकुलवधूवदनारविंदं।।तेषामनेकपुरुषव्रणिताधरेषुशक्तिःकथंभवतिवश्यवधूसुखेषु।।५।।कस्यापि।।प्रतिरजनिप्रतिदिवसंविरहवह्निश्चंडिडिंडिमंदत्वा।।कोपवधूदृग्वलितैर्विश्लंपुनराकुलीभवति।।६।।बिल्हणस्य।।यस्यभार्याशुचिर्दक्षाभर्तारमनुगामिनी।।नित्यंमधुरवक्त्रीचसारमानरमारमा।।७।।नित्यंस्नातासुगंधाचनित्यंचप्रियवादिनी।।अल्पभुङ्मितवक्त्रीचदेवतासानमानुषी।।८।।असारभूतेसंसारेसारभूतानितंबिनी।।इतिसंचिंत्यवैशंभुरर्धांगेपार्वतींदधौ।।९।।कार्येषुमंत्रीकरणेषुदासीभोज्येषुमाताशयनेषुरंभा।।धर्मानुकूलाक्षमयाधरित्रीभार्याचषाड्गुण्यवतीहदुर्लभा।।१०।।पदन्यासोगेहाद्बहिरहिफणाऽऽरोपणसमोनिजाऽऽवासाद्न्यद्भवनमपरद्वीपतुलितं।।वचोलोकाऽलभ्यंकृपणधनतुल्यंमृगदृशःपुमानन्यःकांताद्विधुरिवचतुर्थीसमुदितः।।११।।साभार्यायाप्रियंब्रूतेसपुत्रोयत्रनिर्वृतिः।।तन्मित्रंयत्रविश्वासःस

देशो यत्र जीव्यते॥१२॥ सैव साध्वी सुभक्तिश्च सुस्नेहः सरसो॰
ज्वलः॥ पाकः संजायते यस्याः करादप्युदरादपि॥१३॥ दीपदशा
कुलयुवती वैदग्ध्येनैव मलिनतामेति॥ शेषा अपि भूषायै गणिका
याः शशिकलायाश्च॥१४॥ रूपसंपन्नमग्राम्यं प्रेमप्रायं प्रियंवदं
कुलीनमनुकूलं च कलत्रं कुत्र लभ्यते॥१५॥ इति श्रीवृहच्छार्ङ्गध
रविरचितायां पद्धत्यां मिश्रकशृंगारे सतीवर्णनकुलवधूवृत्तपरि॰

अथासतीचरितं

वयेबाल्ये बाला न तरुणिमति यूनस्त्वति युवामपीच्छामो वृद्ध
न्परिणयविधिस्तु स्थितिरिति॥ त्वयारब्धं जन्मक्षपयतुमनेनै
कपतिना न मे गोत्रे पुत्रि क्वचिदपि सतीलांछनमभूत्॥१॥ कस्या
पि॥ मया कुमार्यापि न सुप्तमेकया न जारमुत्सृज्य पुमान्विलोकि
तः॥ अन्येन गोत्रस्थितिपालकेन प्रसन्नता मे तु भवोपकारिणि
॥२॥ विल्हणस्य॥ भ्रूभेदैः कतिचिद्गिरा कुटिलया कांश्चित्कियं
त्यः स्मितैः स्वैरिण्यः कथयंति मन्मथरसव्यापारवश्यं मनः॥
कासांचित्तु नरंगकेषु मसृणच्छायेषु मध्यस्थितो भावः काचपु
टेषु पुष्करमिव प्रव्यक्तमालोक्यते॥३॥ अभिनंदस्य॥ दृशा॰
किंचित्किंचिल्ललितभुजलीलाविलसनैः कराग्रान्तैः किंचिन्नख
विलिखनैः किंचिदधिकं॥ स्पृशंत्यः संबाधे गुरुभिरनभिप्रेक्षित
पथे यथेष्टं चेष्टंते स्फुटकुचतटाः पश्य कुलटाः॥४॥ नयनविका
रैरन्यं वचनैरन्यं विचेष्टितैरन्यं॥ रमयति सुरतेनान्यं स्त्री बहु
रूपा निजा कस्य॥५॥ क्षेमेंद्रस्य॥ पर्यंकस्वास्तरणः पतिरनुकू
लो मनोहरं सदनं॥ तृणमिव लघु मन्यंते कामिन्यश्चौर्यरतिलु
ब्धाः॥६॥ दुर्दिवसे घनतिमिरे दुःसंचारासु नगरवीथीषु॥ पत्यु
र्विदेशगमने परमसुखं जघनचपलायाः॥७॥ यः कौमारहरः
स एव हि वरस्ताश्चेंदुगर्भाः क्षपाः प्रोन्मीलन्नवमालतीपरिम
लामोदानुकूलानिलाः॥ सा चैवास्मि तथापि चौर्यसुरतव्यापार
लीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कंठते॥८॥

शीलाभट्टारिकायाः॥ दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद्गृहे दास्यसि प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति॥ एकाकिन्यपि यामि तद्वनमितः श्रोत्रस्तमालाकुलं नीरंध्रास्तनुमुल्लिखंति जठरच्छेदा नलग्रंथयः॥९॥ विज्जकायाः॥ श्वश्रूषु स्वगुरून्निवर्तय सखीवादं स्वबंधुष्विव यः कावेरी तदसन्निविष्टनयने मुग्धे किमुत्ताम्यसि॥ आस्ते पुत्रि समीप एव भवनादेलालतालिंगनन्यंचद्बालतमालदंतुरदरी तत्रापि गोदावरी॥१०॥ भद्रं तस्य तरोः स्वयं कृतचिरप्रस्थान किं कथ्यतां दुर्वारस्तमरण्यवह्निरदहद्धिग्दारुणं दुर्वचः॥ मा खिँस्व नतः प्रभृत्यरुदितं तस्यापतद्भिर्दृशोरंभोभिः परिणद्धपल्लवघनच्छायस्तरुर्वर्द्धते॥११॥ इह वटवृक्षे यक्षः प्रतिवसति दिवापि यत्र भयशंका॥ तस्मिन्कृतिनववध्वानीतावीनोद्वःक्षणदाः॥१२॥ कस्यापि॥ एकाकिनी यदबला तरुणी तथाहमस्मिन्गृहे गृहपतिश्च गतो विदेशं॥ शंकावशे तदिह वासमियं वराकी श्वश्रूर्ममांधबधिरा ननु मूढ पांथः॥१३॥ रुद्रस्य॥ शून्यं वेश्म चिराहृतो गृहपतिर्जाताधुना शर्वरी स्थातुं नोचितमत्र गच्छ निपुणं लोकैरनालक्षितः॥ इत्थं लोलदृशा त्वसावभिहितो दासीसुखेनाध्वगः स्मृत्वा किंचिदिवक्रया गिरजनी प्राप्तेत्युदीर्य स्थितः॥१४॥ एकांते चलतो गृहं शशिमुखोप्यन्यादृशो दृश्यते क्षिप्रं साधय याहि पुत्रि सदने भुक्त्वान्यमावासवं॥ स श्वासं भ्रमिता किलेति बहुशः संप्रेरयंत्या वधूं पांथं वीक्ष्य वभंज सस्मितमुखी सैवार्थसिद्धोदनं॥१५॥ स्वामी नश्वसितोथसूयति मनोजिघ्रः सपत्नीजनः श्वश्रूरिंगितदैवतं नयनयोरीहालिहो यातरः॥ तद्दूरादयमंजलिः किममुना दृग्भंगिभावेन ते वैदुग्धी मदनप्रपंचचतुरव्यर्थोपमत्रश्रमः॥१६॥ दृग्भंगभंगिमशतैरसतीरहस्यमन्वेषयन्कपटभिक्षुकलक्षितोसि॥ स्वस्य प्रभुर्न च भवामि ततः क्षमस्व भिक्षोपटौकनमिषादयमंजलिस्ते॥१७॥ अनार्यप्रज्ञा

नास्मिह्जनवधूनांहिमनसोमहाशल्यंकर्णेनवनवकूजंवूकिशलयः॥भ्रमन्भिक्षाहेतोरधिनगरिबुद्धोसिनमयात्वयैतावद्देषःपथिकनविधेयःपुनरपि॥१८॥भिक्षाटनस्यैते॥आयातासिविमुंचवेपथुभरंदृष्टासिकेनापिनोनीलंचोलममुंविमुंचहरतुस्वैरंनिशीथानिलः॥इत्यंतर्भयसन्नकंठमसकृद्यामीतितल्लंगतात्रस्यंतीपरिरभ्यतेसुकृतिभिःस्वैरंनवस्वैरिणी॥१९॥सव्रीडार्धनिरीक्षणंयदुभयोर्यद्दूतिसंप्रेषणंचाद्यश्वोभवितासमागमइतिप्रीतिप्रसादंवचः॥प्राप्तेकालसमागमेसरभसंलब्धंघनालिंगनंतत्कालस्यफलंतदेवसुरतंशेषापशूनांस्थितिः॥२०॥कस्याप्येतौ॥सुखशय्यातांबूलंविश्रब्धाश्लेषचुंबनादीनि॥तुलयंतिनलक्षेशंत्वरितक्षणचौर्यसुरतस्य॥२१॥इंदुर्यत्रनविद्यतेनमधुरंदूतीवचःश्रूयतेनोच्छ्वासंत्हृदयंवहंत्यशिशिरानोपैतिकार्श्यंवपुः॥स्वाधीनामनुकूलिकांस्वगृहिणीमालिंग्ययत्सुप्यतेतत्किंप्रेमगृहाश्रमव्रतमिदंकष्टंसमाचार्यते॥२२॥यस्यभार्याविरूपाचकश्मलाकलहप्रिया॥अधिकाऽधिकभक्षाचसाजरानजराजरा॥२३॥विवादशीलांस्वयमर्थचोरिणींपराऽनुकूलांबहुपाकपाकिनीं॥आक्रोशिनींदुर्विषहप्रकोपिनींत्यजंतिभार्यांदशपुत्रमातरं॥२४॥भर्तायद्यपिनीतिशास्त्रनिपुणोविद्वान्कुलीनोयुवादाताकर्णसमःप्रसिद्धविभवःशृंगारदीक्षागुरुः॥स्वप्राणाऽधिककल्पितास्ववनितास्नेहेनसंलालितातंकांतंप्रविहायसैवयुवतीजारंपतिंवांछति॥२५॥पतिरतीवधनीसुभगोयुवापरविलासवतीषुपराङ्मुखः॥शिशुरलंकुरुतेभवनंसदातदपिसासुदतीरुदतीकृतः॥२६॥आरोपिताशिलायामश्मेवत्वंभवेतिमंत्रेण॥मग्नाऽपिपरिणयाऽऽपदिजारसुखंवीक्ष्यहसितैव॥२७॥आःपाकंनकरोषिपापिनिकथंपापीत्वदीयःपितारंडेजल्पसिकिंतवैवजननीरंडात्वदीयास्वसा॥निर्गच्छत्वरितंगृहाद्बहिरितोनेदंत्वदीयंगृहंहाहानाथममाऽद्यदेहिमरणंजार

स्यभाग्योदयः॥२८॥पाणौगृहीताऽपिपुरस्कृताऽपिस्नेहेननि
त्यंपरिवर्धिताऽपि॥परोपकारायभवेदवश्यंवृद्धस्यभार्याकर
दीपिकेव॥२९॥कार्येसत्यपिजातुयातिनबहिर्नाऽप्यन्यमा
लोकतेसाध्वीरप्यनुकुर्वतीगुरुजनंश्वश्रूंचशुश्रूषते॥वि
श्रंभंकुरुतेचपत्युरधिकंप्राप्तेनिशीथेपुनर्निद्राणेसकलेजने
शशिमुखीनिर्यातिरंतुंविटैः॥३०॥एषैवयोषितांधन्याशीलं
चलभतेसुखं॥दिवापतिव्रताभूयोनक्तंचकुलटायतः॥३१॥
कुलपतनंजनगर्हाबंधनमपिजीवितस्यसंदेहं॥अंगीकरो
तिसकलंवनितापरपुरुषसंसक्ता॥३२॥ब्रह्मैवसत्यमखिलं
नहिकिंचिदस्तितस्मान्नमेसखिपराऽवरभेदबुद्धिः॥जारेत
थानिजवरेसदृशोऽनुरागोव्यर्थंकिमर्थमसतीतिकदर्थयं
ति॥३३॥सखिसुखयत्यवकाशेप्राप्तःप्रेयान्यथातथानगृ
हे॥वातादवारितादपिभवतिगवाक्षाऽनिलःशीतः॥३४॥नां
बुजैर्नकुमुदैरुपमेयंस्वैरिणीनयनपंकजयुग्मं॥नोदयेदिन
करस्यनवेंदोःकेवलंतमसियस्यविकासः॥३५॥तुलामारु
ह्यरविणावृश्चिकेनिहितंपदं॥त्वयातुशिरसिन्यस्तमयत्ने
नैवभोगिनां॥३६॥आकारेणशशीगिराचपरभृत्पारावतश्चुं
बनेहंसश्चंक्रमणेसमंदयितयारत्यांप्रमत्तोगजः॥इत्थंभ
र्तरिमेसमस्तयुवतिश्लाघ्येऽपिनोरोचतेमद्भाग्येनविवाहितः
पतिरिवस्यान्नैकदोषोयदि॥३७॥जन्मैवमास्तुयदिवाननितं
विनीषुतत्रापिचेदहहनैवकुलांगनासु॥हाधिक्विधेकुलव
धूरथचेद्भवेयंनैवास्तुचक्वचनमेमनसोऽनुबंधः॥३८॥ज्ञातंज्ञा
तिजनैःप्रमृष्टमयशोदूरंगताधीरतात्यक्ताह्रीःप्रतिवादिनो
थविनयःसाध्वीपदंप्रोञ्छितं॥लुप्ताचोभयलोकसाधुपदवी
दत्तःकलंकःकुलेभूयोदूतिकिमन्यदस्तियदसावद्यापिनाग
च्छति॥३९॥ज्ञातामैत्रीसहजमधुरायातिभिर्लोचितांतैःकर्णा
कर्णिप्रथितमयशोबंधुवर्गैरभाणि॥संप्रत्येवंतदपिनमनाक्

मुंचतिप्राणनाथंकोजानीतेकुवलयदृशःकीदृशःप्रेमबंधः॥४०
॥देहेप्युर्ललितस्यदेवरशिशोःस्फोटव्रणोदारुणोयातस्तेनवन
स्पतित्वचमुपाहर्तुंमयागम्यते॥दुष्यंतुश्वसितानिघर्मसलि
लैःपत्राणिलुप्यंतुवावक्षोवाविलिखंतुहंतनखरैःक्रुद्धाःकपि
श्रेणयः॥४१॥प्रियोमयैवावचितैःप्रसूनैर्हृष्टोहरस्यात्तनुतेसप
र्यां॥अतोनतानेकलतावृतानियास्यामिसायंविपिनानिसख्यः॥
४२॥अंभोरुहाक्षिशंभोश्चरणावाराधितौकेन॥यस्मैविवलितव
दनामदनाकूतंविभावयसि॥४२॥द्वारिस्तंभविलग्नाप्रियस
खिदृष्टिंपथिक्षिपसि॥प्रहिणोषिभाग्यभाजिप्रेयसिदूतीमि
वभ्रमरीं॥४३॥अयंरेवाकुंजःकुसुमशरसेवासमुचितःसमी
रोयंवेलानवविदलदेलापरिमलः॥इयंप्रावृट्धन्यानवज
लदविन्यासचतुरापराधीनंचेतःसखिकिमपिकर्तुंमृगयते
॥४४॥न्यस्तंपन्नगमूर्ध्निपादयुगलंभक्तिर्विमुक्तागुरोस्त्य
क्ताप्रीतिरकारिकिंनभवतोहेतोर्मयादुष्कृतं॥अंगानांशत
यातनानयनयोःकोपिक्रमोरौरवःकुंभीपाकपराभवश्चमन
सोयुक्तंत्वयिप्रस्थिते॥४५॥श्वश्रुःपद्मदलंददातितदपिभ्रूसं
ज्ञयागृह्यतेसद्योमर्मरशंकयानचतयासंस्पृश्यतेपाणिना
॥यातुवीचिसुत्तृणस्यवचसाप्रत्युत्तरंदीयतेश्वासःकिं
तुनमुच्यतेहुतवहक्रूरःकुरंगीदृशा॥४६॥कमभगंवदतिजन
स्तंनिजपतिरितिनैषरोचतेमह्यं॥पीयूषेपिहिभेषजभावोपहि
तेभवत्यरुचिः॥४७॥नारीणांखलुबंधुरंधुतमसःपाथोदरःसो
दरःकुंजंनाभिगृहंनिशासहचरीसेव्यःस्मरःस्मापतिः॥इत्थंचा
रुचकोरचंचलदृशांयासांमतिर्जायतेतासामेवयशःसुधांशु
धवलंतासांचसौख्यंसदा॥४८॥कोकःस्तोकविमुक्तमौक्ति
कभरोनिःस्पंदमिंदीवरंचापंचामलवर्जितंहिमकरक्रोडेत
मःक्रीडति॥वातःकातरयत्यपाकृतरसंवंधूकमेतावता
वार्तोकापिकदापिपाणिपिहिताकस्यापिवातिष्ठति॥४९॥॥

स्तुमःकंवामाक्षिक्षणमपिविनायंनरमसेविलेभेकःप्राणान्
रणमखमुखेयेमृगयसे।।सुलग्नेकोजातःशशिमुखियमालिं
गसिवलात्तपश्रीःकस्यैषामदननगरिध्यायसितुयं।।५०।।हंसैः
शैवलमंजरीतिकवरीचंचूभिराकर्षितावक्रेचंद्रधियाचकोर
वनिताचक्रेनखैरक्रमं।।भृंगैःपंकजकोरकप्रतिभयावक्षोरु
हौवीक्षितस्तन्मातःकरवैपुनर्नसरसीतोयावगाहोद्यमं।।५१।।
संपत्कस्याद्यताराभवतितरलितायत्पुरोनेत्रतारादृष्टाकेना
द्यकांचीयदभिमुखगतावेपतेरत्नकांची।।उग्रःकस्याद्यतुष्टः
सखियदनु- मतेकश्चिदुग्रोनुतापःस्नातंकेनाद्यवेणीपय
सिविलुलितायत्कृतेकापिवेणी।।५२।।आस्तांविश्वसनंस
खीषुविदिताभिप्रायसारेजनेतत्राप्यर्पयितुंदृशंसुरुचिरांश
क्रोपिनव्रीडया।।लोकोप्येषपरोपहासकुशलःसूक्ष्मेंगित॰
ज्ञोप्यलंमातःकंशरणंव्रजामित्वद्धृदयेजीर्णोनुरागानलः।।५३।।
गुरुत्रासादासादिनभवदुपालंभवचसांमुहुःस्मारंस्मारंकथमपि
निशीथेसमगमं।।इदानींमुंचत्वंदयितपुनरेष्यामिसमभूदुषः
कालीनोयंचटुलचटकालीकलकलः।।५४।।इहनगरेप्रतिर
थ्यंभुजंगसंबाधरुचिरसंचारे।।सुंदरिममतमेतन्नकुलप्र
तिपालनंश्रेयः।।५५।।इतिश्रीबृहच्छार्ङ्गधरविरचितायांपद्ध॰
त्यांमिश्रकशृंगारेअसतीचरित्रपरिच्छेदः।। ❀ ।। ❀ ।। ❀ ।।

अथवेश्यागर्हणं

वेश्याऽसौमदनज्वालारूपेंधनसमेधिता।।कामिभिर्यत्रहूयंते
यौवनानिधनानिच।।१।।कष्टंजीवतिगणिकागणकोऽपिचरा॰
जसेवकोवैद्यः।।दिवसेदिवसेमरणंपरस्ययच्चित्तरंजनंवृत्तिः
।।२।।एताहसंतिचरुदंतिचवित्तहेतोर्विश्वासयंतिपुरुषंनचवि
श्वसंति।।तस्मान्नरेणकुलशीलसमन्वितेनवेश्याःश्मशान॰
घटिकाइववर्जनीयाः।।३।।जात्यंधायचदुर्मुखायचजराजीर्णा
ऽखिलांऽगायचग्रामीणायचदुष्कुलायचगलत्कुष्ठाभिभूतायच

॥यच्छंतीषुमनोहरंनिजवपुर्लक्ष्मीलवश्रद्धयापण्यस्त्रीषुविवेककल्पलतिकाशस्त्रीषुरज्येतकः॥४॥हारहीरकहिरण्यभूषणैस्तोषमेतिगणिकाधनैषिणी॥प्रेमकोमलकटाक्षवीक्षितैरेवजीवतिकुलांऽगनाजनः॥५॥नावत्कुलस्त्रीमर्यादायावल्लज्जावगुंठनं॥हृतेतस्मिन्कुलस्त्रीभ्योवरंवेश्यांऽगनाजनः॥६॥धनाऽशाकैतवस्नेहोवितथैश्चित्ततोषणं॥एकमप्यस्तिनाऽस्मासुकर्यंवेश्यासमावयं॥७॥केशःकुंदमिषाद्दिवोपहसतिद्रव्यैर्विहीनान्जनान्सुनांग्रंथिधनेविलोकितुमिवोद्ग्रीवस्तनस्तिष्ठति॥प्रेमच्छेदकृपाणवल्लिःसुषुमारोमालिरालंबतेयस्याःसाकथमस्तुचेतसिचमत्कारास्ववारांगना॥८॥

अथनवोढा

॥कांचीदामनिवेशयन्वितनुतेवासःश्लथंसुभ्रुवोहारंवक्षसिऽयोजयन्करतलंधत्तेकुचांभोरुहे॥जल्पन्चाटुवचोधरंधयतियत्येयान्कुतोविस्मयःपांसुंचक्षुषिविक्षिपन्यदिधनंगृण्हातिपाटच्चरः॥९॥वल्लान्नीतापार्श्वंमुखमभिमुखंनैवकुरुतेधुनानामूर्धानंहरतिबहुशश्चुंबनविधिं॥हृदिन्यस्तंहस्तंक्षिपतिगमनारोपितमनानवोढावोढारंसुखयतिचसंतापयतिच॥१०॥मातःकेलिगृहंनयामिशयितुंकस्मात्तुचंद्राननेजामातातवनिर्दयोनिजभुजापाशेनमांपीडति॥अंगानिक्षततेनिजैःकररुहैर्दंतैर्दशत्योष्ठके नीवीबंधविमोक्षणंचकुरुतेनिद्रांनलेभेनिशि॥११॥धैर्यंधेहिसुतेहितेनिशिरतेभर्तुर्भयंमाकृथाश्चेष्टास्तस्यसहस्वयौवनवतानानाविधाःकामदाः॥वाच्यंनैवकदापिकस्यनिकटेरीतिस्त्वियंवर्ततेस्त्रीणामीदृशमाकरोत्तवपिताजानीहिपूर्वंहिमां॥१२॥ अथविश्रब्धनवोढा॥दीपांकुरःस्फुरतिपश्यतिकेलिकीरोजालेनिवेशितमुखीचसखीचकास्ति॥इत्थंविचिंत्यवचसाननशशाकबालानाथंनिषेद्धुमनिषेद्धुमपित्रपाभिः १३

अथप्रौढा

मदाननेचुंबनचंचलस्यप्रियस्यसंस्पृष्टकुचस्थलस्य॥नीवी

घुभावीकरसंनिवेशस्तद्वामनीयामितिमैवभूयां॥१॥इतिप्रौढा

अथसामान्यवनिता

चेत्सौरादपिशंकसेहिमरुचोरप्यर्चिषोरुज्जसेभोगींद्रादपिचेद्वि
भेषितिमिरस्तोमादपित्रस्यसि॥चेत्कुंजादपिदूयसेजलधर॰
ध्वानादपिक्षुभ्यसिप्रायःपुत्रिहतास्मिहेतभवितात्वत्तःकलं
कःकुले॥१॥वयंबाल्येबालान्तरुणिमनियूनःपरिणतान
पीच्छामोवृद्धान्परिणयविधानंस्थितिरिति॥त्वयारब्धंजन्मक्ष
पयितुमनेनैकपतिनानमेगोत्रेपुत्रिक्वचिदपिसतीलांछनमभू
त्॥२॥दिवसेघटिकास्त्रिंशस्त्रिंशद्घटिकाःपरंरजनौ॥लसंनं॰
गरयुवानस्तातविधातःकिमाचरितं॥३॥शिरसिशिरसिजंदृशो
र्निमेषंविटपिनिपल्लवमालपेत्तृणंवा॥गणयितुमपिपारयंतिके
चित्प्रियसखिकेकथयंतुजारसंख्यां॥४॥स्थानंनास्तिक्षणंना॰
स्तिवक्तारमितिसुभ्रुवः॥जहारहारकूटेनपयोधरमहीधरः॥
॥५॥ अथप्रवत्स्यत्पतिका॥ सांत्वमायैःप्रणयवचनैर्गंतुमा
पृच्छमानेकांतेतिर्यङ्नमितवदनारुंधतीबाष्पपूरं॥दीर्घो॰
च्छ्वासस्थगनविकलोत्कंपिनासापुटांतासंख्याभून्यंगणपति
मृगीलोचनाकंकणानि॥६॥यामिप्रेयसिवारिदागमदिनेजा
नीहिमामागतंचिंतांचेतसिमाविधेहिकथयस्येवंसवाष्पेम
यि॥निश्वासैःपवनायितंवरतनोरंगैःकदंबायितंकांत्याकेत
कपत्रकायितमहोदृग्भ्यांपयोदायितं॥७॥यामीत्यप्रियवादि
निप्रियतमेमुद्राभवत्कंकणंकेलीसद्मवहिर्गतेकचरणेभूमौ
शरीरस्थितिः॥अंतर्धानगतेपुनर्मृगदृशोवाच्याकिमन्यादृशा
लाजास्फोटइवस्फुटस्यविरलंहारोपिवामभ्रुवः॥८॥यामीत्यु
क्तेहृदयपतिनापंचशःशंखभूषाःस्वैरंस्वैरंझटितिगलिताःपा
णिपंकेरुहाग्रात्॥नोयास्यामीत्यनुपदमिमांवाचमाकर्णपंसाः
तन्व्याःशेषाअपिचटचटेत्येवभंगंसमीयुः॥९॥पितुरधिपुरं
त्यक्ताःसख्यःसमंनिजबांधवैर्नचपरिचितिर्जातापत्युर्गृहेपि

कयाचन॥ कतिपयदिनोदंचत्प्रेम्णिप्रियेप्रवसत्यसौकथयतु
मनस्तापंकस्मैनवंनवकामिनी॥१०॥ स्मर्तव्यावयमिंदुसुंदर
मुखिप्रस्तावतोपित्वयास्यादेवंयदिनाथदास्यतिविधिर्जातिस्म
रत्वंमम॥ एकस्मिन्नपिजन्मनिप्रियतमेजातिस्मरत्वंकुतःप्रा
णाःपांथसमंत्वयैवचलिताक्वाद्यापिजन्मैकता॥११॥ भास्वां
श्चूततरुर्गुरुर्मनसिजःकोप्येषभृंगस्तमामेदोगंधवहःसितो
मलयजोदोषाकरोमाधवः॥ अंगारोनवपल्लवःपरभृतोविज्ञो
गुरोराजपोयानिर्यासिनिवारिताकथममीक्रूराग्रहानत्वया॥
॥१२॥ वारंवारमुदश्रुलोचनयुगंपर्याकुलंजायतेनिश्वासाः
विरमंतिनक्षणममीव्याश्लिष्टदंतच्छदः॥ प्रस्थानश्रवणादपि
प्रियतमस्याहोतवेयंस्थितिर्नोजानेनिलयंगतेतुदयितेकीदृग्द
शामाप्स्यसि॥१३॥ इतिसामान्यवनिता॥ छ॥ छ॥ छ॥॥

अथप्रोषितभर्त्तृका

यात्रामंगलसंविधानरचनाव्यग्रेसखीनांगणेबाष्पांभःपिहि
तेक्षणेगुरुजनेतद्वत्सुहृन्मंडले॥ प्राणेशस्यमदीक्षणार्पि
तदृशःस्वच्छूदतिक्रामतः किंव्रीडाहतयामयाभुजलतापाशोग
लेनार्पितः॥१॥ रोलंबोमधुपःपिकःपरभृतोरंध्रानुसारीमरुत्
कीरोभाषितवाक्यमात्रपठनप्रौढःपयोदोजलः॥ हंसःसंत
तपक्षपातनिरतस्तस्मादवस्थामिमामुक्त्वाहंप्रहिणोमिकेन
कठिनस्वांतायकांतायमे॥२॥ मालाबालांबुजदलमयीमौ
क्तिकीहारयष्टिःकांचीयातेप्रभवतिहरौसुभ्रुवःप्रस्थितैव॥अ
न्यत्ब्रूमःकिमपिधमनीवर्त्ततेवानवेतिज्ञातुंवाहोरहहवल
यंपाणिमूलंप्रयाति॥३॥ समर्प्यहृदिदारुणांमदनवेदनांभू
यसीमन्नेनतववर्त्मनाप्रचलितःसमेवल्लभः॥ नवाप्रदिशि
शब्दितंकिमितिबालयावायसत्वयासदनसारिकेकिमिति॥
वाकृतंनसत्तु॥४॥ इतिप्रोषितभर्त्तृका॥ छ॥ छ॥छ॥

अथखंडिता

ज्ञातस्तेनिशिजागरोममपुनर्नेत्रांबुजेशोणिमानिःपीतंभवतामधुप्रविततंव्याघूर्णितंमेमनः॥भ्राम्यद्भृंगघनेनिकुंजभवनेलब्धंत्वयाश्रीफलंपंचेषुःपुनरेषमांबहुतरैःक्रूरैःशरैःकृंतति॥१॥

प्रातःप्रातरुपागतोसिजनितानिर्निद्रताचक्षुषोर्मंदायाममगौरवंव्यपहृतंप्रोत्पादितंलाघवं॥किंतद्यन्नकृतंत्वयारमणभीर्मुक्तामयागम्यतेदुःखंतिष्ठतियच्चपथ्यमधुनाकर्त्तास्मितच्छ्रोष्यसि॥२॥

भवतुविदितंव्यर्थालापैरलंप्रियगम्यतांतनुरपिनतेदोषोऽस्माकंविधिस्तुपराङ्मुखः॥तवयदितथारूढंप्रेमप्रपन्नमिमांदशांप्रकृतितरलेकानःपीडागतेहृतजीविते॥३॥

निःशेषच्युतचंदनंस्तनतटंनिर्मृष्टरागोधरोनेत्रेदूरमनंजनेपुलकितातन्वीतवेयंतनुः॥मिथ्यावादिनिदूतिबांधवजनस्याज्ञातपीडागमेवापींस्नातुमितोगतासिनपुनस्तस्यामधस्यांतिकं॥४॥

सत्यमेवगदितंत्वयाविभोजीवएकइतियत्तुरावयोः॥अन्यदारनिहितानखव्रणास्तावकेवपुषिपीडयंतिमां॥५॥

दूतिश्वासविशेषएषकिमहोचंडित्वराधावनाद्भ्रष्टालकवल्लरीकथमहोत्वन्नाथपादार्पणात्॥निर्मृष्टाधररागपल्लवरुचिस्त्वत्कार्यसंजल्पनाद्धासस्तस्यकिमंगसंगतमहोविश्वासहेतोस्तव॥६॥

सार्धमनोरथशतैस्तवधूर्तकांतासैवस्थितामनसिकृत्रिमभावरम्या॥अस्माकमस्तिनकथंचिदिहावकाशस्तस्मात्कृतंचरणपातविडंबनाभिः॥७॥

त्वंदूतिनिरगाःकुंजंनतुपापीयसोगृहं॥किंशुकाभरणंदेहेदृश्यतेकथमन्यथा॥८॥ दूतिखंडिता॥ * ॥ * ॥ * ॥ * ॥

अथविप्रलब्धा

शून्यंकुंजगृहंनिरीक्ष्यकुटिलंविज्ञायचेतोध्रुवंदूतीनापिनिवेदितासहचरीपृष्टापिनोवानया॥शंभोशंकरचंद्रशेखरहरश्रीकंठशूलिन्शिवत्रायस्वेतिपरंतुपंकजदृशाभर्गस्यचक्रेस्तुतिः॥१॥

निःस्नेहनिःकरुणनिस्त्रपनिर्निमित्तमह्नंचकल्पमपिसंप्रतिवंचि

तस्याः॥इत्यक्षराणिलिखितानिसमीक्ष्यकश्चित्संकेतकेतकदलेनिनरामताम्यत्॥२॥इतिविप्रलब्धा॥ छ ॥ छ ॥ छ॥

अथउत्का

भ्रूभंगेरचितेपिदृष्टिरधिकंसोत्कंठमुद्वीक्ष्यतेरुद्धायामपिवाचिसस्मितमिदंदग्धाननंजायते॥कार्कश्यंगमितेपिचेतसितनूरोमांचमालंबतेदृष्टेनिर्वहणंभविष्यतिकथंमानस्यतस्मिन्जने॥१॥किंरुद्धःप्रिययाकयाचिदथवासख्याममोद्वेजितः किंवाकारणगौरवंकिमपियन्नाद्यागतोवल्लभः॥इत्यालोच्यमृगीदृशाकरतलेविन्यस्यवक्त्रांबुजंदीर्घंनिश्वसितंचिरंचरुदितंक्षिप्ताश्चपुष्पस्रजः॥२॥ इतिउत्का॥ छ ॥ छ ॥ ॥

अथवासकसज्जा

कृतंवपुषिभूषणंचिकुरधोरणीधूपिताकृताशयनसंनिधौक्रमुकवीटिकासंभृतिः॥अकारिहरिणीदृशाभवनमेत्यदेहलिषास्फुरत्कनककेतकीकुसुमकांतिभिर्दुर्दिनं॥१॥नेदंसमीरितमकारिकलानचेयमित्याकुलाःकथमपिप्रथमाधमन्हः॥एवंविधेयमथवाच्यमिदंमयेतिशेषंप्रियाःसुकृतिनामतिवाहयंति॥२

अथस्वाधीनपतिका

अस्माकंसखिवाससीनरुचिरेग्रैवेयकंनोज्वलंनोवक्त्रांगतिरुद्धतंनहसितंनैवास्तिकश्चिन्मदः॥किंत्वन्येपिजनावदंतिसुभगोप्यस्याःपतिर्नान्यतोदृष्टिंनिक्षिपतीतिविश्वमियतं — मन्यामहेदुःखितं॥१॥श्वश्रूःपश्यतिनैवपश्यतियदिभ्रूभंगवक्रेक्षणामर्म्मच्छेदपटुप्रतिक्षणमसौब्रूतेननांदावचः॥अन्यासामपिकिंब्रवीमिचरितंस्मृत्वामनोवेपतेकांतःस्निग्धदृशाविलोकयतिमामेतावदागःसखि॥२॥इतिस्वाधीनपतिका॥

अथाभिसारिका

चित्रोत्कीर्णादपिविषधराद्भीतिभाजोनिशायांकिंतद्ब्रूमस्त्वदभिसरणेसाहसंनाथतस्याः॥ध्वांतेयांत्यायदतिनिभृतंवालया

त्मस्मकाशत्रासास्त्राणिः पथिपथिफणारत्नरोधीव्याधायि॥१॥मा
र्गेपंकचिते घनांधतमसे निःशब्दसंचारया गंतव्याद्यमया प्रिय
स्यवसतिर्मुग्धेति कृत्वा मतिं॥ आजानूच्चतरा पुराकरवलेना
च्छादने त्रे भृशं कृच्छ्रेणात्तपदस्थितिः स्वभवने पंथानमभ्यस्य
ति॥२॥ अधियामिनि गजगामिनि कामिनि सौदामिनीव यंव्रज
सि॥ जलदेनेवन ¯ जाने कति कति सुकृतानि तेन विहितानि॥३
॥ किमुत्तीर्णः पंथाः कुपितभुजगीभोगविषमो विसोढा भूयस्यः
क्रिमितिकुलपालीकटुगिरः॥ इति स्मारं स्मारं दरदलितशीत
द्युतिरुचौ सरोजाक्षी शोणं दिशि नयनकोणं विकिरति॥४॥ सि
तं वसनमर्पितं वपुषि नीलचोलभ्रमान्मया मृगमदाशयामल
यजद्रवः सेवितः॥ करेण परिबोधितः स्वजनशंकया दुर्जनः प
रं परमपुण्यतः सखि न लंघिता देहली॥५॥ इह जगति रतीश प्र
क्रियाकौशलिन्यः कति कति न निशीथे सुभ्रुवः संचरंति॥ मम
तु विधिहताया जायमानस्मितायाः सहचरि परिपंथी हंत दंतां
शुरेव॥६॥ प्रत्यावृत्य यदि व्रजामि भवनं वाचां भवेत्सच्यवो नि
र्गच्छामि निकुंजमेव यदि वा को वेद किं स्याद्धितः॥ तिष्ठामो यदि
वा क्वचिद्वनतटे किं जातमेतावता मध्ये वर्त्म कलानिधेः समुद
यो जातः किमातन्यतां॥७॥ भ्रातः कंकण किं कदाप्यसि घनाश्ले
शेषु विश्लेषितं दूरे किंकिणि किं कृताप्यसि रतारंभे रणत्कारिणि
॥ किं मंजीर बहिः कृतोप्यसि रहस्तल्पाधिरोहे मया संकेताध्व
नि बद्धवैरमिव यन्मौखर्यमालंबसे॥८॥ इति अभिसारिका॥

अथ स्त्रीस्वभावनिंदा

अनृतं साहसं माया मूर्खत्वमतिलोभता॥ अशुचित्वं निर्दयत्वं
स्त्रीणां दोषाः स्वभावजाः॥१॥ स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रि
यसाहसाः॥ घ्नंत्यल्पार्थेऽपि विश्रब्धं पतिं भ्रातरमप्युत॥२॥ स्त्रि
यो हि नाम खल्वेता निसर्गादेव पंडिताः॥ पुरुषाणां तु पांडित्यं
शास्त्रेणैवोपदिश्यते॥३॥ विधायाऽलीकविश्रंभमज्ञेषु त्यक्तसौ

त्हृदाः॥ नवंनवंमभीप्संत्यः पुंश्चल्यः स्वैरवृत्तयः॥४॥ स्वातंत्र्यं
पितृमंदिरेचवसतिर्यात्रोत्सवेसंगतिर्गोष्ठीपूरुषसंनिधाननिय
मोवासोविदेशेतथा॥ संसर्गःसहपुंश्चलीभिरसकृद्वृत्तेर्निजायाः
क्षतिःपत्युर्वार्धकमीर्ष्यितंप्रवसनंनाशस्यहेतुःस्त्रियाः॥५॥ ज्यो
त्स्नेवनयनाऽऽनंदःसुरेवमदकारणं॥ प्रभुतेवसमाकृष्टसर्वलो
कानितंबिनी॥६॥ अग्राह्यंत्हृदयंतथैववदनंयद्दर्पणाऽऽतर्गतंभा
वःपर्वतसूक्ष्ममार्गविषमःस्त्रीणांनविज्ञायते॥ चित्तंपुष्करपत्र
तोयतरलंविद्वद्भिराशंसितंनारीनामविषांकुरैरिवलतादोषैःस
मंवर्धिता॥७॥ गुणाऽऽश्रयंकीर्तियुतंचकांतंपतिंविधेयंसधनंरति
ज्ञं॥ विहायशीघ्रंवनिताव्रजंतिनरांतरंशीलगुणादिहीनं॥८॥ स
मुद्रवीचीवचलस्वभावाःसंध्याऽभ्रलेखेवमुहूर्तरागाः॥ स्त्रियोऽ
त्हनाऽर्थाःपुरुषंनिरर्थंनिष्पीडितालक्तकवत्त्यजंति॥९॥ संमोह
यंतिमदयंतिविडंबयंतिनिर्भर्त्सयंतिरमयंतिविषादयंति॥ एताःप्र
विश्यसदयंत्हृदयंनराणांकिंनामवामनयनानसमाचरंति॥१०
॥नाऽमृतंनविषंकिंचिदेकांमुक्त्वानितंबिनीं॥ सैवाऽमृतलतारक्ता
विरक्ताविषवल्लरी॥११॥ अनंकुरितकूर्चकःसतुसितोपलाऽऽ
ढ्यंपयःसएवधृतकूर्चकःसलवणांऽबुतक्रोपमः॥ सएवसितकू
र्चकःक्वथितगुग्गुलोद्वेगकृत् भवंतिहरिणीदृशांप्रियतमेषुभा
वास्त्रयः॥१२॥ जल्पंतिसार्धमन्येनपश्यंत्यन्यंसविभ्रमं॥ त्हृद
येचिंतयंत्यन्यंप्रियःकोनामयोषितां॥१३॥ स्त्रीणांद्विगुणआहा
रोलज्जाचाऽपिचतुर्गुणा॥ साहसंषड्गुणंचैवकामश्चाऽष्टगुणः
स्मृतः॥१४॥ अंतःक्रूराःसौम्यमुखाअगाधत्हृदयाःस्त्रियः॥ अं
तर्विषाबहिःसौम्याभस्त्रालिषकृताइव॥१५॥ स्त्रियोहिमूलंनि
धनस्यपुंसःस्त्रियोहिमूलंव्यसनस्यपुंसः॥ स्त्रियोहिमूलंनरक
स्यपुंसःस्त्रियोहिमूलंकलहस्यपुंसः॥१६॥ कामनाम्नाकिराते
नविततामूढचेतसां॥ नार्योनरविहंगानामंगबंधनवागुराः॥१७
दर्शनाद्ग्रसतेचित्तंस्पर्शनात्ग्रसतेधनं॥ संगमाद्ग्रसतेसत्वंनाऽ

शीघ्रस्यक्षराक्षसी॥१८॥ इतिस्त्रीस्वभावनिंदा॥ ❀॥ ❀॥ ❀॥

अथगर्भवासप्रयुक्तंदुःखं

कृमिभिःक्षतसर्वांगःसौकुमार्यात्प्रतिक्षणं॥ मूर्छामाप्नोत्युरुक्ले
शोगर्भस्थैःक्षुधितैर्भृशं॥१॥कटुतीक्ष्णोष्णलवणक्षाराम्लादि
भिरुल्बणैः॥ मातृभुक्तैरुपस्पृष्टःसर्वांगोत्थितवेदनः॥२॥उल्ब
नसंवृतस्तस्मिन्नांत्रैश्चबहिरावृतः॥आस्तेकृत्वाशिरःकुक्षौभ
ग्नपृष्ठशिरोधरः॥३॥अकल्पःस्वांगचेष्टायांशकुंतइवपंजरे॥
अनुच्छ्वसन्स्मरन्पूर्वंगर्भेकिंनामविंदते॥४॥निःसृतोऽहंक
रिष्यामिसुकृतानीतिचिंतयन्॥मेदोसृग्दिग्धसर्वांगोजरायुप
टसंवृतः॥५॥निष्क्रामन्भृशदुःखार्तोरुदन्नुच्चैरधोमुखः॥
यंत्रादिवविनिर्मुक्तःपतत्युत्तानशाय्यथ॥६॥इतिगर्भवासदुःखं

अथषड्तुवर्णनेवसंतसमयस्वभावकथनं॥

असौमरुच्चुंबितचारुकेसरःप्रसन्नताराधिपमंडलाग्रणीः॥वि
युक्तरामातुरदृष्टिवीक्षितोवसंतकालोहनुमानिवागतः॥१॥
भट्टबीजकस्य॥कोकिलश्चूतशिखरेमंजरीरेणुपिंजरः॥गदि
तैर्व्यक्ततामेतिकुलीनश्चेष्टितैरिव॥२॥परिचुंबतिसंश्लिष्यभ्र
मरश्चूतमंजरी॥नवसंगमसंहृष्टकामीप्रणयिनीमिव॥३॥
मल्लिकामुकुलेभातिमंजुगुंजन्मधुव्रतः॥प्रयाणेपंचबाणस्य
शंखमापूरयन्निव॥४॥सहकारकुसुमकेसरनिकरभरामोद
मूर्छितदिगंते॥मधुरमधुविधुरमधुपेमधौभवेत्कस्यनोत्कंठा
॥५॥कपिलरुद्रस्य॥मलयानिलमिलनोत्कटमदकलकलकं
ठकचकलापः॥मधुरमधुविधुरमधुपोमधुरयमधुनाधिनोति
धरं॥६॥भट्टरुद्रस्य॥मंदोयंमलयानिलःकिशलयंचूतद्रुमा
णांनवंमाद्यत्कोकिलकूजितंविचकिलामोदःपुराणंमधु॥बा
णानित्युपढीकरोतिसुरभिःपंचैवपंचेषवेयूनामिंद्रियपंचक
स्ययुगपत्संमोहसंपादिनः॥७॥श्रीपालकविराजस्य॥उद्यद्धि
द्रुमकितिभिःकिशलयैस्ताम्रात्विषंबिभ्रतोभृंगाली— विरुतैःक

लैरविशदव्याहारलीलायिताः॥घूर्णंतोमलयानिलाहतिचलैः
शाखासमूहैर्मुहुर्भ्रांतिंप्राप्यमधुप्रसंगजनितोमत्ताइवामीद्रुमाः
॥८॥श्रीहर्षस्य॥प्रसूनशृंगैर्मकरंदतोयंसलीलमादायवसंत
कामी॥वनस्थलीवामदृशांमुखानिसिंचत्यसौमंदमरुत्करेण
॥९॥ताम्रपल्लवितेस्थित्वाकोकिलामधुरस्वरं॥चुकूजकामिनां
चित्तमकर्षतीवदूतिकाः॥१०॥पुष्पस्तनभरानम्रानीलभ्रमरलो
चनाः॥पुष्पवर्षैरर्चयंत्यःस्वभर्तारंचमाधवं॥११॥कस्यापि॥स्था
नेस्थानेमलयमरुतःपूरयंतःकपालींपुष्पालीषुस्मरगजरजः
स्नानयोग्यापरागाः॥जातंचूतेमधुमधुकरप्रेयसीजानुदघ्नंनि
र्विघ्नंत्वांसपदिभजतेरागराज्याभिषेकः॥१२॥बिल्हणस्य॥कम
लिनीमलिनीदयितंविनानसहतेसहतेननिषेधितुं॥तमधुना
मधुनानिहितंहृदिस्मरतिसारतिसारमहर्निशं॥१३॥किंशुक
कलिकांतर्गतमिंदुकलास्पर्धिकेसरंभाति॥रक्तनिचोलकपिहितं
धनुरिवतनुमुद्रितंवितनोः॥१४॥विज्जकायाः॥त्यजतमानम
लंबतविग्रहैर्नपुनरेतिगतंचतुरंवयः॥परभृताभिरितीवनिवेदि
तेस्मरमतेरमतेस्मवधूजनः॥१५॥कालिदासस्य॥प्रियसखी
सदृशंप्रतिबोधिताःकिमपिकाम्यगिरापरपुष्टया॥प्रियतमाः
यवपुर्गुरुमत्सरच्छिदुरपोढुरयाचितमंगनाः॥१६॥माघकवेः
माकंदच्युतपुष्परेणुपटलीकूताःलवालोदरेमंदस्यंदिमरंदपू
रभरितेवातोत्थपुष्पप्लवैः॥खेलंतोललितंमधोर्गुणगणान्गायं
तिपुष्पंधयाःकांतानामधरेधयंतिमधुरंसक्तंमधूलीरसं॥१७॥
वसंतप्रारंभेचिरविरहखिन्नासहचरीयदिप्राणान्मुंचेत्तदि
हवधभागीभवतिकः॥वयोवास्नेहोवाकुसुमविशिखोवेति
विमृशंस्तुहीतिप्रव्यक्तंपिकनिकरझांकारमशृणोत्॥१८॥
आयातामधुरजनीमधुरजनीगीतिर्हृद्येयं॥अंकुरितःस्मरविट
पीस्मरविटपीनस्तनीमवलो॥१९॥स्तोत्रंचैत्रगुणोदयस्यविर
हिप्राणप्रयाणानकष्टंकारःस्मरकार्मुकस्यसुदृशांशृंगारशिक्षागु

रुः॥ दोलाकेलिकलासुमंगलपदं वंदीवनांतःश्रियांनादोयंक
लकंठकंठकुहरप्रेंखोलितःश्रूयते॥२०॥ इतिवसंतः॥ छ॥

अथमद्नपूजा

कुसुमसुकुमारमूर्तिर्दधतीनियमेनतनुतरंमध्यं॥ आभातिम॰
करकेतोःपार्श्वस्थाचापयष्टिरिव॥१॥ अनंगोयमनंगत्वमद्य
निंदिष्यतिध्रुवं॥यदनेननसंप्राप्तःपाणिस्पर्शोत्सवस्तव॥२॥॰
श्रीहर्षस्यैतौ॥

अथकुसुमवायवः

असंख्यपुष्पोपिमनोभवस्यपंचैवबाणार्थमयंददाति॥एवं
कदर्यत्वमिवावधार्यसर्वस्वमग्राहिमधोर्वधूभिः॥१॥अता
डयत्पल्लवपाणिनैकंपुष्पोच्चयेराजवधूरशोकं॥तच्छेदहेतो
रलिपंक्तिभंग्याविकृंतिताबाललतास्मरेण॥२॥बिल्हणस्य॥
उच्चित्यप्रथममधःस्थितंमृगाक्षीपुष्पौघंसितविटपंग्रहीतुका
मा॥आरोढुंचरणमदादशोकपृष्ठेमूलाग्रात्पुनरपितेनपुष्पितो
सौ॥३॥जयमाधवस्य॥पूर्वंद्विरेफपरिभूतिभयाद्भवत्यायत्केश
पुष्पभरणंहरिणाक्षिमुक्तं॥व्यर्थंतदद्यपुनरप्यलकेषुभृंगाःपुं
जीभवन्निजकुलभ्रमतःपतंति॥४॥कस्यापि॥पाणौपद्मधि
यामधूककुसुमभ्रांत्यातथागंडयोर्नीलेंदीवरशंकयानयनयो
र्बंधूकबुध्याधरे॥ लीयंतेकवरीभरेनिजकुलव्यामोहजातस्पृ
हादुर्वारामधुपाःकियंतितरुणिस्थानानिरक्षिष्यसि॥५॥अच
लस्य॥संत्युद्रुमाःकिशलयोत्तरपुष्पभाराःप्राप्तेवसंतसमयेक॰
थमित्थमेव॥न्यासैर्नवद्युतिमतोःपदयोस्तवेयंभूःपुष्पितासुत
नुपल्लवितेवभाति॥६॥सूक्तिसहस्रात्॥इदमिदमितिभूरुहां
प्रसूनैर्मुहुरतिलोभयतापुरःपुरोन्या॥अनुरुहःसमताविनाय
केनत्वरयतिरंतुमहोजनंमनोभूः॥७॥माघकवेः॥ छ॥ छ॥

अथवसंतवायवः

पानीयंनालिकेरीफलकुहरकुहूत्कारिकल्लोलयंतःकावेरीती
रतालद्रुमपरितसुराभांडभाकारचंडाः॥एतत्तन्वंतिवेलावन

ललितलतातांडवं द्राविडस्त्रीकर्पूरापांडुगंडस्थललुठितवयावायवो दाक्षिणात्याः ॥१॥ बिल्हणस्य ॥ सुललितमलकांतावल्लीनर्तयंत्यो मधुसुरभिमुखाब्जोच्छ्वासगंधानुगंधाः ॥ नवतररतभाजां योषितां स्वेदबिंदून्सतृष इव पिबंतो वांति मंदं समीराः ॥२॥ कस्यापि ॥ उदंचत्कावेरीलहरिषु परिष्वंगरंगेरटंतः कुहूकंठीकंठीरवरवलवत्रासितप्रोषितेभाः ॥ अमी चैत्रे मैत्रावरुणितरुणीकेलिकेकेलमल्लीवल्लीहल्लीसकसुरभयश्चंडिमंचंडवाताः ॥३॥ कावेरीतीरभूमीरुहभुजगवधूभुक्तमुक्तावसिष्टः कर्णाटीचीनपीनस्तनवसनदशांदोलनस्पंदमंदः ॥ हेलालाटीललाटालकलुलितलतालास्यलीलाविलोलः कष्टं भो दाक्षिणात्यः प्रसरति पवनः पांथकांताकृतांतः ॥४॥ राक्षसपंडितयोरेतौ ॥ कावेरीवारिवेल्लल्लहरिपरिकरक्रीडनक्लांतशांतस्फीतः श्रीखंडखंडभ्रमणभरभवद्भूरिसौरभ्यगर्भाः ॥ चौलस्त्रीचीनचेलांचलचलनकलाक्रांतकांताकुचांता वांति प्रेमाग्निकीलाकलितवरवधूवद्वेराः समीराः ॥५॥ कृष्णमिश्रस्य ॥ चंचत्कर्पूरचोलामलयगिरिगुरुया वहावादवाप्तामंदानंदैर्मिलिंदैरहमहमिकयानुद्रवद्दीर्घपांथाः ॥ कावेरीवारिसेकाविरलतरतरत्तीरवानीरसिक्तासुक्ताद्रीः स्वेदनिद्रालवद्व पवनास्तालवत्यां विशंति ॥६॥ कस्यापि ॥ चूतश्रेणीपरिमलमुखश्चंचरीकानुयाता भूयो भूयः कुवलयकुटीकोटरे लीयमानाः ॥ मंदं मंदं सुरतविरतौ वांति सीमंतिनीनां गंडाभोगश्रमजललवग्राहिणो गंधवाहाः ॥७॥ श्रीधनदेवानां ॥ भिंदंतस्वेदनालीं कमलमुकुरजोधूलिमत्स्थूलयंतश्चुंबंतश्चूतवाटीपरिमललहरीचंपकान्कंपयंतः ॥ आरादारामसीमातटघटितघटीयंत्रनिर्घातवारं धारामाधारयंतः श्रमजलभिदुरा वांत्यमी गंधवाहाः ॥८॥ कस्यापि ॥ लीलादोलातिखेलारसरभसलसत्त्वालचेलांचलानां चेलीनामापिबंतो मृगमदसुरभिः स्वेदबिंदूनमंदान् ॥ लोलांतःकेरलीनां कुचकलशलसत्कुंकुमालेपनेषु॰

श्लिष्यंतोमालवीनांमलयजमधुराःकंचुकीवींतिवाताः॥९॥क
स्यापि॥येदोलाकेलिकाराःकमपिमृगदृशांमानतंतुच्छिदोयेस
द्यःशृंगारदीक्षाव्यतिकरगुरवोयेचलोकत्रयेपि॥तेकंठेलोठयं
तःपरभृतयशसांपंचमंरागराजंवांतिस्वैरंसमीराःस्मरविजयम
हासाक्षिणेदाक्षिणात्याः॥१०॥ इतिवसंतवायवः॥छ॥छ॥

अथपुष्पाचयः

रणत्कंकणानांचलन्नूपुराणांक्वणत्किंकिणीनांरणन्नूपूराणां॥
वधूनांमुखांभोरुहंद्रष्टुकामोरथंमंथरंचक्रबंधुश्चकार॥१॥
अनुभवतयुवत्योभाग्यवत्योनितांतंकुसुमवचयवेलासंग
रवेलासुखानि॥ममतुमधुकराणांवाटपाटच्चराणांसपदिप
ततिधाटीपुष्पवाटीनिवेशे॥२॥ इतिपुष्पावचयः॥छ॥छ॥

अथवसंतपथिकाः

हेपांथाःस्वगृहाणिगच्छतसुखंसेवाक्षणोमुच्यतांमानंमानिनि
मुंचवल्लभजनेकोपानुबंधेनकिं॥आयातःकुसुमाकरःस्मयति
प्राणान्वियोगातुरेष्वित्येवंपरपुष्टनादपटहोवक्तीवकामाज्ञया
॥१॥चक्रेणशिरसिनिहितेननित्यंरुधिरारुणेनदुर्वारः॥मत्तहि
पइवपथिकःकिंसुककुसुमांकुशेनभृतः॥२॥सतस्मिन्दक्षिणा
शानिलचलितलतानीलमत्तालिमालापक्षोभावधूतच्युतव
हलरजोल्हादिन्दद्येवसंते॥प्रेमस्वेदार्द्रबाहुश्लथवलयपलस
त्योढसीमंतिनीनांमंदःकंठग्रहोपिग्लपयतिहृदयंकिंपुनर्विप्र
योगः॥३॥केषामप्येते॥उन्मीलन्मधुगंधलुब्धमधुपव्याधूत
चूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुत्कीर्णकर्णज्वराः॥नीयं
तेपथिकैःकथंकथमपिध्यानावधानक्षणप्राप्तप्राणसमासमाग
रभसोल्लासैरमीवासराः॥४॥जयदेवस्य॥ अध्वन्यैर्मकरंदशी
करमुरामत्तक्वणत्कोकिलेमार्गेमार्गनिरोधिनीपरिल्हताशंके
मुभाशंकया॥पांथस्त्रीवधपातकादुपनतंचंडालचिन्हंमधोरेषा
स्विंस्विणिकेवषद्पदमयीभ्राकारिणीसंहतिः॥५॥कस्यापि॥स

व्याधेरुग्रशराक्षतस्यरुधिरंदृष्टस्यलाभश्रुतिःकिंचिन्नैतदहास्ति
तत्कथमसौपांथस्तपस्वीकृतः॥आज्ञातंमधुलंपटैर्मधुकरैरार
ब्धकोलाहलेनूनंसाहसिकेनचूतमुकुलेदृष्टिःसमारोपिता॥
॥६॥रामिलसोमिलयोः॥अध्वन्यस्यवधूवियोगविधुराभर्तुःस्म
रंतीयदिप्राणानुज्झतितस्यतत्खलुमहत्संजायतेपातकं॥याव
ल्लोकृतमध्वगेनहृदयेयावन्नरोमूर्द्धनिमोघुष्टंपरपुष्टयातवत
वेत्युच्चैर्वचोनेकशः॥७॥इतिश्रीबृहच्छार्ङ्गधरविरचितायांप
द्धत्यांमिश्रकशृंगारेषडृतुवर्णनेवसंतसमयःस्वभावाख्यानप॰

अथग्रीष्मसमयस्वभावाख्यानं

तप्तामहीविरहिणामिवचित्तवृत्तिस्तृष्णाध्वगेषुकृपणेष्विववृद्धि
मेति॥सूर्यःकरैर्दहतिदुर्घटनैःखलोनुछायासतीवनविमुंचतिपा
दमूलं॥१॥कस्यापि॥प्रतिगतमर्थजनानांविच्छिन्नांशासमूहम
वलोक्य॥स्फुटितमपयशस्तपादिवहृदयदलंतडागस्य॥२॥
सुखकृतिविसखंडश्चंडमार्तंडतापात्स्मितजलदतलस्योरा
जतेराजहंसः॥रजतघटइवायंविद्रुमाबद्धताराविवरविगलदं
बुःकंबुकंठिभ्रतीहि॥३॥कस्यापि॥अंगारैःखचि तेवभूर्वियदपि
ज्वालाकरालंकरैस्तिग्मांशोःकरतीवतीव्रमभितोवायुःकुकूल
तलं॥अप्यंभांसिनखंपचानिसरितामाशाज्वलंतीवचग्रीष्मेस्मि
न्नववन्हिदीपितमिवाशेषंजगद्वर्तते॥४॥श्रीभोजदेवस्य॥
कानिस्थानानिदग्धान्यतिशयगहनाःसंतिकेवाप्रदेशाकिंवाशेषं
जनस्यस्थितमितिपवनाःसंगविस्पष्टतेजाः॥चंडज्वालावली
ढस्फुटिततनुलताग्रंथिमुक्ताट्टहासोदावाग्निःशुष्कवृक्षेशिखि
रिणिगहनेधिष्ठितःपश्यतीव॥५॥भीमस्य॥बालेबालेयमुच्चै
नैभवतिगगनाव्यापिनीनीरदानाकिंत्वंपक्षांतवातैर्मलिनयसि
सुधावक्त्रमश्रुप्रवाहैः॥सपाभोहृत्तमत्तद्विपकटकषणक्षुण्ण
विंध्योपलानांदावाग्नेःसंप्ररूढामनिनपतिदृशांमंडलंधूमले
खा॥६॥धाराकदंबस्य॥स्फीतंशीतंगतंककशिशिरकिरणः

क्वास्तिहेमंतमासःक्वतेपानीयपूर्णामलिनजलधराःक्वाद्यविद्यु
त्प्रमोदः॥इत्युच्चैर्जल्पमानैरिवमुखरमुखैर्भिल्लिदूतैरुपेतोवा
तौघश्चागतोसौप्रकटितविजयस्तंभचिह्नैर्निदाघः॥७॥पाश्चा
त्यैर्मरुमारुतैस्त्रिजगतामुन्मूलयन्नार्द्रतांदावाग्निर्ज्वलितैर
पारगहनान्यप्यानयन्भस्मतां॥वात्याभिस्तृणपन्नधूलिनिक
रान्धुन्वन्विहायस्स्थलेग्रीष्मःशुष्यदनुच्छपल्वललुठन्मत्स्य
ःसमभ्यागतः॥८॥एतौशार्ङ्गधरस्य॥निर्जोकापच्छायाम्र य
तिमहिषःकर्दमधियाच्युतंगुंजापुंजेरुधिरमितिकाकःकलयति
॥समुत्सर्पत्सर्पःसुषिरविवरंतापविवशात्सचीत्काराधूतंप्रवि
शतिकरंकुंजरपते॥९॥क्षेमेंद्रस्य॥अस्यच्छंसितमंशुकंसुवि
मधुस्त्वामोदमच्छंरजःकर्पूरंविधतार्द्रचंदनकुचद्वंद्वाकुरंगीदृ
शः॥धारावेश्मसपाटलंविचकिलःस्रग्जामचंद्रत्विषोधातुःसृ
ष्टिरियंवृथैवतवनग्रीष्मोभविष्यद्यदि॥१०॥श्रीभोजदेवस्य॥न
तांभःस्नातानांदरदलितमल्लीमुकुलिताःस्रजोबिभ्राणानांम
लयजरसार्द्रार्द्रवपुषां॥निदाघाग्निप्लोषग्लपितमभिसायंमृ
गदृशांपरिष्वंगेनंगःपुनरपिघनैरंकुरयति॥११॥देशेदेशेजडि
मकुरंगास्तेजोभल्लैर्दिनकरभिल्लैः॥धावंधावंप्रहरतिराज्ञांधा
रागेहंशरणमवायुः॥१२॥अस्त्राध्यायःपिकानांमदनमखस
मारंभपास्याधिमासोनिद्रायाजन्मलग्नंकिमपिमधुलिहांकोपि
दुर्भिक्षकालः॥विष्टिर्यात्रोत्सुकानांमलयजमरुतांपाथकोना
कृतांतःप्रालेयोन्मूलमूलंसमजनिसमयःकश्चिदौत्पातिकोयं
॥१३

अथमध्यान्हः

दुःसहसंतापभयात्संप्रतिमध्यस्थितेदिवसनाथे॥छायामिव
वांछंतींछायापिगलातरुतलानि॥१॥श्रीमदमतिवर्मणः॥ए
षसूर्यांशुसंतप्तोमृगःकुतनुमाश्रितः॥साधुर्भाग्यपरिक्षीणो
नीचंप्राप्येवसीदति॥२॥कस्यापि॥धत्तेपंकजिनीतलेगुरुभ
यंसंकीर्णतालंद्विपःसर्पस्तत्वरसानियच्छतिशिखीमध्येशि

खंडंशिरः॥मिथ्यालेढिमृणालकोटिकुटिलंदंष्ट्रांकुरंशूकरंमध्या
न्हेमहिषिश्चवांछतिनिजछायामहाकर्दमं॥३॥श्रीराजशेखर
स्य॥रवेर्मयूखैरपितापितोभृशंविदह्यमानःपथितप्तपांसुभिः
॥अर्वाक्फणोजिह्मगतिःश्वसन्मुहुःफणीमयूरस्यतलेनिषीद
ति॥४॥कस्यापि॥तरुणितरणितेजःपुंजसंतप्तदेहःपततिज
ठरखड्गःपल्वलेपंकलेहः॥हरिरपिसलिलार्थीशंकयातस्य
नीरंनपिबतिनचपातिक्लिश्यतिप्राप्यतीरं॥५॥शार्ङ्गधरस्य॥
सर्पत्साहिणिवारिशीतलतलेविन्यस्तपुष्पोत्करेनीरंध्रेकदली
दलेगुरुदलच्छायाहृतार्कत्विषि॥कर्पूरागरुपंकपिच्छलघनो
त्तुंगस्तनालिंगिभिःकांताकेलिरतैरहोसुकृतिभिर्मध्यंदिनंनीय
ते॥६॥कस्यापि॥इतिमध्यान्हः॥छ॥ छ ॥ छ ॥ छ ॥छ॥

अथ जलकेलिः

करौधुनानानवपल्लवाकृतीपयस्यगाधेकिलजातसंभ्रमा॥स
खीषुनिर्वाच्यमधार्ष्ट्यदूषितंप्रियांगसंश्लेषमवापमानिनी
॥१॥तथानपूर्वंकृतभूषणादरःप्रियेणरागेणविलासिनीजनः
॥यथाजलार्द्रोनखमंडनश्रियादहद्दृष्टीःप्रतिपक्षयोषितां॥
॥२॥तिरोहितांतानिनितांतमाकुलैरपांविगाहादलकैःप्रसारि
भिः॥दधुर्वधूनांवदनानितुल्यतांद्विरेफवृंदांतरितैःसरोरुहैः॥
॥३॥एतेभारवेः॥संक्षोभंपयसिपुनर्महेमकुंभश्रीभाजाकुचयु
गलेनमीयमाने॥विश्लेषंयुगमगमद्द्वयांगनाम्नोरुहृतःकद्व
सुखावहःपरेषां॥४॥माघकवेः॥आत्तमात्रमधिकांतुमीक्षितुं
कातराशफरशंकिनीजहौ॥अंजलौजलमधीरलोचनालोचन
प्रतिशरीरलांछितं॥५॥कलशस्य॥अविरतमिदमंभःस्वेच्छ
योल्लासयंत्याविकचकमलशोकोत्तानहस्तद्वयेन॥परिकलित
इवार्कःकामबाणातिथिभ्यःसलिलमिववितीर्णंबाललीलासु
खाय॥६॥कस्यापि॥ललितसुखमातन्वतीतरलतरंगौघचलि
तनितंबा॥विपरीतरतासक्तेवचदृश्यतेसरसिसासखी॥७॥

अमरुकस्य॥ उन्मृष्टपत्राःकलितालकांताः कंठेषुलग्नाजघ
नंस्पृशंतः॥स्तनस्थलेष्वाहतिमाद्धानागतोवधूनांप्रियतोज
लौघाः॥८॥ह्रतोंगरागःस्तिलकंविमृष्टंलब्धांतरैरेभिरतीवमं
त्वा॥सुसंहितेनेतितदाजनानामादायिमध्येनकुचद्वयेन॥९॥
जयमाधवस्येतौ॥ जलनिबिडविवस्त्रव्यक्तनिम्नोन्नताभिःस
मकलितटभूभिःस्नानमात्रोत्थिताभिः॥रुचिरकनककुंभश्री
मदाभोगतुंगस्तनविनिहतहस्तस्वस्तिकाभिर्वधूभिः॥१०॥

अथजलक्रीडा

एतस्याःकरिकुंभसंनिभकुचप्राग्भारपृष्ठेलुठद्गुंजागर्भगजेंद्रमौ
क्तिकसरश्रेणिमनोहारिणि॥दूरादस्यतरंगएषपतितोवेगाद्विं
लीनःकथंकोवान्योपिविलीयतेनसरसः सीमंतिनीसंगमे॥१॥
निजप्रियमुखभ्रांत्याहर्षेणाचुंबदंबुजं॥दष्टाधरात्तुभृंगेणसी
त्कारमकारोन्मृदु॥२॥ इतिजलक्रीडा॥ ७ ॥ ७ ॥ ७॥

अथग्रीष्मवायवः

कारंजीकुंजयंतोनिजजठररवव्यंजितावीरकोशीरुत्तानाद्ध
ष्णालानांपृथुस्फि रगताशिंबिकान्पाटयंत्तः॥झिल्लीकाझ
ल्लरीणांबधिरितककुभंरक्ततांरवेक्षिपंतः सिंजानाश्वत्थपत्र
मकरझणझणाराविणोवांतिवाताः॥१॥ बाणभट्टस्य॥व्यो
मव्यालोलमुक्ताफलधवलगलद्विंदुसंदोहगर्भानंभोदान्भ
र्त्सयित्वादिशिदिशिभुवनेभीतिमुद्भावयंतः॥एतेरक्षोमृगाक्षी
गतलुलितमदक्षोभसंरंभरूक्षावाताःपातालकुक्षिस्थितमपि
सलिलंतत्क्षणाद्भक्षयंति॥२॥ श्रीदेवदासानां॥ आध्मानोद्ध
वद्ग्धवन्हिसुहृदःकीर्णोष्णरेणूत्कराःसंतप्ताध्वगमुक्तखेद
विषमश्वासोष्णसंवादिनः॥ तृष्णार्ताजगरायवास्यकुहरेक्षिप्र
प्रवेशोत्कटाभ्रूभंगैरिवतर्जयंतिपवनादग्धस्थलीकज्जलैः॥
॥३॥

अथग्रीष्मपथिकाः

सर्वाशारुधिदग्धवीरुधिसदासारंगबद्धक्रुधिसामस्मारुहि

मंदसुन्मधुलिहस्वच्छंदकुंदद्रुहि॥शुष्यच्छ्रोतसितप्तभूमिरजसिज्वालापमाणार्णसिग्रीष्मेमासिततार्केतेजसिकथंपांथव्रजन्जीवसि॥१॥ग्रीष्मोष्णंस्तेजसुष्यत्पयसिककुभयोज्ञांतपाग्निभाजिप्रायःपंकैकमात्रंगतवतिसरसिस्वल्पतोयेलुठित्वा॥कृत्वाकृत्वाजलार्द्रीकृतसुरसिजरत्कर्पटार्थप्रपायांतोयंजग्ध्वापिपांथःपथिवहतिहहाहेतिकुर्वन्पिपासुः॥२॥वाताकीर्णविशीर्णवारिणिनृणश्रोणीझणत्कारिणिग्रीष्मेसोष्मणिचंडसूर्यकिरणप्रत्काथ्यमानांभसि॥चिंताशोपितकामिनीमुखशशिज्योत्स्नात्ततत्कांतयोर्मध्याह्नेपिसुखंप्रयातिपथिकःस्वंदेशमुत्कंठितः॥३॥भ्राम्यच्चीत्कारचक्रभ्रमरिभरिघटीमंत्ररक्तप्रमुक्तश्रोतःपूर्णःप्रणालीपथिशरणिशराहेतिसात्कारिवारि॥कोपंपांथःप्रकामंशितमणिमुसलाकारविस्फारधारंविक्षुण्णक्षुण्णमुक्ताकणनिकररिभासारपातंपिबंति॥४॥बाणस्य

अथप्रपापालिका

अंगुल्यग्रनिरोधितस्तनुतरांधारामियंकुर्वतीकर्कर्यानपरंपयोनिपुणिकादातुंप्रपापालिका॥विश्लिष्टांगुलिनाकरेणदशनापिंडंशनैःपांथहेनिष्पंदोर्ध्वविलोचनस्त्वमपिह्याजानासिपातुंपयः॥१॥दूरादेवकृतांजलिर्नतुपुनःपानीयपानोचितोस्तपालोकनकौतुकात्सचलितोमूर्धानशांतामृषः॥रोमांचोपिनिरंतरंप्रकटितःप्रीत्यानशैत्याद्ययाक्षुण्णोसौविधिरध्वगेनविहितोवीक्ष्यप्रपापालिकां॥२॥बाणभट्टस्य॥गंतुंसत्वरमीहसेयदिपुनर्व्यालोलवेणीलतांदृष्टुंवास्वकुटुंबिनीमनुदिनंकांतांसमुत्कंठसे॥तत्तृष्यन्नपिमुंचमंथरवलन्नेत्रांबुसत्याध्वगामेतांदूरतसवहेपरिरटभ्रातःप्रपापालिकां॥३॥मध्याह्नेतिखरेनिदाघसमयेतापोध्वनोवर्ततेशीतेकुंजवटेविचित्रविटपेभोपांथविश्रम्यतां॥एकाकीचभवानहंचतरुणीशून्याप्रपावर्ततेलज्जामिच्छुवतीस्वयंचचतुरोजानासिकालोचितं॥४॥कस्येयंतरुणि

प्रपापथिकनःकिंपीयतेस्योपयोधेनूनामथमाहिषंपथिकरे॰
वारःकथंमंगलः॥सोमोवाथशनैश्चरोमृतमिदंतत्तेधरेहश्य
तेभोभोपांथविलाससुंदरसखेयद्वोचतेतत्पिब॥५॥इतिश्रीबृ
हच्छा॰वि॰प॰मिश्रकशृंगारेषड्तुवर्णनेग्रीष्मर्तुस्वभावाख्यानं॥

अथवर्षासमयस्वभावाख्यानं

शीतलादिवसंत्रस्तंप्रावृष्यान्ननभस्वनः॥नभोवभारनीरंध्रंजी
मूतकुलकंबलं॥१॥सर्वदासस्य॥अस्थिरमनेकरागंगुणरहितं
नित्यवक्रंदुःप्रापं॥प्रावृषिसुरेंद्रचापंविभाव्यतेयुवतिचित्तमि
व॥२॥स्फुरंतःपिंगलाभासोधरण्यामिंद्रगोपकाः॥सरक्तवासः
पांथस्त्रीजीवाइवचकाशिरे॥३॥आकर्ण्यस्मरयौवनाद्यपटहं
जीमूतधीरध्वनिंनृत्यत्केकिकुटुंबकस्यदधतंमंद्रामृदंगक्रियां
उन्मीलन्नवनीलकंदलदलव्याजेनरोमांचितांहर्षेणेवसमुत्थि
तावसुमतीदध्रेशिलींध्रध्वजां॥४॥त्रिविक्रमभट्टस्य॥नंदति॰
कस्यनमनःसबलैर्घनधूलिधूसरच्छायैः॥आक्रम्यपुत्रकैरि
वमलिनीकृतमंबरंजलदैः॥५॥मलिनहुतभुग्धूमश्यामैर्दि
शोमलिनाघनैरविरलतृणश्यामभूमिर्नवोद्गतकंदलैः॥सुर
तसुभगोनूनंकालःसएषसमागतोमरणशरणायस्मिन्नेतेभ
वंतिवियोगिनः॥६॥विज्जकस्य॥वज्रेणत्रिजगत्पतेर्बलरिपोर
च्छिन्नपक्षाःपुरायेभीतानिममज्जुरब्धिजठरेतेलूनपक्षान्॰
गिरीन्॥आश्वास्यव्रणदुःखजोशमयितुंतेषामुदग्रव्यथामु
त्तस्थुर्जलदच्छलेनजलधेरूर्ध्वांभसःपर्वताः॥७॥सूक्तिसह॰
स्रात्॥सर्पांसामीकृत्यप्रसभमपहृत्यांबुसरितांप्रताप्योर्वीं॰
कृत्स्नांतरुगहनमुच्छोष्यसकलं॥क्वसंप्रत्युष्णांशुर्गतइतित
दन्वेषणपरास्तडिद्दीपालोकादिशिदिशिचरंतीवजलदाः॥८
पाणिनेः॥विशांहाराकाराःशमितशमसाराअपिमुनेरसूरीसं
चारैःकृतमदविकाराश्वशिखिनां॥स्थिताध्वव्यापारास्तुहिन
कणसाराविरहिणीमनःकर्णोगाराकिरतिजलधराजलधरः॥

॥९॥ मंदंमुद्रितपांशवः परिपतज्झंकारिझंझामरुद्वेगध्वस्तकु
टीरकायनिपतच्छिद्रेषु लब्धांबराः॥ कर्मव्यग्रकुटुंबिनीकुचभ
रास्वेदच्छिदः प्रावृषः प्रारंभेमदयंति कंदलदलोल्लासाः पयोबिंद
वः॥१०॥ अमरुकस्य॥ किंचिन्मुद्रितपांशवः शिखिकुलैरुत्कं
ठमालोकिताजीर्णावासरुदद्दरिद्रगृहिणीश्वासानिलेजर्जराः॥
एनेतेनिपतंतिनूतनघनप्रावृड्भवारंभिणोविच्छायीकृतविप्रयु
क्तवनितावक्त्रेंदवोबिंदवः॥११॥ मेघाटोपैस्तनितसुभगंवीक्ष्य
खंहेतिदंतैः कृत्वाभीतिंनुपरिसदनंचामरैश्छादयित्वा॥ कर्पूरैर
स्तामृगमदरसैर्भूमिमाल्येप्यशेतेसैंहेचर्मण्युरसिदयिताबाहु
रूढःपुलिंदः॥१२॥ रटतुजलधरः पततुधाराः स्फुरतुतडिन्म
रुतोपिवांतिवाताः॥ हृयमुरसिमहौषधीवकांतानिखिलभय
प्रतिपातिनीस्थितामे॥१३॥ उन्निद्रकंदलदलांतरलीयमान
गुंजन्मदांधमधुपेघनमेघकाले॥ स्वप्नेपियः प्रवसतिप्रविहाय
कांतांतस्मैविषाणरहितायनमोवृषाय॥१४॥ बाहुलकस्य॥ का
लेनीलबलाहकेनतडितिप्रीतिप्रदेबर्हिणामाश्चर्यंकथयामिवः
शृणुतभोयद्वृत्तमस्मद्गृहे॥ सौभाग्यव्ययशंकयैवशयनेकां
ताप्रियाभ्यामहोमाणिक्यांबतरात्रिमेवसकलांचीर्णप्रवासी
व्रतं॥१५॥ अथोपगूढेशरदाशशांकेप्रावृड्ययौशांततडित्कटा
क्षा॥ कासांनसौभाग्यगुणोऽगनानांनष्टः परिभ्रष्टपयोधराणां॥१६
॥यस्यारंध्रव्योम्नश्चलजलदधूमः स्थगयतिस्फुलिंगानांरूपंदध
तिचयथाकीटमणयः॥ यथाविद्युज्ज्वालोल्लसितपरिपिंगाश्चक
कुभस्तथामन्येलग्नः पथिकतरुखंडेस्मरदवः॥१७॥ सर्वत्रोद्गत
कंदलावसुमतीवृष्टिर्जलानांपराजातंनिष्कमलंजगत्सुमलि
नैर्लब्धाघनैरुन्नतिः॥ संप्रतिप्रतिमंदिरंद्विरसनाः संत्यक्तमार्गो
जनोवर्षाणांचकलेश्वसंप्रतिजयत्येकैवराज्यस्थितिः॥१८॥ नै
तद्धारिदगर्जितंरतिपतिप्रस्थानढक्कारवोनैतेवारिधराः स्मरज्व
दजलास्तत्तिग्मधुराः प्रोद्धुराः॥ नैषाविद्युदियंविभातिरुचिरात

चंद्रहासप्रभामन्येमानिनिमानदुर्गमधुनाजेतुंकिमायात्यसौ॥१९॥ उपैतिघनमंडलीनर्तितनीलकंठावलीतडिल्लसतिसर्वतोवहतिकेतकीमारुतः॥इतोपियदिनागतःप्रियतमोनुमन्येधुनाद्धातिमकरध्वजस्त्रुठितसिंजिनीकंधनुः॥२०॥ दिशाधाराहाराःशमितशमभाराःशमवतामसूचीसंचाराःकृतमदविकाराश्चशिखिनां॥ हृताध्वव्यापारास्तुहिनकणसाराविरहिणीमनःकीर्णांगाराःकिरतिजलधाराजलधरः॥२१॥ आयातासखिवर्षावर्षादपिदीर्घतरादिवसाः॥दिशिदिशिनीरतरंगोनीरतरंगोममापिहृदयेशः॥२२॥ गर्जतिवारिदपटलेवर्षतिनयनारविंदमवलायाः॥भुजवल्लिमूलसेकेविरहलतापल्लवंसूते॥२३॥अतिशयितकदंबामोदकदंबानिलोवहति॥ वियदंबुदमेदुरितंमेदुरितंपश्यनागतोदयितः॥२४॥ कामेनकामंप्रहिताज्जवेनमारुट्चचालत्रिजगद्विजेतुं॥ किंचंद्रबिंबंदधिमक्षयंतीसंधारयंतीहरितःशुभायाः॥२५॥ आच्छिन्नेक्षितितेजसीमनसिजव्यापारमेयंमनुष्यासाच्चहृदयमेतदस्तिदृशामंद्रव्यंपरेषांतमः॥कालाकाशदिशांकथानहितथाकिंत्वत्रवर्षागमेद्रव्यंवारिगुणश्चवारिदरवःकर्मापिवारिक्रिया॥२६॥ इतिवर्षा ॥७॥

अथदोलाकेलिः

सौंदर्यमिंदीवरलोचनानांदोलासुदोलासुपदुल्लास॥ यदिप्रमादाल्लभतेकवित्वंजानामितद्वर्णयितुंमनोभूः॥१॥प्रसार्यपादौविहितस्थितीनांदोलासुदोलांशुकपल्लवानां॥मनोरथानामपियत्रगम्यंतद्द्रष्टुमापुःसुदृशांयुवानः॥२॥उन्नम्यदूरंमुहुराननंस्याःकांताःश्लथीभूतनितंबबिंबाः॥ दोलाविलासेनकृतश्रमत्वात्प्रकर्षमापुःपुरुषायितेषु॥३॥ विल्हणस्यैते॥प्रत्यासन्नसुखीकरांबुजयुगप्रेंखोलितांप्रेंखिकामारुह्येयमुदस्तहारलतिकाव्याविध्यतुंगस्तनी॥दृष्टादृष्टमुखांगतागतवशाद्दालोलमानांशुकातन्वंगीगगनेकरोतिपुरतःशारद्रुदंविभ्रमं॥४॥

अथवर्षावायवः

धाराधौतंधुनानःशशधरधवलंकेशरंकेतकीनांकैलासेकिन्नरीणांचलद्लकलनालास्यलीलांदधानाः॥आमूलंमानिनीनांमनसिविनिहितंमानमुन्मूलयंतोवांत्येतेवारिवाहव्यतिकशिखराप्रावृषेण्याःसमीराः॥१॥एतेनेदुरतिक्रमक्रममिलद्दमौर्मिमर्मच्छिदःकादंबेनरजोभरेणककुभोरुंधंतिझंझानिलाः॥गाढारंभनिगूढनीरदघटासंघट्टनीलीभवद्व्योमक्रोडकटाहयातुकपयोवेणीकणग्राहिणः॥२॥श्रीकृष्णवल्लभस्य॥

अथवर्षापथिकः

गर्ज्जवावर्षवामेघमुंचवासरितोभरान्॥गणयंतिनशीतोष्णंवल्लभाविमुखाजनाः॥१॥उपरिपयोधरमालादूरेदयिताकिंमेतदापतितं॥हिमवतिमहौषधंयःकोपाविष्टःफणीशिरसि॥२॥किंगतेनयदिसानजीवतिप्राणितिप्रियतमातथापिकिं॥इत्युदीर्यनवमेघमालिकांनप्रयातिपथिकःस्वमंदिरं॥३॥भर्त्तृहरेः॥उपरिघनंघनपटलंतिर्यग्गिरयोपिनर्तितमयूराः॥क्षितिरपिकंदलधवलादृष्टिःपथिकःक्वयायातु॥४॥बर्हीरौतिबकारटंतितडितोभ्राम्यंत्यतिव्याकुलाविक्रोशंतिघनाघनाचविलपत्युच्चैर्बलाकावलिः॥आत्मानंमरुतःक्षिपंतिसलिलासारःपतत्यग्रतोमुक्ताप्रावृषिसाहसैकरसिकोयातिप्रियामध्वगः॥५॥नृत्यच्चंद्रकिणिक्कणन्मधुलिहिश्यामायमानक्षितौधीरध्वानपयोमुचिप्रविलसत्सौदामिनीदामिनी॥धीरांभःकणवाहिशीतमरुतिप्राणासयोदागमेहाहाहास्यतिमुग्धिकानवधूरित्यध्वगःक्रंदति॥६॥श्रुत्वाबालमृगीविलोलनयनाशब्दंघनानांपुराभीत्यावक्षसिसंश्रितापिनिबिडेभूयःसमालिंगति॥यावक्त्रादयत्नस्यकोपितवतीकंठममैवाननंसाद्यस्तधुनाकथंतुविरहेबालापयोदावलीं॥७॥दुर्गसेनस्य॥लसतितरुणीकेशश्यामेपयोभृतिनिर्भरंस्फुरतिचपलेवारंवारं

णद्युतितेजसि॥ उपगुरुजनंमन्येदैन्यापराङ्मुखसुप्तयानिभृ
तंमंदोच्छ्वासंतपाबतरुद्यते॥८॥जीवनायकस्य॥ रात्रौवारिम
रालसांबुदरवोद्विग्नेनजातांश्रुणापांथेनात्मवियोगदुःखपिशु
नंगीतंसमुत्कंठता॥ आस्तांजीवितहारिणःप्रवसनालापस्य
संकीर्तनंमानस्यापिजलांजलिःसरभसंलोकेनदत्तोयथा॥९॥
अमरुकस्य॥ निशीथेलीलानांझटितितडितांवीक्ष्यविषयंघ
नानामाभोगंरसिकपथिकेनोन्मुखदृशा॥ नगीतंसोत्कंठंनच
रुदितमुत्कंठतरलंनमुक्तानिश्वासास्फुरदनुमतंकिंतुहृदयं॥१०
॥ग्रामेस्मिन्पथिकायपांथवसतिर्नैवाधुनादीयतेरात्रावत्रविहा
हमंडलतलेपांथःप्रसुप्तोयुवा॥ तेनोड्डीयखलेनगर्जतिघनेस्मृ
त्वाप्रियांतत्कृतंयेनाद्यापिकरंकदंडपतनाशंकीजनस्तिष्ठति
॥११॥ प्रातःपांथप्रसीदप्रतिविरमममुत्सृज्यबालामकांडेगंतुं
बाष्पांबुपूरप्लुतनयनमुखीप्रेयसीतेनयुक्तं॥ वृत्तंग्रामेतिकष्टं
यदिहगृहपतेःप्रोषितस्यप्रियायामुक्ताक्रंदास्तदेतान्सलि
लवितरणेनिर्गतान्पश्यबंधून्॥१२॥शंकुकस्य॥ भद्रात्रग्राम
केत्वंवससिपरिचयस्तेस्तिजानासिवार्तामस्मिन्नध्वन्यजायो
जलधररसितोत्कानकश्चिद्विपन्नः॥ इत्थंपांथप्रवासावधि
दिनविगमापायशंकीप्रियायाःपृच्छन्वृत्तांतमाणस्थितनिज
मवनोप्याकुलोनप्रयाति॥१३॥ इतिवर्षापथिकः॥ छ ॥छ॥

अथपथिककामिनी

अदृष्टपूर्वमस्माभिर्यदेतद्दृश्यतेधुना॥ विषंविषधरैःपीतंमूर्छि
ताःपथिकांगनाः॥१॥ शिशिरसीकरवाहिनिमारुतेचरतिशीतभ
यादिवसत्वरः॥ मनसिचप्रविवेशवियोगिनीहृदयमाहितशो
कविनाशनः॥२॥ कुमारदासस्य॥ विरमतघनाःकिंवोदृष्ट्यासु
धैवविसृष्टयाव्रजतकुंभेकामप्यन्यांमनोरुचिरामतः॥ नत
दिहवनंनासौमार्गोनतच्चधरातलंविरहगलितैस्तन्व्यानाप्लु
तंनयनांबुभिः॥३॥ प्रसरदलकाकीर्णेकर्णेकेकिरुतंश्वसितत

विजितोवातोघ्रातोनवाकुटजोत्करः॥नचपरिचितासंपत्सुताश्रुणिलोचनेतदपिकिमपिप्रावृड्यामाधुनोतिवियोगिनी॥४॥मेघैर्व्योमनवांबुभिर्वसुमतीविद्युल्लताभिर्दिशोधाराभिर्गगनंवनानिकुटजैःपूरैर्वृतानिम्नगाः॥एकांघातयितुंवियोगविधुरादीनांवराकींस्त्रियंप्रावृट्कालहताशवर्णयकृतंमिथ्याकिमाडंबरं॥५॥बीजाकस्य॥वातावांतुकदंबरेणुशबलानृत्यंतुसर्पद्विषाःसोत्साहानववारिधारगुरवोमुंचंतुनादंघनाः॥मग्नांकांतवियोगशोकजलधौमांवीक्ष्यदीनाननांविद्युत्किंस्फुरसित्वमप्यकरुणेस्त्रीत्वेसमानेसति॥६॥विद्यापतेः॥इतिश्रीबृ॰शा॰वि॰प॰मिश्रकशृंगारेषडृतुवर्णनेवर्षासमयस्वभावाख्यानप॰

अथशरत्समयस्वभावाख्यानं

अथप्रसन्नेंदुमुखीसितांबरासमाययावुत्पलपत्रलोचना॥सपंकजाश्रीरिवगांनिषेवितुंसहंसवालव्यजनांशरद्वधूः॥१॥महामनुष्यस्य॥दर्शयंतिशरन्नद्यःपुलिनानिशनैःशनैः॥नवसंगमसव्रीडाजघनानीवयोषितः॥२॥भगवतोव्यासस्य॥नतज्जलंयन्नसुचारुपंकजंनपंकजंतद्यदलीनषट्पदं॥नषट्पदोसौनजुगुंजयःकलंनगुंजितंतन्नजहारयन्मनः॥३॥भट्टस्वामिनः॥एकेनचुलुकेनाब्धिर्निपीतःकुंभजेनयत्॥तस्योदयेतःकालुष्यंत्यजंत्यापोभयादिव॥४॥काशाःक्षीरनिकाशाःदधितरवर्णानिसप्तपर्णानि॥नवनीतनिभश्चंद्रःशरदिवतक्रप्रभाज्योत्स्ना॥५॥गंडगोपालस्य॥तीक्ष्णंरविस्तपतिनीचइवाचिराढ्यःशृंगंगुरुस्त्यजतिमित्रइवाकृतज्ञः॥तोयंप्रसीदतिमुनेरिवकर्मचिंताकामीदरिद्रइवशोषमुपैतिपंकः॥६॥भासस्य॥अर्धसुप्तोनिशायाःसरभससुरतायासखिन्नश्लथांगःप्रोद्भूतासह्यतृष्णोमधुमदविरतोहर्म्यपृष्ठेप्रबुद्धः॥संभोगक्लांतकांताशिथिलभुजलतावर्जितंगर्गरीतोज्योत्स्नाभिन्नाच्छधीनांनपिबतिसलिलंशारदंमंदपुण्यः॥७॥भर्तृहरेः

हृद्यमिदमत्यंतसमंजीचेत्प्रभविष्णुताशरच्चेयं॥ याक्षेत्रेभ्यः प्राप्यफलंखलेषुनिःक्षिप्यतेयस्यां॥८॥ चेतःकर्षतिसप्तच्छदकुसुमरसासारसौरभ्यलुभ्यद्भृंगीगीतश्रुतिसुभगदिशोवासराःशारदीयाः॥ किंचव्याकोशपंकेरुहमधुरमुखींसंचरच्चंचरीकश्रेणीवेणीसनाथांरमयतितरुणःपद्मिनीमंशुमाली॥९॥ श्रुतिधरस्य॥ अथोपगूढेशरदाशशांकेशरद्ययौशांततडित्कटाक्षा॥ कासांनसौभाग्यगुणांगनानांपुष्टःपरिभ्रष्टपयोधराणां॥१०॥ धन्याःशरदिसेवंतेप्रोल्लसच्चित्रशालिकान्॥ प्रासादान्स्त्रीसखाःपौराःकेदारांश्चकृषीवलाः॥११॥ नमिताःफलभारेणनमिताःशालिमंजरीः॥ केदारेषुहिपश्यंतःकेदारेषुविनिस्पृहाः॥१२॥ समुल्लसत्पंकजलोचनेनविनोदयंतीतरुणानशेषान्॥ मुक्त्वांबरागुप्तपयोधरश्रीःशरन्नवोढेवसमाजगाम॥१३॥ पयोदकेशेषुविलुप्यरोषान्निःकाश्यसाकोकनदायताक्षी॥ वर्षावधूंस्वांश्रियमुन्नयंतीप्रौढासपत्नीवशरच्चकाशे॥१४॥ अपाकृत्याशेषाण्यपिचघनजालानिपरितस्तमोधूमस्तोमोद्भवमलिनिमानंचतदनु॥ शरच्चंद्रःशिल्पीरतिपतिमुदेसौनिजकरैःसुधासंदोहार्द्रैर्भुवनमवनंपांडुरयति॥१५॥ इतिशरद्वर्णनं॥

अथभ्रमरक्रीडा

चेलांचलेनचलहारलताप्रकांडैर्वेणीगुणेनचचलद्वलयीकृतेन॥ हेलाहितभ्रमरकभ्रममंडलीभिःछत्रत्रयंरचयतीवचिरंनतभ्रूः॥१॥ कस्यापि॥ भ्रमात्प्रकीर्णेभ्रमरीषुकिंचिन्नचेलांचलेचंचललोचनानां॥ कुचौकदाचिज्जघनंयुवानोविलोक्यसाफल्यमवापुरक्ष्णोः॥२॥ परिभ्रमंत्याभ्रमरीविनोदेनितंबबिंबाद्विगलद्दुकूलं॥ विलोक्यकस्याश्चनकोमलांग्याःपुंभावमन्याःसुदृशोववांछुः॥३॥ गुणाकरस्यैतौ॥ इतिभ्रमरक्रीडा॥ ७॥

अथशरद्वायवः

वांतिरात्रौरतिक्लांतकामिनीसुरतदोनिलाः॥ ललनालोलधम्मि

ल्लमल्लिकामोदवासिताः॥१॥वांतिकल्हारसुभगाः सप्तच्छदसु
गंधयः॥ वानानवरतग्लानवधूगमनमंथराः॥२॥वाल्मीकिमुनेः

अथशारत्पथिकः

पंथानुपंकंपथिविस्मरंतः कथावशेषेचपयोदवृंदं॥ मार्गेषुचं
क्रांतपपिच्छलेषुपदेपदेचस्खलुरध्वनीनाः॥१॥दृहनिचुलनि
कुंजेवंशासंभारभाजिस्त्वमपियदिमुहूर्तंपश्यसिक्षेत्रमेतत्॥इ
तिपथिकमकस्मान्मार्गएवोपविष्टंवदतितरुणकांतंगोपिकासं
गभंगं॥२॥कस्यापि॥ इतिश्रीबृहच्छार्ङ्गधरविरचितायांपद्धसं
मिश्रकशृंगारेषड्ऋतुवर्णनेशरत्समयस्वभावाख्यानपरिच्छेदः

अथहेमंतस्वभावाख्यानं

हिमधवलदंतकेशामंदद्युतितारकाबृहत्तिमिरा॥द्विगुणीभूता
रजनीतरुणीवशनैःशनैर्याति॥१॥विज्जकस्य॥शुकहरितय
वानांसीम्निनीहारभासःसपदिविगतनिद्राःक्रौंचकांताःक्षपां
ते॥ विदधतिकमनीयक्वाणमुद्यत्ककारंसरलितगलनालंजर्ज
रस्फाररेफं॥२॥कस्यापि॥ वेपंतेकपयोभृशंकृतजडंगोजाधि
कंम्लायतिश्वाचुल्लीकुहरोदरंक्षणमपिप्राप्यापिनैवोज्झति॥
शीतार्तिव्यसनातुरापुनरसौदीनोजनःकर्मवत्स्वान्यंगानिशरी
रएवहिनिजेनिन्हेतुमाकांक्षति॥३॥लक्ष्मीधरस्य॥लघुनित
णकुटीरेक्षेत्रकोणेयवानांनवकमलपलालस्त्रस्तरेसोपधाने
॥परहरतिसुषुप्तंहालिकद्वंद्वमारात्कुचकलशमहोष्माबद्ध
रेखस्तुषारः॥४॥कमलायुधस्य॥ हेहेमंतस्मरिष्यामित्वद
तीतेगुणद्वयं॥ अयत्नशीतलंवारिनिशाश्चाध्ययनक्षमाः॥
॥५॥अध्येपोढारविंदद्युतिभृतिविदलत्कुंदमाद्यद्विरेफेकाले
प्रालेयवातप्रबलविकसितोद्दारमंदारनाम्नि॥येषांनोकंठल
ग्नाक्षणमपितुहिनक्षोदरक्षामृगाक्षीतेषामायामियामायम
सदनसमायामिनीयातियूनां॥६॥प्रालेयशैलशिखरानलसंप्र
योगःप्रोत्फुल्लकुंदमकरंदरहतालिवृंदः॥कालोयमातपतिकुंकु

मयंकपिंगप्रोत्तुंगरंगरमणीकुचसंगयोगः॥७॥ भोहस्त्य॥ हेमंतेबहुदोषाऽऽढ्ये द्वौगुणौसर्वसंमतौ॥ अयत्नशीतलंवारिसुरतंस्वेदवर्जितं॥८॥ अलंहिमानीपरिदीर्णगात्रःसमापितःफाल्गुनसंगमेन॥अत्यंतमाकांक्षितकृष्णवर्त्माभीष्मोमहात्माऽजनिमाघतुल्यः॥९॥ हेमंतेपथिकजनाःप्रियाविमुक्तालोकानांगृहबहिरंगणेशयानाः॥ कंदर्पाऽऽकुलमनसांनिशासुतेषांशीतंकिंलगतिजगत्प्रकंपकारि॥१०॥ हेमंतेहिमकरबिंबचारुमुख्यारामायामृदुभुजपंजरेशयानाः॥येकालंपरमसुखेनयंतितेषांशीतंकिंलगतिजगत्प्रकंपकारि॥११॥ अद्यशीतवरीवर्तिसरीसर्तिसमीरणः॥ अपत्नीकोमरीमर्तिनरीनर्तिकुचोष्मवान्॥१२॥ हसंतींचहसंतींचहसंतींवामलोचनां॥ हेमंतेयेनसेवंतेतेनरादुःखभागिनः॥१३॥लज्जाःप्रौढमृगीदृशामिवनव॰स्त्रीणांरतेच्छाइवस्वैरिण्यानियमाइवस्मितरुचःकौलांगनानामिव॥दंपत्योःकलहाइवप्रणयितावारांगनानामिवप्रादुर्भूयतिरोभवंतिसहसाहैमंतिकावासराः॥१४॥सीत्कारंशिक्षयतिव्रणयत्यधरंतनोतिरोमांचं॥नागरिकःकिमुमिलितोनहिनहिसखिहैमनःपवनः॥१५॥ कामिनोहंतहेमंतनिशि॰शीतज्वरा तुराः॥जीवंतिहरिणाक्षीणांवक्षोजाश्लेषरक्षिताः॥१६॥ अपिदिनमणिरेषःक्लेशितःशीतसंघैरथनिशिनिजभार्यांगाढमालिंग्यदोर्भ्यां॥स्वपितिपुनरुदेतुंसालसांगस्तुत॰स्मात्किमुनभवतुदीर्घाहैमिनीयामिनीयं॥१७॥ददृस्यधरचुंबनंनयनपंकजंमुद्रयत्यमंदपुलकंमनागमलमंगमालिंगति॥विचालयतिचालकंचपललोचनायाहठात्तनोत्यविनयंमरुत्प्रियइवैषहैमंतिकः॥१८॥ इतिहेमंतवर्णनं॥५॥

अथकंदुकक्रीडा

चंचच्चोलांचलानिप्रतिसरणिचलव्यस्तवेणीनिवाहोर्विक्षिप्यन्दक्षिणस्यप्रचलितवलयस्फारकोलाहलानि॥सासन्तुयद्दवां

सिद्धुतमितरकरोत्क्षेपलोलालकानि स्रस्तस्रंजि प्रमोदं दधति मृगदृशां कंदुकक्रीडितानि॥१॥ राजशेखरस्य॥ पयोधराकारधरो हि कंदुकः करेण रोषादिव ताड्यते मुहुः॥ इतीव नेत्राकृतिभीतिमुत्पलं तस्याः प्रसादाय पपात पादयोः॥२॥ कालिदासस्य॥ वक्त्रश्रीजितलज्जितेंदुमलिनं कृत्वा करे कंदुकं क्रीडाकौतुकमिश्रभावमनया तिर्यग्वहंत्याननं॥ भृंगाग्र्यद्रुकृष्णकंदलदलस्पर्द्धी बनीनां दृशां दीर्घापांगतरंगणे कस्तु हृदां कोप्येष पाश्रीकृतः॥३॥ राजशेखरस्य॥ अमंदमणिनूपुरक्वणनचारुचारीक्रमं झणझणितमेखलास्खलिततारहारच्छदं॥ इदंतरणत्किंकणावलिविशेषवाचालितं मनोहरति सुभ्रुवः किमपि कंदुकक्रीडितं॥४॥ वनिताकरतामरसाभिहतः पतितः पतितः पुनरुत्पतितः॥ खलु ते कंदुकत्दृदयं विदितं वनिताधरसंगमलुब्धमिव॥५॥ इतिकंदुकक्रीडा॥ * ॥ * ॥ * ॥

अथहेमंतवायवः

हूणीसीमंतमुद्रां सपदि तरलयन्कीरकांताकुचांतः स्वच्छंदस्तस्तवस्त्री चलचपलतया लोलयन्हारवल्लीं॥ प्रालेयावासपृथ्वीधरशिशिरचलज्झारुवारिप्रवाहः प्रस्तोभप्रातिभश्रीः प्रसरति परितो हैमनो गंधवाहः॥१॥ इतिहेमंतवायवः॥ * ॥ * ॥ * ॥

अथहेमंतपथिकाः

हे पांथ प्रियविप्रयोगहुतभुक्ज्वालाननभिज्ञोसि किं किं वा नास्ति तव प्रियागतघृणः किं वा विहीनो धिया॥ येनास्मिन्नवकुंकुमारुणरुचिव्यासंगधर्मीं चिते कुंदानंदितमत्तषट्पदकुले काले गृहान्निर्गतः॥१॥ आहूतोपि सहायैरेहीत्युक्त्वा विमुक्तनिद्रोपि॥ गंतुमना अपि पथिकः संकोचं नैव शिथिलयति॥२॥

भवोः॥ शीतार्तिप्रसरस्त्वयाकुलपदन्यासैः समुत्कंपिभिः पांथैर्निर्दयतुच्छगोधनन दृष्टापारवैसूचिताः॥ प्राप्यं ते हिमपीडितानि निभृतप्रो हारट धूमाघनस्तोकालसकुटीरकाः कथमपि

प्राप्ता गिरिग्रामकाः ॥३॥ श्रीभोजदेवस्य ॥ अन्योन्याहतिदंतनादमुखरं वक्त्रंमुखंकुर्वता नेत्रे साश्रुकणो निमील्य पुलकव्यासंगि कंडूयता ॥ हाहा हेति सुनिष्ठुरं विवदता बाहुप्रसार्य क्षणं पुण्याग्निः पथिकेन पीयत इव ज्वालाहतश्मश्रुणा ॥४॥ बाणभट्टस्य ॥ इति श्रीबृहच्छार्ङ्गधरविरचितायां पद्धत्यां मिश्रकशृंगारे हेमंतसमयस्वभावाख्यानपरिच्छेदः ॥ छ ॥ छ ॥ छ ॥

अथ शिशिरस्वभावाख्यानं

अंशुकमिव शीतभयासंस्त्यानत्वच्छलेन हिमवलयं ॥ अंभोनिरपि गृहीतं पश्यत शिशिरस्य माहात्म्यं ॥१॥ अमृतवर्धनस्य ॥ वन्हेः शक्तिर्ज्जलमिव गता दर्शनाह्नाहरत्तेर्निस्योक्ष्मं धेनवमरुच्चके वर्तते पुष्पकार्यं ॥ शीतश्वासं दधति विरतिर्याति सिंधोः कृशानुः शीतैर्भीताइव च दिवसाः सांप्रतं संकुचंति ॥२॥ प्रावरणैरंगारैर्गर्भगृहैस्तनतटैश्च दयितानां ॥ संतर्ज्जिनमाढ्यानां नियतशितीतं दरिद्रस्य ॥३॥ कारणोत्पन्नकोपेपि सांप्रतं प्रमदाजनः ॥ निशिशीतापदेशेन गाढमालिंगति प्रियं ॥४॥ महामनुष्यस्य ॥ पीनोत्तुंगपयोधराः परिलसत्संपूर्णचंद्राननाः कांता नैव गृहे गृहे न च दृढं जात्यं न काश्मीरजं ॥ तांबूलं न च तूलिका न च पटी तैलं न गंधाविलं सद्यो गोघृतपाचिता न वटकाः शीतं कथं गम्यते ॥५॥ श्वेतांबरश्रीचंद्रस्य ॥ द्वारं गृहस्य पिहितं शयनस्य पार्श्वे वन्हिर्ज्वलत्युपरि तूलपटी गरिष्ठा ॥ अंगानुकूलमनुरागवशा कलत्रमित्थं करोति किमसौ स्वपतस्तुषारः ॥ ॥६॥ चुल्लीसीमनि गोत्रसांद्रमशनं भुक्त्वा परीतोर्भकैरभ्यासेस्वलपीसुयंत्रनिनदं हर्षात्समाकर्णयन् ॥ शेते संहतिगोगणोष्मणि गृहे स्रस्तांबरां गेहिनीमालिंग्यागणयन्निशासुगणायन्योड्डामरः पामरः ॥७॥ इति शिशिरवर्णनं ॥ छ ॥॥

अथ हल्लीलनक्रीडा

नैतस्याः प्रसृतिहृयेन स्मरलेशक्ये विधातुं दृशौ सर्वत्रैव वि

लोकयते सुखशशिज्योत्स्नावितानैरियं॥ इत्थं बालतया सखीभिरसकृद्दृङ्मीलनाकेलिषु व्याकीर्णा रजनीमुखे चनयने स्वे गर्हते कन्यका॥१॥ न पाणिप्रच्छाद्यं नयनयुगपत्यापतिमिदं नितंबस्यौदार्यात्त्वरितगतयोग्योप्यसुलभः॥ अतिस्वल्पो पाणिस्तनभरनिरोधान्नमिलितो निमीलक्रीडायां कलुषयसि मुग्धे किमिति नः॥२॥ इति दृङ्मीलनक्रीडा॥ छ॥

अथ शिशिरवायवः

केशानाकलयन्दृशौ मुकुलयन् वासो बलादाक्षिपन्नातन्वन्पुलकोद्गमं प्रकटयन्नावेगकंपं गतेः॥ वारंवारमुदारसीत्कृतिभरैर्दंतच्छदं पीडयन् प्रायः शैशिर एष संप्रति मरुत्कांतासु कांतायते॥१॥ चुंबंतो गंडभित्तीरलकवति मुखे सीत्कृतान्यादधाना वक्षस्त्वकंचुकेषु स्तनभरपुलकोद्भेदमापादयंतः॥ ऊरूनाकंपयंतः पृथुजघनतटात्स्रंसयंतोंशुकानि व्यक्तं कांताजनानां विटचरितभृतः शैशिरा वांति वाताः।२॥ छ ॥ छ॥

अथ शिशिरपथिकाः

पुण्याग्नौ पूर्णवांछः प्रथममगणितप्रोषदोषः प्रदोषे पांथः सुप्तायथेच्छं तदनु च सतृणे धाम्नि ग्रामदेव्याः॥ उत्कंपी कर्पटार्धे रजनिपरिवृद्धे छिद्रनिश्छिद्रनिद्रे वाते वाति प्रभाके हिमकणनिकणत्कोणतः कोणमेति॥१॥ बाणभट्टस्य॥ संविष्टो ग्रामदेव्याः कुचघटितघटीकुड्यकोणैकदेशे शीते संवाति वायौ हिमकणिनि रणद्दंतपंक्तिहूयाग्रः॥ पांथः कंथां निशीथे परिकुंचितजरद्ग्रंथिसंतानगुर्वीमावापादाग्रजानुग्रहणचटचटत्कर्पटां प्रावृणोति॥२॥ मयूरस्य॥ आरात्कारीषवह्नेर्विविधध्वनितदृणप्रस्तरात्तन्निषण्णैः संशीर्णग्रंथिकंथाविविरवशविघातशीतवाताभिभूतैः॥ नीताकृतस्नैनपांथैः श्वभिरिव लिबिडं जानुसंकोचकुब्जैरतर्हैर्वारदुःखद्विगुणतररुपापामयामास्त्रियामा ॥३॥

अथ संमिश्राख्याने

योनदीर्घासितापांगविलासललितभ्रुवः॥प्रियामुखस्यवशागस्तस्मैनृपशवेनमः॥१॥कुचावालोक्यतन्वंग्याःशिरःकंपयतेयुवा॥तयोरंतर्निमग्नांहिदृष्टिमाकर्षयन्निव॥२॥मत्तेभकुंभपरिणाहनिकुंकुमार्द्रेकांतापयोधरयुगेरतिखेदखिन्नः॥वक्षोनिधायभुजपंजरमध्यवर्तीधन्यःक्षपांक्षपयतिक्षणलब्धनिद्रः॥३॥कर्णेतालदलंतनौमलयजंकर्पूरवासोंशुकेचूडेगुंफितमालतीदलभरःकंठेनवैकावली॥वासःश्रीनववाससीमनिचवःश्रीसत्कवेरुक्तयोवक्त्रेनागरखंडमस्तुपरतःप्रेमाकुलाकुंतली॥४॥मधुकरविकसितोत्पलावतंसंशशिकरपल्लवितंचहर्म्यपृष्ठं॥मदनजनितविभ्रमाचकांताफलमिदमर्थवतांविभूत योन्याः॥५॥भर्त्तृमौनस्य॥भ्रूचातुर्यात्कुंचिताक्षाःकटाक्षाःस्निग्धाहावालज्जितांताश्चहासाः॥लीलामत्तंप्रस्थितंचस्थितं चस्त्रीणामेतद्भूषणंचायुधंच॥भर्त्तृहरेः॥ग्रामोपशल्यतटिनीतटमंडपेस्मिन्पांथमंथरगतेरजनींनयस्व॥अस्मिन्निशीथविरहज्वरजागरूककोकांगनाकरुणकूजितमिष्टमस्ति॥७॥अधीतविद्यैर्विगतेशिशुत्वेधनार्जिताहारिणियौवनेच॥सेव्यानितंबास्तुविलासिनीनांततस्तदर्थंधरणीधराणां॥८॥यत्रोदारादारा स्तत्रनकांतःस्वतःकांतः॥यत्रतुकांतःकांत स्तत्रनदारागुणोदाराः॥९॥श्रीनंदकरदेवानां॥अवचनंवचनंगुरुसन्निधावनवलोकनमेवविलोकनं॥अवयवावरणंहियदंशुकव्यतिकरेणतदंगसमर्पणं॥१०॥वामनस्वामिनः॥अनुदिनमभ्यासदृढैःसोढुंनचशक्यतेविरहः॥प्रत्यासन्नसमागममुहूर्तविरहस्तुदुर्विषहः॥११॥सव्रीडार्धनिरीक्षणंपटुभयोर्यद्वृत्तिसंप्रेषणं अद्यश्वोथसमागमिष्यतिदूतिक्रोधःप्रसादस्स्वयंसंप्राप्तेथसमागमेसरभसंयच्चुंबनालिंगितंतत्कामस्यफलेतदेवसुरतंशेषःपशूनांविधिः॥१२॥अयंस्निग्धश्यामोयदिहविहरत्यंबुजवनेविनिद्रव्यागुंजन्मधुप इतिपं

जल्पतिजनः॥अहंशंकेपंकेरुहकुहरवासव्यसनिनींश्रियंभृंग
छद्मासुररिपुरूपेतोरमयितुं॥१३॥ इतिश्रीबृहच्छार्ङ्गधरविरचि
तायांपद्धत्यांमिश्रकशृंगारेषडृतुवर्णनेशिशिरसमयस्वभावसं
मिश्राख्यानपरिच्छेदः॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७॥

अथवीररसः

भर्तुःपिंडानृणकरोप्यशक्रयणहायणः॥सुरांगनास्वयंग्राह्यो
रम्यःकालोयमागतः॥१॥शांडिल्यस्य॥प्रायेणसुकरंदानंप्राये
णसुकरंतपः॥प्राणानपेक्षीव्यापारःपुनर्वीरस्यदुःकरः॥२॥
क्षत्रियस्योरसिक्षत्रंब्रह्मपृष्ठेव्यवस्थितं॥तेनपृष्ठंनदातव्यं
पृष्ठदोब्रह्महाभवेत्॥ ३॥भगवतोव्यासस्य॥माभैष्टनैतेनि:
स्त्रिंशानीलोत्पलदलत्विषः॥एतेवीरावलोकिन्यालक्ष्म्यान
यनविभ्रमाः॥४॥धृतधनुषिशौर्यशालिनिशैलानमंतियत्तद
श्चर्यं॥रिपुसंज्ञकेषुगणनाकैववराकेषुकाकेषु॥५॥बाणभ
ट्टस्य॥खड्गास्तिष्ठंतुमत्तेभकुंभकूटाट्टहासिनः॥एकदोर्दंडशे
षपिकःसहेतपराभवं॥६॥जीवन्नेवमृतोसौयस्यजनोवीक्ष्यव
दनमन्योन्यं॥कृतमुखभंगोदूरात्करोतिनिर्देशमंगुल्या॥७॥
दामोदरगुप्तस्य॥रविमणिरपिनत्विष्टःपादैस्तिग्मद्युतेर्म
नाक्स्पृष्टः॥ज्वलतितरामितिकोवामन्युंसोढुंक्षमोमानी॥
॥८॥इंद्रसिंहस्य॥लोकःस्तुभस्तिष्ठतुनावदन्यःपराङ्मुख
नोसमरेषुपुंसां॥पत्न्योपितेषांनह्रियामुखानिपुरःसखीनाम
पिदर्शयंति॥९॥हानाततातेतिसवेदनार्तःक्वणेच्छकृन्मूत्रकफा
नुलिप्तः॥वरंमृतःकिंभवनेकिमाजौसंदष्टदंतच्छदभीमवक्त्रः॥
॥१०॥संमूर्छितंसंयुगसंप्रहारैःपश्यंतिसुप्तप्रतिबुद्धतुल्यं॥
आत्मानमंगेषुसुरांगनानांमंदाकिनीमारुतवीजितांगं॥ ११॥
एतेवराहमिहिरस्य॥यदिसमरमपास्यनास्तिमृत्योर्भयमिति
युक्तमितोन्यतःप्रपातुं॥ अथमरणमवश्यमेवजंतोःकिमिति
मुधामलिनंयशःक्रियते॥१२॥भट्टनारायणस्य॥अंग्रैःस्वैरपि

संयताग्रचरणोमूर्द्धाभिरामःक्षणेस्वाधीनव्रणितांगशस्त्रनि
चितोरोमोद्गमंवर्णयन्॥भग्नानुद्धूलयन्निजान्परभटान्नाध
र्षयन्निष्ठुरंधन्योधामजयःश्रियःपृथुरणस्तंभेपताकायते॥
॥१३॥वयस्याःक्रोष्टारःप्रतिशृणुतबद्धांजलिरयंकिमप्याकां
क्षामःक्षरतिनयथावीरचरितं॥मृतानामस्माकंभवतिपरव
श्यंवपुरिदंभवद्भिःकर्तव्यंनहिनहिजनाधीनचरणं॥१४॥
श्रीहम्मीरनरेंद्रस्य॥रक्तंनक्तंचरौघःपिबतिवमतिचग्रस्त-
कुंतःशाकुंतःक्रव्यंनव्यंगृहीत्वाप्रणदतिमुदितोमत्तवेताल-
बालः॥क्रीडस्यक्रीडमस्मिन्रुधिरमधुवशात्नूतनानूतनांगी
योगिन्योमांसवेदप्रमुदितमनसःशूरशक्तिंस्तुवंति॥१५॥कवी
श्वरस्य॥कोप्येषखंडितशिराविकसन्मुखश्रीःप्रारब्धतांड
वविधिःसुरकामिनीभिः॥आलोक्यतेनिजकराभिनयानुरू
पाव्यापारितेक्षणनिवेदितसत्वसाराः॥१६॥वादीश्वरकांच
नस्य॥परस्परेणाक्षतयोःप्रहर्त्रोरुत्क्रांतवाय्वोःसमकालमेव॥
अमर्त्यभावेपिकयोश्चिदासीदेकाप्सरःप्रार्थितयोर्विवादः॥
॥१७॥कश्चिद्विषत्खड्गहृतोत्तमांगःसद्योविमानप्रभुतामु
पेत्य॥वामांगसंसक्तसुरांगनःस्वंनृत्यत्कबंधंसमरेददर्श॥१८
॥कालिदासस्यैतौ॥तेक्षत्रियोःकुंडलिनोयुवानःपरस्परंसाय
कवीक्षितांगाः॥कुंभेषुलग्नाःसुषुपुर्गजानांकुचेषुलग्नाइव
कामिनीनां॥१९॥भूरेणुदग्धानवपारिजातमालारजोवासि
तबाहुमध्याः॥गाढंशिवाभिःपरिरभ्यमाणाःसुरांगनाश्लिष्ट
भुजांतरालाः॥२०॥युग्मं॥भगवतोव्यासस्यैतौ॥जन्मेंदोरम
लेकुलेव्यपदिशस्यद्यापिधत्सेगदांमांदुःशासनकोष्णशोणितसु
राक्षीवंरिपुंभाषसे॥दर्पांधोमधुकैटभद्विषिहरावप्युद्धतंचेष्ट
सेमत्त्रासान्नृपशोविहायसमरंपंकेधुनालीयसे॥२१॥भट्टनाराय
णस्य॥हतेभिमन्यौक्रुद्धेनतत्रपार्थेनसंयुगे॥अक्षौहिणीः
सप्तहत्वाहतोराजाजयद्रथः॥२२॥लोहितायतिचादित्येत्वर

माणो धनंजयः ॥ पंचविंशतिसाहस्रान्निजघानमहारथान् ॥२३ रथेभ्यो गजवाजिभ्यः संग्रामे वीरसंकराः ॥ पतिताः पात्यमानाश्वदृश्यंतेर्जुनताडिताः ॥२४॥ पूर्णेशतसहस्रे द्वे पदातीनां नरोत्तमः ॥ प्रजज्वालरणे भीष्मो विधूम इव पावकः ॥२५॥ अकर्णपलितः श्यामो वयसाशीतपंचकः ॥ रणेपर्यचरद्द्रोणो वृद्धः षोडशवर्षवत् ॥२६॥ भगवतो व्यासस्यैते ॥ लक्ष्मणो लघुसंधानो दूरपाती च राघवः ॥ कर्णो दृढप्रहारी च पार्थस्यैते त्रयो गुणाः ॥२७॥ क्षेमेंद्रस्य ॥ न कालस्य न शक्रस्य न विष्णोर्वित्तदस्य च ॥ श्रूयंते तानि कर्माणि यानि युद्धे हनूमतः ॥२८॥ वाल्मीकेः ॥ छिन्नेपि शस्त्रभिन्नेप्यापत्यति तेपि निर्विशेषेपि ॥ हनुमति कृतप्रतिज्ञे दैवमदैवं यमोप्ययमः ॥२९॥ कपोले जानक्याः करिकलभदंतद्युतिमुषि स्मरस्मेरे गंडोड्डमरपुलकं वक्त्रकमलं ॥ मुहुः पश्यन् शृण्वन्रजनिचरसेनाकलकलं जटाजूटग्रंथिं दृढयति रघूणां परिवृढः ॥३०॥ महानाटकस्यैतौ ॥ वीरोसौ किमु वर्ण्यते दशमुखच्छिन्नैः शिरोभिः स्वयं यः पूजास्रजमुत्सुको घटयितुं देवस्य खट्वांगिनः ॥ सूत्रार्थी हरसूत्र कंठभुजगव्याकर्षणायोद्यतः साटोपं प्रथमैः कृतभ्रूकुटिभिः छिन्नांतरे वारितः ॥३१॥ बिल्हणस्य ॥ संतुष्टे तिसृणां पुरामपि रिपौ कंडूलदोर्मंडलीक्रीडाकृत्तपुनःप्ररूढशिरसो वीरस्य लिप्सोर्वरं ॥ याच्ञादैन्यपरांचि यस्य कलहायंते मिथस्त्वं वृणु त्वं वृणीत्यभितो मुखानि स दशग्रीवः कथं वर्ण्यते ॥३२॥ मुरारेः ॥ सलीलपातानि न भर्तुरभ्रमोर्न चित्रमुच्चैः श्रवसः पदक्रमं ॥ अनुद्रुतः संप्रति येन केवलं बलस्य शत्रुः प्रशशंस शीघ्रतां ॥३३॥ माघकवेः ॥ आजन्मब्रह्मचारी पृथुलभुजकलीस्तंभविभ्राजमानो ज्याघातश्रेणिसंज्ञान्तरितवसुमतीचक्रजैत्रप्रशस्तिः ॥ वक्षःपीठे घनास्त्रव्रणकिनकठिने संक्ष्णवानः पृषत्कान्मासोराजन्यगोष्ठीगजवनमृगयाकौतुकी जामदग्न्यः ॥३४॥ मुरारेः ॥ क्षुद्राः संत्रासमेते विजहत हरयो भिन्न

मत्तेभकुंभायुष्मद्देहेषु लज्जांदधतिपरममीसायकानिःपतंतः॥
॥सौमित्रेतिष्ठपात्रंत्वमसिनहिरुषानन्वहंमेघनादःकिंचित्सं
रंभलीलानियमतजलधिंराममन्वेषयामि॥३५॥महानाटका
त्॥सप्तषष्टिर्हताःकोट्योवानराणांतरस्विनां॥पश्चिमेनाह्न
शेषेणमेघनादेनसायकैः॥३६॥वाल्मीकिमुनेः॥भूमात्रंकिय
देतदर्णवमितंतत्साधितंहार्यतेय द्वीरेणभवादृशेनवदतित्रिः
सप्तकृत्वोजयः॥डिंभोऽयंनववाहुरीदृशमिदंघोरंचवीरव्रतंतं
क्रोधाद्विरमप्रसीदभगवन्जात्यैवपूज्योऽसिनः॥३७॥त्रैलो
क्यत्राणशौंडःसरसिजवसतेर्यःप्रसूतोभुजाभ्यांसक्षत्रंना
मवर्णःकुलिशकठिनयोर्यस्यदोष्णोर्विलीनः॥ज्वालाजिह्वा
लकालानलकवलभयभ्रांतदेवासुराणिव्यातन्वानोजगंति
ज्वलतिमुनिरयंपार्वतीधर्मपुत्रः॥३८॥पुरोजन्माऽद्यप्रभृति
ममरामःस्वयमहंनपुत्रःपौत्रोवारघुकुलभुवांचक्षितिभुजां
॥अधीरंधीरंवाकलयतुजनोमामयमयंमयाबध्योदुष्टद्विज
द्मनदीक्षापरिकरः॥३९॥चत्वारोवयमृत्विजःसभगवान्क
र्मोपदेष्टाहरिःसंग्रामाध्वरदीक्षितोनरपतिःपत्नीगृहीतव्रता
॥कौरव्याःपशवःप्रियापरिभवक्लेशोपशांतिःफलंराजन्योपनि
मंत्रणायरसतिस्फीतंयशोदुंदुभिः॥४०॥इतिश्रीवृ॰शार्ङ्गधर
विरचितायांपद्धत्यांवीररसनिर्देशपरिच्छेदः॥छ॥छ॥॥

अथकरुणारसनिर्देशः

यस्याःकुसुमशय्यापिकोमलांग्यारुजाकरी॥साधितेतेकथंदे
वीज्वलंतीमधुनाचिता॥१॥दंडिनः॥गृहिणीसचिवःसखीमि
थः—प्रियसख्याललितेकलाविधौ॥करुणाविमुखेनमृत्युना
हरतात्वांवदकिंनुमेहृतं॥२॥ध्वस्तःकाव्योरुमेरुःकविविपणि
महारत्नराशीविशीर्णःशुष्कःशब्दोच्चसिंधुःप्रलयमुपगतोवा
क्यमाणिक्यकोशः॥दिव्योक्तीनांनिधानंनिधनमुपगतंहाह
तादिव्यवाणीबाणेदूरप्रयाणेप्रणयिनिविधिनाशापितेदीर्घ

निद्रां॥३॥सृजतितावदशेषगुणाकरंपुरुषरत्नमलंकरणंभुवः तदपितत्क्षणभंगिकरोतिचेदहहकष्टमपंडितताविधेः॥४॥सारसवत्ताविगतानवकाविलसंतिचरतिनोकं कः॥सरसीवकीवकीर्तिशेषंगतवतिभुविविक्रमादित्ये॥५॥सुबंधोः॥मांधातासमहीपतिःकृतयुगेलंकारभूतोगतःसेतुर्येनमहोदधौविरचितःक्वासौदशस्यांतकः॥अन्येचापियुधिष्ठिरप्रभृतयोयावंतएवाभवन्नेकेनापिसमंगतावसुमतीमन्येत्वयायास्यति॥६॥मुंजंप्रतिभोजराजस्यलेखः॥भगीरथाद्याःसगरःककुत्स्थोदशाननोराघवलक्ष्मणौच॥युधिष्ठिराद्याश्चबभूवुरेतेसत्यंक्वयाताबततेनरेंद्राः॥७॥व्यासस्य॥उत्पातदैवतमिवापतनंसुरारेरस्तांचलांतरितसूर्यमिवांतरिक्षं॥हम्मीरभूभुजिगतेसुरवेश्मविश्वेपश्यामिहारमिवनायकरत्नशून्यं॥८॥देवेश्वरस्य॥अपिखलुविषमःपुराकृतानांविलसतिजंतुषुकर्म्मणांविपाकः॥हरशिरसिशिरांसियानिरेजुःशिवशिवतानिलुठंतिगृध्रपादे॥९॥मातुलोयस्यगोविंदःपितायस्यधनंजयः॥सोपिकालवशंयातःकालोहिदुरितक्रमः॥१०॥साक्षान्मघवतःपौत्रोपुत्रोगांडीवधन्विनः॥स्वस्त्रीयोवासुदेवस्यतंगृध्राःपर्युपासते॥११॥असहायःसहायार्थीमामनुध्यातवान्ध्रुवं॥पीड्यमानःशरैस्तीक्ष्णैर्द्रोणद्रौणिकृपादिभिः॥१२॥व्यासस्यैते॥अक्षत्रारिकृताभिमन्युदहनप्रोद्भूततीव्रक्रुधः पार्थस्याकृतशात्रवःप्रतिकृतैरंतःशुचामुह्यतः॥कीर्णाबाष्पकणैःपतंतिधनुषिव्रीडाजडादृष्टयोहावत्सेतिगिरःस्फुरंतिनपुनर्निर्यांतिवक्त्राद्बहिः॥१३॥निशानारायणस्य॥कोहंब्रूहिसखेस्वयंसभगवानार्य्यःसकोराघवःकेयूरंबतनाथनाथकिमिदंदासोस्मितेलक्ष्मणः॥कांतारेकिमिहास्महेवतसखेदेव्यागतिर्मृग्यते—कादेवीजनकाधिराजतनयाहाजानकिक्वासिहा॥१४॥महानाटकस्य॥मितंददातिहिपितामितंभ्रातामितंसुताः॥अमितस्यहिदातारंभर्तारंका-

नशोचति॥१५॥ वाल्मीकेः॥ मदेकपुत्राजननीजरातुरानवप्रसूतिर्वरटातपस्विनी॥ गतिस्तयोरेषजनस्तमर्दयन्नहोविधेत्वांकरुणारुणत्विनः॥१६॥ मदर्थसंदेशमृणालमंथरःप्रियःकियद्दूरइतित्वयोदिते॥ विलोकयंत्यारुदतोऽथपक्षिणःप्रियेसकीदृग्भवितानवक्षणः॥१७॥ एतौहर्षस्य॥ मध्यान्हेदववह्निनोष्मसमयेदंदह्यमानंशिरःकृच्छ्रान्निर्गतमुत्तृषंजनमघोवीक्षेकरक्षाक्षमे॥ प्रेम्णाजीवयितुंमिथःपिबपिबेत्युच्चार्यमिथ्यापिबन्निर्गन्धास्यमपीतवारिहरणद्वंद्वंपिबन्नंवने॥१८॥ आद्रायमांसमखिलंस्तनवर्ज्जेमगान्यामुंचवागुरिकयामिकुरुप्रसादं॥ सीदंतिशष्पकवलाननभिज्ञमस्येमन्मार्गवीक्षणपराःशिशवोमदीयाः॥१९॥ सद्यःपुरीपरिसरेऽपिशिरीषमृद्वीगत्वाजवात्त्रिचतुराणिपदानिसीता॥ गंतव्यमस्तिकियदित्यसकृद्ब्रुवाणारामाश्रुणःकृतवतीप्रथमावतारं॥२०॥ अथेदंरक्षोभिःकनकहरिणच्छद्मविधिनातथावृत्तंपापेव्यथयतियथाक्षालितमपि॥ जनस्थानेशून्येकरुणकरुणैरार्यचरितैरपिग्रावारोदित्यपिदलतिवज्रस्यहृदयं॥२१॥ अविशीर्णकांतपात्रेनव्यदशेसुसुखिसंभृतस्नेहे॥ मन्नेहदीपकलिकेकथमुपयाताऽसिनिर्वाणं॥२२॥ यास्यत्यद्यशकुंतलेतिहृदयंसंस्पृष्टमुत्कंठयाअंतर्बाष्पभरोपरोधिगदितंचिंताजडंदर्शनं वैक्लव्यंममतावदीदृशमपिस्नेहादरण्यौकसःपीड्यंतेगृहिणःकथंनुतनयाविश्लेषदुःखैर्नवैः॥२३॥ पांतुनप्रथमंव्यवस्यतिजलंयुष्मास्वसिक्तेषुयामाऽदत्तेप्रियमंडनाऽपिभवतांस्नेहेनयापल्लवं॥ आदौवःकुसुमप्रवृत्तिसमयेयस्याभवत्युत्सवःसेयंयातिशकुंतलापतिगृहंसर्वैरनुज्ञायतां॥२४॥ यस्यत्वयाव्रणविरोहणमिंगुदीनांतैलंन्यषिच्यतमुखेकुशसूचिविद्धे॥ श्यामाकमुष्टिपरिवर्धितकोजहातिसोऽयंनपुत्रकृतकःपदवींमृगस्ते॥२५ अर्थोहिकन्यापरकीयएवतामद्यसंप्रेष्यपरिग्रहीतुः॥ जातोऽ

स्मिसद्योविशदांतरात्माचिरस्यनिक्षेपमिवाऽर्पयित्वा॥२६॥
जातेतिकन्यामहतीहिचिंताकस्मैप्रदेयेतिमहान्वितर्कः॥द
त्तासुखंयास्यतिवानवेतिकन्यापितृत्वंखलुनामनष्टं॥२७॥दै
वेपराग्वदनशालिनिहंतजातेयातेचसंप्रतिदिवंप्रतिबंधुरते
॥कस्मैमनःकथयितासिनिजामवस्थांकःशीतलैःशमयिताव
चनैस्तवाऽऽधिं॥२८॥सर्वेऽपिविस्मृतिपथंविषयाःप्रयाताविद्या
पिखेदकलिताविमुखीबभूव॥साकेवलंहरिणशावकलोचन
मेनेवाऽपयातिहृदयादधिदेवतेव॥२९॥धृत्वापदस्खलनभीति
वशात्करंमेयाऽऽरूढवत्यसिशिलाशकलंविवाहे॥सामांविहा
यकथमद्यविलासिनिद्यामारोहसीतिहृदयंशतधाप्रयाति॥३०
भूमौस्थितारमणनाथमनोहरेतिसंबोधनैर्यमधिरोपितवत्य
सिद्यां॥स्वर्गंगताकथमिवक्षिपसित्वमेणशावाक्षितंधरणिधू
लिषुमासिहानीं॥३१॥ध्रुवंध्वंसोभावीजलनिधिमहीशैलसरि
तामतोमृत्योःशीर्यत्कणलघुषुकाजंतुषुकथा॥तथाऽप्युच्चैर्बं
धुव्यसनजनितःकोऽपिविषमोविवेकप्रोन्माथीदहतिहृदयंशो
कदहनः॥३२॥निकृंततीवमर्माणिदेहंशोषयतीवमे॥दहती
वांतरात्मानंक्रूरःशोकाऽग्निरुत्थितः॥३३॥इतिश्रीवृहच्छार्ङ्ग
धरविरचितायांपद्धत्यांकरुणारसनिर्देशपरिच्छेदः॥ छ ॥छ॥

अथाद्भुतरसनिर्देशः

कृष्णेनांबगतेनरंतुमधुनामृद्भक्षितास्वेच्छयासत्यंकृष्णकिमे
षआहकुशलीमिथ्यांबपश्याननं॥व्यादेहीतिविकासितेचव
दनेदृष्ट्वासमस्तंजगन्मातातत्र जगामविस्मयपदंपायात्स
वःश्रीपतिः॥१॥पातुश्रीणिजगंतिसंततमकूपारात्समभ्युद्धर
न्धात्रींकोलकलेवरःसभगवान्यस्यैकदंष्ट्रांकुरे॥कूर्मःकंदति
नालतिहरिशनःपत्रंतिदिग्दंतिनोमेरुःकोशतिमेदिनीजलजति
व्योमापिरोलंबते॥२॥काकुत्स्थेनशिरांसियानिशतशःछित्वा
निमायानिधेःपौलस्त्यस्यविमानसीमनिनयाभ्रांतानिनाकौ

कस्तां॥नान्येवास्यधनुःश्रमप्रशमनंकुर्वंतिसीतापतेःक्रीडाचामरडंबराणिकृतिभिर्ह्रीलायमानैःकचैः॥३॥बिल्हणस्य॥तस्मिन्युद्धेक्षणेनैवत्वरितोवानरध्वजः॥सरथंसध्वजंसाश्वंभीष्ममंतर्दधेशरैः॥४॥व्यासस्य॥किंक्रमिष्यतिकिलैषवामनोयावदित्यमहसंतदानवाः॥तावदस्यनममौनभस्तलेलंघिताऽर्कशशिमंडलक्रमः॥५॥युगांतकालप्रतिसंहृतात्मनोजगंतियस्यांसविकासमासत॥ततोमनुस्तस्यनकैटभद्विषस्तपोधनाभ्यागमसंभवामुदः॥६॥पश्चात्स्यभागमिहसानुषुसंन्निषण्णःपश्यंतिसांद्रमलसांद्रतरांशुजालं॥संपूर्णलब्धललनालपनोपमानमुत्संगसंगिहरिणस्यहिमांशुमूर्त्तेः॥७॥एते माघस्य॥रत्नभित्तिषुसंक्रांतैःप्रतिबिंबशतैर्वृतः॥ज्ञातोलंकेश्वरःकृच्छ्रादांजनेयेनतत्वतः॥८॥दंडिकवेः॥चतुर्ष्वपिसमुद्रेषुसंध्यामन्वास्यतत्क्षणात्॥कक्षाक्षिप्तंनिशांतेस्वबालिःपौलस्त्यमत्यजत्॥९॥वाल्मीकेः॥किंब्रूमोहरिमस्यविश्वमुदरेकिंवाफणाभोगिनःशेतेयस्यहरिःस्वयंजलनिधेःसोप्येकदेशेस्थितः॥आश्चर्यंकलशोद्भवोमुनिरसौयस्यैकहस्तेंबुधिर्गंडूषीयतिपंकजीयतिफणीभृंगीयतिश्रीपतिः॥१०॥कस्मैकिंकथनीयंकस्यमनःप्रत्ययोभवति॥रमयतिगोपवधूटीकुंजकुटीरेपरंब्रह्म॥११॥आदायचापमचलंकृत्वाहीनंगुणंविषमदृष्टिः॥यश्चित्रमच्युतशरोलक्ष्यमभांक्षीन्नमस्तस्मै॥१२॥चित्रंकनकलतायांशरदिंदुस्तत्रखंजनद्वितयं॥तत्रचमनोजधनुषीतदुपरिगाढांधकाराणि॥१३॥इतिश्रीबृ०शार्ङ्गधरविरचितायांपद्धत्यामद्भुतशृंगारनिर्देशपरिच्छेदः

अथहास्यरसनिर्देशः

पाणौताम्रघटीकुशाःकरतलेधौतेसितेवाससीभालेमृत्तिलकःसचंदनरसान्यस्तैकपुष्पंशिरः॥दूरात्क्षिप्रपदाकृतिर्दृढतरव्याशिष्टदंतागिरःसोयंवंचयितुंजगद्भगवतोदंभस्य

देहक्रमः॥१॥वैराग्यभंगिरचनावचनैःप्रतार्यरंडांचिरायविकसस्तन
सुन्नतांगीं॥ब्रह्मोपदेशमिषसंगतगंडभित्तिर्निःशंकत्तुंबनरसैः
कितवाद्रवंति॥२॥पीठीप्रक्षालनेनक्षितिपतिकथयासज्जना
नांप्रवादैर्नीत्वायामार्धमेवंकुशकुसुमसमारंभणव्यग्रहस्ता
॥पश्चादेतेनि‾मज्जत्सुरयुवतिकुचाभोगदत्तेक्षणाधीःप्रा
णायामोपदेशा दिहसरितिसदालासराणिक्षिपंति॥३॥अंगु
लिभंगविकल्पनविविधविवादप्रवृत्तपांडित्यः॥जयचपलो
ष्टःसजतेध्यानपरोनगररथ्यासु॥४॥मुंडोजटिलोनग्नःक्ष
त्रीदंडीकषायचीरीच॥भस्मस्मेरशरी‾रोदिशिदिशिभो
गीविजृंभतेदंभः॥५॥युग्मं॥क्षेमेंद्रस्य॥जिह्वापाच्छेदिलाः
नास्तिनतालुपतनाद्भयं॥निर्विशेषेणवक्तव्यंनिर्लज्जःकोनपं
डितः॥६॥धन्याकनागरनिशार्द्रकदाडिमत्वक्कुसुंबरील
वणतैलसुसंस्कृतान्नः॥मत्स्यान्नशीतशितभक्तनलेट्दाति
सब्रह्मलोकमधिगच्छतिपुण्यकर्मा॥७॥भृकुटिकुटिलललाटः
कंटकितांगःकटाक्षविकटास्यः॥कवलयतिपृथुलकवलैस्तंदु
लमचलंद्विजःक्रुत्स्यः॥८॥शार्ङ्गधरस्य॥भोजनंप्राप्यदुर्बुद्धे
माप्राणेषुदयांकुरु॥दुर्लभानिपरान्नानिप्राणाजन्मनिजन्मनि
॥९॥क्रयविक्रयकूटतुलालाघवनिक्षेपभक्षणव्याजैः॥एतेहि
दिवसचौरामुष्णंतिमहाजनंवणिजं॥१०॥आख्यायिकानुरागी
व्रजतिसदापुण्यपुस्तकंश्रोतुं॥दृष्ट्वैवकृष्णसर्पैःपलायतेद
नधर्मेभ्यः॥११॥दत्वादिशिदिशिदृष्टिंयाचकचकितोवगुंठतां
कृत्वा॥चौरइववकुटिलचारीपलायतेकुटिलरथ्याभिः॥१२॥ए
तेक्षेमेंद्रस्य॥वैद्यनाथनमस्तुभ्यंक्षपिताशेषमानव॥त्वयि
विन्यस्तभारोयंकृतांतःसुखमेधते॥१३॥सत्कोणलोलनेत्र
कुलयुवतिमुखंदृश्यतेसानुकंपैरंडानामार्धलज्जांचितमधि
पुलकंस्पृश्यतेपीनमंगं॥क्लीबानांखाद्यतेंतश्चिरनिहितध
नंकाष्ठमूलाग्नितोयैःपूर्वासिद्धांकलानांसकलसुखनिधिर्वैद्य

विद्याभिर्वेद्यां॥१४॥गणयतिगगनेगणकश्चंद्रेणसमागमंविशाखायाः॥विविधभुजंगक्रीडासक्तांगृहिणींनजानाति॥१५॥कलशाग्रनिर्गतसखीबिंदुव्याजेनसांजनाश्रुकणा॥कायस्थेलुंठ्यमानारोदितिखिन्नेवराज्यश्रीः॥१६॥क्षेमेंद्रस्य॥वाचयतिनान्यलिखितंलिखितमनेनापिवाचयतिनान्यः॥अयमपरोस्यविशेषस्वयमपिलिखितंस्वयंनवाचयति॥१७॥कायस्थेनोदरस्थेनमातुरामिषशंकया॥आंत्राणियन्नभुक्तानितन्नहेतुरदंतता॥ काकाल्लौल्यंयमात्क्रौर्यंस्थपतेर्दृढघातितां॥आद्यक्षराणिसंगृह्यकायस्थःकेननिर्मितः॥१९॥पुरीषस्यचरोषस्यहिंसायास्तस्करस्यच॥आद्यक्षराणिसंगृह्यवेधाश्चक्रेपुरोहितं॥२०॥रामेश्वरमैथिलस्य॥विनामयंविनामंसंपरस्वहरणंविना॥विनापरापवादेनहिविरोदितिरोदिति॥॥२१॥कस्यापि॥अर्थोनामजनानांजीवतिमखिलःक्रियाकलापश्च॥तंसंचरंस्पिधूर्ताश्छगलगलागायनालोके॥२२॥तमसिवराकश्चौरोहाहाकारेणयातिसंत्रस्तः॥गायनचौरःकपटीहाहाकृत्वानयातिलक्ष्यंच॥२३॥आमंत्रणयजशब्दैःप्रतिपादहुंकारघर्घराराविः॥स्वयमुक्तसाधुवादैरंतरयतिगायनोगानं॥२४॥एतेक्षेमेंद्रस्य॥मेरुःस्थितोतिदूरेमनुष्यभूमिंपरांपरित्यज्य॥भीतोभयेनचौर्याद्धोराणांहेमकाराणां॥२५॥तस्मान्महीपतीनामसंभवेदस्युचौराणां॥एकःसुवर्णकारोनिर्ग्राह्यःसर्वदानित्यं॥२६॥क्षेमेंद्रस्यैतौ॥उपयुक्तखदिरवीटकजनिताधररागभंगभयात्॥पितरिमृतेपिहिवेश्यारोदितिहाताततताततेति॥२७॥पूर्वंचेटीततोवेटीपश्चाद्भवतिकुट्टिनी॥सर्वोपायपरिभ्रष्टावेश्याभवतितापसी॥२८॥वर्णनदयितःकश्चिद्धनदयितोदासकर्मदयितोन्यः॥रक्षादयितश्चान्योवेश्यानांनर्मदयितोन्यः॥२९॥गत्वाहारवतीनयामिदिवसानाराध्ययंतीहरिंदृष्ट्वानशनेनजीवितमिदंमुंचामिभागीर

थीं।।प्रातःप्रातरितिप्रवर्ततिकथानिर्वेदमातन्वतीरंडानक्रमतंगजारस्फुरनप्रीतासुखायास्तुवः।।३०।।कटीमुष्टिग्राह्याहिपुरुषभुजग्राह्यमुदरंस्तनौजंघालोलौजघनमधिगंतुंव्यवसितौ।।स्मितंभेरीनादंमुखमपिवयस्तेभयकरंतथाप्येषारंडापरिभवतिसंतापयतिच।।३१।।कयोरप्येतौ।।यंत्रोत्थायनमात्रनिःसहजरच्चर्मावशेषश्लथग्रस्यच्छेपसिदुर्बलांगचलनव्यथौसुमालिंगने।।लज्जाधायिनिरिवद्यमानसुवतोवृद्धस्यक्षुद्रेरतेयत्स्यात्तत्प्रतिभाव्यकिंनहसितुंयुक्तंकिमारोदितुं।।३२।।खट्वानितांतलघुकाशिथिलप्रतानाद्वेष्यःपतिःसचनिरंतरचाटुकारी।।तत्रापिदेवहतिकाःखलुभोदराग्न्योह्लासत्यतांकथमसंव्यसनप्रपंचः।।३३।।शृणुसखिकौतुकमेकंग्राम्येणकामिनायदद्यकृतं।।सुरतसुखनिमीलिताक्षीमृतेनभीतेनमुक्तास्मि।।३४।।पदक्षिभ्रूलतापांगैःस्त्रियःकुर्वंतिकामिनां।।जघनेष्वेवतत्सर्वंपतत्सनपराधिषु।।३५।।केशलुंचनसाम्येपिहंतपश्येतदंतरं।।उपस्याःकीटमश्नंतिघृतभक्तंदिगंबराः।।३६।।भिक्षोमांसनिषेवणंप्रकुरुषेकिंतेनमद्यंविनामद्यंचापितवप्रियंप्रियमहोवारांगनाभिःसह।।वेश्याद्रव्यरुचिःकुतस्तवधनंद्यूतेनचौर्येणवाद्यूतंचौर्यपरिग्रहोपिभवतोनष्टस्यकान्यागतिः।।३७।।सामगायनपूतंमेनोच्छिष्टमधरंकुरु।।उत्कंठितासिचेद्भद्रेवामकर्णदृशास्वमे।।३८।।भस्मांगुलिर्वकोप्राप्तीबालशोचीतथाहिही।।धारावर्तीचक्रवर्तीषडेतेपुरुषाधमाः।।३९।।प्रेषिकःप्रैषिकःकोडःकिमेकस्तंभलीनकः।।योगीतत्कालरोगीचषडेतेसेवकाधमाः।।४०।।अत्तुंवांछतिवाहनंगणपतेराखुंक्षुधार्तःफणीतंचक्रौंचपतेःशिखीचगिरिजासिंहोऽपिनागाननं।।गौरीजह्नुसुतामसूयतिकलानाथंकपालाऽनलोनिर्विण्णःसपपौकुटुंबकलहादीशोऽपिहालाहलं।।४१।।दृष्ट्वाषडाननजनुर्मुदितांऽतरेणपंचाननेनसहसाचतुराननाय।।शार्दूलचर्मभुजगाभर

णंसभस्मदत्तंनिशम्यगिरिजाहसितंपुनातु॥४२॥रामायाच
यमेदिनींधनपतेर्बीजंबलाल्लांगलंप्रेतेशान्महिषंतवाऽस्तिवृ
षभःफालंत्रिशूलादपि॥शक्ताऽहंतवचान्नदानकरणेस्कंदोऽ
स्तिगोरक्षणेखिन्नाऽहंतवयाचनात्कुरुकृषिंभिक्षाटनंमाकृ
थाः॥४३॥विष्णोश्चाऽगमनंनिशम्यसहसाकृत्वाफणींद्रंगु
णंकौपीनंपरिधायचर्मकरिणःशंभुःपुरोधावति॥दृष्ट्वाविष्णु
रथंसकंपहृदयःसर्पोऽपतद्भूतलेकृत्तिर्विस्खलिताह्रियानत
मुखोनग्नोहरःपातुवः॥४४॥उदरद्वयभरणभयादर्धांगीकृत
स्मरः॥यदिनैवंतस्यैकस्सुतःकथमद्याऽपिकुमारः॥४५॥किं
गोत्रंकिमुजीवनंकिंसुधनंकाजन्मभूःकिंवयःकिंचारित्र्यमसु
व्यकेसहचराःकेवंशजाःप्राक्तनाः॥कामाताजनकःशिव
स्यकइतिप्रश्नेणपृथ्वीभृतापृष्टाःसस्मितनम्रमूकवदनाःस
प्तर्षयःपांतुवः॥४६॥भस्मांऽधोरगफूत्कृतिस्फुटभवज्ज्वालस्य
वैश्वानरज्वालाखिन्नसुधांशुमंडलगलत्पीयूषधारारसैः।ऽ
संजीवद्गजचर्मगर्जितभयभ्राम्यद्वृषाऽऽकर्षणव्यासक्तःसहसा
ऽद्रिजोपहसितोनग्नोहरःपातुवः॥४७॥हेहेरंबकिमंबरोदिषि
कथंकर्णौलुठत्यग्निभूःकिंतेस्कंदविचेष्टितंममपुरासंख्याकृ
ताचक्षुषां॥नैतत्तेह्युचितंगजाऽऽस्यचरितंनासाप्रमीताचमेता
येवंसहसाविलोक्यहसितव्यग्राशिवापातुवः॥४८॥कृष्णोगो
रसचौर्यमंबकुरुतेकिंकृष्णमातःसुरापानेनप्रकरोमिरामकि
मिदंनाऽहंपरस्त्रीरतः॥किंगोविंदवदस्यसोहलधरोमिथ्येति
तांव्याहरन्गोपीगोपकदंबकंविहसयन्मुग्धोमुकुंदोऽवतु॥ऽ
॥४९॥चितांप्रज्वलितांदृष्ट्वावैद्योविस्मयमागतः॥नाऽहंगतोन
मेभ्राताकस्येदंहस्तलाघवं॥५०॥इतिश्रीबृहच्छार्ङ्गधरविरचि
तायांपद्धत्यांहास्यरसनिर्देशपरिच्छेदः॥ * ॥ * ॥ * ॥

अथभयानकरसनिर्देशः

दीप्तक्षुद्दृग्योगाद्दहनलहलहल्लंबजिह्वाग्रलीढब्रह्मब्रह्मांडविं

दुःप्रबलतरभवज्जाठराग्निस्फुलिंगा॥कालींकंकालशेषामतुलगलचलन्मुंडमालाकरालांगुंजासंवादिनेत्रामजिननिवसिनींनौमिपाशासिहस्तां॥१॥शार्ङ्गधरस्य॥दंष्ट्रासंकटवक्त्रकंदरलल्लज्जिह्वास्यहव्यासनज्वालाभासुरभूरिकेसरसटाभारस्यदैत्यद्रुहः॥व्यावल्गद्बहलबर्हिरण्यकशिपुक्रोडस्थलास्फालनसृष्टप्रस्फुटदस्थिपंजरखराःक्रूरानखाःपांतुवः॥२॥हनूमतः॥अत्राघुन्मदयातुधानतरुणीचंचत्करास्फालनव्यावल्गन्नृकपालतालरणितैर्नृत्यत्पिशाचांगनाः॥उद्गायंतियशांसियस्यविततैर्नादैःप्रचंडानिलप्रक्षुभ्यत्करिकुंभकूटकुहरव्यक्तारणक्षोणयः॥३॥कृष्णमिश्रस्य॥इदंमघोनःकुलिशंधरासंनिहितानलं॥स्मरणंयस्यदैत्यस्त्रीगर्भपातायकेवलं॥४॥दंडिनः॥ततःपरामर्शविरूढमन्योर्भ्रूभंगदुःप्रेक्ष्यमुखस्यतस्य॥स्फुरंतुदर्च्चिःसहसातृतीयादक्ष्णःकृशानुःकिलनिःपपात॥५॥कालिदासस्य॥किंचित्कोपकलाकलापकलनाहुंकारबिभ्रद्भुवोर्विक्षेपादकरोद्सौरघुपतिर्लंकापतेःपत्तनं॥क्रंदत्फेरुरटत्करेणुविचलद्धारुस्फुटद्गुग्गुलप्रक्रीडत्कपिनिःश्वसत्फणिरणज्झिल्लिभ्रमद्द्वीपिच॥६॥वररुचेः॥प्रोढच्छेदानुरूपोच्छलनरयभववशात्सैंहिकेयोपमेयंत्रासान्नष्टाश्वतिर्यक्वलितरविरथेनारुणेनेक्ष्यमाणं॥कुर्वन्काकुत्स्थवीर्यस्तुतिमिहमरुतांकंधरारंध्रभाजांभांकारैर्भीतमेतन्निपतत्तिवियतःकुंभकर्णोत्तमांगं॥७॥यशोवर्मणः॥माद्यन्मातंगकुंभस्थलवसनवशावासनामिश्रगंधव्यासक्तव्यक्तमुक्ताफलसकलसत्केसरालीकरालः॥एणीवैधव्यवेधाःस्व–भुजबलमदग्रस्ततेजस्विधामागुंजत्कुंजेगिरीणांहरिरिहशबरीगर्भपातंविधत्ते॥८॥भट्टयशसः॥महाप्रलयमारुतक्षुभितपुष्करावर्तकप्रचंडघनगर्जितप्रतिरवानुकारीमुहुः॥रवःश्रवणभैरवस्थगितरोदसीकंदरःकुतोद्यसमरोदधेरयंमभूतपूर्वोरवः॥९॥मंथायस्तार्णवांभःप्रतिकुहरलघुर्घर्घराध्वान

धीरःकोणाघातेषुगर्ज्जत्प्रलयघनघटान्योन्यसंघट्टचंडः॥ कृष्ण क्रोधाग्रदूतःकुरुशतनिधनोत्पत्तिनिर्घातवातःकेनास्मत्सिंहनादःप्रतिरसितसखोदुंदुभि स्ताडितोयं॥१०॥ग्रीवाभंगाऽभिरामंमुहुरनुपपतिस्यंदनेदत्तदृष्टिःपश्चार्धेनप्रविष्टःशरपतनभयाद्भूयसापूर्वकायं॥दर्भैरर्धाऽवलीढैःश्रमविवृतमुखभ्रंशिभिःकीर्णवर्त्मापश्योदग्रप्लुतत्वाद्वियतिबहुतरंस्तोकमुर्व्यांप्रयाति॥११॥निर्मज्जच्चक्षुरंतर्भ्रमदतिकपिलक्रूरतारानराऽस्थिग्रंथिंदंतांऽतरालग्रथितमविरतंजिह्वयाघट्टयंती॥ध्वान्तेऽपिव्यात्तवक्त्रज्वलदनलशिखाजर्जरेव्यक्तकर्मानिर्मांतीगृध्ररौद्रींदिवमुपरिपरिक्रीडतेताडकेयं॥१२॥ अंत्राऽऽकल्पचलत्पयोधरभरव्याविद्धमेघच्छटासृक्कस्थामिषगृध्नुगृध्रगरुदास्फालोच्चलन्मूर्धजा॥ व्यादायाननमट्टहासविकटंदूरेणतारापथात्त्रस्यत्सिद्धपुरंध्रिवृंदरभसोन्मुक्तादुपक्रामति॥१३॥ इतिश्रीबृहच्छार्ङ्गधरविरचितायांपद्धत्यांभयानकरसनिर्देशपरिच्छेदः॥७॥७॥

अथबीभत्सरसनिर्देशः

उत्कृत्योत्कृत्यकृत्तिंप्रथममथपृथूक्षोभभूयांसिमांसान्यंशस्फिक्पृष्ठपिंडाद्यवयवसुलभान्युग्रपातीनिजग्ध्वा॥अंतस्ताघंत्रनेत्रात्प्रकटितदशनःप्रेतरंकःकरंकादंकस्थादस्थिसंस्थंस्थपुटगतमपिक्रव्यमव्यग्रमत्ति॥१॥भवभूतेः॥अंत्रैःकल्पितमंगलप्रतिसराःस्त्रीहस्तरक्तोत्पलव्यक्तोत्तंसभृतःपिनह्यसरसाल्हत्पुंडरीकस्रजः॥तत्तच्छोणितपंककुंकुमजुषःसंभूयकांतैःपिबत्यस्थिस्नेहसुराःकपालचषकैःप्रेतापिशाचांगनाः॥२॥उत्कृत्यज्वलितांशवालकयमपिप्रेतासनःपैशिनीपैशीमग्निमयीनिगीर्यसहसादंदह्यमानोदरः॥धावत्युत्प्लवतेमुहुर्निपततिप्रोत्तिष्ठतिप्रेक्षतेविष्वक्क्रोशतिसंपिनष्टिजठरंमुष्ट्याचलन्मस्तकः॥३॥कस्यापि॥विकीर्णहरिचंदनद्रविणपत्रांलीलालसांनिपेतुरलिचंचलाश्चतुरकामिनीहृदयः॥तदेतदुप

रिभ्रमन्निबिडगृध्रजालंजनैर्लुठन्कृमिकलेवरंपिहितनासिकैर्वीक्ष्यते॥४॥ इन्दुकवेः॥ प्रस्वेदमलदिग्धेनवहतामूत्रशोणितं॥ व्रणेनविकृतेनेदंसर्वमंधीकृतंजगत्॥५॥ अंत्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कंकणप्रायप्रेंखितभूरिभूषणरवैराभूषयत्यंबरं॥ पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लल॰द्व्यालोलस्तनभारभैरववपुर्दर्पोद्धतंधावति॥६॥ रक्तंनक्तंचरौघैःपिबतिचवमतिव्यग्रकुंतःशाकुंतःकव्यंनव्यंगृहीत्वाप्रपादतिमुदितोमत्तवेतालबालः॥ क्रीडत्सक्रीडमस्मिन्नरुधिरमधुवशात्सूतनानृतनांगीयोगिन्योमांसमेदःप्रमुदितमनसःशूरशक्तिंस्तुवंति॥७॥ इतिश्रीबृहच्छा॰बीभत्सरसनिर्देशप॰

अथरौद्ररसनिर्देशः

पातालतःकिमुसुधारसमानयामि निष्पीड्यचंद्रममृतंकिमुवाहरामि॥ उद्यंतमद्यतपनंकिमुवारयामिकीनाशमाशुकपाशःकिमुचूर्णयामि॥१॥ महानाटकस्य॥ यत्सत्यव्रतभंगभीतमनसायत्नेनमंदीकृतंयद्विस्मर्तुमपीहितंशमवताशांतिंकुलस्येच्छया॥ तद्द्यूतारणिसंभृतंनृपसुताकेशांबराकर्षणैःक्रोधज्योतिरिदंमहत्कुरुकुलेयौधिष्ठिरंजृंभते॥२॥ नारायणभट्टस्य॥ सरोषदष्टाधरलोहितास्यैर्व्यक्तोर्ध्वरेखाभृकुटीवहद्भिः॥ तस्तारगोभल्लनिकृत्तकंठैर्हुंकारगर्भैर्द्विषतांशिरोभिः॥३॥ कालिदासस्य॥ येनस्वांविनिहत्यमातरमपिक्षत्रास्रपूरासवास्वादोन्मतपरश्वधेनविदधेनिःक्षत्रियामेदिनी॥ यद्बाणव्रणवर्त्मनःशिखरिणःक्रौंचस्यहंसःकुलाद्याप्यस्तिकृणाःपतंतिसपुनःक्रुद्धोमुनिर्भार्गवः॥४॥ त्रैलोक्यत्राणशौंडःसरसिजवसतेःसंप्रसूतोभुजाभ्यांसुक्षत्रंनामवर्णैःकुलिशकठिनयोर्यस्यदोष्णोर्विलीनं॥ ज्वालालिज्वालकालानलकवलभयभ्रांतदेवासुराणिव्यातन्वानोजगंतिज्वलितमुनिरयंपार्वतीधर्मपुत्रः॥५॥ एतौमुरारेः॥ चंचद्भुजभ्रमितचंडगदाभिघातसंचूर्णितोरु

गलस्यसुयोधनस्य॥ स्त्यानावनद्धघनशोणितशोणपाणिरुत्तं
सयिष्यतिकचांस्तवदेविभीमः॥६॥ अन्योन्यास्फालभिन्नद्वि
परुधिरवशासांद्रमस्तिष्कपंकेमग्नानांस्यंदनानामुपरिकृत
पदन्यासविक्रांतपत्तौ॥ स्फीतासृक्पानगोष्ठीरसदशिवा
तूर्यनृत्यत्कबंधेसंग्रामैकार्णवांतःप्रविचरतुमलं पंडिताःपांडु
पुत्राः॥७॥ एतौनारायणभट्टस्य॥ रेधृष्टाधार्तराष्ट्राः प्रबलभु
जरुहत्तांडवाः पांडवारेरेवार्ष्णेयाः सकृष्णाः शृणुतममवचो
यद्ब्रवीम्यूर्ध्वबाहुः॥ एतस्योत्खातबाहोर्द्रुपदनृपसुतातापि
नः पापिनोहंपातात्तच्छोणितानांप्रभवतियदिवस्तत्किमेवं न
पार्थः॥८॥ नाहंरक्षोनभूतंरिपुरुधिरजलाल्हादितांगःप्रकाशं
निस्तीर्णोत्तुप्रतिज्ञाजलनिधिगहनःक्रोधनक्षत्रियोस्मि॥ भो॰
भोराजन्यवीराः समरशिखिशिखाभुक्तशेषाःकृतंव स्त्रासेना
नेनलीनैर्हतकरितुरगांतर्हितैरास्यतेयत्॥९॥ मयूरराजस्य॥
राज्ञोमानधनस्यकार्मुकभृतोदुर्योधनस्याऽग्रतःप्रत्यक्षंकुरुबां
धवस्यचतथाकर्णस्यशल्यस्यच॥ पीतंतस्यमयाद्यपांडववधू
केशांबराऽऽकर्षिणःकोष्णंजीवतएवतीक्ष्णकरजक्षुण्णादसृ
ग्वक्षसः॥१०॥ स्पृष्टायेनशिरोरुहेनृपपशुनापांचालराजात्मजा
येनाऽस्याःपरिधानमप्यपहृतंराज्ञांकुरूणांपुरः॥ यस्योरःस्थ
लशोणितासवमहंपातुंप्रतिज्ञातवान्सोऽयंमद्भुजपंजरेनि
पतितःसंरक्ष्यतांकौरवाः॥११॥ योयःशस्त्रंबिभर्तिस्वभुजगुरु
मदःपांडवीनांचमूनांयोयःपांचालगोत्रेशिशुरधिकवयाग॰
र्भशय्यांगतोवा॥ योयस्तत्कर्मसाक्षीचरतिमयिरणेयश्चय॰
श्चप्रतीपःक्रोधांऽधस्तस्यतस्यस्वयमिहजगतामंतकस्याऽत
कोऽहं॥१२॥ इतिश्रीवृ॰शा॰वि॰प॰रौद्ररसनिर्देशपरिच्छेदः॥

अथशांतरसनिर्देशः

॥तत्रपूर्ववैराग्यं॥ पुत्रमित्रकलत्रेषुसक्ताःसीदंतिजंतवः॥स
रःपंकांतरेमग्नाजीर्णावनगजाइव॥१॥ मार्कंडेयपुराणे॥

मन्येमायेयमाज्ञानंयत्सुकंस्वजनादपि।।निदाघवारणायालं
निलच्छायानकस्यचित्।।२।।विपत्सुशांत्यैसेव्यंतेयदिकष्टे
नभृभूतः।।तत्करिष्यतिकष्टापिविपत्किमधिकंततः।।३।।मितम
सुर्व्येयोनित्यंनैतिपातंकदाचन।।परामृशंतिनदपिनभवंभोग
लोलुपाः।।४।।केषामप्येते।।व्याघ्रीवतिष्ठतिजरापरितर्जयंती
रोगाश्चशत्रवइवप्रहरंतिनित्यं।।आयुःपरिस्रवतिभिन्नघटादि
वांभोलोकस्तथाप्यहितमाचरतीतिचित्रं।।५।।क्षणंबालोभूत्वा
क्षणमपियुवाकामरसिकःक्षणंवित्तैर्हीनःक्षणमपिचसंपूर्ण
विभवः।।जराजीर्णैरंगैर्नटइवमशीमंडिततनुर्नरःसंसारां
केविशतियमधानीयमनिकां।।६।।मातर्मेदिनितातमारुतस
खेज्योतिश्चबंधोजलभ्रातर्व्योमनिबद्धएषभवतामंत्यःप्रण
मांजलिः।।युष्मत्संगरसोपजातसुकृतोद्रेकःस्फुरन्निर्मलज्ञा
नापास्तसमस्तमोहमहिमालीयेपरब्रह्मणि।।७।।किंकंदर्प
परंकदर्थयसिरेकोदंडटंकारितैरेरे कोकिलकोमलंकलरवंकिं
त्वंमुधावल्लासि।।मुग्धेस्निग्धविदग्धमुग्धमधुरैर्लोलैःकटाक्षै
रलंचेतश्चुंबितचंद्रचूडचरणध्यानामृतंवर्तते।।८।।एतेभर्तृह
रेः।।भूःपर्यंकोनिजभुजलताकंदुकंखंवितानंदीपश्चंद्रोविरति
वनितालब्धयोगप्रमोदः।।दिक्कन्यानांव्यजनपवनैर्वीज्यमानो
नुकूलेभिक्षुःशेतेनृपइवसदावीतरागोजितात्मा।।९।।क्वचित्कं
थाधारीक्वचिदपिचदिव्यांबरधरःक्वचिद्भूमीशय्यःक्वचिदपि
चपर्यंकशयनः।।क्वचिद्भिक्षावृत्तिःक्वचिदपिचमिष्टान्नरुचि
र्महात्मायोगज्ञोनगणयतिदुःखंनचसुखं।।१०।।भर्तृहरेः।।पाषा
णखंडेष्वपिरत्नबुद्धिः— कांतेतिधीःशोणितमांसपिंडे।।पंचात्म
केवर्त्मनिचात्मभावोजयत्यसौकाचनमोहलीला।।११।।श्रीगो
पालदेवानां।।निःस्नेहोयातिनिर्वाणंस्नेहोनर्थस्यकारणं।।निःस्ने
हेनप्रदीपेनयदेतत्प्रकटीकृतं।।१२।।श्रीदामोदरदेवानां।।अहो
वाहारेवाबलवतिरिपौवासुहृदिवामणौवालोष्ठेवाकुसुमशय

नेवादृषदिवा।।तृणेवास्त्रैणेवाममसमदृशोयांतुदिवसाःक्व
चित्पुण्यारण्येशिवशिवशिवेतिप्रल पतः।।१३।।आशानामनदी
मनोरथजलातृष्णातरंगाकुलारागग्राहवतीवितर्कविहगाधैर्य
द्रुमध्वंसिनी।।मोहावर्तसुदुस्तरातिगहनाप्रोत्तुंगचिंतातटीत॰
स्याःपारगताविशुद्धमनसोनंदंतियोगीश्वराः।।१४।।अशीमहीव
यंभिक्षामाशावासोवशीमहि।।शयीमहिमहीपृष्ठेकुर्वीमहिकि
मीश्वरैः।।१५।। आसंसारात्रिभुवनमिदंचेत्यतांतातभावानोवा
स्माकंनयनपदवींश्रोत्रवर्त्मागतोवा।।योयंधत्तेविषयकरिणी॰
गाढगूढाभिमानक्षीबःस्यांतःकरणकरिणःसंयमालानलीलां।।
।।१६।।एतेभर्तृहरेः।।एषांवल्लभयासहक्षणमपिक्षिप्तंक्षपाक्षी
यतेतेषांशीतकरःशशीविरहिणामुल्केवसंतापकृत्।।अस्मा
कंतुनवल्लभानविरहस्तेनोभयभ्रंशिनामिंदूराजतिदर्पणाकृति
रसौनोष्णोनवाशीतलः।।१७।।भोजराजचोरकविकृतपद्यं।।दै
न्यंक्वचित्क्वचनमन्मथजाविकाराःकुत्रा प्यनेकविधबंधुजनप्र
पंचः।।क्वापिप्रभुत्वधनकल्पितमीश्वरत्वमित्थंकवेकृतमिदंज
गद्विभाति।।१८।।श्रीवत्सराजदेवानां।।गतास्तातभ्रातृप्रमुख
सुखपीयूषमधुराःपुरालक्ष्मीःक्लैव्यव्यवसनरसास्तेपिदिवसाः
।।अदःश्रांतेस्वांतंसपदियदिनिर्वेदपदवींभजत्याभासोयंजन
यतिसुखंभावविमुखं।।१९।।श्रीराघवदेवानां।।धावंतःप्रति वा
सरंदिशिदिशिप्रत्याशयासंपदांदृष्ट्वाकालवशेनहंतफलितं
कस्यापिदेवद्रुमं।।आवंध्यावमवद्ययोपवसितंसर्वत्रभग्नोद्य॰
माजीवामःपरमार्थशून्यहृदयास्तृष्णापनोमोदकैः।।२०।।श्रीदा
मोदरदेवानां।।संत्येकेधनलोभमात्रगहनव्यामोहसंमूर्छिताः
केचिद्दैवतसुंदरीस्तनपरीरंभभ्रमव्याकुलाः।।अंतर्भूतसमस्तत
त्वनिवहंचिन्मात्रशेषंशिवंदृष्ट्वात्हृष्टतनूरुहांकुरभराःकष्टान
शिष्टाःक्वचित्।।२१।।श्रीदेवदासदेवानां।। देवदासोदेवगणः।।॰
गतःकामकथोन्मादोगलितोयौवनज्वरः।।गतोमोहश्च्युतातृष्णा

कृतंपुण्याऽश्रमेमनः॥२२॥ वनान्यमूनिनगृहाण्येतानद्योनयोषितः॥ गृहाइमेनदायादास्तन्मेनंदतिमानसं॥२३॥ शांतिंकंथालसत्कंठोमनःस्थालीमिलत्करः॥ त्रिपुरारिपुरद्वारिकदाऽहंमोक्षभिक्षुकः॥२४॥ संध्यावंदनभद्रमस्तुभवतेभोस्नानतुभ्यंनमोभोदेवाःपितरश्चतर्पणविधौनाऽहंक्षमःक्षम्यतां॥ यत्रक्काऽपिनिषद्ययादवकुलोत्तंसस्यकेसद्विषःस्मारंस्मारमघंहरामितदलंमन्येकिमन्येनमे॥२५॥ अतिक्रांतःकालोलुलितललनाभोगसुखदोभ्रमंतःशांताःस्मःसुचिरमिहसंसारसरणौ॥ इदानींस्वःसिंधोस्तटभुविसमाक्रंदनगिरःसुतारैःफूत्कारैःशिवशिवशिवेतिप्रतनुमः॥२६॥ उद्घाटितनवद्वारेपंजरेविहगोऽनिलः॥यत्तिष्ठतितदाश्चर्यंप्रयाणेविस्मयःकुतः॥२७॥ एणाक्षीस्पृहयालुतानकथमप्यास्तेविवेकोदयान्नित्यंप्रच्युतिशंकयाक्षणमपिस्वर्गेनमोदामहे॥ अप्यन्येषुविनाशिभोगविषयाभोगेषुतृष्णानमेस्वर्णद्याःपुलिनेपरंहरिपदध्यानंमनोवांछति॥२८॥ ॐकारेसत्प्रदीपेमृगयगृहपतिंसूक्ष्ममेवांऽतरस्थंसंयम्यद्वारबाह्यंपवनमविरतंनायकंचेंद्रियाणां॥ वाग्जालंकस्यहेतोर्विरचयसिगिराहश्यतेनैवकिंचिद्देहस्थंपश्यनाथंभ्रमसिकिमपरंशास्त्रमोहांऽधकारे॥२९॥ कामक्रोधग्राहवतींपंचेंद्रियजलांनदीं॥ नावंधृतिमयींकृत्वाजन्मदुर्गाणिसंतर॥३०॥ वपुःकुब्जीभूतंगतिरपितथायष्टिशरणाविशीर्णादंतालिःश्रवणविकलंश्रोत्रयुगलं॥ शिरःशुक्लंचक्षुस्तिमिरपटलैरावृतमहोमनोमेनिर्लज्जंतदपिविषयेभ्यःस्पृहयति॥३१॥ समारंभाभग्नाःकतिकतिनवारांस्तवपशोपिपासोस्तुच्छेऽस्मिन्द्रविणमृगतृष्णाऽर्णवजले॥ तथाऽपिप्रत्याशाविरमतिनतेमूढशतधानशीर्णंयच्चेतोनियतमशनिग्रावघटितं॥३२॥ अजानन्दाहाऽर्तिंपततिशलभोदीपदहनंसमीनोप्यज्ञानाद्बडिशयुतमश्नातिपिशितं॥विजानंतोप्येतेवयमिहविपज्जालजटिलान्नमुंचामःकामा

नहहगहनोमोहमहिमा॥३३॥कदाभिक्षाभक्तैःकरकलितगं
गांबुतरलैःशरीरंमेस्थास्यत्युपरतसमस्तेंद्रियसुखं॥कदाप्र
ह्लाभ्यासस्थिरतनुतयाऽरण्यविहगाःपतिष्यंतिस्थाणुभ्रमहत
धियःस्कंधशिरसि॥३४॥समाश्लिष्यत्युच्चैर्घनपिशितपिंडंस्त
नधियासुखंलालाकीर्णंपिबतिचषकंसाऽसवमिव॥अमेध्यऽ
क्लेदाऽर्द्रेपथिचरमतेस्पर्शरसिकोमहामोहांधानांकिमिहरम
णीयंनभवति॥३५॥मातर्मायेभगिनिकुमतेहेपितर्मोहजालव्या
वर्तध्वंभवतुभवतामेषदीर्घोवियोगः॥सद्योलक्ष्मीरमणचरण
भ्रष्टगंगाप्रवाहव्यामिश्रायांदृषदिपरमब्रह्मदृष्टिर्भवामि॥३६
मातर्मेदिनिनाततमारुतसखेज्योतिःसुबंधोजलभ्रातर्व्योमनिब
द्धएषभवतामंत्यःप्रणामांजलिः॥युष्मत्संगवशोपजातसुकृतो
द्रेकस्फुरन्निर्मलज्ञानाऽपास्तसमस्तमोहमहिमालीयेपरेब्रह्मणि
॥३७॥महाशय्याभूमिर्मस्तृणसुपधानंभुजलताबितानंचाऽऽ
काशंव्यजनमनुकूलोऽयमनिलः॥स्फुरच्चंद्रोदीपःस्वधृतिवनि
तासंगमुदितःसुखंशांतःशेतेविगतभवभीतिर्नृपइव॥३८॥नि
र्विवेकतयाबाल्यंकोपोन्मादेनयौवनंष्टहृत्वं विकलत्वेनसदाऽ
सोपद्रवंनृणां॥३९॥प्रातर्मूत्रपुरीषाभ्यांमध्याह्नेक्षुत्पिपासया
॥तृष्णाकामेनबाध्यंतेप्राणिनोनिशिनिद्रया॥४०॥गतसारेऽत्र
संसारेसुखभ्रांतिःशरीरिणां॥लालापानमिवांऽगुष्ठेबालानांऽ
स्तन्यविभ्रमः॥४१॥दिनमेकंशशीपूर्णःक्षीणस्तुबहुवासरान्
॥सुखाद्दुःखंसुराणामप्यधिकंकाकथानृणां॥४२॥किंनिःशंकं
शेषेशेषेवयसःसमागतोमृत्युः॥अथवासुखंशयीथानिकटेजा
गर्तिजाह्नवीभवतः॥४३॥प्रतिपलमखिलांल्लोकान्मृत्युमुखं
निविशतोनिरीक्ष्याऽपि॥हाहंतचित्तमेतद्विरमतिनाऽद्यापिविष
येभ्यः॥४४॥निखिलंजगदेवनश्वरंपुनरस्मिन्नितरांकलेवरं
॥अथतस्यकृतेकियानयंक्रियतेहंतजनैःपरिश्रमः॥४५॥म
लयानिलकालकूटयोरमणीकुंतलभोगिभोगयोः॥श्वपचाऽऽ

त्मभुवोःकिमंतरंममभूयात्परमात्मनिस्थितिः॥४६॥कदावृंदाऽरण्येविमलयमुनातीरपुलिनेचरंतंगोविंदंहलधरसुदामादिसहितं॥अयेकृष्णस्वामिन्मधुरमुरलीवादनविभोप्रसीदेत्याक्रोशन्निमिषमिवनेष्यामिदिवसान्॥४७॥कदावासाकेतेविमलशरयूतीरपुलिनेचरंतंश्रीरामंजनकतनयालक्ष्मणयुतं॥अयेरामस्वामिन्जनकतनयावल्लभविभोप्रसीदेत्याक्रोशन्निमिषमिवनेष्यामिदिवसान्॥४८॥कदावाराणस्याममरतटिनीरोधसिवसन्वसानःकौपीनंशिरसिनिदधानोंऽजलिपुटं॥अयेगौरीनाथत्रिपुरहरशंभोत्रिनयनप्रसीदेत्याक्रोशन्निमिषमिवनेष्यामिदिवसान्॥४९॥इतिश्रीवृहच्छार्ङ्गधरविरचितायांपद्धत्यांशांतरसेवैराग्याख्यानपरिच्छेदः॥७॥७॥

अथशमः

अहोवाहारेवाकुसुमशयनेवादृषदिवामणौवालोष्ठेवाबलवतिरिपौवासुहृदिवा॥तृणेवास्त्रैणेवाममसमदृशोयांतुदिवसाःक्वचित्पुण्यारण्येशिवशिवेतिप्रलपतः॥१॥बीभत्साविषयाजुगुप्सितनमःकायोवयोगत्वरंप्रायोबंधुभिरध्वनीवपथिकैर्योगोवियोगावहः॥हातव्योयमसारएवविदुषासंसारइत्यादिकंसर्वस्यापिहिवाविचेतसिपुनःकस्यापिपुण्यात्मनः॥२॥नचाराधिराधाधवोमाधवोवानवापूजिपुष्पादिभिश्चंद्रचूडः॥परेषांधनेधंधनेनीतकालोदयालोपमालोकनेकःप्रकारः॥३॥नकाकारिकामारिकंसारिसेवानवास्वेष्टमाचेष्टितंहंतकिंचित्॥मनःप्रपसीरूपपंकेनिमग्नंकिमंतेकृतांतेमयावेदनीयं॥४॥क्षोणीपर्यटनंश्रमायविदुषांवादायविद्यार्जितामानध्वंसनहेतवेपरिचितास्तेनेधराधीश्वराः॥विश्लेषायसरोजसुंदरदृशामास्येकृतादृष्टयःकुज्ञानेनमयाप्रयागनगरेनाराधिनारायणः॥५॥चिरंध्यातारामाक्षणमपिनरामप्रतिकृतिःपरंपीतंरामाधरमधुनरामांघ्रिसलिलं॥नत्तारुष्टारामापद्दरचितरामायविनतिर्गतंमेज

न्मार्ग्यंनदशरथजन्मापरिगतः॥६॥ जातोहंजनकोममैषजननीक्षेत्रंकलत्रंकुलंपुत्रामित्रमरातयोवसुवलंविद्यासुहृद्बांधवाः॥ चित्तस्पादितकल्पनामनुभवंविद्वानविद्यामयींनिद्रामेत्यविघूर्णितोबहुविधान्स्वप्नानिमान्पश्यति॥७॥ स्त्रियोदोलालोलाविषयजरसाःप्रांतविरसाःविपद्गेहंदेहंमहदपिधमंभूरिनिधनं॥ बृहच्छोकोलोकःसततमबलानर्थबहुलास्तथाप्यस्मिन्घोरेपथिवततरतानात्मनिरताः॥८॥ धनंतावल्लब्धंकथमपितथाप्यस्यनिपतंव्ययेवानाशेवानिपततिवियोगोप्युभयथा॥ अनुत्पादःश्रेयान्किमुकथयपथ्योत्यविलयोविनाशोलब्धस्यव्यथयतितरांनत्वनुदयः॥९॥ लाटीनेत्रपुटीपयोधरघटीक्रीडाकुटीटोत्तटीपाटीरद्रववर्णनेनकविभिर्मूढैर्दिनंनीयते॥ गोविंदेत्तिजनार्दनेतिजगतांनाथेतिकृष्णेतिचव्याहारैःसमयःसदेकमनसांपुंसापरिक्रामति॥१०॥ वेदस्याध्ययनंकृतंपरिचितंशास्त्रंपुराणंस्मृतंसर्वंव्यर्थमिदंपदेनकमलाकांतस्यचेत्कीर्त्तितं॥उत्खातंसदृशीकृतंविरचितःसेकोंभसाभूयसासर्वंनिष्फलमालवालवलयेक्षिप्तंनबीजंयदि॥११॥ हेयंहर्म्यमिदंनिकुंजभवनंश्रेयंप्रदेयंधनंपेयंतीर्थपयोहरेर्भगवतोगेयंपदांभोरुहं॥ नेयंजन्मचिरायदर्भशयनेधर्मेनिधेयंमनःस्थेयंतत्रसितासितस्यसविधेध्येयंपुराणंमहः॥१२॥ आधायाधायराधाधवतवचरणांभोजमंतःसमाधावंस्थेरण्येतिपुण्येपुलकिततनवोवासरान्वाहयंति॥ देशेदेशेदुराशाकवलितहृदयोदुष्कृपाणांनराणांधावन्धावन्पुरस्तादिहकुमतिरहंजन्मसंपादयामि॥१३॥ धन्यानांगिरिकंदरोदरभुविज्योतिःपरंध्यायतामानंदाश्रुपरंपिबंतिहरिणानिःशंकमंकेशयाः॥ अस्माकंतुमनोरथोपरचितप्रासादवापीतटक्रीडाकाननकेलिमंडपजुषामायुःपरंहीयते॥१४॥ नित्यानित्यविचारणप्रणयिनीवैराग्यमेकंसुहृत्मित्राण्येवयमादयःशमदमप्रायाःसखायोमताः॥ मैत्र्याद्याः

परिचारिकाःसहचरीनित्यंमुमुक्षावलादुच्छेद्यारिपवश्चमोहममतासंकल्पवैरादयः॥१५॥रागिण्यपिविरागिण्यस्मियस्तासुरमेतकः॥ अहंचकलयेमुक्तिंयाविरागिणिरागिणी॥१६॥ यस्मिन्वस्तुनिममताममतापस्तत्रतत्रैव॥ यत्रैवाहमुदासेतत्रमुदासेस्वभावसंतुष्टः॥१७॥ दासोहमितियापूर्वंविहिताभावनामया॥ अनादित्वेनसेदानींममचेतोवलंबते॥१८॥सवेदोनिर्वेदःस्मृतिरपिचसाविस्मृतिरहोसशास्त्रार्थोव्यर्थस्तदपिभजनंमोहभजनं॥ सऊहःसत्यूहोहरिहरकथास्तापिचवृथानयत्रस्यादात्मास्फुटदनुभवप्रत्ययमयः॥१९॥ आशानिष्ठाप्रतिष्ठाममकिलमहिमास्तासुसौख्यंकदास्याद्याप्तोत्सासाविदध्यादिहकिमपितथापध्यमासापरत्र॥आद्यासानोभयत्राप्यहहतदपिकिंसक्ततोयामितस्यांयाप्तोस्याद्प्रगल्भेप्रतिदिवसमुभेतेकदर्थीकरोति॥२०॥गंगोत्तुंगतरंगरिंगणलघूत्सर्पन्मरुच्छीलितान्गुंजन्षद्वदमंजुवंजुललसत्कुंजोपकंठेपठन्॥ अध्यात्मप्रणिधायमानसमहोशंभोःपदांभोरुहेधन्याःप्राप्यपरंपदंप्रतिदिनंनंदंतियोगंविना॥२१॥महीरम्याशय्याविपुलमुपधानंभुजलतावितानंचाकाशंव्यजनमनुसारोयमनिलः॥स्फुरन्दीपश्चंद्रोविरतिवनितासंगमुदितःसुखंशांतःशेतेमुनिवचनभूतिर्नृपइव॥२२॥ कौपीनंशतखंडजर्जरतरंकंथापुनस्तादृशीनिश्चिंतंसुखसाध्यभैक्ष्यमशनंशय्याश्मशानेवने॥मित्रामित्रसमानतापशुपतेश्चिंताथशून्यालयेस्वात्मानंदमदप्रमोदमुदितोयोगीसुखंतिष्ठति॥२३॥ इतिशमः

अथानित्यतानिरूपणं

येषांनिमेषोन्मेषाभ्यांजगतांप्रलयोदयौ॥ तादृशाःपुरुषायातामादृशांगणनैवका॥१॥ वासिष्ठरामायणात्॥प्राप्ताःश्रियःसकलकामदुघास्ततःकिंदत्तंपदंशिरसिविद्विषतांततःकिं॥ संमानिताःप्रणयिनोविभवैस्ततःकिंकल्पंस्थितंतनुभृतांतनुभिस्ततः

किं॥२॥वयंयेभ्योमाताश्चिरतरगताएवखलुतेसममंयैःसंवृद्धाः
स्मरणपदवीतेपिगणिताः॥इदानीमेतेस्मःप्रतिदिवसमासन्न
पतनागतास्तुल्यावस्थांसिकतिलनदीतीरतरुभिः॥३॥रम्यं
हर्म्यतलंनकिंवसतयेश्रव्यंनगेयादिकंकिंवाप्राणसमासमागम
सुखंनैवाधिकंप्रीतये॥किंतुभ्रांतपतत्पतंगपवनव्यालोलदी
पांकुरच्छायाचंचलमाकलय्यसकलंसंतोवनांतंगताः॥४॥
एतेभर्तृहरेः॥न्यस्तंयथामूर्ध्निमुदानिमेषोयवास्मताद्यंजलिक
ल्पितःसन्॥मृत्युंसमीपस्थितमप्यजानन्भुनक्तिमर्त्योवि
षयांस्तथैव॥५॥ अहमिहकृतविद्योवेदितासत्कलानांधन
पतिरहमेकोरूपलावण्ययुक्तः॥इतिकृतगुरुगर्वःखिद्यतेकिंज
नोयंकतिपयदिनमध्येसर्वमेतन्नकिंचित्॥६॥श्रीदामोदर
देवानां॥गलितानींद्रलक्षाणिबुद्बुदानीववारिणी॥मांजीवित
निबद्धाशंविहसिष्यंतिसाधवः॥७॥संसाररात्रिदुःस्वप्नेशू
न्येदेहमयेभ्रमे॥आस्थांचेद्नुबध्नातितन्मुखोनास्तितत्प
रः॥८॥एतयोःप्रेक्ष्यसेलक्ष्मीश्छत्रचामरचंचलाः॥स्वप्नएव
महाबुद्धेदिनानित्रीणिपंचवा॥९॥येषुयेषुदृढाबद्धाभावनास्तृ
ष्वस्तुषु॥तानितानिविनष्टानिदृष्टानिकिमिहोत्तम॥१०॥यन्म
ध्येयच्चपर्यंतेयदापातेमनोरमं॥सर्वमेवापवित्रंतद्विनाशामे
ध्यदूषितं॥११॥नीलोत्पलाभनयनाःपरमप्रेमभूषणं॥हासाये
वविलासिन्यःक्षणभंगितयास्थिताः॥१२॥एतेवासिष्ठात्॥गंध
र्वनगराकारःसंसारःक्षणभंगुरः॥मनसोवासनैवेयमुभयोर्भेद
साधनं॥१३॥निंदंतिमंदाःश्रियमाप्यनित्यंपरंविषीदंतिवियद्गृ
हीताः॥विवेकदृष्ट्याचरतांनराणांश्रियोनकिंचिद्विपदोनकिं
चित्॥१४॥मित्रंकलत्रमितरःपरिवारलोकोभोगैकसाधनमि
माःकिलसंपदोनः॥एकःक्षणःसतुभविष्यतियत्रभूयोनायंन
यूयमितरानवयंनचैते॥१५॥गतेनापिनसंबंधोनसुखेनभवि
ष्यति॥वर्तमानेक्षणातीतंसंगतिःकस्यकेनवा॥१६॥ एतेश्रीदे

वगणदेवानां॥दूतोनकिंचिन्परतोनकिंचिद्यतोयतोयातिततो
नकिंचित्॥स्वात्मावबोधादपरंनकिंचिद्विचार्यमाणेपिजगन्नकिं
चित्॥१७॥यदस्माभिर्दृष्टंक्षणिकमभवत्स्वप्नमिवतत्कियंतो
भावास्युःस्मरणविषयादप्यवगताः॥अहोपश्यन्नश्यन्स्वज
नमखिलंयान्तमनिशंहतव्रीडंचेतस्तदपिनभवेत्संगरहितं॥
॥१८॥श्रीशिवदासदेवानां॥साक्षात्क्षेमावनारःकमलदलदृशो
दिस्फुरल्लक्ष्मीरनंताःसत्पुत्राःसंतिमित्राःसमविषयविपत्संवि
भावीकुटुंबः॥एतत्सर्वंहितावत्सुरुतविलसितंदृश्यमानंमनो
ज्ञंयच्चैतत्क्षिप्रनाशप्रणयिवतमनाकृम्लायतेतेनचेतः॥१९॥
हरिगणस्य॥चेतोहरायुवतयःसुहृदोनुकूलाःसद्बांधवाःप्रण
यगर्भगिरश्चभृत्याः॥वल्गंतिदंतिनिवहास्तरलास्तुरंगाःसंमी
लितेनयनयोर्नहिकिंचिदस्ति॥२०॥पृथिवीदह्यतेयत्रमेरुश्चा
पिविशीर्यते॥सुशोषेत्सागरजलंशरीरेतत्रकाकथा॥२१॥इदंयु
गसहस्रस्यभविष्यदभवद्दिनं॥तदप्यद्यत्वमापन्नंकाकथामर
णावधेः॥२२॥लब्धास्त्यक्ताश्चसंसारेयावंतोबांधवास्त्वया॥नसं
तिखलुतावंत्योगंगायामपिवालुकाः॥२३॥आसन्नतामेतिमृ
त्युरायुर्यातिदिनेदिने॥आघातंनीयमानस्यवध्यस्येवपदेपदे
॥२४॥केषामप्येते॥अव्यक्तादीनिभूतानिव्यक्तमध्यानिभा
रत॥अव्यक्तनिधनान्येवतत्रकापरिदेवना॥२५॥एकसार्थप्र
वृत्तानांसर्वेषांतत्रगामिनां॥यद्येकस्त्वरितोयातितत्रकापरिदे
वना॥२६॥एतौभगवतोव्यासस्य॥एकेद्यप्रातरपरेपश्चादन्ये
पुनःपरे॥सर्वेनिःसीम्निसंसारेयांतिकःकेनशोच्यते॥२७॥इ
तिश्रीवृ॰शा॰विरचितायांपद्धत्यांशांतरसेऽनित्यतानिरूपणप॰॥

अथविषयोपहासाः

नित्यमाचरतःशौचंकुर्वतःपितृतर्पणं॥यस्यनोद्विजतेचेतःशा
न्तिंतस्यकरोतिकिं॥१॥कस्यापि॥यावंतःकुरुतेजंतुःस्वसु
स्वार्थपरिग्रहान्॥तावंतोस्यनिखन्यंतेहृदयेशोकशंकवः॥२॥

दाराःपरिभवकाराबंधुजनोबंधनंविषयाः॥कोयंजनस्यमोहोये
रिपवस्तेषुसौल्हृदाशाः॥३॥कस्यापि॥कृमयोभस्मविष्ठावानि
ष्ठायस्येयमीदृशी॥सकायःपरतापाययुज्यतामितिकोनयः॥४॥
कस्यापि॥रक्तमांसमयःकायःस्त्रीणांस्पर्शसुखायनः॥तमेवा
श्रंतिसिंहाद्यारम्यंनास्तीहवस्तुतः॥५॥अंगमंगेनसंपीड्यमां
संमांसेनतुस्त्रियः॥पुराहमभवंभीतोयत्तन्मोहविजृंभितं॥६॥
एतौवसिष्ठात्॥उत्तानोस्थूलमंडूकपाटितोदरसन्निभे॥क्लेदि
निस्त्रीव्रणेशक्तिरकृमःकस्यजायते॥७॥कस्यापि॥दृष्टैवविकृ
तंकायंवायुस्पर्शविवर्जितं॥येतुनिर्व्याजमासक्तास्तेभ्योपिवि
भिमोवयं॥८॥श्रीदेवगणदेवानां॥श्वेतपदंसमभिवीक्ष्यशिरो
रुहाणांस्थानंपरंपरिभवस्यतदेवपुंसां॥आरोपितास्थिशकलं
परित्हत्ययातिचांडालकूपमिवदूरतरंतरुण्यः॥९॥स्तनौमांस
ग्रंथीकनककलशावित्युपमितौमुखंश्लेष्मागारंतदपिचश
शांकेनतुलितं॥स्रवन्मूत्रक्लिन्नंकरिवरकरस्पर्धिजघनंमुहुर्नि
द्यंरूपंकविजनविशेषैर्गुरुकृतं॥१०॥एतौभर्तृहरेः॥तृषाशुष्य
त्यास्येपिबतिसलिलंस्वादुसुरभिःक्षुधार्तःसन्शालीन्कवल
यतिमांसाज्यकलितात्॥प्रदीप्तेकामाग्नौसुदृढतरमाश्लिष्यति
वधूंप्रतीकारंव्याधेःसुखमितिविपर्यस्यतिजनः॥११॥कस्यापि
॥जन्मैवव्यर्थतांनीतंभवभोगप्रलोभिना॥काकमल्येनविक्री
तोहंतचिंतामणिर्मया॥१२॥इतिश्रीवृहच्छार्ङ्गधरविरचिता
यांपद्धत्यांशांतरसेविषयोपहासपरिच्छेदः॥ छ ॥ छ ॥ छ॥

अथपश्चात्तापः

भोगानभुक्तावयमेवभुक्तास्तपोनतप्तंवयमेवतप्ताः॥कालो
नयातोवयमेवयातास्तृष्णानजीर्णावयमेवजीर्णाः॥१॥नाभ्य
स्ताभुविवादिवृंददमनीविद्याविनीतोचिताखड्गाग्रैःकरिकुंभपी
ठदलनैर्नाकंननीतंयशः॥कांताकोमलपल्लवाधररसःपीतोन
नचंद्रोदयेतारुण्यंगतमेवनिःफलमहोशून्यालयेदीपवत्॥२॥

नध्यातंपद्मीश्वरस्यविधिवत्संसारविछित्तयेस्वर्गद्वारकपाट॰पाटनपटुर्धर्मोपिनोपार्जितः॥नारीपीनपयोधरोरुयुगलंस्वप्नेपिनालिंगितंमातुःकेवलमेववयौवनवनछेदेकुठारावयं॥३॥क्षातंनक्षमयागृहोचितसुखंत्यक्तंनसंतोषतः सोढादुःसहशीतवाततपनक्लेशान्नतप्तंतपः॥ध्यातंचित्तमहर्निशंनियमितिप्राणैर्नशंभोःपदंतत्तत्कर्म कृतंयदेवमुनिभिस्तैस्तैःफलैर्वंचिताः॥ ॥४॥जातःकूर्मःसएकःपृथुभुवनभरायार्पितंयेनपृष्ठंश्लाघ्यंजन्मध्रुवस्यभ्रमतिनियमितंयत्रतेजस्विचक्रं॥संजातव्यर्थपक्षाःपरोहितकरणेनोपरिष्टान्नवाधोब्रह्मांडोडंबरांतर्मशकवदपरंजंतवोजातनष्टाः॥५॥धन्यानांगिरिकंदरेनिवसितांज्योतिःपरेध्यायतामानंदाश्रुजलंपिबंतिशकुनानिःशंकमंकेशायाः॥अस्माकंतुमनोरथापरिचितप्राचीनवापीतटक्रीडाकाननकेलिकौतुकजुषामायुःपरंक्षीयते॥६॥अजानंदाहार्तिंयततिशलभस्तीव्रदहनेनमीनोपिज्ञात्वाहृतबडिशमश्नातिपिशितं॥विजानंतोप्येतेवयमिहवियज्जालजटिलान्नमुंचामःकामानहहगहनोमोहमहिमा॥७॥एतेभर्तृहरेः॥तरत्तरलतृष्णोनकिमिवास्मिन्धरातले॥मयातत्कृतमज्ञेनपश्चात्तापाभिवृद्धये॥८॥वासिष्ठात्॥मंत्रोद्भावितदेवतैर्न्नविधिवद्दासीकृताःसिद्धयोयोगाभ्याससमाहितैरनुदिनंतीर्णंनमोहार्णवः॥क्षुभ्यत्क्षुद्रनरेंद्रदत्तविगलत्संपल्लवोल्लासितैर्धिङ्मूढैरिवपंडितैरपिच॰लात्कालःकथंनीयते॥९॥धावित्वास्वसमाहितेनमनसादूरेस्थिरोनामितंभूपानांप्रतिशब्दकैरिवचिरंमोहुष्टमिष्टंवचः॥हाध्वस्तनियंत्रणापरिभवप्रम्लानवक्त्रैःस्थितंभ्रांतःकिंकरवामसंचरतिमनोनाद्याप्यविद्यागृहे॥१०॥एतौश्रीदेवगणदेवानां॥यातेयौवनमधुनावनमधुनाशरणमेकमस्माकं॥स्फुरदुरहारमणीनांहारमणीनांगतःकालः॥११॥गात्रंसंकुचितंगतिर्विगलितादंताश्चनाशंगतादृष्टिर्भ्राम्यतिरूपमेवह्रसतेवक्त्रंचलाला

यते॥वाक्यंनैवकरोतिबांधवजनःपत्नीनशुश्रूषतेहाकष्टंजर
याभिभूतपुरुषःपुत्रैरवज्ञायते॥१२॥नोधर्मोयततोनतत्रनि
रतानार्थापयेतेदृशाःकामोप्यर्थवतांतदर्थमपिनोमोक्षःक्वचि
त्कस्यचित्॥नत्किंनामवयंवृथैवघटिताज्ञातंपुनःकारणंजी
वंतोपिमृताइतिप्रवदंतांशब्दार्थसंसिद्धये॥१३॥केषामप्यते॥
विद्यानाऽधिगताकलंकरहितावित्तंचनोपार्जितंशुश्रूषाऽपिस
माहितेनमनसापित्रोर्नसंपादिता॥आलोलायतलोचनायुवत
यःस्वप्नेऽपिना॥लिंगिताःकालोऽयंपरपिंडलोलुपतयाकाकैरि
वप्रेषितः॥१४ब्रह्मज्ञानविवेकनिर्मलधियःकुर्वंत्यहोदुष्करंय
न्मुंचंत्युपभोगवंतिचधनान्येकांततोनिःस्पृहाः॥नप्राप्तानि
पुरानसंप्रतिनचप्राप्तौदृढप्रत्ययोवांछामात्रपरिग्रहाण्यपिप
रित्यक्तुंनशक्तावयं॥१५॥अर्थाःपादरजःसमागिरिनदीवेगो
पमंयौवनंआयुष्यंजललविंदुलोलचपलंफेनोपमंजीवितं॥धर्मं
योनकरोतिनिश्चलमतिःस्वर्गाऽर्गलोद्घाटनंपश्चात्तापयुतो
जरापरिगतःशोकाऽग्निनादह्यते॥१६॥धनवानितिहिमदोमे
किंगतविभवोविषादमुपयामि॥करनिहतकंदुकसमाःपातो
त्पातामनुष्याणां॥१७॥आयुर्वर्षशतंनृणांपरिमितंरात्रौतद
र्धंगतंतस्यार्धस्यपरस्यचार्धमपरंबालत्ववृद्धत्वयोः॥शेषंव
व्याधिवियोगदुःखसहितंसेवादिभिर्नीयतेजीवेवारितरंगचं
चलतरेसौख्यंकुतःप्राणिनां॥१८॥इतिश्रीबृहच्छार्ङ्गधरवि
रचितायांपद्धत्यांशांतरसेपश्चात्तापपरिच्छेदः॥छ॥छ॥छ॥

अथकालचरितं

पुरंदरसहस्राणिचक्रवर्तिशतानिच॥निर्वापितानिकालेनप्र
दीपइववायुना॥१॥कस्यापि॥भ्रातःकष्टमहोमहान्सनृपतिः
सीमंतचक्रंचतत्पार्श्वेतस्यचसाविदग्धपरिषत्ताश्चंद्रबिंबान
नाः॥उद्वृत्तःसचराजपुत्रनिवहस्तेबंदिनस्ताःकथाःसर्वंयस्य
वशाद्गतंस्मृतिपथंकालायतस्मैनमः॥२॥प्राप्ताजरायौवनम

प्यतीतंबुधायतेत्वंपरमार्थसिध्यै।। आयुर्गतप्रायमिदंयतोसौविश्रम्यविश्रम्यनयातिकालः।।३।। एतौभर्तृहरेः।। कांश्चित्कल्पशतंकृतस्थितिचयात्कांश्चिद्युगानांशतंकांश्चिद्वर्षशतंतथाकतिपयाञ्जंतून्दिनानांशतं।। तांस्तान्कर्मभिरात्मनःप्रतिदिनंसंक्षीयमानायुषःकालोयंकवलीकरोतिसकलान्भ्रातःकुतःकौशलं।।४।। कालेनक्षितिवारिवह्नियवनव्योमादियुक्तंजगद्धत्वाद्याश्चसुराप्रयांतिविलयंविष्णोविचारादिति।। पश्यामोपिविपश्यतेनवरतंलोकाननेकान्मुधामायामोहमयींभवप्रणयिनीनास्मांजहीमोवयं।।५।। एतौशार्ङ्गधरस्य।। अद्यैवहसितंगीतंपठितंयैःशरीरिभिः।। अद्यैवतेनदृश्यंतेकष्टंकालस्यचेष्टितं।।६।। कस्यापि।। म्रियमाणंमृतंबंधुंशोचंतिपरिदेविनः।। आत्मानंनाभिशोचंतिकालेनकवलीकृतं।।७।। श्रीदेवगणदेवानां।। आराध्यभूपतिमवाप्यततोधनानिभुंजामहेवयमिहप्रसभंसुखानि।। इत्याशयावतविमोहितमानसानांकालोजगाममरणावधिरेवपुंसां।।८।। कस्यापि।। व्योमैकांतविहारिणोऽपिविहगाःसंप्राप्नुवंत्यापदंबध्यंतेनिपुणैरगाधसलिलान्मत्स्याःसमुद्रादपि।। दुर्नीतंकिमिहाऽस्तिकिंसुचरितंकःस्थानलाभेगुणःकालोहिव्यसनप्रसारितकरोगृह्णातिदूरादपि।।९।। यत्राऽनेकेक्वचिदपिगृहेतत्रतिष्ठत्यथैकोयत्राऽप्येकस्तदनुबहवस्तत्रनैकोऽपिचांते।। इत्थंचेमौरजनिदिवसौदोलयन्द्वाविवाऽक्षौकालःकाल्याभुवनफलकेक्रीडतिप्राणिसारैः।।१०।। ब्रह्माविष्णुदिनेयातिविष्णूरुद्रस्यवासरे।। ईश्वरस्यतथाऽसोपिकःकालंलंघितुंक्षमः।।११।। अप्सुप्लवंतेपाषाणामानुषाघ्नंतिराक्षसान्।। कपयःकर्मकुर्वंतिकालस्यकुटिलागतिः।।१२।। इतिश्रीबृहच्छार्ङ्गधरविरचितायांपद्धत्यांशांतरसेकालचरितपरिच्छेदः।।छ।।छ।।

अथविचारः

यस्मिन्वस्तुनिममताममतायस्तत्रतत्रैव।। यत्रैवाहमुदासेत

त्रमुदासेस्वभावसंतुष्टः॥१॥ मृत्योर्बिभेषिकिंमूढभीतंमुंचति
किंयमः॥ अजातंनैवगृण्हातिकुरुयत्नमजन्मनि॥२॥कस्यापि
मुंडीजटीवल्कलवांस्त्रिदंडीकषायवासाव्रतकर्शितांगः॥ स्य
क्तेहिकोवायदिनात्मतत्वस्तदातुतस्योभयमेवनष्टं॥३॥अ॰
धीत्यचतुरोवेदान्व्याकृत्याष्टदशास्मृतीः॥ अहोश्रमस्यवैफ
ल्यमात्मापिकलितोनचेत्॥४॥जडास्तपोभिःशमयंतिदेहंबु
ध्यामनश्चापिविकारहेतुं॥श्वामुक्तमस्त्रंदशतीतिकोपाङ्गोक्ता
रमुद्दिश्यहिनस्तिसिंहः॥५॥कस्यापि॥वालिकारचितवस्त्रपु
त्रिकाक्रीडनेनसहशंसुरार्चनं॥पत्रशाम्यतिमनोननिश्चलं॰
स्फीतवज्जलधिमज्जनामलं॥६॥कस्यापि॥अग्रेगीतंसरसक
वयःपार्श्वतोदाक्षिणात्याःपृष्ठेलीलावलयरणितंचामरग्राहि
णीनां॥यद्यस्त्येवंकुरुतवरसास्वादनेलंपटत्वंनोचेच्चेतःप्रवि
शसहसानिर्विकल्पेसमाधौ॥७॥यदाकिंचिज्ञोहंद्विपइवमदां
धःसमभवंतदासर्वज्ञोस्मीत्यभवदवलिप्तंममनः॥यदाकिं
चित्किंचिद्बुधजनसकाशादवगतंतदामूर्खोस्मीतिज्वरइवम
दोमेव्यपगतः॥८॥यदासीदज्ञानंस्मरतिमिरसंकारजनितंत
दादृष्टंनारीमयमखिलमेतज्जगदिति॥इदानीमस्माकंपटुत
रविवेकांजनजुषांसमीभूतादृष्टिस्त्रिभुवनमपिब्रह्ममनुते॥
॥९॥मानेम्लायिनिखंडितेचवसुनिव्यर्थेप्रयातेर्थिनिक्षीणेबंधु
जनेगतेपरिजनेनष्टेशनैर्यौवने॥युक्तंकेवलमेतदेवसुधियांय
ज्जन्हुकन्यापयःपूतग्रावकरींद्रकंदरदरीकुंजेनिवासःक्वचित्॥
॥१०एतेभर्तृहरेः॥इतिश्रीवृ॰शा॰ शांतरसेविचारपरिच्छेदः॥७

अथोपदेशः

सवेदोनिर्वेदःस्मृतिरपिचसाविस्मृतिरहोसशास्त्रार्थोव्यर्थस्त
दपियजनेमोहभजनं॥सऊहःप्रत्यूहोहरिहरकथासाचवित
थानयन्नस्यादात्मास्फुरदनुभवप्रत्ययमयः॥१कस्यापि॥कु
लेमहतिजातेनआत्मनश्रेयइच्छता॥आत्मज्ञानेश्रमःका

र्योयज्ज्ञात्वामृतमश्नुते॥२॥पुंप्रकृत्योःकथामेवशिवःशक्त्यो
स्तथैवच॥यःशृणोतिनरोभक्त्यानिःपापःसोपिजायते॥३॥सगु
णीसचधर्मिष्ठःसविवेकीसबुद्धिमान्॥ब्रह्मज्ञानेमतिर्यस्यशेषाः
पशुसमानराः॥४॥ग्रामेगोश्वखरवरोष्ट्राद्याआरण्येहरिणादयः
॥यथैतेपशवोमूढास्तथात्मानंनवेत्तियः॥५॥सर्वेषांतुपदार्था
नामभ्यासःकारणंपरं॥अनभ्यासेनमर्त्यस्यप्राप्तोयोगोपिनश्य
ति॥६॥अभ्यासेनस्थिरंचित्तमभ्यासेनानिलच्युतिः॥अभ्या
सेनपरानंदोह्यभ्यासेनात्मदर्शनं॥७॥अभ्यासेनान्यसंचारो
ह्यभ्यासेनान्यरूपिता॥अभ्यासेनसमुत्क्रांतिरभ्यासेनाणिमा
दयः॥८॥श्रुत्वापियदनभ्यासोलौल्यंनिद्राजनेरतिः॥विरुद्ध
शास्त्रश्रवणमेतद्योगविनाशनं॥९॥असत्संगाद्गुणज्ञोपिविष
यासक्तमानसः॥अकस्मात्प्रलयंयातिगीतरक्तोयथामृगः॥१०
विषयेष्वपिकष्टोयंविषयस्त्रीतिनामतः॥जीवत्यन्यैःकिलाकृष्टः
स्त्रियाकृष्टोनजीवति॥११॥स्त्रीरत्नध्यानमात्रंतुब्रह्मणोपिमनो
हरेत्॥किंपुनश्चेतरेषांतुविषयेच्छानुवर्तिनां॥१२॥स्त्रीरत्नमो
हनंस्पृष्टंदृष्टमाशीविषोपमं॥यदिच्छेदात्मनःश्रेयोमनसापि
नचिंतयेत्॥१३॥इतेयोगरसायनात्॥संसारजलदुःपारप
दवीनदवीयसी॥अंतरादुस्तरानस्युर्यदिमामदिरेक्षणाः॥
॥१४॥संगःसर्वात्मनात्याज्यःसचेत्यक्तुंनशक्यते॥ससद्भिः
सहकर्तव्यंसंतसंगारिभेषजं॥१५॥कामःसर्वात्मनाहेयःस
चेत्यक्तुंनशक्यते॥मुमुक्षाप्रतिकर्तव्यःसवैतस्यापिभेषजं॥
॥१६॥एतेमार्कंडेयपुराणात्॥मोक्षद्वारेप्रतीहाराश्चत्वारःपरि
कीर्तिताः॥शमोविवेकःसंतोषश्चतुर्थःसाधुसंगमः॥१७॥वास
नाद्विविधाप्रोक्ताशुद्धातिमलिनातथा॥शुद्धाजन्मक्षयेहेतुर्म
लिनाजन्मकारणं॥१८॥शुभाशुभाभ्यांकर्माभ्यांवहेतीवास
नासरित्॥पौरुषेणप्रयत्नेनयोजनीयाशुभेपथि॥१९॥नतद
स्तिजगत्कोशेशुभकर्मानुयातिना॥यत्पौरुषेणशुद्धेननसमा

साद्यतेजनैः॥२०॥शुभवासनयाचेतोमहत्याजायतेमहत्॥आ
त्मानंचिंतयन्नुद्वंनंदीरुद्रत्वमागतः॥२१॥क्षुद्रवासनयाचेतःक्षु
द्रतामेतिनित्यशः॥पिशाचविभ्रमात्सुप्तःपिशाचानिवपश्यति
॥२२॥महातिशययुक्तेनविश्वामित्रेणविप्रता॥भूयोभूयःप्रय
त्नेनदुःप्रयातपसार्जिता॥२३॥प्रणयेनयमंजित्वाकृत्वावचन
संगरं॥परलोकादुपानीतःसावित्र्यासत्यवान्पतिः॥२४॥नसो
स्त्यतिशयोलोकेयस्यास्तिनफलोदयः॥अतःकार्यःप्रयत्नस्तु
सद्भिःशिवफलाप्तये॥२५॥युक्त्यासंतरतोज्ञस्यसंसारोगोष्प॰
दाकृतिः॥दूरसंनकृयुक्तेस्तुमहागाधार्णवोपमः॥२६॥सुसन्न
द्धंसमस्तांगंप्रशमामृतवर्मणा॥वेधयंतिनदुःखानिशराव
ज्रशिलामिव॥२७॥पुंसोनिजमनामोहःकल्पितानल्पदुःख
दः॥संसारविषवेतालोविचारेणैवलीयते॥२८॥विचारदर्पणे
लग्नोधियंधैर्यधियंगतां॥आधेयोनविलुंपंतिवाताश्चित्तान
लंयथा॥२९॥यथोदिते दिनकरेक्वापियातितमस्विनी॥त॰
थाविवेकेभ्युदितेक्वाप्यविद्याविलीयते॥३०॥नाहंमांसंनचा
स्थीनिदेहादन्यःपरोस्म्यहं॥इतिनिश्चयवानंतःक्षीणाविद्य
इहोच्यते॥३१॥सर्वादृष्टीःपरित्यज्यनियम्यमनसामनः॥॰
सबाह्याभ्यंतरार्थस्यसंकल्पस्यक्षयंकुरु॥३२॥यदिवर्षस
हस्राणितपश्चरतिदारुणं॥तथापितेनसिद्धिःस्यात्संकल्पो
यशामादृते॥३३॥हरोयद्युपदिष्टास्याद्धरिःकमलजोपिवा॥
तथापितेनसिद्धिःस्यात्संकल्पोयशमादृते॥३४॥संकल्पतं
तावविलाभावाःप्रेताःशुभाशुभाः॥छिन्नेतंतौनजायंतेक॰
ल्पांतेपिशरीरिणः॥३५॥शांतसंदेहदौरात्म्यंगतकौतुकविभ्र
मं॥परिपूर्णतरंचेतःपूर्णेंदुरिवजायते॥३६॥चेतश्चंचलयावृत्त्या
चिंतानियतपंजरे॥धृतिंबध्नातिनैकत्रपंजरेकेसरीयथा॥३७
दृष्टमात्रेषुभावेषुयथाबलनतुष्यते॥तथैवतदनायत्तंचिरंचित्ते
नतुष्यते॥३८॥घटात्पटमुपायातिपटात्सकटमुत्कटं॥चित्तं॰

मर्थेषुचरतिपादपेष्विवमर्कटः॥३९॥सफलोमांसदेहस्यनकि
श्चित्पौरुषक्रमः॥मनोदेहस्यसफलंसर्वमेवस्वचेष्टितं॥४०॥
मनोनिर्माणमात्रेणजगन्नाम्नामहाधिना॥त्यक्तेनार्थेनचांत
स्यादुःखदारोमहात्मनः॥४१॥मनोमात्रंजगत्सर्वंमनःपर्वतमं
डलं॥मनोभूमिर्मनोव्योममनोवायुर्मनोजलं॥४२॥कुसुमोल्ला
सिधम्मिल्लाहेलावलितलोचना॥काष्ठकुड्योपमांगेषुलग्नार्थेम
नसोंगना॥४३॥कल्पांतेपवनावांतुयांतुचैकत्वमर्णवाः॥तपंतु
द्वादशादित्यानास्तिनिर्मनसःक्षितिः॥४४॥शास्त्रसत्संगधीरे
णचिंतातप्तमतापिना॥छिंधित्वमयसेवैतन्मनसैवमनोधुना
॥४५॥वासनावागुराकृष्टोमनोहारिणकोनृणां॥परांविवश
तामेतिसंसारतरुगुल्मके॥४६॥सततोदारवृत्तासुकथासुप
रिशीलितं॥संपन्नंनिर्मलंचेतोमोहपंकेन्नलिप्यते॥४७॥तस्मा
त्सजागरःकार्य्यःप्रबुद्धेनदिवानिशं॥नमुष्णातिच्छलाद्यस्मात्का
मक्रोधादयोपिच॥४८॥एतेवासिष्ठात्॥पुरमेकंजयस्तस्मिं
न्नसृङ्मांसास्थिनिर्मितं॥चर्मभित्तंमहायामंसर्वतःस्नायुवे
ष्टितं॥४९॥नवद्वारंमहाभूतैःपंचभिःसर्वतोवृतं॥नृपश्चपुरु
षस्तत्रचेतनावानवस्थितः॥५०॥मंत्रिणौतस्यबुद्धिश्चमनश्चै
वविरोधिनौ॥येतेतेतस्यनाशायतावुभावितरेतरं॥५१॥नृप
स्यतस्यचत्वारोनाशमिच्छंतिविद्विषः॥कामक्रोधस्तथालो
भोमोहश्चान्योमहारिपुः॥५२॥यदातुसनृपस्तानिद्वाराण्यार
त्यतिष्ठति॥तदास्वस्थबलश्चैवनिरातंकश्चजायते॥५३॥एते
मार्कंडेयपुराणात्॥जपत्यविरतारंभानियतिःपरमात्मनः॥य
दृशादिदमाप्नोतिजगच्चक्रंप्रवर्त्तते॥५४॥यश्चसर्वात्मकोदेवः
परंब्रह्ममहेश्वरः॥स्वच्छःस्वानुभवानंदरूपोन्त्यादिविवर्जितः॥५५
एतस्मात्परमानंदाच्छुद्धचिन्मात्ररूपिणः॥जीवःसंजायतेपू
र्वंतस्माच्चित्तंततोजगत्॥५६॥शांतस्यापगतेच्छस्यमनाक्सं
वेदनात्मकं॥स्वाभाविकंयत्स्फुरणंचिद्व्योम्नःसोंगजीवकः॥५७

यथावातस्यचलनंकृशानोरूष्णतायथा॥शीतवातातुषारस्य
तथाजीवत्वमात्मनः॥५८॥जीवत्वाच्चित्तसंधत्यांचित्तत्वादिंद्रि
यादिता॥इंद्रियादेःशरीरत्वंशरीरात्कर्मसंचयः॥५९॥कर्मणः
संचयात्स्वर्गनरकौमोक्षबंधने॥कर्मणोजायतेजंतुर्बीजादिव
नवांकुरः॥६०॥जंतोःप्रवर्ततेकर्मपुनर्बीजमिवांकुरात्॥आदि
सर्गोहिनियतिर्भाववैचित्र्यमक्षयं॥६१॥अनेनेत्थंसदाभाव्यमि
तिसंपद्यतेपरं॥अनुत्कीर्णायथापंकेपुत्रिकाप्यथदारुणि॥६२॥
वर्णायथामषीकल्केतथासर्गस्थितापरे॥कटकत्वंपृथक्हेम्नः॰
स्तरंगत्वंपृथग्जलात्॥६३॥यथानसंभवत्येवंनजगत्पृथगीश्व
रात्॥तापसवयथावारिमृगाणांभवकारणं॥६४॥असत्यमेवस
त्याभंतथामूढमतेर्जगत्॥नकिंचित्केनचिद्व्याप्तंनचकिंचित्क
चित्स्थितं॥६५॥चिदाकाशमयंशांतंसर्वमेतदभित्तिमत्॥सुधै
वैतेवयमहोसमुरासुरमानवाः॥६६॥असत्याएवजानीमोया॰
मआयामएवच॥अलीकएवत्वज्ञावोमज्ञावोलीकएवच॥
॥६७॥अनुभूतोप्यसद्रूपःस्वप्नेस्वमरणंयथा॥शरीरातीतव
त्तिस्त्वंशरीरस्थोभवाभवेः॥६८॥मागाःशोकंचहर्षंचत्वमात्मा
विगतज्वरः॥यथारजोभिर्गगनंयथाकमलमंबुभिः॥६९॥नलि
प्यतेतिसंस्पृष्टैर्देहैरात्मातथैवच॥बहिःकृत्रिमसंरंभोहृदिसं
रंभवर्जितः॥७०॥कर्ताबहिरकर्तांत र्लोकेविरहराघव॥देशा
द्देशंगतेचित्तेमध्येयच्चेतसोवपुः॥७१॥आजाड्यसंविन्मननं
तन्मयोभवराघव॥विमुक्तशांतसंकल्पोधीरधीरूर्जिताशयः
॥७२॥यथाप्राप्तानुवर्त्तीचलोकेविरहराघव॥श्रूयतांज्ञानसर्व
स्वंश्रुत्वाचैवावधार्यतां॥७३॥भोगेच्छामात्रकोबंधस्तत्यागो
मोक्षउच्यते॥पृष्टाज्ञानदशामेताःपशुम्लेच्छादयोपिये॥७४
॥सदेहावाप्यदेहावातेमुक्तानात्रसंशयः॥यच्चास्तमितगंभी
रंनतेजोनचमस्तकं॥७५॥अनाख्यमनभिव्यक्तंतद्रूपंपर
मात्मिकं॥नेन्द्रियाणिनवारूपंनमनःपरिकल्पना॥७६॥॥

पत्सर्वंनचयत्सर्वंतद्रूपंपरमात्मिकं॥ परमाणोरपिपरंतदाणी
योह्यणीयसः॥७७॥शुद्धंसूक्ष्मंपरंशांतंततदाकाशोदरादपि॥
एतद्ब्रहस्वंपरममेतच्चपरमंपदं॥७८॥एषागतिर्विरक्तानामे
षोसौपरमःशिवः॥७९॥एतेवासिष्टात्॥ तृष्णांछिंधिभजक्ष
मांजहिमदंपापेरतिंमाकृथाःसत्यंब्रूह्यनुपाहिसाधुपदवींसे
वस्वविद्वज्जनान्॥मान्यान्मानयविद्विषोऽप्यनुनयह्याछादय
स्वान्गुणान्कीर्तिपालयदुःखितेकुरुदयामेतत्सतांलक्षणं॥
॥८०॥यावत्स्वस्थमिदंशरीरमरुजंयावज्जरादूरतोयावच्चेंद्रि
यशक्तिरप्रतिहतायावत्क्षयोनायुषः॥ आत्मश्रेयसितावदेव
विदुषाकार्यःप्रयत्नोमहान्संदीप्तेभवनेतुकूपखननेप्रत्युद्यमः
कीदृशः॥८१॥मूढजहीहिधनागमतृष्णांकुरुतनुबुद्धिमनसि
वितृष्णां॥यल्लभसेनिजकर्मोपात्तंवित्तंतेनविनोदयचित्तं॥८२
अर्थमनर्थंभावयनित्यंनास्तिततःसुखलेशःसत्यं॥पुत्रादपिध
नभाजांभीतिःसर्वत्रैषाविहितारीतिः॥८३॥कातवकांताकस्ते
पुत्रःसंसारोयमतीवविचित्रः॥कस्यत्वंवाकुतआयातस्तत्वं
चिंतयतदिदंभ्रातः॥८४॥माकुरुधनजनयौवनगर्वंहरतिनि
मेषात्कालःसर्वं॥मायामयमिदमखिलंहित्वाब्रह्मपदंप्र
विशाऽऽशुविदित्वा॥८५॥नलिनीदलगतजलवत्तरलंतद्व
ज्जीवनमतिशयचपलं॥क्षणमपिसज्जनसंगतिरेकाभवति
भवार्णवतरणेनौका॥८६॥यावद्वित्तोपार्जनशक्तस्तावन्निज
परिवारोरक्तः॥तदनुचजरयाजर्जरदेहेवार्तांकोऽपिनपृच्छ
तिगेहे॥८७॥कामंक्रोधंलोभंमोहंत्यक्त्वाऽऽत्मानंपश्यहिको
ऽहं॥आत्मज्ञानविहीनामूढास्तेपच्यंतेनरकनिगूढाः॥८८॥
बालस्तावत्क्रीडाऽऽसक्तस्तरुणस्तावत्तरुणीरक्तः॥ वृद्धस्ता
वच्चिंतामग्नःपरेब्रह्मणिकोऽपिनलग्नः॥८९॥शत्रौमित्रेपु
त्रेबंधौमाकुरुयत्नंविग्रहसंधौ॥भवसमचित्तःसर्वत्रत्वंवांछ
स्यचिराद्यदिसत्तत्वं॥९०॥महतापुण्यपण्येनक्रीतेयंकाय

नौस्त्वया॥पारंदुःखोदधेर्गंतुंतरयावन्नभिद्यते॥९१॥ दधति
तावदमीविषयाःसुखंस्पृशतितावदियंहृदिमूढता॥ मनसि
तत्वविदांचविवेचकेक्वविषयाःक्वसुखंक्वपरिग्रहः॥९२॥म
न्विंद्यायदिजनःपरितोषमेतिनन्वप्रयत्नसुलभोऽयमनग्र
होमे॥ श्रेयोऽर्थिनोऽपिपुरुषाःपरतुष्टिहेतोर्दुःखार्जितान्यपि
धनानिपरित्यजंति॥९३॥धैर्यंयस्यपिताक्षमाचजननीशां
तिश्चिरंगेहिनीसत्यंसूनुरयंदयाचभगिनीभ्रातामनःसंय
मः॥शय्याभूमितलंदिशोऽपिवसनंज्ञानामृतंभोजनमेतेयस्य
कुटुंबिनोवदसखेकस्माद्भयंयोगिनः॥९४॥क्लेशत्यागकृतेऽ
र्पितेनकरणव्यूहेनदेहेनचस्वाऽनर्थंबतजंतुराजेयतिचेन्मंतु
र्निर्यंतुःकुतः॥शस्त्रेशत्रुजयायनैजगुरुणादत्तेऽयतेनैवचेत्सु
श्रोहंतिनिजंवपुःकथयरेतत्राऽपराधीतुकः॥९५॥ इतिश्रीवृ०
शार्ङ्गधरविरचितायांपद्धत्यांशांतरसोपदेशविधानपरिच्छेदः

अथकालसंख्या

षड्भिःप्राणैःपलंप्रोक्तंषष्टिभिर्घटिकाचतैः॥षष्टिभिर्घटिकाभिः
स्यादहोरात्रंतुमानवं॥१॥दिनैःपंचदशैःपक्षःशुक्लःकृष्णश्च
गीयते॥पक्षद्वंद्वेनमासःस्यात्पितॄणांतदहर्निशं॥२॥ऋतुर्मा
सद्वयेनैवषण्मासैरयनंस्मृतं॥अयनद्वितयंवर्षोदेवानांवास
रोनिशा॥३॥तद्द्वात्रिंशत्सहस्रैस्तैश्चतुर्लक्षैःकलिस्मृतः॥शे
षंयुगत्रयंज्ञेयंकलेर्द्वित्रिचतुर्गुणं॥४॥खचतुष्करदावेदाश्चा
तुर्युगमुदाहृतं॥चातुर्युकैकसप्तत्यामन्वंतरमु—— दाहृतं
॥५॥चतुर्भिरर्बुदैःकल्पंद्वात्रिंशद्भिश्चकोटिभिः॥चतुर्दशसु
रेंद्राश्चपतंतिब्रह्मणोहनि॥६॥चतुर्युगसहस्रेणकल्पाख्यं
ब्रह्मणोदिनं॥तत्प्रमाणातथारात्रिःसृष्टिसंहारकारिणी॥७॥
अथकालाग्निरुद्रस्यतृतीयनयनोत्थिता॥ज्वालादहतित
त्सर्वंनिर्वाणंब्रह्मणोजनः॥८॥स्वग्रतोब्रह्मणःस्वेदाद्भूमिरेका
र्णवाभवेत्॥निश्वासैःशुष्यतेसापिसृजेत्सुप्तोत्थितःपुनः॥९॥

स्वकालपरिणामेन पूर्णे वर्षशते किल ॥ ब्रह्मादीनां तथाशक्तेः क्षयो जन्म पुनः पुनः ॥१०॥ ब्रह्मा हरौ हरी रुद्रे रुद्रो लीयत ईश्वरे ॥ ईशः सदाशिवे सोपि शक्तौ शक्तिः परे शिवे ॥११॥ पुनः सृष्टिः पुनर्नाशः पुनः कल्पपरंपरा ॥ पुनः पुनरिदं सर्वं चक्रवत्परिवर्तते ॥१२॥ येतत्रलीना परमे पदे शिवे मुक्तिं गता देवितएवनापरे ॥ शक्तिप्रणाशे प्रलये महत्यहो तेषां कदाचित्स्मरतं न विद्यते ॥१३॥ एते शिवभाषित योगरसायनात् ॥ इति श्रीशार्ङ्गधरविरचितायां पद्धत्यां शांतरसे कालसंख्याख्यानपरिच्छेदः ॥

अथ विष्णुः

येनंदनंदननिरंजनमंजनाभमानंदकंदमिह मंदिरमिंदिरायाः ॥ त्वां धारयंति हृदि ते मकरंदबिंदुमिंदिंदिराद्वसरं रसयंति मुक्तेः ॥१॥ शौध्यौ तत्त्वंपदार्थौ वथ जहदजहल्लक्षणाकल्पनीपात्याज्यावंशौ विरुद्धौ तदनु न च तयोर्यत्तयोरैक्यदृष्टिः ॥ यतैरेतैरलं नः स्फुरति हृदि परं ब्रह्म मुग्धं विशुद्धं क्रीडङ्गोपांगनाभिर्व्रजभुवि परितः पालकं पांडवानां ॥२॥ योगाभ्यासवशीकृतेन मनसा तन्निर्गुणं निष्क्रियं ज्योतिः किंचन योगिनो हृदि परं पश्यंति पश्यंतु ते ॥ अस्माकं तु तदेव लोचनचमत्काराय भूयाच्चिरं कालिंदीपुलिनोदरे किमपि यन्नीलं तमो धावति ॥३॥ मूर्त्ता नाम्ना च कृष्णः पुनरपि यमुनातीरनीरे विहारः किंच श्यामाभिरामः कुवलयदलहृक्कूवल्लभीभिः प्रसंगः ॥ कुंजे ध्वांतैकपुंजे पुनरधिवसतिः शीर्षभूद्याशिखंडैस्तस्मादस्माकमंतस्तिमिरततिहतिं वक्ति वेदोपि चित्रं ॥४॥ यमदूत किमुद्यतोसि मामिह नेतुं यमराजमंदिरं ॥ ब्रुवता हरिणेक्षणां मया न हि जानासि हरीति भाषितं ॥५॥ मुरलीरवमाधुरीधुरेण स्फुरता चारुविलोललोचनेन ॥ पथि येन गतिं ददाति मातः स गतिं दास्यति किं ब्रवीति वेदः ॥६॥ हस्तमुत्क्षिप्य यातोसि बलात्कृष्ण किमद्भुतं ॥ हृदयाद्यदि निर्यासि पौरुषं गणयामिति ॥७॥ अद्भुतमेतदि

त्नीमनुरागीमनो यथालग्नं॥ क्वचिदपिनीलरसेतत्तथातथा
जातमवदातं॥८॥ कृष्णेनापिच भवतारक्तंचित्तं ममातीव॥रा
गधृतेममचित्तेवससिनरक्तोसितच्चित्रं॥९॥श्रीकृष्णनैव--
चित्रंतेरूपाकोमलतात्हदि॥नवनीतमपेयग्रासैःपोषितोसि॰
यशोदया॥१०॥दृग्दोषोनिपतिष्यतीतिभयतोनत्वांसमीक्षा
महेकाठिन्यंसमुपेष्यतीतिचरणौमूर्ध्नानवंदामहे॥किंचोद्वेग
मयास्यसीतिकिमपित्वांनप्रतिब्रूमहेकिंतुत्वांहृदयांबुजेन
भगवन्संपूज्यमोदामहे॥११॥मुग्धेध्यायसिकिंगृहाणपु
रतःकुंदंविकासोन्मुखंकिंकुंदेनममासुनासुमनसःकीदृग्वि
धास्तेप्रियाः॥पुन्नागंमृगयेसखिश्रुतिशिरोभूषाविशेषायुतं
गावोप्युज्झितघासमासतपदामोदप्रमोदोद्गमाः॥१२॥सभ
विष्यतिपक्षपातशीलाममपिनीलोत्पलकोमलोमुकुंदः॥सखि
वासनयानयानजानेमपयास्यंतिकियंतिवासराणि॥१३॥शै
वावयंनखलुतत्त्वविचारणीयंपंचाक्षरीजपरतानितरांतथा
पि॥चेतोमदीयमतसीकुसुमावकाशंस्मेराननंस्मरतिगोप
वधूकिशोरं॥१४॥नकालीकपालीनवानाकपालीनवाभानु
मालीमयाध्यायतेस्म॥रसोदारचित्तंरसोद्गारदृक्षंयशोदाकिशो
रंवयंभावयामः॥१५॥त्वमंघ्रिहीनःखलुदीनबंधोचिरेणचि
त्तेस्वयमाहतोसि॥इतःप्रयाणेतव — देवजानेकिलप्रियाः
सेतिसहस्रसंख्याः॥१६॥आर्तस्यमेविलपितंजगदंतरात्मा
पश्यन्नपश्यतिहरिर्नशृणोतिशृण्वन्॥दुर्दैवकुंभजनुषाख
लुसांप्रतंमेपीतस्त्वदीयकरुणावरुणालयःपि॥१७॥अव॰
लोकितमनुमोदितमालिंगितमंगनाभिरनुरागैः॥अधिवृंदा
वनकुंजंमरकतपुंजंनमस्यामः॥१८॥तादृक्चंडतुरंगमेक्ष
तचमत्कारोस्तिगांडीविनस्तन्नचंडफणास्फुकुंडलिपतेःसत्तां
डवाडंबरः॥ईदृक्चंडमहांडकेशमुकुटेस्वाधीनमेतेन॰
किंतच्चित्रंयदिमेमनागपिमनोवाहेसमारोहसि॥१९॥इतिवि॰

अथमुरली

द्राक्षासंकोचवतीदाडिमहृदयंविभेदमापन्नं॥मुरलीमधुरिमपुरतःशार्करयादर्शनतृणंदध्रे॥१॥शून्यत्वंसमयेनलाघवमिदंसुष्कत्वमंगेषुमेमौरवर्यंब्रजनाथनामकथनेदत्तंभवत्यानिजं॥तत्किंनोमुरलिप्रयच्छसिपुनर्गोविंदवक्त्रासवंयंपीलाभुवनंवशेविदधतीनिर्लज्जमुह्नायसि॥२॥मुहुस्तवलतिनीविकापुलकिताचगंडस्थलीदृशोरपिहृशोदरिस्फुरतिरीतिरन्याःदृशी॥वचोपितवगद्गदंभवतिमंदचंद्राननेमुकुंदमुरलीरवःकथयकिंसमाकर्णितः॥३॥तावन्माध्वीकसाध्वीतवभवतुकथाक्षीरपूरासिबंधस्तावत्तावच्चकोरीचुलकयतुचिरंशीतरोचेर्मरीचिम्॥तावत्पीयूषपूरैर्विदधतुविबुधास्तोषपोषंकथंचिद्यावन्नाकर्णितैषामधुरिपुमुरलीमाधुरीसाधुरीतिः॥४॥गुरुजनगंजनमयशोगृहपतिचरितंचदारुणंकिमपि॥विस्मारयतिसमस्तंशिवशिवमुरलीमुरारातेः॥५॥सखिममनियतिहतायास्तद्दर्शनभाग्यमस्तुवामावा॥पुनरपिसवेणुनादोयदिकर्णपथेपतेत्तदेवालं॥६॥सत्यंजल्पसिदुःसहाःखलुगिरःसत्यंकुलंनिर्मलंसत्यंनिःकरुणोप्ययंसहचरःसत्यंचदूरेसरित्॥तत्सर्वंसखिविस्मरामिझटितिश्रोत्रातिथिर्जायतेचेत्फुल्लाक्षमुकुंदमंजुमुरलीनिःस्वानरागोद्गतिः॥७॥इतिमुरली॥७॥

अथरघुनाथः

असारंसंसारंकलुषमिनसारंगनयनाभिसारंकिंसारंकलयसिरसारंभणपरः॥अपस्मारंस्मारंजहिहिसुकुमारंकुरुतपोनरस्मारंस्मारंदशरथकुमारंनववयः॥१॥कृतारंभारंभापरिचयकरेतीर्थनिकरेमरवादीनांदीनांविदधतुमनोवृत्तिमपरः॥विपंकापांकायांनरजननशंकामपनुदन्नयोध्यापांध्यायाम्यविरतमहंरामचरणौ॥२॥स्वर्णैणाजिनशायनोयोजितनयनोदशास्यदिग्भागे॥मुहुरवलोकितचापःकोपिदुरापःसनीलिमाशरणः

॥३॥विश्वांतर्यदिराममामपितथाबोद्धास्मिपोष्यस्त्वयाकर्त्तुंविश्वगतोनिजामवितथांविश्वंभरत्वप्रथां॥विश्वस्मादथचेद्बहिःकलयसित्वंमांजितंतन्मयानिःस्यानंदघनस्त्वमेवहिततोभिन्नस्त्वमेवास्मितत्॥४॥त्वंक्षेत्रंवयमंकुरास्त्वमवनीनाथोवयंसेवकास्त्वंत्यागीकवयोवयंरघुपतेदानासिपात्रंवयं॥त्वंमेघोसिलतावयंस्तुमनसश्चंद्रश्चकोरावयंकिंवाचालतयानयारघुपतेनोपेक्षणीयावयं॥५॥नवाचांप्राचांवामधुरतमभावामतिरसंनवानव्यांभव्यांभणितिमपिसंभावयतियः॥नकामंयःश्यामंदशमुखविरामंहृदिमुदाकृपारामंरामंत्रिजगदभिरामंकलयति॥६॥वेदस्याध्ययनंनधर्मवदतःसाकामधेनुर्मुदानस्थेमामनसोमनागपिकलौनध्यानसिध्याद्यतः॥इत्थेतत्परिचिंत्यचेतसिचिरंश्रीराममन्येदृढंत्वन्नामस्मृतितोभवार्णवतरिंनान्यामवन्याश्रयः॥७॥कारुण्यामृतनीरमाश्रितजनश्रीचातकानंददंशार्ङ्गाखंडलचापमंबुजभवाग्नींद्रादिवहींष्टदं॥चारुस्मेरमुखोल्लसज्जनकजासौदामिनीशोभितंश्रीरामांबुदमाश्रयेखिलजगत्संसारतापापहं॥८॥रोरीत्येतदसिद्धंचेत्सिद्धंचेद्दृशिचेतिकिं॥मनोरथःकथंसिध्येद्रामचंद्रकृपांविना॥९॥इतिरघुनाथः॥छ॥छ॥छ॥छ॥छ॥

अथशारीरं

अस्तिकारणमव्यक्तंसर्वव्यापिपरापरं॥सान्निध्यादपिदुर्ग्राह्यंविश्वमूर्त्योपलक्षितं॥१॥नाकारंननिराकारंनचस्त्रीपुन्नपुंसकं॥नापस्तेजोमरुद्व्योमभूमिर्दूरेनचांतिकं॥२॥ततोऽनिच्छस्यदेवस्यशक्तिरिच्छेत्यजायत॥चिद्रूपिण्यातयाक्रीडांकर्तुमैच्छत्सलीलया॥३॥क्रियारूपागुणमयीतस्याबुद्धिरजायत॥ज्ञानशक्तिरितिख्याताक्रियाशक्तिश्चसास्मृता॥४॥बुद्धेरहंततश्चित्तंशक्तिस्तस्यासदाशिवः॥नभोरूपीततोवायुरीश्वरःसमजायत॥५॥ईश्वरात्समभूद्रुद्रोज्योतिर्मयउमापतिः॥

रुद्राद्विष्णुरभूत्तापस्त्रैलोक्यपरिपालकः॥६॥ सविष्णोरब्जतो
जातोब्रह्मायंपृथिवीमयः॥ तदर्थमभवत्पूर्वंब्रह्मांडंकनकप्रभं
॥७॥ तेनसृष्टंस्वशक्त्येदंत्रैलोक्यंसचराचरं॥ पंचभिःसहसं
भूयपंचभूतमयात्मकैः॥८॥ ततोब्रह्माद्विधाभूतःशिवशक्ति
विभागतः॥ स्त्रीपुंसाविति सौख्यार्थंसुखेनासृजतप्रजाः॥ त
तश्चतुर्मुखस्यासन्दशपुत्रामनोभवाः॥९॥ तेषांदशदशौक
न्यामनोजाताःप्रजापतिः॥ तेसर्वेज्ञाननिरताःससंतुष्टास्तपो
धनाः॥१०॥ तेषांपुत्रैश्चपौत्रैश्चव्याप्तंसर्वमिदंजगत्॥ ततआ
त्मभुवःपुत्रोमरीचिरितियोभवत्॥११॥ दशपुत्रेषुविख्यात
स्तस्माज्जातश्चकश्यपः॥ सोपिदक्षस्यकन्यासुकश्यपःसम
जीजनत्॥१२॥ उत्पत्तिहेतुर्विश्वस्यभूतग्रामांश्चतुर्दश॥ अ
ष्टधादेवतायोनिस्तिर्यग्योनिश्चपंचधा॥१३॥ एकधामानुषी
योनिरिमेभूताश्चतुर्दश॥ तेजसादेवकार्येषुबभूवुःसप्तधा
तवः॥१४॥ अन्येषामपिकार्येषुपार्थिवाःसप्तधातवः॥ सर्वेमि
थुनरूपेणप्रजाउत्पादयंतिते॥१५॥ मैथुनानंदनिरताविषया
सक्तचेतसः॥ भगस्तुवैष्णवीशक्तिर्लिंगरूपीसदाशिवः॥१६
॥ उभयोर्योगतोबीजंब्रह्मरूपंप्रवर्तते॥ गर्भाशयोधरापीठंर
जोरक्तंचभास्करः॥१७॥ सोम्यंरतोब्रह्मरूपंतस्मिंस्तत्रविलं
बते॥ सूर्याचन्द्रमसोर्योगममावास्यांविदुर्बुधाः॥१८॥ तस्यां
प्रजाःप्रजायेतेयदीच्छापरमेश्वरी॥ शुक्रशोणितसंयोगोयदै
वकिलजायते॥१९॥ तदासंजायतेजीवोवन्हिःसूर्यमणेरिव
॥ शुक्राधिकेभवेत्पुत्रोकन्यारक्ताधिकेभवेत्॥२०॥ नपुंसकंस
मत्वेनकर्मणोनियतिर्यथा॥ अंगप्रत्यंगभागेनततःपिंडःप्र
जायते॥२१॥ चर्मणाच्छादितःसप्तधातवःस्युरनुक्रमात्॥
पिंडमज्जास्कपूर्णानामस्थ्नांषष्ठिशतैस्त्रिभिः॥२२॥ द्वासप्तति
सहस्राभिर्नाडीभिःपंजरीकृतं॥ क्रियाशक्त्याविनाकापिज्ञा
नशक्तिर्नदृश्यते॥२३॥ तेनेदंज्ञानशक्त्यर्थंकृतंवेश्मक्रियामयं॥

चतुर्विंशतिभिस्तत्वैःक्रियाशक्तिरचेतना॥२४॥ज्ञानशक्त्यास्तु
तावापिलभ्यतेचेतनावती॥सर्वज्ञोपिशिवस्तत्रशक्तिसंगेन
मोहितः॥२५॥नात्मानंनपरंवेत्तिविवेष्टतिनदिच्छया॥प्राणापा
नमयीशक्तिःषट्चक्राधारसंयुतं॥२६॥शांतेशिवंवशीकृत्यव
र्ततेकामकारतः॥आधारःकंदमित्युक्तंस्वाधिष्ठानंचजन्मभूः॥
॥२७॥नाभिस्तुमणिपूराख्यंहृदयंविध्यनाहतं॥विशुद्धिःकंठदे
स्युक्तमाज्ञाचक्रंभ्रुवोत्तरे॥२८॥आधारोहिचतुर्भिन्नःस्वाधि
ष्ठानंचषट्दलैः॥दशभिर्मणिपूराख्यंद्वादशैस्तुअनाहतं॥
॥२९॥विशुद्धिःषोडशैर्भिन्नैराज्ञाचक्रद्वयेनतु॥कालाग्निरुद्र
आधारेशक्तिःकुंडलिनीतथा॥३०॥आनंदाख्यास्वाधिष्ठाने
शक्त्याकामाख्ययासह॥नाभौब्रह्महृदिश्रीशःकंठेरुद्रोव्यव
स्थितः॥३१॥ईश्वरोलंबिकायांचतदूर्ध्वेचसदाशिवः॥ज्योति
स्थानानिचैतानिषट्चक्राणिजगुर्बुधाः॥३२॥नासामूलेविंदु
स्थानंनादस्योत्पत्तिकारणं॥तस्योर्ध्वयोगिनीचक्रंतदूर्ध्वे
शक्तिरास्थिता॥३३॥शक्त्यार्धेतुशिखाप्रोक्ताशिखांतेधूम
वत्तमः॥तमसोंतेपरंज्योतिरलक्ष्यःपरमेश्वरः॥३४॥यंदृष्ट्वैव
विलीयंतेयोगिनस्थिरचेतसः॥चराचरेषुपिंडस्थंपदस्थंश्वानि
लादिषु॥३५॥भास्करादिषुरूपस्थंरूपातीतं——परंविंदुः॥ह्वा
सप्ततिसहस्राणिकंदान्नाड्योविनिर्गताः॥३६॥प्रविश्यनाभि
देशेषुसर्वांगेषुवतोगताः॥इडाचपिंगलाचैवसुषुम्नाचसर
स्वती॥३७॥गांधारीहस्तिजिह्वाचपूषाचैवनिगद्यते॥अ
लंबुषाकुहूश्चैवशंखिनीदशमीमता॥३८॥एताःप्राणवहास्ते
याम्प्रधानादशनाडिकाः॥इडानासापुटेवामेपिंगलादक्षिणा
भवेत्॥३९॥सुषुम्नातालुभित्वैवब्रह्मद्वारंप्रवर्तिता॥सरस्व
तीचजिह्वायांगांधारीवामकर्णके॥४०॥दक्षिणेहस्तिजिह्वा
ख्यापूषावामेचलोचने॥अलंबुषादक्षिणेस्यात्कुहूद्वारेकु
हूभवेत्॥४१॥आब्रह्मरंध्रान्मार्गेणब्रह्मदंडस्यशंखिनी॥

सदाबिंदुवहाज्ञेयालिंगद्वारेचशंखिनी॥४२॥प्राणोपानःसमानश्चउदानोव्यानएवच॥नागःकूर्मश्चकृकरोदेवदत्तोधनंजयः॥४३॥प्राणोहिदशधाह्येषदशानामथवाप्रभुः॥द्वासप्ततिसहस्रासुनाडीषुविचरत्यलं॥४४॥हृदिप्राणोगुदेपानःसमानोनाभिसंगतः॥उदानःकंठदेशस्थोव्यानःसर्वशरीरगः॥४५॥सर्वांगमोरकोनागःकूर्मउन्मेषकारकः॥कृकलःक्षुद्रोद्गारकरोदेवदत्तस्तुजृंभकः॥४६॥अनस्थ्योयोनादकरःस्यादेवंदशधामरुत्॥येनजीवतिजीवोयंनिर्जीवोयद्विनाभवेत्॥४७सप्राणइतिविख्यातोवायुःक्षेत्रचरःपरः॥कंदाग्रात्सोत्थितःप्राणःसदावहतिदेहिनां॥४८॥हृद्गतंजीवमाश्वास्यबहिर्गत्वानिवर्तते॥अपानेनपुनःकंदात्प्रेरितःकालरूपिणा॥४९॥निःश्वासोच्छासछलातिजपन्हंसेत्यहर्निशं॥हंसश्चद्वादशदलेजीवात्मात्हृदयांबुजे॥५०॥तिष्ठन्करोतिचैतन्यंद्योतंदीपोघटेयथा॥बद्धःकर्मगुणैर्बुद्धिसंयुतस्त्रिगुणात्मकः॥५१॥ग्राहीपंचेंद्रियार्थानामनोवृत्तेनसर्वदा॥चेतयन्निखिलंदेहंजीवात्मासुखदुःखभुक्॥५२॥आत्मानंनैवजानातिकामक्रोधादिभिर्हतः॥सएवजीवःसप्राणीसशरीरीनिगद्यते॥५३सएवगर्भदुःखस्यसोढास्वेनैवकर्मणा॥इत्यंगैःसंयुतःसर्वैर्देहिनोबालकाकृतिः॥५४॥मातुराहाररसतोदेहोगर्भेविवर्तते॥ततोगर्भःस्थितःप्राणीचिंतयन्किंकृतंमया॥५५॥दुःकृतेयेननिरयेगर्भाख्येपतितोस्म्यहं॥निःसृतोहंकरिष्यामिसुकृतानीतिचिंतयन्॥५६॥उल्वणात्करपादाभ्यांकृत्वाद्वारंविनिर्गतः॥योनिद्वारंविनिःक्रांतोविसंज्ञःपतितःक्षितौ॥५७॥नसपूर्वंस्मरेत्किंचिन्माययाबाध्यतेपुनः॥अज्ञानेकेहतोबाल्येयौवनेगृहतत्परः॥५८॥वार्धकेपत्यवित्तांतःकर्मभिर्बध्यतेपुनः॥ततआयुःक्षयेकंदादपानःकालरूपवान्॥५९॥प्राणंबहिःकरोत्येवशरीरात्कुपितःकिल॥ऊ

ध्वंससंधृतः प्राणोपाशलब्धास्थितिस्ततः ॥६०॥ तं पातमनुपास्यैवजीवः कालःप्रणोदितः ॥ निर्गच्छन्नेववपुषो गृह्यतेयमकिंकरैः ॥६१। तेतंनयंतिबहुधाभीषयंतोयमांतिकं ॥ पंचेंद्रिमनोबुद्धितन्मात्रैर्भूतपंचकैः ॥६२॥ पुनःकर्मशरीरेणप्रयातियमसन्निधिं ॥ ततोयमाज्ञयास्वर्गंनरकंवाप्रपद्यते ॥६३॥ अवशिष्टेनपुण्येनपापेनचसमन्वितः ॥ तेभ्योनिर्गत्यभूतेषुजायतेकर्मतःपुनः ॥६४॥ एवंकदाचिन्नरकंस्वर्गंयोन्यंतराणिच ॥ प्रयांतिजीवामोहेनमोहिताभवसंकटे ॥६५॥ एतेयोगरसायनादागमेभ्यः ॥ एतेहिजीवसङ्घावास्भावभावनयाहिताः ॥ ब्रह्मणःकलिताकाराःसहस्रायुतकोटिशः ॥६६॥ संख्यातीताःपुराजाताजायंतेद्यापिचाभितः ॥ उत्पत्स्येतेपिचैवान्येकणौघाइवनिर्झरात् ॥६७॥ स्ववासनावशावेशादाशाविवशतांगताः ॥ दशास्वतिविचित्रासुस्वयंनिगडिताशयाः ॥६८॥ अनारतंप्रतिदिशंप्रतिदेशंजलेस्थले ॥ जायंतेचम्रियंतेचबुद्बुदाइववारिणि ॥६९॥ केचित्प्रथमजन्मानःकेचिज्जन्मशताधिकाः ॥ केचिच्चासंख्यजन्मानःकेचिद्द्वित्रिभवानराः ॥७०॥ विहरंतिजगत्केचिन्निपतंत्युत्पतंतिच ॥ कंदुकाइवहस्तेनमृत्युनाविरतंहताः ॥७१॥ युग्मं ॥ आशापाशशतैर्बद्धावासनाभारवाहिनः ॥ कायात्कायमुपायांतिवृक्षाद्वृक्षमिवांडजाः ॥७२॥ दिविदेवाभुविनराःपातालेभोगिनोसुराः ॥ ब्रह्मांडेदुंबरफलेस्फुरन्मशकवत्स्थितः ॥७३ तावद्भ्रमंतिसंसारेप्राणिनामनसोभ्रमात् ॥ यावन्मूढानपश्यंतिस्वंचिदात्मानमात्मना ॥ चिदानंदमयेदेवेक्रियतांचित्तसंगतिः ॥ मोहदीर्घमयीनिद्रांत्यजतांसंप्रबुध्यतां ॥७५॥ तत्कर्मयन्नबंधायसाविद्यायाविमुक्तये ॥ आयासायपरंकर्मविद्यान्याशिल्पनैपुणं ॥७६॥ एतेवासिष्ठात् ॥ इतिश्रीबृहच्छार्ङ्गधरविरचितायांपद्धत्यांशांतरसेशारीराख्यानपरिच्छेदः ॥ ● ॥ ● ॥ ●॥

अथयोगः

मंत्रयोगोलयश्चैवराजयोगोहठस्तथा॥योगश्चतुर्विधःप्रोक्तो
योगिभिस्तत्वदर्शिभिः॥१॥आसनंप्राणसंरोधोध्यानंचैवसमा
धिकः॥एतच्चतुष्टयंविद्धिसर्वयोगेषुसंमतं॥२॥ब्रह्मविष्णुशिवा
दीनांमंत्रजाप्यविशारदैः॥साध्यतेमंत्रयोगस्तुवत्सराजादिभि
र्यथा॥३॥इतिमंत्रयोगः॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥

अथलययोगः

कृष्णद्वैपायनाद्यैस्तुसाधितोलयसंज्ञितः॥नवस्वेवहिचक्रेषुल
यंकृत्वामहात्मभिः॥१॥प्रथमंब्रह्मचक्रंस्यात्तृणावर्तंभगाकृतिः
॥अयानेमूलकंदाख्यंकामरूपंचतज्जगुः॥२॥तदेववन्हिकुंडेस्या
त्तत्रकुंडलिनीतथा॥तांजीवरूपिणींध्यायेज्ज्योतिष्कंमुक्तिहेत
वे॥३॥स्वाधिष्ठानंद्वितीयंस्याच्चक्रंतन्मध्यगंविदुः॥पश्चिमा
भिमुखंलिंगंप्रवालांकुरसन्निभं॥४॥तत्रोड्डीयानपीठेतुतं
ध्यात्वाकर्षयेज्जगत्॥तृतीयंनाभिचक्रंस्यात्तन्मध्येभुजगीस्थि
ता॥५॥पंचावर्तामध्यशक्तिश्चिद्रूपाविद्युदाकृतिः॥तांध्यात्वा
सर्वसिद्धीनांभाजनंजायतेबुधः॥६॥चतुर्थंतुहृदयेचक्रंविज्ञे
यंतदधोमुखं॥ज्योतिरूपंचतन्मध्येहंसंध्यायेत्प्रयत्नतः॥७॥
तंध्यायतोजगत्सर्वंवश्यंस्यान्नात्रसंशयः॥पंचमंकंठचक्रंस्या
त्तत्रवामेइडाभवेत्॥८॥दक्षिणेपिंगलाज्ञेयासुषुम्नामध्यतः
स्थितां॥तत्रध्यात्वाशुचिर्ज्योतिःसिद्धीनांभाजनंभवेत्॥९॥ष
ष्ठंचतालुकाचक्रंघटिकास्थानमुच्यते॥दशमद्वारमार्गंतुराज्य
दंतमतज्जगुः॥१०॥तत्रशून्येलयंकृत्वामुक्तोभवतिनिश्चितं॥
भ्रूचक्रंसप्तमंविद्याद्बिंदुस्थानंचतद्विदुः॥११॥भ्रुवोर्मध्येवर्तुलं
चध्यात्वाज्योतिःप्रमुच्यते॥अष्टमंब्रह्मरंध्रेस्यात्परंनिर्वाणसू
चकं॥१२॥तंध्यात्वासूचिकाग्राभंधूमाकारंविमुच्यते॥तच्च
जालंधरंज्ञेयंमोक्षदंलीनचेतसां॥१३॥नवमंब्रह्मचक्रंस्याद्द
लैःषोडशभिर्युतं॥संविद्रूपाचतन्मध्येशक्तिरूर्ध्वास्थितापरा॥
तत्रपूर्णगिरौपृष्ठेशक्तिंध्यात्वाविमुच्यते॥एतेषांनवचक्राणा

मेकैकंध्यायतोमुने॥ सिद्धयोमुक्तिसहिताःकरस्थास्युर्दिनेदिने॥ कोदंडद्वयमध्यस्थंपश्यतिज्ञानचक्षुषा॥१६॥ कदंबगोलकाकारंब्रह्मलोकंव्रजंतिते॥ ऊर्ध्वशक्तिनिपातेनअधःशक्तेर्निकुंचनात्॥१७॥ मध्यशक्तिप्रबोधेनजायतेपरमंसुखं॥१८॥

अथराजयोगः

दत्तात्रयादिभिःपूर्वंसाधितोयंमहात्मभिः॥ राजयोगोमनोवायूस्थिरौकृत्वाप्रयत्नतः॥१॥ पूर्वाभ्यस्तौमनोवातौमूलाधारंनिकुंचनात्॥ पश्चिमंदंडमार्गंतुशंखिन्यंतःप्रवेशयेत्॥२॥ ग्रंथित्रयंभेदयित्वानीत्वाभ्रमरकंदरं॥ ततस्तुनाद्येहिंदुंततःशून्यालयंव्रजेत्॥३॥ अभ्यासात्तुस्थिरस्वांतऊर्ध्वरेताश्चजायते॥ परानंदमयोयोगीजरामरणवर्जितः॥४॥ अथवामूलसंस्थानमुद्यतैस्तुप्रबोधयेत्॥ सुप्तांकुंडलिनींशक्तिंबिसतंतुनिभाकृतिं॥५ सुषुम्नांतःप्रवेश्यैवपंचचक्राणिभेदयेत्॥ ततःशिवेशशांकेनस्फुरन्निर्मलरोचिषि॥६॥ सहस्रदलपद्मांतःस्थितेशक्तिंनियोजयेत्॥ अथतत्सुधियासर्वांसबाह्याभ्यंतरांतनुं॥७॥ प्लावयित्वाततोयोगीनकिंचिदितिचिंतयेत्॥ ततउत्पद्यतेतस्यसमाधिर्निस्तरंगिणी॥८॥ एवंनिरंतराभ्यासाद्योगसिद्धिःप्रजायते॥९॥ एतेशार्ङ्गधरस्य॥ इतिश्रीबृहच्छार्ङ्गधरविरचितायांपद्धत्यांशांतरसेमंत्रयोगलययोगराजयोगपरिच्छेदः

अथहठयोगः

द्विधाहठःस्यादेकस्तुगोरक्षादिसुसाधितः॥ अन्योमृकंडुपुत्राद्यैःसाधितोनाशमुद्यतैः॥१॥ तत्रगोरक्षसदृशैःसाधितोयःसकथ्यते॥ धीरैरपिहिदुःसाध्यःकिंपुनःप्राकृतैर्जनैः॥२॥ आसनंप्राणसंरोधःप्रत्याहारश्चधारणा॥ ध्यानंसमाधिरेतानियोगांगानिस्मृतानिषट्॥३॥ एकांतेविजनेदेशेपवित्रेनिरुपद्रवे॥ कंबलाजिनवस्त्राणामुपर्यासनमभ्यसेत्॥४॥ उत्तानौचरणौकृत्वाऊरुसंस्थौप्रयत्नतः॥ ऊरुमध्येतथोत्तानौपा

णीपद्मासनंत्विदं॥५॥ इत्यासनं॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀॥

अथप्राणायामः

तत्रपद्मासनंबध्वाततःसंकोचयेत्यधः॥समदंडंशिरःकृत्वानासिकांतर्दृशंनयेत्॥१॥यथैवोत्पलनालेन आकर्षतिनरोजलं॥योगीयोगसमाविष्टस्तथाकर्षतिमारुतं॥२॥काकचंचुपुटीकृत्यओष्ठौशक्त्यानिलंपिबेत्॥ॐकारध्वनिनाकृष्यपूरयेद्यावदंतरं॥॥३॥पूरणात्पूरकंप्रोक्तंकुंभकस्तुनिकुंभनात्॥रेचनंरेचनात्स्म्यंततोंतःशोध्यतेत्रिभिः॥४॥प्राणायामान्नरःषष्टिंकुर्यादेवमहर्मुखे॥ चत्वारिंशच्चमध्यान्हेसंध्यायांविंशतिर्भवेत्॥५॥अर्धरात्रेविंशतिःस्यादेवंप्राणविनिग्रहः॥शरीरलघुतादीप्तिर्जठराग्निविवर्धनं॥६॥ कृशत्वंचशरीरस्यजायतेवैध्रुवंतदा॥लवणंसर्षपान्साम्लमुष्णांरूक्षंचतीक्ष्णकं॥७॥स्त्रीसेवामग्निसेवांचबव्हाशित्वंचवर्जयेत्॥क्षीरंघृतंचमिष्टान्नंमिताहारश्चशस्यते॥८॥मितोक्तिःपवनाभ्यासोनिद्रायाश्चजयस्तथा॥केवलेकुंभकेसिद्धेरेचपूरविवर्जिते॥९॥नतेषुदुर्लभंकिंचित्त्रिषुलोकेषुविद्यते॥ततोधिकतराभ्यासाद्भवतःस्वेदकंपने॥१०॥ततोधिकतराभ्यासाद्दर्दुरोजायतेध्रुवं॥यथैवदर्दुरोगच्छेदुत्प्लुत्योत्प्लुत्यभूतले॥११॥ पद्मासनस्थितोयोगीतथागच्छतिभूतले॥ततोधिकतराभ्यासाद्भूमित्यागश्चजायते॥१२॥स्वल्पंवाबहुवाभुक्त्वायोगीनव्यथतेतदा॥अल्पमूत्रपुरीषश्चस्वल्पनिद्रश्चजायते॥१३॥कोटिभोदुःखिकालालास्वेदोदुर्गंधितातनोः॥एतानिसर्वदातस्यनजायंतेततःपरं॥स्त्रीसंगंवर्जयेद्यत्नाद्बिंदुंरक्षेत्प्रयत्नतः॥आयुःक्षयोबिंदुनाशादसामर्थ्यंचजायते॥१५॥ इतिप्राणायामः॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀॥

अथप्रत्याहारः

विषयद्वारनिष्क्रांतंयावत्स्वविषयान्प्रति॥ चित्तंनिवार्यतेयत्रप्रत्याहारःसउच्यते॥१॥ इतिप्रत्याहारः॥ ॥❀॥ ❀ ॥❀॥

अथपंचधारणा

गुरूपदेशतश्चित्तमेकस्मिन्स्थानकेयदि॥ वायुश्चरुध्यतेयत्र
धारणासाविधीयते१॥ नाभेरधोगुदस्योर्ध्वेघटिकाःपंचधारये
त्॥ वायुंततोलभेत्पृथ्वीधारणंतद्भयापहं॥२॥ पृथिवीसंभ
वोमृत्युर्नभवेदस्ययोगिनः॥ इतिपृथ्वीधारणा॥ नाभिस्था
नेततोवायुंधारयेत्पंचनाडिकाः॥ ततोजलाद्भयंनास्तिजलमृ
त्युर्न्नयोगिनः॥१॥ इतिजलधारणा॥ नाभ्यूर्ध्वमंडलेवायुंधा
रयेत्पंचनाडिकाः॥ आग्नेयीधारणासेयंमृत्युस्तस्यनवन्हि
ना॥१॥ इतितेजोधारणा॥ नासाभ्रूमध्यदेशेतुतथावायुंचं
धारयेत्॥ वायवीधारणासेयंमृत्युस्तस्यनवायुना॥१॥ इतिवाय
वीधारणा॥ भ्रूमध्यस्योपरिस्पष्टाधारयत्स्येवनाडिकाः॥ वायुं
योगीप्रयत्नेनसेयमाकाशधारणा॥१॥ इत्याकाशधारणा॥ आ
काशधारणंकुर्वन्मृत्युंजयतिनिश्चितं॥ यत्रयत्रस्थितोवापी
सुखमत्यंतमश्नुते॥१॥ इतिपंचधारणा॥ छ॥ छ॥ छ॥

अथध्यानं

वायुःपरिचितोयत्नादग्निनासहकुंडली॥ बोधयित्वासुषुम्नां
यांप्रविशेदग्निरोधतः॥१॥ महापथंप्रविश्यैवशून्यस्थानेलयं
व्रजेत्॥ यदातदाभवेद्योगीत्रिकालमलदर्शनः॥२॥ इतिध्यानं
अथसमाधिः॥ यदेतस्यानमारव्यातंनच्चेत्परिणयत्यपि॥ चेत
न्यानंदरूपेणससमाधिरुदीरिता॥३॥ इतिसमाधिः॥ छ॥

अथजाग्रत्स्वप्नसुषुप्तितुरीयावस्थाप्रोच्यंते

बुद्धिपूर्वंतुयज्ज्ञानंबहिर्विषयसेवितं॥ प्रत्यक्षमनिरुद्धंचतज्जा
गरितमुच्यते॥१॥ अर्थाभावेतुयज्ज्ञानंप्रत्यक्षमिवदृश्यते॥
गंधर्वनगराकारंस्वप्नंतदुपलक्षयेत्॥२॥ जाग्रत्स्वप्नौतुभावे
तौनित्यंयत्रप्रतिष्ठितौ॥ उत्पत्तिःप्रलयश्चैवसौषुप्तमवधारये
त्॥३॥ स्वप्नाभावोविनिद्राचद्वयंयत्रनविद्यते॥ तत्तुरीयमिति
प्रोक्तमुत्पत्तिलयवर्जितं॥४॥ इतिजाग्रत्स्वप्नसुषुप्तितुरीयावस्थाः

अथदेहंस्थिरीकर्तुंयोगिनांसिद्धिमिच्छतां ॥ कथ्यतेमुद्रकर्मा॰
णियैःसिद्धिंप्रापुरुत्तमाः ॥१॥ महामुद्रांनभोमुद्रामुड्डीयानंजलंध
रं ॥ मूलबंधंस्थिरंदंडंहस्ताभ्यांधारयेद्दृढं ॥२॥ चिबुकंहृदिविन्य
स्यपूरयेद्वायुनापुनः ॥ कुंभकेनयथाशक्त्याधारयित्वातुरेचयेत्
॥३॥ वामांगेनसमभ्यस्यदक्षिणांगेनवाभ्यसेत् ॥ इतिमहामुद्रा
॥ अंतःकपालविवरेजिह्वामाकुंच्यधारयेत् ॥ भ्रूमध्यदृष्टिरमृतं
पिबेत्खेचरमुद्रया ॥४॥ इतिनभोमुद्रा ॥ कंठमाकुंच्यहृदयेस्था
पयेद्दृढमिच्छया ॥ जालंधरोबंधएषसुधाव्ययनिवारणः ॥५॥
नाभिस्थोग्निःकपालस्थसहस्रकमलच्युतं ॥ अमृतंसर्वदास
र्वंपिबन्ज्वलतिदेहिनां ॥६॥ यथासोग्निःसदमृतंनपिबेतद्वि
धित्स्वयं ॥ यांतिदक्षिणमार्गेणएवमभ्यसतासदा ॥७॥ अमृ
तीकुरुतेदेहंजालंधरमितिस्मृतं ॥ इतिजालंधरं ॥ उड्डीयानं
तुसहजंकथितंगुरुणासदा ॥ अभ्यसेत्सततंयस्तुवृद्धोपित
रुणोभवेत् ॥१॥ नाभेरूर्ध्वमधश्चापिपानंकुर्यात्प्रयत्नतः ॥ष
ण्मासाभ्यासतोमृत्युंजयत्येवनसंशयः ॥२॥ इत्युड्डीयपानं ॥
मूलंबंधंचयोनित्यमभ्यसेत्सहियोगवित् ॥ गुदंपार्ष्णेन सं
पीड्यवायुमाकुंचयेद्बलात् ॥३॥ वारंवारंयथाचोर्ध्वंसमा॰
यातिसमीरणः ॥ प्राणापानौनादविंदूमूलबंधेनचैकतां ॥
॥४॥ गत्वायोगस्यसंसिद्धिंगच्छतोनात्रसंशयः ॥ अपानप्रा
णयोरैक्यंक्षयोमूत्रपुरीषयोः ॥५॥ युवाभवतिवृद्धोपिसत
तंमूलबंधनात् ॥ इतिमूलबंधः ॥ पृष्ठबंधंदृढंकुर्यादनग्रंस्थि
रसंचयं ॥ दंडधारणमेतद्धियोगिनांपरमंस्मृतं ॥१॥ इतिदंड
धारणं ॥ एतेयोगशास्त्रेभ्यः ॥ इतिश्रीबृहच्छार्ङ्गधरविरचि
तायांपद्धत्यांशांतरसेहठयोगपरिच्छेदः ॥ छ ॥ छ ॥ छ ॥

अथमार्कंडेयादिसाधितोद्वितीयोहठयोगः

श्लोकार्धेनप्रवक्ष्यामियत्नोक्तंव्यासकोटिभिः ॥ ममेतिमूलं॰
दुःखस्यनममेतिचनिर्वृत्तिः ॥१॥ निर्ममत्वंविरागायवैराग्या

योगसंगतिः॥योगाज्जायतेज्ञानंज्ञानान्मुक्तिःप्रजायते॥२॥उपभोगेनपुण्यानांप्राकृतानांतथांहसां॥कर्तव्यमितिनित्यानामकामकरणात्तथा॥३॥असंचयादपूर्वस्यक्षयात्पूर्वार्जितस्य च॥कर्मणोबंधमाप्नोतिशारीरंनपुनःपुनः॥४॥अथेहकथ्यतेस्माभिःकर्मणांयेनबंधनं॥छिद्यतेसदुपायेनश्रुत्वातत्रप्रवर्त्यतां॥५॥अष्टावंगानियोगस्ययमोनियमआसनं॥प्राणायामःप्रत्याहारोधारणाध्यानतत्परः॥६॥अहिंसासत्यमस्तेयंब्रह्मचर्यापरिग्रहः॥इष्टानिष्टयमाविंतायमएषप्रकीर्तितः॥७॥इतियमः॥ ॥अथनियमः॥ स्वाध्यायशौचसंतोषोदेवताराधनंतपः॥वैराग्यंचजनासंगोनियमोप्येषउच्यते॥८॥ इति०

अथासनं

नाध्मातःक्षुधितःश्रांतोनचव्याकुलचेतनः॥युंजीतयोगंयोगज्ञोनित्यंसिध्यर्थमादृतः॥१॥निशीथेनातिचैवोष्णेनदुर्गेनांबुनस्तटे॥नसोपद्रवदेशेषुयोगःसंधीयते क्वचित्॥२॥एकांतेविजनेरण्येपवित्रेनिरुपद्रवे॥सुखासीनःसमाधिःस्याद्स्वाजिनकुशोत्तरे॥३॥पद्ममर्धासनंचापितथासिद्धासनादिकं॥आस्थाययोगंयुंजीतकृत्वाचप्रणवंहृदि॥४॥समःसमासनोभूत्वासंहृत्यचरणावुभौ॥संवृतोस्यस्तदाचम्यासम्यग्विष्टभ्यचाग्रतः॥५॥पाणिभ्यांलिंगवृषणावस्पृशन्प्रयतःस्थितः॥किंचिदुन्नामितशिरोदंतैर्दंतानसंस्पृशन्॥६॥संपश्यन्नासिकाग्रंस्वंदिशश्चानवलोकयन्॥कुर्याद्दृष्टंपृष्ठवंशमुड्डीयानंतथोत्तरे॥७॥त्रिभिर्विशेषकं॥उत्तानौचरणौकृत्वाऊरूसंस्थौप्रयत्नतः॥ऊरूमध्येतथोत्तानौपाणीपद्मासनंत्विदं॥८॥दक्षिणोरूतलेवामंपादंन्यस्यतुदक्षिणं॥वामोरोरुपरिस्थाप्यमेतदर्धासनंमतं॥९॥पार्ष्णिंतुवामपादस्ययोनिस्थानेनियोजयेत्॥वामोरोरूपरिस्थाप्यदक्षिणःसिद्धमासनं॥१०॥इति·

अथप्राणायामः

प्राणायामैर्दहेद्दोषान्प्रत्याहारेणपातकं॥धारणाभिश्चदुःखा
निध्यानेनानीश्वरान्गुणान्॥१॥यथापर्वतधातूनांध्मातानां
दह्यतेमलं॥तथेंद्रियकृतादोषाद्दह्यंतेप्राणनिग्रहात्॥२॥व
श्यंकर्तुंयथेच्छातोनागंनयतिहस्तिपः॥तथैवयोगीछंदेन
प्राणंनयतिसाधितुं॥३॥यथाहिसाधितःसिंहोमृगान्हंतिनमा
नवान्॥तथाहिसाधितःप्राणःकिल्बिषंननृणांतनुं॥४॥प्रा
णायामंविनायोगंसाधयेद्यस्तुमंदधीः॥सनसाध्वीगतिंयाति
पंगुर्वाजिगतिंयथा॥५॥तस्मात्तुसाधनंकुर्यात्प्राणायामस्ययो
गवित्॥प्राणापाननिरोधश्चप्राणायामःप्रकीर्तितः॥६॥सव्या
हृतिंसप्रणवांगायत्रींशिरसासह॥त्रिःपठेदायतप्राणःप्राणा
यामःसउच्यते॥७॥चक्षुःस्पंदनमात्रस्ययावद्द्वादशसंज्ञकाः
॥तावन्निरुध्यतेप्राणःप्राणायामःसएवहि॥८॥स्वजानुतः
करावर्तंयावद्द्वादशनाडिकाः॥तावन्निरुध्यतेप्राणःप्राणाया
मःप्रकीर्तितः॥९॥प्राणायामोलघुस्त्वेकोद्विगुणोमध्यमःस्मृ
तः॥उत्तमस्त्रिगुणोज्ञेयइत्येषावैदिकीस्थितिः॥१०॥प्रथमेन
यजेत्स्वेदंद्वितीयेनचवेपथुं॥विषादंहितृतीयेनजयेद्दोषान
नुक्रमात्॥११॥द्विगुणोत्तरयावृत्त्याप्रत्याहारस्तुधारणा॥
ध्यानंसमाधिरित्येवंप्राणायामादनुक्रमात्॥१२॥तस्माद्युक्तः
सदायोगीप्राणायामपरोभवेत्॥श्रूयतांमुक्तिफलदंतस्याव
स्थाचतुष्टयं॥१३॥ध्वस्तिःप्राप्तिस्तथासंवित्प्रसादश्चमहाम
ते॥स्वरूपंशृणुचैतेषांकथ्यमानमनुक्रमात्॥१४॥कर्मणामि
ष्टदुष्टानांजायतेफलसंक्षयः॥चेतसोर्थेकषायत्वाद्यत्रसाध्व
स्तिरुच्यते॥१५॥ऐहिकामुष्मिकान्कामान्लोभमोहात्मकांश्च
यान्॥निरुध्यास्तेयदायोगीप्राप्तिःस्यात्सार्वकामिकी॥१६॥अ
तीतानागतानर्थान्विप्रकृष्टतिरोहितान्॥विजानातियदायो
गीतदासंविदितिस्मृता॥१७॥यातिप्रसादंयेनास्यमनःपंच
चवायवः॥इंद्रियाणींद्रियार्थाश्चसप्रसादइतिस्मृतः॥१८॥

प्राणायामस्ययुक्तिस्तु पूर्वाभ्यासस्यकथ्यते॥ यांचक्रुर्मुनयःसर्वे नाडीसंशुद्धिहेतवे॥१९॥पूर्वंदक्षिणहस्तस्यस्वांगुष्ठेनैवपिंगला॥निरुध्यपूरयेद्वायुमिडयातुशनैःसुधीः॥२०॥ यथाशक्तिनिरोधेन ततःकुर्याच्चकुंभकं॥पुनस्त्यजेत्पिंगलयाशनैरेचनकंगतः॥२१॥पुनःपिंगलयापूर्वंपूरयेदुदरंशनैः॥यथात्यजेत्तथापूर्वंधारयेदनिरोधतः॥२२॥नाडीविशुद्धौजातायांततःकुर्याद्यथेच्छया॥२३॥ इतिप्राणायामः॥ छ ॥ छ ॥ छ ॥ छ॥ छ॥

अथप्रत्याहारः

शब्दादिभ्यःप्रपन्नानियदक्षाणियतात्मभिः॥प्रत्याह्रियंतेयोगेन प्रत्याहारस्ततःस्मृतः॥१॥ सबाह्याभ्यंतरंशौचंनिष्पाद्याकंठनाभितः॥पूरयित्वाबुधःप्राणैःप्रत्याहारमुपक्रमेत्॥२॥रजसातमसोवृत्तिंसत्वेनरजसस्तथा॥संछाद्यनिर्मलेसत्वेस्थितोयुंजीतयोगवित्॥३॥इंद्रियाणींद्रियार्थेभ्यःप्राणादीन्मनएवच॥निगृह्यसमवायेनप्रत्याहारमुपक्रमेत्॥४॥यस्तुप्रत्याहरेत्कामान्सर्वांगानीवकच्छपः॥सत्वात्मरतिरेकस्थःपश्यत्यात्मानमात्मना॥५॥ इतिप्रत्याहारः॥ छ॥ छ ॥ छ ॥ छ ॥

अथधारणा

प्राणायामादशद्वौचधारणासाभिधीयते॥द्वेधारणेस्मृतोयोगोमुनिभिस्तत्वदर्शिभिः॥१॥आधारगुदभूतानिहृत्कंठस्तालुनासिके॥भ्रूमध्येमस्तकद्वारेदशस्थानेषुधारणां॥२॥गुरूपदेशमासाद्यएकस्मिंस्थानकेयदि॥रुध्यंतेजन्मनावातोधारणासाभिधीयते॥३॥जिताजिताशनैर्भूमिमारोहेतयथाक्रमं॥दोषान्व्याधीस्तथामोहमादत्तेभूरनिर्जिता॥४॥ इतिधारणा

अथध्यानं

शून्येषुचावकाशेषुगुहासूपवनेषुच॥नित्ययुक्तःसदायोगीध्यानंसम्यगुपक्रमेत्॥१॥ त्यक्तसंगोजितमनालब्धाहारोजितेंद्रियः॥विधायबुद्धिद्वाराणिमनोध्यानेनियोजयेत्॥ २ ॥

आत्मानंचजगत्सर्वंदृशानित्याविभिन्नया॥चिदाकाशमयंध्यायन्योगीयातिपरांगतिं॥३॥अथवाप्रोच्यतेध्यानमन्यदेवात्रयोगिनां॥रहस्यंपरमंमुक्तेःकारणंप्रथमंचयत्॥४॥वायुवच्चलितंचित्तंस्थिरीकर्तुंनशक्यते॥तदर्थंसकलेयाज्यंनतोभवतिनिःकलं॥५॥मूलाधारस्थितंजीवंप्रदीपकलिकाकृतिं॥प्रणवेनसमाकृष्यदशमांतेनिवेशयेत्॥६॥ततोजयेच्चप्रणवंमूलाधारात्समुत्थितं॥नियतिंदशमद्वारेमनसादानरूपिणं॥७यथाप्रयुक्तओंकारःप्रतिनिर्यातिमूर्धनि॥तथोंकारमयोयोगीत्वक्षरेलक्षरोभवेत्॥८॥कुर्वन्नेवयथापश्येन्मनोनेत्रेणयोगवित्॥हंसंबिंदुशिखाज्योतिस्ततोलयमवाप्नुयात्॥९॥ब्रह्मद्वारमुखेसूक्ष्मंनिर्विकल्पंपरात्परं॥परमंज्योतिरासाद्ययोगीतन्मयतांव्रजेत्॥निर्विकल्पपदेप्राप्तेजीवेतज्ज्ञयतांगते॥नश्यंतिसर्वकर्माणितस्मिन्दृष्टेपरावरे॥११॥वृक्षमूर्ध्नियथापक्षीअकस्मादेवदृश्यते॥बुद्धिस्थोदृश्यतामेतिझटित्येवतथाविभुः॥१२॥अग्रतःपृष्ठतोमध्यपार्श्वतोथसमंततः॥विद्युच्चकितवद्भातिसूर्यकोटिसमप्रभः॥१३॥रतांतेस्त्रीयथात्मानंक्षणंकाहंनबुध्यते॥रमणोपिनजानातिकोहंयोगेतथापुमान्॥१४॥शृणात्याश्चर्यवत्कोपिकोप्याश्चर्यवदीक्षते॥श्रुत्वादृष्टातथाप्येनंसम्यग्वेदनकश्चन॥१५॥गुरुप्रसादतोलक्षंलब्ध्वायत्नात्समभ्यसेत्॥अभ्यासादृश्यतेदेवोज्ञानदृष्ट्यामहेश्वरः॥१६॥तेजःपरंद्युतिमतांतमसःपरस्तादादित्यवर्णकनकःस्वरूपं॥आत्मानमात्मनिगतंप्रकृतेर्विभिन्नमानंदमात्रमितिपश्यतियःसमुक्तः॥१७॥यथावेदे॥वेदाहमेतंपुरुषंमहांतमादित्यवर्णंतमसःपरस्तात्॥तमेवविद्वानमृतइहभवतिनान्यःपंथाविद्यतेयनाय॥१८॥इतिध्यानं॥॥

अथसमाधिः

समाधिःसमतावस्थाजीवात्मपरमात्मनोः॥निस्तरंगपदप्राप्तिःपरमानंदरूपिणी॥१॥निःश्वासोच्छ्वासयुक्तोवानिःस्पंदोचल

लोचनः॥शिवध्यायीसुलीनश्चससमाधिस्थउच्यते॥२॥नशृ
णोतियदाकिंचिन्नपश्यतिनजिघ्रति॥नचस्पर्शंविजानातिसस
माधिस्थउच्यते॥३॥इतिसमाधिः॥ छ॥ छ॥ छ॥ छ॥॥

अथतुर्यातीतं

अत्यंतशुद्धचिन्मात्रेपरिणामश्चिरादयः॥तुर्यातीतंपदंतस्या
त्तस्थोभूयोनशोचति॥१॥निद्रादौजागरस्यांतेयोभावउपपद्य
ते॥तद्भावभावितोयोगीमुक्तोभवतिनान्यथा॥२॥यआकाशव
देकात्मासर्वेभगवतोपिसन्॥नभावरंजनामेतिसमहात्मामहे
श्वरः॥३॥यथाजलंजलेनैक्यंनिक्षिप्तमुपगच्छति॥तथात्मा
साम्यतामेतियोगिनःपरमात्मना॥४॥ततोनजायतेनैववर्धते
नविनश्यति॥नापिक्षयमवाप्नोतिपरिमाणंनगच्छति॥५॥छेदं
क्लेदंतथादाहंशोषंभूरादितोनच॥भूतचक्रादवाप्नोतिशब्दाद्यै
र्दूयतेनच॥६॥इतितुर्यातीतं॥एतेपुराणेभ्योयोगशास्त्रेभ्यः
॥इतिश्रीबृ०शा०वि०प०शांतरसेमार्कंडेयादिसाधितोद्वितीयोष्टां
गहठयोगपरिच्छेदः॥ ॥अथमनस्थिरीकरणभावः॥ ॥
यत्रयत्रमनोयातिध्यायतोयोगिनस्तथा॥तत्रैवहिलयंकुर्या
च्छिवःसर्वगतोयतः॥१॥युक्त्यानयाभवेच्चेतच्छिन्नपक्षमचं
चलं॥सर्वत्रैकंशिवंज्ञात्वानिर्विकल्पंविधीयते॥२॥कामक्रो
धादयःसर्वेमलिरक्षाण्यहंकृतिः॥गुणाविविधकर्माणिविलीयं
तेमनःक्षयात्॥३॥अमनस्कंगतेचित्तेजायतेकर्मणांक्षयः॥
यथाचित्रपटेदग्धेदह्यतेचित्रसंचयः॥४॥तक्रयोगाद्यथाक्षी
रंकाठिन्यमुपगच्छति॥तथाजीवोमनस्थैर्यात्परंब्रह्माधिग
च्छति॥५॥यथाहिमप्रभावेनजलंस्थानत्वमाप्नुयात्॥तथाम
नःस्थिरत्वेनजीवःशिवमयोभवेत्॥६॥शिवस्यशक्तिर्जीवो
स्तिजीवशक्तिर्मनस्मृतं॥जीवंशिवंमापयितुंमनएवहिकारणं
॥७॥जीवःशिवःशिवोजीवोनभेदोस्त्यनयोःक्वचित्॥मनो
लिप्तोभवेज्जीवोमनोमुक्तःसदाशिवः॥८॥एतेशार्ङ्गधरस्य

इतिश्रीबृ॰शा॰वि॰पत्थ्यांशांतरसेमनस्थिरीकरणप्रभावपरि॰

अथयोगिमहिमादोषोपसर्गचिकित्सा

सप्तधारणाष्टमहासिद्धिप्राप्तयः

अलौल्यमारोग्यमनिष्ठुरत्वंगंधःशुभोमूत्रपुरीषमल्पं॥कांतिप्रसादःस्वरसौम्यताचयोगःप्रवृत्तेःप्रथमंहिचिन्हं॥१॥ अनुरागंजनोयातिपरोक्षगुणकीर्तनं॥नबिभ्यतिचसत्वानिसिद्धेर्लक्षणमुत्तमं॥२॥शीतोष्णादिभिरत्युग्रैर्यस्यबाधानजायते॥नभीतिमेतिचान्येभ्यस्तस्यसिद्धिरुपस्थिता॥३॥ इतियोगिमहिमा

अथदोषोपसर्गचिकित्सा

प्रमादाद्योगिनोदोषायद्येतेस्युश्चिकित्सिता॥तेषांनाशायकर्तव्यंयोगिनातन्निबोधमे॥१॥बाधिर्यजडतालोपःस्मृतेर्मूकत्वमंधता॥ज्वरश्चजायतेसद्यस्तद्वदज्ञानयोगिनः॥२॥स्निग्धांयवागूंनात्युष्णांचित्तेतत्रैवधारयेत्॥तावद्गुल्मप्रशांत्यर्थमुदावर्तेतथाविधे॥३॥यवागूंचापिपवनेवायुग्रंथ्योपरिक्षिपेत्॥तद्वत्कंपेमहाशैलंस्थिरंमनसिधारयेत्॥४॥विघातेवचसोवाचंबाधिर्येश्रवणेंद्रिये॥तथैवाम्लंफलंध्यायेत्तृषार्तोरसनेंद्रिये॥५॥यस्मिन्यस्मिन्यदादेशेतस्मिंस्तदुपकारणं॥धारयेत्धारणामुष्णेशीतांशीतेविदाहिनी॥६॥काष्ठंशिरसिसंस्थाप्यतथाकाष्ठेनताडयेत्॥लुप्तस्मृतेःस्मृतिःसद्योयोगिनस्तेनजायते॥७॥अमानुषंसत्वमंतर्योगिनंप्रविशेद्यदि॥वाय्वग्निधारणाचैनंदेहसंस्थंविनिर्दहेत्॥८॥एवंसर्वात्मनाकार्यारक्षायोगविदानिशं॥धर्मार्थ‾ काममोक्षाणांशरीरंसाधनंयतः॥९॥प्रवृत्तिलक्षणाख्यानाद्योगिनोविस्मयात्तथा॥विज्ञानंविलयंयातितस्माद्गुह्याःप्रवृत्तयः॥१०॥उपसर्गाःप्रवर्ततेदृष्टेप्यात्मनियोगिनः॥येतांस्तेसंप्रवक्ष्यामिसमासेननिबोधमे॥११॥काम्याःक्रियास्तथाकामान्मानुषानभिवांछति॥स्त्रियोदानफलंविद्यामायुर्दैर्घ्यंधनंदिवं॥१२॥देवत्वममरेशत्वंरसायनचयःक्रियाः॥

मरुत्सुसततंयत्नजलाग्न्यावेशनंतथा॥१३॥ चित्तमित्थंप्रवृ
त्तंहिलयाद्योगिनिवर्तयेत्॥ ब्रह्मासंगिमनःकुर्वन्नुपसर्गा॰
त्प्रमुच्यते॥१४॥ उपसर्गजितैरेभिर्जपसर्गस्ततःपुनः॥ योगि
नःसंप्रवर्तंतेसात्वराजसतामसाः॥१५॥ प्रातिभःश्रावणोदेवो
भ्रमावर्तौतथापरौ॥ पंचैतेयोगिनोयोगविघ्नायकटुकोदयः॥
॥१६॥ वेदार्थशास्त्रकाव्यार्थाविद्याशिल्पान्यशेषतः॥ प्रभवंति
यदस्येतिप्रातिभःसतुयोगिनः॥१७॥ शब्दार्थानखिलान्वेत्तिश
ब्दंगृण्हातिचैवयत्॥ योजनानांसहस्रेभ्यःश्रावणःसोभिधी
यते॥१८॥ अष्टौयदातुदृश्यंतेसमंतादेवयोनयः॥ उपसर्गंतमि
त्याहुरेवमुन्मत्तवद्बुधाः॥१९॥ भ्राम्यतेयन्निरालंबमनोदोषेण
योगिनः॥ समस्ताधारविभ्रंशाद्भ्रमःसपरिकीर्तितः॥२०॥ आ
वर्तइववतोयस्यज्ञानावर्तोयदाकुलः॥ चित्तमासकृतावर्तेमु
पसर्गःसउच्यते॥२१॥ एभिर्नाशितयोगास्तुसकलादेवयोनयः
॥उपसर्गैर्महाघोरैरावर्ततेपुनःपुनः॥२२॥ प्रवर्तकंबलंसुक्तंयो
गीतस्मान्मनोमयं॥ चिंतयेत्परमंब्रह्मकृत्वातत्प्रवणंमनः॥॰

अथसप्तधारणा

॥२३॥
योगयुक्तःसदायोगीलब्ध्याहारोजितेंद्रियः॥ सूक्ष्मास्तुधारणाः
सप्तभूराद्यामूर्ध्निधारयेत्॥१॥ धरित्रींधारयेद्योगीततःसूक्ष्मं
प्रवर्तते॥ आत्मानंमन्यतेचाधितद्गंधंचजहातिसा॥२॥ तथै॰
वाप्सुरसंसूक्ष्मंतद्वद्रूपंचतेजसि॥ स्पर्शंवायौतथातद्वद्विभ्र
तस्तस्यधारणः॥३॥ व्योम्नःसूक्ष्मप्रवृत्तेश्चशब्दंतद्वज्जहाति
सः॥ मनसासर्वभूतानांमनश्चाविशतेयदा॥४॥ मानसींधार
णांबिभ्रन्मनःसौक्ष्म्यंचजायते॥ तद्वद्बुद्धिमशेषाणांसत्वमा
नेत्स्ययोगवित्॥५॥ परित्यजतिसंप्राप्यबुद्धिसौक्ष्म्यमनुत्तमं
॥यस्मिन्यस्मिंस्तुकुरुतेभूतेरागंमहामते॥६॥ तस्मिंस्तस्मि
न्समाशक्तिंसंप्राप्यसविनश्यति॥ तस्माद्विदित्वासूक्ष्माणि
संसक्तानिपरस्परं॥७॥ परित्यजतियोयोगीसपरंप्राप्नुयात्पदं॥

एतान्येवतुबंधायसप्तसूक्ष्माणिसर्वदा॥८॥ भूतादीनांविरागो
त्रसंभवेद्यस्तमुक्तये॥गंधादिषुसमासक्तामिस्येतदखिलंज
गत्॥९॥पुनरावर्ततेसौख्यात्सब्रह्मामरमानुषां॥सप्तैताः
धारणायोगीसमतीत्ययदीच्छति॥१०॥तस्मिंस्तस्मिंस्तदाभू
तेलयंयातिविधानतः॥देवानामसुराणांचगंधर्वोरगरक्षसां
॥११॥देहेषुलयमायातिसंगमाप्नोतिनक्वचित्॥इतिसप्तधारणा

अथाष्टमहासिद्धिप्राप्तिः

अणिमालघिमाचैवमहिमाप्राप्तिरेवच॥प्राकाम्यंचतथेशित्वंव
शित्वंचतथापरं॥१॥यत्रकामावसायित्वंगुणानेतांस्तथेश्वरा
न्॥प्राप्नोत्यष्टावनायासात्परंनिर्वाणसूचकान्॥२॥सूक्ष्मात्सू
क्ष्मतरोणीयान्शीघ्रत्वाल्लघिमागुणः॥महिमाशेषपूज्यत्वात्प्राप्ति
र्नाप्राप्यमस्ययत्॥प्राकाम्यमस्यव्यापित्वादीशत्वंचेश्वरोयतः॥
॥वशित्वाद्वशितानामयोगिनःसप्तमोगुणः॥४॥यत्रेच्छास्था
नमप्युक्तंयत्रकामावशायिता॥ऐश्वर्यकारणैरेभिर्योगिनःप्रो
क्तमष्टधा॥५॥एतेमार्कंडेयपुराणात्॥इतिश्रीवृहच्छार्ङ्ग
धरविरचितायांपद्धत्यांशांतरसेयोगिमहिमादोषोपसर्गचि
कित्सासप्तधारणाष्टमहासिद्धिप्राप्तिपरिच्छेदः॥७॥७॥

अथयोगिचर्या

वाग्दंडःकर्मदंडश्चमनोदंडश्चतेत्रयः॥यस्यैतेनियतादंडाःस
त्रिदंडीनिगद्यते॥१॥यानिशासर्वजंतूनांतस्यांजागर्तिसंयमी
॥यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेः॥२॥येनकेनचि
दाछन्नोयेनकेनचिदाशितः॥यत्रसायंगृहेयातितंदेवायोगि
नंविदुः॥३॥मानावमानौयावेतौप्रीत्युद्वेगकरौनृणां॥तावेववि
परीतार्थौयोगिनःसिद्धिकारकौ॥४॥चक्षुःपूतंन्यसेत्पादंवस्त्र
पूतंजलंपिबेत्॥सत्यपूतांवदेद्वाणींबुद्धिपूतंविचिंतयेत्॥५
॥सर्वसंगविहीनश्चसर्वपापविवर्जितः॥जडवन्मूकवद्योगीवि
चरेतमहीतलं॥६॥असिधारांविषंवन्हिंसमत्वेयःप्रपश्यति॥॥

मालासुधातुषाराणांसयोगीकथ्यतेबुधैः॥७॥यस्मिन्स्थानेक्ष
णंतिष्ठेदीदृग्योगीकथंचन॥आयोजनंचतुर्दिक्षुपवित्रंतत्रच
क्षते॥८॥चतुःसागरपर्यंतांपृथिवींयोददातिच॥तत्वज्ञस्यच
योभिक्षांसमंवानाथवासमं॥९॥आतिथ्यश्राद्धयज्ञेषुदेवया
त्रोत्सवेषुवा॥महाजनेचसिद्ध्यर्थीनगच्छेद्योगवित्क्वचित्॥
॥१०॥जातेविधूमेचांगारेसर्वस्मिन्भुक्तवज्जने॥अटेतयोगविद्भै
क्ष्यंनतुतेष्वेवशिल्यशः॥११॥यथैवमवमन्यंतेजनाःपरिभवं
तिच॥तथायुक्तश्चरेद्योगीसतांधर्ममदूषयन्॥१२॥भैक्ष्यंगृ
पहन्नृहस्थेषुश्रोत्रियेषुचरेद्यदि॥फलमूलंयवाग्वन्नंयस्त
क्षेचसक्तवः॥१३॥ब्रह्मचर्यमलोभंचदयाक्रोधःसुचिंतता॥
॥आहारलाघवंशौचंयोगीनांनियमाःस्मृताः॥१४॥सारभूत
मुपासीतज्ञानंतत्कार्यसाधनं॥ज्ञानानांबहुतायेयंयोगविघ्न
करीहिसा॥१५॥इदंज्ञेयमिदंज्ञेयमितियस्तृषितश्चरेत्॥अ
पिकल्पसहस्रेषुनैवज्ञेयमवाप्नुयात्॥१६॥समाहितोब्रह्मप
रोप्रमादीबुधस्तथैकांतरसंयतेंद्रियः॥विशुद्धबुद्धिःसमलो
ष्टकांचनःप्राप्नोतियोगीपरमव्ययंपदं॥१७॥एतेमार्कंडेयपुरा
णात्॥इतिश्रीवृ०शा०शांतरसेयोगिचर्यापरिच्छेदः॥७॥७॥

अथारिष्टज्ञानं

अक्षीणकर्मबंधस्तुज्ञात्वाकर्मात्युपस्थितं॥उत्क्रांतिकालेसं
स्मृत्यपुनर्योगित्वमृच्छति॥तस्माद्सिद्धयोगेनसिद्धयोगेन
वापुनः॥ज्ञेयान्यरिष्टानिसदायेनोत्क्रांतौनसीदति॥२॥अरि
ष्टानिविशिष्टानिशृणुवक्ष्यामितानिते॥येषामालोकनान्मृत्यु
निजंजानातियोगवित्॥३॥देवमार्गंध्रुवंशुक्रंसोमच्छायाम
रुंधतीं॥योनपश्येन्नजीवेत्सनरःसंवत्सरात्परं॥४॥अर
श्मिबिंबंसूर्यस्यवह्निंचैवांशुमालिनं॥दृष्ट्वैकादशमासां
श्चनरोनोर्ध्वंसजीवति॥५॥वांत्यामूत्रंपुरीषंयःसुवर्णरजतं
वमेत्॥प्रत्यक्षमथवास्वप्नेजीवितंदशमासिकं॥६॥दृष्ट्वा

प्रेतपिशाचादीन्गंधर्वनगराणिच॥ सुवर्णवर्णवृक्षांश्चनवमासा
न्सजीवति॥७॥ स्थूलःकृशःकृशःस्थूलोयोकस्मादेवजायते॥ प्र
कृतेश्चनिवर्तेततस्यायुश्चाष्टमासिकं॥८॥ खंडंयस्यपदंपार्ष्णौ
पादस्याग्रेथवाभवेत्॥ पांसुकर्दममध्येवाससमासान्सजीवति
॥९॥ कपोतगृध्रकाकोलावायसोवापिमूर्धनि॥ क्रव्यादोवापरो
लीनःषण्मासायुःप्रदर्शकः॥१०॥ हन्यतेकाकपंक्तीभिःपांसुवर्षे
णवानरः॥ स्वच्छायांवान्यथादृष्ट्वाचातुर्मासान्सजीवति॥११॥
अनभ्रेविद्युतंदृष्ट्वादक्षिणादिशमाश्रितां॥ पश्येदिंद्रधनुर्वापिजी
वितंत्रिद्विमासकं॥१२॥ घृतेतैलेतथादर्शेतोयेवाप्यात्मनस्तनुं॥
यःपश्येदशिरस्कंधांमासादूर्ध्वंनजीवति॥१३॥ यस्यवन्हिसमो
गंधोगात्रेशवसमोपिवा॥ तस्यमासाधिकंज्ञेयंयोगिनःकिलजी
वितं॥१४॥ यस्यवैस्नातमात्रस्यहृत्तोयमवशुष्यति॥ पिबतश्च
जलंशोषोदशाहंसोपिजीवति॥१५॥ यस्यापिहन्यतेदृष्टैर्भूतैरा
त्रावथोदिवा॥ समृत्युंसप्तरात्रांतंपुमान्प्राप्नोत्यसंशयः॥१६॥
पिधायकर्णौचनिर्जोनशृणोत्यात्मसंभवं॥ नश्यतेचक्षुषोर्ज्यो
तिर्यस्य — सोपिनजीवति॥१७॥ रक्तकृष्णांबरधरागीतहास्य
परायणं॥ दक्षिणाशांनयेन्नारीस्वप्नेसोपिनजीवति॥१८॥ न
ग्नंक्षपणकंस्वप्नेहसंतंनृत्यतत्परं॥ एकंविलक्षंविभ्रांतंविद्या
न्मृत्युमुपस्थितं॥१९॥ पंततोयस्यवैगर्तेस्वप्नेद्वारंपिधीयते॥
॥ नचोत्तिष्ठतियःस्वभ्रात्तदंतंतस्यजीवितं॥२०॥ स्वप्नेग्निंप्रवि
शेद्यस्तुनचनिःक्रमतेपुनः॥ जलप्रवेशादपिवातदंतंतस्यजी
वितं॥२१॥ करालैर्विकटैःकृष्णैःपुरुषैरुद्यतायुधैः॥ पाषाणैस्ता
डितःस्वप्नेसद्योमृत्युर्भवेन्नरः॥२२॥ दीपादिगंधंनोवेत्तित्रस्य
त्यग्निंतथानिशि॥ नात्मानंपरनेत्रस्थंवीक्षतेयःसमृत्युमान्॥२३॥ स्व
भाववैपरीत्येतुशरीरस्यविपर्यये॥ कथयंतिमनुष्याणांसमा
सन्नौयमांतकौ॥२४॥ आरक्ततामेतिमुखंजिह्वाचाप्यसिता
भवेत्॥ तदाप्राज्ञोविजानीयान्मृत्युमासन्नमागतं॥२५॥

नासिकावक्रतामेतिकर्णयोर्नमनोन्नती।।नेत्रंचवामंस्रवति
यस्यतस्यानुतन्नतं।।२६।।योगिनांज्ञानविदुषामन्येषांवामहा
त्मनां।।प्राप्तेतुकालेपुरुषैस्तद्विचार्यंविचक्षणैः।।२७।।एतेमार्कं
डेयपुराणात्।।इतिश्रीबृ॰शा॰शांतरसेअरिष्टज्ञानपरिच्छेदः।।

अथविदेहमुक्तिकथनं

पूर्वाण्हेवापराण्हेवामध्यान्हेवापरेक्वचित्।।यत्रवारजनीभागे
तद्रिष्टंनिरीक्षितं।।१।।तस्यभावेतथैवान्हेयोगंयुंजीतयोग
वित्।।विदेहमुक्तयेज्ञानीत्यक्तामरणजंभयं।।२।।युग्मं।।बद्ध
पद्मासनोधीमान्समसंस्थानकंधरः।।निरुध्यप्राणपवनोदं
तैर्दंतानसंस्पृशन्।।३।।बुध्वानिरुध्यद्वाराणिनवमीलित
लोचनः।।ॐकारंतुधनुःकृत्वागुणंसत्वंनियोज्यच।।४।।तत्रा
त्मानंशरंसोपिवृत्तोभूतेंद्रियादिभिः।।प्राणवायुमनःक्षेपैःक्षि
प्तोहृत्कमलस्थितः।।५।।दशमद्वारमार्गेणलक्ष्यंप्राप्यततःप
रं।।द्वात्रिंशत्तत्वसंयुक्तःपरमात्मनिलीयते।।६।।चतुर्भिःकला
पकः।।ततःपरममाकाशमतींद्रियमगोचरं।।यद्बुध्वानैवचा॰
रब्यात्तुंशक्यतेनंतमश्नुते।।७।।इतिश्रीरहच्छार्ङ्गधरविरचि
तायांपद्धत्यांशांतरसेविदेहमुक्तिकथनपरिच्छेदः।।४।।४

अथकालवंचना

जीवन्मुक्तःसदेहोहंविचरामिजगत्त्रयं।।इतिचेज्जायतेवांछा
योगिनस्तन्निबोधमे।।१।।शरीरंननयस्येवकालःकस्यापिकुत्र
चित्।।अतःशरीररक्षार्थंयत्नःकार्यस्तुयोगिना।।२।।योगिना
सततंयत्नाद्रिष्टानांविचारणा।।कर्तव्यायेनकालोसौज्ञातो
हंतिछलान्नतं।।३।।ज्ञात्वाकालंचतंसम्यकूलपस्थानंसमाश्रि
तः।।युंजीतयोगंकालोस्ययथासौजायतेफलः।।४।।बद्धसिद्धा
सनोदेहंपूरयेत्प्राणवायुना।।कृत्वादंडंस्थिरंबुध्वाशब्दद्वा
राणिरुंधयेत्।।५।।बंधयेत्खेचरींमुद्रांग्रीवायांचजलंधरं।।अ
पानेमूलबंधेचउड्डीयाणंतथोदरे।।६।।उत्थाप्यभुजगांशक्तिं

मूलोद्घातैरधःस्थितां॥सुषुम्नांतर्गतांपंचचक्राणांभेदिनींशिवां॥७॥जीवंत्हृदाश्रयंनीत्वायांतींबुद्धिंमनोयुतां॥सहस्रदलपद्मस्थशिवेलीनांसुधामये॥८॥पीत्वासुधाकरोद्भूतममृतंतेनमूलतः॥सिंचंतींसकलंदेहंप्लावयंतींविचिंतयेत्॥९॥तयासार्धंगतोयोगीशिवेनैकात्मतांव्रजेत्॥परानंदमयोभूत्वाविहृत्तिमपिसंत्यजेत्॥१०॥ततोऽलसमनाभासमहंभावविवर्जितं॥सर्वांगकल्पनाहीनंकथंकालोनिहंतितं॥११॥सएवकालःसशिवःससर्वनापिकिंचन॥कःकेनहन्यतेतत्रम्रियतेनापिकश्चन॥१२॥ततोव्यतीतेसमयेकालस्यभ्रांतिरूपिणः॥योगीसुप्तोत्थितइवप्रबोधंयातिबोधितः॥१३॥एवंसिद्धोभवेद्योगीवंचयित्वाविधानतः॥कालंकलितसंसारंपौरुषेणाद्भुतेनहि॥१४॥ततस्त्रिभुवनेयोगीविचरत्येकएवसः॥पश्यन्संसारवैचित्र्यंस्वेच्छयानिरहंकृतिः॥१५॥यथार्करश्मिसंयोगादर्ककांतोहुताशनं॥आविःकरोतिनैकःसन्दृष्टांतःसतुयोगिनः॥१६॥मृद्देहिकाल्पदेहेपिमुखाग्रेणोत्कणीयथा॥करोतिमृद्गारचयसुपदेशःसयोगिनः॥पिंगलाकुररःसर्पःसारंगान्वेषकोवने॥इषुकारःकुमारीचषडेतेगुरवोमताः॥१८॥गुरुशावविषाणाग्रमालोक्यतिलकाकृति॥सहतेनविवर्त्यतेयोगीसिद्धिमुपाश्नुते॥॥१९॥इतिश्रीबृहच्छार्ङ्गधरविरचितायांपद्धत्यांकालवंचना॰

अथग्रंथप्रशंसा

॥१९॥इतिविरचितबंधापद्धतिर्यामयेयंसकलगुणिगणानांप्रीतयेसास्तुनित्यं॥विपुलविमलदीप्यत्सत्कलानांनिधानंतरुणतरणिरुत्याविद्विषत्कौशिकानां॥१॥क्षीराब्धेःकमलेवकेशवपदाद्गंगेवसाधोर्मुखात्सद्वाणीवसुधानिशाकरमयीभानोरिवोद्योतिता॥माकंदादिवमंजरीजलधराद्वृष्टिर्वयानिर्गतासेयंशार्ङ्गधराततोनुजगतश्चेतोमुदंपद्धतिः॥२॥अस्याभ्यासाद्ग्रंथवर्यस्यशिष्यःसर्वज्ञःस्याद्विस्फुरच्चारुबुद्धिः॥अर्थंकामंवेत्ति

धर्मंचमोक्षंनिःसंदेहंशीलितुंपंडितोपि॥३॥ शास्त्राब्धिंसकलंविलोड्यनितरांग्रंथःकृतोयंमयालोकानंदकरःसमस्तसुकलासंतानजैवातृकः॥ अस्यास्वाद्यसुभाषितामृतरसानानंदपूर्णांतराः इत्थंसंप्रतिनाकवासनिरतान् देवान्हसंतुध्रुवं॥४॥ इतिश्री बृहच्छार्ङ्गधरविरचितायांपद्धत्यांग्रंथप्रशंसापरिच्छेदः॥७॥

॥वाराणसीदासनियोगकारीसत्पद्यमुक्तावलिकांनिरीक्ष्य॥ रत्नाकरंचापिसुभाषितानांतथाकृतिंशार्ङ्गधरस्यवीक्ष्य॥१॥ संगृह्यतेभ्योऽखिलपद्यमुक्तानिवेश्यतायोग्यतमक्रमेण॥ निबंधमेनंकिलकाशिनाथःसमग्रहीत्सत्सभुणोऽभिधानः॥ ॥२॥ इंद्वग्निनागेंदुसमाश्विनेसितेभौमेदशम्यांविजयेमुहूर्त्ते॥ सिद्धाबृहच्छार्ङ्गधराख्यपद्धतिस्तेनोत्तमोदंचिरमीक्षकाणां॥३॥ वाराणसीप्रसादस्यनियोगेनप्रयत्नतः॥ काशीसंस्कृतमुद्रायामंकितोयंशिलाक्षरैः॥४॥ श्रीकाशीजीमेज्ञानवापीकेपूर्वफाटकपरश्रीविश्वनाथजीकेपासमहाराजशिवलालदुबेजीकेमकानमेकाशीसंस्कृतमुद्रायन्त्रमेछपीजिनकोलेनाहोयउन्होंनेइसछापेखानेकेकार्यसंपादकबाबूवाराणसीप्रसादयाकचौरीगलीमेभाईप्रतापसिंहजीकेदुकानपरमिलेगी॥ मितिआश्विनसुक्ल१०भौमवासरेसमाप्तोयंग्रंथः